বসুমতী-শাস্ত্রপ্রচার

# ক্রিয়াকাণ্ড-বারিধি

## পঞ্চ-উপাসক, গুরু-শিষ্য, পুরোহিত যজমানের জ্ঞান-রত্নাকর

## ( তৃতীয় খণ্ড )

সাম, ঋক্, যজুঃ ত্রিবেদ, উপনিষদ,
স্মৃতি, পুরাণ ও সর্ব্বতন্ত্র হইতে
সঙ্কলিত

দেশপূজ্য পণ্ডিতমণ্ডলীর
আনুকূল্যে ও পরিদর্শনে
প্রচারিত

স্বধর্ম্মনিষ্ঠ হিন্দুর গৃহে গৃহে
প্রতিষ্ঠাকল্পে
মূল্য ২॥০ টাকা মাত্র

সৎ-সাহিত্য-প্রচার-ব্রত
উপেন্দ্রনাথ মুখোপাধ্যায়
সঙ্কলিত

সংবর্দ্ধিত, সংশোধিত, সুসংস্কৃত,
শুদ্ধিপত্রযুক্ত নির্ভুল
দ্বিতীয় সংস্করণ

উপেন্দ্রনাথ মুখোপাধ্যায় প্রতিষ্ঠিত
বসুমতী-সাহিত্য-মন্দির
শ্রীসতীশচন্দ্র মুখোপাধ্যায় প্রকাশিত

ভট্টপল্লীনিবাসী অশেষ-শাস্ত্রাধ্যাপক

পণ্ডিত শ্রীনৃত্যগোপাল পঞ্চতীর্থ সংস্কৃত

পণ্ডিতবর কালীপ্রসন্ন বিদ্যারত্ন সংশোধিত

S
294.5926
K 92 u
V.3 Pt.1

১৩১৭ সালে প্রথম সংস্করণ—১০,০০০ দশ সহস্র

১৩৩৩ সালে দ্বিতীয় সংস্করণ—৫,০০০ পঞ্চ সহস্র

১৩৩৮ সালে তৃতীয় খণ্ড—৫,০০০ পঞ্চ সহস্র

SL NO. 075831

THE ASIATIC SOCIETY
CALCUTTA 700016
Acc. No. B 1668
Date 15/11/85

কলিকাতা, ১৬৬ নং বহুবাজার ষ্ট্রীট,

বসুমতী বৈদ্যুতিক-রোটারী মেসিনে

শ্রীপূর্ণচন্দ্র মুখোপাধ্যায় মুদ্রিত।

# সূচিপত্র


| বিষয় | | পৃষ্ঠা |
|---|---|---|
| **সংস্কার-প্রকরণ** | | |
| সামবেদীয় দশবিধ সংস্কার, গুণবিষ্ণু ভাষ্যসহ ভবদেবপদ্ধতি— | | |
| সর্ব্বসাধারণ কুশণ্ডিকা | ··· | ১ |
| জ্ঞাতিকর্ম্ম | ··· | ২২ |
| কন্যা-সম্প্রদান | ··· | ২৪ |
| বিবাহ কুশণ্ডিকা ( পাণিগ্রহণাদি ) | | ৩১ |
| গর্ভাধান | ··· | ৫১ |
| পুংসবন | ··· | ৫৩ |
| সীমন্তোন্নয়ন | ··· | ৫৫ |
| সোষ্যন্তী হোম | ··· | ৫৮ |
| জাতকর্ম্ম | ··· | ৫৯ |
| নামকরণ | ··· | ৬১ |
| নিষ্ক্রমণ | ··· | ৬৪ |
| পৌষ্টিক কর্ম্ম | ··· | ৬৬ |
| অন্নপ্রাশন | ··· | ঐ |
| পুত্রমূর্দ্ধাভিঘ্রাণ | ··· | ৬৮ |
| চূড়াকরণ | ··· | ৬৯ |
| উপনয়ন | ··· | ৭৩ |
| সাবিত্র চরুহোম | ··· | ৮৩ |
| সমাবর্ত্তন | ··· | ৮৫ |
| পরিশিষ্ট | ··· | ৯৩ |
| যজুর্ব্বেদীয় সভাষ্য দশবিধ সংস্কার-পদ্ধতি— | | |
| পশুপতিকৃত ও ব্রহ্ম-সংস্কারমঞ্জরী-ধৃত সামান্য কুশণ্ডিকা | ··· | ৯৪ |
| জ্ঞাতিকর্ম্ম | ··· | ৯৮ |
| বিবাহব্যবস্থা ( পারস্করীয় ) | ··· | ৯৯ |
| কন্যা-সম্প্রদান | ··· | ঐ |
| বিবাহ কুশণ্ডিকা (পাণিগ্রহণাদি ) | | ১০৭ |
| গর্ভাধান | ··· | ১২০ |
| পুংসবন | ··· | ১২৩ |
| সীমন্তোন্নয়ন | ··· | ১২৪ |
| সোষ্যন্তীকর্ম্ম | ··· | ১২৬ |
| জাতকর্ম্ম | ··· | ১২৭ |
| নামকরণ | ··· | ১৩৫ |
| নিষ্ক্রমণ | ··· | ১৩৬ |
| পুত্রমূর্দ্ধাভিঘ্রাণ | ··· | ১৩৭ |
| অন্নপ্রাশন | ··· | ঐ |
| চূড়াকরণ | ··· | ১৩৯ |
| উপনয়ন | ··· | ১৪২ |
| বেদারম্ভ | ··· | ১৫১ |
| সমাবর্ত্তন | ··· | ১৫২ |
| নানামতসম্বলিত ঋগ্‌বেদীয় দশবিধ সংস্কারপদ্ধতি (সটীক)— | | |
| কালেশিকৃতা সর্ব্বসাধারণী কুশণ্ডিকা | | ১৫৮ |
| বিবাহপদ্ধতি | ··· | ১৬৭ |
| বিবাহ কুশণ্ডিকা | ··· | ১৭১ |
| গর্ভাধান | ··· | ১৭৭ |
| পুংসবন | ··· | ১৮১ |
| অনবলোভন | ··· | ১৮৩ |
| সীমন্তোন্নয়ন | ··· | ১৮৪ |
| জাতকর্ম্ম | ··· | ১৮৬ |
| প্রোষিতাগত কর্ম্ম | ··· | ১৮৭ |
| নামকরণ | ··· | ঐ |

| বিষয় | | পৃষ্ঠা |
|---|---|---|
| নিষ্ক্রমণ | ... | ১৮৯ |
| অন্নপ্রাশন | ... | ১৯২ |
| চূড়াকরণ | ... | ১৯৩ |
| উপনয়ন | ... | ১৯৫ |
| সমাবর্ত্তন | ... | ২০১ |

## পাঠ্যপ্রকরণ

| বিষয় | | পৃষ্ঠা |
|---|---|---|
| বিরাটপর্ব্ব | ... | ২০৫ |
| শ্রীমদ্‌ভগবদ্‌গীতা— | | |
| গীতাপাঠক্রম | ... | ৩২৪ |
| গণেশাদি প্রণাম | ... | ৩২৫ |
| শ্রীশ্রীগীতা | ... | ৩২৬ |
| শ্রীশ্রীগীতামাহাত্ম্য | ... | ৩৬২ |
| শ্রীশ্রীচণ্ডী— | | |
| চণ্ডীপাঠসঙ্কল্পাদি | ... | ৩৬৬ |
| চণ্ডীপাঠক্রম | ... | ঐ |
| চণ্ডীপাঠনিয়ম | ... | ৩৬৭ |
| চণ্ডীধ্যান | ... | ৩৬৮ |
| অর্গলাস্তোত্র | ... | ঐ |
| কীলকস্তবরাজ | ... | ৩৭০ |
| চণ্ডীকবচ | ... | ৩৭১ |
| দেবীসূক্ত | ... | ৩৭৩ |
| ঋষিচ্ছন্দোদেবতানির্দ্দেশ | ... | ৩৭৪ |
| শ্রীশ্রীদেবীমাহাত্ম্য (শ্রীশ্রীচণ্ডী) | ... | ৩৭৬ |
| চণ্ডীপাঠাপরাধক্ষমাপণস্তোত্র | ... | ৪০৫ |
| সপ্তশতীরহস্য ( প্রাধানিক রহস্য ) | | ঐ |
| " ( বৈকৃতিকরহস্য ) | ... | ৪০৭ |
| " ( মূর্ত্তিরহস্য ) | ... | ৪০৯ |
| চণ্ডীপাঠফল | ... | ৪১০ |
| একাবৃত্ত্যাদিপাঠফল | ... | ঐ |
| দেবীসূক্ত ( প্রকারান্তর ) | ... | ৪১১ |
| দেবীমাহাত্ম্যের ষট্‌সংবাদ ( চণ্ড্যাঃ ষট্‌সংবাদঃ ) | ... | ৪১২ |
| শ্রীশ্রীরুদ্রচণ্ডী— | | |
| রুদ্রচণ্ডীসঙ্কল্পাদি | ... | ৪১৩ |
| রুদ্রচণ্ডীশাপবিমোচন | ... | ঐ |
| রুদ্রচণ্ডীকবচ— | ... | ৪১৪ |
| রুদ্রচণ্ডী ( দেবীমাহাত্ম্য ) | ... | ৪১৫ |
| রুদ্রাধ্যায় ( কাণ্বশাখীয় ) | ... | ৪২৪ |

## তান্ত্রিকাচার-প্রকরণ

| বিষয় | | পৃষ্ঠা |
|---|---|---|
| দিব্য, পশু, বীর ভাবের অধিকারি-নির্দ্দেশ | ... | ৪৩১ |
| পশুভাবের প্রাধান্য | ... | ঐ |
| কৌলিকের দিব্যভাবাশ্রয় | ... | ৪৩২ |
| পশুভাবে সংক্ষিপ্ত কর্ত্তব্য | ... | ঐ |
| বৈদিকাচার | ... | ৪৩৩ |
| বৈষ্ণবাচার | ... | ঐ |
| শৈবাচার | ... | ৪৩৪ |
| দক্ষিণাচার | ... | ঐ |
| বীরভাব | ... | ৪৩৪ |
| বীরভাবের গূঢ়রহস্য | ... | ৪৩৫ |
| বামাচারের গূঢ়রহস্য | ... | ৪৩৭ |
| তান্ত্রিকের ত্রিবিধ আশ্রম | ... | ৪৩৮ |
| কৌলাচার | ... | ৪৩৯ |
| পঞ্চতত্ত্ব-বিচার | ... | ৪৪১ |

# ক্রিয়াকাণ্ড-বারিধিঃ

## তৃতীয়ঃ খণ্ডঃ

## প্রথমঃ প্রবাহঃ

### সংস্কার-প্রকরণম্

শ্রীভবদেবকৃতা সামগানাং সংস্কারপদ্ধতিঃ

#### সামান্য-কুশণ্ডিকা

চতুর্ব্বদনসম্বন্ধ-চতুর্ব্বেদকুটুম্বিনে।
দ্বিজানুষ্ঠেয়সৎকর্ম্ম-সাক্ষিণে ব্রহ্মণে নমঃ॥
গৃহ্যসূত্রার্থমালোচ্য ছন্দোগানামিয়ং ক্রমাৎ।
কৃতা শ্রীভবদেবেন কর্ম্মানুষ্ঠানপদ্ধতিঃ॥

তত্র সর্ব্বেষামাহুতিযুক্তকর্ম্মণাং কুশণ্ডিকাসংস্কৃতাগ্নিসাধ্যত্বাৎ কুশণ্ডিকৈব প্রথমমভিধীয়তে। তত্র উভয়তশ্চতুর্হস্তপ্রমাণং ভূপ্রদেশং শর্করাঙ্গারাস্থিকেশতুষাদিরহিতং পূর্ব্বোত্তরপ্রবং সমং বা (১) ছায়ামণ্ডপসহিতং

---

(১) তথা চ গৃহ্যাসংগ্রহঃ—

প্রাগুদীচং ব্রহ্মবর্চ্চস্তমুদঙ্নীচং যশোত্তমম্। পিত্র্যং দক্ষিণতো নীচং প্রাতিষ্ঠানিকং সমম্॥ প্রাগুদক্প্রবনং দেশং সমং বা পরিসমূহ্যোপলিপ্য ইতি গোভিলঃ।

গোময়েনোপলিপ্য * (২) স্নাতঃ শুচিরাচান্তঃ (৩) প্রাঙ্মুখঃ কুশসহিতাসনোপবিষ্টঃ কর্ত্তা উত্তরস্যাং দিশি অত্যাক্ষপার্থং কুশ-কুসুম-সহিতং জলপাত্রং নিধায় দক্ষিণং জানু ভূমৌ পাতয়িত্বা উত্তরাগ্র-কুশোপরি সব্যহস্ত-প্রাদেশম্ উত্তানম্ অগ্নিস্থাপন-পর্য্যন্তং ভূমৌ নিধায় (৪) দক্ষিণহস্তানামিকাঙ্গুষ্ঠাভ্যাং গৃহীত-কুশ-মূলেন (৫) স্বাঙ্গুষ্ঠ-পরিমিতাঙ্গুলেন স্থণ্ডিল-দক্ষিণপ্রান্তে † দ্বাদশাঙ্গুলপ্রমাণাং পূর্ব্বাভিমুখীং রেখামুল্লিখ্য—ওঁ রেখেয়ং পৃথ্বীদেবতাকা পীতবর্ণা। ইতি ধ্যায়েৎ। ততস্তন্মূলতঃ প্রভৃতি একবিংশত্যঙ্গুলপ্রমাণাম্ উত্তরাভিমুখীং রেখামুল্লিখ্য—ওঁ রেখেয়মগ্নিদেবতাকা লোহিতবর্ণা। ইতি ধ্যায়েৎ। ততঃ

---

(২) তথা চ গৃহ্যাসংগ্রহঃ—

ভূমেঃ সমূহনং কৃত্বা গোময়েনোপলিপ্য চ। দ্রব্যাণ্যুত্তরতঃ স্থাপ্য বৃষীং কুর্য্যাদুদঙ্মুখীম্॥ বৃষীম্ ব্রতিনামাসনমিত্যর্থঃ।

(৩) আচান্তঃ দ্বিরাচান্তঃ ইতি অবধেয়ম্।

তথা হি স্মৃতিঃ—

হোমে ভোজনকালে চ সন্ধ্যয়োরুভয়োরপি। আচান্তঃ পুনরাচামেদ-ন্যত্রাপি সকৃৎ সকৃৎ॥

(৪) তথা চ গৃহ্যাসংগ্রহঃ—

সব্যং ভূমৌ প্রতিষ্ঠাপ্য প্রোল্লিখেদ্দক্ষিণেন তু। তাবন্নোত্থাপয়েৎ পাণিং যাবদগ্নিং নিধাপয়েৎ॥

(৫) কুশমূলাভাবে কুশেন পুষ্পেণ ফলেন পত্রেণ বা রেখাং কুর্য্যাৎ।

তথা চ গৃহ্যাসংগ্রহঃ—

তস্মাৎ ফলেন পুষ্পেণ পর্ণেনাথ কুশেন বা। প্রোল্লিখেল্লক্ষণং বিপ্রঃ সিদ্ধিকামস্তু কর্ম্মসু॥

---

* গোময়াম্ভসা ইতি বক্তব্যম্।

† অঙ্গুলিমানং যজমানস্যৈব, যজমানাসন্নিধৌ বড়্ববপার্শ্বৈরেকাঙ্গুলিমানম্ এবং দ্বাদশাঙ্গুল-মানং গ্রাহ্যম্। দক্ষিণতঃ একাঙ্গুলম্ উত্তরতঃ দ্ব্যঙ্গুলং পশ্চিমেঽঙ্গুলদ্বয়ং ত্যক্ত্বা রেখোল্লেখঃ কর্ত্তব্যঃ। তথা চ স্মৃতিঃ—

অঙ্গুষ্ঠমাত্রং পূর্ব্বাগ্রং ত্যক্ত্বা দক্ষিণতঃ সুধীঃ। উত্তরে দ্ব্যঙ্গুলং ত্যক্ত্বা পশ্চিমেঽপ্যঙ্গুল-দ্বয়ম্।

প্রথমরেখায়া উত্তরতঃ সপ্তাঙ্গুলান্তরিতাং প্রাদেশপ্রমাণাং পূর্ব্বাভিমুখীং রেখামুল্লিখ্য—ওঁ রেখেয়ং প্রজাপতিদেবতাকা কৃষ্ণবর্ণা। ইতি ধ্যায়েৎ। ততঃ সপ্তাঙ্গুলান্তরিতাং প্রাদেশপ্রমাণাং পূর্ব্বাভিমুখীং রেখামুল্লিখ্য—ওঁ রেখেয়মিন্দ্রদেবতাকা নীলবর্ণা। ইতি ধ্যায়েৎ। ততোঽপি সপ্তাঙ্গুলান্তরিতাং প্রাদেশপ্রমাণাং পূর্ব্বাভিমুখীং রেখামুল্লিখ্য—ওঁ রেখেয়ং সোমদেবতাকা শুক্লবর্ণা। ইতি ধ্যায়েৎ। ততো দক্ষিণহস্তানামিকাঙ্গুষ্ঠাভ্যাং ক্রমেণ রেখাসু উৎকরং (৬) গৃহীত্বা—প্রজাপতিঋ‍র্ষিরগ্নির্দেবতা উৎকর-নিরসনে বিনিয়োগঃ। ওঁ নিরস্তঃ পরাবসুঃ। (৭) ইত্যনেন ঐশান্যাং দিশি অরত্নিমাত্রান্তরিতে দেশে ক্ষিপেৎ। ততঃ পূর্ব্বস্থাপিত-জলেন রেখাভ্যুক্ষণং কৃত্বা, সন্নিধাপিতাগ্নের্জ্বলদিন্ধনং (৮) গৃহীত্বা—প্রজাপতিঋ‍র্ষিস্ত্রিষ্টুপ্ ছন্দোঽগ্নির্দেবতা অগ্নিসংস্কারে বিনিয়োগঃ। ওঁ ক্রব্যাদমগ্নিং প্রহিণোমি দূরং, যমরাজ্যং গচ্ছতু রিপ্রবাহঃ। (৯) ইত্যনেন দক্ষিণস্যাং দিশি প্রক্ষিপেৎ। ততঃ অপরমগ্নিং গৃহীত্বা—প্রজাপতিঋ‍র্ষির্বৃহতীচ্ছন্দঃ প্রজাপতির্দেবতা অগ্নি-

---

(৬) রেখোৎকীর্ণমৃত্তিকাম্ ইত্যর্থঃ।

(৭) পরাবসুঃ রক্ষোঽধিষ্ঠানভূতঃ অপকৃষ্টভূভাগঃ, নিরস্তঃ দূরীকৃতঃ ইত্যর্থঃ।

(৮) অরণিসম্ভবাৎ শ্রোত্রিয়গেহজাৎ পূর্ব্বসংস্কৃতাৎ লৌকিকাদ্বা অগ্নেরিতি যাবৎ।

কপালৈর্ভিন্নপাত্রৈর্বা ন স্বামৈর্গোময়েন বা। অগ্নিপ্রণয়নং কার্য্যং যজমানভয়াবহম্।—ইতি গৃহ্যাসংগ্রহঃ।

তথা—শুভং পাত্রন্তু কাংস্যং স্যাত্তেনাগ্নিং প্রণয়েদ্বুধঃ। তস্যাভাবে শরাবেণ নবেনাভিমুখঞ্চ তম্॥

কপালৈর্ঘটখণ্ডৈঃ চক্রাঘটিতমৃৎপাত্রৈর্বা আমৈঃ অপকপাত্রৈঃ শরাবাদিভিঃ, গোময়েন গোপুরীষেণ করীষাদিনা চ উল্মুকেন চ অগ্নিপ্রণয়নং ন কার্য্যমিত্যর্থঃ। যত্ত—শরাবে ভিন্নপাত্রে বা কপালে বোল্মুকেঽপি বা। নাগ্নিপ্রণয়নং কুর্য্যাদ্ব্যাধিহানিভয়াবহম্॥ ইতি শরাবনিষেধঃ স পুরাতনশরাববিষয়ঃ। কাংস্যাদিসম্ভাববিষয়শ্চ।

(৯) অগ্নিং দূরং লোকান্তরং প্রহিণোমি প্রস্থাপয়ামি। কিম্ভূতম্? ক্রব্যাদম্ আমমাংসাদম্, অসৌ মাংসম্ অত্তুমভিলষতীতি, অমঙ্গল্যত্বাৎ

স্থাপনে বিনিয়োগঃ। ওঁ ভূর্ভুবঃস্বঃ। ইত্যনেন অগ্নিম্ আত্মাভিমুখং রেখোপরি স্থাপয়েৎ। ততো বামহস্তমুত্তোল্য অঞ্জলিং বদ্ধা পঠেৎ। প্রজাপতির্ঋষিস্ত্রিষ্টুপ্ ছন্দোঽগ্নির্দেবতা অগ্নিস্থাপনে বিনিয়োগঃ। ওঁ ইহৈবায়মিতরো জাতবেদা দেবেভ্যো হব্যং বহতু প্রজানন। (১০) ওঁ সর্ব্বতঃ পাণিপাদান্তঃ সর্ব্বতোঽক্ষিশিরোমুখঃ। বিশ্বরূপো মহানগ্নিঃ প্রণীতঃ সর্ব্বকর্ম্মসু ॥ (১১) ততঃ। ওঁ অগ্নে ত্বম্ অমুকনামাসি। * ইতি যত্র যত্র যন্নামাভিহিতং, তত্র তত্র তন্নাম কৃত্বা।—(১২) ওঁ পিঙ্গভ্রূশ্মশ্রুকেশাক্ষঃ পীনাঙ্গজঠরোঽরুণঃ। ছাগস্থঃ সাক্ষসূত্রোঽগ্নিঃ সপ্তার্চ্চিঃ শক্তিধারকঃ ॥ ইত্যাদিত্যপুরাণীয়ং ধ্যাত্বা আবাহ

---

যমরাজ্যম্ যমস্যাধিকারং গচ্ছতু। কিম্ভূতঃ? রিপ্রবাহঃ রিপ্রং পাপং বহতি স্থানান্তরং প্রাপয়তীতি।

(১০) অয়ম্ ইতরঃ ক্রব্যাদাদন্যঃ, জাতবেদাঃ জাতং বেদঃ জ্ঞানং যস্য সঃ জাতজ্ঞানঃ অগ্নিঃ ইহ এব অস্মিন্ গৃহে এব স্থিতঃ সন্ দেবেভ্যঃ হব্যং হবিঃ বহতু প্রাপয়তু। কিং কুর্ব্বন্? প্রজানন্ স্বীয়মধিকারং প্রকর্ষেণ জানন্।

(১১) নায়ং গৃহ্যাসংগ্রহকারেণ পঠনীয়মন্ত্রত্বেন ধৃতঃ; কিন্তু অগ্নিস্বরূপপরিচায়কত্বেন। রঘুনন্দনস্তু—বিশেষতো নামাজ্ঞানে সর্ব্বত্র বিশ্বরূপনামাগ্নির্ভবতি ইতি কল্পিতবান্। তথা অগ্নিপ্রণয়নানন্তরং পঠনীয়োঽয়ং মন্ত্র ইত্যুবাচ।

(১২) একস্মিন্ দিবসে বহুকর্ম্মাঙ্গহোমেষু প্রধানীভূতপ্রথমকর্ত্তব্যকর্ম্মোক্তাগ্নিনাম গ্রহীতব্যম্ ইতি সুধীভির্জ্ঞেয়ম্।

---

* "লৌকিকঃ পাবকো হ্যগ্নিঃ প্রথমঃ পরিকীর্ত্তিতঃ। অগ্নিস্তু মারুতো নাম গর্ভাধানে বিধীয়তে। পুংসবনে চন্দ্রনামা শুঙ্গাকর্ম্মণি শোভনঃ। সীমন্তে মঙ্গলো নাম প্রগল্ভো জাতকর্ম্মণি। নাম্নি স্যাৎ পার্থিবো হ্যগ্নিঃ প্রাশনে চ শুচিস্তথা। সত্যনামা চ চূড়ায়াং ব্রতাদেশে সমুদ্ভবঃ। গোদানে সূর্য্যনামা চ কেশান্তে হ্যগ্নিরুচ্যতে। বৈশ্বানরো বিসর্গে তু বিবাহে যোজকঃ স্মৃতঃ। চতুর্থ্যান্তু শিখী নাম ধৃতিরগ্নিস্তথাপরে। লক্ষহোমে তু বহ্নিঃ স্যাৎ কোটিহোমে হুতাশনঃ। প্রায়শ্চিত্তে বিধুশ্চৈব পাকযজ্ঞে তু সাহসঃ। পূর্ণাহুত্যাং মৃড়ো নাম শান্তিকে বরদস্তথা। পৌষ্টিকে বলদশ্চৈব ক্রোধোঽগ্নিশ্চাভিচারিকে। কোষ্ঠে তু জঠরাগ্নিশ্চ ক্রব্যাদো মৃতভক্ষণে ॥

সম্পূক্ষ্য (১৩), ঘৃতাক্তাং প্রাদেশপ্রমাণাং সমিধং (১৪) তূষ্ণীম্ অগ্নৌ হুত্বা (১৫), পশ্চাৎ ব্রহ্মস্থাপনং কুর্য্যাৎ। তত্র সমাগ্র-পঞ্চাশৎ-কুশপত্ররচিতং সার্দ্ধদ্বি-দক্ষিণাবর্ত্তম্ উর্দ্ধমুখং দর্ভবটুম্ (১৬) অধীতবেদং ব্রাহ্মণং, ছত্রম্, উত্তরাসঙ্গং, কমণ্ডলুং বা ব্রহ্মত্বেন পরিকল্প্য, ধারাসহিতম্ উদকপাত্রং গৃহীত্বা, অগ্নেরুত্তরতঃ প্রভৃতি দক্ষিণাবর্ত্তেন দক্ষিণদেশং গত্বা, অরত্নিমাত্রান্তরিতে দেশে পূর্ব্বাভিমুখীং বারিধারাং দত্ত্বা, তদুপরি প্রাগগ্রান্ কুশান্ আস্তীর্য্য (১৭), পশ্চিমাভিমুখঃ অমু-পবিষ্টঃ দক্ষিণজানুনা বামজানু আক্রম্য, বামহস্তানামিকাঙ্গুষ্ঠাভ্যাম্ আস্তীর্ণ-কুশানাং কুশপত্রমেকং গৃহীত্বা—প্রজাপতির্ঋষিরগ্নির্দেবতা তৃণনিরসনে বিনিয়োগঃ। ওঁ নিরস্তঃ পরাবসুঃ। ইত্যনেন দক্ষিণপশ্চিমকোণে প্রক্ষিপেৎ। ততঃ অপ উপস্পৃশ্য, দক্ষিণপাদেন সব্যপাদম্ অবষ্টভ্য, উত্তরাভিমুখীভূয়,

(১৩) বস্ত্রেণ সূর্পেণ পাণিনা ব্যজনাদিনা চ অগ্নিজ্বালনং ন কর্ত্তব্যম্। তথা চ গৃহ্যাসংগ্রহঃ—

ন বস্ত্রেণ ধমেদগ্নিং ন সূর্পেণ ন পাণিনা। মুখেনোপধমেদগ্নিং মুখাদ্ধ্যেষো-ঽধ্যজায়ত। লৌকিকাগ্নৌ তু মুখেন জ্বালনং নিষিদ্ধমিতি কর্ম্মপ্রদীপ আহ।

( ১৪ ) সমিধো লক্ষণমাহ ছন্দোগপরিশিষ্টম্—নাঙ্গুষ্ঠাদধিকা গ্রাহ্যা সমিৎ স্থূলতয়া কচিৎ। ন বিযুক্তা ত্বচা চৈব ন সকীটা ন পাটিতা। প্রাদেশান্নাধিকা নোনা ন তথা স্যাদ্বিশাখিকা। ন সপর্ণা ন নির্ব্বীর্য্যা হোমেষু চ বিজানতা। অকৃশা চৈব ন স্থূলা অশাখা চাপলাশিনী। সক্ষীরা নাধিকা নোনা সমিধঃ সর্ব্বকামদাঃ॥

( ১৫ ) লেখনাত্ত্যুক্ষণে কৃত্বা নিহিতেঽগ্নৌ সমিদ্দদৎ। ততো ভূমিগ্রহং কৃত্বা কুর্য্যাৎ পরিসমূহনম্। ব্রহ্মাণমুপসঙ্কল্প্য চরুশ্রপণমারভেৎ। ইতি গৃহ্যাসংগ্রহকার-বচনৈর্ব্রহ্মস্থাপনাৎ প্রাক্ ভূমিজপপরিসমূহনে অবগম্যেতে। ভবদেবোক্ত্যা চ পরস্তাদিতি তদত্র ব্যবহারঃ প্রমাণম্।

(১৬) যজ্ঞবাস্তুনি মুষ্ট্যাঞ্চ স্তম্বে দর্ভবটৌ তথা। দর্ভসংখ্যা ন বিহিতা বিষ্ট-রাস্তরণেষপি॥ ইতি কাত্যায়নবচনেন যত্তপি দর্ভসংখ্যা নিষিদ্ধা ইত্যবগম্যতে, রঘুনন্দনেনাপি শাখ্যন্তরীয়া দর্ভসংখ্যা—ইত্যুক্তম্। তথাপি গৃহ্যাসংগ্রহকার-বচনপ্রামাণ্যাৎ ভবদেবভট্টোক্তিঃ সঙ্গচ্ছতে।

(১৭) ব্রহ্মাসনাস্তরণং হোতৃকর্ত্তৃকং তৃণনিরসনন্ত ব্রহ্মত্বেন কল্পিতেন ব্রাহ্মণেন কর্ত্তব্যমিতি, কুশময়ব্রহ্মপক্ষে তু উভয়মেব হোতৃব্রাহ্মণকর্ত্তব্যমিতি স্মার্ত্তসম্প্রদায়ঃ।

আস্থৃতকুশান্ অভিরত্যুক্ষ্য ব্রহ্মাণং গৃহীত্বা—প্রজাপতির্ঋষিরগ্নির্দেবতা ব্রহ্মোপবেশনে বিনিয়োগঃ। ওঁ আ বসোঃ সদনে সীদ। ইত্যনেন পূর্ব্বাগ্রং কুশোপরি কুশাদিরচিতং ব্রহ্মাণং স্থাপয়েৎ। ব্রাহ্মণব্রহ্মপক্ষে তু ব্রাহ্মণ এব "ওঁ সীদামি" ইত্যুক্ত্বা উত্তরাভিমুখীভূয় উপবিশেৎ। (১৮) ততস্তদুপরি কুশান্ দত্ত্বা, অভিরত্যুক্ষ্য, ওঁ ব্রহ্মণে নম ইতি কুসুমৈরর্চ্চয়েৎ। ততো হোতা তেনৈব পথা পরাবৃত্য, আসনে পূর্ব্বাভিমুখ উপবিষ্টো ভূমিজপাদিকং কুর্য্যাৎ। যদি তু ব্রহ্মত্বেন আরোপিতো ব্রাহ্মণঃ অযজ্ঞিয়বাচং ব্রূয়াৎ, তদা (স) ইমং মন্ত্রং জপেৎ—প্রজাপতির্ঋষির্গায়ত্রীচ্ছন্দো বিষ্ণুর্দেবতা অযজ্ঞিয়বাগ্‌বচন-নিমিত্ত-জপে বিনিয়োগঃ। ওঁ ইদং বিষ্ণুর্বিচক্রমে ত্রেধা নিদধে পদম্। সমূঢ়মস্য পাংশুলে। কুশাদিব্রহ্মপক্ষে তু কর্ম্মকর্ত্তুরেব কৃতাকৃতাবেক্ষণাদি-ব্রহ্মকার্য্য-কর্তৃত্বাৎ অযজ্ঞিয়বাগ্‌বচননিমিত্ত-জপং (১৯) স এব কুর্য্যাৎ। অথ যদি প্রকৃতে কর্ম্মণি চরুহোমোঽস্তি, তদা অস্মিন্নেব সময়ে চরুং শ্রপয়িত্বা (২০) * তদুপরি ঘৃতস্রুবং দত্ত্বা,

---

(১৮) অত্রেদং চিন্ত্যম্—অপ উপস্পৃশ্যাথ ব্রহ্মাসন উপবিশত্যাবসোঃ সদনে সীদামীতি গোভিলবচনেন ওঁ আ বসোঃ সদনে সীদ ইতি যজমানঃ ব্রূয়াৎ, সীদামীতি বৃতো ব্রহ্মা উপবিশেৎ ইতি ভবদেবভট্টোক্তিরসঙ্গতেব প্রতিভাতি, স্মার্ত্তোঽপি এবমেব প্রত্যুবাচ। ততশ্চ ব্রহ্মকর্ত্তৃকঃ ওঁ আ বসোঃ সদনে সীদামীত্যন্তমন্ত্রপাঠঃ স্মার্ত্তসম্মতঃ গোভিলসম্মতশ্চ। ভবদেবভট্টমতানুযায়িভিরন্যথৈবাচর্য্যতে। তথা চ মন্ত্রব্যাখ্যা—হে ব্রহ্মন্ আ বসোঃ বসু দক্ষিণারূপং ধনং যাবৎ দীয়তে তাবৎকালং সদনে কুশস্তরণস্থানে সীদ তিষ্ঠ।

(১৯) যদ্যযজ্ঞিয়াং বাচং বদেৎ, বৈষ্ণবীমৃচং যজুর্ব্বা জপেৎ অপি বা নমো বিষ্ণবে ইতি ব্রূয়াৎ। ইতি গোভিলবচনেন ইদং বিষ্ণুরিত্যাদি বিষ্ণোর্বিরাটমসি ইত্যাদি যজুঃ ওঁ নমো বিষ্ণবে ইতি প্রকারত্রিতয়ান্যতমপ্রকারং প্রায়শ্চিত্তং কুর্য্যাৎ ইত্যবগম্যতে।

(২০) চরুশ্রপণপ্রকারো যথা গোভিলোক্তঃ—অথোলূখলমুষলে প্রক্ষাল্য

---

* চরুস্থালীপ্রমাণন্তু—তির্য্যগূর্দ্ধসমিন্মাত্রা দৃঢা নাতিবৃহন্মুখী। মৃন্ময্যৌদুম্বরী বাপি চরুস্থালী প্রশস্যতে। তথা—তণ্ডুলঞ্চ সংস্কৃতে বহ্নৌ গোক্ষীরেণ চরুং পচেৎ। মন্ত্রেণ ক্ষালিতে পাত্রে নবে তাম্রময়াদিকে। অত্র পায়সচরাবপি তাম্রময়ী স্থালী ন নিষিদ্ধা, পয়োঽমৃতসারকং তাম্রপাত্রে ন দুষ্যতি ইতি বচনাৎ।

অগ্নেরুত্তরতঃ কুশোপরি সংস্থাপ্য, ভূমিজপাদিকং কুর্য্যাৎ। যথা—দক্ষিণং জানু ভূমৌ পাতয়িত্বা, দক্ষিণহস্তোপরিভাবেন ব্যস্তাধোমুখৌ হস্তৌ ভূমৌ নিধায়—(২১) পরমেষ্ঠী ঋষিরনুষ্টুপ্ ছন্দোঽগ্নির্দেবতা ভূমিজপে বিনিয়োগঃ। ওঁ ইদং ভূমের্ভজামহে, ইদং ভদ্রং সুমঙ্গলম্। পরা সপত্নান্ বাধ, অন্যেষাং বিন্দতে ধনম্। (২২) রাত্রৌ চেৎ কর্ম, তদা "ধনম্" ইতি স্থানে "বসু" ইতি প্রযোক্তব্যম্। ততো দক্ষিণ-হস্তেন কুশান্ গৃহীত্বা, অগ্নেরুত্তরতঃ প্রভৃতি দক্ষিণাবর্ত্তেন

---

সূর্পঞ্চ পশ্চাদগ্নেঃ প্রাগগ্রান্ দর্ভানাস্তীর্য্যোপসাদয়তি, অথ হবির্নির্ব্বপতি ব্রীহীন্ বা যবান্ বা কাংস্যেন বা চরুস্থাল্যা বা। অমুষ্মৈ ত্বা জুষ্টং নির্ব্বপামীতি দেবতানামাদেশং সকৃৎ, দ্বিস্তূষ্ণীম্। অথ পশ্চাৎ প্রাঙ্মুখোঽবহন্তমুপক্রমতে, দক্ষিণোত্তরাভ্যাং পাণিভ্যাং ত্রিঃফলীকৃতাংস্তণ্ডুলান্ ত্রির্দেবেভ্যঃ প্রক্ষালয়েদিত্যাহর্দ্বির্মনুষ্যেভ্যঃ সকৃৎ পিতৃভ্য ইতি পবিত্রান্তর্হিতাংস্তণ্ডুলানাবপেৎ। কুশলশৃতমিব স্থালীপাকং শ্রপয়েৎ প্রদক্ষিণমুদায়ুবন্। শৃতমভিঘার্য্যোদগুদ্বাস্য প্রত্যভিঘারয়েৎ ইতি। অস্যার্থঃ—অগ্নেঃ পশ্চিমতঃ উলূখলমুষলে যজ্ঞিয়কাষ্ঠনির্ম্মিতে সূর্পঞ্চ বৈণবং প্রক্ষাল্য স্থাপয়তি। অনন্তরং তস্মিন্নাসাদিতে উলূখলে হবির্ভূতান্ ব্রীহীন্ যবান্ বা প্রক্ষিপতি দেবতানামোচ্চারণপূর্ব্বকং অগ্নয়ে ত্বা জুষ্টং নির্ব্বপামি ইত্যাদিপ্রকারেণ সকৃৎ দ্বিস্তূষ্ণীং কাংস্যপাত্রেণ চরুস্থাল্যা বা উলূখলে প্রক্ষিপেৎ। ততস্ত্রিবারং মুষলাঘাতেন অবঘাতে সম্পাদিতে নিস্তুষীকৃতান্ তণ্ডুলান্ ত্রিঃ প্রক্ষাল্য পবিত্রব্যবহিতান্ কৃত্বা চরুস্থাল্যাং নিক্ষিপেৎ। তত্র দুগ্ধং নিক্ষিপ্য পাকনিপুণেন তথা পচনীয়ং যথা ন দগ্ধং নাতিক্লিন্নং ন মন্দপক্বং নানিষ্পন্নং মণ্ডগালনরহিতং অন্তরুষ্ম চ ভবেৎ। মেক্ষণেন (প্রাদেশপ্রমাণং খদিরপলাশোড়ুম্বরাণামন্যতমম্ কাষ্ঠনির্ম্মিতম্ উত্তরতঃ সার্দ্ধাঙ্গুষ্ঠপ্রমাণচতুষ্কোণপুষ্করং মেক্ষণং ভবতি) দক্ষিণাবর্ত্তেন অবঘট্ট্য, (উর্দ্ধমীষন্ মিশ্রয়ন্) পক্বম্ আজ্যপ্রবেশাপ্লাব্য অগ্নেরুত্তরতাম্ উত্তার্য্য পুনস্তৃতেনাঘারয়েৎ ইত্যর্থঃ।

(২১) দক্ষিণহস্তমধোমুখং তথাবিধবামহস্তস্য পৃষ্ঠোপরিভাবেন বিপর্য্যস্তমাস্তাভিমুখং ভূমিজপে কুর্য্যাদিত্যর্থঃ।

(২২) হে অগ্নে! বয়মেতৎ ভূমেঃ সমৃদ্ধি স্থলং ভবতা অধিষ্ঠিতম্ ইদং বয়ং ভজামহে সেবামহে, গৃহ্লীম ইতি যাবৎ। কিম্ভূতম্? ইদং ভদ্রং কল্যাণকরম্

তৃণাদিকম্ অনেন মন্ত্রত্রয়েণ শোধয়েৎ। ত্রয়াণাং মন্ত্রাণাম্ ঋষ্যাদয়ঃ সাধারণাঃ। কুৎসঋষির্জগতীচ্ছন্দঃ (২৩) অগ্নির্দেবতা পৃষ্ঠ্যস্ত ষড়হস্ত ষষ্ঠেঽহন্যাগ্নিমারুতে শস্ত্রে পরিসমূহনে বিনিয়োগঃ। ওঁ ইমং স্তোমমর্হতে জাতবেদসে, রথমিব সম্মহেমা মনীষয়া। ভদ্রা হি নঃ প্রমতিরস্য সংসদ, অগ্নে সখ্যে মা রিষামা বয়ং তব। (২৪) ওঁ ভরামেধ্মং কৃণবামা হবীংষি তে, চিতয়ন্তঃ পর্ব্বণা পর্ব্বণা বয়ম্। জীবাতবে প্রতরাং সাধয়া ধিয়ো, ঽগ্নে সখ্যে মা রিষামা বয়ং তব। (২৫) ওঁ শকেম ত্বা সমিধং সাধয়া ধিয়, স্বে দেবা হবিরদন্ত্যাহুতম্। ত্বমাদিত্যাঁ আ বহ তান্ হ্যুশ্ম, স্যগ্নে সখ্যে মা রিষামা বয়ং তব। (২৬) তত ঐশান্যাং দিশি

---

সুমঙ্গলম্ প্রশস্ততরং। কিঞ্চ, হে অগ্নে! সপত্নান্ অস্মাকং শত্রূন্ পরাবাধস্ব সুষ্ঠু পীড়য়। কিঞ্চ যোঽপ্যনেন মন্ত্রেণ বিবাহাদিযজ্ঞকর্ম্মণি ভবদধিষ্ঠিতভূমেরবয়বং গৃহ্লাতি, সোঽপি অন্যেষাম্ ঈশ্বরাণাং ধনিনাং সম্বন্ধি ধনং বিন্দতে লভতে।

(২৩) সামবেদসংহিতায়াং কুৎসঋষিরিত্যেব লিখিতম্ ন তু কৌৎস ইতি।

(২৪) ইমং স্তোমং স্তবং বয়ং সম্মহেম পূজোপকরণং কুর্য্যাম। কস্মৈ? জাতবেদসে জাতপ্রজ্ঞায় জাতধনায় বা। অগ্নয়ে কিম্ভূতায়? অর্হতে স্তুতিযোগ্যায়। কয়া? মনীষয়া বুদ্ধ্যা। রথমিব সারথির্যথা রথং হি যস্মাৎ নঃ অস্মাকম্ অস্য অগ্নেঃ সকাশাৎ প্রসাদাদ্বা ভদ্রা কল্যাণী প্রমতিঃ প্রকৃষ্টা বুদ্ধিঃ সংসদি জনসমাজে জায়তে, যয়া বয়ং স্তোতুং জানীমঃ, তস্মাৎ হে অগ্নে তব সখ্যে মিত্রত্বে স্থিতা বয়ং কেনচিৎ দুরাত্মনা মা রিষাম মা হিংসিষ্মহি।

(২৫) হে অগ্নে! ত্বদর্থম্—ইধ্মং যজ্ঞদারু ভরাম বয়মাহরাম। হবীংষি চরুপ্রভৃতীনি পর্ব্বণা পর্ব্বণা পর্ব্বণি পর্ব্বণি চিতয়ন্তঃ ত্বাং প্রজ্ঞাপয়ন্তঃ কৃণবাম সম্পাদয়াম নির্ব্বপামেতি যাবৎ। কিমর্থম্? প্রতরাং অতিশয়েন জীবাতবে জীবনায়, কিঞ্চ ধিয়ঃ ধীরিতি কর্ম্মণো নাম অস্মাভিঃ ক্রিয়মাণানি কর্ম্মাণি সাধয় সফলানি কুরু। অগ্নে সখ্যে ইত্যাদেঃ পূর্ব্ববদেবার্থঃ।

(২৬) হে অগ্নে! ত্বম্ অস্মাকং ধিয়ঃ কর্ম্মাণি বুদ্ধীর্ব্বা সাধয় [illegible] সম্পাদয়। যথা বয়ং ত্বা ত্বাং সমিধং পরিচরিতুং শকেম শক্নুয়াম। [illegible] ত্বয়ি আহুতং হবিঃ দেবাঃ ইন্দ্রাদয়ঃ অদন্তি ভক্ষয়ন্তি ত্বন্মুখাৎ [illegible]।

পরিসমূহনকুশান্ ক্ষিপেৎ। তত্র অগ্নেঃ পূর্ব্বত উত্তরান্তাৎ দক্ষিণান্তং যাবৎ উদগ্মূলকুশান্ একপঙ্ক্তিকৃতান্ * প্রাগগ্রান্ কুশান্ অগ্রেণ মূলমাচ্ছাদয়ন্ † বারত্রয়ম্ আস্তরেৎ। এবং দক্ষিণস্যাং পূর্ব্বান্তাৎ পশ্চিমান্তং যাবৎ, উত্তরস্যাং পূর্ব্বান্তাৎ পশ্চিমান্তং যাবৎ, প্রতীচ্যাঞ্চ উত্তরান্তাৎ দক্ষিণান্তং যাবৎ ক্রমেণ আস্তরেৎ ‡। ততঃ পূর্ব্বাদিক্রমেণ দশদিক্ষু স্বস্তিকান্ দদ্যাৎ। যথা—ওঁ ইন্দ্রায় স্বাহা। ওঁ অগ্নয়ে স্বাহা। ওঁ যমায় স্বাহা। ওঁ নৈর্ঋতায় স্বাহা। ওঁ বরুণায় স্বাহা। ওঁ বায়বে স্বাহা। ওঁ কুবেরায় স্বাহা। ওঁ ঈশানায় স্বাহা। (ইন্দ্রেশানয়োর্মধ্যে) ওঁ ব্রহ্মণে স্বাহা। (নৈর্ঋতবরুণয়োর্মধ্যে) ওঁ অনন্তায় স্বাহা। ¶ ততঃ প্রাদেশদ্বয়প্রমাণাং খদিরপলাশোডুম্বরাণাম্ অন্যতমস্য বিংশতিকাষ্ঠিকাং গৃহীত্বা, (২৭) মধ্যে ঘৃতস্রুবং দত্ত্বা, প্রজাপতিং মনসা ধ্যাত্বা, তূষ্ণীম্ অগ্নৌ জুহুয়াৎ। তত আস্তীর্ণকুশাদেব সাগ্রকুশপত্রদ্বয়ং গৃহীত্বা—

---

অতএব তান্ আদিত্যান্ অদিতেঃ পুত্রান্ দেবান্ আবহ আবাহয়, হি যস্মাৎ তান্ আদিত্যান্ বয়ম্ উশ্মসি কাময়ামহে উদ্দেশ্যত্বেন ইচ্ছামঃ, অন্যৎ পূর্ব্ববৎ।

(২৭) অন্যত্রাঙ্গহোমাদিভ্যো বিংশতিকাষ্ঠিকাহোমঃ। তথা চ কর্ম্মপ্রদীপঃ—অঙ্গহোমসমিত্তন্ত্রসোষ্যন্ত্যাখ্যেষু কর্ম্মসু। যেষাঞ্চৈতদুপর্য্যুক্তং তেষু তৎসদৃশেষু চ। অক্ষভঙ্গাদিবিপদি জলহোমাদিকর্ম্মণি। সোমাহুতিষু সর্ব্বাসু নৈতেষিধ্মো বিধীয়তে॥ অঙ্গহোমাঃ সীমন্তোন্নয়নচূড়াকরণাদৌ বিহিতাঃ। তেন কেবল-চূড়াকরণসীমন্তোন্নয়নাঙ্গহোমে কর্ত্তব্যে কুশণ্ডিকায়ামিধ্মহোমো নিষিদ্ধঃ। এবমেব ক্ষিপ্রহোমেষু, নিত্যং সায়ং প্রাতঃ কর্ত্তব্যেষু, তন্ত্রহোমেষু, পরিসমূহন-পরিস্তরণাদ্যঙ্গবিস্তারযুক্তেষু তত্র যে সমিদ্ধবিকাতন্ত্রহোমাঃ যথা সুখপ্রসবার্থং

---

* পূর্ব্বমাবৃতান্ ইতি যাবৎ।

† পশ্চাৎ আস্তৃতকুশাগ্রেণ।

‡ অগ্নিমুপসমাধায় কুশৈঃ সমন্তং পরিস্তৃণুয়াৎ, পুরস্তাদ্দক্ষিণত উত্তরতঃ পশ্চাদিতি গৃহ্যসূত্রোক্তক্রমো গ্রাহ্যঃ।

¶ ইন্দ্রায় বষড়িতি পাঠস্তিষ্ঠতু পূর্ণিমাপ্রভাসেষু ইতি বহুষু পুস্তকেষু পাঠঃ।

প্রজাপতির্ঋষিঃ পবিত্রে দেবতে পবিত্রচ্ছেদনে বিনিয়োগঃ। ওঁ পবিত্রে স্থো বৈষ্ণব্যৌ। (২৮) ইত্যনেন প্রাদেশপ্রমাণং কুশান্তরেণ বেষ্টিতং কৃত্বা নখ-ব্যতিরেকেণ ছিত্ত্বা—প্রজাপতির্ঋষিঃ পবিত্রে দেবতে পবিত্রমার্জনে বিনি-য়োগঃ। ওঁ বিষ্ণোর্ম্মনসা পূতে স্থঃ (২৯) ইত্যনেনাভ্যুক্ষ্য, তাম্রাদিপাত্রে (৩০) উত্তরাগ্রং নিধায়, তত্র হোমার্থং ঘৃতং নিক্ষিপেৎ। ততস্তৎ কুশপত্রদ্বয়ম্ অগ্রে দক্ষিণহস্তানামিকাঙ্গুষ্ঠাভ্যাং, মূলে চ বামহস্তানামিকাঙ্গুষ্ঠাভ্যাং গৃহীত্বা, দক্ষিণহস্তোপরিভাবেন অধোমুখব্যস্তপাণিঃ—প্রজাপতির্ঋষির্গায়ত্রীচ্ছন্দ আজ্যং দেবতা আজ্যোৎপবনে বিনিয়োগঃ। ওঁ দেবস্ত্বা সবিতোৎপুনাত্ব-চ্ছিদ্রেণ পবিত্রেণ। বসোঃ সূর্য্যস্য রশ্মিভিঃ স্বাহা। (৩১) অনেন কুশপত্রদ্বয়-মধ্যেন ঘৃতম্ অগ্নৌ সকৃৎ জুহুয়াৎ, তূষ্ণীং বারদ্বয়ম্। ততস্তৎকুশপত্রদ্বয়ম্

---

সোষ্যন্তীহোমঃ তেষু তৎসদৃশেষু ক্ষিপ্রহোমেষু চ, বিবাহোত্তরগোভিলোক্ত-যানকালীনাক্ষভঙ্গাদিদোষোপশমনার্থহোমেষু, জলহোমাদিষু, বৈশ্বদেবহোমেষু ঈশ্বহোমো ন কার্য্য ইত্যবধেয়ম্।

(২৮) হে পবিত্রে! যুবাং বৈষ্ণব্যৌ বিষ্ণুদেবতাকে, বিষ্ণুর্বৈ যজ্ঞ ইতি শ্রুতেঃ যজ্ঞার্হে বা স্থঃ ভবথঃ।

(২৯) হে পবিত্রে! যুবাং বিষ্ণোঃ মনসা স্মরণমাত্রেণ পূতে পবিত্রে স্থঃ ভবথঃ। সব্যেন মূলপ্রদেশে গৃহীত্বা দক্ষিণেনাছুম্ব্যাৎ বিষ্ণোরিতিমন্ত্রেণ ইতি স্মার্ত্তঃ।

(৩০) আজ্যস্থালীপ্রমাণম্—

আজ্যস্থালী চ কর্ত্তব্যা তৈজসদ্রব্যসম্ভবা। মহীময়ী বা কর্ত্তব্যা সর্ব্বাস্বাজ্য-হুতিষু চ। আজ্যস্থাল্যাঃ প্রমাণন্তু যথাকামন্তু কারয়েৎ। সুদৃঢ়ামব্রণাং ভদ্রা-মাজ্যস্থালীং প্রচক্ষতে॥

(৩১) হে আজ্য! ত্বা ত্বাং দেবঃ দেবনাদিগুণযুক্তঃ সবিতা অচ্ছিদ্রেণ অচ্ছিদ্রাভ্যাম্ অব্যবচ্ছিন্নাভ্যাং পবিত্রেণ আভ্যাং পবিত্রাভ্যাং উৎপুনাতু অজ্ঞাতকেশকীটাদিসংসর্গদোষং অপনয়তু। কিঞ্চ, বসু তেজঃ তৎপ্রধানত্বাৎ সোঽপি সূর্য্যস্তথোচ্যতে, তস্য বসোঃ তেজস্বিনঃ সূর্য্যস্য রশ্মিভিঃ কিরণৈঃ ত্বাম্ উৎপুনাতু সবিতা ইতি শেষঃ। স্বাহা ইতি মন্ত্রশেষঃ।

অভিরত্যাক্য অগ্নৌ প্রক্ষিপেৎ। (৩২) ততস্তস্য আজ্যপাত্রস্য উদকেনানুমার্জ্জনম্, অগ্নেরুপরি নিধানম্, উত্তরস্তাং দিশ্যবতারণঞ্চ—ইত্থমেব বারত্রয়ং কুর্য্যাৎ। ইতি আজ্যসংস্কারঃ। ততঃ খদিরপলাশোড়ুম্বরাণাম্ অন্যতমস্য স্রুবম্ অরত্নিপ্রমাণং ভ্রমিতাঙ্গুষ্ঠপর্ব্ববিলম্ ইত্থমেব বারত্রয়ং সংস্কুর্য্যাৎ। (৩৩) ইতি স্রুবসংস্কারঃ। ততো দক্ষিণং জানু ভূমৌ পাতয়িত্বা উদকাঞ্জলিং গৃহীত্বা—প্রজাপতির্ঋষিরদিতির্দেবতা উদকাঞ্জলিসেকে বিনিয়োগঃ। ওঁ অদিতেঽনুমন্যস্ব। অনেন অগ্নের্দ্দক্ষিণতঃ পশ্চিমান্তাৎ পূর্ব্বান্তং যাবৎ উদকাঞ্জলিনা সিঞ্চেৎ। ততঃ—প্রজাপতির্ঋষিরনুমতির্দ্দেবতা উদকাঞ্জলিসেকে বিনিয়োগঃ। ওঁ অনুমতেঽনুমন্যস্ব। অনেন অগ্নেঃ পশ্চিমতো দক্ষিণান্তাৎ উত্তরান্তং যাবৎ উদকাঞ্জলিনা সিঞ্চেৎ। ততঃ—প্রজাপতির্ঋষিঃ সরস্বতী দেবতা উদকাঞ্জলিসেকে বিনিয়োগঃ। ওঁ সরস্বত্যনুমন্যস্ব। অনেন অগ্নেরুত্তরতঃ পশ্চিমান্তাৎ পূর্ব্বান্তং যাবৎ উদকাঞ্জলিনা সিঞ্চেৎ। ততঃ—প্রজাপতির্ঋষিস্ত্রিষ্টুপ্ ছন্দঃ সবিতা দেবতা অগ্নিপর্য্যুক্ষণে বিনিয়োগঃ। ওঁ দেব সবিতঃ প্রসুব যজ্ঞং প্রসুব যজ্ঞপতিং ভগায়। দিব্যো গন্ধর্ব্বঃ কেতপূঃ কেতন্নঃ পুনাতু, বাচস্পতির্ব্বাচন্নঃ স্বদতু। (৩৪) অনেন উদকাঞ্জলিনা দক্ষিণাবর্ত্তেন অগ্নিং বেষ্টয়েৎ।

---

(৩২) অত্র গোভিলঃ—

অথৈতদাজ্যমধিশ্রিত্যোদগুদ্বাসয়েৎ। এতদনন্তরং তদ্ঘৃতপাত্রং অগ্নেরুপরিকৃত্য উত্তরত উত্তারয়েৎ ইত্যর্থঃ। এবমাজ্যস্য সংস্করণকল্পো ভবতি। যত্র যত্রাজ্যসংস্কারো বিহিতস্তত্রৈবায়ং কল্প ইত্যর্থঃ। অত্র গর্ভপাত্রসংস্কারবৎ সকৃৎসংস্কৃতাজ্যপাত্রে যানি নিঃক্ষিপ্যন্তে তেষাং সংস্কারান্তরো নাস্তীতি গৃহ্যাসংগ্রহকার আহ।

(৩৩) স্রুবাদিলক্ষণং যথা ছন্দোগপরিশিষ্টে—খাদিরো বাঽথ পালাশো দ্বিবিতস্তিঃ স্রুবঃ স্মৃতঃ। স্রুগ্‌বাহুমাত্রা বিজ্ঞেয়া বৃত্তস্তু প্রগ্রহস্তয়োঃ॥ খদিরপলাশান্যতরকাষ্ঠনির্ম্মিতঃ বর্ত্তুলদণ্ডঃ প্রাদেশদ্বয়পরিমাণঃ স্রুবঃ, বাহুমাত্রা সা স্রুক্।

(৩৪) হে দেব দেবনাদিগুণযুক্ত! সবিতঃ! ত্বং যজ্ঞং প্রস্তুতং কর্ম্ম প্রসুব প্রস্তুতকর্ম্মকরণায় মামনুজানীহীত্যর্থঃ। তথা যজ্ঞপতিং যজমানং মাং প্রসুব অনুজানীহি। কিমর্থম্? ভগায় কর্ম্মফলভজনায়, ত্বমা

ততো দক্ষিণং জানু উত্থাপ্য, উপর্য্যধঃস্থিত-দক্ষিণবামমুষ্টিভ্যাং ফলপুষ্পকুশান্ গৃহীত্বা বিরূপাক্ষজপং কুর্য্যাৎ। (৩৫) পরমেষ্ঠী ঋষী রুদ্ররূপোঽগ্নির্দেবতা বিরূপাক্ষজপে বিনিয়োগঃ। ওঁ ভূর্ভুবঃস্বরোঁ মহান্তমাত্মানং প্রপদ্যে; বিরূপাক্ষোঽসি দন্তাঞ্জিস্তস্য তে শয্যা পর্ণে; গৃহান্তরিক্ষে বিমিতং হিরণ্ময়ং; তদ্দেবানাং হৃদয়ান্যয়স্ময়ে কুম্ভেঽন্তঃ সন্নিহিতানি তানি। বলভৃচ্চ বলসাচ্চ রক্ষতোঽপ্রমণী অনিমিষতঃ সত্যম্। যত্তে দ্বাদশ পুত্রাস্তে ত্বা সংবৎসরে সংবৎসরে কামপ্রেণ যজ্ঞেন যাজয়িত্বা, পুনর্ব্রহ্মচর্য্যমুপযন্তি। ত্বং দেবেষু ব্রাহ্মণোঽস্যহং মনুষ্যেষু। ব্রাহ্মণো বৈ ব্রাহ্মণমুপধাবত্যুপ ত্বা ধাবামি, জপন্তং মা মা প্রতিজাপীর্জুহ্বন্তং মা মা প্রতিহৌষীঃ, কুর্ব্বন্তং মা মা প্রতিকার্ষীস্ত্বাং প্রপদ্যে। ত্বয়া প্রসূত ইদং কর্ম্ম করিষ্যামি; তন্মে রাধ্যতাং, তন্মে সমৃধ্যতাং, তন্ম উপপদ্যতাং। সমুদ্রো মা বিশ্বব্যচা ব্রহ্মানুজানাতু, তুথো মা বিশ্ববেদা ব্রহ্মণঃ পুত্রোঽনুজানাতু, শ্বাত্রো মা প্রচেতা মৈত্রাবরুণোঽনুজানাতু। তস্মৈ বিরূপাক্ষায় দন্তাঞ্জয়ে, সমুদ্রায় বিশ্বব্যচসে, তুথায় বিশ্ববেদসে, শ্বাত্রায় প্রচেতসে, সহস্রাক্ষায় ব্রহ্মণঃ পুত্রায় নমঃ। (৩৬) ইতি জপ্ত্বা, গৃহীতকুশান্ প্রাগুদীচ্যাং দিশি ক্ষিপেৎ, ফলপুষ্পং ব্রহ্মণে নিবেদয়েৎ।

---

হ্যনুজ্ঞাতোঽনুষ্ঠিতকর্ম্মফলভাক্ ভবতীতি ভাবঃ। সবিতা কিম্ভূতঃ? দিব্যঃ দিবিভবঃ। পুনঃ কিম্ভূতঃ? গন্ধর্ব্বঃ গোঃ পৃথিবী তাং তৎস্থান্ রসান্ ইতি যাবৎ রশ্মিভির্ধরতি পিবতীতি নিপাতিতঃ। পুনঃ কিম্ভূতঃ? কেতপূঃ কেতং প্রজ্ঞাং পুনাতীতি স নঃ অস্মাকং কেতং চিত্তং পুনাতু বিমলীকরোতু কর্ম্মসাধনযোগ্যং করোত্বিত্যর্থঃ। কিঞ্চ বাচস্পতিঃ প্রাণঃ সুরগুরুর্বা স নঃ অস্মাকং বাচং বাণীং স্বদতু অমৃতমিব স্বাদয়তু স্তোতব্যস্য দেবতাবিশেষস্য প্রীতিকরীং করোত্বিত্যর্থঃ।

(৩৫) অত্র ছন্দোগপরিশিষ্টং কেষুচিৎ কর্ম্মসু পর্য্যুদাসমাহ যথা—

ন কুর্য্যাৎ ক্ষিপ্রহোমেষু দ্বিজঃ পরিসমূহনম্। বিরূপাক্ষঞ্চ ন জপেৎ প্রপদঞ্চ বিবর্জ্জয়েৎ॥ বিরূপাক্ষজপঃ বিরূপাক্ষযুক্তমন্ত্রজপঃ, প্রপদঃ তপশ্চ তেজশ্চ ইত্যাদিকঃ, তং ক্ষিপ্রহোমেষু অব্রহ্মকেষু সায়ং প্রাতর্হোমেষু সোষ্যন্ত্যাখ্যহোমাদিষু পরিত্যজেৎ।

(৩৬) ভূঃ পৃথিবী ভুবঃ অন্তরীক্ষং স্বঃ দ্যৌঃ ওঁ আত্মা এতে যদাত্মানঃ তং মহান্তং রুদ্রাগ্নিরূপং আত্মানং প্রপদ্যে প্রপন্নোঽস্মি,

অথ যদি কাম্যকর্ম্মার্থং কুশণ্ডিকা ক্রিয়তে, তদা প্রথমম্ অঞ্জলিং বদ্ধা—ওঁ তপশ্চ তেজশ্চ শ্রদ্ধা চ হ্রীশ্চ সত্যঞ্চাক্রোধশ্চ ত্যাগশ্চ ধৃতিশ্চ ধর্ম্মশ্চ সত্ত্বঞ্চ বাক্

---

হে অগ্নে! ত্বং বিরূপাক্ষোঽসি নানারূপধরোঽসি, দন্তাঞ্জিঃ দন্তান্ অনক্তি ব্যঞ্জয়তীতি দন্তাঞ্জিঃ ব্যক্তদন্তঃ, তস্য এবম্ভূতস্য তে তব শয্যা শয়নস্থানং পর্ণে পত্রে উপলেপনাভ্যুক্ষণাদিভিঃ সংস্কৃতে স্থণ্ডিলে ভূমৌ স্থাপনমগ্নেঃ ইতি শ্রুতেঃ, গুহাঃ গৃহং অন্তরিক্ষে ভুবর্লোকে বিমিতং বিশেষেণ মিতং কৃতম্ অর্থাৎ হিরণ্যগর্ভপ্রভৃতিভিঃ। কীদৃশং গৃহম্? হিরণ্যয়ং স্বুবর্ণময়ং। তথা চ শ্রুতিঃ—অলিতমগ্নিং প্রবিশন্তমন্তরিক্ষমিতি, তৎ তস্মিন্ গৃহে দেবানাং ইন্দ্রাদীনাং হৃদয়ানি তিষ্ঠন্তীতি শেষঃ,তৈঃ দেবহৃদয়ৈঃ সহ স্থিতোঽগ্নিঃ প্রার্থ্যতে, হে অগ্নে! কদা পুনস্ত্বমস্মাকং হবিরানেষ্যসীতি অগ্নিমুখত্বাৎ দেবানাম্। কস্মিন্নিব? অয়স্ময়ে লৌহময়ে কুম্ভে ইব অন্তঃ মধ্যে সন্নিহিতানি একীভূতানি তানি দেবহৃদয়ানি বলভৃচ্চ বলসাচ্চ অগ্নেরেতৌ দ্বারপালৌ রক্ষতঃ অগ্নিমিতি শেষঃ, বলমুপচয়ং বিভর্ত্তীতি বলভৃৎ, আত্মভক্তানাং বলং সাদয়তি স্ফোটয়তি ইতি বলসাৎ বিপক্ষাণাম্। কিম্ভূতাবেতৌ? অপ্রমণী অপ্রমাদিনৌ গূঢ়মনস্কত্বাৎ। পুনঃ কীদৃশৌ? অনিমিষতঃ অনিমীলিতাক্ষৌ। যৎ এতৌ রক্ষতঃ তৎ সত্যং, তাভ্যাং রক্ষিতে অগ্নৌ যজমানঃ পশু-পুরোডাশাদি জুহোতি, যৎ যে তে তব সম্বৎসরাখ্যস্য যজ্ঞস্য দ্বাদশপুত্রাঃ অগ্ন্যাখ্যাঃ—তে সম্বৎসরে সম্বৎসরে প্রত্যব্দং কাম-প্রেণ কামপূরকেণ যজ্ঞেন জ্যোতিষ্টোমাদিনা যজমানং যাজয়িত্বা পুনঃ ত্বাং ব্রহ্মচর্য্যং ব্রহ্মভূতং উপযন্তি প্রবিশন্তি। হে অগ্নে! ত্বং দেবেষু দেবলোকেষু ব্রাহ্মণঃ অসি, অহং মনুষ্যেষু মনুষ্যলোকেষু ব্রাহ্মণো-ঽস্মীতি শেষঃ, বৈ পূরণে, যতো ব্রাহ্মণঃ ব্রাহ্মণম্ উপধাবতি ব্রাহ্মণ-মেবোপসেবতে, অতঃ ত্বা ত্বাং উপধাবামি পরিচরামি। উপধাবনস্য কারণমাহ—জপন্তং মা মা প্রতিজাপীঃ জুহ্বন্তং মা মা প্রতিহৌষীঃ কুর্ব্বন্তং মা মা প্রতিকার্ষীঃ। এতদুক্তং ভবতি—জপহোমকর্ম্মসু মম ত্বং প্রাতিকূল্যং মা কৃথাঃ। অতঃ ত্বাং প্রপদ্যে শরণং যামীত্যর্থঃ। ত্বয়া প্রসূতঃ অনুজ্ঞাতঃ ইদং প্রস্তুতং কর্ম্ম করিষ্যামি, যত এবম্ অতঃ তৎ মে মম কর্ম্ম রাধ্যতাং সংসিধ্যতু, তৎ মে সমৃধ্যতাং সংবর্দ্ধতাং, তৎ মে উপপদ্যতাং

চ মনশ্চাত্মা চ, তানি প্রপদ্যে, তানি মামবন্তু। (৩৭) * ইতি জপ্ত্বা পশ্চাদ্-বিরূপাক্ষজপং কুর্য্যাৎ।

ইতি বিরূপাক্ষজপান্তা কুশণ্ডিকা।

---

ফলদানসমর্থং জায়তাম্। যৎ তে দ্বাদশ পুত্রা অগ্ন্যাখ্যা ইত্যুক্তং তান্ নাম-প্রয়োগেণ কতিচিৎ দর্শয়িতুমাহ—সমুদ্র ইব সমুদ্রো সমুদ্রনামা অগ্নিঃ। কীদৃশঃ? বিশ্বব্যচাঃ বিশ্বং ব্যঞ্চতি বিবিধং গচ্ছতি, তথা ব্রহ্মা ব্রহ্মস্বরূপঃ, মা মাম্ অনুজানাতু অত্র কর্ম্মণি প্রবৃত্তমিত্যর্থঃ, তথা তুথঃ তুথনামাগ্নিঃ। কীদৃশঃ? বিশ্ববেদাঃ সর্ব্ববেত্তা, তথা ব্রহ্মণঃ পুত্রঃ মা মাম্ অনুজানাতু, তথা শ্বাত্রঃ শ্বাত্রনামাগ্নিঃ। কীদৃশঃ? প্রচেতাঃ প্রকৃষ্টমনাঃ, তথা মৈত্রাবরুণঃ মিত্রাবরুণপুত্রঃ মা মাম্ অনুজানাতু। হে অগ্নে, যত্ত্বমনেকপ্রকারঃ প্রাগুক্তঃ তস্মৈ তে তুভ্যং বিরূপাক্ষায় দন্তাগ্রয়ে সমুদ্রায় বিশ্বব্যচসে তুথায় বিশ্ববেদসে শ্বাত্রায় প্রচেতসে সহস্রাক্ষায় ব্রহ্মণঃ পুত্রায়। 'নমঃ' ইতি সর্ব্বত্র সম্বন্ধনীয়ম্।

(৩৭) তপঃ উপবাসাদিঃ, তেজঃ প্রকাশাত্মকং, শ্রদ্ধা চিত্তস্য কালুষ্যাপনয়নং কর্ম্ম, চিত্তস্যৈকানুগমো ধর্ম্মো বা, হ্রীঃ লজ্জা, সত্যং যথার্থবাদিত্বম্, অক্রোধঃ প্রতিকূলবিষয়েঽপি মনসঃ প্রসাদঃ, ত্যাগঃ ন্যায়ানুগতস্য ধনস্য বিধিনা বিসর্গঃ, ধৃতিঃ সৌমনস্যং, ধর্ম্মঃ যজ্ঞকর্ম্ম, সত্ত্বম্ আত্মপ্রকাশকো গুণঃ, বাক্ বচনং, মনঃ ইন্দ্রিয়বিশেষঃ, আত্মা ক্ষেত্রজ্ঞঃ, ব্রহ্ম পরং তত্ত্বং, চকারাঃ পরস্পরা-পেক্ষয়া সমুচ্চয়ার্থাঃ, তানি তপঃপ্রভৃতীনি প্রপদ্যে শরণং গচ্ছামি, অতঃ তানি সর্ব্বাণি ইমং যজ্ঞং কুর্ব্বাণং মাম্ অবন্তু রক্ষন্তু।

---

* কাম্যেষু চ প্রপদঃ ইতি গোভিলসূত্রাৎ কাম্যকর্ম্মস্বেব তপশ্চ তেজশ্চেত্যাদি প্রপদাখ্য-মন্ত্রঃ পাঠ্যঃ, নান্যত্র।

ইতি বিরূপাক্ষজপান্তা কুশণ্ডিকা।

## অথ প্রকৃতং কর্ম্ম

কুশণ্ডিকানন্তরং প্রকৃতং কর্ম্ম কর্ত্তব্যম্। তত্র প্রথমং প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীম্ অগ্নৌ হুত্বা, মহাব্যাহৃতিহোমং কুর্য্যাৎ। প্রজাপতিঋর্ষির্গায়ত্রীচ্ছন্দঃ অগ্নির্দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ ভূঃ স্বাহা। প্রজাপতিঋর্ষিরুষ্ণিক্ ছন্দো বায়ুর্দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ ভুবঃ স্বাহা। প্রজাপতিঋর্ষিরনুষ্টুপ্ ছন্দঃ সূর্য্যো দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ স্বঃ স্বাহা। ইতি স্রুবেণ আজ্যাহুতিত্রয়ং দদ্যাৎ। যদি তু প্রকৃতে কর্ম্মণি চরুহোমোঽস্তি, তদা আজ্যতন্ত্রোপক্রমবিহিতত্বাৎ চরুহোমস্ত প্রথমং মহাব্যাহৃতিহোমো ন কর্ত্তব্যঃ; অন্তে তু কর্ত্তব্য এব বিহিতত্বাৎ। ততঃ প্রকৃতং কর্ম্ম সমাপ্য, পুনর্মহাব্যাহৃতিহোমং কৃত্বা, প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা, শাট্যায়নহোমাদি-বামদেব্যগানান্তং সর্ব্বকর্ম্মসাধারণম্ উদীচ্যং কর্ম্ম কর্ত্তব্যং, তদভিধীয়তে। তত্র প্রথমং সঙ্কল্পং কুর্য্যাৎ।

## উদীচ্যং কর্ম্ম

বিষ্ণুরোঁ তৎসদদ্যেত্যাদি কৃতেঽস্মিন্ হোমকর্ম্মণি যদ্বৈগুণ্যং জাতং, তদ্দোষপ্রশমনায় শাট্যায়নহোমরূপ-প্রায়শ্চিত্তহোমমহং কুর্ব্বীয়। ইতি সঙ্কল্প্য "ওঁ অগ্নে ত্বং বিধুনামাসি" ইতি নাম কৃত্বা, আবাহ্য, সম্পূজ্য, প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীম্ অগ্নৌ হুত্বা, মহাব্যাহৃতিহোমঞ্চ পূর্ব্ববৎ কৃত্বা, প্রায়শ্চিত্তহোমং কুর্য্যাৎ। প্রজাপতিঋর্ষিরগ্নির্দেবতা প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ পাহি নো অগ্ন এনসে স্বাহা। (১) সর্ব্বত্র আজ্যেন জুহুয়াৎ। প্রজাপতিঋর্ষির্বিশ্বেদেবা দেবতাঃ প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ পাহি নো বিশ্ব বেদসে স্বাহা। (২) প্রজাপতিঋর্ষির্বিভাবসুর্দেবতা প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ যজ্ঞং পাহি বিভাবসো স্বাহা। (৩) প্রজাপতিঋর্ষিঃ শতক্রতুর্দেবতা প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ সর্ব্বং পাহি শতক্রতো

---

(১) হে অগ্নে! এনসে এনসঃ অস্মদযজ্ঞকৃতাৎ পাপাৎ নঃ অস্মান্ পাহি রক্ষ।

(২) হে বিশ্ব, হে বিশ্বদেবাঃ! বেদসে বেদনায়াঃ অস্মদযজ্ঞজনিতপাপসম্ভূতায়াঃ সকাশাৎ নঃ পাহি।

(৩) হে বিভাবসো অগ্নে! ময়া ক্রিয়মাণং যজ্ঞম্ অস্মদ্যপি পাহি।

স্বাহা। (৪) প্রজাপতিঋষিরনুষ্টুপ্ ছন্দোঽগ্নির্দেবতা প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ পাহি নো অগ্ন একয়া, পাহ্যুত দ্বিতীয়য়া। পাহি গীর্ভিস্তিসৃভিরূর্জাং পতে, পাহি চতসৃভির্বসো স্বাহা। (৫) প্রজাপতিঋষির্গায়ত্রীচ্ছন্দোঽগ্নির্দেবতা প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ পুনরূর্জা নিবর্ত্তস্ব, পুনরগ্ন ইষায়ুষা। পুনর্নঃ পাহ্যংহসঃ স্বাহা। (৬) প্রজাপতিঋষির্গায়ত্রীচ্ছন্দোঽগ্নির্দেবতা প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ সহ রয্যা নিবর্ত্তস্বাগ্নে পিন্বস্ব ধারয়া। বিশ্বপ্স্ন্যা বিশ্বতস্পরি স্বাহা। (৭) প্রজাপতিঋষিরনুষ্টুপ্ ছন্দোঽগ্নির্দেবতা প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ অনাজ্ঞাতং যদাজ্ঞাতং যজ্ঞস্য ক্রিয়তে মিথু। অগ্নে তদস্য কল্পয়, ত্বং হি বেত্থ যথাতথং স্বাহা। (৮)

---

(৪) হে শতক্রতো! ইন্দ্র! সব্যং সর্বো যাগঃ তত্র ভবং সব্যং যজ্ঞজনিতং ফলমিতি যাবৎ পাহি বিগুণেঽপি যজ্ঞে যথোক্তফলপ্রদো ভব।

(৫) হে অগ্নে! হে উর্জ্জাং পতে বলবতাং শ্রেষ্ঠ! হে বসো! ত্রিতয়মপ্যেতৎ বহ্নিসম্বোধনম্। একয়া গিরা আশীর্বাদরূপয়া নঃ অস্মান্ পাহি উত প্রকারভেদঃ, দ্বিতীয়য়া গিরা নঃ অস্মান্ পাহি, তথা তিসৃভিঃ, তথা চতসৃভিঃ গীর্ভিঃ।

(৬) হে অগ্নে! উর্জ্জা বলেন মাং প্রতিদেয়ত্বাভিমতেন পুনঃ নিবর্ত্তস্ব মহ্যং বলং দাতুং নিবর্ত্তস্বেতি তাৎপর্য্যম্। পুনঃ ইষায়ুষা ইচ্ছতীতি ইষঃ পুরুষঃ তস্যায়ুঃ তেন একপুরুষায়ুষেণ দেয়ত্বাভিমতেন মাং প্রতি পুনঃ নিবর্ত্তস্ব। মহ্যমিচ্ছকে আয়ুর্দাতুং নিবর্ত্তস্বেতি তাৎপর্য্যম্। তথা অস্মাজ্যজ্ঞকৃতাৎ অংহসঃ পাপাৎ নঃ অস্মান্ পুনঃ পাহি।

(৭) হে অগ্নে! বিশ্বতঃ পরি বিশ্বঃ পরিত্যাজ্য রয্যা রয়িনা ধনেন দেয়ত্বাভিমতেন সহ মাং প্রতি নিবর্ত্তস্ব মহ্যং ধনং দাতুং নিবর্ত্তস্বেতি তাৎপর্য্যম্। তথা বিশ্বপ্স্ন্যা অগ্নিসম্বন্ধিন্যা ধারয়া ঘৃতধারয়েত্যর্থঃ, পিন্বস্ব সিঞ্চ অর্থাৎ আত্মানমেব।

(৮) শ্রুত্যা যত্র যৎ নিযুক্তং তৎ আজ্ঞাতং, ততোঽন্যৎ অনাজ্ঞাতম্, অস্য যজ্ঞস্য সম্বন্ধি যৎ কর্ম্ম অনাজ্ঞাতং যচ্চ আজ্ঞাতম্ অপি মিথু মিথ্যা ক্রিয়তে, হে অগ্নে! অস্য যজ্ঞস্য সম্বন্ধি তৎ সর্বং কর্ম্ম ত্বং কল্পয় সমর্থয়, হি যস্মাৎ ত্বং যথাতথং যথার্থং বেত্থ জানাসি।

Asiatic Society, Calcutta
Acc. No. B 1668 Date 17/5/11



প্রজাপতির্ঋষিঃ পঙ্‌ক্তিশ্ছন্দঃ প্রজাপতির্দেবতা প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ প্রজাপতে ন ত্বদেতান্যন্যো বিশ্বা জাতানি পরি তা বভূব। যৎকামাস্তে জুহুমস্তন্নো অস্তু বয়ং স্যাম পতয়ো রয়ীণাং স্বাহা। (৯) ততঃ পূর্ব্ববৎ মহাব্যাহৃতিহোমং সমিৎপ্রক্ষেপঞ্চ কুর্য্যাৎ। ততো নবগ্রহহোমঃ কর্ত্তব্যঃ, প্রত্যেকং সমিৎপ্রক্ষেপণং গ্রহহোমে কর্ত্তব্যম্,* তদ্‌যথা—ওঁ আ কৃষ্ণেন রজসা-বর্ত্তমানো নিবেশয়ন্নমৃতং মর্ত্ত্যঞ্চ। হিরণ্যয়েন সবিতা রথেনা দেবো যাতি ভুবনানি পশ্যন্ স্বাহা। (১০) ওঁ আপ্যায়স্ব সমেতু তে বিশ্বতঃ সোম বৃষ্ণ্যম্। ভবা বাজস্য সঙ্গথে স্বাহা। (১১) ওঁ অগ্নির্মূর্দ্ধা দিবঃ ককুৎ পতিঃ পৃথিব্যা

---

(৯) হে প্রজাপতে! জগৎপ্রভো! যানি এতানি বিশ্বা বিশ্বানি ত্বৎ ত্বত্তঃ সকাশাৎ জাতানি জরায়ুজোদ্ভিজ্জোদ্ভিজ্জানি তা তানি ত্বৎ অন্যঃ কশ্চিৎ ন পরিবভূব ন পরিগৃহ্লাতি। যত এবম্ভূতো ভবান্ অতঃ যৎকামাঃ যদিচ্ছবঃ বয়ং তে ত্বদর্থং জুহুমঃ ত্বামুদ্দিশ্য আহুতিং দাস্যামঃ, তৎ তস্য ফলং ত্বৎপ্রসাদেন নঃ অস্মাকম্ অস্তু। কিঞ্চ বয়ং রয়ীণাং ধনানাং পতয়ঃ স্যাম ভবেম।

(১০) সবিতা আদিত্যঃ আয়াতি আগচ্ছতি, কিম্ভূতঃ? দেবঃ দেবনাদি-গুণযুক্তঃ। কেন? রথেন। কিম্ভূতেন? হিরণ্যয়েন সুবর্ণময়েন। কিং কুর্ব্বন্ আয়াতি? ভুবনানি পশ্যন্ ভুবনবর্ত্তিনো মনুষ্যান্ প্রকাশাপ্রকাশ-পুণ্যপাপ-কর্ত্তৄন্ সাক্ষিবৎ নিরীক্ষমাণঃ, তথা নিবেশয়ন্ স্বেষু স্বেষু ব্যাপারেষু সমাবেশয়ন্। কম্? অমৃতং মর্ত্ত্যঞ্চ দেবান্ মনুষ্যাংশ্চ। সূর্য্যোদয়ে মনুষ্যাঃ স্বেষু কর্ম্মসু বর্ত্তমানাঃ দেবান্ প্রীণন্তি, প্রীতাশ্চ দেবা বৃষ্ট্যাদিনা মনুষ্যান্ আপ্যায়য়ন্তি, তেন দেবমনুষ্যাণাং পরস্পরোপশ্লেষঃ। পুনঃ কিম্ভূতঃ সবিতা? কৃষ্ণেন মলিনেন রজসা রাত্রিকালেন সহ আবর্ত্তমানঃ অনুদিনং পরাবর্ত্তমানঃ।

(১১) হে সোম! বৃষ্ণ্যং বৃষ্টি বর্দ্ধকে মেঘে ভবং জলং তে তব সমেতু সঙ্গচ্ছতাম্ ত্বৎসান্নিধ্যং যাতু, অতস্ত্বং বিশ্বতঃ বিশ্বান্ আপ্যায়স্ব বর্দ্ধয়, অতএব বাজস্য অন্নস্য সঙ্গথে সঙ্গমে ভব।

---

* গ্রহাণাং সূর্য্যাদীনাং যথাক্রমং সমিধো যথা—অর্কঃ পলাশঃ খদিরো হ্যপামার্গোঽশ্বত্থ পিপ্পলঃ। উডুম্বরঃ শমী দূর্ব্বা কুশাশ্চ সমিধঃ ক্রমাৎ॥

অয়ম্। অপাং রেতাংসি জিন্বতি স্বাহা। (১২) ওঁ অগ্নে বিবস্বদুষসশ্চিত্রং রাধো অমর্ত্ত্য। আদাশুষে জাতবেদো বহা ত্বমদ্যা দেবাঁ উষর্ব্বুধঃ স্বাহা। (১৩) ওঁ বৃহস্পতে পরিদীয়া রথেন রক্ষোহামিত্রাঁ অপবাধমানঃ। প্রভঞ্জন্‌ৎ সেনাঃ প্রমৃণো যুধা জয়ন্নস্মাকমেধ্যবিতা রথানাং স্বাহা। (১৪) ওঁ শুক্রন্তে অন্যদ্ যজতন্তে অন্যদ্ বিষুরূপে অহনী দ্যৌরিবাসি। বিশ্বা হি মায়া অবসি স্বধাবন্ ভদ্রা তে পূষন্নিহ রাতিরস্তু স্বাহা। (১৫) ওঁ শন্নো

---

(১২) অয়ং ভৌমঃ অগ্নিঃ অগ্নেঃ মূর্দ্ধা অত্যন্ততেজোরূপতয়া নিতান্তলোহিতত্বাদ্ অগ্নেঃ প্রধানভূত এব। তথা দিবঃ আকাশস্য ককুৎ চিহ্নং ভূষণমিত্যর্থঃ। বৃষ্টিকর্ত্তৃত্বাৎ অপাং জলানাং পতিঃ, অতএব পৃথিব্যাঃ রেতাংসি বীজানি জিন্বতি প্রীণাতি সফলীকরোতি।

(১৩) হে অগ্নে হে জাতবেদঃ! (শ্রৌতস্মার্ত্তাগ্নিসম্বোধনম্ এতৎ) ত্বম্ উষর্ব্বুধঃ অসি উষসি বুধ্যসে প্রাতরাহুতিগ্রহণার্থং জাগর্ষি, অতএব ত্বং বুধরূপোঽসি, সোঽপি উষসি বুধ্যতে আদিত্যানুগতত্বাৎ তস্য। অতঃ দেবান্ অপ্রধানকর্ম্মভূতান্ অদ্যাঃ অদ্যান্ প্রাতরাহুতৌ প্রযুজ্যমানান্ ভক্ষ্যান্ আবহ প্রাপয়। কিম্ভূতস্ত্বম্? রাধঃ আরাধনীয়ঃ। হে অমর্ত্য! দেবস্বরূপ! কথমাবহ ইত্যাহ—বিবস্বৎ বিবস্বতে সূর্য্যার্থং বহ্নিনা সূর্য্যার্থমূঢ়াম্ আহুতিং দেবা অদন্তি। কিম্ভূতায় বিবস্বতে? উষসঃ উষসি চিত্রং রূপং আদাশুষে উপাত্তবতে।

(১৪) হে বৃহস্পতে! ত্বং রথেন পরিদীয়াঃ পর্য্যট। কিং কুর্ব্বন্? অমিত্রান্ শত্রূন্ অপবাধমানঃ পীড়য়ন্। ত্বং কিম্ভূতঃ? রক্ষোহা রাক্ষসহন্তা, তথা সেনাঃ দৈত্যানাং সৈন্যানি প্রভঞ্জন্ বিমৃদন্ প্রমৃণঃ প্রকর্ষেণ হিংসন্। কেন হিংসন্? যুধা যুদ্ধেন তথা জয়ন্ সন্ অস্মাকং রথানাম্ অবিতা অধিপালকঃ এধি ভব ইতি দেবৈঃ স্তূয়তে।

(১৫) হে অহনী! যুবাং শুক্রং যজতং শুক্রার্চ্চনং প্রতি অধিকরণভাবমুপগচ্ছতম্। তয়োরহ্নোর্মধ্যে হে স্বধাবন্ তে তব অহঃ—অন্যৎ ত্বদর্চ্চনপ্রযুক্তত্বাৎ হে পূষন্ তে তব অহঃ অন্যৎ ভবদারাধনপ্রযুক্তত্বাৎ অয়ম্ভাবঃ—যস্মিন্নহনি স্বধাবা অর্চ্চ্যতে, ন তত্র পূষা, যত্র চ পূষা, ন তত্র স্বধাবা শুক্রঃ পুনরুভয়ত্রার্চ্চ্যতে, একস্মিন্নহনি স্বধাবা সহ, অপরস্মিন্নহনি পূষ্ণা সহ।

দেবীরভিষ্টয়ে শন্নো ভবন্তু পীতয়ে। শংযোরভিস্রবন্তু নঃ স্বাহা। (১৬) ওঁ কয়া নশ্চিত্র আভুবদূতী সদা বৃধঃ সখা। কয়া শচিষ্ঠয়া বৃতা স্বাহা। (১৭) ওঁ কেতুং কৃণ্বন্নকেতবে পেশো মর্য্যা অপেশসে। সমুষদ্ভিরজায়থাঃ স্বাহা।( ১৮)

---

অতএব তে দ্বে অহনী বিষ্ণুরূপে নানারূপধারিণী তেন দিনদ্বয়সাধ্যে যাগে অহ্নোঃ সম্বোধনপূর্ব্বক আদেশোঽয়ম্। তথা হে স্বধাবন্! স্বধয়া শ্রাদ্ধকর্ম্ম উপলক্ষ্যতে সা যত্রাস্তি স সম্বোধ্যতে হে স্বধাবন্ হে শ্রাদ্ধদেব সূর্য্যেতি যাবৎ ত্বং দ্যৌরিবাসি আকাশ ইব ব্যাপকোঽসি। তথা ত্বং হি যস্মাৎ বিশ্বাঃ মায়াঃ অবসি অবিদ্যাত্মকত্বাৎ সংসারস্য মায়ারূপত্বং জগদ্রূপমায়াং গোপয়সি। তথা হে পূষন্! ইহ যজ্ঞে তে তব ভদ্রা শুভপ্রদা রাতিঃ আশীর্ব্বাদরূপং দানম্ অস্তু।

(১৬) প্রক্রান্তাঃ আপঃ নঃ অস্মাকং শং কল্যাণ্যঃ ভবন্তু। কিম্ভূতাঃ? দেবীঃ দেব্যঃ দেবনাদিগুণযুক্তাঃ। কিমর্থম্? অভিষ্টয়ে উপচয়ার্থম্ পীতয়ে পানায় চ। কিঞ্চ নঃ অস্মান্ অভিস্রবন্তু শুদ্ধ্যর্থং উপরি ক্ষরন্তু। কিমর্থম্? শংযোঃ কল্যাণস্য যোগায়।

(১৭) চিত্রে চয়নকর্ম্মণি অগ্নিস্থাপনকর্ম্মণীতি যাবৎ, প্রযোজক ইন্দ্রঃ কয়া ঊতী উত্যা কেন তর্পণেন নঃ অস্মাকং সদাবৃধঃ সর্ব্বদা বৃদ্ধিকারী আভুবৎ ভূয়াৎ? কয়া চ বৃতা ক্রিয়য়া বা চিত্রে নঃ অস্মাকং সখা মিত্রম্ আভুবৎ। কিম্ভূতয়া বৃতা? শচিষ্ঠয়া শচীতি কর্ম্মণো নাম অতিশয়কর্ম্মবত্যা। কেন তর্পণেন কয়া ক্রিয়াপরিপাট্যা চ ইন্দ্রোঽস্মাকং বৃদ্ধিকারী সখা চ ভূয়াৎ ইতি বাক্যার্থঃ। হে ইন্দ্র! ত্বয়া কথিতে সতি বয়ং তদনুতিষ্ঠামঃ। ইতি ভাবঃ।

(১৮) হে কেতো! ধ্বজরূপ! ত্বং সমজায়থাঃ সংজাতো ভব। কৈর্জ্জায়মানঃ? উষদ্ভিঃ বসদ্ভির্গৃহস্থৈরিত্যর্থঃ। কিং কুর্ব্বন্? মর্য্যাঃ মর্ত্যেভ্যঃ কেতুং জ্ঞানং কৃণ্বন্ কুর্ব্বন্। ন কেবলং জ্ঞানম্ অপি তু পেশঃ কুর্ব্বন্ পেশঃশব্দেন সুবর্ণং সৌন্দর্য্যং চাভিধীয়তে। কিম্ভূতেভ্যো মর্ত্ত্যেভ্যঃ? অকেতবে অজ্ঞানেভ্যঃ তথা অপেশসে নির্ধনেভ্যঃ কুরূপেভ্যো বা।

ততো গ্রহাধিদেবতাপ্রত্যধিদেবতাহোমং সমাপ্য ইন্দ্রাদিদশদিক্‌পালহোমং কুর্য্যাৎ। যথা—ওঁ ইন্দ্রায় স্বাহা। ওঁ অগ্নয়ে স্বাহা। ওঁ যমায় স্বাহা। ওঁ নৈঋর্তায় স্বাহা। ওঁ বরুণায় স্বাহা। ওঁ বায়বে স্বাহা। ওঁ কুবেরায় স্বাহা। ওঁ ঈশানায় স্বাহা। ওঁ ব্রহ্মণে স্বাহা। ওঁ অনন্তায় স্বাহা। ততঃ প্রত্যক্ষদেবতাহোমং কৃত্বা প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীম্ অগ্নৌ হুত্বা, পাতিতদক্ষিণজানুঃ উদকাঞ্জলিং গৃহীত্বা, অগ্নিপর্য্যুক্ষণং কুর্য্যাৎ।—প্রজাপতিঋর্ষিস্ত্রিষ্টুপ্ ছন্দঃ সবিতা দেবতা অগ্নিপর্য্যুক্ষণে বিনিয়োগঃ। ওঁ দেব সবিতঃ প্রসুব যজ্ঞং প্রসুব যজ্ঞপতিং ভগায়। দিব্যো গন্ধর্ব্বঃ কেতপূঃ কেতন্নঃ পুনাতু বাচস্পতির্বাচন্নঃ স্বদতু। অনেন উদকাঞ্জলিনা দক্ষিণাবর্ত্তেন অগ্নিং বেষ্টয়েৎ। প্রজাপতিঋর্ষিরদিতির্দেবতা উদকাঞ্জলিসেকে বিনিয়োগঃ। ওঁ অদিতেঽনুমংস্থাঃ। অনেন অগ্নের্দক্ষিণতঃ পশ্চিমান্তাৎ পূর্ব্বান্তং যাবৎ উদকাঞ্জলিনা সিঞ্চেৎ। প্রজাপতিঋর্ষিরনুমতির্দেবতা উদকাঞ্জলিসেকে বিনিয়োগঃ। ও অনুমতেঽনুমংস্থাঃ। অনেন অগ্নেঃ পশ্চিমতো দক্ষিণান্তাৎ উত্তরান্তং যাবৎ উদকাঞ্জলিনা সিঞ্চেৎ। প্রজাপতিঋর্ষিঃ সরস্বতী দেবতা উদকাঞ্জলিসেকে বিনিয়োগঃ। ওঁ সরস্বত্যনুমংস্থাঃ। অনেন অগ্নেরুত্তরতঃ পশ্চিমান্তাৎ পূর্ব্বান্তং যাবৎ উদকাঞ্জলিনা সিঞ্চেৎ। তত উত্তানহস্তদ্বয়েন কতিপয়াস্তৃতকুশান্ গৃহীত্বা—প্রজাপতিঋর্ষির্ব্বয়ো দেবতা দর্ভতৃণাভ্যঞ্জনে বিনিয়োগঃ। ওঁ অক্তং রিহাণা ব্যন্তু বয়ঃ। (১৯) অনেন অগ্রমধ্যমূলানি ঘৃতেনাভ্যনক্তি, মন্ত্রশ্চ বারত্রয়ং পঠিতব্যঃ। ততস্তান্ দর্ভান্ অদ্ভিরভ্যুক্ষ্য—প্রজাপতিঋর্ষিরনুষ্টুপ্ ছন্দো রুদ্রো দেবতা দর্ভজুটিকাহোমে বিনিয়োগঃ। ওঁ যঃ পশূনামধিপতী রুদ্রস্তন্তিচরো বৃষা। পশূনস্মাকং মা হিংসীরেতদস্তু হুতং তব স্বাহা। (২০) অনেন অগ্নৌ প্রক্ষিপেৎ। ততঃ

---

(১৯) বয়ঃ পক্ষিণঃ ইদং দর্ভতৃণম্ অক্তং ঘৃতেন অভ্যক্তং রিহাণাঃ আস্বাদয়ন্তঃ ব্যন্তু খাদন্তু।

(২০) যঃ রুদ্রঃ পশূনাং গবাদীনাম্ অধিপতিঃ স্বামী তন্তিচরঃ অন্তরীক্ষগঃ বৃষা বর্ষিতা পর্জ্জন্যরূপঃ অধুনা স এব প্রত্যক্ষীকৃত্য উচ্যতে। হে রুদ্র! ত্বম্ অস্মাকম্ পশূন্ গবাদীন্ মা হিংসীঃ। এতৎ হুতং তব অস্তু। প্রীতয়ে ইতি শেষঃ।

ওঁ অগ্নে ত্বং মৃড়নামাসি ইতি নাম কৃত্বা আবাহ্য, গন্ধ-মাল্য-বস্ত্র-তাম্বূলাদিভিঃ অগ্নিমভ্যর্চ্চ্য, ফলপুষ্পান্বিত-ঘৃতেন (যজমানসহিতঃ) উত্থায়—প্রজাপতিঋর্ষির্বিরাড়্‌গায়ত্রীচ্ছন্দ ইন্দ্রো দেবতা যশস্কামস্য যজনীয়প্রয়োগে বিনিয়োগঃ। ওঁ পূর্ণহোমং যশসে জুহোমি যোঽস্মৈ জুহোতি বরমস্মৈ দদাতি। বরং বৃণে যশসা ভামি লোকে স্বাহা। (২১) অনেন পূর্ণাহুতিং দদ্যাৎ। ততো ব্রহ্মণে পূর্ণপাত্রং তদনুকল্পভোজ্যং বা দক্ষিণাং দত্ত্বা—ওঁ ব্রহ্মন্ ক্ষমস্ব ইতি বিসৃজ্য, ব্রহ্মগ্রন্থিং মুক্ত্বা, অগ্নেরৈশান্যাং দিশি তুষ্ণং দত্ত্বা, ততঃ স্রুবেণ ভস্ম আহৃত্য, তেন স্রুবলগ্নভস্মনা—ওঁ কশ্যপস্য ত্র্যায়ুষম্। ইতি ললাটে। জমদগ্নেস্ত্র্যায়ুষম্। ইতি কণ্ঠে। যদ্দেবানাং ত্র্যায়ুষম্। ইতি দক্ষিণবাহুমূলয়োঃ। তন্মে অস্তু ত্র্যায়ুষং। ইতি হৃদি তিলকং দদ্যাৎ। ততঃ। ওঁ অগ্নে ত্বং সমুদ্রং গচ্ছ। ইতি অগ্নিং বিসৃজ্য, আচারাৎ—ওঁ পৃথ্বি, ত্বং শীতলা ভব। ইতি দধ্না পরিষিচ্য, কুশকুসুম-সহিত-জলপাত্রে হস্তং দত্ত্বা, কয়া নশ্চিত্র ইতি ঋক্‌ত্রয়স্য বামদেবঋষির্গায়ত্রীচ্ছন্দ ইন্দ্রো দেবতা শান্তিকর্ম্মণি জপে বিনিয়োগঃ। ওঁ কয়া নশ্চিত্র আভুবদূতী সদা বৃধঃ সখা। কয়া শচিষ্ঠয়া বৃতা।* ওঁ কস্ত্বা সত্যো মদানাং মংহিষ্ঠো মৎসদন্ধসঃ। দৃঢ়াচিদারুজে বসু। (২২) ওঁ অভীষুণঃ সখীনামবিতা জরিতৃণাং। শতং

---

(২১) পূর্ণহোমং পূর্ণস্রুবেণ অগ্নৌ হব্যত্যাগং অহং জুহোমি নিষ্পাদয়ামি। কিমর্থম্? যশসে কীর্ত্ত্যর্থম্। মন্ত্রেণৈব অর্থস্য স্তুতিমাহ। যঃ কশ্চিৎ অস্মৈ যশসে জুহোতি বরম্ অভিমতফলম্ অস্মৈ হোত্রে যশঃ (কর্ত্তৃ) দদাতি, যস্মাদেবম্ অতোঽহম্ বরং বৃণে হে যশঃ! ত্বয়া যশসা অহং লোকে ভামি তেজস্বী ভবামীত্যর্থঃ।

(২২)। হে ইন্দ্র! কঃ কো রসঃ ত্বা ত্বাং মৎসৎ মত্তং করোতি। কস্য রসঃ? অন্ধসঃ অন্নস্য সোমস্যেতি যাবৎ। কিম্ভূতো রসঃ? সত্যঃ সোমযাগে ক্রিয়মাণে অবশ্যম্ভাবী। পুনঃ কিম্ভূতঃ? মদানাং সুরাণাং মধ্যে মংহিষ্ঠঃ অতিশয়েন মদজনকঃ, যেন মদেন মত্তত্বং দৃঢ়াচিৎ দৃঢ়ান্যপি] বসু বসূনি শত্রুসম্বন্ধীনি ধনানীতি যাবৎ আরুজে ভঞ্জয়সি। ত্বয়া কথিতে সতি বয়ং তদনুতিষ্ঠামঃ ইতি ভাবঃ।

---

* পূর্ব্বং ব্যাখ্যাতোঽয়ং মন্ত্রঃ।

ভবাস্যূতয়ে। (২৩) ওঁ স্বস্তি ন ইন্দ্রো বৃদ্ধশ্রবাঃ স্বস্তি নঃ পূষা বিশ্ববেদাঃ। স্বস্তি নস্তার্ক্ষ্যো অরিষ্টনেমিঃ স্বস্তি নো বৃহস্পতির্দধাতু। (২৪) এতা ঋচো গীত্বা, শান্তিং কুর্য্যাৎ। গানাশক্তৌ ত্রিধা পঠেৎ। ততো দক্ষিণাং দত্ত্বা অচ্ছিদ্রাবধারণং কুর্য্যাৎ।

ইতি সর্ব্বকর্ম্মসাধারণম্ উদীচ্যং কর্ম্ম সমাপ্তম্।

---

## জ্ঞাতিকর্ম্ম

অথ বিবাহকর্ম্মাভিধীয়তে। তত্রাদৌ জ্ঞাতিকর্ম্ম। তত্র প্রথমং বিবাহদিবসে পিতৃসপিণ্ডঃ সুহৃদ্বা মসূরযবমাষাণাং শ্লক্ষ্ণচূর্ণমেকীকৃত্য কন্যায়াঃ শরীরং ম্রক্ষয়িত্বা —প্রজাপতির্ঋষিঃ প্রস্তারপংক্তিশ্ছন্দঃ কামো দেবতা জ্ঞাতিকর্ম্মণি কন্যায়াঃ পানীয়প্লাবনে বিনিয়োগঃ। ওঁ কাম বেদ তে নাম মদোনামাসি সমানয়ামুং সুরা তে অভবৎ পরমত্র জন্মাগ্রে তপসো নির্ম্মিতোঽসি স্বাহা। (১) অনেনামু-

---

(২৩) হে ইন্দ্র! ত্বং সখীনাং মিত্রাণাং তথা জরিতৄণাং স্তোতৄণাং নঃ অস্মাকং অভি আভিমুখ্যেন, তথা সু সুষ্ঠু যথা স্যাৎ তথা অবিতা পালয়িতা ভবাসি ভব। কিম্ভূতঃ সন্? শতং স্বয়ং শতধা ভূত্বেত্যর্থঃ, কিমর্থমবিতা ভবসি? উতয়ে বহুপ্রকারায় রক্ষণায়।

(২৪) নঃ অস্মভ্যম্ ইন্দ্রঃ স্বস্তি শান্তিং দধাতু দদাতু। কিম্ভূতঃ? বৃদ্ধশ্রবাঃ বৃদ্ধান্ শৃণোতি ইতি বৃদ্ধবাক্যশ্রবণকারী, তথা পূষা সূর্য্যঃ নঃ স্বস্তি দধাতু। কিম্ভূতঃ? বিশ্ববেদাঃ সর্ব্বজ্ঞঃ, তথা তার্ক্ষ্যঃ গরুড়ঃ নঃ স্বস্তি দধাতু, কিম্ভূতঃ? অরিষ্টনেমিঃ অব্যাহতগতিপ্রসরঃ, তথা বৃহস্পতিঃ নঃ স্বস্তি দধাতু।

---

(১) হে কাম কন্দর্প! তে তব নাম সংজ্ঞাং বেদ জানাম্যহম্। কিম্ভূতম্? মদোনামাসি মদহেতুত্বাৎ মদাভিধানত্বং, অতঃ কন্যায়াঃ পরিণেতারমমুকনামধেয়ং সমানয় সম্যক্ প্রাপয়, কিঞ্চ হে কন্যে! অয়ং তে তব সুরা অভবৎ ভূতবান্, তেন সহ ত্বয়া হি বস্তাৎ কাম উপপদ্যতে,

ম্মিতি সর্ব্বনামস্থানে অমুকশর্ম্মাণমিতি পতিনাম নিক্ষিপ্য উদকপূর্ণকলসেন শিরঃ প্রভৃতি কন্যাং স্নাপয়েৎ। ততঃ প্রজাপতির্ঋষির্মধ্যেজ্যোতির্জগতীচ্ছন্দ উপস্থরূপকামো দেবতা জাতিকর্ম্মণি কন্যায়া উপস্থপ্লাবনে বিনিয়োগঃ। ওঁ ইমমস্তু উপস্থং মধুনা সংসৃজামি প্রজাপতের্মুখমেতদ্দ্বিতীয়ং তেন পুংসোঽভিভবাসি স্ববশান্ বশিন্যসি রাজ্ঞী স্বাহা। (২) অনেন কিঞ্চিচ্ছিরসি দত্ত্বা ক্রোড়দেশে বহুতরং জলং দদ্যাৎ, যথা উপস্থদেশঃ প্লাবিতো ভবতি। ততঃ প্রজাপতির্ঋষিরুপরিষ্টাজ্জ্যোতিস্ত্রিষ্টুপ্ছন্দ উপস্থরূপকামো দেবতা জাতিকর্ম্মণি কন্যায়া উপস্থপ্লাবনে বিনিয়োগঃ। ওঁ অগ্নিং ক্রব্যাদমকৃণ্বন্ গুহানাঃ স্ত্রীণামুপস্থমৃষয়ঃ পুরাণাস্তেনাজ্যমকৃণ্বংস্ত্রৈশৃঙ্গং ত্বাষ্ট্রং ত্বয়ি তদ্দধাতু স্বাহা। (৩) অনেন পূর্ব্ববদেব শিরসি কিঞ্চিদুদকং দত্ত্বা ক্রোড়দেশে বহুতরং জলং দদ্যাৎ যথোপস্থঃ প্লাবিতো ভবতি।

ইতি জাতিকর্ম্ম।

---

কিঞ্চ পরমন্ত্রেতি হে কাম! অত্র অস্যাং কন্যায়াং পরং তব জন্ম, কন্যায়ামপি কামস্য জন্ম স্যাদুৎকৃষ্টম্। কিঞ্চ অগ্রে তপসা নির্ম্মিতোঽসি ত্বং স্ত্রীসকাশাৎ তপসঃ স্ত্রীপুরুষাত্মসাধনার্থং প্রজাপতিনা নির্ম্মিতঃ ইত্যর্থঃ। যত এবম্ভূতস্ত্বং তস্মৈ তুভ্যং স্বাহা। এবমন্যেষ্বপি স্বাহাকারপদং যোজ্যম্।

(২) হে কন্যে! ইমং তে তব উপস্থং মধুনা সুরয়া সংসৃজামি সংযোজয়ামি, যতঃ প্রজাপতের্মুখমেতৎ দ্বিতীয়ং দ্বিমুখো হি প্রজাপতিঃ একং মুখং ব্রহ্মগ্রহণার্থং দ্বিতীয়ং প্রজোৎপাদনার্থম্ ইতি দ্বিমুখত্বং, মুখতো হি প্রজা অসৃজদিতি শ্রুতেঃ, অতস্তেন উপস্থেন প্রজাপতিমুখরূপেণ সর্ব্বান্ পুংসঃ স্ববশান্ স্বায়ত্তান্ অভিভবাসি বশীকরোষীত্যর্থঃ। (ছন্দসি বহুলমিতি দীর্ঘঃ) কিম্ভূতা ত্বং? বশিন্যসি কান্তিমতী ভবসি। (বশ কান্তৌ) রাজ্ঞী স্বামিনী সর্ব্বকামানাং প্রধানভূতা অতস্ত্বং পুরুষানভিভবসীত্যর্থঃ।

(৩) অগ্নিং যজ্ঞভোক্তারং ক্রব্যাদম্ মাংসাশিনম্ অশ্বমেধাদৌ যজ্ঞে অকৃণ্বন্ কৃতবন্তঃ। কে? ঋষয়ঃ বশিষ্ঠাদ্যা ইত্যর্থঃ। কিম্ভূতাঃ? উপস্থং গুহ্যং গুহানা উপগূহমানাঃ আচ্ছাদয়ন্তঃ। পুনঃ কীদৃশাঃ? পুরাণাঃ আদিভূতাঃ। কাসামুপস্থং? স্ত্রীণাং তেনোপস্থেন্দ্রিয়েণ আজ্যং শুক্রং অকৃণ্বন্

## সম্প্রদানম্।

তত্র কৃতবৃদ্ধিশ্রাদ্ধঃ সম্প্রদাতা শুভলগ্নসময়ে সম্প্রদানশালায়াম্ উত্তরতঃ স্ত্রীগবীং বদ্ধা, বিষ্টরাদিকং সজ্জাকৃত্য, পশ্চিমাভিমুখ * উপবিষ্টস্তিষ্ঠেৎ ততঃ সম্মুখোপস্থিতে বরে সম্প্রদাতা কুশহস্ত উত্তরাভিমুখ আচম্য, —ওঁ তদ্বিষ্ণোঃ পরমং পদং সদা পশ্যন্তি সূরয়ঃ। দিবীব চক্ষুরাততম্। ইত্যনেন বিষ্ণুং স্মৃত্বা, নারায়ণাদীন্ অর্চ্চয়িত্বা, অক্ষতানি গৃহীত্বা স্বস্তিবাচনং কুর্য্যাৎ।—ওঁ কর্ত্তব্যেঽস্মিন্ শুভকন্যাসম্প্রদানকর্ম্মণি ওঁ পুণ্যাহং ভবন্তো ব্রুবন্তু ওঁ পুণ্যাহং ভবন্তো ব্রুবন্তু ওঁ পুণ্যাহং ভবন্তো ব্রুবন্তু। ইতি বদেৎ। ওঁ পুণ্যাহমিতি ব্রাহ্মণৈস্ত্রিরুক্তে—ওঁ কর্ত্তব্যেঽস্মিন্ শুভকন্যাসম্প্রদানকর্ম্মণি ওঁ স্বস্তি ভবন্তো ব্রুবন্তু ওঁ স্বস্তি ভবন্তো ব্রুবন্তু ওঁ স্বস্তি ভবন্তো ব্রুবন্তু। ইতি বদেৎ। ওঁ স্বস্তীতি ত্রৈস্ত্রিরুক্তে—ওঁ কর্ত্তব্যেঽস্মিন্ শুভকন্যাসম্প্রদানকর্ম্মণি ওঁ ঋদ্ধিং ভবন্তো ব্রুবন্তু ওঁ ঋদ্ধিং ভবন্তো ব্রুবন্তু ওঁ ঋদ্ধিং ভবন্তো ব্রুবন্তু। ইতি বদেৎ। ওঁ ঋধ্যতামিতি তৈস্ত্রিরুক্তে—ওঁ সোমং রাজানং বরুণমগ্নিমন্বারভামহে। আদিত্যং বিষ্ণুং সূর্য্যং ব্রহ্মাণঞ্চ বৃহস্পতিম্। ইতি। ওঁ স্বস্তি ন ইন্দ্রো বৃদ্ধশ্রবাঃ স্বস্তি নঃ পূষা বিশ্ববেদাঃ। স্বস্তি নস্তার্ক্ষ্যো অরিষ্টনেমিঃ স্বস্তি নো বৃহস্পতির্দধাতু। ইতি বা স্বস্তিসূক্তং পঠিত্বা, অক্ষতানি বিকীর্য্য, কৃতাঞ্জলিঃ। ওঁ সূর্য্যঃ সোমো যমঃ কালঃ সন্ধ্যে ভূতান্যহঃ ক্ষপা। পবনো দিক্পতির্ভূমিরাকাশং খচরামরাঃ। ব্রাহ্মং শাসনমাস্থায় কল্পধ্বমিহ সন্নিধিম্।

---

কৃতবন্তঃ, ত্রৈশৃঙ্গং ত্বাষ্ট্রং ত্রিশৃঙ্গস্যেদং ত্রৈশৃঙ্গং ত্বষ্টুরিদং ত্বাষ্ট্রং ত্বয়ি কন্যায়াং তৎ রেতো দধাতু স্থাপয়তু। ত্রিশৃঙ্গো বৃষভো মন্ত্রবর্ণাৎ ত্বষ্টা চ রেতঃ সিক্তং করোতিতি তৎ কর্ম্মণি যোগাদাজ্যং রেতঃ গর্ভব্যক্তেরিতি। এতদুক্তম্ভবতি ত্বাষ্ট্রং বীর্য্যং ত্রৈশৃঙ্গবীর্য্যং ত্বয়ি কন্যায়াং গর্ভধারণভূতং ভবত্বিতি।

---

* সর্ব্বত্র প্রাঙ্মুখো দাতা গ্রহীতা চ উদঙ্মুখঃ। এষ এব বিধির্দানে বিবাহে তু ব্যতিক্রমঃ॥ ইতি দানধর্ম্মোত্তরবচনেন বিবাহে গ্রহীতুঃ পূর্ব্বাভিমুখত্বং সম্প্রদাতুশ্চ উত্তরাভিমুখত্বং প্রাপ্তম্। পরন্তু—প্রাঙ্মুখায়াভিরূপায় বরায় শুচিসন্নিধৌ। দদ্যাৎ প্রত্যঙ্মুখঃ কন্যাং ক্ষণে লক্ষণসংযুতে ইতি শঙ্খবচনে শুচিপদশ্রবণাৎ সাগ্নিকানাং সম্প্রদাতৄণাং পশ্চিমাভিমুখত্বমুপলভ্যতে। তথা চ স্মার্ত্তমতে নিরগ্নিসম্প্রদাতুঃ উদঙ্মুখত্বং সাগ্নিকস্য তু প্রত্যঙ্মুখত্বং বোধ্যম্ ইত্যবিরোধঃ।

অয়মারম্ভঃ শুভায় ভবতু। ইতি পঠিত্বা, সম্প্রদাতা কৃতাঞ্জলির্বরং পশ্যন্ বদেৎ। ওঁ সাধু ভবানাস্তাং। জামাতা "ওঁ সাধ্বহমাসে" ইতি বদেৎ। সম্প্রদাতা— ওঁ অর্চ্চয়িষ্যামো ভবন্তং। জামাতা—"ওঁ অর্চ্চয়" ইতি বদেৎ। ততঃ সম্প্রদাতা গন্ধ-মাল্য-যথাশক্ত্যঙ্গুরীয়যজ্ঞোপবীত-বাসোযুগানি * দত্ত্বা জামাতরমর্চ্চয়েৎ।†

ততো জামাতুর্দক্ষিণং জানু বিধৃত্য বরণং কুর্য্যাৎ।—বিষ্ণুরোঁ তৎসদদ্য অমুকে মাসি অমুকরাশিস্থে ভাস্করে অমুকে পক্ষে অমুকতিথৌ অমুকগোত্রঃ শ্রীঅমুকদেবশর্ম্মা অমুকগোত্রস্য অমুকপ্রবরস্য অমুকদেবশর্ম্মণঃ প্রপৌত্রং, অমুকগোত্রস্য অমুকপ্রবরস্য অমুকদেবশর্ম্মণঃ পৌত্রং, অমুকগোত্রস্য অমুক-প্রবরস্য অমুকদেবশর্ম্মণঃ পুত্রং অমুকগোত্রং অমুকপ্রবরং শ্রীঅমুকদেবশর্ম্মাণং— অমুকগোত্রস্য অমুকপ্রবরস্য অমুকদেবশর্ম্মণঃ প্রপৌত্রীং, অমুকগোত্রস্য অমুক-প্রবরস্য অমুকদেবশর্ম্মণঃ পৌত্রীং, অমুকগোত্রস্য অমুকপ্রবরস্য অমুকদেবশর্ম্মণঃ পুত্রীং অমুকগোত্রাং অমুকপ্রবরাং শ্রীঅমুকদেবীং শুভব্রাহ্মবিবাহেন দাতুম্ এভির্গন্ধাদিভিরভ্যর্চ্চ্য বরত্বেন ভবন্তমহং বৃণে। জামাতা "ওঁ বৃতোঽস্মি" ইতি বদেৎ। সম্প্রদাতা কৃতাঞ্জলিঃ।—ওঁ যথাবিহিতং বরকর্ম্ম কুরু। জামাতা "ওঁ যথাজ্ঞানং করবাণি" ইতি বদেৎ। ততো বরম্ অন্তঃপুরং নীত্বা যোষিদ্ভি-র্মঙ্গলাচারতঃ অন্যোন্যমুখচন্দ্রিকায়ামবলোকিতায়াং, বরঃ প্রত্যাগত্য পূর্ব্বাভি-মুখস্তিষ্ঠেৎ। ততঃ অগ্রোপস্থিতে বরে সম্প্রদাতা কৃতাঞ্জলিঃ। প্রজাপতি-ঋষিরনুষ্টুপ্ছন্দোঽর্হণীয়া গৌর্দেবতা গবোপস্থাপনে বিনিয়োগঃ। ওঁ অর্হণা পুত্রবাসসা ধেনুরভবদ্যমে। সা নঃ পয়স্বতী দুহামুত্তরামুত্তরাং সমাম্॥ (১) ইতি পঠেৎ। ততো জামাতা।—প্রজাপতির্ঋষির্বিরাড়্

---

(১) যেয়ম্ অর্হণা পূজাসম্পাদিনী পুত্রবাসসা পুত্রানুগামিনী পয়স্বতী দুগ্ধবতী মে মম ধেনুঃ যমে বন্ধনে অভবৎ। সা নঃ অস্মাকং সম্বন্ধে

---

* আচ্ছাদ্য চার্চ্চয়িত্বা চ শ্রুতশীলবতে স্বয়ম্। আহূয় দানং কন্যায়া ব্রাহ্মো ধর্ম্মঃ প্রকীর্ত্তিতঃ। ইতি মনুবচনস্য ব্যাখ্যানে স্মার্ত্তঃ--আচ্ছাদ্য রক্তবাসোভ্যাং কন্যাং শুক্লবাসোভ্যাং বরং পরিধাপ্য তচ্চ বরণদত্তবস্ত্রাভ্যামেব লিপ্সয়মিতি ন পুনর্দীয়তে ইত্যুবাচ। তথা চ শুক্লক্ষৌম-বস্ত্রযুগ্মং বরায় দাতব্যমিতি তাৎপর্য্যঃ।

† এতানি গন্ধপুষ্পবস্ত্রযজ্ঞসূত্রাঙ্গুরীয়কানি ব্রাহ্মণায় নমঃ ইতি মন্ত্রেণ সম্প্রদাতা বরায় দদ্যাৎ. বরঃ স্বস্তীত্যুক্ত্বা প্রতিগৃহ্লীয়াৎ।

দেবতা উপবিশদহর্শীয়জপে বিনিয়োগঃ। ওঁ ইদমহমিমাং পদ্যাং বিরাজ-মন্নাদ্যায়াধিতিষ্ঠামি। (২) ইমং মন্ত্রং জপন্ আসনে প্রাঙ্মুখ উপবিশতি। ততঃ সম্প্রদাতা সাগ্রপঞ্চবিংশতিকুশপত্রৈঃ * সার্দ্ধদ্বির্বামাবর্ত্তগ্রন্থিরচিতম্ অধোমুখং বিষ্টরমুত্তরাগ্রম্ উত্তানহস্তাভ্যাং গৃহীত্বা।—ওঁ বিষ্টরো বিষ্টরো বিষ্টরঃ প্রতিগৃহ্যতাম্। ইত্যভিদধানো জামাত্রে বিষ্টরমর্পয়তি। জামাতা "ওঁ বিষ্টরং প্রতিগৃহ্লামি" ইতি গৃহীত্বা।—প্রজাপতির্ঋষিরনুষ্টুপ্ ছন্দ ওষধ্যো দেবতা বিষ্টরস্যাসনদানে বিনিয়োগঃ। ওঁ যা ওষধীঃ সোমরাজ্ঞীর্বহ্বীঃ শতবিচক্ষণাঃ। তা মহ্যমস্মিন্নাসনেঽচ্ছিদ্রাঃ শর্ম্ম যচ্ছত। (৩) ইতি আসনে বিষ্টরমুত্তরাগ্রং নিধায় উপবিশতি। ততঃ সম্প্রদাতা তাদৃশমেব অপরং বিষ্টরং গৃহীত্বা।—ওঁ বিষ্টরো বিষ্টরো বিষ্টরঃ প্রতিগৃহ্যতাম্। ইতি তথৈব জামাত্রে অর্পয়তি। জামাতাপি "ওঁ বিষ্টরং প্রতিগৃহ্লামি" ইতি গৃহীত্বা।—প্রজাপতির্ঋষি-রনুষ্টুপ্ ছন্দ ওষধ্যো দেবতা বিষ্টরস্য পাদয়োরধস্তাদ্দানে বিনিয়োগঃ। ওঁ যা ওষধীঃ সোমরাজ্ঞীর্বিষ্ঠিতাঃ পৃথিবীমনু। তা মহ্যমস্মিন্ পাদয়োরচ্ছিদ্রাঃ শর্ম্ম যচ্ছত। (৪) ইত্যনেন উত্তরাগ্রং বিষ্টরং পাদয়োরধঃ স্থাপয়েৎ। ততঃ সম্প্রদাতা উদকপাত্রং গৃহীত্বা—ওঁ পাদ্যাঃ পাদ্যাঃ পাদ্যাঃ

---

উত্তরামুত্তরাং সমাম্ উত্তরোত্তরমব্দং মনোরথান্ দুহাম্ দুগ্ধাম্ পূরয়তু ইত্যর্থঃ। লোপস্ত আত্মনেপদেম্বিতি তকারলোপঃ।

(২) ইদম্ আসনম্ ইমাং পদ্যাং পাদবদ্ধীং পাদবন্ধনকারিণীম্ পাদুকামিতি যাবৎ বিরাজম্ বিরাজমানাম্ অন্নাদ্যায় অন্নাদ্যর্থং অহম্ অধিতিষ্ঠামি আক্রামামি।

(৩) হে ওষধীঃ ওষধ্যঃ! যাঃ যূয়ং সোমরাজ্ঞীঃ সোমশ্চন্দ্রমা রাজা যাসাং তাঃ সোমরাজ্ঞ্যঃ বহ্বীঃ বহুপ্রকারাঃ, শতবিচক্ষণাঃ শতমুখ্যঃ তাঃ যূয়ং মহ্যম্ অস্মিন্নাসনে শর্ম্ম সুখং যচ্ছত দত্ত। কিম্ভূতাঃ? অচ্ছিদ্রাঃ নিরন্তরাঃ। ওষধীরিত্যাদিষু সুপাংসুলুক্ ইতি পূর্ব্বসবর্ণঃ।

(৪) হে ওষধীঃ ওষধ্যঃ যাঃ যূয়ং সোমরাজ্ঞীঃ সোমরাজ্ঞ্যঃ পৃথিবীম্ অনু পৃথিব্যাম্ বিষ্ঠিতাঃ বিশেষেণ স্থিতাঃ তাঃ যূয়ম্ অস্মিন্ দ্বিতীয়বিষ্টরে পাদ-য়োরধস্তান্নিহিতে মহ্যং শর্ম্ম যচ্ছত।

---

* স্মার্ত্তস্তু অত্র দর্ভসংখ্যা ন গ্রাহ্যা ইতি সিদ্ধান্তিতবান্।

প্রতিগৃহ্যতাম্ * ইত্যুক্ত্বা জামাত্রে অর্পয়তি। জামাতা "ওঁ পাদ্যং প্রতি-গৃহ্লামি" ইতি গৃহীত্বা, ভূমৌ তৎ পাত্রং স্থাপয়িত্বা—প্রজাপতির্ঋষির্বিরাড়্-গায়ত্রীচ্ছন্দ আপো দেবতাঃ পাদপ্রক্ষালনার্থোদক-বীক্ষণে বিনিয়োগঃ। ওঁ যতো দেবীঃ প্রতি পশ্যাম্যাপস্ততো মা ঋদ্ধিরাগচ্ছতু। (৫) অনেন উদকং বীক্ষেত। ততো জামাতা তস্মাদেব পাত্রাৎ উদকাঞ্জলিং গৃহীত্বা—প্রজাপতির্ঋষির্বিরাড়্গায়ত্রীচ্ছন্দঃ শ্রীর্দ্দেবতা সব্যপাদপ্রক্ষালনে বিনি-য়োগঃ। ওঁ সব্যং পাদমবনেনিজেঽস্মিন্ রাষ্ট্রে শ্রিয়ং দধে। (৬) ইত্যনেন বামপাদে উদকাঞ্জলিং দদ্যাৎ। ততঃ অপরমঞ্জলিং গৃহীত্বা—প্রজাপতির্ঋষি-র্বিরাড়্গায়ত্রীচ্ছন্দঃ শ্রীর্দ্দেবতা দক্ষিণপাদপ্রক্ষালনে বিনিয়োগঃ। ওঁ দক্ষিণং পাদমবনেনিজেঽস্মিন্ রাষ্ট্রে শ্রিয়মাবেশয়ামি। (৭) ইত্যনেন দক্ষিণপাদে উদকাঞ্জলিং দদ্যাৎ। ততঃ পুনরুদকাঞ্জলিং গৃহীত্বা—প্রজাপতি-ঋর্ষির্বিরাড়্গায়ত্রীচ্ছন্দঃ শ্রীর্দ্দেবতা উভয়পাদপ্রক্ষালনে বিনিয়োগঃ। ওঁ পূর্ব্বমন্যমপরমন্যমুভৌ পাদাববনেনিজে। রাষ্ট্রস্যর্দ্ধ্যা অভয়স্যাবরুদ্ধ্যৈ। † (৮) ইত্যনেন পাদদ্বয়ে উদকাঞ্জলিং দদ্যাৎ। ততঃ সম্প্রদাতা সাক্ষতদূর্ব্বাপল্লবান্ শঙ্খাদিপত্রে নিধায়। ওঁ অর্ঘ্যমর্ঘ্যমর্ঘ্যং প্রতিগৃহ্যতাম্। ইত্যুক্ত্বা জামাত্রে অর্ঘ্যমর্পয়তি। জামাতা "ওঁ অর্ঘ্যং প্রতিগৃহ্লামি" ইত্যর্ঘ্যং গৃহীত্বা—প্রজাপতির্ঋষিরর্ঘ্যং দেবতা অর্ঘ্যপ্রতিগ্রহণজপে বিনিয়োগঃ। ওঁ অন্নস্য

---

(৫) হে আপঃ বৃষ্টয়ঃ! যতঃ সূর্য্যাদায়াতা যূয়ান্ দেবীঃ দেবনাদিযুক্তা ইত্যহং প্রতিপশ্যামি আদিত্যাজ্জায়তে বৃষ্টিরিতি স্মৃতেঃ। ততঃ সূর্য্যাৎ মা মাম্ ঋদ্ধিঃ সংপত্তিঃ আগচ্ছতু।

(৬) অহম্ সব্যং পাদং বামং পাদম্ অবনেনিজে প্রক্ষালয়ামি অস্মিন্ রাষ্ট্রে বিষয়ে শ্রিয়ং দধে অর্পয়ামি।

(৭) আবেশয়ামি প্রবেশয়ামি অবশিষ্টমুক্তার্থম্।

(৮) পূর্ব্বমন্যং সব্যং অপরমন্যং দক্ষিণং তাবুভৌ পাদৌ অবনেনিজে প্রক্ষালয়ামি রাষ্ট্রস্য ঋদ্ধ্যৈ সমৃদ্ধ্যৈ বৃদ্ধ্যর্থং—অভয়স্য ভয়াভাবস্য অবরুদ্ধ্যৈ পরিগ্রহায়।

---

* স্মার্ত্তস্তু পাদ্যং পাদ্যং পাদ্যং প্রতিগৃহ্যতামিত্যুবাচ। ভট্টাচার্য্যাদয়োঽপি তথা।

† যজুরিদং যজুষ্ট্বাচ্ছন্দো নাস্তি। ইতি কেচিৎ।

রাষ্ট্রিরসি রাষ্ট্রিস্তে ভূয়াসং *। (৯) ইত্যনেনার্ঘ্যং স্বশিরসি দদ্যাৎ। ততঃ সম্প্রদাতা উদকপাত্রং গৃহীত্বা—ওঁ আচমনীয়মাচমনীয়মাচমনীয়ং প্রতিগৃহ্যতাম্। ইত্যুক্ত্বা জামাত্রে উদকপাত্রমর্পয়তি। জামাতা "ওঁ আচমনীয়ং প্রতিগৃহ্লামি" ইত্যাচমনীয়ং গৃহীত্বা—প্রজাপতির্ঋষিরাচমনীয়ং দেবতা আচমনীয়াচমনে বিনিয়োগঃ। ওঁ যশোঽসি, যশো ময়ি ধেহি †। (১০) ইত্যনেন উত্তরাভিমুখীভূয় আচামেৎ। ততঃ সম্প্রদাতা ঘৃতদধিমধুযুক্তং কাংস্যপাত্রং কাংস্যপাত্রান্তরেণাচ্ছাদ্য গৃহীত্বা—ওঁ মধুপর্কো মধুপর্কো মধুপর্কঃ প্রতিগৃহ্যতাম্। ইত্যুক্ত্বা জামাত্রে মধুপর্কমর্পয়তি। জামাতা "ওঁ মধুপর্কং প্রতিগৃহ্লামি" ইতি গৃহীত্বা—প্রজাপতির্ঋষির্মধুপর্কো দেবতা অর্হণীয়-মধুপর্কগ্রহণে বিনিয়োগঃ। ওঁ যশসো যশোঽসি। (১১) ইত্যনেন মধুপর্কং ভূমৌ সংস্থাপ্য—প্রজাপতির্ঋষির্মধুপর্কো দেবতা অর্হণীয়-মধুপর্কপ্রাশনে বিনিয়োগঃ। ওঁ যশসো ভক্ষ্যোঽসি মহসো ভক্ষ্যোঽসি শ্রীর্ভক্ষ্যোঽসি শ্রিয়ং ময়ি ধেহি। (১২) অনেন মন্ত্রেণ বারত্রয়ং

---

(৯) হে অর্ঘ্য! অয়ন্ত্বং রাষ্ট্রিঃ দীপ্তিঃ অসি অহমপি তে তব প্রসাদাৎ রাষ্ট্রিঃ দীপ্তিঃ ভূয়াসম্। রাষ্ট্রিরিতি রাজতেরৌণাদিকস্ত্রিমকৃপ্রত্যয়ঃ, বাহুল্যাৎ মলোপঃ।

(১০) হে আচমনীয়! যতত্ত্বং যশোঽসি কীর্ত্তিরূপমসি অতো ময়ি যশো ধেহি মাং যশস্বিনং কুরু।

(১১) হে মধুপর্ক! যতত্ত্বং যশোঽসি কীর্ত্তিরিব মধুরোঽসি তথা ত্বদ্-যোগাৎ অহমপি যশসঃ কীর্ত্তিমান্ সঞ্জাতঃ। যশস ইতি মত্বর্থে অর্শআদিত্বাৎ।

(১২) হে মধুপর্ক! যতত্ত্বং যশসো ভক্ষ্যোঽসি যশস্বিনাং যশঃ অতত্ত্বং যশসঃ যশসে ভক্ষ্যোঽসি, তথা মহস্বিনাং মহঃ অতঃ মহসঃ মহসে তেজসে ভক্ষ্যোঽসি, তথা যতত্ত্বং শ্রীমতাং শ্রীঃ অতত্ত্বং শ্রীঃ শ্রিয়ৈ ভক্ষ্যোঽসি, তেন ত্বদ্ভক্ষণাৎ কীর্ত্তিস্তেজোলক্ষ্মীশ্চ ভবতি অতঃ শ্রিয়ং ময়ি ধেহি। যশসঃ মহসঃ ইতি চতুর্থ্যর্থে বহুলং ছন্দসি ইতি ষষ্ঠী। শ্রীরিতি সুপাংসুলুগিতি চতুর্থ্যেকবচনস্য সুঃ।

---

* যজুষ্কাৎ যজুষ্ট্বাৎ ছন্দো নাস্তি।
† যজুরিদম্ ছন্দো নাস্তি।

ভক্ষয়িত্বা, সকৃৎ তূষ্ণীং ভক্ষয়েৎ। ততো জামাতা আচান্তঃ, মঙ্গলৌষধিলিপ্তেন দক্ষিণহস্তেন তাদৃশমেব কন্যায়া দক্ষিণহস্তং গৃহীত্বা স্বহস্তোপরি নিদধ্যাৎ। ততঃ সৌভাগ্যপতিপুত্রবতী নারী মঙ্গলপূর্ব্বকং কুশেন মাল্যযুক্তেন হস্তদ্বয়ং বধ্নীয়াৎ। ততঃ সম্প্রদাতা ফল-তিল-কুশ-কুসুম সহিতম্ উদকপাত্রং দক্ষিণহস্তেন গৃহীত্বা, বামহস্তেন কন্যায়া দক্ষিণস্কন্ধং ধৃত্বা অর্চ্চয়েৎ। যথা—ওঁ এতস্যৈ সবস্ত্রাচ্ছাদনায়ৈ সালঙ্কারায়ৈ কন্যায়ৈ নমঃ ইতি ত্রিঃ সংপ্রোক্ষ্য, এতে গন্ধপুষ্পে ওঁ এতস্যৈ সবস্ত্রাচ্ছাদনায়ৈ সালঙ্কারায়ৈ কন্যায়ৈ নমঃ। এতে গন্ধপুষ্পে এতদধিপতয়ে ওঁ প্রজাপতয়ে নমঃ। এতে গন্ধপুষ্পে এতৎসম্প্রদানায় ওঁ বরায় নমঃ। ইত্যর্চ্চয়িত্বা—বিষ্ণুরোঁ। তৎসদদ্য অমুকে মাসি অমুকরাশিস্থে ভাস্করে অমুকে পক্ষে অমুকতিথৌ অমুকগোত্রঃ শ্রীঅমুকদেবশর্ম্মা শ্রীবিষ্ণুপ্রীতিকামঃ "অমুকগোত্রস্য অমুকপ্রবরস্য * অমুক-দেবশর্ম্মণঃ প্রপৌত্রায়, অমুকগোত্রস্য অমুকপ্রবরস্য অমুকদেবশর্ম্মণঃ পৌত্রায়, অমুকগোত্রস্য অমুকপ্রবরস্য অমুকদেবশর্ম্মণঃ পুত্রায়, অমুকগোত্রায় অমুকপ্রবরায় অমুকদেবশর্ম্মণে বরায় (ব্রাহ্মণায়) অর্চ্চিতায়—অমুকগোত্রস্য অমুকপ্রবরস্য অমুকদেবশর্ম্মণঃ প্রপৌত্রীম্ অমুকগোত্রস্য অমুকপ্রবরস্য অমুকদেবশর্ম্মণঃ পৌত্রীম্, অমুকগোত্রস্য অমুকপ্রবরস্য অমুকদেবশর্ম্মণঃ পুত্রীম্, অমুকগোত্রাম্ অমুকপ্রবরাম্ শ্রীঅমুকীদেবীম্ অর্চ্চিতাম্" ইতি ত্রিরুক্ত্বা—এনাং কন্যাং সালঙ্কারাং বাসোযুগাচ্ছাদিতাম্ অরোগিণীং প্রজাপতিদেবতাকাং তুভ্যমহং সম্প্রদদে। † ইতি হস্তদ্বয়োপরি তিলজলকুশান্ অর্পয়তি। ততো জামাতা "ওঁ স্বস্তি" ইত্যুক্ত্বা গায়ত্রীং জপেৎ। ততঃ "ওঁ কন্যেয়ং প্রজাপতিদেবতাকা" ইত্যুক্ত্বা,—ওঁ ক ইদং

---

* তুলাপুরুষদানে চ তথৈব হাটকাচলে। কন্যাদানে তথোৎসর্গে কীর্ত্তয়েৎ প্রবরাদিকম্॥ ইতি ভবিষ্যপুরাণবচনাৎ কন্যাদানে প্রবরোল্লেখো বিহিতঃ।

প্রবরা যথা সাণ্ডিল্যগোত্রে—সাণ্ডিল্যাসিতদেবলাঃ। ভরদ্বাজগোত্রে—ভরদ্বাজাঙ্গিরস-বার্হস্পত্যাঃ। বাৎস্যসাবর্ণমৌদ্গল্যানাং—ঔর্ব্বচ্যবন-ভার্গবজামদগ্ন্যাপ্নবন্তঃ। কাশ্যপগোত্রে কাশ্যপাপসারনৈধ্রুবাঃ।

† দানাধিকারিণো যথা—পিতা পিতামহো ভ্রাতা সকুল্যো জননী তথা। কন্যাপ্রদঃ পূর্ব্বনাশে প্রকৃতিস্থঃ পরঃ পরঃ। তথা—পিতা দদ্যাৎ স্বয়ং কন্যাং ভ্রাতা বানুমতঃ পিতুঃ। মাতামহো মাতুলশ্চ সকুল্যো বান্ধবস্তথা। মাতা ত্বভাবে সর্ব্বেষাং প্রকৃতৌ যদি বর্ত্ততে। ইত্যেতৈর্ব্বচনৈঃ পিত্রাদ্যভাবে পিতামহাদীনামধিকারঃ প্রতিপাদিতঃ পিত্রাদিসত্ত্বেঽপি পিত্রনুমতানাং ভ্রাত্রাদীনাং প্রতিনিধিত্বেন স্বীকারাৎ তত্র ক্রিয়াফলস্য পরগতত্বেন বাক্যে দদানীতি প্রয়োগঃ কার্য্যঃ। সর্ব্বেষামভাবে মাতা স্বয়মধিকারিণী চেৎ নান্দীশ্রাদ্ধং বিনৈব কন্যাং দদ্যাৎ ইতি স্মার্ত্তঃ।

কন্যা অদাৎ কামঃ কামায়াদাৎ কামো দাতা কামঃ প্রতিগ্রহীতা কামঃ সমুদ্রমাবিশৎ। কামেন ত্বা প্রতিগৃহ্লামি কামৈতত্তে। ইতি কামস্তুতিং পঠেৎ। ততঃ সম্প্রদাতা দক্ষিণাং কাঞ্চনং তদভাবে তন্মূল্যং রজতাদিকং বা অভ্যর্চ্চ্য—বিষ্ণুরোঁ তৎসদদ্যেত্যাদি শ্রীবিষ্ণুপ্রীতিকামনয়া কৃতৈতৎ কন্যাসম্প্রদানকর্ম্মণঃ সাঙ্গতার্থং দক্ষিণামিদং কাঞ্চনং বহ্নিদৈবতং (কাঞ্চনমূল্যং শ্রীবিষ্ণুদৈবতং বা) অমুকগোত্রায় অমুকপ্রবরায় শ্রীঅমুকদেবশর্ম্মণে বরায় তুভ্যমহং সম্প্রদদে। ইতি দক্ষিণাং দদ্যাৎ। জামাতা পুনঃ ওঁ স্বস্তীতি ব্রূয়াৎ। অস্মিন্নেব সময়ে সম্প্রদাতা যৌতুকং ভূম্যাদিকং দদ্যাৎ। ততো নাপিতেন "গৌর্গৌর্গৌঃ" ইত্যুক্তে, জামাতা পঠতি—প্রজাপতির্ঋষির্বৃহতীচ্ছন্দো গৌর্দেবতা পূর্ব্ববদ্ধগবীমোক্ষণে বিনিয়োগঃ। ওঁ মুঞ্চ গাং বরুণপাশাদ্দ্বিষন্তং মেঽভিধেহি। তং জহ্যমুষ্য চোভয়োরুৎসৃজ গামত্তু তৃণানি পিবতূদকম্। (১৩) ততো নাপিতেন মুক্তায়াং গবি জামাতা ইমং মন্ত্রং পঠতি—প্রজাপতির্ঋষিস্ত্রিষ্টুপ্ ছন্দো গৌর্দেবতা গবানুমন্ত্রণে বিনিয়োগঃ। ওঁ মাতা রুদ্রাণাং দুহিতা বসূনাং স্বসাদিত্যানামমৃতস্য নাভিঃ। প্র ণু বোচং চিকিতুষে জনায় মাগামনাগামদিতিং বধিষ্ট। (১৪) ইত্যনেন গাং বিসর্জ্জয়েৎ। ততো বরস্যোত্তরীয়বস্ত্রেণ কন্যায়াঃ পরিহিতবস্ত্রাঞ্চলেন চ মঙ্গলপূর্ব্বকং দ্বিজো গায়ত্র্যা গ্রন্থিং বধ্নীয়াৎ। * ততঃ কুশগ্রন্থিং

---

(১৩) এতাং গাং বরুণপাশাৎ বরুণবন্ধনাৎ মুঞ্চ। মোচয়িত্বা উৎসৃজ বিসর্জ্জয়। সা ইয়ং তৃণানি অত্তু, উদকং পিবতু। এবং মোক্ষিতা ত্বং হে অর্হনীয়ে, মে মম অর্হনীয়স্য অমুষ্য অর্চ্চয়িতুশ্চ উভয়োর্দ্বিষন্তং দ্বেষ্টারং অভিধেহি বধান তথা জহি নাশয়।

(১৪) যেয়ং মমার্হণীয়স্যালম্ভার্থং অর্হণীয়া গৌরানীতা সা এষা রুদ্রাণাং

---

* আচারাৎ মন্ত্রা যথা—ওঁ সাবিত্রী সত্যভামা হিমগিরিতনয়াঽরুন্ধতী জহ্নুকন্যা, লোপামুদ্রা সুভদ্রাঽদিতি-রতি-কমলা রুক্মিণী রেবতী চ। রম্ভা মেনা যশোদা সুরপতিবনিতা কৈটভী বাণপুত্রী, সৌভাগ্যং পুত্রলাভং সকলশুভকরং মঙ্গলং বো দিশন্তু ॥ ওঁ দূর্ব্বা পুষ্পং ফলঞ্চৈব বস্ত্রং তাম্বূলমেব চ। এভিঃ কন্যা ময়া দত্তা রক্ষণং পোষণং কুরু ॥ ওঁ যথেন্দ্রাণী মহেন্দ্রস্য স্বাহা চৈব বিভাবসোঃ। রোহিণী চ যথা চন্দ্রে দময়ন্তী যথা নলে ॥ যথা বৈশ্রবণে ভদ্রা বশিষ্ঠে চাপ্যরুন্ধতী। সীতা চ রামচন্দ্রে চ গৌরী শঙ্করে এব চ। যথা নারায়ণে লক্ষ্মীস্তথা ত্বং ভব ভর্ত্তরি ॥ ততঃ ওঁ কয়োর্গ্রন্থিঃ পততি? ইতি পৃচ্ছেৎ। অন্যো ব্রাহ্মণঃ ওঁ লক্ষ্মীনারায়ণয়োঃ ইতি বদেৎ। এবং কয়োর্গ্রন্থিঃ পততি? সীতারাময়োঃ। কয়োর্গ্রন্থিঃ পততি? নলদময়ন্ত্যোঃ। কয়োর্গ্রন্থিঃ পততি? শ্রীঅমুকদেবশর্ম্ম-শ্রীঅমুকদেব্যোঃ। এতে কাল্পনিকা মন্ত্রা ন পাঠ্যত্বেন বিহিতাঃ।

মুক্তা, দক্ষিণং করম্ আঘ্রাপ্য, অন্যোন্যং মুখচন্দ্রিকামবলোক্য ভর্ত্তুর্দক্ষিণপার্শ্বে আসনে কন্যামুপবেশয়েৎ। ততঃ সম্প্রদাতা কৃতাঞ্জলিঃ—ওঁ কৃতৈতৎ কন্যা-সম্প্রদানকর্ম্মাচ্ছিদ্রমস্তু। ইতি বদেৎ। ওঁ অস্তু ইতি প্রতিবচনম্। ইতি অচ্ছিদ্রং বাচয়িত্বা,—বিষ্ণুরোঁ। তৎসদদ্যেত্যাদি (অত্র মুখ্যচান্দ্রমাসোল্লেখঃ কার্য্যঃ) অমুকগোত্রঃ শ্রীঅমুকদেবশর্ম্মা কৃতেঽস্মিন্ শুভকন্যাসম্প্রদানকর্ম্মণি যদ্বৈগুণ্যং জাতং তদ্দোষপ্রশমনায় শ্রীবিষ্ণুস্মরণমহং করিষ্যে। ইতি সঙ্কল্প্য, ওঁ তদ্বিষ্ণোরিত্যাদি পঠিত্বা শ্রীবিষ্ণুং স্মৃত্বা, কৃষ্ণায় কর্ম্মফলং সমর্প্য নমস্কুর্য্যাৎ। ততস্তৌ গৃহং নয়েৎ। ইতি সম্প্রদানং সমাপ্তম্।

## অথ পাণিগ্রহণম্

* ততো জামাতা আচারাৎ প্রথমতঃ পূর্ব্বস্থাপিতঘটে ষষ্ঠীং মার্কণ্ডেয়ঞ্চ সম্পূজ্য প্রধানগৃহাগতঃ কুশণ্ডিকোক্তবিধানেন যোজক-নামানমগ্নিং সংস্থাপ্য, বিরূপাক্ষজপান্তাং কুশণ্ডিকাং সমাপয়েৎ। ততো জামাতুঃ কশ্চিদেকো বয়স্যঃ অশোষ-জলাশয়োদ্ধৃতজলপূর্ণ-কলসহস্তো বস্ত্রাচ্ছাদিত-কায়ো বাগ্যতঃ পূর্ব্বেণাগ্নিং পরিক্রম্য, অগ্নের্দক্ষিণস্যাং দিশি উত্তরাভিমুখ উর্দ্ধস্তিষ্ঠেৎ। ততোঽপরোঽপি কশ্চিদ্বয়স্যঃ পর্চ্চনিকাহস্তস্তথৈব † গত্বা, জলকলসধারিণঃ পৃষ্ঠদেশে তথৈব তিষ্ঠেৎ। ততঃ অগ্নেঃ পশ্চিমতঃ শমীপত্র-মিশ্রিতান্ লাজান্ চতুরঞ্জলিপরিমিতান্ শূর্পে নিধায়, তৎসমীপে সপুত্রাং শিলাং সংস্থাপ্য, তৎপশ্চিমতো বীরণপত্ররচিতং পটবেষ্টিতং কটঞ্চ সংস্থাপ্য ‡ জামাতা গৃহং প্রবিশ্য, অহতবাসোযুগম্ অধশ্চোপরি

---

মাতা, বসূনাং দুহিতা,আদিত্যানাং স্বসা, অমৃতস্য দধিদুগ্ধাদেঃ নাভিঃ কারণম্, অতঃ এতাং গাং অনাগাং অনপরাধাং অদিতিং অদীনাং গাং হে যজমান-পরিচারকাঃ! যূয়ং মা বধিষ্ট মা প্রাণৈর্বিযোজয়ত। অহমেবং নু ভোঃ জনায় অস্মৈ যজমানায় প্রবোচং প্রোক্তবানস্মি গোবধং মা কুরুধ্বমিতি। কিম্ভূতায়? চিকিতুষে জ্ঞানসম্পন্নায়। প্র ণু বোচমিতি ব্যবহিতোপসর্গসম্বন্ধা বহুলং ছন্দসি মাযোগে অড়ভাবঃ।

---

* অথাত্র গোভিলঃ—অথ যস্যাঃ পাণিং গ্রহীষ্যন্ ভবতি সশিরস্কা সাপ্লুতা ভবতীতি বধ্বা অবিধবোপনীতমঙ্গলোদকৈঃ স্নানমুপদিদেশ।

† পাচনীতি ভাষা।

‡ বীরণং বেণা ইতি ভাষা। কটম্, মাদুর ইতি ভাষা তজ্জাতীয়মন্যদ্বা ইতি ধ্যেয়ম্।

বধূমনেন মন্ত্রদ্বয়েন যথাক্রমং পরিধাপয়েৎ। প্রজাপতি-ঋর্ষির্জগতীচ্ছন্দঃ পরিধাপয়িত্র্যো দেবতা অধোবস্ত্রপরিধাপনে বিনিয়োগঃ। ওঁ যা অকৃন্তন্নবয়ন্ যা অতন্বত যাশ্চ দেব্যো অন্তানভিততন্থ। তাস্ত্বা দেব্যো জরসা সংব্যয়ন্ত্বায়ুষ্মতীদং পরিধৎস্ব বাসঃ। (১) অনেন মন্ত্রেণ বধূমধোবস্ত্রং পরিধাপয়েৎ। প্রজাপতিঋর্ষিস্ত্রিষ্টুপ্ ছন্দঃ পরিধাপয়িত্র্যো দেবতা উত্তরীয়বস্ত্রপরিধাপনে বিনিয়োগঃ। ওঁ পরিধত্ত ধত্ত বাসসৈনাং শতায়ুষীং কৃণুত দীর্ঘমায়ুঃ। শতঞ্চ জীব শরদঃ সুবর্চ্চা বসূনি চার্য্যে বিভজাসি জীবন্॥ (২) অনেন যজ্ঞোপবীতরূপমুত্তরীয়বস্ত্রং পরিধাপয়েৎ। ততো বধূম্ অগ্ন্যভিমুখং নয়ন্ জামাতা পঠতি—প্রজাপতিঋর্ষিরনুষ্টুপ্ ছন্দঃ সোমো দেবতা পত্ন্যাঃ কন্যানয়নজপে বিনিয়োগঃ। ওঁ সোমোঽদদদ্

---

(১) যাঃ স্ত্রিয়ঃ ইদং বাসঃ বস্ত্রং পরিধীয়মানং অকৃন্তন্ কর্ত্তিতবত্যঃ সূত্রানীত্যধ্যাহার্য্যম্। তথা যাঃ স্ত্রিয়ো অবয়ন্ তন্তুসন্তানং কৃতবত্যঃ যাশ্চ অতন্বত বিস্তারিতবত্যঃ, চকারোঽনুক্তসমুচ্চয়ার্থঃ, দেব্যঃ দেবনাদিগুণযুক্তাঃ অন্তান্ পটখণ্ডান্ অভিতঃ উভয়পার্শ্বয়োরপি ততন্থ গ্রথিতবত্যঃ। তিঙাং তিঙো ভবন্তীতি লিট্, প্রথমপুরুষবহুবচনার্থে মধ্যমপুরুষৈকবচনম্। তা দেব্যঃ হে কন্যকে! ত্বা ত্বাং জরসা জরান্তং যাবৎ সংব্যয়ন্তু পরিধাপয়ন্তু। হে আয়ুষ্মতি হে কল্যাণবতি! ইদং বাসঃ পরিধৎস্ব মাঙ্গল্যং বস্ত্রমিদং অঙ্গাবরণং কুরু।

(২) হে উপাধ্যায়াদয়ঃ! যুয়ম্ এনাং কন্যাং পরিধত্ত পরিধাপয়ত তথা যুয়ং বাসসা বস্ত্রেণ এনাং কন্যাং ধত্ত ধারয়ত, বস্ত্রাবৃতাং কুরুত, কিঞ্চ কন্যামেনাং শতায়ুষীং চিরজীবিনীং কৃণুত কুরুত, দীর্ঘমায়ুঃ বহুকালং যাবৎ আশীর্ব্বাদাদিভিঃ সংযোজ্য, পুনস্তামেবাহ হে কন্যকে! শতঞ্চ জীব শরদঃ শতং বর্ষাণি জীব। কিঞ্চ সুবর্চ্চাঃ অসি ভবসি, অতিশয়কান্তিমতী ত্বং ভবসি। হে আর্য্যে! শ্রেষ্ঠে! বসূনি ধনানি বিভজ বিভজসি ভজশ্ছান্দসং রূপং অকারস্ত আকারঃ। জীবন্ জীবন্তী যাবজ্জীবং প্রাণান্ ধারয়ন্তীত্যর্থঃ। ব্যত্যয়ো বহুলমিতি স্ত্রীলিঙ্গে পুংলিঙ্গতা।

গন্ধর্ব্বায় গন্ধর্ব্বোঽদদগ্নয়ে। রয়িঞ্চ পুত্রাংশ্চাদাদগ্নির্মহ্যমথো ইমাম্॥ (৩) ততঃ অগ্নেঃ পশ্চিমতো পশ্বা, বীরণপত্ররচিতং পটবেষ্টিতং কটং বহিস্তরণ-পর্য্যন্তং দক্ষিণপাদেন প্রেরয়ন্তীং বধূম্ ইমং মন্ত্রং জামাতা বাচয়েৎ—প্রজাপতির্ঋষির্বিপাড্জগতীচ্ছন্দঃ পতির্দেবতা * কটপাদপ্রবর্ত্তনে বিনিয়োগঃ। ওঁ প্র মে পতির্যা নঃ + পন্থাঃ কল্পতাং শিবা অরিষ্টা পতিলোকং গমেয়ম্। (৪) যদি তু লজ্জাবশাদ্‌বধূঃ স্বয়ং ন পঠতি, তদা জামাতা ইমং মন্ত্রং পঠেৎ। প্রজাপতির্ঋষির্বিপাড্জগতীচ্ছন্দঃ পতির্দেবতা কটপাদপ্রবর্ত্তনে বিনিয়োগঃ। ওঁ প্রাস্যাঃ পতির্যা নঃ পন্থাঃ কল্পতাং শিবা অরিষ্টা পতিলোকং গম্যাঃ। (৫) ততঃ কটস্য পূর্ব্বান্তে বধূর্দক্ষিণত উপবিশতি, জামাতা চ বধ্বা উত্তরতঃ। ততঃ প্রকৃতহোমার্থং তূষ্ণীং প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধমগ্নৌ প্রক্ষিপ্য মহাব্যাহৃতিহোমং কুর্য্যাৎ। যথা—প্রজাপতির্ঋষি-র্গায়ত্রীচ্ছন্দোঽগ্নির্দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ ভূঃ স্বাহা। প্রজাপতির্ঋষিরুষ্ণিক্ ছন্দো বায়ুর্দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ।

---

(৩) পরম্পরাদানং কথ্যতে। সোম ওষধীনামধিপতিরিমাং কন্যাং জাতমাত্রামেব গন্ধর্ব্বায় অদদৎ দত্তবান্ আদিত্যায় ইত্যর্থঃ। গন্ধর্ব্বোঽপি আদিত্যোঽপি অগ্নয়ে দত্তবান্, অগ্নিরপি ধনপুত্রসহিতামিমাং মহ্যং পত্যে দত্তবান্। অথো ইত্যপ্যর্থঃ। অদদৎ ইতি দদ দানে পরস্মৈপদং ছান্দসম্।

(৪) কন্যা পতিং বোঢ়ারং প্রার্থয়তে—মে মম পতিঃ পন্থাঃ পন্থানং কল্পতাম্ উপকল্পয়তু, নঃ অস্মভ্যং যা যেন পথা অহং পতিলোকং প্রগময়েম্ প্রকর্ষেণ গচ্ছামি। কিম্ভূতা সতী? শিবা সুখাবহা অরিষ্টা অহিংসিতা, ব্যবহিত-মপি প্রশব্দং গচ্ছতি। পন্থা ইতি দ্বিতীয়ায়াং প্রথমা বিভক্তির্ব্যত্যয়েন, যা ইতি বহুবচনস্য তৃতীয়ৈকবচনে যেন ইত্যর্থঃ। ছান্দসত্বাৎ টাস্থানে ইনা-দেশবাধঃ।

(৫) অস্যাঃ কন্যায়াঃ পতিঃ যা যেন অনেন পথা যাতি তং পন্থানং নঃ অস্মভ্যং কল্পতাং করোতু তেন পথা ইয়মপি কন্যা প্রগম্যাঃ গমিষ্যতি। প্রথম পুরুষে মধ্যমস্ছান্দসত্বাৎ।

---

* পন্থা দেবতা ইতি পাঠান্তরম্।

\+ পতির্যাম ইতি পাঠান্তরম্।

ওঁ ভুবঃ স্বাহা। প্রজাপতিঋর্ষিরনুষ্টুপ্ ছন্দঃ সূর্য্যো দেবতা মহাব্যাহৃতি-হোমে বিনিয়োগঃ। ওঁ স্বঃ স্বাহা। ততো বধূর্দ্দক্ষিণহস্তেন পত্যুর্দ্দক্ষিণ-স্কন্ধং স্পৃষ্ট্বা তিষ্ঠতি জামাতা চ ষড়াজ্যাহুতীর্জুহোতি। যথা—প্রজাপতি-ঋর্ষিরতিজগতীচ্ছন্দোঽগ্নির্দ্দেবতা আজ্যহোমে বিনিয়োগঃ। ওঁ অগ্নিরেতু প্রথমো দেবতাভ্যঃ সোঽস্যৈ প্রজাং মুঞ্চতু মৃত্যুপাশাৎ। তদয়ং রাজা বরুণোঽনুমন্যতাং যথেয়ং স্ত্রী পৌত্রমঘং ন রোদাৎ স্বাহা। (৬) প্রজাপতি-ঋর্ষিরতিজগতীচ্ছন্দোঽগ্নির্দ্দেবতা আজ্যহোমে বিনিয়োগঃ। ওঁ ইমা-মগ্নিস্ত্রায়তাং গার্হপত্যঃ প্রজামস্যৈ জরদষ্টিং কৃণোতু। অশূন্যোপস্থা জীবতামস্তু মাতা পৌত্রমানন্দমভিবিবুধ্যতামিয়ং স্বাহা। (৭) প্রজাপতি-ঋর্ষিঃ শর্করীচ্ছন্দো বিশ্বেদেবা দেবতা আজ্যহোমে বিনিয়োগঃ। ওঁ দ্যৌস্তে পৃষ্ঠং রক্ষতু বায়ুরূরূ অশ্বিনৌ চ স্তনন্ধয়ন্তে পুত্রান্ সবিতাভি-রক্ষত্বাবাসসঃ পরিধানাদ্বৃহস্পতির্বিশ্বেদেবা অভিরক্ষন্তু পশ্চাৎ স্বাহা। (৮) প্রজাপতিঋর্ষিরতিজগতীচ্ছন্দোঽগ্ন্যাদয়ো দেবতা আজ্যহোমে বিনিয়োগঃ।

---

(৬) অস্মিন্ বিবাহে কর্ম্মণি অগ্নিরেতু আগচ্ছতু, স কীদৃশঃ? প্রথমঃ প্রধান ভূতঃ, দেবতাভ্যঃ ইন্দ্রাদিভ্যঃ সোমঃ অগ্নিরেব অস্যৈ অস্যাঃ কন্যায়াঃ প্রজাং ভাবিনীং সন্ততিং মৃত্যুপাশাৎ যমপাশবন্ধনাৎ মুঞ্চাতু মোচয়তু তৎ এতন্মৃত্যু-পাশাদ্ বিমোচনমগ্নিকৃতং বরুণোঽপি রাজা অনুমন্যতাং স্বহস্তয়তু অঙ্গীকারং করোতু, তথা করোতু যথা ইয়ং স্ত্রী পৌত্রমঘং পুত্রবিনাশজং ব্যসনং প্রাপ্য ন রোদাৎ ন রোদিষ্যতি। অস্যৈ ইতি ষষ্ঠ্যর্থে চতুর্থী, মুঞ্চাতু ইতি ব্যত্যয়েন দীর্ঘত্বং রোদাদিতি লৃটোঽর্থে লেট্।

(৭) ইমাং কন্যাং গার্হপত্যঃ গার্হপত্যাখ্যঃ অগ্নিঃ ত্রায়তাং পালয়তু অগ্নিহোত্রমস্যাং ভবত্বিতি আশংসা। কিঞ্চ অস্যৈ অস্যাঃ কন্যায়াঃ প্রজাং সন্ততিং জরদষ্টিং জরাপর্য্যন্তং চিরায়ুষীং স এবাগ্নিঃ কৃণোতু করোতু। কিঞ্চ ইয়ং কন্যা অশূন্যোপস্থা ভর্ত্তৃসঙ্গতা সদা ভবত্বিত্যর্থঃ। কিঞ্চ ইয়ং কন্যা জীবতাং আয়ুষ্মতাং পুত্রাণাং মাতা অস্তু ভবতু, অস্যাং জাতান্যপত্যানি অকালে মা ম্রিয়ন্তাম্ ইত্যর্থঃ। কিঞ্চ পৌত্রং পুত্রসম্বন্ধম্ আনন্দং সুখং কন্যেয়ম্ অভি-বিবুধ্যতাং আভিমুখ্যেন বিবিধমনুভবতু ইত্যর্থঃ।

(৮) হে কন্যকে! তে তব পৃষ্ঠং দেহস্য পশ্চাদ্ভাগং দ্যৌঃ স্বর্গাখ্যো লোকঃ রক্ষতু, বায়ুঃ পবনঃ তব উরূ উরুদেশৌ রক্ষতু, তথা অশ্বিনৌ নাসত্যৌ

ওঁ মা তে গৃহেষু নিশি ঘোষ উত্থাদন্যত্র ত্বদ্রুদত্যঃ সংবিশন্ত। মা ত্বং রুদত্যুর আবধিষ্ঠা জীবপত্নী পতিলোকে বিরাজ পশ্যন্তী প্রজাং সুমনস্যমানাং স্বাহা। (৯) প্রজাপতিঋষিঃ পঙ্‌ক্ত্যাদবৃহতীচ্ছন্দো-হগ্ন্যাদয়ো দেবতা আজ্যহোমে বিনিয়োগঃ। ওঁ অপ্রজস্তং পৌত্রমর্ত্যং, পাপ্মানমুত বা অঘম্। শীর্ষ্ণঃ স্রজমিবোন্মুচ্য দ্বিষদ্ভ্যঃ প্রতিমুঞ্চামি পাশং স্বাহা। (১০) প্রজাপতিঋষিরুষ্ণিক্ ছন্দো বৈবস্বতো দেবতা আজ্য-হোমে বিনিয়োগঃ। ওঁ পরৈতু মৃত্যুরমৃতং ন আগাদ্ বৈবস্বতো নো অভয়ং কৃণোতু। পরং মৃত্যো অনুপরেহি পন্থাং (পন্থাঃ যন্তে অন্য ইতি পারস্করঃ) যত্র নো অন্য ইতরো দেবযানাৎ। চক্ষুষ্মতে শৃণ্বতে তে ব্রবীমি, মা নঃ প্রজাং রীরিষো মোত বীরান্ স্বাহা। (১১) ইতি ষড়াজ্যাহুতীঃ সমাপ্য, ব্যস্ত-সমস্তমহাব্যাহৃতিহোমং কুর্য্যাৎ। যথা—প্রজাপতিঋষির্গায়ত্রীচ্ছন্দোঽগ্নির্দেবতা

---

স্তনন্ধয়ঃ স্তনাহারান্ ভাবিনঃ পুত্রান্ সবিতা আদিত্যঃ অভি আভিমুখ্যেন রক্ষতু। আ উৎ মর্য্যাদায়াম্, আবাসসঃ পরিধানাৎ বস্ত্রপরিধানযোগ্যা যাবৎ সম্পন্নাঃ ইত্যর্থঃ, তাবৎকালং বৃহস্পতিঃ তান্ পুত্রান্ অভিরক্ষতু, তস্মাদপি চ কালাৎ পশ্চাৎ বিশ্বেদেবাঃ অভিরক্ষন্তু তানেব ইত্যর্থঃ। স্তনন্ধয় ইতি শসঃ সুঃ।

(৯) হে কন্যকে! তে তব গৃহেষু নিবাসেষু নিশি রাত্রৌ ঘোষ আক্রন্দরূপো ধ্বনিঃ মা উত্থাৎ মা উত্তিষ্ঠতু মা ভবত্বিত্যর্থঃ। ত্বদন্যত্র ত্বাং বর্জ্জয়িত্বা রুদত্যঃ রোদনবত্যঃ স্ত্রিয়ঃ ত্বদীয়েষু শত্রুগৃহেষু সংবিশন্ত শয়নং কুর্ব্বন্তু গচ্ছন্তু ইত্যর্থঃ। কিঞ্চ ত্বং দুঃখার্ত্তা রুদতী সতী উরঃ হৃদয়ং মা আবধিষ্ঠা উরোঘাতং মা রোদিষ্যসি, কিঞ্চ জীবপত্নী জীবপতিকা সতী পতিলোকে পতিগৃহে বিরাজ শোভস্ব বিবিধভোগান্ প্রাপ্নুহি। কিং কুর্ব্বাণা? প্রজাং সুমনস্যমানাং হৃষ্টচিত্তাং সন্ততিং পশ্যন্তী বীক্ষমাণা।

(১০) হে কন্যকে! অপ্রজস্তং ত্বদীয়ং বন্ধ্যাত্বং পৌত্রমর্ত্যং পুত্রমরণং পাপ্মানং ত্বদীয়মেব মৃত্যুং পাপ্মানং উত বা অথবা অঘং অন্যদপি ত্বদনিষ্টম্ এতৎ সর্ব্বং ত্বত্তোঽপকৃষ্য শীর্ষ্ণঃ মস্তকাৎ স্রজমিব মালামিব উন্মুচ্য অবতার্য্য ত্বদ্বিষদ্ভ্যঃ শত্রুষু প্রতিমুঞ্চামি, পাশং মৃত্যুপাশমিত্যর্থঃ। দ্বিষদ্ভ্য ইতি সপ্তম্যর্থে পঞ্চমী।

(১১) কন্যকা আশাস্তে। মত্তঃ সকাশাৎ মৃত্যুঃ যমঃ পরৈতু পরা-ঙ্মুখো যাতু নাহং ম্রিয়ে ইত্যর্থঃ। কিঞ্চ অমৃতং অমরণধর্ম্মত্বং মে মম আগাৎ

(ব্যস্ত) মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ ভূঃ স্বাহা। প্রজাপতিঋষি-রুষ্ণিক্‌ছন্দো বায়ুর্দেবতা (ব্যস্ত) মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ ভুবঃ স্বাহা। প্রজাপতিঋষিরনুষ্টুপ্‌ ছন্দঃ সূর্য্যো দেবতা (ব্যস্ত) মহাব্যাহৃতি-হোমে বিনিয়োগঃ, ওঁ স্বঃ স্বাহা। প্রজাপতিঋষির্বৃহতীচ্ছন্দঃ প্রজাপতির্দেবতা (সমস্ত) মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ ভূর্ভুবঃস্বঃ স্বাহা। ততো জামাতা যদি ভৃগুগোত্রো ভার্গবপ্রবরো বা, তদা স্রুবেণ পঞ্চধা গৃহীতমাজ্যং জুহ্বাং নিধায়, ওঁ অগ্নয়ে স্বাহা ইতি পূর্ব্বাভিমুখীং ঘৃতধারাম্‌ উত্তরতঃ অগ্নেরুপরি দদ্যাৎ, তথৈব ওঁ সোমায় স্বাহা ইতি পুনর্দ্দক্ষিণতো দদ্যাৎ। অথ অন্যগোত্রঃ অন্যপ্রবরো বা, তদা চতুর্গৃহীতমাজ্যং জুহ্বাং নিধায় পূর্ব্বোক্তমন্ত্র-দ্বয়েন ঘৃতধারাদ্বয়ং তথৈব দদ্যাৎ। ততো বধূসহিতঃ পশ্চিমথায়, বধূপৃষ্ঠদেশেন দক্ষিণদেশং গত্বা, উত্তরাভিমুখো দক্ষিণহস্তেন বধূহস্তদ্বয়মঞ্জলিরূপং গৃহীত্বা তিষ্ঠতি। অথ বধ্বা মাতা ভ্রাতা অন্যো ব্রাহ্মণো বা পূর্ব্ব-স্থাপিত-শমীপত্র-মিশ্রিতান্‌ লাজান্‌ আদায়, অগ্রতঃ সপুত্রাং শিলাং নিধায়, বধূং দক্ষিণপাদা-গ্রেণ শিলামাক্রময়তি, জামাতা চ পঠতি। প্রজাপতিঋষিরনুষ্টুপ্‌ ছন্দো-ঽশ্মা দেবতা অশ্মাক্রমণে বিনিয়োগঃ। ওঁ ইমমশ্মানমারোহাশ্মেব ত্বং স্থিরা ভব। দ্বিষন্তমপবাধস্ব মা চ ত্বং দ্বিষতামধঃ। (১২) ততো যদি

---

আগচ্ছতু, কিঞ্চ বৈবস্বতো যমঃ নঃ অস্মাকং অভয়ং কৃণোতু করোতু। ইদানীং প্রত্যক্ষীকৃত্য প্রার্থ্যতে মৃত্যুরেব। হে মৃত্যো যম! পরম্‌ অন্যং অনুপরেহি অনুগচ্ছ পন্থাঃ পন্থানং পরাঙ্মুখো গচ্ছেত্যর্থঃ। কিঞ্চ যত্র নো অস্মৎপথাদন্যঃ ব্যতিরিক্তঃ পন্থাঃ, ইতরো দেবযানাৎ দেবপথাদন্যঃ পিতৃপথ ইত্যর্থঃ। কিঞ্চ চক্ষুমতে পশ্যতঃ শৃণ্বতে শৃণ্বতঃ প্রত্যক্ষস্যৈব তে তব তথৈব তদহং ব্রবীমি প্রার্থয়ে স চ ত্বং প্রার্থিতঃ সন্‌ মা নঃ প্রজাং রীরিষঃ নোঽস্মাকং প্রজাং পুত্র-পৌত্রাদিকাং মা হিংসীঃ। রুষ রীরিষ হিংসায়াং মোত বীরান্‌ উত অপ্যর্থে অস্মদীয়ান্‌ বীরান্‌ বিক্রান্তানপি পুরুষান্‌ মা হিংসীরিত্যর্থঃ।—পন্থা ইতি দ্বিতী-য়ার্থে প্রথমা পূর্ব্ববৎ।

(১২) হে কন্যকে! ইমম্‌ অশ্মানম্‌ প্রত্যক্ষাং দৃষদং ত্বম্‌ আরোহ আক্র-ময়। কিঞ্চ ইব উপমার্থে অশ্মা ইব পাষাণ ইব ত্বং স্থিরা ভব দৃঢ়নিশ্চলা ভব। কিঞ্চ হে কন্যকে! দ্বিষন্তমমিত্রং অপবাধস্ব পীড়য়স্ব মা প্রতিষেধে চ অববাধনে, এবং ত্বং দ্বিষতাং শত্রূণামধোভাবেন মা ভূঃ মা বর্ত্তিষ্ঠা ইত্যর্থঃ।

জামাতা ভৃগুগোত্রো ভার্গবপ্রবরো বা তদা বধ্বঞ্জলৌ পতিদত্ত-ঘৃতস্রুবদ্বয়োপরি বধ্বা মাতা ভ্রাতা অন্যো ব্রাহ্মণো বা পঞ্চাবত্তান্ লাজান্ দদাতি, পতিঃ পুনশ্চ তদুপরি ঘৃতস্রুবদ্বয়ং দদাতি। অথ অন্যগোত্রঃ অন্যপ্রবরো বা তদা বধ্বঞ্জলৌ পতিদত্ত-ঘৃতস্রুবৈকোপরি চতুরবত্তান্ লাজান্ দত্ত্বা, তদুপরি ঘৃতস্রুবদ্বয়ং দাতব্যম্। ততো বরেণাস্মিন্ মন্ত্রে পঠিতে বধূরঞ্জলিভেদম্ অকুর্ব্বতী লাজান্ জুহোতি। প্রজাপতিঋষিরুপরিষ্টাজ্জ্যোতিষ্মতীচ্ছন্দোঽগ্নির্দেবতা লাজহোমে বিনিয়োগঃ। ওঁ ইয়ং নার্য্যুপব্রূতেঽগ্নৌ লাজানাবপন্তী। দীর্ঘায়ুরস্তু মে পতিঃ শতং বর্ষাণি জীবত্বেধন্তাং জ্ঞাতয়ো মম স্বাহা। (১৩) ততঃ পতিরগ্রতো বধূং কৃত্বা, ইমং মন্ত্রং পঠন্ অগ্নিং প্রদক্ষিণং করোতি। প্রজাপতিঋষিস্ত্রিষ্টুপ্ ছন্দঃ কন্যা দেবতা কন্যা-পরিণয়নে বিনিয়োগঃ। ওঁ কন্যলা পিতৃভ্যঃ পতিলোকং যতীয়মপদীক্ষামযষ্ট। কন্যা উত ত্বয়া বয়ং ধারা উদন্যা ইবাতিগাহেমহি দ্বিষঃ। (১৪) ততঃ পুনরপি তথৈব বধ্বঞ্জলিং গৃহীত্বা উত্তরাভিমুখঃ পতিরনুপবিষ্টোঽবতিষ্ঠেত, পূর্ব্ববন্মাতা ভ্রাতা অন্যো ব্রাহ্মণো বা লাজান্ আদায়, বধূং দক্ষিণপাদাগ্রেণ সপুত্রাং শিলাম্ আক্রময়তি, জামাতা চ পূর্ব্ববন্মন্ত্রং পঠতি। প্রজাপতিঋষিরনুষ্টুপ্ ছন্দোঽশ্মা দেবতা অশ্মাক্রমণে বিনিয়োগঃ। ওঁ ইমমশ্মানমারোহাশ্মেব ত্বং স্থিরা ভব। দ্বিষন্তমপবাধস্ব মা

---

(১৩) ইয়ং নারী স্ত্রী উপব্রূতে অগ্নেঃ সমীপে বক্তি। কিং কুর্ব্বাণা? অগ্নৌ লাজানাবপন্তী প্রক্ষিপন্তী। কিমুপব্রূতে? দীর্ঘায়ুরস্তু মে পতিঃ। এতদেব বিবৃণোতি—শতং বর্ষাণি জীবতু বর্ষাণাং শতং মম পতির্জীবতু শতায়ুরেব পুরুষ ইতি শ্রুতেঃ। কিঞ্চ মম জ্ঞাতয়ো বান্ধবা এধন্তাং বর্দ্ধন্তাম্।

(১৪) ইষ্টপ্রার্থনপরা কন্যৈব কন্যলা ইয়ং পিতৃভ্যঃ পিতৃগৃহাৎ পতিলোকং পতিগৃহং যতী যান্তী, অপেতি বর্জ্জনার্থঃ, দীক্ষাবর্জ্জনার্থঃ অপদীক্ষাশব্দঃ—দীক্ষাবর্জ্জনম্ অযষ্ট ইষ্টবতী, দীক্ষাশব্দেন বৈবাহিকব্রতমুচ্যতে, ত্রিরাত্রমক্ষারলবণাশিনৌ দম্পতী তরেয়াতামিত্যাদিরূপং তদ্বর্জ্জনং কৃতবতী। কিঞ্চ কন্যা কন্যকে! উত অপি ত্বয়া সহ বয়ং দ্বিষঃ শত্রূন্ অতিগাহেমহি অভিভবেম। যথা অতিগাহেমহি অতিক্রামেমহি ইত্যর্থঃ। ধারা উদন্যা ইব উদকধারাঃ (কর্ত্তৃভূতাঃ) জলতৃষ্ণাং কর্ম্মভূতাং যথা অভিভবন্তি তথা শত্রূন্ ইত্যর্থঃ। কন্যা ইতি ছান্দসত্বাৎ সম্বুদ্ধাবেবং ন স্যাৎ।

চ ত্বং দ্বিষতামধঃ। পুনস্তথৈব গোত্রপ্রবরানুসারেণ পঞ্চাবত্তান্ চতুরবত্তান্ বা লাজান্ বধূর্জুহোতি, জামাতা চ পঠতি। প্রজাপতিঋষিরুপরিষ্টাদ্বৃহতী-চ্ছন্দোঽর্য্যমা দেবতা লাজহোমে বিনিয়োগঃ। ওঁ অর্য্যমণং নু দেবং * কন্যা অগ্নিময়ক্ষত। স ইমাং দেবো অর্য্যমা প্রেতো মুঞ্চাতু মামুতঃ স্বাহা। (১৫) ততঃ পূর্ব্ববদেব পতিরগ্রতো বধূং কৃত্বা ইমং মন্ত্রং পঠন্ অগ্নিং প্রদক্ষিণং করোতি। প্রজাপতিঋষিস্ত্রিষ্টুপ্ ছন্দঃ কন্যা দেবতা কন্যাপরিণয়নে বিনি-য়োগঃ। ওঁ কন্যলা পিতৃভ্যঃ পতিলোকং যতীয়মপদীক্ষামযষ্ট। কন্যা উত ত্বয়া বয়ং ধারা উদন্যা ইবাতিগাহেমহি দ্বিষঃ। পুনস্তথৈব বধ্বঞ্জলিং গৃহীত্বা উত্তরাভিমুখঃ পতিরনুপবিষ্টোঽবতিষ্ঠেত, পূর্ব্ববন্মাতা ভ্রাতা অন্যো ব্রাহ্মণো বা লাজান্ আদায় বধূং দক্ষিণপাদাগ্রেণ শিলামাক্রময়তি, জামাতা চ পূর্ব্বব-ন্মন্ত্রং পঠতি। প্রজাপতিঋষিরনুষ্টুপ্ ছন্দোঽশ্মা দেবতা অশ্মাক্রমণে বিনিয়োগঃ। ওঁ ইমমশ্মানমারোহাশ্মেব ত্বং স্থিরা ভব। দ্বিষন্তমপবাধস্ব মা চ ত্বং দ্বিষতামধঃ। পুনস্তথৈব গোত্রপ্রবরানুসারেণ পঞ্চাবত্তান্ চতুরবত্তান্ বা লাজান্ বধূর্জুহোতি, জামাতা চ মন্ত্রং পঠতি। প্রজাপতিঋষিরুপরিষ্টাদ্-বৃহতীচ্ছন্দঃ পূষা দেবতা লাজহোমে বিনিয়োগঃ। ওঁ পূষণং নু দেবং কন্যা অগ্নিময়ক্ষত। স ইমাং দেবঃ পূষা প্রেতো মুঞ্চাতু মামুতঃ স্বাহা। (১৬) ততঃ পতিরগ্রতো বধূং কৃত্বা পুনরপি পূর্ব্ববন্মন্ত্রং পঠন্ অগ্নিং প্রদক্ষিণং করোতি। প্রজাপতিঋষিস্ত্রিষ্টুপ্ ছন্দঃ কন্যা দেবতা কন্যাপরিণয়নে বিনি-য়োগঃ। ওঁ কন্যলা পিতৃভ্যঃ পতিলোকং যতীয়মপদীক্ষামযষ্ট। কন্যা উত ত্বয়া বয়ং ধারা উদন্যা ইবাতিগাহেমহি দ্বিষঃ। †

---

(১৫) কন্যাঃ পূর্ব্বমর্য্যমণং দেবমগ্নিঞ্চ অযক্ষত ইষ্টবত্যঃ, অর্য্যমণমিত্যগ্নি-স্বরূপম্, নু চার্থে অব্যয়ম্। পূর্ব্বার্দ্ধেন সামান্যোপক্রমঃ, উত্তরার্দ্ধেন বিশে-ষোপসংহারঃ, স চার্য্যমা অগ্নিঃ ইষ্টঃ সন্ ইমাং কন্যাং পরিণীয়মানাং ইতঃ পিতৃ-কুলাৎ প্রমুঞ্চাতু ছান্দসো দীর্ঘঃ। অমুতঃ পতিকুলাৎ মা ন প্রমুঞ্চাতু ইত্যর্থঃ। ব্যবহিতেন প্রশব্দেন সহ সম্বন্ধঃ। মা নিষেধে। পিতৃকুলাৎ ভর্ত্তৃ-কুলাদানয়তু ইত্যর্থঃ।

(১৬) পৌষ্ণীয়ম্। অন্যার্থঃ পূর্ব্ববৎ।

---

* 'অর্য্যমণং দেবম্' ইতি পারস্কর আহ।

† অতিগাহেমহি ইতি পাঠান্তরম্।

ততঃ শূর্পস্যোত্তরার্দ্ধে ঘৃতস্রুবদ্বয়ং দত্ত্বা, তদুপরি লাজশেষং নিধায়, পুনস্তদুপরি ঘৃতস্রুবদ্বয়ং দত্ত্বা। ওঁ অগ্নয়ে স্বিষ্টকৃতে স্বাহা। ইতি শূর্পেণৈব জুহুয়াৎ,—যদি ভৃগুগোত্রো ভার্গবপ্রবরো জামাতা ভবেৎ। যদি অন্যগোত্রঃ অন্যপ্রবরো বা, তদা প্রথমং শূর্পে এক এব ঘৃতস্রুবো দাতব্যঃ, পশ্চাৎ লাজোপরি ঘৃতস্রুবদ্বয়ং দাতব্যম্। ততো জামাতা প্রাগুদীচ্যাং দিশি বধূং সপ্তভির্মন্ত্রৈঃ সপ্তসু মণ্ডলিকাসু সপ্ত পদানি নয়েৎ, বধূশ্চ মণ্ডলিকায়াম্ অগ্রে দক্ষিণপাদং নীত্বা, পশ্চাৎ বামপাদং নয়েৎ। জামাতা বধূং চ ব্রূয়াৎ—বামপাদেন দক্ষপাদং মাক্রাম ইতি। সপ্তানাং মন্ত্রাণাম্ ঋষ্যাদয়ঃ সাধারণাঃ। প্রজাপতির্ঋষিরেকপাদ্‌বিরাট্ ছন্দো বিষ্ণুর্দেবতা পাদাক্রমণে বিনিয়োগঃ। ওঁ একমিষে বিষ্ণুস্ত্বানয়তু। ওঁ দ্বে উর্জ্জে বিষ্ণুস্ত্বানয়তু। ওঁ ত্রীণি ব্রতায় বিষ্ণুস্ত্বানয়তু। ওঁ চত্বারি মায়োভবায় বিষ্ণুস্ত্বানয়তু। ওঁ পঞ্চ পশুভ্যো বিষ্ণুস্ত্বানয়তু। ওঁ ষড়্‌রায়স্পোষায় বিষ্ণুস্ত্বানয়তু। ওঁ সপ্ত সপ্তভ্যো হোত্রাভ্যো বিষ্ণুস্ত্বানয়তু। (১৭) ততং সপ্তপদীগতাং কন্যাং পতিরাশাস্তে। প্রজাপতির্ঋষিঃ সামিকীপঙ্‌ক্তিশ্ছন্দঃ কন্যা দেবতা পাদাক্রমণানন্তরমাশাসনে বিনিয়োগঃ। ওঁ সখা সপ্তপদী ভব সখ্যন্তে গমেয়ম্। সখ্যন্তে মা যোষাঃ, সখ্যন্তে মায়োষ্ঠ্যাঃ। (১৮) ততো জামাতা তত্রৈব স্থিত্বা অনেন মন্ত্রেণ বিবাহং দ্রষ্টুমাগতান্ জনান্ আমন্ত্রয়েৎ।

---

(১৭) হে কন্যকে! একং পাদং বিষ্ণুস্ত্বাং নয়তু আক্রময়তু ইষে অর্থলাভায় অন্নলাভায় বা, তথা দ্বে পদে উর্জ্জে বললাভায়, ত্রীণি পদানি ব্রতায় যজ্ঞকর্ম্মণে, চত্বারি পদানি মায়োভবায় সৌখ্যপ্রাপ্তয়ে, পঞ্চপদানি পশুভ্যঃ পশুপ্রাপ্তয়ে, ষটুপদানি রায়স্পোষায় ধনপুষ্টয়ে, সপ্তপদানি সপ্তভ্যঃ হোত্রাভ্যঃ সপ্তঋত্বিক্‌প্রাপ্তয়ে বিষ্ণুস্ত্বানয়তু ইতি যোজনীয়ম্।

(১৮) পাদাক্রমণানন্তরং পতিঃ প্রার্থয়তে কন্যামেব। হে কন্যকে! ত্বং মম সখা সখী সখীসমানা সহচরী ভব; তথা সপ্তপদী সপ্তপদীষু সপ্তপদাক্রান্তাভিধেয়েষু অর্থেষু সহচারিণী ভবেত্যর্থঃ। কিঞ্চ সখ্যং মৈত্রীং তে তব গমেয়ম্ অহং গচ্ছামি, সখা ভবেয়মিত্যাশাস্যতে। কিঞ্চ সখ্যং তে তব সখ্যং ময়া সহ যোষাঃ অন্যস্ত্রিয়ঃ মা বিচ্ছিন্দন্তু ইত্যর্থঃ। কিঞ্চ সখ্যন্তে মাযোষ্ঠ্যাঃ ময়ঃ সুখং তস্যোত্থানং ময়োষ্ঠং তত্র ভবাঃ মায়োষ্ঠ্যাঃ সুখকারিণ্যঃ ভবার্থে যন্। অয়মর্থঃ—স্ত্রিয়ো যাস্তাস্বয়া সহ মম সখ্যং কুর্ব্বন্তু।

প্রজাপতিঋষিরনুষ্টুপ্‌ছন্দ আশাস্যমানা দেবতা বিবাহপ্রেক্ষক-জনামন্ত্রণে বিনিয়োগঃ। ওঁ সুমঙ্গলীরিয়ং বধূরিমাং সমেত পশ্যত। সৌভাগ্যমস্যৈ দত্ত্বায়াথাস্তং বিপরেতন *। (১৯) তত উদককলসধারী জামাতুর্ব্বয়স্যঃ অগ্নেঃ পশ্চিমদেশেন সপ্তপদীস্থানমাগত্য সহকারপল্লবোদকেন মূর্দ্ধ্নি বরমভিষিঞ্চেৎ. জামাতা চ মন্ত্রং পঠেৎ—প্রজাপতিঋষিরনুষ্টুপ্‌ ছন্দো বিশ্বেদেবাদয়ো দেবতা মূর্দ্ধাভিষেচনে বিনিয়োগঃ। ওঁ সমঞ্জন্তু বিশ্বেদেবাঃ সমাপো হৃদয়ানি নৌ। সম্মাতরিশ্বা সংধাতা সমুদেষ্ট্রী দধাতু নৌ। (২০) পশ্চাৎ অনেনৈব মন্ত্রেণ বধূমভিষিঞ্চেৎ। ততো জামাতা অধোনিহিত-বামহস্তেন বধ্বঞ্জলিং, দক্ষিণহস্তেন চ সাঙ্গুষ্ঠমুত্তানং বধূদক্ষিণহস্তং গৃহীত্বা সপ্তপদীস্থান এব মন্ত্রান্‌ জপতি। প্রজাপতিঋষিস্ত্রিষ্টুপ্‌ ছন্দো ভগাদয়ো দেবতা গৃহীতকন্যাপাণেঃ পত্যুর্জপে বিনিয়োগঃ। ওঁ গৃভ্‌ণামি তে সৌভগত্বায় হস্তং ময়া পত্যা জরদষ্টির্যথাসঃ। ভগো অর্য্যমা সবিতা পুরন্ধ্রির্মহ্যং ত্বাদুর্গার্হপত্যায় দেবাঃ। (২১) প্রজাপতিঋষিস্ত্রিষ্টুপ্‌ ছন্দঃ কন্যা দেবতা গৃহীতকন্যাপাণেঃ পত্যুর্জপে বিনিয়োগঃ। ওঁ অঘোরচক্ষুরপতিঘ্ন্যেধি শিবা পশুভ্যঃ সুমনাঃ

---

(১৯) হে বিবাহদ্রষ্টারঃ জনাঃ! ইয়ং বধূঃ সুমঙ্গলীঃ প্রশস্তমঙ্গলা ইয়ং পরিণীতা যতস্ততঃ এনাং সমেত সঙ্গচ্ছত যূয়ম্‌, পশ্যত আলোকয়ত, কিঞ্চাস্যৈ কন্যায়ৈ সৌভাগ্যং দত্ত্বায় দত্ত্বা অথ অনন্তরং অস্তং গৃহং বিপরেতন গচ্ছত। বিপরাপূর্ব্ব ইন্‌ গতৌ লোট্‌ মধ্যমপুরুষবহুবচনে ত, তপ্‌ তনপ্‌ তনথনাশ্চ ইতি তশব্দস্য তনপাদেশঃ। দত্ত্বায়েতিচ্ছন্দসি যগাগমঃ। সুমঙ্গলীরিতি সেলোপাভাবশ্ছান্দসত্বাৎ।

(২০) হে কন্যকে! বিশ্বেদেবাঃ নৌ আবয়োঃ হৃদয়ানি বিশ্বেদেবাঃ আপশ্চ সমঞ্জন্তু সংশোধয়ন্তু অকলুষীকুর্ব্বন্তু, কিঞ্চ মাতরিশ্বা বায়ুঃ সংশোধয়তু, ধাতা প্রজাপতিঃ স চ সংশোধয়তু। কিঞ্চ দেষ্ট্রী উপদেশদাত্রী দেবতা নৌ আবয়োর্হৃদয়ং সন্দধাতু একীভাবং করোতু। সমঃদ্বয়ং পাদপূরণার্থং, উ সম্বোধনে।

(২১) হে কন্যকে! তে তব হস্তং গৃভ্‌ণামি গৃহ্ণামি। কিমর্থম্‌? সৌভগত্বায় সৌভাগ্যায়, কিঞ্চ ময়া পত্যা সহ জরদষ্টিঃ জরান্তং যাবৎ, যথা ত্বমাসঃ ভবসি তিষ্ঠসীতি যাবৎ তস্মাৎ ভগো অর্য্যমা সবিতা পুরন্ধ্রিরগ্রণীঃ তদেতে দেবা মহ্যং

---

* 'যথাস্তং বিপরেতন' ইতি পারস্কর আহ।

সুবর্চ্চাঃ। বীরসূর্জ্জীবসূর্দেবকামা স্যোনা শন্নো ভব দ্বিপদে শং চতুষ্পদে। (২২) প্রজাপতিঋষির্জগতীচ্ছন্দঃ প্রজাপতির্দেবতা গৃহীতকন্যাপাণেঃ পত্যুর্জপে বিনিয়োগঃ। ওঁ আ নঃ প্রজাং জনয়তু প্রজাপতিরাজরসায় সমনক্ত্বর্য্যমা। অদুর্মঙ্গলীঃ পতিলোকমাবিশ শন্নো ভব দ্বিপদে শং চতুষ্পদে। (২৩) প্রজাপতিঋষিরনুষ্টুপ্ছন্দ ইন্দ্রো দেবতা গৃহীতকন্যাপাণেঃ পত্যুর্জ্জপে বিনিয়োগঃ। ওঁ ইমাং ত্বমিন্দ্র মীঢ্বঃ, সুপুত্রাং সুভগাং কৃধি। দশাস্যাং পুত্রানাধেহি পতিমেকাদশং কুরু। (২৪) প্রজাপতিঋষিরনুষ্টুপ্ ছন্দঃ কন্যা দেবতা গৃহীতকন্যাপাণেঃ পত্যুর্জপে বিনিয়োগঃ। ওঁ সম্রাজ্ঞী শ্বশুরে ভব

---

গার্হপত্যায় গার্হপত্যাগ্নিকরণায় ত্বা ত্বাং অদুঃ দত্তবন্তঃ। গৃভ্ণামীতি হৃগ্রহোর্ভশ্ছন্দসীতি গ্রহের্হকারস্য ভকারঃ। আস ইতি অসের্লঙি সিপি বহুলং ছন্দসীতি শপো ন লুক্।

(২২) হে কন্যকে! অঘোরচক্ষুঃ অবক্রদৃষ্টিঃ এধি ভব। কিঞ্চ অপতিঘ্নী অপতিঘাতিনী চ ভব। কিঞ্চ শিবা পশুভ্যঃ পশূনাং গোমহিষাদীনাং চ সুখাবহা ভব। চতুর্থী আশিষি ষষ্ঠ্যর্থে। সুমনাঃ সুপ্রসন্নচেতা ভব,তথা সুবর্চ্চাঃ তেজস্বিনী, বীরসূঃ সৎপুত্রপ্রসবা, জীবসূঃ জীবদপত্যা ভবেতি সর্ব্বত্রাবেতি। দেবকামা পঞ্চযজ্ঞাভিরতা, স্যোনা সুখকরী ভব, শং. সুখং নঃ অস্মাকং সম্বন্ধি দ্বিপদে চতুষ্পদে শং সুখাবহা ভব ইদমাশাস্মহে। দ্বিপদে চতুষ্পদে ইতি তাদর্থ্যে চতুর্থী।

(২৩) প্রজাপতিঃ স্রষ্টা নঃ অস্মাকং প্রজাং পুত্রপৌত্রাদিকাং আজনয়তু উৎপাদয়তু। ব্যবহিতমপি আঙ্জনিনা সহ সম্বধ্যতে ছন্দসি ব্যবহিতাশ্চেতি পাণিনিস্মরণাৎ। আজরসায় জরান্তং যাবৎ। কিঞ্চ তাং প্রজাং সমনক্তু ব্যঞ্জয়তু প্রকটীকরোতু প্রকটগুণাং করোতু, অর্য্যমা দেবঃ, কিঞ্চ হে কন্যকে! ত্বা ত্বাং মঙ্গলীঃ মঙ্গল্যো দেবতাঃ মহম্ অদুঃ দত্তবত্যঃ বতোঽতঃ পতিলোকম্ আবিশ প্রবিশ, মঙ্গলীরিতি জসি ছন্দসীতি প্রথমাবহুবচনে দ্বিতীয়াবহুবচনম্। কিঞ্চ হে কন্যকে! নঃ অস্মাকং দ্বিপদে দাসদাসীজনাদৌ চতুষ্পদে গোমহিষাদৌ শং সুখরূপা ভব।

(২৪) হে ইন্দ্র! মীঢ্বঃ উদকপ্রক্ষেপরিধিনা আপ্যায়নকারকঃ সন্ ইমাং কন্যাং সুপুত্রাং সৎপুত্রপ্রসবাং সুভগাং পতিপ্রিয়াং ত্বং কৃধি কুরু। কিঞ্চাস্যাং কন্যায়াং দশসংখ্যকান্ পুত্রান্ আধেহি গর্ভে কুরু প্রজনয়। পতিঞ্চ ভর্ত্তারং

সম্রাজ্ঞী শ্বশ্র্বাং ভব। ননান্দরি সম্রাজ্ঞী ভব, সম্রাজ্ঞী অধিদেবৃষু। (২৫)
প্রজাপতিঋর্ষিস্ত্রিষ্টুপ্ ছন্দঃ প্রার্থ্যমানা (কন্যাচিত্তবৃহস্পতয়ো) দেবতা গৃহীত-কন্যাপাণেঃ পত্যুর্জপে বিনিয়োগঃ। ওঁ মম ব্রতে তে হৃদয়ং দধাতু * মম চিত্ত-মনুচিত্তং তে অস্তু। মম বাচমেকমনা জুষস্ব, † বৃহস্পতিস্ত্বা নিযুনক্তু মহ্যম্। (২৬)
ততঃ অগ্নিসমীপমাগত্য, বামতো বধূং কৃত্বা ‡ বধূসহিত উপবিষ্টো জামাতা পাণিগ্রহণকর্ম্মান্তে (ব্যস্তসমস্ত) মহাব্যাহৃতিহোমং কুর্য্যাৎ। যথা—প্রজাপতি-ঋর্ষির্গায়ত্রীচ্ছন্দোঽগ্নির্দেবতা (ব্যস্ত) মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ ভূঃ স্বাহা। প্রজাপতিঋর্ষিরুষ্ণিক্ ছন্দো বায়ুর্দেবতা (ব্যস্ত) মহাব্যাহৃতি-হোমে বিনিয়োগঃ। ওঁ ভুবঃ স্বাহা। প্রজাপতিঋর্ষিরনুষ্টুপ্ ছন্দঃ সূর্য্যো দেবতা (ব্যস্ত) মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ স্বঃ স্বাহা। প্রজাপতিঋর্ষি-র্বৃহতীচ্ছন্দঃ প্রজাপতির্দেবতা (সমস্ত) মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ ভূর্ভুবঃস্বঃ স্বাহা। ততঃ প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ জুহুয়াৎ।

ইতি পাণিগ্রহণকর্ম্ম সমাপ্তম্।

---

অস্যাং একাদশং একাদশপূরণং কুরু ইতি প্রার্থ্যতে। মীঢ্ব ইতি দাশ্বান্ সাহ্বান্ মীঢ্বাংশ্চেতি মিহ সেচনে ইত্যস্য ক্বসৌ নিপাত্যতে মতুবসোরুঃ সম্বুদ্ধৌ ছন্দসীতি রুত্বং। কৃধি কৃঞোবিকরণস্য বহুলং ছন্দসীতি লুক্।

(২৫) হে কন্যকে! ত্বং শ্বশুরে পত্যুঃ পিতরি সম্রাজ্ঞী প্রধানা বাসিনী ভব গৃহকর্ম্মণি পণ্ডিতা ইত্যর্থঃ। তথা শ্বশ্র্বাং পত্যুর্মাতরি তথা ননান্দরি ভর্ত্তৃভগিন্যাং তথা অধি উপরি দেবৃষু পত্যুর্ভ্রাতৃষু দেবরেষু সম্রাজ্ঞী ভব ইতি সর্ব্বত্র সম্বন্ধনীয়ম্। পুনঃ পুনঃ সম্রাজ্ঞীগ্রহণং গৌরবার্থম্।

(২৬) হে কন্যকে! তে তব হৃদয়ং মনঃ মম ব্রতে পাতিব্রত্যাভিধানে দধাতু স্থাপয়তু অত্রান্যকর্ত্তৃপদস্য অশ্রুতত্বাৎ কন্যৈব কর্ত্রী সৈব স্বকীয়হৃদয়ং পতিব্রতে অর্পয়ত্বিতি প্রার্থ্যতে। কিঞ্চ মম চিত্তম্ অনুলক্ষীকৃত্য তব চিত্তম্ অস্তু, অত্র চিত্তমনসোর্ভেদেনোপাদানমবগম্যতে তেন চিত্তং স্মরণলক্ষণমিতি ন্যায়েনোপপদ্যতে। তেনৈতদুক্তং ভবতি, আবয়োরেকচিত্তত্বং ভবত্বিত্যর্থঃ। কিঞ্চ মম বাচং বাণীম্ একমনাঃ অনন্যচেতাঃ জুষস্ব সেবস্ব প্রীতিযুক্তাং বাচং কুর্ব্বিত্যর্থঃ, কিঞ্চ বৃহস্পতিঃ দেবগুরুঃ ত্বা ত্বাং মহ্যং মদর্থং নিযুনক্তু, নিযোজয়তু।

---

* দাধার ইতি পারস্করঃ।
† প্রজাপতিষ্ট্বা ইতি পারস্করঃ।
‡ ইদানীং বরেণ সিন্দূরং দাপয়ন্তি ইতি পারস্করঃ।

## অথ উত্তরবিবাহকর্ম্ম

তত্র পুনরপি যোজকনামানমগ্নিং সংস্থাপ্য বিরূপাক্ষজপান্তাং কুশণ্ডিকাং সমাপ্য যদি দিবাভাগে বিবাহস্তদা নক্ষত্রোদয়ং যাবৎ তিষ্ঠেৎ, অথোদিতে নক্ষত্রে অগ্নেঃ পশ্চিমায়াং দিশি লোহিতবৃষস্য শুষ্কচর্ম্ম প্রাগ্‌গ্রীবমাস্তীর্য্য, লোম-পৃষ্ঠে বধূং বাগ্‌যতামুপবেশ্য, উপবিষ্টো জামাতা পুনরপি সমিৎপ্রক্ষেপানন্তরং ব্যস্তসমস্তমহাব্যাহৃতিহোমং কৃত্বা, ষড়াজ্যাহুতীর্জুহুয়াৎ, প্রত্যাহুতিশেষঞ্চ স্রুবলগ্নমাজ্যং বধূশিরসি নিদধ্যাৎ। ষন্নাং মন্ত্রাণাম্ ঋষ্যাদয়ঃ সাধারণাঃ। প্রজাপতির্ঋষিরনুষ্টুপ্ ছন্দঃ কন্যা দেবতা উত্তরবিবাহে পাণিগ্রহণস্যাজ্যহোমে বিনিয়োগঃ। ওঁ লেখাসন্ধিষু পক্ষ্মস্বাবর্ত্তেষু চ যানি তে। তানি তে পূর্ণাহুত্যা সর্ব্বাণি শময়াম্যহং স্বাহা। (২৭) ওঁ কেশেষু যচ্চ পাপকমীক্ষিতে রুদিতে চ যৎ। তানি তে পূর্ণাহুত্যা সর্ব্বাণি শময়াম্যহং স্বাহা। (২৮) ওঁ শীলে চ * যচ্চ পাপকং ভাষিতে হসিতে চ যৎ। তানি তে পূর্ণাহুত্যা সর্ব্বাণি শময়াম্যহং স্বাহা। (২৯) ওঁ আরোকেষু চ দন্তেষু হস্তয়োঃ পাদয়োশ্চ যৎ। তানি তে পূর্ণাহুত্যা সর্ব্বাণি শময়াম্যহং স্বাহা। (৩০) ওঁ উর্ব্বোরুপস্থে জঙ্ঘয়োঃ সন্ধানেষু চ যানি তে। তানি তে পূর্ণাহুত্যা

---

(২৭) হে কন্যকে! তে তব লেখাসন্ধিষু দেহসন্ধিদেশেষু পক্ষ্মসু নেত্রান্তরেষু আবর্ত্তেষু কুহরেষু কুকুন্দরদেশেষু ছিদ্ররূপস্থানবিশেষেষু ইত্যর্থঃ। চকারোঽনুক্তসমুচ্চয়ে, তেন যানি যান্যেবংভূতানি তে তব অলক্ষণানি তান্যহং পতিঃ পূর্ণাহুত্যা পাণিগ্রহণস্যাজ্যহোমেন সর্ব্বাণি শময়ামি।

(২৮) অস্যাঃ কন্যায়াঃ কেশেষু যৎ পাপকর্ম্ম অলক্ষণং তথা ঈক্ষিতে দর্শনে, রুদিতে অশ্রু-বিমোচনে, চকারাৎ অন্যানি যানি যানি পাপকর্ম্মলক্ষণানি তান্যহং শময়ামীত্যর্থঃ।

(২৯) শীলে চরিতে চেষ্টায়ামিতি যাবৎ, তথা ভাষিতে কথনে হসিতে স্মিতে চকারাৎ ভ্রমণে চ যানি যানি পাপকানি অলক্ষণানি সর্ব্বাণি তানি শময়াম্যহম্।

(৩০) আরোকেষু দন্তান্তর্গতরন্ধ্রেষু দন্তেষু দশনেষু চকারাদোষ্ঠয়োশ্চ তথা হস্তয়োঃ পাদয়োশ্চ চ শব্দাদঙ্গুলীষু চ যৎ পাপকং অলক্ষণং তৎসর্ব্বং শময়ামি।

---

* শীলেষু—ইতি পাঠান্তরম্।

সর্ব্বাণি শময়াম্যহং স্বাহা। (৩১) ওঁ যানি কানি চ ঘোরাণি সর্ব্বাঙ্গেষু তবাভবন্। পূর্ণাহুতিভিরাজ্যস্ত সর্ব্বাণি তান্যশীশমং স্বাহা। (৩২) ততো জামাতা বধূসহিত উত্থায়, বহির্নিক্রম্য, বধূমিমং মন্ত্রং পাঠয়ন্ ধ্রুবং দর্শয়তি। প্রজাপতির্ঋষি * ধ্রুবো দেবতা ধ্রুবদর্শনে বিনিয়োগঃ। ওঁ ধ্রুবমসি ধ্রুবাহং পতিকুলে ভূয়াসং শ্রীঅমুকদেবশর্ম্মণঃ শ্রীঅমুকদেবী † (৩৩) ইতি উভয়োর্নামগ্রহণং বধ্বা কর্ত্তব্যম্। ততো জামাতা অমুং মন্ত্রং পাঠয়ন্ বধূম্ অরুন্ধতীং দর্শয়তি। প্রজাপতির্ঋষির্বধূর্দেবতা অরুন্ধতীদর্শনে বিনিয়োগঃ। ওঁ রুদ্ধাহমস্মি ‡। (৩৪) ততো বধূং পশ্যন্ জামাতা ইমং মন্ত্রং জপেৎ। প্রজাপতির্ঋষিরনুষ্টুপ্ ছন্দঃ কন্যা দেবতা কন্যানুমন্ত্রণে বিনিয়োগঃ। ওঁ ধ্রুবা দ্যৌর্ধ্রুবা পৃথিবী ধ্রুবং বিশ্বমিদং জগৎ। ধ্রুবাসঃ পর্ব্বতা ইমে ধ্রুবা স্ত্রী পতিকুলে ইয়ং। (৩৫) ততো বধূঃ পিতৃগোত্রেণ ভর্ত্তারমভিবাদয়েৎ। ¶

(৩১) ঊর্ব্বোঃ উরুদ্বয়ে উপস্থে ভগদেশে জঙ্ঘয়োঃ জঙ্ঘাদ্বয়সন্ধানে লেখাসন্ধিষু শব্দাৎ অন্যেষু চ স্থানেষু মুখেষু চ যানি অলক্ষণানি তানি পূর্ণাহুত্যা শময়াম্যহম্।

(৩২) হে বধু! তবাঙ্গেষু শিরঃপ্রভৃতিপাদপর্য্যন্তেষু যানি যানি প্রকৃতানি ঘোরাণি পাপানি অলক্ষণানি চশব্দাৎ অপ্রকৃতানি তানি আজ্যস্য পূর্ণাহুতিভিঃ সর্ব্বাণি অশীশমং শমিতবান্ ইত্যর্থঃ। স্বাহেতি হোমাঙ্গত্বেন।

(৩৩) হে ধ্রুব! ত্বং ধ্রুবমসি স্থিরো ভবসি যতোঽতস্তদ্দর্শনাদহমপি পতিকুলে স্থিরা ভূয়াসম্। ধ্রুবমিতি লিঙ্গব্যত্যয়েন নপুংসকত্বম্।

(৩৪) হে অরুন্ধতি! অহং কায়বাঙ্মনোভিঃ সন্নিরুদ্ধাস্মি ত্বমিবেতি তাৎপর্য্যমরুন্ধতীদর্শনে।

(৩৫) যথেত্যত্রাধ্যাহার্য্যম্। যথা ধ্রুবা নিশ্চলা দ্যৌঃ দ্যুলোকো যথা ধ্রুবা পৃথিবী যথা ধ্রুবং বিশ্বং সর্ব্বমিদং জগৎ চরাচরং প্রত্যক্ষা ইমে যথা পর্ব্বতা ধ্রুবাসঃ যথা হিমবদাদয়ো গিরয়স্তথেয়ং বধূঃ পতিকুলে ভর্ত্তৃগৃহে স্থিরা ভবতু ইত্যর্থঃ। ধ্রুবাস ইতি আজ্জসেরলুক্।

* যজুরিদং ছন্দোঽত্র নাস্তি।
† গোত্রহীনং পতিনামানন্তরং বধূনাম বধ্বা গ্রহীতব্যম্।
‡ যজুরিদম্।
¶ অভিবাদনম্ নাম হস্তাভ্যাং পাদগ্রহণম্। গোত্রেণ পতিগোত্রেণ—স্বগোত্রাদ্ ভ্রশ্যতে নারী বিবাহাৎ সপ্তমে পদে ইতি বচনাদিত্যাহ রঘুনন্দনঃ।

নমঃ অমুকগোত্রা শ্রীঅমুকদেব্যহং ভো অভিবাদয়ে। ইত্যভিবাদনবাক্যম্। ততো জামাতা, ওঁ আয়ুষ্মতী ভব সৌম্যে। ইতি বদেৎ। ততস্ত্যক্তমৌনয়া বধ্বা সহিতং জামাতরম্ আচারতো বেদীমুত্থাপ্য, জলপূর্ণকলসমাদায় অবিধবা নার্য্যঃ সহকারপল্লবোদকেন স্নানাদিমঙ্গলং কুর্য্যুঃ। ততো জামাতা অগ্নিসমীপমাগত্য পূর্ব্ববৎ ব্যস্তসমস্তমহাব্যাহৃতিহোমং ( ৪২ পৃঃ ) সমিৎপ্রক্ষেপঞ্চ কুর্য্যাৎ।

ইতি উত্তরবিবাহকর্ম্ম।

## অথ ভোজনাদিগ্রন্থিহোমান্তং কর্ম্ম

তত্র জামাতা এভির্ম্মন্ত্রৈরভিমন্ত্রিতং হবিষ্যান্নমক্ষারলবণং ভুঞ্জীত। মন্ত্রা যথা।—প্রজাপতির্ঋষিরনুষ্টুপ্ ছন্দোঽন্নং দেবতা অন্নভোজনে বিনিয়োগঃ। ওঁ অন্নপাশেন মণিনা প্রাণসূত্রেণ পৃশ্নিনা। বধ্নামি সত্যগ্রন্থিনা মনশ্চ হৃদয়ঞ্চ তে॥ ( ৩৬ ) প্রজাপতির্ঋষিরনুষ্টুপ্ ছন্দঃ প্রার্থ্যমানা দেবতা দম্পত্যোর্হৃদয়ৈক্যপ্রার্থনে বিনিয়োগঃ। ওঁ যদেতদ্ধৃদয়ং তব তদস্তু হৃদয়ং মম। যদিদং হৃদয়ং মম তদস্তু হৃদয়ং তব॥ ( ৩৭ ) প্রজাপতিঋষির্ব্বিপাজ্জগতীচ্ছন্দোঽন্নং দেবতা অন্নস্তুতৌ বিনিয়োগঃ। ওঁং অন্নং প্রাণস্য ষড়্বিংশ * স্তেন বধ্নামি ত্বাসৌ। ( ৩৮ ) † ইদানীং যদি ন ভুজ্যতে

( ৩৬ ) হে বধু! তে তব মনঃ চিত্তং চশব্দাৎ বুদ্ধিঞ্চ হৃদয়ং অন্তঃকরণম্ অহং পরিণেতা বধ্নামি। কেন বধ্নামীত্যাকাঙ্ক্ষায়াম্ আহ—অন্নপাশেন বন্ধনরূপেণ, অন্নেনৈব যতঃ শরীরবন্ধঃ, মণিনা ইত্যুপমা আত্মনা সহ মহাভূতেন মণিনা বা, কিঞ্চ পৃশ্নিনা, কিম্ভূতেন? প্রাণসূত্রেণ প্রাণাঃ সূত্রাণি যস্য তেন অন্নং বৈ দেবাঃ পৃশ্নি ইতি বদন্তি তেন বধ্নামি বশীকরোমি, তদেব বিশিষ্যতে—সত্যগ্রন্থিনা সত্যং গ্রন্থির্যস্য তেন বধ্নামীত্যর্থঃ।

( ৩৭ ) আবয়োর্হৃদয়ৈক্যং ভবতু ইত্যর্থঃ।

( ৩৮ ) হে বধু! ত্বা ত্বাং অহং পরিণেতা বধ্নামি বশীকরোমি, কেন ইত্যাকাঙ্ক্ষায়ামাহ অন্নমিতি। অন্নং অদনীয়ং যৎ প্রাণস্য প্রাণাভিধানবায়ুরাজস্য পড়্বিংশঃ বন্ধনং তেন ইত্যর্থঃ। কেচিত্তু ষড়্বিংশ ইতি পঠন্তি তন্মতে পঞ্চবিংশতিতত্ত্বাতিরিক্তঃ বন্ধঃ ইত্যর্থঃ। পড়্বিংশ ইতি পচে বিংশের্হ্রস্বশ্চন্দসীতি স্বরাগমঃ। পড়্বিংশো বন্ধনে প্রোক্তঃ শুকগোময়মণ্ডয়োরিত্যভিধানকাণ্ডম্।

* পড়্বিংশ ইতি পাঠান্তরম্।

† অত্র অসাবিতি সর্ব্বনামস্থানে বধূনাম প্রযোক্তব্যম্। ইতি অতিরিক্তঃ পাঠঃ।

তদা কদলকাদিকমভিমন্ত্র্য ভোজনার্থং স্থাপনীয়ম্। ভুক্তোচ্ছিষ্টং রজকে প্রদাতব্যম্। ততো দিনান্তরে অনেন মন্ত্রেণ বধূং রথারূঢ়াং কৃত্বা বরঃ স্বগৃহং নয়েৎ। প্রজাপতিঋষিস্ত্রিষ্টুপ্ ছন্দঃ কন্যা দেবতা যানারোহণে বিনিয়োগঃ। ওঁ সুকিংশুকং শাল্মলিং বিশ্বরূপং সুবর্ণবর্ণং সুকৃতং সুচক্রং আরোহ সূর্য্যে অমৃতস্য নাভিং, স্যোনং পত্যে বহং ত্বং কৃণুষ *। (৩৯) ততো বধূসহিতঃ পতির্গচ্ছন্নধ্বনি চতুষ্পথাদীনামন্ত্রয়েৎ। প্রজাপতিঋষিরনুষ্টুপ ছন্দঃ পন্থানো দেবতাশ্চতুষ্পথাদ্যামন্ত্রণে বিনিয়োগঃ। ওঁ মা বিদন্ পরিপন্থিনো য আসীদন্তি দম্পতী। সুগেভির্দুর্গমতীতামপদ্রান্ত্বরাতয়ঃ। (৪০) ততো যানাদবতার্য্য, বামদেব্যং গীত্বা পতির্বধূং গৃহং প্রবেশয়েৎ। ততঃ প্রাগ্‌গ্রীবাস্তৃতলোহিতবৃষশুষ্কচর্ম্মণি কৃতমঙ্গলাচারা অবিধবাঃ পুত্রবত্যো ব্রাহ্মণ্যঃ বধূমুপবেশয়েয়ুঃ, পতিশ্চ মন্ত্রং পঠতি। প্রজাপতিঋষিরনুষ্টুপ্ ছন্দো গবাদয়ো দেবতা অনডুচ্চর্ম্মোপবেশনে বিনিয়োগঃ। ওঁ ইহ গাবঃ

---

(৩৯) সূর্য্যপত্নী সূর্য্যা সূর্য্যেব সূর্য্যা উপচারাৎ প্রকৃষ্টা বধূরুক্তা, হে সূর্য্যে! হে বধূ! ত্বং বহং রথং যানমারোহ আক্রাম আদিত্যস্যেব। কিম্ভূতম্? শাল্মলিং শাল্মলিপুষ্পমিব। পুনঃ কীদৃশম্? সুকিংশুকং পলাশপুষ্পমিব রক্তং। পুনরপি তমেব বিশিনষ্টি, বিশ্বরূপং নানারূপং সুবর্ণবর্ণং কাঞ্চনকান্তং সুকৃতং শোভনং কল্পিতং সুচক্রং সমপাদম্। কিম্ভূতম্? অমৃতস্য নাভিম্ উৎপত্তিস্থানং, যানমিদং স্থানং কিঞ্চ স্যোনং সুখং পত্যে পরিণেত্রে কৃণুষ কুরুষে-ত্যর্থঃ। এতেনৈতদুক্তং ভবতি তবাপি পুত্রপৌত্রাদিসকলবিত্তানামুৎপত্তি-স্থানং যানমিদং ভবতু।

(৪০) হে পন্থানঃ! ইমৌ দম্পতী বধূবরৌ স্বগৃহং যান্তৌ পরিপন্থিনঃ চৌরাঃ পান্থমুষঃ মা বিদন্ মা জানন্তু। কিম্ভূতাশ্চৌরাঃ? যে আসীদন্তি অবরুন্ধন্তি তে মা বিদন্ মা জানন্তু, দম্পতী ইতি শেষঃ। কিঞ্চ ইমৌ দম্পতী সুগেভিঃ সুগমৈর্ম্মার্গৈঃ দুর্গং দুর্গমম্ অতীতাং অতিশয়েন গচ্ছতাম্, কিঞ্চা-ন্যেপ্যরাতয়ঃ শত্রবঃ বিঘ্নকারিণঃ গচ্ছতোরনয়োরপদ্রান্ত, অপগচ্ছন্তু দূরী-ভবন্তু ইত্যর্থঃ। সুগেভিরিতি ছান্দসত্বাৎ ভিস্ ঐস্ ন ভবতি।

---

* বহতুম্—ইতি পাঠান্তরম্।

প্রজায়ধ্বমিহায়া ইহ পূরুষাঃ। ইহো সহস্রদক্ষিণোঽপি পূষা নিষীদতু। (৪১) তত উপবিষ্টায়াশ্চ বধ্বাঃ ক্রোড়ে তা এব ব্রাহ্মণ্যঃ কঞ্চিৎ প্রশস্তং ব্রাহ্মণকুমার-মুপবেশয়েয়ুঃ, কুমারস্ত হস্তে শালূককন্দং ফলানি বা দত্যুঃ। ততঃ পতিঃ কুমারমুত্থাপ্য, ধৃতিনামানমগ্নিং সংস্থাপ্য, সমিৎপ্রক্ষেপং ব্যস্তসমস্ত-মহা-ব্যাহৃতিহোমঞ্চ ( ৪২ পৃঃ ) কৃত্বা, অষ্টাবাজ্যাহুতীর্জুহুয়াৎ। অষ্টানাং মন্ত্রাণাম্ ঋষ্যাদয়ঃ সাধারণাঃ। প্রজাপতিঋষির্বৃহতীচ্ছন্দো বধূর্দেবতা ধৃতিহোমে বিনি-য়োগঃ। ওঁ ইহ ধৃতিঃ স্বাহা। ওঁ ইহ স্বধৃতিঃ স্বাহা। ওঁ ইহ রন্তিঃ স্বাহা। ওঁ ইহ রমস্ব স্বাহা। ওঁ ময়ি ধৃতিঃ স্বাহা। ওঁময়ি স্বধৃতিঃ স্বাহা। ওঁ ময়ি রমঃ স্বাহা। ওঁ রমস্ব স্বাহা। (৪২) ততো ব্যস্তসমস্ত-মহাব্যাহৃতিহোমং (৪২ পৃঃ) কৃত্বা, প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা, পতির্বধূং শ্বশুরাদিষু পিতৃগোত্রেণাভিবাদনং কারয়েৎ [ নমঃ অমুকগোত্রা শ্রীঅমুকদেব্যহং ভো অভিবাদয়ে—ইতি অভিবাদনবাক্যম্ ]।

ইতি ভোজনাদিধৃতিহোমান্তং কর্ম্ম সমাপ্তম্।

## অথ চতুর্থীহোমঃ

তত্র পতিঃ শিখিনামানমগ্নিং সংস্থাপ্য বিরূপাক্ষজপান্তাং কুশণ্ডিকাং সমাপ্য তূষ্ণীং সমিৎপ্রক্ষেপং ব্যস্তসমস্ত-মহাব্যাহৃতিহোমঞ্চ কৃত্বা ( ৪২ পৃঃ ) দক্ষিণতো

---

( ৪১ ) ইহ অস্মিন্ গৃহে গাবঃ প্রজায়ধ্বং পুত্রপৌত্রাদিসন্ততিরূপেণ প্রসূতা ভবন্তু। অত্র প্রজায়ধ্বমিতি বিভক্তিব্যত্যয়েন প্রথমপুরুষবহুবচনে মধ্যমপুরুষবহুবচনম্। তদয়মর্থঃ—ইহ বধূসম্বন্ধিনি গৃহে গাবঃ গোধনানি বহূনি প্রজায়ন্তাং উৎপদ্যন্তাম্ ইত্যাশংসা। পূরুষাঃ পুত্রপৌত্রাদয়ঃ,—উ পক্ষান্তরবচনম্, কিঞ্চ ইহ গৃহে পূষা দেবো নিষীদতু উপবিশতু, কিম্ভূতঃ সঃ দেবঃ ? সহস্রদক্ষিণঃ সহস্রং দক্ষিণা যস্মিন্ স তথা। ইত্যুক্তং ভবতি, অস্য পূষ্ণঃ প্রসাদেন সহস্রদক্ষিণা অপি ক্রতবঃ সম্পদ্যন্তামিত্যর্থঃ।

( ৪২ ) অত্র কন্যৈব প্রার্থ্যতে। হে বধু! ইহ অস্মিন্ গৃহে তব ধৃতিঃ মনসঃ প্রসাদো ভবতু, স্বশব্দ আত্মবচনঃ, স্বস্য ত্বদীয়বন্ধুবর্গস্য ইহ ধৃতিঃ মনসঃ প্রসাদোঽস্তু, তথা ইহ গৃহে তব রন্তিঃ রমণং ক্রীড়নমস্তু, কিঞ্চ ইহ ময়া সহ রমস্ব ক্রীড়নং কুরু, 'ময়া' ইতি বাক্যশেষোঽধ্যাহর্ত্তব্যঃ ঔচিত্যাৎ। কিঞ্চ ময়ি ভর্ত্তরি তব ধৃতিরস্তু, তথা স্বস্য ত্বদীয়বন্ধুবর্গস্য ময়ি প্রীতিরস্তু, তথা ময়ি মদ্বিষয়ে রমঃ রমণম্ অস্তু, তথা ময়ি রমস্ব।

বধূমুপবেশ্য কুশকুসুমসহিতমুদকপাত্রং দক্ষিণে নিধায়, বক্ষ্যমাণমন্ত্রৈর্বিংশত্যা-জ্যাহুতীর্জুহুয়াৎ, প্রত্যাহুতিশেষঞ্চ স্রুবলগ্নমাজ্যমুদকপাত্রে সংস্থাপয়েৎ। প্রজাপতিঋ্ষিরায়মন্ত্র্যমাণোঽগ্নির্দেবতা চতুর্থীহোমে বিনিয়োগঃ। ওঁ অগ্নে প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি। ব্রাহ্মণস্ত্বা নাথকাম উপধাবামি। যাস্যাঃ পাপী লক্ষ্মীস্তামস্যা অপজহি স্বাহা। * (৪৩) প্রজাপতিঋ্ষিরায়মন্ত্র্যমাণো বায়ুর্দেবতা চতুর্থীহোমে বিনিয়োগঃ। ওঁ বায়ো প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি। ব্রাহ্মণস্ত্বা নাথকাম উপধাবামি। যাস্যাঃ পাপী লক্ষ্মী-স্তামস্যা অপজহি স্বাহা। প্রজাপতিঋ্ষিরায়মন্ত্র্যমাণশ্চন্দ্রো দেবতা চতুর্থী-হোমে বিনিয়োগঃ। ওঁ চন্দ্র প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি। ব্রাহ্মণস্ত্বা নাথকাম উপধাবামি। যাস্যাঃ পাপী লক্ষ্মীস্তামস্যা অপজহি স্বাহা। প্রজাপতিঋ্ষিরায়মন্ত্র্যমাণঃ সূর্য্যো দেবতা চতুর্থীহোমে বিনিয়োগঃ। ওঁ সূর্য্য প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি। ব্রাহ্মণস্ত্বা নাথকাম উপধাবামি। যাস্যাঃ পাপী লক্ষ্মীস্তামস্যা অপজহি স্বাহা। প্রজাপতিঋ্ষি-রায়মন্ত্র্যমাণা অগ্নি-বায়ু-চন্দ্র-সূর্য্যাশ্চতস্রো দেবতাশ্চতুর্থীহোমে বিনিয়োগঃ। ওঁ অগ্নিবায়ুচন্দ্রসূর্য্যাঃ প্রায়শ্চিত্তয়ো যূয়ং দেবানাং প্রায়শ্চিত্তয়ঃ স্থ। ব্রাহ্মণো বো নাথকাম উপধাবামি। যাস্যাঃ পাপী লক্ষ্মীস্তামস্যা অপহত স্বাহা। প্রজাপতিঋ্ষিরায়মন্ত্র্যমাণোঽগ্নির্দেবতা চতুর্থীহোমে বিনিয়োগঃ। ওঁ অগ্নে প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি। ব্রাহ্মণস্ত্বা নাথকাম উপধাবামি। যাস্যাঃ পতিঘ্নী তনূস্তামস্যা অপজহি স্বাহা। প্রজাপতিঋ্ষিরায়মন্ত্র্যমাণো বায়ুর্দেবতা চতুর্থীহোমে বিনিয়োগঃ। ওঁ বায়ো প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি। ব্রাহ্মণস্ত্বা নাথকাম উপধাবামি। যাস্যাঃ পতিঘ্নী তনূ-স্তামস্যা অপজহি স্বাহা। প্রজাপতিঋ্ষিরায়মন্ত্র্যমাণশ্চন্দ্রো দেবতা চতুর্থীহোমে বিনিয়োগঃ। ওঁ চন্দ্র প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি।

---

(৪৩) হে অগ্নে! প্রায়শ্চিত্তে! দোষনিষ্কর্ত্তঃ! দেবানামিন্দ্রাদীনাং প্রায়শ্চিত্তিঃ নিষ্কৃতির্দোষাপহন্তা অসি ভবসি যতঃ অতস্ত্বা ত্বাং ব্রাহ্মণোঽহং উপধাবামি উপসর্পামি। কিম্ভূতঃ? নাথকামঃ যাচমানঃ অস্যাং পত্ন্যাং যা পাপী লক্ষ্মীঃ অশুভসম্বন্ধিনী শোভা তাম্ অপজহি অপহর স্ফোটয়। অপরে চত্বারো মন্ত্রা অনেনৈব ব্যাখ্যাতাঃ।

---

* যজুঃ পঞ্চকমিদং তেনাত্র ছন্দো নাস্তি।

ব্রাহ্মণস্ত্বা নাথকাম উপধাবামি। যাস্যাঃ পতিঘ্নী তনূস্তামস্যা অপজহি স্বাহা। প্রজাপতির্ঋষিরামন্ত্র্যমাণঃ সূর্য্যো দেবতা চতুর্থীহোমে বিনিয়োগঃ। ওঁ সূর্য্য প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি। ব্রাহ্মণস্ত্বা নাথকাম উপধাবামি। যাস্যাঃ পতিঘ্নী তনূস্তামস্যা অপজহি স্বাহা। প্রজাপতির্ঋষিরামন্ত্র্যমাণা অগ্নি-বায়ু-চন্দ্র-সূর্য্যাশ্চতস্রো দেবতাশ্চতুর্থীহোমে বিনিয়োগঃ। ওঁ অগ্নি-বায়ু-চন্দ্র-সূর্য্যাঃ প্রায়শ্চিত্তয়ো যূয়ং দেবানাং প্রায়শ্চিত্তয়ঃ স্থ। ব্রাহ্মণো বো নাথকাম উপধাবামি। যাস্যাঃ পতিঘ্নী তনূস্তামস্যা অপহত স্বাহা। (৪৪) প্রজাপতির্ঋষিরামন্ত্র্যমাণোঽগ্নির্দেবতা চতুর্থীহোমে বিনিয়োগঃ। ওঁ অগ্নে প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি। ব্রাহ্মণস্ত্বা নাথকাম উপধাবামি। যাস্যা অপুত্র্যা তনূস্তামস্যা অপজহি স্বাহা। প্রজাপতির্ঋষিরামন্ত্র্যমাণো বায়ুর্দেবতা চতুর্থীহোমে বিনিয়োগঃ। ওঁ বায়ো প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি। ব্রাহ্মণস্ত্বা নাথকাম উপধাবামি। যাস্যা অপুত্র্যা তনূস্তামস্যা অপজহি স্বাহা। প্রজাপতির্ঋষিরামন্ত্র্যমাণশ্চন্দ্রো দেবতা চতুর্থীহোমে বিনিয়োগঃ। ওঁ চন্দ্র প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি। ব্রাহ্মণস্ত্বা নাথকাম উপধাবামি। যাস্যা অপুত্র্যা তনূস্তামস্যা অপজহি স্বাহা। প্রজাপতির্ঋষিরামন্ত্র্যমাণঃ সূর্য্যো দেবতা চতুর্থীহোমে বিনিয়োগঃ। ওঁ সূর্য্য প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি। ব্রাহ্মণস্ত্বা নাথকাম উপধাবামি। যাস্যা অপুত্র্যা তনূস্তামস্যা অপজহি স্বাহা। প্রজাপতির্ঋষিরামন্ত্র্যমাণা অগ্নি-বায়ু-চন্দ্র-সূর্য্যাশ্চতস্রো দেবতাশ্চতুর্থীহোমে বিনিয়োগঃ। ওঁ অগ্নি-বায়ু-চন্দ্র-সূর্য্যাঃ প্রায়শ্চিত্তয়ো যূয়ং দেবানাং প্রায়শ্চিত্তয়ঃ স্থ। ব্রাহ্মণো বো নাথকাম উপধাবামি। যাস্যা অপুত্র্যা

---

(৪৪) পূর্ব্ববদ্‌ব্যাখ্যানম্, কিন্তু পতিঘ্নীতি পতিং হন্তি মারয়তীতি পতিঘ্নীত্বদোষং বৈধব্যজনকং দোষম্ অস্যাঃ কন্যায়াঃ হে বায়ো! ত্বমপজহি অপনয়। পতিঘ্নী তনূরিতি সমুদায়বচন এব তনূশব্দস্তেনাস্যাস্তনৌ দেহমধ্যে যা পতিঘ্নী পাণিরেখা সম্ভাব্যতে তাবপনয়েতি বাক্যার্থঃ। তদস্যা দোষমপনীয় চিরজীবিত্বং গুণং পত্যুঃ কুরু।

তনূস্তামস্যা অপহত স্বাহা। (৪৫) প্রজাপতির্ঋষিরামন্ত্র্যমাণোঽগ্নির্দেবতা চতুর্থীহোমে বিনিয়োগঃ। ওঁ অগ্নে প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি। ব্রাহ্মণস্ত্বা নাথকাম উপধাবামি। যাস্যা অপশব্যা তনূস্তামস্যা অপজহি স্বাহা। প্রজাপতির্ঋষিরামন্ত্র্যমাণো বায়ুর্দেবতা চতুর্থীহোমে বিনিয়োগঃ। ওঁ বায়ো প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি। ব্রাহ্মণস্ত্বা নাথকাম উপধাবামি। যাস্যা অপশব্যা তনূস্তামস্যা অপজহি স্বাহা। প্রজাপতির্ঋষিরামন্ত্র্যমাণশ্চন্দ্রো দেবতা চতুর্থীহোমে বিনিয়োগঃ। ওঁ চন্দ্র প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি। ব্রাহ্মণস্ত্বা নাথকাম উপধাবামি। যাস্যা অপশব্যা তনূস্তামস্যা অপজহি স্বাহা। প্রজাপতির্ঋষিরামন্ত্র্যমাণঃ সূর্য্যো দেবতা চতুর্থীহোমে বিনিয়োগঃ। ওঁ সূর্য্য প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি। ব্রাহ্মণস্ত্বা নাথকাম উপধাবামি। যাস্যা অপশব্যা তনূস্তামস্যা অপজহি স্বাহা। প্রজাপতির্ঋষিরামন্ত্র্যমাণা অগ্নি-বায়ু-চন্দ্র-সূর্য্যাশ্চত্বারো দেবতাশ্চতুর্থীহোমে বিনিয়োগঃ। ওঁ অগ্নি-বায়ু-চন্দ্র-সূর্য্যাঃ প্রায়শ্চিত্তয়ো যূয়ং দেবানাং প্রায়শ্চিত্তয়ঃ স্থ। ব্রাহ্মণো বো নাথকাম উপধাবামি। যাস্যা অপশব্যা তনূস্তামস্যা অপহত স্বাহা। (৪৬) ততো বধূসহিতঃ পতিরুত্থায়, অগ্নেরুত্তরদেশং গত্বা, ধ্রুবলগ্নাজ্যমিশ্রোদকেন বধূং স্নাপয়েৎ। তত আচারতো বধ্বা শিরসি সিন্দূরতিলকং বস্ত্রঞ্চ দদ্যাৎ। ততো ব্যস্তসমস্তমহাব্যাহৃতিহোমং (৪২ পৃঃ) কৃত্বা, প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা, সর্ব্বসাধারণং শাট্যায়ন-হোমাদি-বামদেব্যগানান্তম্ উদীচ্যং কর্ম্ম সমাপ্য কর্ম্মকারয়িতৃব্রাহ্মণায় দক্ষিণাং দদ্যাৎ।

ইতি বিবাহকর্ম্ম সমাপ্তম্।

---

(৪৫) অপুত্র্যা তনূরিতি পুত্রাদ্যৎ ইতি-যৎপ্রত্যয়ঃ। ন পুত্র্যা অপুত্র্যা পুত্রস্য নিমিত্তং যা তনূর্ন ভবতি তাং তনূমস্যা অপনয় অলক্ষণং তনোঃ অপ নায়য়।

(৪৬) অপশব্যা তনূরিতি পশূনাং গবাশ্বমহিষাদীনাং যা তনূর্নিমিত্তং ন ভবতি, তেভ্যো বা হিংস্রা বা ন ভবতি তামপনয় ইতি।

## অথ গর্ভাধানম্ *

তত্র পত্ন্যা ঋতুস্নানাদূর্দ্ধং নিষেকদিবসে সুগন্ধিঃ সুবেশঃ পতিঃ শুচি-রাচান্ত আচারাৎ পূর্ব্বাহ্নে স্বস্তিবাচনাদিপূর্ব্বকং ষষ্ঠীমার্কণ্ডেয়পূজাং কুর্য্যাৎ। তত্র সঙ্কল্পঃ—বিষ্ণুরোঁ তৎসদদ্য অমুকে মাসি অমুকরাশিস্থে ভাস্করে অমুকে পক্ষে অমুকতিথৌ অমুকগোত্রঃ শ্রীঅমুকদেবশর্ম্মা অমুকগোত্রায়াঃ মৎপত্ন্যাঃ শ্রীঅমুকদেব্যাঃ শুভগর্ভাধানকর্ম্মণি ষষ্ঠীমার্কণ্ডেয় প্রীতিকামঃ বিশিষ্টপুত্রোৎপত্তি-কামোবা গণপত্যাদিদেবতাপূজাপূর্ব্বকং ষষ্ঠীমার্কণ্ডেয়পূজনমহং করিষ্যে। ইতি সঙ্কল্প্য, সূক্তং পঠিত্বা, প্রাঙ্মুখ উপবিশ্য, জলশুদ্ধিমাসনশুদ্ধিপ্রভৃতীনি চ কৃত্বা, এষ গন্ধঃ ওঁ গণেশায় নমঃ, এতৎ পুষ্পং ওঁ গণেশায় নমঃ, এষ ধূপঃ ওঁ গণেশায় নমঃ, এষ দীপঃ ওঁ গণেশায় নমঃ, এতন্নৈবেদ্যং ওঁ গণেশায় নমঃ—ইতি পঞ্চোপচারৈঃ পূজয়িত্বা, ওঁ গণেশায় নমঃ ইতি প্রণমেৎ। এবং ওঁ সূর্য্যায় নমঃ, ওঁ বিষ্ণবে নমঃ, ওঁ শিবায় নমঃ, ওঁ দুর্গায়ৈ নমঃ, ওঁ সর্ব্বদেবতাভ্যো নমঃ ইতি প্রত্যেকং পূজয়িত্বা প্রণমেৎ। ততঃ ষষ্ঠীং ধ্যাত্বা সংপূজ্য মার্কণ্ডেয়মপিতথৈব পূজয়েৎ ততঃ সূর্য্যার্ঘ্যং দদ্যাৎ-তত্র সংকল্পঃ বিষ্ণুরোঁ তৎসদদ্য অমুকেমাসি অমুকরাশিস্থে ভাস্করে অমুকপক্ষে অমুকতিথৌ অমুকগোত্রঃ শ্রীঅমুকদেবশর্ম্মা অমুকগোত্রায়াঃ শ্রীঅমুকীদেব্যাঃ শুভগর্ভাধানকর্ম্মণি শ্রীসূর্য্যপ্রীতিকামঃ সূর্য্যার্ঘ্যদানমহং করি-ষ্যামি ততঃ সূক্তং পঠিত্বা সূর্য্যং ধ্যায়েৎ। ওঁ রক্তাম্বুজাসনমশেষগুণৈকসিন্ধুং ভানুং সমস্তজগতামধিপং ভজামি। পদ্মদ্বয়াভয়বরান্ দধতং করাব্জৈর্মাণিক্য-মৌলিমরুণাঙ্গরুচিং ত্রিনেত্রম্॥ ইতি ধ্যাত্বা এতৎ পাদ্যং ওঁ শ্রীসূর্য্যায় নমঃ, ইদমর্ঘ্যং ওঁ শ্রীসূর্য্যায় নমঃ, ইদমাচমনীয়ং ওঁ শ্রীসূর্য্যায় নমঃ, ইদং স্নানীয়জলং ওঁ শ্রীসূর্য্যায় নমঃ, ইদমাচমনীয়ং ওঁ শ্রীসূর্য্যায় নমঃ, এষ গন্ধঃ ওঁ শ্রীসূর্য্যায় নমঃ, এতৎ পুষ্পং ওঁ শ্রীসূর্য্যায় নমঃ, এষ ধূপঃ ওঁ শ্রীসূর্য্যায় নমঃ, এষ দীপঃ ওঁ শ্রীসূর্য্যায় নমঃ, এতন্নৈবেদ্যং ওঁ শ্রীসূর্য্যায় নমঃ—ইত্যাদি ক্রমেণ দশোপচারৈঃ সংপূজ্য, বক্ষ্যমাণমন্ত্রৈঃ পত্নীসহিত উত্থায় অর্ঘ্যং দদ্যাৎ। ওঁ বিশ্বাত্মা বিশ্বকর্ত্তা বিশ্বযোনিরযোনিজঃ। নবপুষ্পোৎ-সবে চার্ঘ্যং গৃহাণ ত্বং দিবাকর॥ ওঁ সম্পাদাকৃতিরাকাশে-হ্যক্ষোভরূপী জগৎপ্রভো। সাক্ষী ত্বং সর্ব্বভূতানাং গৃহাণার্ঘ্যং দিবাকর॥ ওঁ ময়া চ যৎ

---

* সামগানাং গর্ভাধানে নান্দীমুখশ্রাদ্ধং ন বিহিতম্। নাপি গৌর্য্যাদিমাতৃকাপূজা বসুধারাদয়ঃ।

কৃতং কর্ম্ম সাম্প্রতং ফলহেতবে। তিমিরঘ্ন মহাতেজো গৃহাণার্ঘ্যং দিবাকর॥ ওঁ নবপুষ্পোৎসবে চার্ঘ্যং দদামি ভক্তিতৎপরঃ॥ সম্পদাং হেতুঃ কর্ত্তা চ গৃহাণার্ঘ্যং দিবাকর॥ ওঁ নমস্তে ভগবন্ সূর্য্য লোকসাক্ষিন্ বিভাবসো। পুত্রার্থী চ প্রপন্নোঽহং গৃহাণার্ঘ্যং দিবাকর॥ ওঁ কমলাকান্ত দেবেশ সাক্ষী ত্বঞ্চ জগৎপতে। ভক্তস্তব প্রপন্নোঽহং গৃহাণার্ঘ্যং দিবাকর॥ ওঁ স্বর্গদীপ নমস্তেঽস্তু নমস্তে বিশ্বতাপন। নবপুষ্পোৎসবে চার্ঘ্যং গৃহাণ ত্বং দিবাকর॥ ওঁ নমস্তে পদ্মিনীকান্ত সুখ-মোক্ষ-প্রদায়ক। ছায়াপতে জগৎস্বামিন্ স্বর্গদীপ নমোঽস্তু তে॥ ওঁ বিশ্বাত্মা বিশ্ববন্ধুশ্চ বিশ্বেশো বিশ্বলোচনঃ। নবপুষ্পোৎসবে চার্ঘ্যং গৃহাণ ত্বং দিবাকর॥ ততঃ প্রণমেৎ। ওঁ জবাকুসুম-সঙ্কাশং কাশ্যপেয়ং মহাদ্যুতিম্। ধ্বান্তারিং সর্ব্বপাপঘ্নং প্রণতোঽস্মি দিবাকরম্॥ ততো দক্ষিণাং দত্ত্বা অচ্ছিদ্রাবধারণং কুর্য্যাৎ। সায়ংসন্ধ্যায়ামতীতায়াং পূর্ব্বাভিমুখোপবিষ্টায়া বধ্বাঃ পশ্চাৎ স্থিত্বা, স্কন্ধোপরিভাবেনাবতীর্ণেন দক্ষিণ-হস্তেন উপস্থং স্পৃশন্ জপতি। প্রজাপতির্ঋষিরনুষ্টুপ্ ছন্দো বিষ্ণু-ত্বষ্টৃ-প্রজাপতি-ধাতারো দেবতা গর্ভাধানে বিনিয়োগঃ। ওঁ বিষ্ণুর্যোনিং কল্পয়তু, ত্বষ্টা রূপাণি পিংষতু। আসিঞ্চতু প্রজাপতির্ধাতা গর্ভং দধাতু তে॥ (১) ততঃ পুনরপি উপস্থং স্পৃশন্ জপতি। প্রজাপতির্ঋষিরনুষ্টুপ্ ছন্দঃ সিনীবালী-সরস্বত্যশ্বিনো দেবতা গর্ভাধানে বিনিয়োগঃ। ওঁ গর্ভং ধেহি সিনীবালি গর্ভং ধেহি সরস্বতি। গর্ভং তে অশ্বিনৌ দেবাবাধত্তাং পুষ্করস্রজৌ। (২) [ তত আচারাৎ উত্থিতায়া বধ্বাস্তথৈব নাভিদেশে সুবর্ণং ধৃত্বা জপতি। ওঁ জীব-বৎসা ভব ত্বং হি সুপুত্রোৎপত্তিহেতবে। তথা ত্বং ভব কল্যাণি অবিঘ্নং

---

(১) হে বধু! তে তব যোনিং গর্ভধারণস্থানং বিষ্ণুর্বাসুদেবঃ কল্পয়তু প্রসবসম্পন্নাং করোতু। ত্বষ্টা দেবতাবিশেষঃ রূপাণি পিংষতু প্রকাশয়তু ধাতূনামনেকার্থত্বাৎ পিষঃ প্রকাশনেঽপি দৃশ্যতে, কিঞ্চ তামেব যোনিং প্রজাপতিঃ আসিঞ্চতু জীববৎসকাং করোতু, এতদুক্তং ভবতি যাবন্মাত্রেণ বীজেন গর্ভোভবতি, তাবন্মাত্রং বীজং প্রক্ষেপয়তু, কিঞ্চ ধাতা সূর্য্যঃ তে তব গর্ভং পুত্রার্থং দধাতু ধারয়তু।

(২) অত্র দৃষ্টেন্দুরমাবস্যা সিনীবালী সা প্রার্থ্যতে, হে সিনীবালি! ত্বম্ অস্যাং বধ্বাং গর্ভং ধেহি ধারয়, বন্ধ্যাত্বম্ অস্যা অপনয়। তথা হে সরস্বতি!

গর্ভধারিণী॥ ওঁ দীর্ঘায়ুষং বংশধরং পুত্রং কারয় সুব্রতে। পুমাংসৌ মিত্রাবরুণৌ পুমাংসাবশ্বিনাবুভৌ। পুমানগ্নিশ্চ বায়ুশ্চ পুমান্ গর্ভস্তবোদরে। ইতি কুত্রাপি অতিরিক্তঃ পাঠো দৃশ্যতে। ততঃ সুবর্ণং পাতয়েৎ যদি দক্ষিণে পততি তদা পুত্রং, যদি বামে তদা কন্যাং জানীয়াৎ ততোঽচ্ছিদ্রাবধারণং কৃত্বা পঞ্চগব্যং শোধয়িত্বা বধূং পায়য়েৎ। ততো ভার্য্যামুপেয়াৎ।

ইতি গর্ভাধানম্।

## অথ পুংসবনম্

তৃতীয়স্য গর্ভমাসস্যোপক্রমে ( দশমদিনাভ্যন্তরে ) জ্যোতিঃশাস্ত্রোক্তকালে পুংসবনং কার্য্যম্। তস্মিন্ প্রাতঃ কৃতস্নানঃ কৃতবৃদ্ধিশ্রাদ্ধঃ পতিশ্চন্দ্রনামানমগ্নিং সংস্থাপ্য বিরূপাক্ষজপান্তাং কুশণ্ডিকাং সমাপ্য কৃতস্নানাং বধূমগ্নেঃ পশ্চিমায়াদ্দিশি আত্মদক্ষিণে উদগগ্রেষু কুশেষু প্রাঙ্মুখীমুপবেশ্য প্রকৃতকর্ম্মারম্ভে প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা মহাব্যাহৃতিহোমং কুর্য্যাৎ। প্রজাপতির্ঋষির্গায়ত্রীচ্ছন্দোঽগ্নির্দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ ভূঃ স্বাহা॥ প্রজাপতির্ঋষিরুষ্ণিক্‌ছন্দো বায়ুর্দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ ভুবঃ স্বাহা। প্রজাপতির্ঋষিরনুষ্টুপ্‌ছন্দঃ সূর্য্যো দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ স্বঃ স্বাহা। ততঃ পতিরুত্থায় বধূপৃষ্ঠদেশে স্থিতঃ বধূদক্ষিণস্কন্ধং স্পৃষ্ট্বা অবতীর্ণেন দক্ষিণহস্তেনাব্যবহিতং নাভিদেশং স্পৃশন্ জপতি। প্রজাপতির্ঋষিরনুষ্টুপ্‌ছন্দো মিত্রাবরুণাশ্ব্যগ্নিবায়বো দেবতাঃ পুংসবনে বিনিয়োগঃ। ওঁ পুমাংসৌ মিত্রাবরুণৌ পুমাংসাবশ্বিনাবুভৌ। পুমানগ্নিশ্চ বায়ুশ্চ পুমাম্ গর্ভস্তবোদরে। (১)

---

ত্বঞ্চ অস্যাং বধ্বাং গর্ভং ধেহি ইতি প্রার্থ্যতে। কিঞ্চ অশ্বিনৌ নাসত্যৌ গর্ভং পুত্রম্ অস্যাং আধত্তাং কুরুতাম্। কিম্ভূতৌ অশ্বিনৌ? পুষ্করস্রজৌ পদ্মমালালঙ্কৃতৌ পুষ্করস্রজাবিতিবিশেষণেন দেবানাং মাল্যধারণং নিয়মেন প্রতিপাদিতম্।

( ১ ) গর্ভসম্ভূতৌ সত্যাং কদাচিৎ স্ত্রীনপুংসকাবপি স্যাতাং অতস্তন্নিরাসার্থমাহ। অত্র যথাতথা অস্তীতি ক্রিয়াপদমধ্যাহার্য্যম্। তেনায়মর্থঃ সম্পদ্যতে —যথা পুমাংসৌ মিত্রাবরুণৌ আদিত্যপ্রচেতসৌ, যথা পুমাংসৌ অশ্বিনৌ দেববৈদ্যৌ উভাবপি যথা পুমানগ্নিঃ যথা পুমান্ বায়ুঃ তথা অয়ং গর্ভঃ পুংজননহেতুঃ তবোদরে ভবত্বিত্যর্থঃ।

ইত্যেকপুংসবনম্। অথাপরপুংসবনার্থং বটবৃক্ষস্য পূর্ব্বোত্তরশাখায়াং ফল-যুগলশালিনীং কৃমিভিরনুপহতাং বটশুঙ্গাং যবানাং মাষাণাং বা ত্রিভিস্ত্রিভি গুড়কৈঃ সপ্তবারান্ সপ্তভির্মন্ত্রৈঃ ক্রীণীয়াৎ। সপ্তানাং মন্ত্রাণামৃষ্যাদয়ঃ সাধারণাঃ। প্রজাপতির্ঋষিঃ সোম-বরুণ-বসু-রুদ্রাদিত্য-মরুদ্বিশ্বদেবা দেবতা ন্যগ্রোধশুঙ্গাক্রয়ণে বিনিয়োগঃ। ওঁ যদ্যসি সৌমী সোমায় ত্বা রাজ্ঞে পরিক্রীণামি। ইতি গুড়কত্রয়েণ একং ক্রয়ণম্। ওঁ যদ্যসি বারুণী বরুণায় ত্বা রাজ্ঞে পরিক্রীণামি। ইতি গুড়কত্রয়েণ দ্বিতীয়ং ক্রয়ণম্। এবং ওঁ যদ্যসি বসুভ্যো বসুভ্যস্ত্বা পরিক্রীণামি। ওঁ যদ্যসি রুদ্রেভ্যো রুদ্রেভ্যস্ত্বা পরিক্রীণামি। ওঁ যদ্যস্যাদিত্যেভ্য আদিত্যেভ্যস্ত্বা পরিক্রীণামি। ওঁ যদ্যসি মরুদ্ভ্যো মরুদ্ভ্যস্ত্বা পরিক্রীণামি। ওঁ যদ্যসি বিশ্বেভ্যো দেবেভ্যো দেবেভ্যস্ত্বা পরিক্রীণামি। (২) ইতি প্রত্যেকং গুড়কত্রয়েণ ক্রয়ণং কার্য্যম্। ততঃ ক্রীতাং বটশুঙ্গামনেন মন্ত্রেণ বৃক্ষাদাহরেৎ। প্রজাপতির্ঋষিরোষধয়ো দেবতা ন্যগ্রোধশুঙ্গাচ্ছেদনে বিনিয়োগঃ। ওঁ ওষধয়ঃ সুমনসো ভূত্বা অস্যাং বীর্য্যং সমাধত্ত ইয়ং (বটশুঙ্গা) কর্ম্ম করিষ্যতি। (৩) ততস্তাং তৃণবেষ্টিতামন্তরীক্ষেণানীয়ান্তরীক্ষে স্থাপয়েৎ। ততঃ কৃতশোভন নাম্নোঽগ্নেরুত্তরতঃ প্রক্ষালিতশিলায়াং ব্রহ্মচারী কুমারী গর্ভবতী শ্রুতস্বাধ্যায়শীলো ব্রাহ্মণো বা আচারতো নীহারজলেনাবৃত্তলোষ্ট্রেণ পুনঃ পুনঃ বটশুঙ্গাং পেষয়েৎ। ততোঽগ্নেঃ পশ্চিমত উত্তরাগ্রেষু পশ্চিমাভিমুখীং বধূং পূর্ব্বাদিদিগবনতমস্তকাং কৃত্বা পৃষ্ঠদেশে স্থিতঃ পতির্দক্ষিণপাণেরঙ্গুষ্ঠোপকনিষ্ঠাভ্যাং বস্ত্রবদ্ধাং পেষিতবটশুঙ্গাং গৃহীত্বা গর্ভবত্যা দক্ষিণনাসাবিবরে

---

(২) হে ন্যগ্রোধশুঙ্গে! ত্বং যদি সৌমী সোমদেবতাকা অসি ভবসি, তদা সোমায় রাজ্ঞে ত্বা ত্বাং পরিক্রীণামি, তথা যদ্যসি বারুণীত্যাদি তথা যদি ত্বং বসুভ্যো বসুঃ বসুদেবতাকা অসি তদা বসুভ্যঃ বসবে ত্বাং পরিক্রীণামি। বসুভ্য ইতি ছান্দসত্বাং একত্বে বহুত্বম্। ঙিঙাংতিঙো ভবন্তীতি প্রথমৈকবচনং চতুর্থীবহুবচনে।

(৩) হে ওষধয়ঃ! যূয়ং সুমনসঃ সুপ্রসন্নচেতসঃ ভূত্বা অস্যাং ক্রীতায়াং বটশুঙ্গায়াং বীর্য্যং সামর্থ্যং সমাধত্ত অর্পয়ত। যতঃ ইয়ং বটশুঙ্গা পুংসবনং কর্ম্ম করিষ্যতি।

বটশুঙ্গারসং নিক্ষিপেদনেন মন্ত্রেণ—প্রজাপতিঋষিরনুষ্টুপ্ ছন্দোঽগ্নীন্দ্র-বৃহস্পতয়ো দেবতা ন্যগ্রোধ-শুঙ্গারসদানে বিনিয়োগঃ। ওঁ পুমানগ্নিঃ পুমানিন্দ্রঃ পুমান্ দেবো বৃহস্পতিঃ। পুমাংসং পুত্রং বিন্দস্ব তং পুমাননু জায়তাম্। (৪) ততো ব্যস্তসমস্তমহাব্যাহৃতিহোমং (৪২ পৃঃ) কৃত্বা প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা শাট্যায়নহোমাদিবামদেব্যগানান্তং কর্ম সমাপ্য কর্ম-কারয়িতৃব্রাহ্মণায় দক্ষিণাং দদ্যাদিতি। ইত্যপরপুংসবনং কর্ম সমাপ্তম্।

## অথ সীমন্তোন্নয়নম্

পুংসবনোক্তবারতিথিনক্ষত্রেষু প্রথমগর্ভস্য চতুর্থে ষষ্ঠে অষ্টমে বা মাসি সীমন্তোন্নয়নং কর্তব্যম্। তত্র গর্ভাধানপুংসবনসীমন্তোন্নয়নকর্মণাং পৌর্ব্বাপর্য্য নিয়মাৎ যদি দৈবাৎ যথাকালে গর্ভাধানপুংসবনকর্মণী ন কৃতে তদা সীমন্তো-ন্নয়নদিন এব তৎকালাতিক্রমনিমিত্তকং শাট্যায়নহোমরূপং প্রায়শ্চিত্তং কৃত্বা পশ্চাৎ গর্ভাধানপুংসবনকর্মণী সমাপ্য সীমন্তোন্নয়নং কর্তব্যমিতি। (এবমন্য-ত্রাপি বোধ্যম্)। তত্র প্রথমং প্রাতঃকৃতস্নানঃ কৃতবৃদ্ধিশ্রাদ্ধঃ পতির্মঙ্গল-নামানমগ্নিং সংস্থাপ্য বিরূপাক্ষজপান্তাং কুশণ্ডিকাং সমাপ্য ওমদ্যেত্যাদি এতদ্মদীয়পত্ন্যা গর্ভাধানপুংসবনকর্মণো র্যথাকালমকরণজনিতদোষপ্রশমনায় শাট্যায়নহোমমহং কুর্ব্বীয়। ইতি সঙ্কল্পং কৃত্বা শাট্যায়নহোমং কুর্য্যাৎ। ততো যথোক্তগর্ভাধানপুংসবনকর্মণী সমাপ্য প্রাতঃ কৃতস্নানাং বধূমগ্নেঃ পশ্চিমায়াং দিশি স্বদক্ষিণত উদগগ্রেষু কুশেষু প্রাঙ্মুখীমুপবেশ্য প্রকৃতকর্মারম্ভে প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা মহাব্যাহৃতিহোমং কুর্য্যাৎ। যথা প্রজাপতিঋষির্গায়ত্রীচ্ছন্দোঽগ্নির্দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ ভূঃ স্বাহা। প্রজাপতিঋষিরুষ্ণিকৃছন্দোবায়ুর্দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ ভুবঃ স্বাহা। প্রজাপতিঋষিরনুষ্টুপ্ ছন্দঃ সূর্য্যো দেবতা মহা-ব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ স্বঃ স্বাহা। ততো বধূপৃষ্ঠদেশে স্থিতঃ পূর্ব্বাভিমুখঃ

---

(৪) অত্রাপি যথা তথেত্যধ্যাহার্য্যম্। যত্তদোর্নিত্যসম্বন্ধাৎ। হে বধু! যথা পুমানগ্নিঃ, পুমানিন্দ্রঃ, যথা পুমান্ দেবঃ বৃহস্পতিঃ তথা তদ্রূপপ্রভাববিক্রম বুদ্ধিসদৃশং পুত্রং বিন্দস্ব প্রাপ্নুহি, কিঞ্চ তমনু তস্য জাতস্য পুত্রস্য পশ্চাদন্যো-ঽপি ত্বদাত্মজঃ পুত্র এব জায়তাম্ উৎপদ্যতামিতি। তস্য ষষ্ঠ্যর্থে দ্বিতীয়া, অনুঃ পশ্চাদর্থঃ।

পত্তিরেকবৃন্তলগ্নস্থিতং পক্বোডুম্বরফলযুগলং পট্ট-সূত্রাদিগ্রথিতম্ আচারপ্রাপ্ত-সুবর্ণাদিঘটিতবাসুদেবপাদযুগলং যবপ্রতিকৃতিচক্রসহিতং রক্ষার্থো পঞ্চগুনিম্ব-সর্ষপভল্লাতকবচাদ্যুপেতং গৃহীত্বা—প্রজাপতিঋষিরনুষ্টুপ্ ছন্দঃ স্ত্রীদেবতা উডুম্বরফলযুগলবন্ধনে বিনিয়োগঃ। ওঁ অয়মূর্জ্জাবতো বৃক্ষ উর্জ্জীব ফলিনী ভব। পর্ণং বনস্পতেনুর্ত্বা নুত্বা চ সূয়তাং রয়িঃ। (১) অনেন মন্ত্রেণ বধূকণ্ঠে দদ্যাৎ। ততো দর্ভপিঞ্জলীত্রয়ং * গৃহীত্বা—প্রজাপতিঋষির্গায়ত্রীচ্ছন্দোঽগ্নির্দেবতা দর্ভপিঞ্জলীভিঃ সীমন্তোন্নয়নে বিনিয়োগঃ। ওঁ ভূঃ। ইতি দর্ভপিঞ্জলীভিঃ বধূ-কেশান্তাদারভ্য সীমন্তমুন্নীয় তাস্তত্রৈব স্থাপয়েৎ। ততোঽপরদর্ভপিঞ্জলীত্রয়ং গৃহীত্বা প্রজাপতিঋষিরুষ্ণিকৃছন্দো বায়ুর্দেবতা দর্ভপিঞ্জলীভিঃ সীমন্তোন্নয়নে বিনিয়োগঃ। ওঁ ভুবঃ। ইতি সীমন্তমুন্নীয় তত্তথৈব স্থাপয়েৎ। পুনস্তথৈব দর্ভপিঞ্জলীত্রয়ং গৃহীত্বা প্রজাপতিঋষিরনুষ্টুপ্ ছন্দঃ সূর্য্যোদেবতা দর্ভ-পিঞ্জলীভিঃ সীমন্তোন্নয়নে বিনিয়োগঃ। ওঁ স্বঃ। ইতি সীমন্তমুন্নীয় তত্ত-ত্রৈব স্থাপয়েৎ। দর্ভপিঞ্জলীপদেন প্রাদেশপ্রমাণং কুশপত্রদ্বয়ং কুশান্তরেণ বেষ্টিতমুচ্যতে। ততঃ শরং গৃহীত্বা প্রজাপতিঋষিস্ত্রিষ্টুপ্ ছন্দঃ স্ত্রী দেবতা শরেণ সীমন্তোনয়নে বিনিয়োগঃ। ওঁ যেনাদিতেঃ সীমানং নয়তি প্রজাপতির্মহতে সৌভগায় তেনাঽহমস্যৈ সীমানং নয়ামি প্রজামস্যৈ জরদষ্টিং কৃণোমি। (২) ইতি তথৈব কেশান্তাদারভ্য শরেণ সীমন্তমুন্নীয় শরস্তত্রৈব স্থাপয়েৎ। ততঃ

---

(১) হে কল্যাণি! অয়ং বৃক্ষঃ উডুম্বরাখ্যঃ উর্জ্জাবতঃ উর্জ্জবান্ প্রভূত-ফলস্তস্য প্রশস্ততরোঃ উর্জ্জাবতঃ তৎসকাশাদপি ত্বং উর্জ্জীব উডুম্বরীব ফলিনী ভব ইত্যর্থঃ। উডুম্বরী যাবৎ ফলশালিনী তাবৎ পুত্রিণী ভবেত্যর্থঃ। কিঞ্চ হে বনস্পতে! উডুম্বর! অস্যাং স্ত্রিয়াং ত্বয়া রয়িঃ পুত্রধনং ভূয়তাং উৎপাদ্যতাং, কিমিব? পর্ণমিব। কিং কৃত্বা? নুত্বা নুত্বা নুদ্ প্রেরণার্থঃ প্রেরণং কৃত্বা কৃত্বা ইত্যর্থঃ। এতদুক্তং ভবতি—যথা উডুম্বরো বৃক্ষো বহুফলপর্ণো ভবতি তথা বধূরপি বহুপুত্রবতী ভবতু ইতি প্রার্থনা। চকারঃ পূরণার্থঃ।

(২) যেন বীরতরেণ শরশ্রেষ্ঠেন প্রজাপতিঃ ধাতা জগৎস্রষ্টা অদিতেঃ দেবমাতুঃ সীমানং সীমন্তং নয়তি নীতবান্। কিমর্থং—মহতে মহত্বায়, সৌভগায় সুভগত্বায় তেন শরেণাহং ভর্ত্তা অস্যৈ অস্যাঃ বধ্বাঃ

---

* পিঞ্জুলী ইতি বা কচিৎ পাঠঃ।

সূত্রপূর্ণং তর্কুং গৃহীত্বা প্রজাপতিঋষির্জগতীচ্ছন্দো রাকা দেবতা সূত্রপূর্ণ-তর্কুণা সীমন্তোন্নয়নে বিনিয়োগঃ। ওঁ রাকামহং সুহবাং সুষ্টুতী হুবে, শৃণোতু নঃ সুভগা বোধতু ত্মনা। সীব্যত্বপঃ সূচ্যাঽচ্ছিদ্যমানয়া দদাতু বীরং শতদায়মুখ্যম্ (৩)। ইতি নূতনসূত্রপূর্ণতর্কুণা কেশান্তাদারভ্য সীমন্ত-মুন্নীয় তত্রৈব স্থাপয়েৎ। ততস্ত্রিশ্বেতাং শললীং গৃহীত্বা—প্রজাপতিঋষি-র্জগতীচ্ছন্দো রাকা দেবতা ত্রিশ্বেতয়া শলল্যা সীমন্তোন্নয়নে বিনিয়োগঃ। ওঁ যাস্তে রাকে সুমতয়ঃ সুপেশসো যাভির্দদাসি দাশুষে বসূনি। তাভির্নো অদ্য সুমনা উপাগহি সহস্রপোষং সুভগে ররাণা। (৪) ইতি তথৈব

---

সীমানং সীমন্তং নয়ামি করোমি, কিঞ্চাস্যৈ অস্যাং স্ত্রিয়াং প্রজাং পুত্র-পৌত্রাদিকাং জরদষ্টিং জরাপর্য্যন্তং চিরকালজীবিনীং কৃণোমি করোমি। অহং ভর্ত্তেতি সম্বন্ধঃ। সৌভগায়েতিষণ্, সুভগায়েতি বা পাঠঃ, অস্যৈ অস্যা ইত্যর্থে ষষ্ঠ্যর্থে চতুর্থীবিভক্তি র্ব্যত্যয়াৎ।

(৩) রাকা পৌর্ণমাসী তাং রাকামহং ভর্ত্তা হুবে আহ্বয়ামি। কিম্ভূতাং তাং ? সুহবাং সুখেনাহূতাং শোভানাঙ্গাং বা। কয়া ? সুষ্টুতী সুস্তবেন, সুষ্টুতী-শব্দাৎ তৃতীয়ৈকবচনস্য সুপাংসুলুক্ ইতি বিভক্তিলুক্। আহ্বানে প্রয়োজনমাহ শৃণোতু ইতি। সা রাকা কিম্ভূতা ? সুভগা মনোহরা নোঽস্মাকং বচঃ শৃণোতু, ন কেবলং শৃণোতু বোধতু অবধারয়তু। কেন ? ত্মনা আত্মনা আত্মাদের্বা লুক্ ইত্যাকারলোপঃ স্বয়মেব ইত্যর্থঃ। সা এব ভূয়ঃ প্রার্থ্যতে, অয়ঃসূচ্যা সংঘট্টন-শীলয়া, পুনঃ কিংবিশিষ্টয়া ? অচ্ছিদ্যমানয়া সা রাকেতি সম্বন্ধঃ। কিঞ্চ সৈব বীরং পুত্রং দদাতু। কীদৃশং পুত্রং ? শতদায়মুখ্যং শতদায়াঃ বহুদানাঃ প্রভূতদাতারঃ তেষাং প্রধানম্, ঋগ্বেদে তু শতদায়ুমুখ্যম্ ইতি পাঠঃ। দদাতি দায়ুঃ ঔণাদিক উঃ। অয় ইতি অদসো দকারস্য ব্যত্যয়েন যকারঃ।

(৪) হে রাকে! যাস্তব সুমতয়ঃ শোভনা বুদ্ধয়ঃ। কিম্ভূতাঃ ? সুপেশসঃ সুরূপা নির্ম্মলাঃ, কিঞ্চ যাভিঃ মতিভির্দাশ্বান্ যজমানঃ সততং যজতে যজ্ঞান্ তস্মৈ দাশুষে যজমানায় বসূনি ধনানি দদাসি প্রযচ্ছসি তাভিঃ সুমতিভি-রুপলক্ষিতানাং নো অস্মাকম্ উপ সমীপে অদ্য বর্ত্তমানে অহনি আগহি আগচ্ছ। কিম্ভূতা সতী ? সুমনাঃ প্রসন্নচিত্তা। হে সুভগে! সর্ব্বলোকবল্লভে! কিং কুর্ব্বাণা ? ত্বং সহস্রপোষং ধনং ররাণা সহস্রং পুষ্ণাতি কর্ম্মণ্যন্ তথাবিধাং

কেশান্তাদারভ্য শললা সীমন্তমুন্নীয় শললীং তত্রৈব স্থাপয়েৎ। তত্রস্থিতণ্ডুল-মাষসাধিতং কৃসররূপং স্থালীপাকমুপরিদত্তঘৃতকং পতির্বধূং দর্শয়ন্ পৃচ্ছতি। প্রজাপতির্ঋষিঃ স্ত্রী দেবতা বধূপ্রশ্নে বিনিয়োগঃ। ওঁ কিং পশ্যসি? ততঃ পতিঃ স্থালীপাকং পশ্যন্তীং বধূং পাঠয়তি। প্রজাপতির্ঋষিঃ স্ত্রী দেবতা স্থালীপাক-বীক্ষণে বিনিয়োগঃ। ওঁ প্রজাং পশূন্ সৌভাগ্যং মহ্যং দীর্ঘায়ুষ্ট্বং পত্যুঃ। (৫) ততো মহাব্যাহৃতিহোমং (৪২ পৃঃ) কৃত্বা সমিৎপ্রক্ষেপান্তং কর্ম্ম সমাপ্য উদীচ্যং শাট্যায়নহোমাদিবামদেব্যগানান্তং কর্ম্ম নির্ব্বর্ত্ত্য কর্ম্মকারয়িতৃ-ব্রাহ্মণায় দক্ষিণাং দদ্যাৎ। ততোঽবিধবাঃ পুত্রবত্যো নার্য্যো বেদ্যামুত্থাপ্য বধূং কলসোদকাভ্যুক্ষণাদিকং মঙ্গলকৃত্যং কুর্য্যুঃ। ততস্তং কৃসরং গর্ভবতী ভুঞ্জীত। ইতি সীমন্তোন্নয়নম্।

## অথ সোষ্যন্তী-হোমঃ

অথাসন্নপ্রসবায়া বধ্বাঃ সুখপ্রসবার্থং সোষ্যন্তীহোমঃ কর্ত্তব্যঃ। তত্র কৃত-স্নানঃ পতিঃ ওঁ অদ্যেত্যাদি অমুকগোত্রায়া অমুকাভিধানায়া মদীয়পত্ন্যাঃ সুখ-প্রসবকামঃ সোষ্যন্তীহোমমহং কুর্ব্বীয়। ইতি সঙ্কল্পং কৃত্বা পূর্ব্ববন্মঙ্গলনামান-মগ্নিং সংস্থাপ্য বিরূপাক্ষজপান্তাং কুশণ্ডিকাং সমাপ্য প্রকৃতকর্ম্মারম্ভে প্রাদেশ-প্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা মহাব্যাহৃতিহোমং কুর্য্যাৎ। প্রজা-পতির্ঋষির্গায়ত্রীচ্ছন্দোঽগ্নির্দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ ভূঃ স্বাহা। প্রজাপতির্ঋষিরুষ্ণিক্‌ছন্দো বায়ুর্দেবতা মহাব্যাহৃতিহোমে বিনি-য়োগঃ। ওঁ ভুবঃ স্বাহা। প্রজাপতির্ঋষিরনুষ্টুপ্ ছন্দঃ সূর্য্যো দেবতা

---

ধনধান্যসমৃদ্ধিং দদানা রালা দানে ইত্যস্মাৎ পরস্য শপোবহুলং ছন্দসীতি শ্লুশ্লাবিতি দ্বির্বচনং ব্যত্যয়েনাত্মনেপদম্ শান চ। দাশুষে ইতি দাশৃ দানে দাশ্বান্ সাহ্বান্ ইত্যাদি নিপাতনাৎ চতুর্থ্যেকবচনে, আগহীতি ছান্দসত্বাৎ শপো লুক্ অনুনাসিকলোপশ্চ হের্লোপো ন ভবতীতি।

(৫) হে কল্যাণকারিণি! অস্মিন্ স্থালীপাকে অনুসম্বন্ধিত্বেন প্রজাং পুত্রপৌত্রসন্তানলক্ষণাং পশূন্ গোহস্ত্যশ্বমহিষাদিকান্ মহ্যং মম পত্যুঃ দীর্ঘায়ুষ্ট্বং বহুকালজীবিত্বং সৌভাগ্যমাত্মনঃ। কিং পশ্যসি ত্বমিতি প্রশ্নানন্তরং অভিহিতা সতী ভর্ত্তারমুত্তরমাহ ভবদুক্তং সর্ব্বং পশ্যামি। মহ্যমিতি ষষ্ঠ্যর্থে চতুর্থী বক্তব্যেতি চতুর্থী।

মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ স্বঃ স্বাহা। ততঃ প্রজাপতির্ঋষিঃ পঙ্‌ক্তিশ্ছন্দঃ সংরাধনী দেবতা সোষ্যন্তীহোমে বিনিয়োগঃ। ওঁ যা তিরশ্চী নিপদ্যতে অহং বিধরণীতি তাং ত্বাং ঘৃতস্য ধারয়া যজে সংরাধনীমহং সংরাধন্যৈ দেব্যৈ দেষ্ট্র্যৈ স্বাহা। (১) প্রজাপতিঋষিরনুষ্টুপ্ ছন্দো বিপশ্চিদ্দেবতা সোষ্যন্তীহোমে বিনিয়োগঃ। ওঁ বিপশ্চিৎ পুচ্ছমভরৎ তদ্ধাতা পুনরাবহৎ পরেহি ত্বং বিপশ্চিৎ পুমানয়ং জনিষ্যতেঽসৌ নাম স্বাহা। (২) অত্রাসাবিতি সর্ব্বনামস্থানে ভবিষ্যৎপুত্রস্য হৃদয়নিহিতং নাম কর্ত্তব্যম্। তেনামুকশর্ম্মানাম স্বাহা ইতি হোমং কুর্য্যাৎ। ততো মহাব্যাহৃতিহোমং কৃত্বা (৩২ পৃঃ) প্রাদেশপ্রমাণাং ঘৃতাক্তসমিধং তূষ্ণীমগ্নৌ হুত্বা প্রকৃতকর্ম্মান্তে উদীচ্যং শাট্যায়নহোমাদিবামদেব্যগানান্তং কর্ম্ম সমাপ্য কর্ম্মকারয়িতৃব্রাহ্মণায় দক্ষিণাং দদ্যাৎ। ইতি।

## অথ জাতকর্ম্ম

পুত্রে জাতে পিতা নাড়ীং মা কৃন্তত স্তন্যঞ্চ মা দত্তেত্যভিধায় কৃতস্নানঃ কৃতবৃদ্ধিশ্রাদ্ধঃ প্রক্ষালিতশিলায়াং ব্রহ্মচারিণা কুমার্য্যা গর্ভবত্যা বা

---

(১) যা দেবতা শুভে কর্ম্মণি ক্রিয়মাণে বিধরণী শুভফলবিঘাতকারিণী ইত্যেবং মন্যমানা তিরশ্চী বাঞ্ছিতফলবিঘাতকর্ত্রী নিপদ্যতে প্রভবতি তাং ত্বাং দেবতামহং ভর্ত্তা যজে পূজয়ামি। কীদৃশীং ত্বাং? সংরাধনীং তব ইষ্টফলস্য সম্যক্‌সাধনীং দাত্রীং। কয়া যজে? ঘৃতস্য ধারয়া আজ্যাহুত্যা তস্যৈ দেব্যৈ সংরাধন্যৈ দেষ্ট্র্যৈ, দিশ্ অতিসর্জ্জনে অতিসর্জ্জনঞ্চ দানম্ ইষ্টফলদাত্র্যৈ ইত্যর্থঃ। সংরাধন্যৈ ইত্যাদিষু পূজার্থে চতুর্থী।

(২) বিপশ্চিৎ দেবতাবিশেষঃ শিশূনাং পুচ্ছং শিশ্নমভরৎ হৃতবান্ হৃগ্রহোর্ভশ্ছন্দসি ইতি হকারস্য ভকারঃ কিন্তু পুচ্ছমেতদ্ বিপশ্চিদ্দেবতাবিশেষেণ হৃতং তৎপুচ্ছং ধাতা প্রজাপতিঃ পুনরাহরৎ আনীতবান্, যতোঽতঃ হে বিপশ্চিৎ! ত্বং পরঃ শ্রেষ্ঠঃ অদেহি আগচ্ছ অস্মিন্ কর্ম্মণি সন্নিহিতো ভব। যেন ত্বদধিষ্ঠানেন অয়ং পুমান্ জনিষ্যতে উৎপৎস্যতে অসৌ নামেতি দেবদত্তাভিধানঃ, পুচ্ছশব্দেন শিশ্নমভিধীয়তে শিশ্নলাঙ্গলয়োঃ পুচ্ছমিত্যাভিধানিকাঃ। পরেহীতি পরা শব্দস্যাকারলোপঃ ছান্দসত্বাৎ। সোষ্যন্তীহোমো গর্ভাধানভূতত্বাৎ কর্ম্মান্তরম্।

শ্রুতস্বাধ্যায়হীনেন ব্রাহ্মণেন বা অনাবৃত্তলোষ্ট্রেণ পিষ্টৌ ব্রীহিযবৌ দক্ষিণহস্তানামিকাঙ্গুষ্ঠাভ্যাং গৃহীত্বা—প্রজাপতিঋর্ষিরন্নংদেবতা ব্রীহিযবচূর্ণেন কুমারস্য জিহ্বামার্জ্জনে বিনিয়োগঃ। * ওঁ ইয়মাজ্ঞেদমন্ন-মিদমায়ুরিদমমৃতম্। (১) ইতি মন্ত্রেণ কুমারস্য জিহ্বাং পরিমার্ষ্টি। তত-স্তথৈব সুবর্ণেন ঘৃতং গৃহীত্বা—প্রজাপতিঋর্ষি-রনুষ্টুপ্ ছন্দো মিত্রাবরুণাগ্ন্য-শ্বিনো দেবতাঃ কুমারস্য সর্পিঃপ্রাশনে বিনিয়োগঃ। ওঁ মেধান্তে মিত্রাব-রুণৌ মেধামগ্নির্দধাতু তে। মেধাস্তে অশ্বিনৌ দেবাবাধত্তাং পুষ্করস্রজৌ স্বাহা। † (২) ইতি মন্ত্রেণ কুমারস্য মুখে ঘৃতং দদাতি। পুনরপি তথৈব সুবর্ণেন ঘৃতং গৃহীত্বা—প্রজাপতিঋর্ষির্গায়ত্রীচ্ছন্দ ইন্দ্রো দেবতা কুমারস্য সর্পিঃপ্রাশনে বিনিয়োগঃ। ওঁ সদসস্পতিমদ্ভুতং প্রিয়মিন্দ্রস্য কাম্যং। সনিং মেধা-মযাসিষং স্বাহা। (৩) ইতি মন্ত্রেণ কুমারস্য মুখে ঘৃতং দদাতি। নাভিং কৃন্তত স্তনঞ্চপ্রতিধত্তেতি পিতাব্রূয়াৎ। স্নানঞ্চ পুনঃ পিতান কুর্য্যাৎ। ইতি জাতকর্ম্ম সমাপ্তম্।

---

(১) হে বালক! ইদং প্রত্যক্ষমন্নম্ ইয়মাজ্ঞা প্রজ্ঞা আ সমন্তাৎকারেণ জ্ঞানহেতুত্বাৎ তথা ইদমায়ুঃ প্রাণকারণম্ ইদমমৃতং অনেন বিধিনোপ-ভুজ্যমানম্ অমরণধর্ম্মি তবাস্ত্বিতি বাক্যশেষঃ।

(২) হে বালক! মিত্রাবরুণৌ দেবতাবিশেষৌ তে তব মেধাং জ্ঞান-বিষয়াং শক্তিম্ আধত্তাং, তথা অশ্বিনৌ দেবৌ, কিম্ভূতৌ? পুষ্করস্রজৌ পদ্ম-মালালঙ্কৃতৌ তে তব মেধামাধত্তাং স্থাপয়তাং, তথা তে তব মেধামগ্নিঃ দধাতু স্ফারয়তু।

(৩) সদসঃ সভায়াঃ পতিং মুখ্যম্ অদ্ভুতং আশ্চর্য্যরূপং প্রিয়ম্ ইন্দ্রস্য বল্লভং কাম্যং অভীষ্টসম্পাদকং মেধাং ধীর্ধারণাবতী মেধা তস্যাঃ সনিং দাতারং সুরাচার্য্যমহম্ অযাসিষং শরণত্বেন অনেনাসৌ কুমারায় মেধাং দত্তাদিত্যা-শংসাবাক্যার্থঃ। সনিমিতি ছন্দসি বনসনরক্ষিমথামিতীন্। অযাসিষং যাতের্লুঙি সিপ্।

---

* যজুষ্ট্বাচ্ছন্দো নাস্তি।
কুত্রচিৎ স্বাহাপাঠো নাস্তি।

## অথ নামকরণম্

* যদ্যপি "জননাদ্দশরাত্রে ব্যুষ্টে শতরাত্রে সংবৎসরে বা নামধেয়করণম্" ইতি গৃহ্যবচনেন একাদশাহে নামকরণং প্রাপ্তং তথাপ্যাচারাৎ দ্বাদশাহে, একাধিকশতরাত্রে, জন্মদিনে বা নামকরণং কর্ত্তব্যম্। তত্র প্রথমং কৃতস্নানঃ কৃতবৃদ্ধিশ্রাদ্ধঃ পিতা † উদগগ্রেষু দর্ভেষু প্রাঙ্মুখ উপবিশ্য, পার্থিবনামানমগ্নিং সংস্থাপ্য, বিরূপাক্ষজপান্তাং কুশণ্ডিকাং সমাপ্য প্রকৃতকর্ম্মারম্ভে প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা, মহাব্যাহৃতিহোমং কুর্য্যাৎ। যথা—প্রজাপতিঋষির্গায়ত্রীচ্ছন্দোঽগ্নির্দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ ভূঃ স্বাহা। প্রজাপতিঋষিরুষ্ণিক্‌ছন্দো বায়ুর্দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ ভুবঃ স্বাহা। প্রজাপতিঋষিরনুষ্টুপ্ ছন্দঃ সূর্য্যো দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ স্বঃ স্বাহা। ততো মাতা শুচিনা বস্ত্রেণ কুমারমাচ্ছাদ্য, ভর্ত্তুর্দক্ষিণে স্থিত্বা, কুমার-মুত্তরশিরসং ভর্ত্রে সমর্পয়তি। ততো ভর্ত্তুঃ পৃষ্ঠদেশেন উত্তরস্যাং দিশি গত্বা, ভর্ত্তুর্বামপার্শ্বে উত্তরাগ্রেষু কুশেষু প্রাঙ্মুখী উপবিশতি। ততঃ পিতা "ওঁ প্রজাপতয়ে স্বাহা" ইতি সকৃদাজ্যাহুতিং হুত্বা, কুমারস্য জন্মতিথি-জন্মতিথিদেবতাহোমং ‡ জন্মনক্ষত্রজন্মনক্ষত্রদেবতাহোমঞ্চ কুর্য্যাৎ। যদি প্রতিপদি জাতস্তদা—ওঁ প্রতিপদে স্বাহা, ওঁ ব্রহ্মণে স্বাহা। যদি দ্বিতীয়ায়াং তদা—ওঁ দ্বিতীয়ায়ৈ স্বাহা, ওঁ ত্বষ্ট্রে স্বাহা। যদি তৃতীয়ায়াং তদা—ওঁ তৃতীয়ায়ৈ স্বাহা, ওঁ বিষ্ণবে

---

* সংস্কারা অতিপদ্যেরন্ স্বকালাচ্চেৎ কথঞ্চন। হুত্বৈতদেব কুর্ব্বীত যেতূপনয়নাদধঃ। এতদিতি মহাব্যাহৃতিহোমাদিপ্রায়শ্চিত্তম্ ইত্যর্থঃ। ইতি স্মার্ত্তবচনেন সংস্কারকর্ম্মণাং মুখ্যকালাতিক্রমে গৌণকালে প্রয়োগকালে আদৌ মহাব্যাহৃতিহোমস্য প্রায়শ্চিত্তরূপস্য কর্ত্তব্যতা প্রতীয়তে। তথা চ প্রায়শ্চিত্তহোমার্থং সঙ্কল্প্য অগ্নে ত্বং বিধুনামাসীতি নাম কৃত্বা আবাহ্য সম্পূজ্য তত্র সমিধং প্রক্ষিপ্য তিসৃভির্মহাব্যাহৃতিভির্হুত্বা ব্যস্তসমস্তাভিঃ প্রায়শ্চিত্তরূপাশ্চতস্র আহুতীর্হুত্বা পুনস্তিসৃভির্মহাব্যাহৃতিভির্হুত্বা সমিৎপ্রক্ষেপেণ প্রায়শ্চিত্তং কুর্য্যাৎ। ইতি সংস্কারতত্ত্বম্।

† অথ যস্তৎ করিষ্যন্ পশ্চাদগ্নেরুদগগ্রেষু দর্ভেষু প্রাঙুপবিশতি ইতি গোভিলসূত্রম্। অত্র য ইত্যনেন কশ্চিৎ পিতুরন্যোঽপি সংস্কৃতভ্রাত্রাদিঃ বোধ্যঃ অথেতি জাতগৃহনিয়মঃ, তথাচ বহ্বৃচাঃ তন্মধ্যে জুহুয়াৎ, যস্মিন্ জাতঃ স্যাৎ।

‡ তথাহি ছন্দোগপরিশিষ্টম্—নামধেয়ে মুনিবসুপিশাচা বহুবৎ সদা। যক্ষাশ্চ পিতরো দেবা যষ্টব্যাস্তিথিদেবতাঃ। তথা—আগ্নেয়াদ্যেঽথ সর্পাদ্যে বিশাখাদ্যে তথৈবচ। আষাঢ়াদ্যে ধনিষ্ঠাদ্যে অশ্বিন্যাদ্যে তথৈব চ। দ্বন্দ্বান্যেতানি বহুবদৃক্ষাণাং জুহুয়াৎ সদা। দ্বন্দ্বদ্বয়ং দ্বিবচ্ছেষমবশিষ্টাস্তথৈকবৎ ইত্যাত্তৈবচনৈঃ কচিৎ তিথিদেবতানাং নক্ষত্রদেবতানাঞ্চ দ্বিত্বেন বহুত্বেন চ প্রয়োগঃ অবগন্তব্যঃ।

স্বাহা। যদি চতুর্থ্যাং তদা—ওঁ চতুর্থ্যৈ স্বাহা, ওঁ যমায় স্বাহা। যদি পঞ্চম্যাং তদা—ওঁ পঞ্চম্যৈ স্বাহা, ওঁ সোমায় স্বাহা। যদি ষষ্ঠ্যাং তদা—ওঁ ষষ্ঠ্যৈ স্বাহা, ওঁ কুমারায় স্বাহা। যদি সপ্তম্যাং তদা—ওঁ সপ্তম্যৈ স্বাহা, ওঁ মুনিভ্যঃ স্বাহা। যদি অষ্টম্যাং তদা—ওঁ অষ্টম্যৈ স্বাহা, ওঁ বসুভ্যঃ স্বাহা। যদি নবম্যাং তদা—ওঁ নবম্যৈ স্বাহা, ওঁ পিশাচেভ্যঃ স্বাহা। যদি দশম্যাং তদা—ওঁ দশম্যৈ স্বাহা, ওঁ ধর্ম্মায় স্বাহা। যদি একাদশ্যাং তদা—ওঁ একাদশ্যৈ স্বাহা, ওঁ রুদ্রেভ্যঃ স্বাহা। যদি দ্বাদশ্যাং তদা—ওঁ দ্বাদশ্যৈ স্বাহা, ওঁ বায়বে স্বাহা। যদি ত্রয়োদশ্যাং তদা—ওঁ ত্রয়োদশ্যৈ স্বাহা, ওঁ কামায় স্বাহা। যদি চতুর্দ্দশ্যাং তদা—ওঁ চতুর্দ্দশ্যৈ স্বাহা, ওঁ যক্ষেভ্যঃ স্বাহা। যদি অমাবস্যায়াং তদা—ওঁ অমাবস্যায়ৈ স্বাহা, ওঁ পিতৃভ্যঃ স্বাহা। যদি পৌর্ণমাস্যাং তদা—ওঁ পৌর্ণমাস্যৈ স্বাহা, ওঁ বিশ্বেভ্যো দেবেভ্যঃ স্বাহা। যদি কৃত্তিকায়াং জাতস্তদা—ওঁ কৃত্তিকাভ্যঃ স্বাহা, ওঁ অগ্নয়ে স্বাহা। যদি রোহিণ্যাং তদা—ওঁ রোহিণীভ্যঃ স্বাহা, ওঁ প্রজাপতয়ে স্বাহা। যদি মৃগশিরসি তদা—ওঁ মৃগশিরসে স্বাহা, ওঁ সোমায় স্বাহা। যদি আর্দ্রায়াং তদা—ওঁ আর্দ্রায়ৈ স্বাহা, ওঁ রুদ্রায় স্বাহা। যদি পুনর্ব্বসৌ তদা—ওঁ পুনর্ব্বসবে স্বাহা, ওঁ অদিতয়ে স্বাহা। যদি পুষ্যায়াং তদা—ওঁ পুষ্যায়ৈ স্বাহা, ওঁ বৃহস্পতয়ে স্বাহা। যদি অশ্লেষায়াং তদা—ওঁ অশ্লেষাভ্যঃ স্বাহা ওঁ সর্পেভ্যঃ স্বাহা। যদি মঘায়াং তদা—ওঁ মঘাভ্যঃ স্বাহা, ওঁ পিতৃভ্যঃ স্বাহা। যদি পূর্ব্বফল্গুন্যাং তদা—ওঁ পূর্ব্বফল্গুনীভ্যাং স্বাহা, ওঁ ভগায় স্বাহা। যদি উত্তরফল্গুন্যাং তদা—ওঁ উত্তরফল্গুনীভ্যাং স্বাহা, ওঁ অর্য্যম্নে স্বাহা। যদি হস্তায়াং তদা—ওঁ হস্তায়ৈ স্বাহা, ওঁ সবিত্রে স্বাহা। যদি চিত্রায়াং তদা—ওঁ চিত্রায়ৈ স্বাহা, ওঁত্বষ্ট্রে স্বাহা। যদি স্বাত্যাং তদা—ওঁ স্বাত্যৈ স্বাহা, ওঁ বায়বে স্বাহা। যদি বিশাখায়াং তদা—ওঁ বিশাখাভ্যঃ স্বাহা, ওঁ ইন্দ্রাগ্নিভ্যাং স্বাহা। যদি অনুরাধায়াং তদা—ওঁ অনুরাধাভ্যঃ স্বাহা, ওঁ মিত্রায় স্বাহা। যদি জ্যেষ্ঠায়াং তদা—ওঁজ্যেষ্ঠায়ৈ স্বাহা, ওঁ ইন্দ্রায় স্বাহা। যদি মূলায়াং তদা—ওঁ মূলায়ৈ স্বাহা, ওঁ নির্ঋতয়ে স্বাহা। যদি পূর্ব্বাষাঢ়ায়াং তদা—ওঁ পূর্ব্বাষাঢ়াভ্যঃ স্বাহা, ওঁ অদ্ভ্যঃ স্বাহা। যদি উত্তরাষাঢ়ায়াং তদা—ওঁ উত্তরাষাঢ়াভ্যঃ স্বাহা, ওঁ বিশ্বেভ্যো দেবেভ্যঃ স্বাহা। যদি শ্রবণায়াং তদা—ওঁ শ্রবণায়ৈ স্বাহা ওঁ বিষ্ণবে স্বাহা। যদি ধনিষ্ঠায়াং তদা—ওঁধনিষ্ঠাভ্যঃ স্বাহা ওঁ বসুভ্যঃ স্বাহা। যদি শতভিষায়াং তদা—ওঁ শতভিষাভ্যঃ স্বাহা, ওঁ বরুণায় স্বাহা। যদি পূর্ব্বভাদ্রপদায়াং তদা—ওঁ পূর্ব্বভাদ্রপদাভ্যাং স্বাহা, ওঁ অজৈকপাদায় স্বাহা।

যদি উত্তরভাদ্রপদায়াং তদা—ওঁ উত্তরভাদ্রপদাভ্যাং স্বাহা, ওঁ অহির্ব্রধ্নাভ্যাং স্বাহা। যদি রেবত্যাং তদা—ওঁ রেবত্যৈ স্বাহা, ওঁ পূষ্ণে স্বাহা। যদি অশ্বিন্যাং তদা—ওঁ অশ্বিনাভ্যঃ স্বাহা, ওঁ অশ্বিনীকুমারাভ্যাং স্বাহা। যদি ভরণ্যাং তদা—ওঁ ভরণীভ্যঃ স্বাহা, ওঁ যমায় স্বাহা। * ততঃ পিতা কুমারস্য মুখনাসিকানেত্রশ্রোত্রাণি দক্ষিণপাণিনা স্পৃশন্ জপতি। দ্বয়োর্মন্ত্রয়োর্ঋষ্যাদয়ঃ সাধারণাঃ। প্রজাপতির্ঋষিরাদিত্যো দেবতা নামকরণে বিনিয়োগঃ। ওঁ কোঽসি কতমোঽসি। এষোঽস্যমৃতোঽসি। আহস্পত্যং মাসং প্রবিশাসৌ (১) অসাবিতিপদং সম্বোধনান্তং কুমারনাম গৃহ্লাতি। শ্রীঅমুকদেবশর্ম্মন্নিতি। ওঁ স ত্বাহ্নে পরিদদাত্বহস্ত্বা রাত্র্যৈ পরিদদাতু রাত্রিস্ত্বাহোরাত্রাভ্যাং পরিদদাত্বহোরাত্রে ত্বার্দ্ধমাসেভ্যঃ পরিদত্তামর্দ্ধমাসাস্ত্বা মাসেভ্যঃ পরিদদতু মাসাস্ত্বর্তুভ্যঃ পরিদদত্বৃতবস্ত্বা সংবৎসরায় পরিদদতু, সংবৎসরস্ত্বায়ুষে জরায়ৈ পরিদদাতু

---

(১) হে দেবদত্ত! কোঽসি কস্ত্বং ভবসি স্বরূপপ্রশ্নঃ, কতমোঽসি কতমস্ত্বং ভবসি জাতিপরিপ্রশ্নঃ, এষোঽসি প্রত্যক্ষনির্দ্দেশঃ, অমৃতোঽসি অমৃতনামা অবিনাশী ভবসি। যতস্ততঃ আহস্পত্যং অহস্পতেরাদিত্যস্যায়ং মাসঃ ইত্যর্থঃ সংক্রান্তিচিহ্নিতং মাসং প্রবিশ প্রাপ্ন হি অহস্পতেরিদমিত্যর্থঃ, তত্র প্রবিশ্য যৎফলং তৎ ক্রমেণ দর্শয়ন্নাহ ওঁ সত্বাহ্নে ইতি।

---

* রাশ্যনুসারেণ নামাদ্যক্ষরাণি যথা—
অ লো মেষে, উ বো বৃষে, ক ছো মিথুনে, ড হো কর্কটে, ম টো সিংহে, প ঠো কন্যায়াং, র তো তুলায়াং, ন যো বৃশ্চিকে, ধ ভো ধনুষি, খ জো মকরে, গ শো কুম্ভে, দ চো মীনে।

শতপদচক্রে জন্মনক্ষত্রপাদানুসারেণ নামাদ্যক্ষরাণি যথা—

চু চে চো ল অশ্বিনী, লি লু লে লো ভরণী, অ ই উ এ কৃত্তিকা, ও ব বি বু রোহিণী, বে বো ক কি মৃগশিরা, কু ঘ ঙ ছ আর্দ্রা, কে কো হ হি পুনর্ব্বসুঃ, হু হে হো ড পুষ্যা, ডি ডু ডে ডো অশ্লেষা, ম মি মু মে মঘা, মো ট টি টু পূর্ব্বফল্গুনী, টে টো প পি উত্তরফল্গুনী পূ ষ ণ ঠ হস্তা, পে পো র রি চিত্রা, রু রে রো ত স্বাতী, তি তু তে তো বিশাখা, ন নি নু নে অনুরাধা, নো য যি যু জ্যেষ্ঠা, যে যো ভ ভি মূলা, ভু ধ ফ ঢ পূর্ব্বাষাঢ়া, ভে ভো জ জি উত্তরাষাঢ়া, খি খু খে খো শ্রবণা, গ গি গু গে ধনিষ্ঠা, গো শ শি শু শতভিষা, শে শো দ দি পূর্ব্বভাদ্রপদ, দু থ ঝ ঞ উত্তরভাদ্রপদ, দে দো চ চি রেবতী।

হ্রস্বেন দীর্ঘো জ্ঞেয়ঃ শকারেণ সকারো বর্ত্তব্যঃ অকারান্তানি বকারান্তানি নামানি ভবন্তি।

অসৌ। (২) অসাবিতি কুমারনাম গ্রহীতব্যম্। ততঃ পিতা কুমারস্য মাতু-র্বামকর্ণে "ওঁ শ্রীঅমুকদেবশর্ম্মায়ং তে পুত্রঃ" ইতি নাম কথয়িত্বা, কুমারস্য দক্ষিণকর্ণে "ওঁ শ্রীঅমুকদেবশর্ম্মাসি" ইতি নাম কথয়তি। ততো মাত্রে কুমারং দত্ত্বা, পূর্ব্ববৎ মহাব্যাহৃতিহোমং কৃত্বা, (৪২ পৃঃ) প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা সর্ব্বকর্ম্মসাধারণং শাট্যায়নহোমাদি-বামদেব্যগানান্তমুদীচ্যং কর্ম্ম সমাপ্য কর্ম্মকারয়িতৃব্রাহ্মণায় দক্ষিণাং দদ্যাৎ।

ইতি নামকরণম্।

## অথ নিষ্ক্রমণম্ *

তত্র জাতে কুমারে যস্তৃতীয়ঃ জ্যোৎস্নস্তস্য তৃতীয়ায়াস্তিথৌ প্রাতঃ কুমারং স্নাপয়িত্বা সায়ংসন্ধ্যায়ামতীতায়াং চন্দ্রাভিমুখঃ কৃতাঞ্জলিঃ পিতা-বতিষ্ঠেত। মাতা শুচিনা বস্ত্রেণ কুমারমাচ্ছাদ্য, দক্ষিণস্যাং দিশি স্থিত্বা উত্তরশিরসং কুমারং পিত্রে সমর্পয়তি। ততো ভর্ত্তুঃ পৃষ্ঠদেশেন উত্তরস্যাং

---

(২) অসাবিত্যামন্ত্রণপদম্। হেদেবদত্ত। সোঽহস্পতিঃ সূর্য্যস্ত্বা ত্বাং অহ্নে দিবসায় পরিদদাতু সমর্পয়তু সম্বর্দ্ধনায় ইতি যাবৎ। শতায়ুস্ত্বম্। বিশেষ্যস্য মাসস্য বিশেষণভূতোঽপি অহস্পতিঃ অত্র প্রাধান্যাৎ স ইত্যনেন প্রত্যবমৃষ্যতে, শেষং সুগমম্।

---

* অত্রেদং বোধ্যম্—জননাদ্দশরাত্রে ব্যুষ্টে শতরাত্রে সম্বৎসরে বা নামধেয়করণমিতি গোভিলসূত্রাৎ একাদশে দ্বাদশে বাঽহনি পিতা নাম কুর্য্যাৎ ইতি শ্রুতেশ্চ যদ্যপি জননাদেকাদশদিবসস্য নামধেয়ে মুখ্যতমনিমিত্তত্বাৎ দ্বাদশদিনাদিপূর্ব্বপূর্ব্বকালস্য পরপরকালাপেক্ষয়া প্রশস্তত্বমবগম্যতে, তথাপি দৈবাম্মানুষাদ্বা অন্তরায়াৎ একাদশেঽহনি নামকরণবাধে মুখ্যকালে নিষ্ক্রমণস্য চাদরে জাতকর্ম্মানন্তরং নিষ্ক্রমণং কৃত্বা নামধেয়ং কর্ত্তব্যমিতি। অতএব গোভিলেন ভবদেবভট্টেন গুণবিষ্ণুনা চ জাতকর্ম্মানন্তরং নিষ্ক্রমণং ততশ্চ নামকরণং লিখিতম্। স্মার্ত্তেন তু নামধেয়ে একাদশাহমাত্রস্য মুখ্যকালত্বকংসংস্কারকর্ম্মণাঞ্চ নিয়তক্রমত্বমনুরুধ্য জাতকর্ম্মানন্তরং নামকরণং লিখিতম্। জাতকর্ম্মনামকরণনিষ্ক্রমণানাং মুখ্যকালেঽকরণে অন্নপ্রাশনকালে কর্ত্তব্যত্বম্ তস্য গৌণকালত্বাৎ, তত্র জাতকর্ম্মানন্তরং নামকরণং কৃত্বা নিষ্ক্রমণং কার্য্যং সর্ব্বেষাং মুখ্যকালবাধাৎ। পারস্করাশ্বলায়নমতে সর্ব্বথৈব জাতকর্ম্মানন্তরং নামকরণস্য কর্ত্তব্যতা। ইতি। অত্র গুণবিষ্ণুঃ—নামকরণস্যানিয়তকালত্বাৎ ক্রমস্যাবিবক্ষিতত্বাচ্চ প্রাক্ নিষ্ক্রমণমভিহিতবান্। অত্র মাতৃপূজাদ্যনন্তরং বৃদ্ধিশ্রাদ্ধং কর্ত্তব্যং সর্ব্বাণ্যেবাম্বাহার্য্যবন্তি ইতি গোভিলসূত্রেণ গৃহ্যোক্তকর্ম্মণামাদৌ তস্য বিহিতত্বাৎ। তথাহি—ষন্মাম্মাতং স্বশাখায়াং পরোক্তমবিরোধি চ। বিদ্বদ্ভিস্তদনুষ্ঠেয়মিত্যনেনান্যবেদীয়নিষ্ক্রমণে অভিহিতনান্দীমুখশ্রাদ্ধস্য কর্ত্তব্যতাবোধাচ্চ। স্মার্ত্তেন চ এতস্য স্বহস্তিত্বাৎ।

দিশি গত্বা উর্দ্ধ্বা তিষ্ঠেৎ—ততঃ পিতা অমূন্ মন্ত্রান্ জপতি।—প্রজাপতির্ঋষি-রনুষ্টুপ্ ছন্দশ্চন্দ্রো দেবতা কুমারস্য চন্দ্রদর্শনে বিনিয়োগঃ। ওঁ যত্তে সুসীমে হৃদয়ং হিতমন্তঃ প্রজাপতৌ। বেদাহং মন্যে তদ্ব্রহ্ম মাহং পৌত্রমঘং নিগাং ॥ (১) প্রজাপতির্ঋষিরনুষ্টুপ্ ছন্দশ্চন্দ্রো দেবতা কুমারস্য চন্দ্রদর্শনে বিনিয়োগঃ। ওঁ যৎ পৃথিব্যামনামৃতং দিবি চন্দ্রমসি শ্রিতম্। বেদামৃতস্যাহং নাম, মাহং পৌত্রমঘং রিষং। (২) প্রজাপতির্ঋষিরনুষ্টুপ্ ছন্দ ইন্দ্রাগ্নী দেবতে কুমারস্য চন্দ্রদর্শনে বিনিয়োগঃ। ওঁ ইন্দ্রাগ্নী শর্ম্ম যচ্ছতং প্রজায়ৈ মে প্রজাপতী যথায়ং ন প্রমীয়েত পুত্রো জনিত্র্যা অধি। (৩) ইতি জপ্ত্বা কুমারং চন্দ্রং দর্শয়তি। ততঃ পিতা তথাভূতমেব কুমারম্ উত্তরশিরসং মাত্রে দত্ত্বা, চন্দ্রায় অর্ঘ্যং দদ্যাৎ। যথা—ওঁ ক্ষীরোদার্ণবসম্ভূত অত্রিনেত্রসমুদ্ভব। গৃহাণার্ঘ্যং শশাঙ্কেদং রোহিণ্যা সহিতো মম ॥ ইদমর্ঘ্যং ওঁ চন্দ্রায় নমঃ। ততো নমস্কুর্য্যাৎ। (ওঁ জ্যোৎস্নায়াঃ পতয়ে তুভ্যং জ্যোতিষাং পতয়ে নমঃ। নমস্তে রোহিণীকান্ত

---

(১) হে চন্দ্র! যৎ তে তব অন্তঃ মধ্যে, কিম্ভূতে? সুসীমে অতিশীতলে। পুনস্তদেব বিশিনষ্টি—প্রজাপতৌ প্রজানাম্ আনন্দজনকত্বেন পত্যৌ হিতং নিহিতং হৃদয়ম্ অর্পিতং ব্রহ্মস্থানং তদ্ব্রহ্ম আত্মা তৎস্থানত্বাৎ অহং বেদ জানামি, তন্মধ্যে এবমেবেতি অহং মন্যে যস্মাৎ তস্মাৎ পৌত্রমঘং পুত্রসম্বন্ধি পাপম্ অরিষ্টং ব্যাধিবিনাশাদিরূপং মা গাং ন গচ্ছেয়মাপ্নুয়ামিতি যাবৎ। এতদুক্তং ভবতি—যদহং ব্রহ্মবিৎ তস্মান্মমানিষ্টসম্বন্ধো নাস্তীয়ং প্রার্থনা সপ্তম্যর্থে পঞ্চমী সর্ব্ববিভক্তীনামপবাদস্মরণাৎ।

(২) যৎ পৃথিব্যাম্ অনামৃতং অমৃতসদৃশং দিবি দ্যুলোকে চন্দ্রমসি শ্রিতং আশ্রিতং তদহং অমৃতস্য নাম বেদ জানামি, যতঃ অতোঽহং পৌত্রমঘং পুত্র-সম্বন্ধি পাপং শোকং মা রিষং ন গচ্ছামি ইতি, রিষী গতৌ। অনামৃতমিতি অমৃতসদৃশমিত্যর্থঃ। সাদৃশ্যে নঞ্ ছান্দসত্বাদ্দীর্ঘঃ। অঘং রিষমিতি রিষী গতৌ ছান্দসত্বাৎ মিপোঽপি মিকারোঽনুস্বারঃ।

(৩) হে ইন্দ্রাগ্নী! যুবাং মে মম প্রজায়ৈ পুত্রায় শর্ম্ম সুখং যচ্ছতং দত্তং যথা যেন প্রকারেণায়ং বালকঃ জনিত্র্যা জনন্যা অধি তৎসঙ্গেন ন প্রমীয়েত ন হিংস্যেত। কিম্ভূতাবিন্দ্রাগ্নী? প্রজাপতী লোকপালৌ, মীঙ্ হিংসায়াং প্রমীয়েতেতি।

সুধাবাস নমোঽস্তু তে। নভোমণ্ডলদীপায় শিরোরত্নায় ধূর্জ্জটেঃ। কলাভির্ব্বর্দ্ধমানায় নমশ্চন্দ্রায় চারবে) ॥ ইতি। ততঃ পিতা জলাঞ্জলিং গৃহীত্বা— প্রজাপতির্ঋষিরনুষ্টুপ্ ছন্দশ্চন্দ্রো দেবতা চন্দ্রোপস্থানে বিনিয়োগঃ। ওঁ যদদশ্চন্দ্রমসি কৃষ্ণং পৃথিব্যা হৃদয়ং শ্রিতম্। তদহং বিদ্বাংস্তৎ পশ্যন্ মাহং পৌত্রমঘং রুদং। (৪) ইতি পঠিত্বা জলাঞ্জলিং ত্যজেৎ তূষ্ণীং বারদ্বয়ম্। ততো বামদেব্যং গীত্বাঽচ্ছিদ্রমবধার্য্য গৃহং প্রবিশেদিতি। এতচ্চ নিষ্ক্রমণকর্ম্মাঙ্গভূতমুদীচ্যং পত্নীপুত্রোপাদানবিরহাৎ প্রবাসিনাঽপি কর্ত্তব্যম্। ইতি নিষ্ক্রমণং কর্ম্ম সমাপ্তম্।

## অথ কুমারস্য পৌষ্টিকং কর্ম্ম

পিতা—বিষ্ণুরোম্ তৎসৎ অদ্য অমুকমাসি অমুকরাশিস্থে ভাস্করে অমুকে পক্ষে অমুকতিথৌ অমুকগোত্রঃ শ্রীঅমুকদেবশর্ম্মা অমুকগোত্রস্য মৎপুত্রস্য শ্রীঅমুকদেবশর্ম্মণঃ পুষ্টিকামঃ পৌষ্টিকং কর্ম্মাহং কুর্ব্বীয়—ইতি সঙ্কল্প্য বলদনামানমগ্নিং সংস্থাপ্য, প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা, মহাব্যাহৃতিহোমং কুর্য্যাৎ। (৪২ পৃঃ) ততঃ ওঁ ইন্দ্রাগ্নিভ্যাং স্বাহা, ওঁ দ্যাবাপৃথিবীভ্যাং স্বাহা, ওঁ বিশ্বেভ্যো দেবেভ্যঃ স্বাহা,ইত্যাহুতিত্রয়ং দদ্যাৎ। ততো নামকরণোক্তক্রমেণ জন্মতিথি-তত্তদ্দেবতা-জন্মনক্ষত্র-তত্তদ্দেবতাহোমং (৬১ পৃঃ ১৫ পুং) কুর্য্যাৎ। ততো মহাব্যাহৃতিহোমং কৃত্বা প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ জুহুয়াৎ। ইতি কুমারস্য পৌষ্টিকং কর্ম্ম সমাপ্তম্।

## অথ অন্নপ্রাশনম্

তত্র ষষ্ঠে অষ্টমে বা মাসি পুংসঃ, স্ত্রিয়াস্তু পঞ্চমে সপ্তমে বা মাসি শুভে দিনে পিতা কৃতবৃদ্ধিশ্রাদ্ধঃ শুচিনামানমগ্নিং সংস্থাপ্য বিরূপাক্ষজপান্তাং কুশণ্ডিকাং সমাপ্য প্রকৃতকর্ম্মারম্ভে প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা, মহাব্যাহৃতিহোমং (৪২ পৃঃ)কুর্য্যাৎ। ততঃ—প্রজাপতির্ঋষির্গায়ত্রীচ্ছন্দ আদিত্যো

---

(৪) অদ এতৎ চন্দ্রমসি কৃষ্ণং লাঞ্ছনং পৃথিব্যা হৃদয়ং শ্রিতং আশ্রিতং কৃষ্ণনীলিমরূপং তদহং বিদ্বান্ তদেব পশ্যন্ ঈক্ষমাণঃ দৃষ্টবানিত্যর্থঃ, যত এবমতোঽহং পৌত্রমঘং পুত্রসম্বন্ধি শোকং প্রাপ্য মা রুদং মা রোদিমীত্যর্থঃ।

দেবতা পুরুষাধিপত্যকামস্য চতুষ্পথেঽগ্নাবাদিত্যাভিমুখস্য আজ্যহোমে বিনিয়োগঃ। ওঁ অন্নং বা একচ্ছন্দস্যমন্নং হ্যেকং ভূতেভ্যশ্ছন্দয়তি স্বাহা। (১) প্রজাপতির্ঋষিরাদিত্যো দেবতা পুরুষাধিপত্যকামস্য চতুষ্পথেঽগ্নাবাদিত্যাভিমুখস্য আজ্যহোমে বিনিয়োগঃ। * ওঁ শ্রীর্বা এষা যৎ সত্বানো বিরোচনো ময়ি সত্বমবদধাতু স্বাহা। (২) প্রজাপতির্ঋষির্বৃহতীচ্ছন্দ আদিত্যো দেবতা পুরুষাধিপত্যকামস্য চতুষ্পথেঽগ্নাবাদিত্যাভিমুখস্য আজ্যহোমে বিনিয়োগঃ। ওঁ অন্নস্য ঘৃতমেব রসস্তেজঃসম্পৎকামো জুহোমি স্বাহা। (৩) প্রজাপতির্ঋষিঃ ক্ষুদ্দেবতা বৃত্ত্যবিচ্ছিত্তিকামস্য সায়ংপ্রাতঃ ক্ষুদ্ধোমে বিনিয়োগঃ। † ওঁ ক্ষুধে স্বাহা। প্রজাপতির্ঋষিঃ ক্ষুৎপিপাসে দেবতে বৃত্ত্যবিচ্ছিত্তিকামস্য সায়ংপ্রাতঃ ক্ষুত্তৃড্ঢোমে বিনিয়োগঃ। ওঁ ক্ষুৎপিপাসাভ্যাং স্বাহা। ওঁ প্রাণায় স্বাহা। ওঁ অপানায় স্বাহা। ওঁ সমানায় স্বাহা। ওঁ উদানায় স্বাহা। ওঁ ব্যানায় স্বাহা। ইত্যাজ্যাহুতীর্জুহুয়াৎ। ততো মহাব্যাহৃতিহোমং কৃত্বা (৪২ পৃঃ) প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা, সর্ব্বকর্ম্মসাধারণং শাট্যায়নহোমাদিবামদেব্যগানান্তম্ উদীচ্যং কর্ম্ম (১৫ পৃঃ ১২ পং) সমাপ্য, অনেন মন্ত্রেণ কুমারস্য মুখে অন্নং দদ্যাৎ। প্রজাপতির্ঋষির্বৃহতীচ্ছন্দোঽন্নপতির্দেবতা কুমারস্যান্নপ্রাশনে

---

(১) অন্নং বৈ কিল একচ্ছন্দস্যং একং প্রধানং ছন্দঃ ত্রয়াত্মকত্বেনামোদাদিত্যর্থঃ একচ্ছন্দস্তত্রভবমেকচ্ছন্দস্যং কিন্তৎ অন্নং হি যস্মাৎ এবম্ ভূতেভ্যঃ ভূতানাং তৃপ্ত্যর্থং ছন্দয়তি বর্ত্তয়তে। অয়মর্থঃ—যথা আদিত্যস্য রশ্মিজালং বৃষ্ট্যম্ভসা লোকে ছন্দয়তি আবৃণোতি তথা অন্নমপি মমাদিত্যপ্রসাদাৎ বহুতরং ভবতু যেনাহং পুরুষেষু অধিপতির্ভবামি। একচ্ছন্দস্যমিতিভবে ছন্দসীতি যৎ।

২। শ্রীঃ বৈ কিল এষা প্রত্যক্ষা, কিং যৎ সত্বানঃ ঈশ্বরাঃ তেষু মধ্যে বিরোচনঃ আদিত্যঃ ময়ি সত্বং আধিপত্যং অবদধাতু, অর্পয়তু সত্বান ইতি সচ্ছব্দান্মত্বর্থে ছন্দসী বনিপৌ চ বক্তব্যৌ ইতি বনিপ্।

৩। অন্নস্য ঘৃতমেব রসঃ সারঃ তথা চ যদঘৃতং তদভোজনমিতি জনপ্রবাদঃ। তেজঃ সম্পদাধিপত্যং তৎ কাময়মানোঽহং ঘৃতং জুহোমি স্বাহা।

---

* যজুরিদম্ ছন্দো নাস্তি।

† যজুষ্ট্বাদত্র পরত্র চ ছন্দো নাস্তি।

বিনিয়োগঃ। ওঁ অন্নপতেঽন্নস্য নো দেহ্যনমীবস্য শুষ্মিণঃ। * প্রপ্রদাতারং তারিষ উর্জ্জং নো ধেহি দ্বিপদে চতুষ্পদে স্বাহা। (৪) ততঃ কর্ম্মকারয়িতৃ-ব্রাহ্মণায় দক্ষিণাং দদ্যাৎ। ইতি অন্নপ্রাশনম্ সমাপ্তম্।

## অথ পুত্রমূর্দ্ধাভিঘ্রাণম্

তত্র পিতা পূর্ব্বাভিমুখো হস্তাভ্যাং পুত্রস্য মূর্দ্ধানম্ উপসংগৃহ্য মন্ত্রত্রয়ং জপতি—প্রজাপতিঋ'ষিরনুষ্টুপ্ ছন্দঃ প্রজাপতির্দেবতা পুত্রস্য মূর্দ্ধানমুপসংগৃহ্য জপে বিনিয়োগঃ। ওঁ অঙ্গাদঙ্গাৎ সংস্রবসি হৃদয়াদধিজায়সে। প্রাণস্তে প্রাণেন সংদধামি. জীব মে যাবদায়ুষং॥ (১) ওঁ অঙ্গাদঙ্গাৎ সংভবসি, হৃদয়াদধিজায়সে। বেদো বৈ পুত্রনামাসি, স জীব শরদঃ শতং॥ (২) ওঁ অশ্মা ভব পরশুর্ভব হিরণ্যমমৃতং ভব। আত্মাসি পুত্র মা মৃথাঃ স জীব

৪। হে অন্নপতে! সূর্য্য! "আদিত্যাজ্জায়তে বৃষ্টির্বৃষ্টেরন্নং ততঃ প্রজা" ইতি স্মৃতেঃ, অন্নস্য অদনীয়স্য অনমীবস্য আরোগ্যকরস্য শুষ্মিণঃ অগ্নি-বৃদ্ধিকরস্য উর্জ্জং বলং নো অস্মভ্যং দেহি অর্পয়, কিঞ্চ অন্নস্য প্রদাতারং প্রতারিষ আয়ুর তথা নো অস্মাকং দ্বিপদে মনুষ্যাদৌ চতুষ্পদে গবাদৌ (শং কল্যাণং) ধেহি, অমীব ইতি রোগ উচ্যতে, তারিষ ইতি তৃপ্লবনতরণয়োঃ অন্তর্ভূতণ্যর্থাৎ প্রার্থনায়াং লিঙর্থে লেট্ সিপ্ 'লেটোঽডাটৌ' ইতি অট্ 'সিব্ বহুলং লেটি' ইতি সিপ্ ইট্ ইতশ্চ লোপঃ পরস্মৈপদেষিতি ইকারলোপঃ সকারস্য রুত্ব-যত্ব-য-লোপাঃ।

১। হে পুত্রক! ত্বং মে মম অঙ্গাৎ অঙ্গাৎ শিরোগ্রীবাদিভ্যঃ সংস্রবসি সংক্রন্তো ভবসি প্রবাহধাতুরূপতয়া বিনিঃসৃতোঽসীত্যর্থঃ। তথা হৃদয়া-দধিজায়সে ইতি হৃদয়াৎ সর্ব্বগাত্রশ্রেষ্ঠাৎ অধিজায়সে উৎপন্নোঽসি ছান্দ-সত্বাৎ অতীতবিষয়েঽপ্যেতৎ পদদ্বয়ং বর্ত্তমানে নির্দ্দিশ্যতে। তদিখংভূতো-ঽসি অতস্তে তব প্রাণং প্রাণবায়ুং মুখনাসিকাভ্যাং নিঃসরণরূপং প্রাণে-নৈব সন্দধামি ধারয়ামি সন্ততং অনবচ্ছিন্নং করোমি তৎসন্ধানাৎ যাবদায়ুষং বর্ষশতং যাবত্ত্বং জীব, শতায়ুর্বৈ পুরুষ ইতি শ্রুতেঃ। যাবদায়ুষমিত্যব্যয়ী-ভাবে শরৎ প্রভৃতিভ্য ইত্যচ্।

২। হে পুত্র! শরদঃ শতংবর্ষাণি জীব, যতস্ত্বং বেদোঽসি বেদস্যাধ্যেতা ভবসি গৌর্বাহিক ইতিবৎ গৌণপ্রয়োগঃ। অতএব উপনীতস্য এব কার্য্য-মেতৎ শেষং পূর্ব্ববদ্ব্যাখ্যেয়ম্।

* প্রদাতারমিতি পাঠান্তরম্। শমিতি সংহিতায়াং ন দৃষ্টম্।

শরদঃ শতম্॥ (৩) ততঃ অনেন মন্ত্রেণ পুত্রস্য শিরঃ পিতা জিঘ্রতি—প্রজাপতির্ঋষিঃ প্রজাপতির্দেবতা পুত্রস্য মূর্দ্ধাভিঘ্রাণে বিনিয়োগঃ। * ওঁ পশূনাং ত্বা হিঙ্কারেণাভিজিঘ্রামি শ্রীঅমুকদেবশর্ম্মন্। (৪)

ইতি পুত্রমূর্দ্ধাভিঘ্রাণং সমাপ্তম্।

## অথ চূড়াকরণম্

কুলাচারবশাৎ প্রথমে তৃতীয়ে বা বর্ষে চূড়াকরণং কর্ত্তব্যম্। তত্র প্রথমং প্রাতঃকৃতস্নানঃ কৃতবৃদ্ধিশ্রাদ্ধঃ পিতা সত্যানামানমগ্নিং সংস্থাপ্য, বিরূপাক্ষজপান্তাং কুশণ্ডিকাং সমাপ্য, অগ্নের্দক্ষিণতঃ একবিংশতিদর্ভপিঞ্জলীঃ সপ্তসপ্তভিরেকীকৃত্য কুশান্তরেণ বেষ্টয়িত্বা, উষ্ণোদক-সহিতং কাংস্যপাত্রং, তাম্রনির্ম্মিতং ক্ষুরং তদভাবে দর্পণং বা, লৌহক্ষুরপাণিং নাপিতঞ্চ; অগ্নেরুত্তরতো বৃষগোময়ং, তিল-তণ্ডুল-মাষসিদ্ধঞ্চ কৃসরম্, অগ্নেঃ পূর্ব্বতঃ মিশ্রিত-ব্রীহিযবপূরিত-পাত্রত্রয়ং, তিলমাষপূরিত-পাত্রত্রয়ঞ্চ স্থাপয়েৎ। ততো মাতা শুচিনা বস্ত্রেণ কুমারমাচ্ছাদ্য, ক্রোড়ে নিধায়, অগ্নেঃ পশ্চিমতো ভর্ত্তুর্বামপার্শ্বে উত্তরাগ্রেষু কুশেষু প্রাঙ্মুখী উপবিশতি। ততঃ পিতা প্রকৃতকর্ম্মারম্ভে প্রাদেশ-প্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা, ব্যস্তসমস্ত-মহাব্যাহৃতিহোমং কুর্য্যাৎ। যথা—প্রজাপতির্ঋষির্গায়ত্রীছন্দোঽগ্নির্দেবতা মহাব্যাহৃতি-হোমে বিনিয়োগঃ। ওঁ ভূঃ স্বাহা। প্রজাপতির্ঋষিরুষ্ণিক্ ছন্দো বায়ুর্দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ ভুবঃ স্বাহা। প্রজাপতির্ঋষিরনুষ্টুপ্ ছন্দঃ সূর্য্যো দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ স্বঃ স্বাহা। প্রজাপতির্ঋষির্বৃহতীচ্ছন্দঃ প্রজাপতির্দেবতা (সমস্ত) মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ

---

৩। হে পুত্র! স ত্বং অশ্মা ভব পাষাণো ভব পাষাণবৎ দৃঢ়ো নির্ব্যাধির্ভব, পরশুঃ কুঠার ইব ছেদকো ভব তীক্ষ্ণো ভব ন তু ছেদ্যঃ তথা হিরণ্যং ভব সুবর্ণং ভব, অন্যৈস্তাম্রাদিভিরপদ্রব্যৈরনাচ্ছাদিতং যন্ন ভবতি, অমৃতং ভব অবিনাশী নাকালে মরিষ্যসি। আত্মাসীতি আত্মা নিত্য ইব ত্বং মা মৃথাঃ মা মরিষ্যসি অতঃ শরদঃ শতং জীব।

৪। হে পুত্র! ত্বা ত্বাং অহং পিতা অভিজিঘ্রামি মূর্দ্ধ্নি চুম্বামি, পশূনাং গবাং হিঙ্কারেণ হুংকৃতেন। এতদুক্তং ভবতি যথা গাবোঽরণ্যাদৌ গত্বা বৎসান্নাভিমুখ্যেন জিঘ্রন্তি, তথা অহমপি ত্বামিত্যর্থঃ।

---

* যজুর্ব্বাহ্মণো নাস্তি।

ভূর্ভুবঃস্বঃ স্বাহা। ততঃ পিতা উত্থায়, প্রাঙ্মুখঃ কুমারস্য মাতুঃ পশ্চাদবস্থিতঃ, ক্ষুরপাণিং নাপিতং পশ্যন্, তমেব সবিতৃরূপং ধ্যায়ন্ জপতি—প্রজাপতিঋষিঃ সবিতা দেবতা চূড়াকরণে বিনিয়োগঃ। * ওঁ আয়মগাৎ সবিতা ক্ষুরেণ। (১) তত উষ্ণোদকসহিতং কাংস্যপাত্রং পশ্যন্, বায়ুং মনসা ধ্যায়ন্ জপতি—প্রজাপতিঋষির্বায়ুর্দেবতা চূড়াকরণে বিনিয়োগঃ। ওঁ উষ্ণেন বায় উদকেনৈধি। (২) ততঃ কাংস্যপাত্রস্থিতোষ্ণোদকেন দক্ষিণ-হস্তগৃহীতেন কুমারস্য দক্ষিণ-কপুষ্ণিকাদেশমনেন মন্ত্রেণ ক্লেদয়তি। কপুষ্ণিকা-শব্দেন দক্ষিণোত্তরতঃ শিখাস্থানাদধঃ শিরস উভয়পার্শ্বস্থঃ কর্ণাভিমুখোচ্চদেশ উচ্যতে। প্রজাপতিঋষিরাপো দেবতাশ্চূড়াকরণে বিনিয়োগঃ। ওঁ আপ উন্দন্তু জীবসে। (৩) ততঃ তাম্রক্ষুরং তদভাবে দর্পণং বা পশ্যন্ জপতি—প্রজাপতিঋষির্বিষ্ণুর্দেবতা চূড়াকরণে বিনিয়োগঃ। ওঁ বিষ্ণোর্দংষ্ট্রোঽসি। (৪) ততঃ কুশবদ্ধ-সপ্তদর্ভপিঞ্জলীর্গৃহীত্বা † ক্লিন্নদক্ষিণ-কপুষ্ণিকাদেশে অনেন মন্ত্রেণ উর্দ্ধমূলা নিদধ্যাৎ—প্রজাপতিঋষিরোষধির্দেবতা চূড়াকরণে বিনিয়োগঃ। ওঁ ওষধে ত্রায়স্বৈনং। (৫) ততো বামহস্তগৃহীত-দর্ভপিঞ্জলীসহিত-দক্ষিণ-কপুষ্ণিকাদেশে দক্ষিণহস্তগৃহীতং তাম্রক্ষুরং তদভাবে দর্পণং বা অনেন মন্ত্রেণ

---

১। হে কুমার! অয়ং নাপিতঃ সবিতা ক্ষুরেণ গৃহীতেন আ অগাৎ তব চূড়াকরণায় আগতবানিত্যর্থঃ। ব্যবহিতেনাঙাসম্বন্ধঃ।

২। হে বায়ো! ত্বমপি উষ্ণেন উদকেন গৃহীতেন কুমারশিরঃপ্লাবনায় এধি আগচ্ছ ইত্যর্থঃ। এধি ইতি ছান্দসত্বাৎ হকারস্য ধকারঃ।

৩। হে কুমার! যা বায়ুনা আনীতা আপস্তাস্ত্বামুন্দন্তু ক্লেদয়ন্তু। কিমর্থং? জীবসে জীবনায়, চিরকালপ্রাণধারণায়। জীবস ইতি ছান্দসত্বাৎ তুমর্থে অস্-প্রত্যয়ঃ।

৪। হে ক্ষুর! ত্বং বিষ্ণোঃ দংষ্ট্রোঽসি দন্তো ভবসি ছেদনাত্মকত্বাৎ।

৫। হে ওষধে! দর্ভ! এনং কুমারং ত্রায়স্ব পালয়।

---

* যজুষ্ট্বাচ্ছন্দো নাস্তি।

† দর্ভপিঞ্জলীপদেন কুশান্তরবেষ্টিতং প্রাদেশপ্রমাণং কুশপত্রদ্বয়মুচ্যতে, অস্যা নামান্তরং পবিত্রম্। তথা চ—অনন্তর্গর্ভিণং সাগ্রং কৌশং দ্বিদলমেব চ। প্রাদেশমাত্রং বিজ্ঞেয়ং পবিত্রং যত্র-কুত্রচিৎ। এতদেব পিঞ্জল্যা লক্ষণং সমুদাহৃতম্। ইতি ছন্দোগপরিশিষ্টম্।

নিদধ্যাৎ—প্রজাপতিঋ´ষিঃ স্বধিতির্দে´বতা চূড়াকরণে বিনিয়োগঃ। ওঁ স্বধিতে মৈনং হিংসীঃ। * (৬) ততঃ কেশচ্ছেদো যথা ন ভবতি, তথা তাম্র-ক্ষুরং দর্পণং বা তত্রৈব দক্ষিণ-কপুষ্ণিকাদেশে অনেন মন্ত্রেণ পূর্ব্বাভিমুখং প্রের-য়েৎ—প্রজাপতিঋ´ষিঃ পূষা দেবতা চূড়াকরণে বিনিয়োগঃ। ওঁ যেন পূষা বৃহস্পতের্বায়োরিন্দ্রস্য চাবপৎ। তেন তে বপামি ব্রহ্মণা জীবাতবে জীবনায় দীর্ঘায়ুষ্ট্বায় বলায় বর্চ্চসে। (৭) ততো বারদ্বয়ং তূষ্ণীং প্রেরয়েৎ। ততো লৌহক্ষুরেণ দক্ষিণ-কপুষ্ণিকাদেশে স্থিতান্ কেশান্ ছিত্ত্বা, দর্ভপিঞ্জলীভিঃ সহ আচারতো বালক-মিত্রধৃত-পাত্রস্থ-বৃষগোময়োপরি নিক্ষিপেৎ।—ততঃ কাংস্যপাত্রস্থিতোষ্ণোদকেন দক্ষিণহস্তগৃহীতেন কপুচ্ছলদেশমনেন মন্ত্রেণ ক্লেদ-য়েৎ। কপুচ্ছলশব্দেন পশ্চিমতঃ শিখাস্থানাদধঃ শিরসঃ মাতৃক্রোড়াভিমুখো-চ্চদেশ † উচ্যতে। প্রজাপতিঋ´ষিরাপো দেবতাশ্চূড়াকরণে বিনিয়োগঃ। ওঁ আপ উন্দন্তু জীবসে। ততঃ তাম্রক্ষুরং দর্পণং বা পশ্যন্ জপতি—প্রজাপতি-ঋ´ষির্বিষ্ণুর্দে´বতা চূড়াকরণে বিনিয়োগঃ। ওঁ বিষ্ণোর্দংষ্ট্রোঽসি। ততঃ কুশবদ্ধ-সপ্তদর্ভপিঞ্জলীগৃ´হীত্বা ক্লিন্ন-কপুচ্ছলদেশে অনেন মন্ত্রেণ ঊর্দ্ধমূলা নিদ-ধ্যাৎ—প্রজাপতিঋ´ষিরোষধির্দে´বতা চূড়াকরণে বিনিয়োগঃ। ওঁ ওষধে ত্রায়স্বৈনম্। ততো বামহস্তগৃহীত-দর্ভপিঞ্জলীসহিতকপুচ্ছলদেশে দক্ষিণ-হস্তগৃহীতং তাম্রক্ষুরং দর্পণং বা অনেন মন্ত্রেণ নিদধ্যাৎ—প্রজাপতিঋ´ষিঃ স্বধিতির্দে´বতা চূড়াকরণে বিনিয়োগঃ। ওঁ স্বধিতে মৈনং হিংসীঃ। ততঃ কেশচ্ছেদো যথা ন ভবতি,তথা তাম্রক্ষুরং দর্পণং বা কপুচ্ছলদেশে অনেন মন্ত্রেণ

---

৬। স্বধিতিরৌড়ুম্বরক্ষুরস্তস্যামন্ত্রণং হে স্বধিতে! এনং কুমারং মা হিংসীঃ ন হিংস্যসি ইত্যর্থঃ, মা দুঃখাপয়িষ্যসীতি যাবৎ।

৭। যেন স্বধিতিনা ঔডুম্বরক্ষুরেণ পূষা দেবো বৃহস্পতের্বায়োরিন্দ্রস্য চ আবপৎ উপ্তবান্ মুণ্ডনং কৃতবান্ বপিরত্র ছেদনার্থঃ—তেন স্বধিতিনা ব্রহ্মণা ব্রহ্মভূতেন তে তব আবপামি মুণ্ডয়ামি ইত্যর্থঃ। কিমর্থং? জীবাতবে এতদেব স্বয়ং ব্যাকরোতি অস্যাপ্যর্থঃ—দীর্ঘায়ুষ্ট্বায় বলায় তথা বর্চ্চসে তেজসে ইত্যর্থঃ।

---

* স্বধিতিরিতি পাঠান্তরম্।

† নাপিতক্রোড়াভিমুখোচ্চদেশ ইতি মতান্তরম্।

পূর্ব্বাভিমুখং প্রেরয়েৎ, তূষ্ণীং বারদ্বয়ম্। প্রজাপতির্ঋষিঃ পূষা দেবতা চূড়াকরণে বিনিয়োগঃ। ওঁ যেন পূষা বৃহস্পতের্বায়োরিন্দ্রস্য চাবপৎ। তেন তে বপামি ব্রহ্মণা জীবাতবে জীবনায় দীর্ঘায়ুষ্ট্বায় বলায় বর্চ্চসে। ততো লৌহক্ষুরেণ কপুচ্ছলদেশস্থ-কেশান্ ছিত্ত্বা, দর্ভপিঞ্জলীভিঃ সহ বালক-মিত্রধৃত-পাত্রস্থ-বৃষ-গোময়োপরি স্থাপয়েৎ। ততস্তথৈব কাংস্যপাত্রস্থিতোষ্ণোদকেন দক্ষিণহস্ত-গৃহীতেন বাম-কপুষ্ণিকাদেশমনেন মন্ত্রেণ ক্লেদয়েৎ। প্রজাপতির্ঋষিরাপো দেবতাশ্চূড়াকরণে বিনিয়োগঃ। ওঁ আপ উন্দন্তু জীবসে। ততঃ তাম্রক্ষুরং দর্পণং বা পশ্যন্ জপেৎ—প্রজাপতির্ঋষির্বিষ্ণুর্দেবতা চূড়াকরণে বিনিয়োগঃ। ওঁ বিষ্ণোর্দংষ্ট্রোঽসি। ততঃ কুশবদ্ধসপ্তদর্ভপিঞ্জলীর্গৃহীত্বা ক্লিন্ন-বাম-কপু-ষ্ণিকাদেশে অনেন মন্ত্রেণ উর্দ্ধমূলা নিদধ্যাৎ—প্রজাপতির্ঋষিরোষধির্দেবতা চূড়াকরণে বিনিয়োগঃ। ওঁ ওষধে ত্রায়স্বৈনং। ততো বামহস্তগৃহীত-দর্ভ-পিঞ্জলীসহিত-বাম-কপুষ্ণিকাদেশে দক্ষিণহস্তগৃহীতং তাম্রক্ষুরং দর্পণং বা অনেন মন্ত্রেণ নিদধ্যাৎ—প্রজাপতির্ঋষিঃ স্বধিতির্দেবতা চূড়াকরণে বিনিয়োগঃ। ওঁ স্বধিতে মৈনং হিংসীঃ। ততঃ কেশচ্ছেদো যথা ন ভবতি, তথা তাম্রক্ষুরং দর্পণং বা তত্রৈব বাম-কপুষ্ণিকাদেশে অনেন মন্ত্রেণ পূর্ব্বাভিমুখং প্রেরয়েৎ, তূষ্ণীং বারদ্বয়ম্। প্রজাপতির্ঋষিঃ পূষা দেবতা চূড়াকরণে বিনিয়োগঃ। ওঁ যেন পূষা বৃহস্পতের্বায়োরিন্দ্রস্য চাবপৎ। তেন তে বপামি ব্রহ্মণা জীবাতবে জীবনায় দীর্ঘায়ুষ্ট্বায় বলায় বর্চ্চসে। * ততো লৌহক্ষুরেণ বামকপুষ্ণিকাদেশে স্থিতান্ কেশান্ ছিত্ত্বা,দর্ভপিঞ্জলীভিঃ সহ বালকমিত্রধৃত-পাত্রস্থ-বৃষগোময়োপরি নিক্ষিপেৎ। ততঃ কুমারস্য শিরঃ পাণিভ্যামুপসংগৃহ্য জপেৎ—প্রজাপতি-র্ঋষিরুষ্ণিক্ ছন্দো জমদগ্নি-কশ্যপাগস্ত্যাদয়ো দেবতাশ্চূড়াকরণে বিনি-য়োগঃ। ওঁ ত্র্যায়ুষং জমদগ্নেঃ, কশ্যপস্য ত্র্যায়ুষমগস্ত্যস্য ত্র্যায়ুষং যদ্দেবানাং ত্র্যায়ুষং, তত্তে অস্তু ত্র্যায়ুষং। (৮) ততঃ অগ্নেরুত্তরদেশং নীত্বা, পুষ্পাদ্যলঙ্কৃতো

---

৮। জমদগ্নের্মহর্ষের্যৎ ত্র্যায়ুষং—ত্রীণি আয়ুংষি বালত্ব-যৌবন-স্থবির-ত্বানি তথা কশ্যপস্য অগস্ত্যস্য দেবানাঞ্চ ইন্দ্রাদীনাং যৎ ত্র্যায়ুষং তানি তানি আয়ুংষি হে পুত্র! তে তব সন্তবস্তু। বর্ষশতং যাবৎ ত্বং জীবেত্যর্থঃ। ত্র্যায়ুষমিতি বহুত্বে একবচনং ছান্দসত্বাৎ অচতুরাদি সূত্রে পাঠাৎ সমাসান্তঃ।

---

* দীর্ঘায়ুষ্ট্বায় বর্চ্চসে ইতি পাঠান্তরম্।

নাপিতঃ পূর্ব্বমুখম্ উত্তরমুখং বা কুমারং মুণ্ডয়তি, সর্ব্বমেব কেশং বৃষগোময়োপরি নিধায়, অরণ্যে বংশবিটপে বা স্থাপয়েৎ। অস্মিন্নেব সময়ে কর্ণবেধোঽপি কর্ত্তব্যঃ। ততঃ পিতা পূর্ব্ববৎ ব্যস্তসমস্ত-মহাব্যাহৃতিহোমং কৃত্বা, (৬৯ পৃঃ ১৬ পং) প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা সর্ব্বসাধারণং শাট্যায়নহোমাদিবামদেব্যগানান্তমুদীচ্যকর্ম্ম (১৫ পৃঃ ১২ পং) সমাপ্য কর্ম্ম-কারয়িতৃব্রাহ্মণায় দক্ষিণাং দদ্যাৎ। কৃসর-ব্রীহি-যব-তিলমাষান্ নাপিতায় দদ্যাৎ।

ইতি চূড়াকরণং সমাপ্তম্।

## অথোপনয়নম্

তত্র গর্ভাষ্টমেঽষ্টমে বাব্দে ব্রাহ্মণস্যোপনয়নং কর্ত্তব্যম্। তদসম্ভবে ষোড়শবর্ষপর্য্যন্তমুপনয়নাধিকারঃ। অতঃ পরং সাবিত্রী-পতিতো ব্রাহ্মণো নোপনেতব্যঃ ইতি। * তত্র প্রথমং প্রাতঃকৃতস্নানঃ কৃতবৃদ্ধি-শ্রাদ্ধঃ পিতা পিত্রা বৃতোঽন্যো মাণবকবৃতো বা আচার্য্যঃ সমুদ্ভবনামানমগ্নিং সংস্থাপ্য বিরূপাক্ষজপান্তাং কুশণ্ডিকাং সমাপ্য মাণবকম্ অগ্নেরুত্তরতো নীত্বা, শিখয়া সহ মুণ্ডিতং স্নাপিতং কুণ্ডলাদ্যলঙ্কৃতং ক্ষৌমবাসসাবৃতং তদসম্ভবে শুক্লাহতকার্পাসৈকবস্ত্রাবৃতং স্বদক্ষিণে পূর্ব্বাভিমুখং নিধায়, প্রকৃতকর্ম্মারম্ভে প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা ব্যস্তসমস্তমহাব্যাহৃতিহোমং কুর্য্যাৎ—প্রজাপতির্ঋষির্গায়ত্রীচ্ছন্দোঽগ্নির্দেবতা মহাব্যাহৃতিহোমে বিনি-য়োগঃ। ওঁ ভূঃ স্বাহা। প্রজাপতির্ঋষিরুষ্ণিক্ ছন্দো বায়ুর্দেবতা মহাব্যাহৃতি-হোমে বিনিয়োগঃ। ওঁ ভুবঃ স্বাহা। প্রজাপতির্ঋষিরনুষ্টুপ্ ছন্দঃ সূর্য্যো দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ স্বঃ স্বাহা। প্রজাপতির্ঋষির্বৃহতীচ্ছন্দঃ প্রজাপতির্দেবতা (সমস্ত) মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ ভূর্ভুবঃস্বঃ স্বাহা। (তদ্দিনে সমাবর্ত্তনকর্ম্মণি কর্ত্তব্যে মাণবকেন প্রাতর্ভোজনং ন কারয়িতব্যম্।) তত আচার্য্যঃ পঞ্চভির্মন্ত্রৈঃ পঞ্চাজ্যাহুতীর্জুহুয়াৎ, যথা—প্রজাপতির্ঋষিরগ্নি-র্দেবতা উপনয়নহোমে বিনিয়োগঃ। † ওঁ অগ্নে ব্রতপতে ব্রতঞ্চ-রিষ্যামি তত্তে প্রব্রবীমি তচ্ছকেয়ং তেনর্দ্ধ্যাসমিদমহমনৃতাৎ

---

* কিন্তু কৃতব্রাত্যপ্রায়শ্চিত্ত উপনেতব্য ইতি।

† যজুষ্ট্বাচ্ছন্দো নাস্তি। অগ্নে ব্রতপতে ইত্যাদিমন্ত্রগণস্য ভূর্ভুবঃস্বরোং সূত্রব সূত্রধেত্যাত্তস্য মন্ত্রস্য চ যজুর্নিগদঃ তেনাত্র ছন্দো নাস্তি।

সত্যমুপৈমি স্বাহা। (১) প্রজাপতিঋষির্বায়ুর্দ্দেবতা উপনয়নহোমে বিনিয়োগঃ। ওঁ বায়ো ব্রতপতে ব্রতঞ্চরিষ্যামি তত্তে প্রব্রবীমি তচ্ছকেয়ং তেনর্দ্ধ্যাসমিদমহমনৃতাৎ সত্যমুপৈমি স্বাহা। প্রজাপতিঋষিঃ সূর্য্যো দেবতা উপনয়নহোমে বিনিয়োগঃ। ওঁ সূর্য্য ব্রতপতে ব্রতঞ্চরিষ্যামি তত্তে প্রব্রবীমি তচ্ছকেয়ং তেনর্দ্ধ্যাসমিদমহমনৃতাৎ সত্যমুপৈমি স্বাহা। প্রজাপতিঋষিশ্চন্দ্রো দেবতা উপনয়নহোমে বিনিয়োগঃ। ওঁ চন্দ্র ব্রতপতে ব্রতঞ্চরিষ্যামি তত্তে প্রব্রবীমি তচ্ছকেয়ং তেনর্দ্ধ্যাসমিদমহমনৃতাৎ সত্যমুপৈমি স্বাহা। প্রজাপতিঋষিরিন্দ্রো দেবতা উপনয়নহোমে বিনিয়োগঃ। ওঁ ব্রতানাং ব্রতপতে ব্রতঞ্চরিষ্যামি তত্তে প্রব্রবীমি তচ্ছকেয়ং তেনর্দ্ধ্যাসমিদমহমনৃতাৎ সত্যমুপৈমি স্বাহা। এবমাজ্যাহুতীর্হুত্বা অগ্নেঃ পশ্চিমত আচার্য্য উদগগ্রেষু কুশেষু প্রাঙ্মুখঃ কৃতাঞ্জলিঃ উর্দ্ধস্তিষ্ঠেৎ। অগ্ন্যাচার্য্যয়োর্ম্মধ্যে মাণবকোঽপি কৃতাঞ্জলিরাচার্য্যাভিমুখ উদগগ্রেষু কুশেষু উর্দ্ধস্তিষ্ঠেৎ। ততো মাণবকস্য দক্ষিণতঃ স্থিতো মন্ত্রবান্ ব্রাহ্মণো মাণবকস্যাঞ্জলিমুদকেন পূরয়তি, পশ্চাদাচার্য্যস্যাপি। ততো গৃহীতোদকাঞ্জলিরাচার্য্যো গৃহীতোদকাঞ্জলিং মাণবকং পশ্যন্ জপতি—প্রজাপতিঋষিরনুষ্টুপ্ ছন্দোঽগ্নি-বায়ু-সূর্য্য-চন্দ্রেন্দ্রাদয়ো দেবতা উপনয়নে আচার্য্যস্য মাণবকং প্রেক্ষমাণস্য জপে বিনিয়োগঃ। ওঁ আগন্ত্রা সমগন্মহি, প্র সুমর্ত্ত্যং যুযোতন। অরিষ্টাঃ সঞ্চরেম্মহি স্বস্তি

---

১। অত্র উপনীয়মানো মাণবকোঽগ্নিং প্রার্থয়তে—হে অগ্নে! কিম্ভূত? ব্রতপতে! ব্রতস্য শাস্ত্রীয়স্য সাবিত্রস্য নিয়মস্য পালয়িতঃ। যদিদং ব্রতং চরিষ্যামি অনুষ্ঠাস্যামি,তদ্‌ব্রতং তে তুভ্যং প্রব্রবীমি নিবেদয়ামি,তেন ত্বৎপ্রসাদাৎ ব্রতমহং শকেয়ং সুখেনাচরিতুং শক্নোমি। ব্রতচরণস্য ফলমাহ তেন উপনয়নব্রতেন করণভূতেনাহং ঋদ্ধিং সমৃদ্ধিং বৃদ্ধিমধ্যয়নলক্ষণাং প্রাপ্নুয়াম্, ইদং ব্রতং সমুপৈমি সম্যক্ উপৈমি। কিম্ভূতং? সত্যং সত্যবচনরূপম্ অনৃতাৎ অলীকবচনাৎ পৃথগ্‌ভূত্বা, এতদুক্তং ভবতি—যোঽহমুপনয়নাৎ প্রাক্ কামচারবৎ আসং সোঽহমধুনা পরিত্যক্তানৃতবাদঃ সত্যভূতমিদং ব্রতঞ্চরিষ্যামীত্যর্থঃ। শকেয়মিতি লিঙাশিষ্যঙ্, ঋদ্ধ্যা ইতি দ্বিতীয়ার্থে তৃতীয়া। সমুপৈমীতি ব্যবহিতোপসর্গসম্বন্ধঃ। এবমুত্তরত্র চত্বারো মন্ত্রা অনেনৈব ব্যাখ্যাতাঃ।

সঞ্চরতাদয়ম্। (২) তত (গৃহীতোদকাঞ্জলিরেব) আচার্য্যো (গৃহীতোদকাঞ্জলিমেব) মাণবকং পাঠয়তি। * প্রজাপতিঋর্ষিরাচার্য্যো দেবতা উপনয়নে (আচার্য্যস্য) মাণবকপাঠনে বিনিয়োগঃ। ওঁ ব্রহ্মচর্য্যমাগামুপমানয়স্ব। (৩) তত আচার্য্যো মাণবকং প্রাগাত্মকল্পিতং নামধেয়ং পৃচ্ছতি। প্রজাপতিঋর্ষির্মাণবকো দেবতা উপনয়নে (আচার্য্যস্য) † মাণবকনামপ্রশ্নে বিনিয়োগঃ। ওঁ কো নামাসি। ততো মাণবকো দেবতাশ্রয়ং গোত্রাশ্রয়ং নক্ষত্রাশ্রয়ং প্রাগাচার্য্যকল্পিতনামধেয়ং কথয়তি অনেন মন্ত্রেন—প্রজাপতিঋর্ষির্মাণবকো দেবতা উপনয়নে মাণবকস্য নামকথনে বিনিয়োগঃ। ওঁ অমুকদেবশর্ম্মা নামাস্মি। ততো আচার্য্যমাণবকৌ পূর্ব্বগৃহীতোদকাঞ্জলী ত্যজেতাম্। তত ‡ আচার্য্যো দক্ষিণেন পাণিনা মাণবকস্য সাঙ্গুষ্ঠং দক্ষিণং পাণিমনেন মন্ত্রেন গৃহ্লাতি—প্রজাপতিঋর্ষিঃ সবিত্রশ্বিপূষণো দেবতা উপনয়নে আচার্য্যস্য মাণবকহস্তগ্রহণে বিনিয়োগঃ। ওঁ দেবস্য তে সবিতুঃ প্রসবেঽশ্বিনোর্ব্বাহুভ্যাং

---

২। হে অগ্ন্যাদয়ঃ! যূয়ম্ এনং উপনীয়মানং সুমর্ত্ত্যং শোভনমনুষ্যং প্রযুযোতন প্রকর্ষেণ মিশ্রয়ত অস্মাভিঃ সার্দ্ধম্। এতৎ প্রার্থ্যতে যেনানেন ব্রহ্মচারিণা আগন্ত্রা আগমনশীলেন সমগন্মহি সাঙ্গত্যমনুভবেম, কিঞ্চ অরিষ্টাঃ অহিংসিতাঃ সঞ্চরেমহি গচ্ছামঃ। অরিষ্টাঃ ইতি রিষ হিংসায়াং, ন বিদ্যতে রিষ্টং হিংসাত্মকং যেষামিতি বিগ্রহঃ, মন্ত্রপ্রসাদেনাত্রাহিংসিতা অগ্নয়ঃ! যুষ্মৎপ্রসাদেন রিষ্টরহিতাঃ সঞ্চরাম ইতি ভাবঃ। রিষ্টমশুভমিত্যর্থঃ। কিঞ্চায়ং ব্রহ্মচারী স্বস্তি চরতাৎ অবিনাশীভূয় পর্য্যটতাম্। যুযোতন ইতি যু মিশ্রণে লোট্ শপঃশ্লুঃ তস্থানে তনপ্ আদেশঃ।

৩। হে গুরো! অহং ব্রহ্মচর্য্যং ব্রহ্মচারিব্রতম্ আগাম্ আগতবানস্মি, যতঃ অতঃ মা মাম্ উপনয়স্ব আত্মসমীপং প্রাপয়।

---

* বন্ধনীমধ্যস্থপাঠঃ সর্ব্বত্র নাস্তি।

† বন্ধনীমধ্যস্থপাঠঃ সর্ব্বত্র নাস্তি।

‡ আচার্য্যস্ত ইতি পাঠান্তরম্।

পূষ্ণো হস্তাভ্যাং হস্তং গৃভ্ণামি অসৌ। (৪) অত্র অসাবিতি সর্ব্বনামস্থানে মাণবকস্য অমুকদেবশর্ম্মন্নিতি সম্বোধনান্তং নাম প্রযোক্তব্যম্। ততো গৃহীত-মাণবকহস্ত আচার্য্যো জপতি—প্রজাপতিঋ৺ষিরগ্ন্যাদয়ো দেবতা উপনয়নে গৃহীতমাণবকহস্তাচার্য্যজপে বিনিয়োগঃ। ওঁ অগ্নিস্তে হস্তমগ্রহীৎ সবিতা হস্তমগ্রহীদর্য্যমা হস্তমগ্রহীন্মিত্রস্ত্বমসি কর্ম্মণা অগ্নিরাচার্য্যস্তব। (৫) তত আচার্য্যো মাণবকম্ অনেন মন্ত্রেণ প্রদক্ষিণং ভ্রাময়িত্বা প্রাঙ্মুখং করোতি। প্রজাপতিঋ৺ষিঃ সূর্য্যো দেবতা উপনয়নে মাণবকস্যাবর্ত্তনে বিনিয়োগঃ। ওঁ সূর্য্যস্যাবৃতমন্বাবর্ত্তস্বাসৌ। (৬) অত্রাসাবিতি সর্ব্বনামস্থানে অমুকদেবশর্ম্মন্নিতি সম্বোধনান্তং মাণবকস্য নাম প্রযোক্তব্যম্। ততো মাণবকস্য দক্ষিণস্কন্ধং স্পৃষ্ট্বাঽন্বতীর্ণেন দক্ষিণপাণিনা বস্ত্রাব্যবহিতং নাভিদেশম্ অনেন মন্ত্রেণ আচার্য্যঃ স্পৃশতি—প্রজাপতিঋ৺ষির্নাভ্যন্তকৌ দেবতে উপনয়নে ব্রহ্মচারি-নাভিদেশস্পর্শনে বিনিয়োগঃ। ওঁ প্রাণানাং গ্রন্থিরসি, মাবিস্রসোঽন্তক। ইদন্তে পরিদদাম্যমুম্। (৭) অত্রামুমিতি সর্ব্বনামস্থানে অমুকদেবশর্ম্মাণ-মিতি দ্বিতীয়ান্তং মাণবকনাম প্রযোক্তব্যম্। ততো মাণবকস্য নাভেরূ-পরিদেশম্ অনেন মন্ত্রেণ আচার্য্যঃ স্পৃশতি—প্রজাপতিঋ৺ষির্বায়ুর্দেবতা

---

৪। অসৌ হে দেবদত্তশর্ম্মন্! তে তব হস্তং সবিতুঃ দেবস্য প্রসবে অভ্যনু-জ্ঞানে সতি অশ্বিনোঃ দেববৈদ্যয়োঃ বাহুভ্যাং পূষ্ণশ্চ দেবস্য হস্তাভ্যাম্ অহমাচার্য্যঃ পাণিনা গৃহ্ণামি।

৫। হে ব্রহ্মচারিন্! ময়া আচার্য্যেণ যোঽয়ং তব হস্তো গৃহীতঃ পূর্ব্ব-মগ্নিঃ সবিতা অর্য্যমা চ তং হস্তমগ্রহীৎ গৃহীতবান্ যতোঽতোঽনেন কর্ম্মণা শুশ্রূষাদিলক্ষণেন মম ত্বং মিত্রোঽসি ভবসি মিত্রং প্রিয়কারি ছান্দসত্বা-ল্লিঙ্গব্যত্যয়ঃ কিঞ্চাগ্নির্ভগবান্ তব আচার্য্যঃ গুরুরস্তু।

৬। অসাবিতি সম্বোধনং হে বিষ্ণুশর্ম্মন্! সূর্য্যস্যাবর্ত্তনামা আবৃত্ সম্পদাদিত্বাৎ কিপ্ তাং অন্বাবর্ত্তস্ব, এতদুক্তম্ভবতি। যাবৎ ভগবতঃ সূর্য্যস্য অবস্থিতিস্তাবত্ত্বমপি তিষ্ঠ ইত্যর্থঃ।

(৭) হে নাভে! অস্য ব্রহ্মচারিণঃ ত্বং মা আবিস্রসঃ ন বিস্রংসয়িষ্যসি স্বস্থানাৎ মা চরিষ্যসি। যতস্ত্বং প্রাণানাং দেহধরিণাং গ্রন্থিঃ প্রতিবন্ধোঽসি, কিঞ্চ হে অন্তক! যম! ইদমস্য ব্রহ্মচারিণঃ শরীরমমুঞ্চ ব্রহ্মচারিণং তে তুভ্যং

উপনয়নে ব্রহ্মচারিনাভ্যুপরিদেশস্পর্শনে বিনিয়োগঃ। ওঁ অভুর ইদন্তে পরিদদাম্যমুম্। (৮) ততো মাণবকস্য হৃদয়দেশম্ অনেন মন্ত্রেণ আচার্য্যঃ স্পৃশতি—প্রজাপতির্ঋষিঃ কৃশনুর্দেবতা উপনয়নে ব্রহ্মচারি-হৃদয়দেশ-স্পর্শনে বিনিয়োগঃ। ওঁ কৃশন ইদন্তে পরিদদাম্যমুম্। (৯) তত আচার্য্যো দক্ষিণেন পাণিনা মাণবকস্য দক্ষিণস্কন্ধং স্পৃশন্ জপতি—প্রজাপতির্ঋষিঃ প্রজাপতির্দেবতা উপনয়নে ব্রহ্মচারিদক্ষিণস্কন্ধস্পর্শনে বিনিয়োগঃ। ওঁ প্রজাপতয়ে ত্বা পরিদদাম্যসৌ (১০) অত্রাসাবিতি সর্ব্বনামস্থানে অমুকদেবশর্ম্মন্নিতি সম্বোধনান্তং মাণবকনাম প্রযোক্তব্যম্। তত আচার্য্যো বামেন পাণিনা মাণবকস্য বামস্কন্ধং স্পৃশন্ জপতি—প্রজাপতির্ঋষিঃ সবিতা দেবতা উপনয়নে ব্রহ্মচারি-বামস্কন্ধস্পর্শনে বিনিয়োগঃ। ওঁ দেবায় ত্বা সবিত্রে পরিদদাম্যসৌ। তত আচার্য্যো মাণবকম্ অনেন মন্ত্রেণ সম্বোধয়তি—প্রজাপতির্ঋষির্ব্রহ্মচারী দেবতা উপনয়নে ব্রহ্মচারিসম্বোধনে বিনিয়োগঃ। ওঁ ব্রহ্মচার্য্যস্যসৌ। অত্রাসাবিতি সম্বোধনান্তং অমুকদেবশর্ম্মন্নিতি মাণবকনাম প্রযোক্তব্যম্। ততঃ সম্বোধিতং মাণবকম্ আচার্য্যঃ প্রেষয়তি—প্রজাপতির্ঋষির্ব্রহ্মচারী দেবতা উপনয়নে ব্রহ্মচারিপ্রৈষ্যে বিনিয়োগঃ। * ওঁ সমিধমাধেহি। ব্রহ্মচারী—ওঁ বাঢ়ম্। ওঁ অপোঽশান। ব্রহ্মচারী—ওঁ বাঢ়ং। ওঁ কর্ম্ম কুরু † ব্রহ্মচারী—ওঁ

---

পরিদদামি সমর্পয়ামি দদাতিরত্র সমর্পণে ধাতুনামনেকার্থত্বাৎ।—এতদুক্তং ভবতি। ত্বয়ি সমর্পণে এষ রোগজরামরণাদিকং নানুপ্রাপ্নুয়াদিতি ত্বৎসমর্পণেনায়ং জরামরণরোগাদিদুঃখৈর্নাভিভূয়তে ইতি ভাবঃ। বিস্রস ইতি স্রংসের্ণ্ডপুবাদিত্বাদঙ্ অগুণত্বাদনুষঙ্গলোপঃ।

(৮) অভুরির্বায়ুঃ হে অভুরে! বায়ো! ইদম্ অস্য শরীরং অমুষ্য ব্রহ্মচারিণস্তে পরিদদামি সমর্পয়ামি ইতি যাবৎ পূর্ব্ববদ্ব্যাখ্যা।

(৯) কৃশন ইতি কৃশানুরগ্নিস্তস্যামন্ত্রণে হে কৃশনো! হে অগ্নে! ছান্দসত্বাৎ হ্রস্বত্বম্। অবাদেশেঽয়াদিলোপে রূপম্। হে কৃশন! অগ্নে! ইদমস্য শরীরং অমুষ্য ব্রহ্মচারিণস্তে দদামি সমর্পয়ামি। অন্যৎ পূর্ব্ববৎ।

(১০) অসৌ হে ব্রহ্মচারিন্! ত্বা ত্বামহং প্রজাপতয়ে স্রষ্ট্রে পরিদদামি সমর্পয়ামি।

---

* যজুর্বেদীয়ানাং অতচ্ছন্দো নাস্তি।

† আপোঽশানং কর্ম্ম কুরু ইতি কেষুচিৎ পুস্তকেষু পাঠঃ।

বাঢ়ং। ওঁ মা দিবা স্বাপ্সীঃ। (১১) ব্রহ্মচারী—ওঁ বাঢ়ং। এবং ব্রহ্মচারী সর্ব্বত্র "ওঁ বাঢ়ং" ইতি ব্রূয়াৎ। (তত আচার্য্যাৎ মাণবকং কৌপীনং পরিধাপয়েৎ।) * ততঃ অগ্নেরুত্তরতো গত্বা আচার্য্য উদগগ্রেষু কুশেষু প্রাঙ্মুখ উপবিশতি। মাণবকোঽপি পাতিতদক্ষিণজানুঃ উদগগ্রেষু কুশেষু আচার্য্যাভিমুখ উপবিশতি। অথৈনং মাণবকম্ আচার্য্যঃ ত্রিঃপ্রদক্ষিণাং ত্রিবৃতাং মৌঞ্জমেখলাং পরিধাপয়ন্ মন্ত্রদ্বয়ং বাচয়তি। তত্র ব্রহ্মচারিণঃ প্রবরসংখ্যয়া পঞ্চ বা ত্রয়ো বা মেখলাগ্রন্থয়ঃ কর্ত্তব্যাঃ। প্রজাপতিঋষির্বিষ্টুপ্ ছন্দো মেখলা দেবতা উপনয়নে ব্রহ্মচারি-মেখলাপরিধাপনে বিনিয়োগঃ। † ওঁ ইয়ং দুরুক্তাৎ পরিবাধমানা, বর্ণং পবিত্রং পুনতী ম (ন) আগাৎ। প্রাণাপানাভ্যাং বলমাবহন্তী স্বসা দেবী সুভগা মেখলেয়ং॥ (১২) ওঁ ঋতস্য গোপ্ত্রী

---

(১১) হে ব্রহ্মচারিন্! সমিধমগ্নৌ আধেহি প্রদক্ষিণে অগ্নিকার্য্যং কুরু। তথা অপোশান পানীয়স্য ভক্ষণং কুরু। তদাহ যাজ্ঞবল্ক্যঃ—আপোশানক্রিয়াপূর্ব্বমশ্নাত্যন্নমকুৎসয়ন্। তথা কর্ম্ম কুরু শুশ্রূষাদিলক্ষণং কুরু। মা দিবা স্বাপ্সীঃ দিবানিদ্রাং ত্যজ। তথা গৌতমোঽপি ব্রহ্মচারিণমধিকৃত্য—বর্জ্জয়েন্মধুমাংসাদি গন্ধ-মাল্য-দিবাস্বপনিখমাচার্য্যেণ উক্তো মাণবকঃ সর্ব্বত্র ওঁ বাঢ়মিতি ব্রূয়াৎ।

(১২) ইয়ং প্রত্যক্ষীভূতা মেখলা মৌঞ্জী রশনা নো অস্মান্ প্রত্যাগাৎ আগতবতী। কিং কুর্ব্বাণা? দুরুক্তাৎ অসম্বদ্ধপ্রলাপাদিতঃ পরিবাধমানা অপসারয়ন্তী নিবারয়ন্তী বাধতিরত্র অপসারণে বর্ত্ততে। পুনঃ কিং কুর্ব্বাণা? ইয়ং মেখলা বর্ণং ব্রাহ্মণাখ্যং পবিত্রমপি পুনতী পাবয়ন্তী। তথা চোক্তং—মাতুরগ্রেঽধিজননং দ্বিতীয়ং মৌঞ্জীবন্ধনাৎ। পুনঃ কিং কুর্ব্বাণা? প্রাণাপানাভ্যাং বলমাবহন্তী বলং বীর্য্যং প্রাণো নাভেরূর্দ্ধমুখনাসিকাগতির্বায়ুঃ অপানো নাভেরধোগতির্বায়ুঃ তয়োরধোঽপানং তাভ্যাং বায়ুভ্যাং তয়োর্বলমাবহন্তী উৎপাদয়ন্তী আনয়ন্তীতি যাবৎ, তথা স্বসা ভগিনীব পরার্থে যুজ্যমানাঃ শব্দা ইবশব্দেন বিনাপি ইবার্থং গময়ন্তি। দেবী দেবনাদিগুণযুক্তা সুভগা সকললোকাভিলষণীয়া। দুরুক্তাদিতি দ্বিতীয়ার্থে পঞ্চমীবিভক্তিঃ ব্যত্যয়াৎ দুরুক্তং পরিবাধমানেত্যর্থঃ।

---

* বন্ধনীমধ্যস্থপাঠঃ সর্ব্বত্র নাস্তি।

† মাণবকবাচনে ইতি কস্মিংশ্চিৎ পুস্তকে পাঠঃ।

তপসঃ পরস্বী, ঘ্নতী রক্ষঃ সহমানা অরাতীঃ। সা মা সমন্তমভিপর্য্যেহি ভদ্রে, ধর্ত্তারস্তে মেখলে মা রিষাম॥ (১৩) তত আচার্য্যো যজ্ঞোপবীতমেকং * মাণবকম্ অমুং মন্ত্রং পাঠয়ন্ পরিধাপয়তি—প্রজাপতির্ঋষির্যজ্ঞোপবীতং দেবতা উপনয়নে ব্রহ্মচারি-যজ্ঞোপবীতপরিধাপনে বিনিয়োগঃ। ওঁ যজ্ঞোপবীতমসি যজ্ঞস্য ত্বা যজ্ঞোপবীতেনোপনহ্যামি। (১৪) ততঃ প্রজাপতির্ঋষিস্ত্রিষ্টুপ্ ছন্দোঽজিনং দেবতা উপনয়নে ব্রহ্মচার্য্যজিনপরিধাপনে বিনিয়োগঃ। ওঁ মিত্রস্য চক্ষুর্ব্বরুণং বলীয়স্তেজোযশস্বী স্থবিরং সমিদ্ধং। অনাহনস্যং বসনং জরিষ্ণু, পরীদং বাজ্যজিনং দধেঽহং॥ † (১৫) ইত্যনেন

---

(১৩) হে ভদ্রে কল্যাণবতি! হে মেখলে! যা ত্বং ব্রহ্মচারিসম্বন্ধিনঃ ঋতস্য সত্যস্য গোপ্ত্রী পালয়িত্রী তথা তপসঃ ব্রহ্মচর্য্যস্য পরস্বী সর্ব্বস্বভূতা। পুনঃ কীদৃশী? ঘ্নতী রক্ষঃ রক্ষাংসি হিংসন্তী অতোঽরাতীঃ শত্রূন্ সহমানা অভিভবন্তী অরাতীরিতিব্যত্যয়েন স্ত্রীত্বম্। সা এবম্ভূতা মা মাং সমন্তং সমন্তাৎ অভিপর্য্যেহি, আভিমুখ্যেন সর্ব্বত আগচ্ছ বেষ্টয় ইত্যর্থঃ। যেন তে তব বয়ং ধর্ত্তারঃ তেন মা রিষাম মা হিংসিস্মহি, এতদুক্তম্ভবতি—যস্মাত্তব ধারকা বয়ং তস্মাদস্মাসু হিংসাবুদ্ধির্ন ভবতু ইত্যর্থঃ।

(১৪) হে সূত্র! ত্বং যজ্ঞোপবীতম্ যজ্ঞেন যজ্ঞকর্ম্মণা উপ অধিকং বেতি শোভতে ইতি যজ্ঞোপবীতং অসি ভবসি। ত্বা ত্বাং যজ্ঞস্য যজ্ঞপুরুষস্য সম্বন্ধিনা যজ্ঞোপবীতেন উপনহ্যামি অধিকং বধ্নামি একীভূতং করোমীত্যর্থঃ।

(১৫) অহং ব্রহ্মচারী তেজোযশস্বী ব্রহ্মতেজসা খ্যাতিমান্ ভবিতুং ইদম্ অজিনম্ অজিনরূপম্ বসনম্ উত্তরীয়ং বাসঃ পরিদধে ধারয়ামি। কিম্ভূতম্ অজিনম্? মিত্রস্য চক্ষুঃ সূর্য্যস্য দর্শকম্ বরুণস্য আবরকম্ বলীয়ঃ দৃঢ়তরম্ স্থবিরং স্থূলম্ সমিদ্ধং উজ্জ্বলম্ অনাহনস্যং মলাপকর্ষণার্থং পাষাণাদৌ ন আহন্তব্যং জরিষ্ণু জরণশীলং দীর্ঘকালস্থায়ীত্যর্থঃ, তথা বাজি যজ্ঞার্হম্। অনাহনস্যমিতি আঙ্পূর্ব্বাৎ হন্ধাতোর্ভাবে অসুন্ আহনঃ আঘাতম্ অর্হতীতি আহনস্যং ন তথা ইতি। পরিদধে ইতি ব্যবহিতোপসর্গেণ সম্বন্ধঃ।

---

* তথা চ স্মৃতিঃ—ব্রহ্মচারিণ একং স্যাৎ স্নাতস্য দ্বে বহূনি চ। তৃতীয়মুত্তরীয়ং বা বস্ত্রাভাবে তদিষ্যতে।

† এতন্মন্ত্রদ্বয়ং গোভিলেন নোক্তং গুণবিষ্ণুনা চ ন ব্যাখ্যাতম্। স্মার্ত্তেন ধৃতম্।

কৃষ্ণসারাজিনং পরিধাপয়তি। ততো মাণবক আচার্য্যস্য উপসন্নো * ভবতি। প্রজাপতিঋষির্বিরাচার্য্যো দেবতা আচার্য্যামন্ত্রণে বিনিয়োগঃ। ওঁ অধীহি ভোঃ সাবিত্রীং মে ভবাননুব্রবীতু। † (১৬)—ইতি ব্রুবাণঃ। ততস্তম্ উপসন্নং মাণবকম্ আচার্য্যঃ প্রথমং পাদং পাদং, ততঃ অর্দ্ধমর্দ্ধং, ততঃ কৃৎস্নাং সাবিত্রীম্ অধ্যাপয়েৎ। যথা—বিশ্বামিত্রঋষির্গায়ত্রীচ্ছন্দঃ সবিতা দেবতা জপোপনয়নে বিনিয়োগঃ। "তৎ সবিতুর্ব্বরেণ্যং" -ইতি প্রথমং পাদম্। "ভর্গো দেবস্য ধীমহি" ইতি দ্বিতীয়ং পাদম্। "ধিয়ো য়ো নঃ প্রচোদয়াৎ"—ইতি তৃতীয়ং পাদম্; ওঁ তৎ সবিতুর্ব্বরেণ্যং, ভর্গো দেবস্য ধীমহি—ইতি পূর্ব্বার্দ্ধম্, ধিয়ো যো নঃ প্রচোদয়াৎ ইতি উত্তরার্দ্ধম্। ওঁ তৎসবিতুর্ব্বরেণ্যং, ভর্গো দেবস্য ধীমহি। ধিয়ো য়ো নঃ প্রচোদয়াৎ। (১৭)—ইতি কৃৎস্নাং সাবিত্রীং বারত্রয়ম্ অধ্যাপয়েৎ। ততো মাণবকম্ আচার্য্যো মহা-ব্যাহৃতীঃ পৃথক্ পৃথক্ কৃত্বা ওঁকারপূর্ব্বিকা অধ্যাপয়েৎ। যথা—প্রজাপতি-ঋষির্গায়ত্রীচ্ছন্দোঽগ্নির্দেবতা মহাব্যাহৃতিপাঠে বিনিয়োগঃ। ওঁ ভূঃ।

---

(১৬) আচার্য্যঃ প্রথমমুপদিশতি ভো মাণবক! অধীহি অধীষ। তদ-নুজ্ঞাং প্রাপ্য মাণবক আহ—ভবান্ সাবিত্রীং মে মহ্যং অনুব্রবীতু উপদিশতু। অত্র ভাষ্যম্—অধীহি অধ্যাপয়।

(১৭) সাবিত্রীয়ম্। ভগবতঃ সবিতুঃ আদিত্যস্য দেবস্য দেবনাদিগুণ-যুক্তস্য বরেণ্যং বরণীয়ং ভর্গঃ তেজঃ তদ্ ভজনীয়ং সেবনীয়ং যৎ তৎ ধীমহি চিন্তয়ামঃ। ধীমহীতি ধ্যৈ চিন্তায়াম্ (যঃ) সবিতা নো অস্মাকং ধিয়ঃ বুদ্ধীঃ স্নানাধ্যয়নদানহোমাদিষু কর্ম্মসু প্রচোদয়াৎ প্রেরয়েৎ। প্রবর্ত্তয়ে-দিত্যর্থঃ। উদিতে হি ভগবতি মরীচিমালিনি সকলকর্ম্মাণি প্রবর্ত্তন্তে, অস্তমিতে তু নিবর্ত্তন্তে। ভূঃ পৃথিবী ভুবঃ অন্তরীক্ষং স্বর্দ্যৌঃ ওঁ আত্মা এতদুক্তং ত্রৈলোক্যাত্মনঃ প্রতিপদ্যতে।

---

* কৃতাঞ্জলিপুট আচার্য্যাগতচক্ষুরুপসন্ন ইত্যর্থঃ।

† অত্র কেষুচিৎ পুস্তকেষু অধীহি ভোঃ সাবিত্রীমিত্যাচার্য্যঃ, মে ভবাননুব্রবীতু ইতি মাণবকো ব্রূতে ইতি পাঠো দৃশ্যতে। গোভিলেন তু অধীহি ভোঃ সাবিত্রীং মে ভবাননুব্রবীত্বিতি মাণবক উপসন্নো ভবতীতি লিখিতম্। গুণবিষ্ণুনা তু গোভিলোক্তং ন সমাদৃতম্। ভট্টভাষ্যেণ অত্র অধীহি পদস্য অধ্যাপয় ইত্যর্থকতামুপকল্প্য বাক্যাচ্ছেদঃ কৃতঃ। অত্রেবং চিন্ত্যং বাক্যাচ্ছেদে অধীহিপদস্য লক্ষণাপত্তিঃ মে ভবাননুব্রবীতু ইত্যর্থস্য পৌনরুক্ত্যাপত্তিশ্চ সহনীয়া গোভিল-বাক্যপ্রামাণ্যাৎ উক্তিদ্বয়পরত্বে পৃথক্ ঋষিদেবতয়োরুল্লেখাপত্তেঃ। এবঞ্চ বাক্যচ্ছেদো ন শ্রেয়ান্। পৌনরুক্ত্যঞ্চ বিবৃতিপরত্বেনাপি পরিহরণীয়ম্। ইতি কেচিৎ সমাদধতি।

প্রজাপতির্ঋষিরুষ্ণিক্ ছন্দো বায়ুর্দেবতা মহাব্যাহৃতিপাঠে বিনিয়োগঃ। ওঁ ভুবঃ। প্রজাপতির্ঋষিরনুষ্টুপ্ ছন্দঃ সূর্য্যো দেবতা মহাব্যাহৃতিপাঠে বিনিয়োগঃ। ওঁ স্বঃ। ততঃ সপ্রণবব্যাহৃতিকাং প্রণবান্তাং গায়ত্রীমধ্যাপয়েৎ। যথা—ওঁ ভূর্ভুবঃস্বঃ। তৎ সবিতুর্বরেণ্যং, ভর্গো দেবস্য ধীমহি। ধিয়ো য়ো নঃ প্রচোদয়াৎ ওঁ। ততো বৈল্বং পালাশং বা মাণবকপরিমাণং দণ্ডং * মাণবকায় প্রযচ্ছন্নাচার্য্যো মাণবকং বাচয়তি—প্রজাপতির্ঋষিঃ পঙ্‌ক্তিশ্ছন্দো দণ্ডাগ্নী দেবতে উপনয়নে মাণবকদণ্ডার্পণে বিনিয়োগঃ। ওঁ সুশ্রবঃ সুশ্রবসং মা কুরু। যথা ত্বমগ্নে সুশ্রবঃ সুশ্রবা দেবেষেবমহং সুশ্রবঃ সুশ্রবা ব্রাহ্মণেষু ভূয়াসম্। (১৮) অথ গৃহীতদণ্ডো † ব্রহ্মচারী ভৈক্ষ্যং প্রার্থয়েৎ, তত্র প্রথমং মাতরং ‡ ওঁ ভবতি ভিক্ষাং দেহি—ইতি। ততো লব্ধভিক্ষো মাণবকঃ ওঁ স্বস্তি ইতি ব্রূয়াৎ; এবং সর্ব্বত্র। ততো মাতৃবন্ধুপিতৃবন্ধুস্ত্রিয়ঃ। ততঃ পিতরং—ওঁ ভবন্ ভিক্ষাং দেহি—ইতি

---

(১৮) দণ্ডং গৃহ্নন্ ব্রহ্মচারী তমগ্নিঞ্চ প্রার্থয়তে। হে সুশ্রবঃ! শোভনযশঃ! শ্রূয়তে ইতি শ্রবঃ যশোঽভিধীয়তে শোভনং যশো যস্য স সুশ্রবাঃ তস্য সম্বোধনং শোভনকীর্ত্তে দণ্ড! এতদুক্তম্ভবতি—যথা ত্বং বেদস্বীকরণ-ধারণ-তত্তদনুষ্ঠানেন লোকে খ্যাতযশাঃ তথা মামপি সুশ্রবসং যশোভাজনং কুরু। যদ্যপি অচেতনত্বাৎ দণ্ডস্য বেদস্বীকরণাদ্যত্যন্তাসম্ভবস্তথাপি তদধিষ্ঠাতৃদেবতাভিপ্রায়েণ বোদ্ধব্যম্। এবমগ্নিং প্রার্থয়তে—হে অগ্নে! সুশ্রবঃ! সুশ্রব ইতি পুনঃ পুনরামন্ত্রণে দণ্ডাদগ্নেরাদরাতিশয়মাহ, যথা ত্বং দেবেষু ইন্দ্রাদিষু মধ্যে সুশ্রবাঃ এবমহং ব্রাহ্মণেষু মধ্যে সুশ্রবা ভূয়াসং ভবামি।

---

* ব্রাহ্মণো বৈল্বপালাশৌ ক্ষত্রিয়ো বাটখাদিরৌ। পৈলবৌদুম্বরৌ বৈশ্যো দণ্ডানর্হন্তি ধর্ম্মতঃ।

† কেশান্তিকো ব্রাহ্মণস্য দণ্ডঃ কার্য্যঃ প্রমাণতঃ। ললাটসম্মিতো রাজ্ঞঃ স্যাত্তু নাসান্তিকো বিশঃ। ঋজবস্তে তু সর্ব্বে স্যুরব্রণাঃ সৌম্যদর্শনাঃ। অনুদ্বেগকরা নৃণাং সত্বচো নাগ্নিদূষিতাঃ।

‡ অত্র গোভিলঃ—মাতরমেবাগ্রে দ্বে চান্যে সুহৃদো যাবত্যো বা সন্নিহিতাঃ স্যুরিতি। তথা মনুঃ—মাতরং বা স্বসারং বা মাতুর্ব্বা ভগিনীং নিজাম্। ভিক্ষেত ভিক্ষাং প্রথমং যা চৈনং ন বিমানয়েৎ।

প্রার্থয়েৎ। ততঃ অন্যাংশ্চ। সর্ব্বং লব্ধং ভৈক্ষ্যম্ আচার্য্যায় নিবেদয়েৎ। * আচার্য্যোঽপি উপযুজ্যতামিতি অনুজ্ঞাং দদ্যাৎ। ততঃ পূর্ব্ববদাচার্য্যো ব্যস্তসমস্তমহাব্যাহৃতিহোমং (৭৫পৃঃ ৪পং) কৃত্বা, প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা শাট্যায়নহোমাদি-বামদেব্যগানান্তং কর্ম্ম সমাপয়েৎ। † (১৫ পৃঃ ১২ পং) ব্রহ্মচারী তু দক্ষিণং জানু ভূমৌ পাতয়িত্বা সমুদ্ভবনামানম্ অগ্নিং সংস্থাপ্য, সমিদ্ধোমং কুর্য্যাৎ। তত্র প্রথমং প্রাদেশপ্রমাণ-ঘৃতাক্ত-সমিত্রয়ম্ আদায়, আদ্যন্তয়োস্তূষ্ণীং, মধ্যে অনেন মন্ত্রেণ জুহুয়াৎ—প্রজাপতি-ঋষিরগ্নির্দেবতা ‡ অগ্নৌ সমিদাধানে বিনিয়োগঃ। ওঁ অগ্নয়ে সমিধমাহার্ষং ¶ বৃহতে জাতবেদসে। যথা ত্বমগ্নে সমিধা সমিধ্যস্যেবমহমায়ুষা মেধয়া বর্চ্চসা প্রজয়া পশুভির্ব্রহ্মবর্চ্চসেন ধনেনান্নাদ্যেন সমেধিষীয় স্বাহা। (১৯) ততঃ ওঁ অমুকগোত্রঃ শ্রীঅমুকদেবশর্ম্মাহং ভো অভিবাদয়ে ইত্যগ্নিমভিবাদ্য ওঁ ক্ষমস্বেতি অগ্নিং বিসৃজ্য § অতীতায়াং সন্ধ্যায়াং ভিক্ষালব্ধমন্নম্

---

(১৯) ব্রহ্মচারী ব্রূতে—অহমগ্নয়ে সমিধমাহার্ষং আহৃতবান্। কিম্ভূতায়? বৃহতে মহতে জাতবেদসে জাতপ্রজ্ঞানায়। হে অগ্নে! যথা ত্বমনয়া সমিধা যজ্ঞকাষ্ঠেন সমিধ্যসি দীপ্যসে এবমনেন প্রকারেণাহমপি ব্রহ্মচারী আয়ুষা জীবিতেন মেধয়া বেদগ্রহণধারণ-রূপয়া বুদ্ধ্যা বর্চ্চসা দীপ্ত্যা প্রজয়া উত্তরকালভাবি-পুত্রপৌত্রসন্ততিরূপয়া পশুভিঃ গবাদিভিঃ ব্রহ্মবর্চ্চসেন ব্রাহ্মোন তেজসা ধনেন বিত্তেন অন্নাদ্যেন ব্রীহিযবাদিনা সমেধিষীয় বৃদ্ধিমাপ্নুয়াম্।

---

* গৃহ্যান্তরে—ভৈক্ষ্যং ভোরিত্যাচার্য্যায় ভৈক্ষ্যং নিবেদ্য দত্তং প্রতিগৃহ্নীয়াৎ ইতি উক্তং প্রতি-পালনীয়ম্। তথা চ—যন্নাম্নাতং স্বশাখায়াং পরোক্তমবিরোধি চ। বিদ্বদ্ভিস্তদনুষ্ঠেয়মগ্নিহোত্রাদি-পূর্ব্ববৎ ইতি বচনাৎ।

† ব্রহ্মচারী তু প্রাপ্তায়াং সন্ধ্যায়াং তামুপাস্য ততঃ কুশণ্ডিকোক্তবিধিনা শিখিনামানমগ্নিং সংস্থাপ্য ওঁ ইহৈবায়মিতর ইতি জপ্ত্বা ইতি পাঠান্তরম্।

‡ যজুরিদং ছন্দো নাস্তি।

¶ অহার্ষমিতি বহুষু পুস্তকেষু দৃশ্যতে।

§ অত্র কস্মিংশ্চিৎ পুস্তকেঽতিরিক্তঃ পাঠো বর্ত্ততে যথা—চক্ষুরাদীন্দ্রিয়োপচারে ব্রহ্মচারিণা অনেন মন্ত্রেণ প্রায়শ্চিত্তার্থং দ্বে আহুতী আজ্যলিপ্তসমিদ্ভ্যাং হূয়েতে, যথা—ওঁ পুনর্ম্মামৈত্বিন্দ্রিয়ং পুনরায়ুঃ পুনর্ভগঃ। পুনর্দ্রবিণমৈতু মাং পুনর্ব্রহ্ম পুনর্ম্মনঃ। পুনরাত্মা ম আগাৎ পুনশ্চক্ষুঃ পুনঃ শ্রোত্রং ম আগাৎ বৈশ্বানরোঽদব্ধস্তনূপোঽন্তস্তিষ্ঠত্বমৃতস্য কেতুঃ স্বাহা।

অক্ষারলবণং * সম্বৃতম্ উদকেনাভ্যুক্ষ্য † ওঁ অমৃতোপস্তরণমসি স্বাহা ইতি আপোশানং কৃত্বা, মধ্যমানামিকাঙ্গুষ্ঠ-ত্রিপর্ব্ব-গৃহীতেনান্নেন ওঁ প্রাণায় স্বাহা, ওঁ অপানায় স্বাহা, ওঁ সমানায় স্বাহা, ওঁ উদানায় স্বাহা, ওঁ ব্যানায় স্বাহা ইতি পঞ্চাহুতীরভ্যবহৃত্য, সর্ব্বত্র প্রাণাহুতিশেষং ভূমৌ নিক্ষিপ্য, বামহস্ত-বিধৃত-ভোজনপাত্রো বাগ্‌যতো ভুঞ্জীত। ভোজনাবসানে চ ওঁ অমৃতাপিধানমসি স্বাহা ইতি পুনরাপোশানং কৃত্বা আচামেৎ। এতচ্চাগ্নিকার্য্যং সমাবর্ত্তনপর্য্যন্তং সায়ংপ্রাতঃ প্রত্যহম্ অবশ্যং কার্য্যম্, ভোজনঞ্চ অনেন ক্রমেণ যাবজ্জীবং কর্ত্তব্যম্। ইতি উপনয়নকর্ম্ম সমাপ্তম্।

## অথ সাবিত্রচরুহোমঃ

অথ চতুর্থেঽহনি সাবিত্রচরুহোমঃ। তত্র প্রথমং পিতা পিতৃবৃতো ব্রহ্মচারিবৃতো বা অন্য এবাচার্য্যঃ সমুদ্ভবনামানমগ্নিং সংস্থাপ্য প্রাঙ্মুখ উপবিষ্টঃ তস্মিন্নেব অগ্নৌ চরুং শ্রপয়েৎ। তস্যানুষ্ঠানং যথা—অগ্নেঃ পশ্চিমায়াং দিশি প্রাগগ্রান্ কুশান্ আস্তীর্য্য, তদুপরি প্রক্ষালিতানীতং বারুণমুদুখল-মুষলং, বৈণবঞ্চ শূর্পং বারুণ-চমসস্থ-জল-প্রোক্ষিতং সংস্থাপ্য, ব্রীহীন্ যবান্ বা শূর্পে নিধায়, ওঁ সবিত্রে ত্বা জুষ্টং নির্ব্বপামি ইতি কাংস্যপাত্রেণ চরুস্থাল্যা বা উদুখলে স্থাপয়েৎ, দ্বিস্তূষ্ণীম্। ততো দক্ষিণহস্তমুপরি কৃত্বা মুষলেন অবহত্য শূর্পেণ প্রস্ফোটয়েৎ। ইত্থমেব বারত্রয়ং কৃত্বা, ত্রিঃ প্রক্ষাল্য, চরুস্থাল্যাম্ অমন্ত্রককৃতোত্তরাগ্রং পবিত্রং নিক্ষিপ্য, তদুপরি প্রক্ষালিততণ্ডুলান্ নিধায়, দুগ্ধং নিক্ষিপ্য স্তোকং স্তোকম্ উদকং দত্ত্বা, তন্মধ্যে খদিরপলাশোডুম্বরাণাম্ অন্যতমস্য প্রাদেশপ্রমাণম্ উভয়তঃ সার্দ্ধাঙ্গুষ্ঠপ্রমাণচতুষ্কোণ-পুষ্করং ‡ মেক্ষণং দক্ষিণাবর্ত্তেন ভ্রাময়িত্বা তথা পচেৎ, যথা অন্তরুষ্মণা সম্যক্ পাকো ভবতি, মণ্ডগালনং দাহশ্চ ন ভবতি। সম্যক্পাকে ভূতে মধ্যে ঘৃতস্রুবং দত্ত্বা জ্বলদগ্নিনা ঈশানকোণাদারভ্য চরুং প্রদক্ষিণীকৃত্য তমগ্নিং তত্রৈবাগ্নৌ ক্ষিপেৎ। ততশ্চরুমধ্যে ঘৃতস্রুবং দত্ত্বা প্রাগাদিদিক্‌চিহ্নিতং চরুম্ অবতার্য্য অগ্নেরুত্তরতঃ কুশোপরি স্থাপয়িত্বা, পুনর্মধ্যে

---

* তথা চ স্মৃতিঃ—গোক্ষীরং গোঘৃতঞ্চৈব ধান্যং মুদ্গাস্তিলা যবাঃ। অক্ষারলবণা হ্যেতে ক্ষারাশ্চান্যে প্রকীর্ত্তিতাঃ। হবিষ্যে গোঘৃতং মুখ্যং তদভাবে তু মাহিষম্। ইতি চ।

† প্রথমং ভূমৌ পঞ্চ অন্নভাগান্ ওঁ নাগায় নমঃ ওঁ কূর্ম্মায় নমঃ ওঁ কৃকরায় নমঃ ওঁ দেবদত্তায় নমঃ ওঁ ধনঞ্জয়ায় নমঃ ইতি বাহ্যপ্রাণেভ্যঃ নিবেদয়েৎ ইতি গণ্ডূষপ্রকারঃ।

‡ পুষ্করং মুখমিত্যর্থঃ।

ঘৃতস্রুবং দদ্যাৎ। ততঃ ভূমিজপাদি-স্রুবসংস্কার-পর্য্যন্তং কর্ম্ম কৃত্বা অগ্নেঃ পশ্চিমতঃ স্তরণকুশোপরি পূর্ব্বমাজ্যং পশ্চাচ্চরুং নিধায় উদকাঞ্জলিসেকং কৃত্বা বিরূপাক্ষজপান্তাং কুশণ্ডিকাং সমাপ্য প্রকৃতকর্ম্মারম্ভে প্রাদেশ-প্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ প্রক্ষিপেৎ। আজ্যতন্ত্রোপক্রমবিহিতস্ত মহা-ব্যাহৃতিহোমঃ চরুহোমত্বাৎ অস্য প্রথমং ন কর্ত্তব্যঃ, অন্তে তু কর্ত্তব্য এব বিহিতত্বাৎ। যদি সংক্ষেপঃ অপেক্ষিতঃ, জুহূর্বা ন প্রাপ্যতে, তদা চরুমধ্যে ঘৃতস্রুবং দত্ত্বা, তত্রৈব মেক্ষণেন সকৃদন্নং গৃহীত্বা, অগ্নিমধ্যে ওঁ সবিত্রে স্বাহা ইতি জুহুয়াৎ। ততো মেক্ষণমগ্নৌ তূষ্ণীং হুত্বা, মহাব্যাহৃতিহোমং (৪২ পৃঃ) কৃত্বা, প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা প্রকৃতং সমাপ্য উদীচ্যং শাট্যা-য়নহোমাদি-বামদেব্যগানান্তং (১৫ পৃঃ ১২ পং) নির্ব্বর্ত্ত্যাচার্য্যায় দক্ষিণা দেয়া। অথ পিতৈবাচার্য্যস্তদা কর্ম্মকারয়িতৃব্রাহ্মণায় দক্ষিণা দেয়া। অথ ফলভূয়স্ত্বমপে-ক্ষিতং, জুহূশ্চ * প্রাপ্যতে, তদা ভার্গবাদিপ্রবরাণাং জুহ্বাং পঞ্চ ঘৃতস্রুবান্ দত্ত্বা, ইতরপ্রবরাণাং ঘৃতস্রুবচতুষ্টয়ং দত্ত্বা, অগ্নেরুত্তরভাগে প্রাগ্‌গামিনীম্ আজ্যধারাং "ওঁ অগ্নয়ে স্বাহা" ইতি জুহুয়াৎ। † তথৈব অগ্নের্দক্ষিণভাগে "ওঁ সোমায় স্বাহা" ইতি জুহুয়াৎ।—অথ যদি ভৃগুগোত্রো ভার্গবপ্রবরো বা ব্রহ্ম-চারী, তদা জুহ্বাং ঘৃতস্রুবমেকং, চরোর্মধ্যে চ ঘৃতস্রুবমেকং দত্ত্বা তত্রৈব মেক্ষণেন অন্নম্ অবদায় ‡ জুহ্বাং স্থাপয়েৎ; অবদানস্থানে চ চরৌ ঘৃত-স্রুবং দদ্যাৎ। ততশ্চরোঃ পূর্ব্বভাগে ঘৃতস্রুবং দত্ত্বা, তত্রৈব মেক্ষণেন অন্নম্ অবদায় পুনরপি জুহ্বাং স্থাপয়েৎ; অবদানস্থানে চ চরৌ ঘৃতস্রুবং দদ্যাৎ। ততশ্চরোঃ পশ্চিমভাগে ঘৃতস্রুবং দত্ত্বা, তত্রৈব মেক্ষণেন অন্নম্ অবদায় পুন-রপি জুহ্বাং স্থাপয়েৎ; অবদানস্থানে চ চরৌ ঘৃতস্রুবং দদ্যাৎ। ততো জুহ্বাং সর্ব্বোপরি ঘৃতস্রুবং দত্ত্বা, অগ্নিমধ্যে "ওঁ সবিত্রে স্বাহা" ইতি জুহুয়াৎ।—অথ অন্যগোত্রঃ অন্যপ্রবরো বা ব্রহ্মচারী, তদা চরোঃ পশ্চিমভাগে ঘৃতস্রুবং দত্ত্বা অবদানং ন কর্ত্তব্যং, কিন্তু জুহ্বাং ঘৃতস্রুবং দত্ত্বা চরুমধ্যে প্রাগাবর্ত্ত-নমেব, চরোরুপরি চ ঘৃতস্রুবং দত্ত্বা হোতব্যম্।—ততো ভার্গবাদিপ্রবরো যদি ব্রহ্মচারী, তদা জুহ্বাং ঘৃতস্রুবদ্বয়ং দত্ত্বা, চরোঃ পূর্ব্বোত্তরভাগে ঘৃতস্রুবং দত্ত্বা, তত্রৈব মেক্ষণেন চরোর্বহুতরমন্নং গৃহীত্বা জুহ্বাং

* পলাশকাষ্ঠনির্ম্মিতার্দ্ধচন্দ্রাকৃতি যজ্ঞপাত্রম্ জুহূরিত্যমরঃ।

† এতৎপক্ষে অগ্ন্যাদিভ্যো মুষ্টিগ্রহণমপি কর্ত্তব্যম্।

‡ অবদায় খণ্ডশঃ আদায় ইত্যর্থঃ।

স্থাপয়েৎ; অবদানস্থানে চরৌ ঘৃতস্রুবং ন দদ্যাৎ। ততো জুহুস্থ-চরোরুপরি ঘৃতস্রুবদ্বয়ং দত্ত্বা, অগ্নেঃ পূর্ব্বোত্তরভাগে "ওঁ অগ্নয়ে স্বিষ্টকৃতে স্বাহা" ইতি জুহুয়াৎ।—অথ অন্যগোত্রঃ অন্যপ্রবরো বা ব্রহ্মচারী, তদা প্রথমম্ এক এব ঘৃতস্রুবো জুহ্বাং দাতব্যঃ।

ইতি সাবিত্রচরুহোমঃ।

## অথ সমাবর্ত্তনম্

কৃতবেদাধ্যয়নম্ * আচার্য্যানুমতং মাণবকং সমাবর্ত্তয়েৎ। তত্র প্রাতঃ-কৃতস্নানঃ কৃতবৃদ্ধিশ্রাদ্ধঃ পিতা কৃতবৃদ্ধিশ্রাদ্ধেণ পিত্রা বৃতো ব্রহ্মচারিবৃতো বা অন্য এবাচার্য্যঃ তেজোনামানমগ্নিং সংস্থাপ্য বিরূপাক্ষজপান্তাং কুশ-ণ্ডিকাং সমাপ্য মাণবকং দক্ষিণে নিধায়, প্রকৃতকর্ম্মারম্ভে প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা মহাব্যাহৃতিহোমং কুর্য্যাৎ। যথা—প্রজাপতিঋ্র্ষির্গায়ত্রীছন্দোঽগ্নির্দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ ভূঃ স্বাহা। প্রজাপতিঋ্র্ষিরুষ্ণিক্ ছন্দো বায়ুর্দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ ভুবঃ স্বাহা। প্রজাপতিঋ্র্ষিরনুষ্টুপ্ ছন্দঃ সূর্য্যো দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ স্বঃ স্বাহা। তত আচার্য্যঃ পঞ্চাহুতী-র্জুহুয়াৎ। যথা—প্রজাপতিঋ্র্ষিরগ্নির্দেবতা সমাবর্ত্তনহোমে বিনিয়োগঃ। ওঁ অগ্নে ব্রতপতে ব্রতমচারিষং † তত্তে প্রব্রবীমি তদশকং তেনারাৎ সমিদমহ-মনৃতাৎ সত্যমুপাগাং স্বাহা। (১) প্রজাপতিঋ্র্ষির্বায়ুর্দেবতা সমাবর্ত্তনহোমে বিনিয়োগঃ। ওঁ বায়ো ব্রতপতে ব্রতমচারিষং তত্তে প্রব্রবীমি তদশকং তেনারাৎ সমিদমহমনৃতাৎ সত্যমুপাগাং স্বাহা। প্রজাপতিঋ্র্ষিঃ সূর্য্যো দেবতা সমাবর্ত্তনহোমে বিনিয়োগঃ। ওঁ সূর্য্য ব্রতপতে ব্রতমচারিষং তত্তে প্রব্রবীমি তদশকং তেনারাৎ সমিদমহমনৃতাৎ সত্যমুপাগাং স্বাহা। প্রজা-পতিঋ্র্ষিশ্চন্দ্রো দেবতা সমাবর্ত্তনহোমে বিনিয়োগঃ। ওঁ চন্দ্র ব্রতপতে ব্রত-মচারিষং তত্তে প্রব্রবীমি তদশকং তেনারাৎ সমিদমহমনৃতাৎ সত্যমুপাগাং স্বাহা। প্রজাপতিঋ্র্ষিরিন্দ্রো দেবতা সমাবর্ত্তনহোমে বিনিয়োগঃ। ওঁ

---

(১) অগ্নে ব্রতপতে ইত্যাদিমন্ত্রপঞ্চকস্য ব্যাখ্যা উপনয়নে দ্রষ্টব্যা। পরন্তু যত্র যত্র ভবিষ্যতি প্রয়োগঃ তত্র তত্র অতীতে লুঙি প্রয়োগঃ কর্ত্তব্যঃ।

---

* কৃতবেদাধ্যয়নশ্রুত্যা কেচিদত্র ইষেত্বোর্জ্জেত্বেত্যাদি মন্ত্রচতুষ্টয়ং পাঠয়ন্তি।

† অচার্ষং ইতি কচিৎ পাঠঃ।

ব্রতানাং ব্রতপতে ব্রতমচারিষং তত্তে প্রব্রবীমি তদশকং তেনারাৎ সমিদমহমনৃতাৎ সত্যমুপাগাং স্বাহা। তত আচার্য্য উদগগ্রেষু কুশেষু উত্তরাভিমুখ উপবিশতি, ব্রহ্মচারী তু আচার্য্যস্য পশ্চিমোত্তরকোণে উদগগ্রেষু কুশেষু প্রাঙ্মুখ উপবিশতি। ততঃ শীতোষ্ণ-মিশ্রিতাভিরদ্ভিঃ ব্রীহি-যব-মাষ-মুদ্গাদ্যোষধি-যুক্তাভিঃ চন্দনাদি-গন্ধবাসিতাভিঃ পাত্রান্তরস্থিতাভিঃ স্বাঞ্জলিং পূরয়িত্বা ব্রহ্মচারী আচার্য্যপ্রেরিতঃ অনেন মন্ত্রেণ ভূমৌ উদকাঞ্জলিং ত্যজেৎ—প্রজাপতির্ঋষিরগ্নয়ো দেবতাঃ * সমাবর্ত্তনে ব্রহ্মচার্য্যুদকাঞ্জলিত্যাগে বিনিয়োগঃ। ওঁ যে অপ্স্বন্তরগ্নয়ঃ প্রবিষ্টা গোহ্য উপগোহ্যো ময়ূকো মনোহাঃ। খলো বিরুজস্তনূদূষিরিন্দ্রিয়হা অতি তান্ৎ সৃজামি। (২) ততঃ অপরমঞ্জলিং পূরয়িত্বা, অনেন মন্ত্রেণ ভূমৌ ত্যজেৎ—প্রজাপতির্ঋষির্বৃহতীচ্ছন্দঃ † অপাং ঘোরক্রূরাশান্তরূপাণি দেবতাঃ সমাবর্ত্তনে ব্রহ্মচার্য্যুদকাঞ্জলিত্যাগে বিনিয়োগঃ। ওঁ যদপাং ঘোরং যদপাং ক্রূরং যদপামশান্তমভি ( অতি ) তৎ সৃজামি। (৩) ততঃ পুনরপি আচার্য্যপ্রেষিতো ব্রহ্মচারী তাভিরদ্ভিঃ স্বাঞ্জলিং পূরয়িত্বা, অনেন মন্ত্রেণ আত্মানমভিষিঞ্চেৎ—প্রজাপতির্ঋষী রোচনোঽগ্নির্দেবতা সমাবর্ত্তনে ব্রহ্মচার্য্যুদকাঞ্জলিসেকে বিনিয়োগঃ। ওঁ যো রোচনস্তমিহ গৃহ্নামি। তেনাহং মামভিষিঞ্চামি। (৪)

---

(২) যে অগ্নয়ঃ বক্ষ্যমাণাঃ অপ্সু অন্তঃ মধ্যে প্রবিষ্টাঃ, কে পুনস্তে? গোহ্যঃ উপগোহ্যঃ ময়ূকঃ মনোহাঃ খলঃ বিরুজঃ তনূদূষিঃ ইন্দ্রিয়হাঃ তান্ এতান্ অষ্টৌ অগ্নান্ কুলদূষণান্ অতিসৃজামি ত্যজামি। যেনেদং জলং মম স্নানযোগ্যং ভবত্বিত্যর্থঃ। মনোহা ইন্দ্রিয়হাঃ ইতি জহাতেঃ ক্বিপ্।

(৩) অপাং সম্বন্ধি যৎ ঘোরং ভীমং যৎ চ ক্রূরং নিষ্ঠুরং যচ্চ অশান্তং রুজাকরং তৎ সর্ব্বমভিসৃজামি অভি সর্ব্বতোভাবেন ত্যজামি, এতৎত্যাগে প্রয়োজনং প্রাগুক্তম্।

(৪) গোহ্যাদিভ্যোঽগ্নিভ্যো যো রোচনাখ্যোঽগ্নিঃ দীপ্তিকরঃ তম্ ইহ সমাবর্ত্তনকর্ম্মণি অহং ব্রহ্মচারী গৃহ্নামি। গ্রহণস্য ফলমাহ, তেন রোচনেন জলান্তঃস্থিতেন মাং আত্মানমহম্ অভিষিঞ্চামি আভিমুখ্যেন স্নাপয়ামীত্যর্থঃ। কিমর্থং? যশসে ইত্যাদি।

---

* যজুরিদং ছন্দো নাস্তি।

† যজুরিদং তেন ছন্দো নাস্তীতি বহুপুস্তকসম্মতম্।

ততঃ পুনরপি পূর্ব্ববদেব স্বাঞ্জলিং পূরয়িত্বা, অনেন মন্ত্রেণ আত্মানমভি-ষিঞ্চেৎ—প্রজাপতির্ঋষী রোচনোঽগ্নির্দেবতা সমাবর্ত্তনে ব্রহ্মচার্য্যুদকাঞ্জলি-সেকে বিনিয়োগঃ। ওঁ যশসে তেজসে ব্রহ্মবর্চ্চসায় বলায়েন্দ্রিয়ায় বীর্য্যায়ান্না-দ্যায় রায়স্পোষায় ত্বিষ্ট্যা অপচিত্যৈ। (৫) ততঃ পুনরপি উদকাঞ্জলিং গৃহীত্বা অনেন মন্ত্রেণ আত্মানম্ অভিষিঞ্চেৎ—প্রজাপতির্ঋষিঃ ষড়ষ্টকা মহাপঙ্‌ক্তি-শ্ছন্দোঽশ্বিনৌ দেবতে সমাবর্ত্তনে ব্রহ্মচার্য্যুদকাঞ্জলিসেকে বিনিয়োগঃ। ওঁ যেন স্ত্রিয়মকৃণুতং যেনাপামৃষতং সুরাং যেনাক্ষানভ্যষিঞ্চতং, যেনেমাং পৃথিবীং মহীম্। যদ্‌বাং তদশ্বিনা যশস্তেন মামভিষিঞ্চতং। (৬) ততঃ পুনরপি তাদৃশেনাঞ্জলিনা ব্রহ্মচারী তূষ্ণীমাত্মানমভিষিঞ্চেৎ। ততঃ অভিষেকানন্তরম্ আদিত্যাভিমুখো ব্রহ্মচারী উত্থায় চতুর্ভির্মন্ত্রৈঃ আদিত্য-মুপতিষ্ঠেত—প্রজাপতির্ঋষিরাদিত্যো দেবতা আদিত্যোপস্থানে বিনিয়োগঃ। ওঁ উদ্যন্ ভ্রাজভৃষ্টিভিরিন্দ্রো মরুদ্ভিরস্থাৎ প্রাতর্যাবভিরস্থাৎ। দশসনিরসি,

---

(৫) যশসে কীর্ত্তয়ে তেজসে গুণপ্রকাশনার্থং ব্রহ্মবর্চ্চসায় বেদবিহিত-তপঃপ্রাপ্ত্যর্থং বলায় শরীরোপচয়ার্থম্ ইন্দ্রিয়ায় চক্ষুরাদিদার্ঢ্যার্থং বীর্য্যায় অন্তঃসারার্থম্ অন্নাদ্যায় ব্রীহ্যাদ্যর্থং রায়স্পোষায় ধনসমৃদ্ধ্যৈ পোষণার্থং ত্বিষ্ট্যৈ ত্বিষ্টিঃ দীপ্তিঃ কান্তিস্তদর্থং অপচিত্যৈ অপচিতিঃ পূজা তৎপ্রাপ্ত্যর্থম্ অনেন যথেষ্টফলপ্রদত্বং রোচনস্যোচ্যতে।

(৬) অশ্বিনৌ দেবভিষজৌ সর্ব্বেষাং কর্ম্মণামধিষ্ঠাতারৌ, অনেন স্তুতিপূর্ব্বকং সমাবর্ত্তমানেন ব্রহ্মচারিণা প্রার্থ্যতে—হে অশ্বিনা! অশ্বিনৌ! সুপাং সুলুগিত্যাদিনা প্রথমাদ্বিবচনস্যআআদেশঃ। যেন কর্ম্মণা স্বরাম্ অপুণ্য-লাখ্যাং স্ত্রিয়ং যুবাম্ অকৃণুতং হিংসিতবন্তৌ, যেন চ যুবাং সুরাং পৈষ্টীং মদিরাং অপামৃষতম্ খণ্ডিতবন্তৌ, যেন চ অক্ষান্ পাশকান্ অপামৃষত-মিতিসম্বন্ধঃ যেন ইমাং পৃথিবীং, কিম্ভূতাং? মহীং মহতীং অভ্যষিঞ্চতং অভিষিক্তবন্তৌ শস্যপ্ররোহণদ্বারেণ সম্বর্দ্ধিতবন্তৌ। ইদানীং তৌ পরোক্ষৌ সন্তৌ প্রত্যক্ষীকৃত্য উচ্যতে। পরোক্ষকৃতাশ্চ মন্ত্রা ভূয়িষ্ঠাঃ। হে অশ্বিনৌ! যত্তদেবংভূতং বাং যুবয়োঃ যশঃ শোভনং কর্ম্ম তেন মামভিষিঞ্চতম্ আভিমুখ্যেন স্নাপয় প্রার্থনে লোট্। যেন যুবাভ্যামহং অভিষিক্তঃ কৃতকৃত্যো ভবামীতি।

দশসনিং মা কুর্ব্বা ত্বা বিশাম্যা মা বিশ। (৭) প্রজাপতিঋর্ষিরাদিত্যো দেবতা আদিত্যোপস্থানে বিনিয়োগঃ। ওঁ উদ্যন্ ভ্রাজভৃষ্টিভিরিন্দ্রো মরুদ্ভিরস্থাৎ সান্তপনেভিরস্থাৎ। শতসনিরসি, শতসনিং মা কুর্ব্বা ত্বা বিশম্যা মা বিশ। (৮) প্রজাপতিঋর্ষিরাদিত্যো দেবতা আদিত্যোপস্থানে বিনিয়োগঃ। ওঁ উদ্যন্ ভ্রাজভৃষ্টিভিরিন্দ্রো মরুদ্ভিরস্থাৎ সায়ংযাবভিরস্থাৎ। সহস্রসনিরসি সহস্রসনিং মা কুর্ব্বা ত্বা বিশাম্যা মা বিশ। (৯) প্রজাপতিঋর্ষিরনুষ্টুপ্ ছন্দ আদিত্যো দেবতা আদিত্যোপস্থানে বিনিয়োগঃ। ওঁ চক্ষুরসি চক্ষুষ্টমস্তব মে পাপ্মানং জহি। সোমস্ত্বা রাজা অবতু, নমস্তেঽস্তু মা মা হিংসীঃ। (১০)

---

(৭) অভিবেকানন্তরমাদিত্যমুপতিষ্ঠেত, ইদি পরমৈশ্বর্য্যে ইতি পরমৈশ্বর্য্যযোগাদিন্দ্র আদিত্যোঽপি উদ্যন্ উদীয়মানঃ, মরুদ্ভিঃ দেবৈঃ সহ অস্থাৎ স্থিতবান্। কিম্ভূতৈঃ? ভ্রাজভৃষ্টিভিঃ ভ্রাজা দীপ্তা ভ্রাজনং ভৃষ্টিঃ দীপ্তিঃ ভ্রাজা ভৃষ্টির্যেষাং তে ভ্রাজভৃষ্টয়স্তৈঃ সাতিশয়দীপ্তিযুক্তৈরিত্যর্থঃ। ন কেবলং মরুদ্ভিঃ অস্থাৎ প্রাতর্যাবানো দেববিশেষাঃ তৈঃ সহাস্থাৎ স্থিতবান্, কিঞ্চ ত্বং দশসনিঃ অসি। দশানাং অভিলষণীয়ানাং পদার্থানাং সনির্দাত্রী অসি ভবসি। ষণু দানে সণোতের্বাচ্ছন্দসি বণসন রক্ষিমথামিতি ইন্ প্রত্যয়ঃ, দশানামিষ্টানাং যতস্ত্বং দাতা অতস্ত্বমপি দশসনিং কুরু, ত্বা ত্বাং অহমাবিশামি অর্থিত্বেনোপধাবামি উপগচ্ছামীত্যর্থঃ। অতস্ত্বমপি মা মাম্ আবিশ অভিমতফলদাতৃত্বেনাভিমুখো ভবেত্যর্থঃ।

(৮) সান্তপনাঃ দেববিশেষাঃ তৈঃ সহাস্থাদিতি সম্বন্ধঃ। সান্তপনেভিরিতি বহুলং ছন্দসীতি ভিস্ ঐস্ ন ভবতি, অকারস্ত একারঃ। ব্যবহিতোপসর্গঃ—(আ) ব্যবহিতাশ্চেতি বচনাৎ বিশামীত্যনেন সহ সম্বন্ধঃ আবিশাম্যেব, মা বিশ মা মাং আবিশেত্যর্থঃ। শতসনিঃ শতদায়ী। শেষং পূর্ব্ববৎ।

(৯) সায়ংযাবানো দেববিশেষাস্তৈঃ সহাস্থাদিতি সম্বন্ধঃ। শেষং পূর্ব্ববৎ।

(১০) অনেন সূর্য্যঃ প্রার্থ্যতে—হে সূর্য্য! প্রাগুক্তেন প্রকারেণাভিমুখ্যেনাভিমুখীভূতস্ত্বং মে মম পাপ্মানং পাপমপজহি স্ফোটয় ইতি যাবৎ। কিম্ভূতঃ? ত্রৈলোক্যস্যাপি চক্ষুঃ নেত্রদর্শনশক্তিঃ ত্বমসি ভবসি, কিঞ্চ অস্য লোকস্যাপি চক্ষুস্ত্বং দশসনিশক্তিরসি ভবসি, কিঞ্চ হে সূর্য্য! ভগবন্!

ততো ব্রহ্মচারী মেখলাম্ অনেন মন্ত্রেণ অধস্তান্মোচয়েৎ—শুনঃশেপ(ফ)ঋষিস্ত্রিষ্টুপ্‌ছন্দো বরুণো দেবতা মেখলামোচনে বিনিয়োগঃ। ওঁ উদুত্তমং বরুণপাশমস্মদবাধমং বিমধ্যমং শ্রথায়। অথাদিত্যব্রতে বয়ং তবানাগসো অদিতয়ে স্যাম। (১১) তত আচার্য্যো বৈল্বং পালাশং বা দণ্ডম্ অগ্নৌ ক্ষিপ্ত্বা, মহাব্যাহৃতিহোমং কৃত্বা, (৮৫ পৃঃ ৯ পং) প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা প্রকৃতং কর্ম্ম সমাপ্য, সর্ব্বকর্ম্মসাধারণং শাট্যায়নহোমাদি-বামদেব্যগানান্তম্ উদীচ্যং কর্ম্ম (১৫ পৃঃ ১২ পং) সমাপয়েৎ। ততঃ স্নাতকো * ব্রাহ্মণান্ ভোজয়িত্বা, স্বয়ঞ্চ ভুক্ত্বা, শিখাবর্জ্জং কেশ-শ্মশ্রু-রোমনখানাং স্ফোটনং কারয়িত্বা † স্নাত্বা অহতে ‡ বাসসী পরিধায় কুণ্ডলাদ্যলঙ্কৃতঃ

---

সোমঃ ব্রাহ্মণানামোষধীনাঞ্চ রাজা পতিঃ ত্বা ত্বাং অবতু আপ্যায়তাং দেবানামন্নং চন্দ্র ইতি কৃত্বা তদ্ধি দেবা ভক্ষয়ন্তি উপজীবয়ন্তি, ওষধিরূপাহুতিদ্বারা আহুত্যা হি আপ্যায্যতে, হে সূর্য্য! উক্তবিশেষণসম্পন্নায় তুভ্যং নমোঽস্তু মা প্রতিষেধে মা মাং মা হিংসীঃ মা বধিষ্যসি ইত্যর্থঃ। চক্ষুষ্টমিতি যুষ্মত্তৎ চক্ষুঃষন্তঃ পাদমিতি ষত্বম্ টুত্বম্। অপজহীতি ব্যবহিতোপসর্গসম্বন্ধঃ।

(১১) অনয়া ত্রিষ্টুভা শুনঃশেপঋষিস্ত্রিভিঃ পাশৈর্ব্বদ্ধস্তদ্বিমোক্ষণায় বরুণং প্রার্থয়ামাস—হে ভগবন্ বরুণ! অস্মৎসকাশাৎ উত্তমং কণ্ঠাবস্থিতং পাশবন্ধনং উৎশ্রথায় ঊর্দ্ধমবতারয়, উত্তমাদিপদব্যবহিতেন শ্রথায়েত্যনেন সহ সম্বধ্যতে ছন্দসি ব্যবহিতাশ্চেতি বচনাৎ। উৎশ্রথায়েতি শ্রথি শৈথিল্যে ণিচ্ লোট্ হি গুণেঽয়াদেশে হিলোপে ছান্দসং দীর্ঘত্বম্। ঊর্দ্ধমবতারয় অস্মদ্ বিমোচয় ইত্যর্থঃ। অধমং পাদাবস্থিতং অবশ্রথায় অধস্তাদবতারয়. মধ্যমঞ্চ কটিদেশাবস্থিতং বিশ্রথায় বিশিথিলীকুরু। অথ পাশবিমোচনানন্তরং ভূয়োঽপি বরুণঃ প্রার্থ্যতে শুনঃশেপঋষিণা—অদিতেরপত্যমিতি ব্যুৎপত্ত্যা আদিত্যশব্দেন বরুণ এবোচ্যতে। হে আদিত্য! অদিতিপুত্র বরুণ! তব প্রসাদেন পাশত্রয়মুক্তাঃ সন্তঃ তব ব্রতে পরিচর্য্যালক্ষণে বয়মনাগসঃ নিরপরাধাঃ স্যাম ভবেম, ন কেবলং তব অদিতয়ে অদিতেশ্চ সর্ব্বদেবমাতুরিত্যর্থঃ। অদিতয়ে ইতি ষষ্ঠ্যর্থে চতুর্থী বয়ং স্যামেতি সম্বন্ধঃ।

---

* স্নাতকঃ গুরুকুলাৎ প্রত্যাবৃত্তো ব্রহ্মচারী ইত্যর্থঃ।

† পুনর্মুণ্ডনং স্বয়ং ভোজনঞ্চ গুরুকুলাৎ প্রত্যাবৃত্য মুখ্যকালে সমাবর্ত্তনকর্ম্মণি কর্ত্তব্যে বোধ্যম্।

‡ ঈষদ্ধৌতং নবং শ্বেতং সদশং যন্ন ধারিতম্। অহতং তদ্বিজানীয়াৎ সর্ব্বকর্ম্মসু শোভনম্॥

অনেন মন্ত্রেণ যজ্ঞোপবীতদ্বয়ং পরিদধ্যাৎ—প্রজাপতির্ঋষির্যজ্ঞোপবীতং দেবতা যজ্ঞোপবীতপরিধানে বিনিয়োগঃ। ওঁ যজ্ঞোপবীতমসি, যজ্ঞস্য ত্বা যজ্ঞোপবীতেনোপনহ্যামি। পূর্ব্বোপবীতং জলে ক্ষিপেৎ। কালান্তরেঽপি ছিন্নং যজ্ঞোপবীতং জলে ক্ষিপ্ত্বা, অপরম্ এতন্মন্ত্রাভিমন্ত্রিতং গৃহ্ণীয়াৎ। ততঃ স্নাতকঃ অনেন মন্ত্রেণ মূর্দ্ধ্নি স্রজং বধ্নীয়াৎ—প্রজাপতির্ঋষিঃ শ্রীর্দেবতা স্রগ্বন্ধনে বিনিয়োগঃ। ওঁ শ্রীরসি ময়ি রমস্ব। (১২) ততঃ স্নাতকঃ—প্রজাপতির্ঋষিরুপানহৌ দেবতে উপানৎপরিধানে বিনিয়োগঃ। ওঁ নেত্র্যৌ স্থো নয়তং মাং। (১৩) অনেন মন্ত্রেণ চর্ম্মপাদুকাযুগলে পাদৌ নিদধ্যাৎ। ততঃ স্নাতকঃ স্বপ্রমাণং বৈণবং দণ্ডম্ অনেন মন্ত্রেণ গৃহ্ণাতি—প্রজাপতির্ঋষির্দণ্ডো দেবতা দণ্ডগ্রহণে বিনিয়োগঃ। ওঁ গন্ধর্ব্বোঽস্যুপাব। * উপ মামব। (১৪) ততঃ কৃষ্ণসারাজিনং পূর্ব্ব-যজ্ঞোপবীতং মৌঞ্জ-মেখলাঞ্চ বংশদণ্ডোপরি বধ্নীয়াৎ। ততঃ স্নাতকঃ আচার্য্যসমীপং গত্বা, সপরিষদমাচার্য্যম্ † অনেন মন্ত্রেণ পশ্যেৎ—প্রজাপতির্ঋষিরাচার্য্যপরিষদৌ দেবতে আচার্য্যপরিষদ্বীক্ষণে বিনিয়োগঃ। ওঁ যক্ষমিব চক্ষুষঃ প্রিয়ো বো ভূয়াসম্। (১৫) অথ স্নাতকঃ আচার্য্যসমীপং গত্বা উপবিশ্য, প্রসারিতাঙ্গুলিনা

(১২) হে স্রক্! মালে! ত্বং শ্রীরসি লক্ষ্মীর্ভবসি অতো ময়ি রমস্ব অবস্থানং কুরু।

(১৩) হে উপানহৌ, মাং যুবাম্ ইষ্টফলপ্রাপ্তয়ে নয়তং দেশান্তরং প্রাপয়তম্। কুতঃ? যতো নেত্র্যৌ স্থঃ নয়নশক্তিপ্রদানশীলে প্রাপণশীলে যুবাং স্থঃ ভবথঃ, নহি ভবতীভ্যাং বিনা পদমপি গন্তুং শক্যতে।

(১৪) অনেন দণ্ডঃ প্রার্থ্যতে—হে দণ্ড! ত্বং মা মাং দুরিতেভ্যঃ উপাব উপসমীপে ভূত্বা অব রক্ষ, যতস্ত্বং গন্ধর্ব্বঃ আদিত্যোঽসি, রক্ষণ-কর্ত্তাসি, গন্ধর্ব্ব এব রক্ষণে সমর্থঃ (যুগপদুপচারাৎ) উপ মামব উপ সমীপে ভূত্বা মামবেত্যর্থঃ। অব রক্ষণে ব্যবহিতোপসর্গেণ সম্বন্ধঃ।

(১৫) হে আচার্য্য! পরিষৎসমেত! বঃ যুষ্মাকং চক্ষুষঃ লোচনস্য প্রিয়ঃ বল্লভঃ অহং ভূয়াসং ভবামি। ক ইব? যক্ষমিব যথা যক্ষো দর্শনীয়তয়া

* কেষুচিৎ পুস্তকেষু 'গন্ধর্ব্বোঽস্যুপমামব' ইতি পাঠো দৃশ্যতে, তদসঙ্গতং গুণবিষ্ণুনা অস্যুপাব উপ মামব ইত্যস্যৈব ব্যাখ্যাতত্বাৎ।

† পরিষৎ শিষ্যগোষ্ঠী তৎসহিতমিত্যর্থঃ।

দক্ষিণহস্তেন মুখমাচ্ছাদ্য, মুখভবং বায়ুং স্পৃশন্ ইমং মন্ত্রং পঠেৎ— প্রজাপতির্ঋষিরনুষ্টুপ্ ছন্দো জিহ্বা দেবতা মুখ্যপ্রাণস্পর্শনে বিনিয়োগঃ। * ওঁ ওষ্ঠাপিধানা নকুলী, দন্তপরিমিতঃ পবিঃ। জিহ্বে মা বিহ্বলো বাচং, চারুমাদ্যেহ বাদয়। (১৬) অথ আচার্য্যস্তমর্ঘ্যং † পাদ্যাদিভিরভ্যর্চ্চয়েৎ। ততঃ স্নাতকো গোযুগসহিতস্য রথস্য সমীপং গত্বা, পক্ষঃশব্দবাচ্যং কূবরবাহু-শব্দবাচ্যং বা রথাবয়বদ্বয়ং স্পৃশন্ অনেন মন্ত্রেণ পাদত্রয়েণ ‡ রথমা-রোহেৎ। প্রজাপতির্ঋষিঃ পঙ্‌ক্তিশ্ছন্দো রথো দেবতা রথারোহণে বিনিয়োগঃ। ওঁ বনস্পতে বীড়্বঙ্গো হি ভূয়া অস্মৎসখা প্রতরণঃ সুবীরঃ। গোভিঃ সন্নদ্ধো অসি বীড়য়স্ব। (১৭) ততঃ চতুর্থপাদেন তত্র উপবিশতি।

---

সর্ব্বলোকচক্ষুষাং প্রিয়ো ভবতি তদ্বদহমপি যুষ্মচ্চক্ষুষামিত্যর্থঃ। যক্ষমিব যক্ষ ইতি ব্যত্যয়ো বহুলমিতি প্রথমার্থে দ্বিতীয়ৈকবচনম্। অথবা যক্ষমিব অন্নমিব অথবা বর্গ্যো জকারঃ, চক্ষুষ ইতি জাতাবেকবচনম্।

(১৬) স্নাতকেন জিহ্বা প্রার্থ্যতে—হে জিহ্বে! অস্মিন্ প্রস্তুতে কর্ম্মণি অদ্য ত্বং মা বিহ্বল, উ পাদপূরণে (জ্বল হ্বল চলনে) মা চলিষ্যসি মা মাং বাচং বাদয় সমুচ্চারয়, কথং চারু শোভনং যথা ভবতি। কিম্ভূতা ত্বং? ওষ্ঠাপি-ধানা ওষ্ঠঃ অপিধানম্ আবরণং যস্যাঃ সা ত্বং নকুলী চঞ্চলবচনস্বভাবা, মা চলিষ্যসি, ত্বয়ি চলন্ত্যাং চারুবাগুচ্চারণং ন ভবতি। পুনরপি সৈবোচ্যতে, পবিঃ বজ্রো ভবসি। কিম্ভূতঃ পবিঃ? দন্তপরিমিতঃ দন্তাঃ পরিমিতং পরিমাণং যস্য পবেঃ স দন্তাবরণ ইত্যর্থঃ।

১৭। অনেন রথঃ প্রার্থ্যতে—বনস্পতিবিকারত্বাৎ বনস্পতিশব্দেন রথ এবোচ্যতে। হে বনস্পতে! রথ! বীড়্বঙ্গো ভূয়াঃ মহাভারসহাঙ্গো ভূয়া ইত্যর্থঃ। বিড়ূনি দৃঢ়ানি মহাভারসহানি অঙ্গানি চক্রকূবরপ্রভৃতীনি যস্য স ত্বং তথোচ্যসে, হি পাদপূরণে, তথা অস্মৎসখা অস্মাকং মিত্ররূপো ভূয়াঃ, তথা প্রতরণঃ প্রকর্ষেণ তরন্তি দুর্গাণি যেন স তথা, তথা সুবীরঃ শোভনো বীরঃ

---

* কেষুচিৎ পুস্তকেষু মুখপ্রাণেতি লিখিতম্।
† অর্ঘ্যাব্ অর্ঘপ্রাপ্তিযোগ্যমিত্যর্থঃ। ষড়র্ঘ্যা ভবন্তি স্নাতকা ইত্যাদয়ঃ। ইতি বচনাৎ।
‡ পাদত্রয়েণ চতুষ্পাদমন্ত্রস্য পাদত্রয়মাত্রমুচ্চার্য্যেত্যর্থঃ।

ওঁ আস্থাতা তে জয়তু জেত্বানি। (১৮) ততঃ প্রাঙ্মুখ উদঙ্মুখো বা স্নাতকো রথেন গত্বা, প্রদক্ষিণং পরাবৃত্য আচার্য্যসমীপমাগচ্ছতি। আচার্য্যঃ পুনরর্ঘ্যায় পাদ্যাদিকং দদ্যাৎ। ততো যদি পিতৈবাচার্য্যঃ, তদা কর্ম্মকারয়িতৃব্রাহ্মণায় দক্ষিণাং দদ্যাৎ; যদ্যন্য এবাচার্য্যঃ, তদা যেন বৃতঃ, স তস্মৈ দক্ষিণাং দদ্যাৎ।

ইতি সমাবর্ত্তনকর্ম্ম সমাপ্তম্।

ইতি সামগানাং ভবদেবকৃতা দশসংস্কারপদ্ধতিঃ সমাপ্তা।

---

সুসারথির্যস্য স ত্বং গোভিঃ বলীবর্দ্দৈঃ সন্নদ্ধঃ সংযুক্তঃ, গোচর্ম্মভির্বা সন্নদ্ধঃ যতস্ত্বমেবংভূতঃ অতোঽস্মানপি বীড়য়স্ব বিড়ুশব্দঃ দৃঢ়বচনঃ দৃঢ়াবয়ববান্ কুর্ব্বিত্যর্থঃ। বীড়্বঙ্গ ইতি বিড়ুশব্দস্য ছান্দসং দীর্ঘত্বং এবং বীড়য়স্বেতি।

(১৮) কিন্তু আস্থাতা আরোঢ়া তে তব সম্বন্ধীনি জেত্বানি জেতব্যানি দ্বিষদ্বৃন্দানি জয়তু বশীকরোতু। জেতব্যানীতি জি জয়ে কৃত্যার্থে ত্বন্ প্রত্যয়ঃ।

## পরিশিষ্টম্

চরুহোমে চরুপরিমাণং যথাহ গোভিলঃ—চতুর্মুষ্টিশ্চরুঃ কার্য্যশ্চতুর্ণামুত্তরোঽপি বা।

### অথ ইধ্মকুশানাং গ্রাহ্যতাগ্রাহ্যতাবিচারঃ।

যথা গৃহ্যসংগ্রহে—দর্ভাঃ কৃষ্ণাজিনং মন্ত্রা ব্রাহ্মণাশ্চ বিশেষতঃ।
নৈতে নির্ম্মাল্যতাং যান্তি নিযোজ্যাস্তু পুনঃ পুনঃ॥

স্মৃত্যন্তরেষু—

সংগ্রহাদ্‌বৎসরং যাবৎ শুদ্ধিঃ স্যাদিধ্মবর্হিষাম্।
অতঃপরং ন গৃহ্ণীয়াদ্‌জপাদৌ যজ্ঞকর্ম্মণি॥

অত্র—

মাসে নভস্যমাবস্যা তস্যাং দর্ভচয়ো মতঃ।
অযাতযামাস্তে দর্ভা বিনিযোজ্যাঃ পুনঃ পুনঃ।
ইতি মরীচিবচনম্।
বার্ষিকাংশ্চতুরো মাসান্ নাহরেৎ কুশমৃত্তিকাঃ।
আদদীত স্বভাবে তু সদ্যো যস্যোপযোজনম্॥
ইতি শিবরহস্যীয়স্য নিষেধস্যাপবাদকম্।

পরন্তু সর্ব্বত্র ন দর্ভাণামনির্ম্মাল্যতা কিন্তু যজ্ঞাদিষ্বেব। তথা চ গোভিলগৃহ্য—দর্ভাঃ পিণ্ডেষু নির্ম্মাল্যা বিপ্রাঃ প্রেতান্নভোজনে ইত্যাদি নির্ম্মাল্যাঃ কর্ম্মানর্হা ইত্যর্থঃ। তথা—পিণ্ডার্থং যে স্তৃতা দর্ভাস্তর্পণন্তু কৃতন্তু যৈঃ। ধৃত্বা কৃতে চ বিণ্মূত্রে ত্যাগস্তেষাং বিধীয়তে॥

# যজুঃ-সংস্কারপদ্ধতিঃ

## ( পশুপতিকৃতা ব্রহ্মসংস্কারমঞ্জরীধৃতা চ )

### অথ যজুষাং সামান্য-কুশণ্ডিকা

তত্র বেদ্যাঃ পশ্চিমে প্রাঙ্মুখঃ কর্ত্তা স্নাতঃ শুচির্দ্বিরাচান্ত উপবিশ্য হস্তপ্রমাণং স্থণ্ডিলং কৃত্বা কুশেন ত্রিঃ সম্মৃজ্য গোময়েনোপলিপ্য স্থণ্ডিল-মধ্যে স্ফেন কুশেন বা পূর্ব্বাগ্রং প্রাদেশপ্রমাণং সপ্তাঙ্গুলান্তরিতং রেখাত্রয়ং সমুল্লিখ্য অঙ্গুষ্ঠানামিকাভ্যাং তত্রোৎকীর্ণমৃত্তিকামুদ্ধৃত্য জলেন রেখাত্রয়ং ত্রিরভ্যুক্ষ্যাত্মদক্ষিণে কাংস্যপাত্রেণ বা নবশরাবেণাগ্নিমানীয় তস্মাজ্জ্বল-দিন্ধনং গৃহীত্বা ওঁ ক্রব্যাদমগ্নিং প্রহিণোমি দূরং যমরাজ্যং গচ্ছতু রিপ্রবাহ ইতি ক্রব্যাদাংশং পরিত্যজ্যাপরমগ্নিং গৃহীত্বা ওঁ ইহৈবায়মিতরো জাতবেদা দেবেভ্যো হব্যং বহতু প্রজানন্ ইতি মন্ত্রেণাভিমুখং তৃতীয়রেখোপরি সংস্থাপ্য কৃতাঞ্জলিঃ পঠেৎ। ওঁ সর্ব্বতঃ পাণিপাদান্তঃ সর্ব্বতোঽক্ষিশিরো-মুখঃ। বিশ্বরূপো মহানগ্নিঃ প্রণীতঃ সর্ব্বকর্ম্মসু॥ ইত্যগ্নিপ্রণয়নং কৃত্বা ওঁ পিঙ্গভ্রূ-শ্মশ্রু-কেশাক্ষঃ পীনাঙ্গজঠরোঽরুণঃ। ছাগস্থঃ সাক্ষসূত্রোঽগ্নিঃ সপ্তার্চ্চিঃ শক্তিধারকঃ। ইত্যাদিত্যপুরাণীয়ং ধ্যাত্বা অগ্নে ত্বমমুকনামাসীতি নাম কৃত্বা সম্পূজ্য ততোঽগ্নের্দক্ষিণে অরত্নিমাত্রান্তরিতে * দেশে প্রাগগ্রকুশ-সমেতং ব্রহ্মাসনমাস্তীর্য্য ধারাসহিতমুদকপাত্রং গৃহীত্বা ওঁ অহে দৈধি সব্যোদন্ত-স্তিষ্ঠান্যস্য সদনে সীদ যোঽস্মৎপাকতর ইতি মন্ত্রেণাগ্নিং প্রদক্ষিণীকৃত্য দক্ষিণাং দিশং গত্বা ব্রহ্মসদনমীক্ষেত। ততস্তস্মাদাসনাত্তৃণমেকং বামহস্তানামি-কাঙ্গুষ্ঠাভ্যাং গৃহীত্বা ওঁ নিরস্তঃ পাপ্মা সহ তেন বয়ং দ্বিষ্ম ইতি মন্ত্রেণৈশান্যাং দিশি ক্ষিপেৎ। ওঁ ইদমহং বৃহস্পতেঃ সদনে সীদামি প্রসূতো দেবেন সবিত্রা তদগ্নয়ে প্রব্রবীমি তদ্বায়বে তৎ পৃথিব্যৈ। ইতি পঠেৎ। কুশব্রহ্মপক্ষে তু হোতা স্বয়ং পঠেৎ। ততঃ কুশকুসুমৈরর্চ্চয়েৎ। তেনৈব পথা প্রত্যাবৃত্য ততোঽগ্নেরুত্তরতঃ কুশানাস্তীর্য্য তত্র বারুণং যজ্ঞিয়কাষ্ঠনির্ম্মিতং মৃন্ময়ং চমসং প্রণীতাপাত্রং বা সব্যহস্তে কৃত্বা দক্ষিণহস্তেন জলৈরাপূর্য্য

---

* অত্র ব্রহ্মসংস্কারমঞ্জরী—পূর্ব্বাভিমুখীং বারিধারাং দত্ত্বা তদুপরি পূর্ব্বাগ্রান্ কুশানাস্তীর্য্য ওঁ ব্রহ্মন্নিহোপবিশ্যতামিতি মন্ত্রেণ ব্রহ্মাণং সংস্থাপ্য কুশকুসুমৈরর্চ্চয়েৎ। ত্যাহই।

কুশৈরাচ্ছাদ্যাগ্নেরুত্তরে ব্রহ্মণো মুখমবলোক্য স্থাপয়েৎ। ততঃ সকৃদচ্ছিন্নকুশেন ঈশানকোণাদারভ্য দক্ষিণাবর্ত্তেন অগ্নিং পরিস্তরেৎ, যথা—উপমূল-লূনবর্হিভিঃ পূর্ব্বস্যামাগ্নেয়াদীশানান্তং দক্ষিণস্যাং ব্রহ্মণোঽগ্নিপর্য্যন্তং পশ্চিমায়াং নৈর্ঋত-কোণাদারভ্য বায়ব্যান্তম্ উত্তরস্যামগ্নেঃ প্রণীতাপর্য্যন্তং কুশত্রয়েণ আস্তরেৎ। ততোঽগ্নেরুত্তরে কুশোপরি প্রয়োজনদ্রব্যাণি দক্ষিণাদিতো যথাক্রমমাসাদয়েৎ। তদ্‌যথা—পবিত্রচ্ছেদনার্থং কুশপত্রত্রয়ং পবিত্রে দ্বে প্রোক্ষণীপাত্রং আজ্য-স্থালী (তৈজসী মৃন্ময়ী বা)। সম্মার্জ্জনকুশাঃ ষট্ উপযমনকুশাঃ ত্রয়োদশ * পলাশাদ্যাঃ সমিধস্তিস্রঃ স্রুক্‌স্রুবৌ আজ্যস্থালী চরুশ্চেৎ চরুস্থালী উদূখলমুষলে বৈণবং শূর্পং মেক্ষণং ব্রীহয়ো যবাস্তণ্ডুলা বা দ্ব্যঙ্গুষ্ঠবিস্তারাগ্র-প্রাদেশপরি-মিতোডুম্বরনির্ম্মিতা দর্ব্বী সার্দ্ধাঙ্গুষ্ঠবিস্তারাগ্র-প্রাদেশমাত্রং মেক্ষণং কপিলা-দুগ্ধং ব্রহ্মদক্ষিণা পূর্ণপাত্রং অন্যান্যুপযুক্তদ্রব্যাণি বিনিয়োগক্রমেণাসাদয়তি। ততঃ পূর্ব্বস্থাপিতকুশত্রয়েণ পবিত্রে প্রাদেশমাত্রে ওঁ পবিত্রে স্থো বৈষ্ণব্যৌ ইতি ছিত্ত্বা ওঁ বিষ্ণোর্মনসা পূতে স্থঃ ইতি সংপ্রোক্ষ্য প্রোক্ষণীপাত্রে স্থাপয়েৎ। তত্র প্রণীতাজলং সংস্থাপ্য দক্ষিণহস্তানামাঙ্গুষ্ঠাভ্যাং মূলমেবং বামহস্তানামাঙ্গুষ্ঠাভ্যাং পবিত্রস্যাগ্রং গৃহীত্বা উপর্য্যধোভাবেনাধোমুখৌ হস্তৌ কৃত্বা পবিত্রমধ্যেন প্রোক্ষণীপাত্রস্থ-কিঞ্চিজ্জলং গৃহীত্বা ভূমৌ বারত্রয়ং ক্ষিপেৎ। ততো বামহস্ততলে প্রোক্ষণীপাত্রং কৃত্বা সপবিত্রদক্ষিণহস্তেন কিঞ্চিজ্জলং বারত্রয়মুত্তোল্য পুনস্তথৈব প্রক্ষিপ্য আত্মবামে প্রোক্ষণীপাত্রং সংস্থাপ্য তদুদকেনাসাদিতদ্রব্যাণি সকৃৎ সংপ্রোক্ষ্য প্রণীতাদক্ষিণেঽসঞ্চরে দেশে প্রোক্ষণীপাত্রং স্থাপয়েৎ। তত আজ্যস্থালীমাত্মসম্মুখমানীয় পূর্ব্বাসাদিত-মাজ্যং তস্যাং নিক্ষিপ্য অগ্নের্দক্ষিণভাগেঽধিশ্রিত্য পর্য্যগ্নিকরণায় জ্বলদগ্নিং গৃহীত্বা ঈশানকোণাদারভ্য দক্ষিণাবর্ত্তেনাজ্যং ত্রিঃ পরিবেষ্ট্য তমগ্নিং তত্রৈবাগ্নৌ ক্ষিপেৎ। ততঃ স্রুবং গৃহীত্বা অধোমুখমগ্নৌ প্রতপ্য সম্মার্জ্জন-কুশাগ্রৈর্মূলাদগ্রং পুনরগ্রান্মূলং যাবৎ সংমৃজ্য পুনঃ সম্মার্জ্জনকুশমূলেন অগ্রান্মূলং মূলাদগ্রং যাবৎ স্রুবস্য বাহ্যং সম্মৃজ্য সম্মার্জ্জনকুশান্ পরিত্যজ্য প্রণীতোদকেনাভ্যুক্ষ্য পুনঃ স্রুবং প্রতপ্য আত্মসম্মুখভূমৌ স্থাপয়েৎ। ততঃ প্রোক্ষণীপাত্রস্থং পবিত্রং পূর্ব্ববৎ গৃহীত্বা আজ্যস্য কিঞ্চিদুত্তোলন-রূপমুৎপবনং কৃত্বা ওঁ সবিতুস্ত্বা (সবিতুর্ব্বঃ) প্রসব উৎপুনাম্যচ্ছিদ্রেণ

* অত্র ব্রহ্মসংস্কারমঞ্জরী সম্মার্জ্জনকুশাস্ত্রয় উপযমনকুশাঃ ষট্ ইত্যাহ।

পবিত্রেণ বসোঃ সূর্য্যস্য রশ্মিভিঃ স্বাহা। ইতি মন্ত্রেণ ঘৃতং কিঞ্চিদ্বারত্রয়-মুত্তোল্যাগ্নৌ ক্ষিপেৎ। ততঃ পুনঃ প্রোক্ষণীজলেঽপি ওঁ সবিতুর্ব্বঃ প্রসব ইত্যাদি-মন্ত্রেণ প্রোক্ষণীজলঞ্চ উৎপূয় * উপযমনকুশান্ বামহস্তে কৃত্বা সমিধ উত্তিষ্ঠন্নগ্নৌ জুহুয়াৎ। উপবিশ্য প্রোক্ষণীজলেন ওঁ দেব সবিতঃ প্রসুব যজ্ঞং প্রসুব যজ্ঞপতিং ভগায় দিব্যো গন্ধর্ব্বঃ কেতপূঃ কেতন্নঃ পুনাতু বাচস্পতির্বাজন্নঃ স্বদতু (বাচন্নঃ স্বদতু) ইতিমন্ত্রেণ দক্ষিণাবর্ত্তেনাগ্নিং বেষ্টয়েৎ। † পবিত্রং প্রণীতায়াং নিধায় প্রোক্ষণীপাত্রং সংস্রবার্থমগ্নেরুত্তরে স্থাপয়েৎ। ততো দক্ষিণজান্বাচ্য ব্রহ্মণোঽন্বারম্ভপূর্ব্বকং স্রুবং গৃহীত্বা আঘারাজ্যভাগৌ জুহুয়াৎ। তত্রাঘারৌ যথা—স্রুবেণাজ্যস্থাল্যা আজ্যমাদায় প্রজাপতিং মনসা ধ্যায়ন্ ওঁ প্রজাপতয়ে স্বাহা ইদং প্রজাপতয়ে ‡ ইতি বায়ুকোণাদারভ্যাগ্নিকোণপর্য্যন্তং ঘৃতধারাং দদ্যাৎ। হুতশেষং প্রাশনার্থং প্রোক্ষণীপাত্রে স্থাপয়েৎ। ওঁ ইন্দ্রায় স্বাহা ইদ-মিন্দ্রায় ইত্যগ্নের্নৈর্ঋতকোণাদারভ্য ঈশানকোণপর্য্যন্তং জুহুয়াৎ। ওঁ অগ্নয়ে স্বাহা ইদমগ্নয়ে ইত্যগ্নের্দক্ষিণতঃ পশ্চিমান্তাৎ পূর্ব্বান্তং যাবৎ ঘৃতধারাং দদ্যাৎ। ওঁ সোমায় স্বাহা ইদং সোমায় ইত্যগ্নেরুত্তরতঃ পশ্চিমান্তাৎ পূর্ব্বান্তং যাবৎ জুহুয়াৎ। সর্ব্বত্র পশ্চাদ্দেবতোদ্দেশঃ। ততো মহাব্যাহৃতিহোমঃ—ওঁ ভূঃ স্বাহা ইদমগ্নয়ে। ওঁ ভুবঃ স্বাহা ইদং বায়বে। ওঁ স্বঃ স্বাহা ইদং সূর্য্যায়। ওঁ ভূর্ভুবঃস্বঃ স্বাহা ইদমগ্নিবায়ুসূর্য্যেভ্যঃ। ততঃ প্রকৃতং কর্ম্ম। ¶ অথ প্রায়শ্চিত্তহোমঃ। ওঁ অদ্যেত্যাদি অমুককর্ম্মাঙ্গহোমকর্ম্মণি যৎ কিঞ্চিদ্-বৈগুণ্যং জাতং তদ্দোষপ্রশমনায় ওঁ ত্বন্নোঽগ্নে ইত্যাদি পঞ্চভির্মন্ত্রৈঃ প্রায়শ্চিত্ত-হোমমহং করিষ্যে ইতি সঙ্কল্প্য সূক্তং পঠিত্বা ওঁ অগ্নে ত্বং বিধুনামাসীতি নাম কৃত্বা আবাহ্য সম্পূজ্য ওঁ ত্বন্নো অগ্নে বরুণস্য বিদ্বান্ দেবস্য হেড়ো অবযাসিসীষ্ঠাঃ। যজিষ্ঠো বহ্নিতমঃ শোশুচানো বিশ্বা দ্বেষাংসি প্রমুমুগ্ধ্যস্মৎ স্বাহা। § ইদমগ্নীবরুণাভ্যাং। ওঁ সত্বন্নো অগ্নেঽবমো ভবোতী নেদিষ্ঠো অস্যা উষসো ব্যুষ্টৌ। অবযক্ষ্ব নো বরুণং ররাণো বীহি মৃড়ীকং সুহবো ন এধি

* অত্র উৎপবনদ্বয়ে ব্রহ্মসংস্কারমঞ্জরীনস্ত্রপাঠং নানুমন্যতে।

† অয়ং সমন্ত্রকাগ্নিবেষ্টনপ্রকারো ন ব্রহ্মসংস্কারমঞ্জরীধৃতঃ।

‡ আদৌ তু দেবতোদ্দেশস্তিত্তিরিকঠশাখিনোঃ।
কাণ্‌মাধ্যান্দিনানান্তু পশ্চাদুদ্দেশয়েৎ সুরান্ ॥

¶ ব্রহ্মসংস্কারমঞ্জর্য্যা স্বিষ্টকৃদ্ হোমান্তে প্রকৃতং কর্ম্ম ধৃতম্।

§ অত্র ব্রহ্মসংস্কারমঞ্জরী পঞ্চানামৃচান্ ঋষিচ্ছন্দোদেবতোল্লেখমাহ।

স্বাহা। ইদমগ্নীবরুণাভ্যাং। ওঁ অয়াশ্চাগ্নেঽস্যনভিশস্তিপাশ্চ সত্যমিত্বময়া অসি। অয়ানো যজ্ঞং বহাস্যয়ানো ধেহি ভেষজং স্বাহা। ইদমগ্নয়ে। ওঁ যে তে শতং বরুণ যে সহস্রং যজ্ঞিয়াঃ পাশা বিততা মহান্তঃ। তেভির্নো অদ্য সবিতোত বিষ্ণুর্বিশ্বে মুঞ্চন্তু মরুতঃ স্বর্কাঃ স্বাহা। ইদং বরুণায়, সবিত্রে, বিষ্ণবে, বিশ্বেভ্যো দেবেভ্যঃ, মরুদ্ভ্যঃ, স্বর্কেভ্যঃ। ওঁ উদুত্তমং বরুণপাশমস্মদবাধমং বিমধ্যমং শ্রথায় অথাবয়মাদিত্যব্রতে বয়ং তবানাগসোঽদিতয়ে স্যাম স্বাহা। ইদং বরুণায়। ওঁ প্রজাপতয়ে স্বাহা ইদং প্রজাপতয়ে। ওঁ অগ্নয়ে স্বিষ্টকৃতে স্বাহা ইমমগ্নয়ে স্বিষ্টকৃতে। ততঃ পূর্ণহোমঃ। ওঁ অগ্নে ত্বং মৃড়নামাসীতি নাম কৃত্বাবাহ্য সম্পূজ্য ফলতাম্বূলাদিসহিতং ঘৃতপূরিতং পাত্রং গৃহীত্বা যজমানসহিত উত্থায় * ওঁ মূর্দ্ধানং দিবো অরতিং পৃথিব্যা বৈশ্বানরমৃত আজাতমগ্নিম্। কবিঁ্ সম্রাজমতিথিং জনানামাসন্না পাত্রং জনয়ন্ত দেবাঃ স্বাহা ইদমগ্নয়ে। তত আস্তরণকুশৈঃ ওঁ দেবা গাতুবিদো গাতুং বিত্বা গাতুমিত। মনসস্পত ইমং দেবযজ্ঞঁ্ স্বাহা বাতেধাঃ স্বাহা ইতি বর্হির্হোমং সমাপ্য। † ততঃ সংস্রবং প্রাশ্য ব্রহ্মণে পূর্ণপাত্রং দক্ষিণাং দদ্যাৎ—ওঁ অদ্যেত্যাদি কৃতৈতৎ অমুককর্ম্মাঙ্গহোমকর্ম্মণি ব্রহ্মকর্ম্মপ্রতিষ্ঠার্থং ‡ দক্ষিণামিদং পূর্ণপাত্রানুকল্পভোজ্যং ব্রহ্মণে তুভ্যমহং দদানি। ততঃ পবিত্রেণ প্রণীতাজলেন শিরঃপ্রভৃতি মার্জ্জনং যথা—ওঁ সুমিত্রিয়া ন আপ ওষধয়ঃ সন্তু। ইতি শিরসি। দুর্ম্মিত্রিয়াস্তস্মৈ সন্তু। ইত্যধঃ। ¶ যোঽস্মান্ দ্বেষ্টি যঞ্চ বয়ং দ্বিষ্মঃ ইতি ঐশান্যাং প্রণীতাপাত্রং ন্যুব্জং কুর্য্যাৎ। ওঁ ব্রহ্মন্ ক্ষমস্ব ইতি কুশব্রাহ্মণং বিসৃজ্য ওঁ অগ্নে ত্বং সমুদ্রং গচ্ছ ওঁ পৃথ্বি ত্বং শীতলা ভব ইতি দধ্যাদিকং নিক্ষিপ্য স্রুবলগ্নভস্মনা ওঁ কশ্যপস্য ত্র্যায়ুষমিতি ললাটে (শিরসি)। ওঁ জমদগ্নেস্ত্র্যায়ুষমিতি কণ্ঠে। ওঁ যদ্দেবানাং ত্র্যায়ুষমিতি বাহুমূলয়োঃ। ওঁ তন্মেঽস্তু ত্র্যায়ুষমিতি হৃদি তিলকং দদ্যাৎ। ততঃ শান্তিং কুর্য্যাৎ।

---

* অত্র ব্রহ্মসংস্কারমঞ্জর্য্যাং পূর্ণহোমে বিশেষঃ—সপ্ত ত ইতি মন্ত্রস্য কৌণ্ডিল্যঋষির্জগতীছন্দোঽগ্নির্বায়ুসূর্য্যা প্রজাপতয়ো দেবতাঃ পূর্ণহোমে বিনিয়োগঃ। ওঁ সপ্ত তে অগ্নে সমিধঃ সপ্ত জিহ্বাঃ সপ্তর্ষয়ঃ সপ্তধাম প্রিয়াণি। সপ্তহোত্রাঃ সপ্তধা ত্বা যজন্তি সপ্তযোনীরাপৃণস্ব ঘৃতেন স্বাহা।

† বর্হির্হোমো ন ব্রহ্মসংস্কারমঞ্জরীধৃতঃ।

‡ কৃতাকৃতাবেক্ষণাদিব্রহ্মকর্ম্মপ্রতিষ্ঠার্থমিতি ব্রহ্মসংস্কারমঞ্জরীপাঠঃ।

¶ প্রণীতাজলেন মার্জ্জনাদিকং ন সংস্কারমঞ্জরীধৃতম্।

## অথ জাতিকর্ম্ম

তত্র প্রথমং বিবাহদিবসে পিতৃসপিণ্ডৌ হরিদ্রা-মুদ্গ-মসূর-যব-মাষাণাং শ্লক্ষ্ণ-চূর্ণান্যেকীকৃত্য কন্যায়াঃ শরীরং ম্রক্ষয়িত্বা ইমং মন্ত্রং পঠেৎ—প্রজাপতির্ঋষিঃ প্রস্তারপঙ্‌ক্তিশ্ছন্দঃ কামো দেবতা জাতিকর্ম্মণি কন্যায়াঃ শরীরপ্লাবনে বিনি-য়োগঃ। ওঁ কাম বেদ তে নাম মদো নামাসি সমানয়ামুং যুবা তেঽভবৎ পরমস্য জন্মাগ্রে তপসো নির্ম্মিতোঽসি স্বাহা। অনেনামুম্ ইতি সর্ব্বনামস্থানে অমুক-শর্ম্মাণমিতি দ্বিতীয়ান্তং পতিনাম নিঃক্ষিপ্যোদকপূর্ণকলসেন শিরঃপ্রভৃতি কন্যাং স্নাপয়েৎ। ততঃ প্রজাপতির্ঋষির্ধ্যোজ্যোতির্জগতীচ্ছন্দ উপস্থরূপকামো দেবতা জাতিকর্ম্মণি কন্যায়া উপস্থপ্লাবনে বিনিয়োগঃ। ওঁ ইমন্ত উপস্থং মধুনা সংসৃজামি প্রজাপতের্মুখমেতদ্ দ্বিতীয়ং তেন পুংসোঽভিভবাসি সর্ব্বান্ অবশান্ বশিন্যসি রাজ্ঞী স্বাহা। অনেন কন্যায়াঃ শিরসি কিঞ্চিজ্জলং দত্ত্বা ক্রোড়দেশে বহুতরজলং দদ্যাৎ যথোপস্থদেশঃ প্লাবিতো ভবতি। ততঃ প্রজাপতির্ঋষিরুপরিষ্টাজ্জ্যোতিস্ত্রিষ্টুপ্ ছন্দ উপস্থরূপকামো দেবতা জাতি-কর্ম্মণি কন্যায়া উপস্থপ্লাবনে বিনিয়োগঃ। ওঁ অগ্নিং ক্রব্যাদমকৃণ্বন্ গুহানাঃ স্ত্রীণামুপস্থমৃষয়ঃ পুরাণাঃ। তেনাজ্যমকৃণ্বংস্ত্রৈশৃঙ্গং ত্বাষ্ট্রং ত্বয়ি তদ্দধাতু স্বাহা।*
অনেনাপি পূর্ব্ববদেব কিঞ্চিজ্জলং শিরসি দত্ত্বা ক্রোড়ে বহুতরজলং দদ্যাৎ যথোপস্থদেশঃ প্লাবিতো ভবতি। ইতি জাতিকর্ম্ম সমাপ্তম্।

অথ তদানীমসমর্থস্য কালান্তরভাব্যুদ্বাহনির্ব্বাহায় বাগ্‌দানাখ্যং প্রতিজ্ঞা-স্বরূপং কর্ম্ম লিখ্যতে। তত্র প্রথমতো ব্রাহ্মণান্ স্বস্তি পুণ্যাহঞ্চ বাচয়িত্বা, ঘট-স্থাপনং কৃত্বা, পঞ্চদেবতা জামাতরঞ্চ গন্ধমাল্যাদিভিরভ্যর্চ্চ্য প্রতিজ্ঞাং কুর্য্যাৎ, যথা—ওঁ তৎসৎ অদ্যেত্যাদি অমুকগোত্রস্যামুকপ্রবরস্যামুকদেবশর্ম্মণঃ প্রপৌত্রায় এবং পৌত্রায় পুত্রায়ামুকদেবশর্ম্মণে অমুকগোত্রস্যামুকপ্রবরস্যামুকদেবশর্ম্মণঃ প্রপৌত্রীং এবং পৌত্রীং পুত্রীম্ অমুকগোত্রামমুকপ্রবরামমুকদেব্যভিধানাং কন্যাং ব্রাহ্মবিবাহেন দাতুং তুভ্যমহং প্রতিজানে ইতি। (পশুপতয়স্তু সর্ব্ব-বিবাহাদৌ এতৎ কারয়ন্তি, কারয়ন্তি চ ষষ্ঠ্যন্তেনৈব তবাহং প্রতিজানে ইতি বাক্যম্। তৎ কিমর্থম ইতি ন জ্ঞায়তে)।

---

* জাতিকর্ম্ম-মন্ত্রব্যাখ্যা—সামবেদিসংস্কার-মন্ত্র-ব্যাখ্যায়াং দ্রষ্টব্যা।

## অথ বিবাহঃ

তত্রানতীতদর্শবর্ষকন্যোদ্বাহে শুক্রাস্তাদিরহিত-শুদ্ধসময়ে উদগয়ন আপূর্য্যমাণপক্ষে পুণ্যাহে কুমার্য্যাঃ পাণিং গৃহ্ণীয়াদিতি পারস্করসূত্রাৎ অন্যথা তু চৈত্রপৌষবিবর্জ্জিতেষু দশমাসেষু বৈবাহিকনক্ষত্রেষু শুভেষু চ তিথিষু শনিমঙ্গলান্যবারেষু কন্যাতুলামিথুনলগ্নেষু (অন্যেষু চ সুতহিবুকযোগবলাৎ) কন্যাদানে নির্ব্বাহে দাতা বরপিতা চ প্রাতঃ সগণাধিপগৌর্য্যাদিষোড়শমাতৃকাপূজা-বসুধারাসম্পাতনায়ুষ্য-সূক্তজপাভ্যুদয়িকশ্রাদ্ধানি নির্ব্বাহয়েৎ। তত্র ওঁ বসোঃ পবিত্রমসি শতধারং বসোঃ পবিত্রমসি সহস্রধারং দেবস্ত্বা সবিতা পুনাতু বসোঃ পবিত্রেণ শতধারেণ সুপ্বা কামধুক্ষঃ ইতি মন্ত্রেণ গুড়েন সর্পিষা সপ্তধারাঃ (দক্ষিণাভিমুখাঃ পশ্চিমাভিমুখা বা) পাতয়েৎ। বসুধারা চ নাতিহ্রস্বা নাতিদীর্ঘা পাদাদিনাভিপর্য্যন্তপরিমাণা) কার্য্যা। তত আয়ুষ্যসূক্তং জপেৎ, যথা—ওঁ আয়ুষ্যং বর্চ্চস্যং রায়স্পোষমৌদ্ভিদম্ ইদং হিরণ্যং বর্চ্চস্ব জৈত্রায়াবিশতাদু মাম্। ন তদ্রক্ষাংসি ন পিশাচাস্তরন্তি দেবানামোজঃ প্রথমজং হ্যেতদ্ যো বিভর্ত্তি দাক্ষায়ণং হিরণ্যং স দেবেষু কৃণুতে দীর্ঘমায়ুঃ স মনুষ্যেষু কৃণুতে দীর্ঘমায়ুঃ। যদাবধ্নন্ দাক্ষায়ণা হিরণ্যাং শতানীকায় সুমনস্যমানাঃ। তন্ম আবধ্নামি শতশারদায়ায়ুষ্মান্ জরদষ্টির্যথাসম্। * আভ্যুদয়িকশ্রাদ্ধে অয়ং বিশেষঃ—দাতা উত্তরাভিমুখঃ প্রাঙ্মুখান্ যথোত্তরমুপবিষ্টান্ দেব-মাতৃ-পিতৃ-মাতামহব্রাহ্মণান্ যুগ্মতয়া স্থিতান্ প্রাদক্ষিণ্যেন দেবতীর্থেন নমঃপদেন পূজয়েৎ। উদগগ্রকুশেষু দধ্যক্ষত-বদর-মিশ্রিতপিণ্ডানি নির্ব্বপেৎ। অক্ষয্যদানং—অমুকগোত্রা নান্দীমুখ্যো মাতরঃ অমুকদেব্যোঽস্মিন্ নান্দীমুখশ্রাদ্ধে দত্তেনান্নপানাদিনা প্রীয়ন্তামিতি মন্ত্রেণ কর্ত্তব্যম্, এবং পিতামহ্যাদীনামপি প্রথমাস্থবচনান্তনামোল্লেখঃ কার্য্যঃ। ওঁ নান্দীমুখীর্মাতৃর্বাচয়িষ্যে ইতি পৃষ্টা ওঁ নান্দীমুখীভ্যো মাতৃভ্যঃ প্রীয়ন্তাং ইতি স্বধাবাচনস্থলে প্রয়োগঃ। ইতি ব্রহ্মসংস্কারমঞ্জরীমতম্।

## অথ সম্প্রদানম্

শুভলগ্নে ছায়ামণ্ডপসমীপসমাগতং কুশাদ্যাসনোপরি প্রাঙ্মুখস্থিতং বরং প্রতি দাতা স্বস্তিবাচনান্তে ওঁ সাধু ভবানাস্তামিতি ব্রূয়াৎ। ওঁ সাধ্বহমাসে

* অত্র মঞ্জরী—মনুষ্যেষু কৃণুতে দীর্ঘমায়ুঃ ইত্যন্তমাহ।

ইত্যুক্তবতি বরে দাতা ওঁ অর্চ্চয়িষ্যামো ভবন্তমিতি বদেৎ। ততো বরঃ ওঁ অর্চ্চয় ইত্যুক্তা উপবিশ্য দাতৃদত্ত-পাদ্যার্ঘ্যাচমনীয়গন্ধপুষ্প-বস্ত্রোত্তরীয়নানালঙ্করণাদিকং প্রতিগৃহ্য পাদ্যাদ্যুপযোগং কৃত্বা তিষ্ঠেৎ। ততো দাতা বরস্য দক্ষিণজানু ধৃত্বা বরয়েৎ। ওঁ অদ্যামুকে মাসি অমুক-রাশিস্থে ভাস্করে অমুকে পক্ষে অমুকতিথৌ অমুকগোত্রঃ শ্রীঅমুকদেবশর্ম্মা অমুকগোত্রস্যামুকপ্রবরস্যামুকদেবশর্ম্মণঃ প্রপৌত্রং এবং পৌত্রং এবং পুত্রং অমুকগোত্রং অমুকপ্রবরং শ্রীঅমুকদেবশর্ম্মাণং অমুকগোত্রস্যামুকদেবশর্ম্মণঃ প্রপৌত্রীং এবং পৌত্রীং পুত্রীং অমুকগোত্রামমুকপ্রবরাং শ্রীমতীমমুকীদেবীং ব্রাহ্মবিবাহেন দাতুং (পাদ্যাদিপূজায়াং পাদ্যাদিভিরিত্যুল্লেখ্যম্) এভি-র্গন্ধাদিভিরভ্যর্চ্চ্য ভবন্তমহং বৃণে। ততো বরো বৃতোঽস্মীতি ব্রূয়াৎ, দাতা যথাবিহিতং বিবাহকর্ম্ম কুরু, বরো যথাজ্ঞানতঃ করবাণীতি ব্রূয়াৎ। তত আচারান্মুখচন্দ্রিকাং হস্তলেপাদিকঞ্চ কারয়িত্বা ছায়ামণ্ডপং প্রবেশয়েয়ুঃ। ততো দাতা পশ্চিমাভিমুখো বরঃ পূর্ব্বাভিমুখঃ কন্যাপি পশ্চিমাভিমুখী তিষ্ঠেৎ। ততো দাতৃসম্বন্ধী কশ্চিৎ বিষ্টর ইতি ত্রিবারং বদেৎ। দাতা বিষ্টরং গৃহীত্বা বিষ্টরঃ প্রতিগৃহ্যতাং, বরঃ ওঁ বিষ্টরং প্রতিগৃহ্ণা-মীতি * পূর্ব্বাভিমুখং বিষ্টরং গৃহীত্বা উত্তরাগ্রমাসনে দত্ত্বা ওঁ বর্ষ্মোঽস্মি সমানানামুদ্যতামিব সূর্য্যঃ। ইমং তমভিতিষ্ঠামি যো মা কশ্চাভিদাসতি (১) ইতি মন্ত্রেণ বিষ্টরমাসনোপরি নিধায় তদুপর্য্যুপবিশতি। ততোঽন্যঃ পাদ্যমিতি ত্রিবারং বদেৎ, দাতা পাত্রস্থজলমাদায় ওঁ পাদ্যং প্রতিগৃহ্যতামিতি বদেৎ। বরঃ পাদ্যং প্রতিগৃহ্ণামীতি গৃহীত্বা ভূমৌ সংস্থাপ্য তস্মাজ্জলাঞ্জলি-মাদায় ওঁ বিরাজো দোহোঽসি বিরাজো দোহমসীয় ময়ি পাদ্যায়ৈ বিরাজো

---

(১) সমানানাম্ সমানজাতীয়ানাম্ অহম্ বর্ষ্ম আচ্ছাদকঃ অস্মি ভবামি। কেষাং ক ইব? উদ্যতাম্ উদয়শালিনাং সূর্য্য ইব, কিঞ্চ যঃ কশ্চন মাম্ অভিদাসতি হিনস্তি। তমিমং বিষ্টররূপতামাপন্নম্ অভিতিষ্ঠামি অভিভূয়াধঃ কৃত্বা তিষ্ঠামি।

---

* বরস্তু কৌং বিষ্টরং গৃহ্নীয়াৎ ইতি কেষাঞ্চিন্মতম্।

দোহঃ (২) ইতি মন্ত্রেণ ব্রাহ্মণো বরো দক্ষিণং পাদং স্বয়ং প্রক্ষাল্য তেনৈব সব্যং প্রক্ষালয়েৎ। ক্ষত্রিয়াদয়স্তু তদ্বৈপরীত্যেন। পুনর্বিষ্টর ইতি ত্রিঃ শ্রাবিতে দাতা * তথৈব দদ্যাৎ। † বরো গৃহীত্বা তেনৈব মন্ত্রেণ উত্তরাগ্রং প্রক্ষালিতপাদয়োরধস্তাৎ স্থাপয়েৎ। ততো দাতা অর্ঘ ইতি অন্যেন ত্রিঃ শ্রাবিতে গন্ধ-পুষ্পাক্ষত-কুশ-তিল-সর্ষপ-দধি-দূর্ব্বান্বিতমুদকং শঙ্খাদিপাত্রস্থং কৃত্বা অর্ঘঃ প্রতিগৃহ্যতামিতি বদেৎ। বরোঽর্ঘং প্রতিগৃহ্লামীতি গৃহীত্বা ওঁ আপঃ স্থ যুষ্মাভিঃ সর্ব্বান্ কামানবাপ্নবানি ইতি ( ৩ ) মন্ত্রেণ গৃহীত্বা শিরসি বিধৃত্য তজ্জলং ভূমৌ ত্যজন্ অনেন মন্ত্রেণাভিমন্ত্রয়েৎ, যথা—ওঁ সমুদ্রং বঃ প্রহিণোমি স্বাং যোনিমভিগচ্ছত অরিষ্টা অস্মাকং বীরা মা পরাসেচি মৎপয়ঃ। ( ৪ ) তত আচমনীয়মিতি ত্রিঃ শ্রাবিতে দাতা আচমনীয়ং প্রতিগৃহ্যতামিতি প্রবচ্ছতি, বর আচমনীয়ং প্রতিগৃহ্লামীতি গৃহীত্বা ওঁ আমাগন্ যশসা সংসৃজ বর্চ্চসা তন্মা কুরু প্রিয়ং প্রজানামধিপতিং পশূনামরিষ্টং তনূনাম্। ( ৫ ) ইতি মন্ত্রেণ সকৃদাচম্য

---

(২) হে জল! ত্বং বিরাজঃ বিশিষ্টদীপ্তেঃ দোহঃ প্রপূরণমসি, বিরাজো দোহম্ বিশিষ্টদীপ্তেঃ প্রপূরকং ত্বামসীয় গৃহ্লামি। বিরাজো দোহঃ বিশিষ্টদীপ্তেঃ প্রপূরকত্বং ময়ি মম পাদ্যায়ৈ পাদ্যায় ভবেতি অধ্যাহার্য্যম্। হে জল! ত্বং মম পাদস্য দীপ্তিং কুর্ব্বিত্যর্থঃ।

(৩) হে আপঃ! যতঃ কারণাৎ যূয়মাপঃ আপ্নুবন্তীত্যাপঃ স্থ ভবথ, অতোঽহং যুষ্মাভির্গৃহীতাভিঃ সর্ব্বান্ কামানবাপ্নবানি আপ্নুয়াম্।

(৪) হে আপঃ! বো যুষ্মান্ সমুদ্রং প্রহিণোমি প্রস্থাপয়ামি, ময়া প্রহিতা যূয়ং স্বাং যোনিং স্বীয়মুৎপত্তিস্থানং সমুদ্রম্ অভিগচ্ছত। যূয়ং কিম্ভূতাঃ? অস্মাকমরিষ্টাঃ অহিংসকাঃ। পুনঃ কিম্ভূতাঃ? বীরাঃ উৎকৃষ্টাঃ। কিঞ্চ মৎপয়ো মদীয়পানযোগ্যং যৎ পয়ঃ তৎ মা পরাসেচি তৎপরাসিক্তং মা প্রহিতং ন ক্ষরতু, তদিহৈব তিষ্ঠত্বিত্যভিপ্রায়ঃ। হে আপঃ, যৎ পয়ো মদীয়পানযোগ্যং তন্ন ময়া প্রহিতং, ইহৈব তিষ্ঠতু। ততো অন্যা যা আপঃ তা ময়া প্রহিতা অস্মাকমহিংসকা ভূত্বা সমুদ্রং গচ্ছন্ত্বিতি বাক্যার্থঃ।

(৫) হে জল! মা মাং যশসা আগন্ আগময় মাং যশস্বিনং কুর্ব্বিত্যর্থঃ।

---

* বারত্রয়ং তূষ্ণীমিতি পশুপতিঃ।

† পাদ্যদানাৎ প্রাগেব বিষ্টরদ্বয়দানং সূত্রকারভাষ্যানুমতম্ হলায়ুধসম্মতঞ্চ। কিন্তু পশুপতির্ব্রহ্মসংস্কারমঞ্জরী চ যথোক্তমাহ।

স্মার্ত্তমাচমনং করোতি। ততো মধুপর্ক ইতি ত্রিঃ শ্রাবিতে দাতা মধুপর্কঃ প্রতিগৃহ্যতামিতি বদেৎ। বরো মধুপর্কং প্রতিগৃহ্লামীতি গৃহীত্বা পিধানকাংস্যং কিঞ্চিদপনীয় ওঁ মিত্রস্য ত্বা চক্ষুষা প্রতীক্ষে (৬) ইতি মন্ত্রেণ প্রতীক্ষ্য ওঁ দেবস্য ত্বা সবিতুঃ প্রসবেঽশ্বিনোর্বাহুভ্যাং পূষ্ণো হস্তাভ্যামাদদে (প্রতিগৃহ্লামীতি পাঠান্তরম্) (৭) ইতি মন্ত্রেণাঞ্জলিনা প্রতিগৃহ্য সব্যে পাণৌ কৃত্বা দক্ষিণানাময়া ওঁ নমস্যাবশ্যায়ান্নশনে যত্ত আবিদ্ধং তত্তে নিষ্কৃন্তামি (৮) ইতি মন্ত্রেণ সকৃদালোড্য তেনৈব মন্ত্রেণ দক্ষিণাঙ্গুষ্ঠানামাভ্যাং বহিঃ কিঞ্চিন্নির্গময়তি এবং ত্রিঃ বহিঃ কৃত্বা পরিত্যজ্য পুনরাদায়ানামাঙ্গুষ্ঠাভ্যাং ওঁ যন্মধুনো মধব্যং পরমং রূপমন্নাদ্যং। তেনাহং মধুনো মধব্যেন পরমেণ রূপেণান্নাদ্যেন পরমো মধব্যোঽন্নাদোঽশানি (৯) ইতি মন্ত্রেণ ত্রিঃ প্রাশ্য শেষং

---

তং মা মাং বর্চ্চসা তেজসা সংসৃজ তেজসা সংসৃষ্টং বর্চ্চস্বিনং তেজস্বিনং কুরু। তথা মাং প্রজানাং প্রিয়ং কুরু। পশূনাং গবাদীনাম্ অধিপতিম্ ঈশ্বরং কুরু। তনূনাং দেহাবয়বানাম্ অরিষ্টং আপদ্রহিতং কুরু।

(৬) হে মধুপর্ক! মিত্রস্য আদিত্যস্য চক্ষুষা ত্বা ত্বাং প্রতীক্ষে পশ্যামি। অহমাদিত্যেন চক্ষুর্দানেনানুগৃহীতস্ত্বাং মধুপর্কং পশ্যামীত্যর্থঃ।

(৭) হে মধুপর্ক! ত্বা ত্বাম্ আদদে প্রতিগৃহ্লামি। কস্মিন্ সতি? দেবস্য সবিতুঃ আদিত্যস্য প্রসবে অভ্যনুজ্ঞানে। গ্রহণং কাভ্যাম্? অশ্বিনোঃ অশ্বিনীকুমারয়োঃ বাহুভ্যাং, তথা পূষ্ণঃ আদিত্যস্য হস্তাভ্যাং সবিতুঃ সম্মতৌ অশ্বিনীকুমারাভ্যাং বাহুদানেনানুগৃহীতঃ, পূষ্ণা চ হস্তাচ্ছাদনেনানুগৃহীতস্ত্বাং মধুপর্কং গৃহ্লামীতি বাক্যার্থঃ।

(৮) হে নমস্য! নমস্কারার্হ মধুপর্ক! ত্বাং অবশ্যায়ানি মিশ্রয়াণি। কিঞ্চ তে তবাসনে যদ্ আবিদ্ধম্ উপহিতং তত্তে নিষ্কৃন্তামি অপসারয়ামি।

(৯) মধুনো যদ্রূপম্ স্বরূপং কিম্ভূতং মধব্যং মধুরং পরমং রূপমন্নাদ্যং তেনাহং মধুনো মধব্যেন উৎকৃষ্টম্ অন্নাদ্যমিব যথা অন্নাদিকমুপভুক্তং সদ্বলাদিকমাদধাতি তথেদমপীত্যর্থঃ। যেন পরমেণ রূপেণান্নাদ্যেন মধুনো মধব্যং পরমরূপমন্নাদ্যমহমশানি ভক্ষয়ামি। মধব্যমিত্যাদি পুনর্বিশেষণমাদরাতিশয়ার্থম্। কিম্ভূতোঽহং? পরমঃ উত্তমঃ মধব্যঃ মধুরশীলঃ অন্নাদঃ ভক্ষকঃ। তদেবম্ভূতমুৎকর্ষাদ্যর্থং ভক্ষয়ামীতি।

পুত্রায় শিষ্যায় বা উত্তরপার্শ্বোপবিষ্টায় দত্থাৎ, পূর্ব্বস্যাং দিশি বা ক্ষিপেৎ, সর্ব্বং বা প্রাশ্নীয়াৎ, জনানামসঞ্চারস্থানে বা প্রক্ষিপেৎ। ততঃ স্মার্ত্তেন বিধিনাচম্য ওঁ বাঙ্‌ম আস্যেঽস্তু ইতি করাগ্রেণ মুখং স্পৃশতি। ওঁ নসোঃ প্রাণো মেঽস্তু ইতি দক্ষিণবামনাসারন্ধ্রে। * ওঁ অক্ষোশ্চক্ষুর্ম্মেঽস্তু ইতি দক্ষিণ-বাম-চক্ষুষী। ওঁ কর্ণয়োঃ শ্রোত্রম্মেঽস্তু ইতি কর্ণৌ। ওঁ বাহ্বোর্বলম্মেঽস্তু ইতি বাহূ। ওঁ উর্ব্বোরোজো মেঽস্তু ইতি যুগপদূরূ। ওঁ অরিষ্টানি মেঽঙ্গানি তনূস্তন্বা সহ সন্তু। (১০) ইতি শিরঃপ্রভৃতি-পাদান্তানি অঙ্গানি উভাভ্যাং হস্তাভ্যাং স্পৃশেৎ। ততঃ আচান্তোদকায় বরায় দাতা খড়্গমাদায় গামবস্থাপ্য গৌর্গৌর্গৌরিতি বদেৎ। ততো বরঃ গাং দৃষ্ট্বা ওঁ মাতা রুদ্রাণাং দুহিতা বসূনাং স্বসাদিত্যানামমৃতস্য নাভিঃ। প্র নু বোচং চিকিতুষে জনায় মাগা-মনাগামদিতিং বধিষ্ট। মম চামুষ্য (অমুকশর্ম্মণঃ কন্যাদাতুঃ) চ পাপ্মা-হত ওঁ (ইত্যুপাংশু উক্ত্বা) উৎসৃজত তৃণান্যত্তু † (১১) ইতি ব্রূয়াৎ।

(১০) মে মম আস্যে মুখে বাগ্‌বচনমস্তু, মে মম নসোঃ নাসিকয়োঃ প্রাণঃ শ্বাসবায়ুরস্তু, মম অক্ষোঃ চক্ষুর্গোলকয়োঃ চক্ষুরিন্দ্রিয়মস্তু। মম কর্ণয়োঃ কর্ণশষ্কুল্যোঃ শ্রোত্রমস্তু। মম বাহ্বোঃ বলং সামর্থ্যং, মম উর্ব্বোঃ ওজঃ পটুত্বমস্ত্বিতি সর্ব্বত্র যোজ্যম্। মম অঙ্গানি শিরঃপ্রভৃতীনি অরি-ষ্টানি আপদ্রহিতানি সন্তু, মে মম তনূঃ দেহাবয়বাঃ হস্তাদয়ঃ অরিষ্টাঃ সন্ত্বিত্যর্থঃ। কয়া সহ? তন্বা দেহাবয়বিনা সহেত্যর্থঃ।

(১১) নু ভোঃ! অর্হণাকারক! প্রবোচং প্রকর্ষেণাবোচং পুনরুক্ত-বানস্মি। কস্মৈ জনায়? যস্মৈ কস্মৈচিৎ প্রাণিমাত্রায়। কিম্ভূতায়? চিকি-তুষে জ্ঞানহেতবে শুশ্রূষবে ইতি যাবৎ। কিং বদসীত্যাকাঙ্ক্ষায়া-মাহ—গাম্ অনাগাম্ অদিতিং অহিংসনীয়াং মা বধিষ্ট মা মারয়ত। যা রুদ্রাণাং মাতা, বসূনাং দুহিতা, আদিত্যানাং স্বসা, অমৃতস্য দেবানামাহার-ভূতস্য নাভিঃ উৎপত্তিস্থানম্। কিঞ্চ মম চার্হণীয়স্য অস্য অর্হণাকর্ত্তুশ্চ পাপ্মা পাপং হত নাশয়ত, ওমিতি মদীয়বচনমনুমত্য উৎসৃজত মুঞ্চত গামিতি পূর্ব্বেণান্বয়ঃ। তৃণান্যত্তু খাদয়তু গৌর্মুক্তা সতীতি যোজ্যম্।

* ওঁ নমঃ প্রাণোম্মেঽস্তু, ওঁ অক্ষোর্ম্মে চক্ষুরস্তু, ওঁ কর্ণয়োর্ম্মে শ্রোত্রমস্তু, ওঁ বাহ্বোর্ম্মে-বলমস্তু, ওঁ উর্ব্বোর্ম্মে ওজোঽস্তু ইতি সংস্কারমঞ্জরী।

† 'তৃণান্যত্তু' ইত্যন্তপাঠঃ পারস্করেণ ধৃতঃ হলায়ুধেন চ ব্যাখ্যাতঃ পশুপতিনা চ অবলম্বিতঃ। পিবতূদকমিতি কচিৎ পাঠঃ।

ততো বরো বহিঃশালায়াম্ ঐশান্যাং চতুর্হস্তপ্রমাণং স্থণ্ডিলং কৃত্বা স্ব-গৃহ্যোক্তবিধিনা যোজকনামানমগ্নিং সংস্থাপ্য * পাদ্যাদিভিরভ্যর্চ্চ্য কন্যা-পিত্রা দত্তবস্ত্রচতুষ্টয়স্য একতমং বাসঃ বরো বাসগৃহং গত্বা কন্যাং পরি-ধাপয়তি। (প্রজাপতিঋষিস্ত্রিষ্টুপ ছন্দস্তরীবেমাদয়ো দেবতা বস্ত্রপরি-ধাপনে বিনিয়োগঃ) ওঁ জরাং গচ্ছ পরিধৎস্ব বাসো ভবাকৃষ্টীনামভিশস্তি-পাবা। শতঞ্চ জীব শরদঃ সুবর্চ্চা রয়িঞ্চ পুত্রানমুসংব্যয়স্বায়ুষ্মতীদং পরিধৎস্ব বাসঃ। (১২) ইতি অনেন মন্ত্রেণ। (প্রজাপতিঋষির্জগতীচ্ছন্দস্তরীবেমাদয়ো দেবতা উত্তরীয়পরিধাপনে বিনিয়োগঃ। ওঁ যা অকৃন্তন্নবয়ন্ যা অতন্বত যাশ্চ দেবীস্তন্তনভিতোঽততন্থ। তাস্ত্বা দেবীর্জরসে সংব্যয়স্বায়ুষ্মতীদং পরিধৎস্ব বাসঃ। (১৩) ইত্যনেন মন্ত্রেণ দ্বিতীয়মুত্তরীয়ং বাসঃ কন্যাং পরিধাপয়তি। † ততঃ স্বয়ং তৃতীয়ং পরিদধাত্যনেন মন্ত্রেণ—ওঁ পরিধাস্যৈ যশোধাস্যৈ দীর্ঘায়ুত্বায় জর-দষ্টিরস্মি শতঞ্চ জীবামি শরদঃ পুরূচী রায়স্পোষমভিসংব্যয়িষ্যে ইতি একং পরিধত্তে। ওঁ যশসা মা দ্যাবাপৃথিবী যশসেন্দ্রাবৃহস্পতী যশো ভগশ্চ

---

(১২) হে আয়ুষ্মতি! কন্যে! জরাং বৃদ্ধত্বং গচ্ছ চিরজীবিনী ভব, কিঞ্চ বাসঃ পরিধৎস্ব ধারয়, বস্ত্রবিমুক্তা কদাচিদপি মা ভব। কিঞ্চ আকৃষ্টীনাং ভব আকৃষ্টা মনোহরা ভবেত্যর্থঃ। অভিশস্তিপাবা অভি-শস্তিঃ শয়নং তত্র পাবা শয়নায় পবিত্রা ভব। কিঞ্চ শরদঃ শতং জীব শতবর্ষাণি জীবেত্যর্থঃ। সুবর্চ্চাঃ শোভনদীপ্তিযুক্তা সতী রয়িং ধনং পুত্রাংশ্চ অনুসংব্যস্বয় সংবৃণু। যন্ময়া আশাসিতং তৎপ্রাপ্তয়ে বাসঃ পরিধৎস্ব।

(১৩) হে আয়ুষ্মতি! যা দেবীঃ দেব্যঃ তন্তূন্ অকৃন্তন্ কর্ত্তিতবত্যঃ। তথা যাস্তন্তূন্ অবয়ন্ বাপিতবত্যঃ, তথা যাস্তন্তূন্ অতন্বত বিস্তারিতবত্যঃ। তা দেব্যঃ ত্বা ত্বাং সংব্যয়স্ব সংব্যয়ন্তু পরিধাপয়ন্তু। তথা ত্বমিদং বাসঃ অততন্থ বিস্তারয়। কেন প্রকারেণ? অভিতঃ উভয়তঃ প্রস্তারেণ দৈর্ঘ্যেণ চ বিস্তার্য্য পরিধৎস্ব। কিমর্থং? জরসে চিরজীবনায়।

---

* ইদানীং সম্প্রদানকালে বহ্নিস্থাপনং ন ব্যবহ্রিয়তে শিষ্টৈঃ। তেন পাণিগ্রহণকর্ম্মাদৌ বহ্নিস্থাপনং যথানির্দ্দিষ্টং কার্য্যমিতি সিদ্ধান্তঃ। কন্যায়াঃ কন্যাদাতৃদত্তবস্ত্রপরিধাপনে মন্ত্রোঽপি বরেণ ন সম্প্রদানকালে পঠ্যতে। ইতি দেশাচারঃ।

† বস্ত্রপরিধানাদি-সমঞ্জনান্তং কর্ম্ম পাণিগ্রহণদিনে প্রযুজ্যতে ন সম্প্রদানদিবসে ইতি ব্যবহারঃ।

মা বিদৎ যশো মা প্রতিপদ্যতাম্ ইতি চতুর্থং পরিদদ্যাৎ। * ততো দাতা (কন্যাবরাবভিমুখীকৃত্য) পরস্পরং সমঞ্জেতামিতি প্রৈষং দদ্যাৎ। অথ বরঃ ইমং মন্ত্রং পঠেৎ। ওঁ সমঞ্জন্তু বিশ্বেদেবাঃ সমাপো হৃদয়ানি নৌ, সম্মাতরিশ্বা সন্ধাতা সমুদেষ্ট্রী দধাতু নৌ। (১৪) ইতি পঠিত্বা পরস্পরং (স্পর্শনরূপং) সমঞ্জনং কুর্য্যাৎ। অথ কন্যাদানং। দাতা ওঁ দাতাঽহং বরুণো রাজা দ্রব্যমাদিত্যদৈবতম্। বরোঽসৌ বিষ্ণুরূপেণ প্রতিগৃহ্ণাত্বয়ং বিধিরিতি † পঠিত্বা কুশতিলজলান্যাদায় উদঙ্মুখঃ ‡ প্রাঙ্মুখায় বরায় প্রত্যঙ্মুখোপবিষ্টাং কন্যাং দদ্যাৎ। যথা § অমুকে মাসি অমুকরাশিস্থে ভাস্করে অমুকপক্ষে অমুকতিথৌ অমুকগোত্রঃ শ্রীঅমুকদেবশর্ম্মা শ্রীবিষ্ণুপ্রীতিকামঃ পুরাণোক্তশতগুণীকৃতজ্যোতিষ্টোমাতিরাত্রফলসমফলপ্রাপ্তিকামঃ মহাভারতাদ্যুক্তকন্যাদানফলপ্রাপ্তিকামো বা "অমুকগোত্রস্যামুকপ্রবরস্যামুকদেবশর্ম্মণঃ প্রপৌত্রায় এবং পৌত্রায় পুত্রায় অমুকগোত্রায়ামুকপ্রবরায়ামুকদেবশর্ম্মণে বরায় ব্রাহ্মণায়ার্চ্চিতায়—অমুকগোত্রস্যামুকপ্রবরস্য অমুকদেবশর্ম্মণঃ প্রপৌত্রীং এবং পৌত্রীং পুত্রীং অমুকগোত্রামমুকপ্রবরাং অমুকদেব্যভিধানাম্ অর্চ্চিতা"মিতি ত্রিরুক্ত্বা প্রজাপতিদেবতাকামরোগিণীম্ অপ্রবাসিনীং সবস্ত্রালঙ্কারাং তুভ্যমহং সম্প্রদদে ইতি কুশতিলজলেন কন্যাহস্তং বরহস্তে দদ্যাৎ।

---

(১৪) বিশ্বেদেবাঃ নৌ আবয়োঃ হৃদয়ানি হৃদয়ে সমঞ্জন্তু, আপোঽপি পানীয়ানি সমঞ্জন্তু, নৌ হৃদয়ানীত্যনেন সম্বন্ধঃ। পানীয়েনোৎসর্গপূর্ব্বকং দত্তায়াস্তব হৃদয়ং মম হৃদয়েন সঙ্গতং ভবত্বিত্যভিপ্রায়ঃ। তথা মাতরিশ্বা প্রাণবায়ুঃ নৌ আবাং সন্দধাতু সংযোজয়তু। তথা ধাতা প্রজাপতিঃ উদেষ্ট্রী ইচ্ছাকর্ত্রী দেবতা কামদেবশ্চ নৌ আবাং সন্দধাতু।

---

* অত্র বরকর্তৃকবস্ত্রপরিধানপ্রয়োগো ন সূত্রকার-হলায়ুধসম্মতঃ।

† ব্রহ্মসংস্কারমঞ্জরীধৃতোঽয়ং পাঠঃ।

‡ প্রত্যঙ্মুখো দদ্যাৎ ইতি পশুপতিমতম্।

§ অত্র কচিৎ পুস্তকে বিশেষঃ—ওঁ বিষ্ণুঃ বার্হস্পত্যব্যবস্থায়াং ব্রহ্মণো দ্বিতীয়পরার্দ্ধে শ্বেতবরাহকল্পে বৈবস্বতাখ্যমন্বন্তরে কলিযুগস্য প্রথমসন্ধ্যায়াম্ অদ্যামুকে মাসি অমুকে পক্ষে অমুকতিথৌ জম্বুদ্বীপস্য মেধীভূতস্য সুমেরোর্দক্ষিণপার্শ্বে শ্রীশৈলরাজাবচ্ছিন্নভারতবর্ষাখ্যভূপ্রদেশেঽস্মিন্ শ্রীমন্নারায়ণ-বহ্নি-ব্রাহ্মণাদিসন্নিধৌ অমুকগোত্রঃ অমুকদেবশর্ম্মা ইত্যাদি পাঠঃ।

বারমেকমুচ্চার্য্যেতি গৌড়াঃ। বারত্রয়মুচ্চার্য্যেতি মৈথিলাঃ। বস্তুতস্তু বারত্রয়ং পাঠঃ, নামগোত্রে সমুচ্চার্য্য সম্প্রদানস্য চাত্মনঃ। সংপ্রদানং প্রযচ্ছামি কন্যাদানে পুনস্ত্রয়ম্ ইত্যাগ্নেয়বচনাৎ। ততো বরঃ স্বস্তীত্যুক্ত্বা ওঁ কন্যেয়ং প্রজাপতিদেবতাকা ইত্যুক্ত্বা ওঁ দ্যৌস্ত্বা পরিদদাতু পৃথিবী ত্বা প্রতিগৃহ্লাতু (১৫) * ইতি মন্ত্রেণ গৃহ্লীয়াৎ। তত ইমং মন্ত্রং পঠেৎ। ওঁ কোঽদাৎ কস্মা অদাৎ কামোঽদাৎ কামায়াদাৎ কামো দাতা কামঃ প্রতিগ্রহীতা কামৈতত্তে (১৬) ইতি মাধ্যন্দিনীয়াঃ। এতন্মন্ত্রান্তে ওঁ তব কাম সতা ভুঞ্জামহৈ ইতি পাঠ্যম্। † ততো—হরীতকী-লোধ্র-মরাচপত্রৈশ্চ তত্বচা দাড়িমবল্কলৈশ্চ। হস্তপ্রলেপো গিরিরাজপুত্র্যাঃ সৌভাগ্যহেতোঃ কথিতঃ পুরাণৈরিতি। তথা চ সহদেবা-শতপুষ্পী-গুঞ্জাকর্পূর-কুঙ্কুমৈঃ। বিষ্ণুক্রান্তা-সর্জ্জরস-ধুস্তূর-মধুপুষ্পকৈঃ। কক্কোলী-জাতীফলক…চন্দনৈঃ। এতৈর্ম্মধুযুতৈঃ পিষ্টৈর্হস্তলেপো বিধীয়তে ইতি দর্শনাদচারাদেভিঃ পিষ্টৈঃ কশ্চিদ্‌ব্রাহ্মণো বধূবরয়োর্হস্তলেপং কৃত্বা বরহস্তোপরি বধূহস্তং দত্ত্বা গায়ত্র্যা কুশবেণ্যা বধ্নীয়াৎ। ততো দাতা ওঁ অদ্যেত্যাদি কৃতৈতৎকন্যাদানপ্রতিষ্ঠার্থং দক্ষিণামেতৎ স্বর্ণং গোমিথুনং বা তুভ্যমহং সম্প্রদদে ইতি। বরঃ স্বস্তীতি প্রতিগৃহ্লীয়াৎ। গো-হিরণ্য-ভূমি-ধান্য-দাস-দাসী-ভোজনাদিকঞ্চ দদ্যাৎ। অন্যেঽপি যৌতুকাদিকং দদ্যুঃ। ততঃ কশ্চিদন্যোঽপি ব্রাহ্মণঃ কন্যাবরয়োরুত্তরীয়বস্ত্রাভ্যাং ফলমন্তর্ধায় গায়ত্র্যা গ্রন্থিং বধ্নীয়াৎ। ততঃ স এব বধূবরয়োর্হস্তগ্রন্থিং গায়ত্র্যা মোচয়েৎ। ইতি সম্প্রদানং কর্ম্ম।

---

(১৫) হে কন্যে! দ্যৌস্ত্বা ত্বাং দদাতু পৃথিবী ত্বা ত্বাং প্রতিগৃহ্লাতু। অর্থাৎ তব পিতা আকাশমিব যথা পৃথিবী বিশ্বেষামাশ্রয়ঃ তথা অহং তবাশ্রয়ভূতস্ত্বাং প্রতিগৃহ্লামীতি বাক্যার্থঃ।

(১৬) কঃ কস্মৈ অদাৎ প্রশ্নে ইদমুত্তরং কামোঽদাৎ কামায়াদাৎ। যতঃ কারণাৎ কামো দাতা কামঃ প্রতিগ্রহীতা অতো হে কাম! এতদ্‌-বদ্দত্তং প্রতিগৃহীতং তদেতত্তে। তথা চ সতি হে কাম! তব সতা সত্ত্বেন সম্বন্ধিভূতমেতৎ কন্যাদিকং ভুঞ্জামহৈ উপভুঞ্জামঃ।

---

* হলায়ুধেন কামস্তুতিপাঠানন্তরং পঠিতঃ।

† মিত্রাস্তু দক্ষিণাদানানন্তরং কামস্তুতিপাঠং কারয়ন্তি।

## অথ পাণিগ্রহণাদি

* ততো ( পূর্ব্বোক্ত-বস্ত্রপরিধাপনমন্ত্র-পাঠান্তে ) বরঃ কন্যাং হস্তেনাদায় প্রতিগ্রহস্থানান্নিক্রাময়তি। ওঁ যদৈষি মনসা দূরং দিশোঽনুপবমানো বা হিরণ্যপর্ণো বৈকর্ণঃ স ত্বা মন্মনসাং করোত্বসৌ। অসাবিতি (১৭) সম্বোধনান্তম্ অমুকী-দেবীতি বধূনাম কার্য্যম্। ততঃ সবধূকো বরঃ অগ্নেঃ পূর্ব্বদেশাৎ দক্ষিণাবর্ত্তেন পশ্চিমে তিষ্ঠেৎ। এতৎকালাবধি অভিষেকপর্য্যন্তমন্যঃ কশ্চিৎ স্কন্ধাবসক্ত-সচন্দন-চূতপল্লবাম্বুজলপূর্ণকলসঃ অগ্নের্দক্ষিণতঃ বাগ্-যত উর্দ্ধস্তিষ্ঠেৎ। ততঃ পরস্পরং সমীক্ষেতামিতি প্রৈষেণোক্তে কন্যাপিতা বধূবরৌ পরস্পরং সমীক্ষয়তি। ততঃ সমীক্ষমাণো বরো বক্ষ্যমাণান্ চতুরো মন্ত্রান্ পঠেৎ। ওঁ অঘোরচক্ষুরপতিঘ্ন্যেধি শিবা পশুভ্যঃ সুমনাঃ সুবর্চ্চাঃ বীরসূর্দেবকামা স্যোনা শন্নো ভব দ্বিপদে শং চতুষ্পদে। (১৮) ওঁ সোমঃ প্রথমো বিবিদে গন্ধর্ব্বো বিবিদ উত্তরঃ। তৃতীয়ো অগ্নিষ্টে পতিস্তুরীয়স্তে

---

(১৭) অসৌ হে কন্যে! ত্বং মন্মনসা হৃদয়েন দূরমৈষি গচ্ছসি পিতৃকুল-বহির্ভূতা। কুত্র কেন নীয়তে? হৃদয়েন দূরং যাসি সোৎকণ্ঠা ভবসি, তত্র দিশঃ প্রাচ্যাদিদশদিশঃ অনু তদনন্তরং পবমানঃ বা সমুচ্চয়ে বায়ুশ্চেত্যর্থঃ, হিরণ্যপর্ণঃ হিরণ্যং পর্ণঃ রথঃ অস্য ইতি হিরণ্যপর্ণ আদিত্যঃ, বৈকর্ণঃ বিকর্ণে কোণে তিষ্ঠতি ইতি বৈকর্ণোঽগ্নিঃ, তে দিগ্-বায়ু-সূর্য্যাগ্নয়ঃ ত্বা ত্বাং মন্মনসাং করোতু কুর্ব্বন্তু।

(১৮) হে কন্যে! অপতিঘ্নী এধি ভব। কিম্ভূতা? অঘোরচক্ষুঃ অঘোরং অভীষণং সৌম্যং পতিবিষয়ে চক্ষুঃ যস্যাঃ সা। কিঞ্চ পশুভ্যঃ শিবা গবাদিভ্যঃ কল্যাণকারিণী। সুমনাঃ শোভনমনাঃ সুবর্চ্চাঃ শোভনদীপ্তিঃ বীরসূঃ বীরং বীর্য্যবন্তং পুত্রং সূতে, দেবকামা দেবং দেবনং ক্রীড়নং কাময়তে ইচ্ছতি যা সা, স্যোনা সুখিনী নোঽস্মাকং দ্বিপদে মনুষ্যপরিজনে শং কল্যাণ-কারিণী ভব। তথা চতুষ্পদে অশ্বাদৌ শং ভব।

---

* ইদানীং সম্প্রদানপদ্ধত্যুক্ত-নববস্ত্রপরিধানমন্ত্রান্ বরঃ পঠতীতি ব্যবহারঃ।

মনুষ্যজাঃ। (১৯) ওঁ সোমোঽদদদ্ গন্ধর্ব্বায় গন্ধর্ব্বোঽদদদগ্নয়ে রয়িঞ্চ পুত্রাংশ্চাদাদগ্নির্মহ্যমথো ইমাম্। (২০) ওঁ সা নঃ পূষা শিবতমা মৈরয়ৎ ম উরূ উশতী বিবহ। যস্যামুশন্তঃ প্রহরাম শেপং (ফং) যস্যামুকামা বহবো নিবিষ্ট্যৈ। (২১) ততঃ প্রদক্ষিণমগ্নিং পরীত্য পশ্চাদগ্নেঃ পূর্ব্বস্থাপিততেজনীকটয়োরন্তরে দক্ষিণং পাদমগ্রে কৃত্বোপবিশতি বরঃ, তস্য দক্ষিণতো বধূঃ। ততো বরস্তৃণপূলকং কটং বা দক্ষিণপাদেনোল্লঙ্ঘ্য প্রাঙ্মুখো দক্ষিণতো বধূং কৃত্বা তস্মিন্নেব কটে হোমায়োপবিশতি। ততো ব্রহ্মোপবেশনাদি-চরুবর্জ্জমগ্নিপরিস্তরণান্তং কর্ম্ম কুর্য্যাৎ। ততঃ পরং দ্রব্যাসাদনে ইয়াংস্তু বিশেষঃ—শমীপলাশপত্রমিশ্রিতলাজাঃ সপুত্র-শিলা অখণ্ডং লোহিত-মানডুহং চর্ম্ম শূর্পং দৃঢ়ঃ পুরুষঃ আচার্য্যবরণদ্রব্যমিতি। ততঃ সর্ব্ব-প্রায়শ্চিত্তান্তাং কুশণ্ডিকাং * বিধায় ব্রহ্মণোঽন্বারব্ধত্যাগং কৃত্বা রাষ্ট্রভৃজ্জয়া-খ্যাতানগ্নিরৈত্বিত্যাদিকান্ পরং মৃত্যবিত্যন্তান্ জুহুয়াৎ। রাষ্ট্রভৃতো যথা—ওঁ ঋতাষাড়্‌তধামাগ্নির্গন্ধর্ব্বঃ স ন ইদং ব্রহ্ম ক্ষত্রং পাতু তস্মৈ স্বাহা বাট্। (২২)

---

(১৯) হে কন্যে! ত্বাং সোমঃ প্রথমো জন্মসময়ে বিবিদে লব্ধবান্। গন্ধর্ব্ব উত্তরঃ দ্বিতীয়ঃ বিবিদে লব্ধবান্, তে তব তৃতীয়ঃ পতিরগ্নিঃ। তথা তুরীয়স্তে চতুর্থপতিঃ মনুষ্যজাঃ মনুষ্যজ্জাতোঽহমিত্যর্থঃ। কিমিদানীঞ্চতুর্ণামেব পত্নীত্যত আহ সোমোঽদদদিত্যাদি।

(২০) সোমঃ ইমাং গন্ধর্ব্বায় অদদৎ দত্তবান্, গন্ধর্ব্বোঽগ্নয়ে ইমামদদৎ, অথো অনন্তরম্ অগ্নির্মহ্যমদদৎ। ন কেবলমিমাং রয়িং ধনং পুত্রাংশ্চ অগ্নির্মহ্যমদাৎ।

(২১) সা ইয়ং পূষা বৃদ্ধিকারিণী শিবতমা কল্যাণী মা ঐরয়ৎ ন ত্যজতু নঃ অস্মান্। কিঞ্চ যস্যাং ত্বয়ি উশন্তঃ ইচ্ছন্তো বয়ং শেফম্ ইন্দ্রিয়ং প্রহরাম প্রক্ষিপামঃ। মা ত্বম্ উরূ বিবহ প্রসারয়। কিম্ভূতা? নো অস্মান্ উশতী ইচ্ছন্তী। কিঞ্চার্থে উশব্দঃ, কিঞ্চ যস্যাং ত্বয়ি বহবঃ কামাঃ অভিলষিতাঃ নিবিষ্ট্যৈ নিবেশিতাঃ।

(২২) যোঽগ্নির্গন্ধর্ব্বরূপস্তস্মৈ অগ্নয়ে স্বাহা বাট্, যতঃ স্বাহাকৃতং সুহুতং

---

* ইতি তু ব্রহ্মসংস্কারমঞ্জরীমতম্, পশুপতয়স্তু প্রকৃতহোমান্তে প্রায়শ্চিত্তহোমং সমামনন্তি।

ইদমৃতাসাহে ঋতধাম্নেঽগ্নয়ে গন্ধর্ব্বায়। ওঁ ঋতাষাড়ৃতধামাগ্নির্গন্ধর্ব্বস্তস্যৌষধয়োঽপ্সরসো মুদো নাম তাভ্যঃ স্বাহা। (২৩) ইদমোষধিভ্যোঽপ্সরোভ্যো মুদ্ভ্যঃ। ওঁ সংহিতো বিশ্বসামা সূর্য্যো গন্ধর্ব্বঃ স ন ইদং ব্রহ্ম ক্ষত্রং পাতু তস্মৈ স্বাহা বাট্। (২৪) ইদং সংহিতায় বিশ্বসাম্নে সূর্য্যায় গন্ধর্ব্বায়। ওঁ সংহিতো বিশ্বসামা সূর্য্যো গন্ধর্ব্বস্তস্য মরীচয়োঽপ্সরস আয়ুবো নাম তাভ্যঃ স্বাহা। (২৫) ইদং মরীচিভ্যোঽপ্সরোভ্যঃ আয়ুভ্যঃ। ওঁ সুষুম্নঃ সূর্য্যরশ্মিশ্চন্দ্রমা গন্ধর্ব্বঃ স ন ইদং ব্রহ্ম ক্ষত্রং পাতু তস্মৈ স্বাহা বাট্। (২৬) ইদং সুষুম্নায় সূর্য্যরশ্ময়ে চন্দ্রমসে গন্ধর্ব্বায়। ওঁ সুষুম্নঃ সূর্য্যরশ্মিশ্চন্দ্রমা গন্ধর্ব্বস্তস্য নক্ষত্রাণ্যপ্সরসো ভেকুরয়ো নাম তাভ্যঃ স্বাহা। (২৭) ইদং নক্ষত্রেভ্যোঽপ্সরোভ্যো ভেকুরিভ্যঃ। ওঁ ইষিরো বিশ্বব্যচা বাতো গন্ধর্ব্বঃ স

---

তৎ স্বাহা বাট্ বহতু। কিম্ভূতোঽগ্নিঃ? ঋতসাট্ ঋতং সত্যং সহতে ইতি সত্যসহকৃত ইত্যর্থঃ। পুনঃ কিম্ভূতঃ? ঋতধামা ঋতং সত্যং ধাম স্থানং যস্যেতি ঋতধামা। কিমর্থং তস্মৈ স্বাহা? স নঃ অস্মাকং ইদং ব্রহ্ম জ্ঞানং ক্ষত্রং বীর্য্যঞ্চ পাতু রক্ষতু।

(২৩) তস্য পূর্ব্বোক্তস্যাগ্নের্গন্ধর্ব্বরূপস্য অপ্সরসঃ ওষধয়ঃ ব্রীহ্যাদয়ঃ কিম্ভূতাঃ? মুদো নাম মুন্নাম্ন্য ইত্যর্থঃ। তাভিঃ সর্ব্বে মোদন্তে ইতি মুদঃ তাভ্য ওষধিভ্যঃ স্বাহা সুহুতমস্ত। অগ্নের্গন্ধর্ব্বস্যাপ্সরোভ্যো মুন্নাম্নীভ্য ওষধিভ্যঃ অস্মাভিরিদমাজ্যং প্রদত্তং তা অস্মাকং জ্ঞানং বীর্য্যঞ্চ রক্ষন্ত্বিতি বাক্যার্থঃ।

(২৪) সূর্য্যো গন্ধর্ব্বঃ, কিম্ভূতঃ? সংহিতঃ দিবসং রাত্রিঞ্চ সন্দধাতীতি। পুনঃ কিম্ভূতঃ? বিশ্বসামা সর্ব্বসামবেদময়ঃ। অপরং পূর্ব্ববৎ।

(২৫) তস্য সূর্য্যস্য গন্ধর্ব্বরূপস্য অপ্সরসঃ মরীচয়ঃ রশ্ময়ঃ, কিম্ভূতাঃ? আয়ুবো নাম আয়ুবন্তি আয়োজয়ন্তীত্যায়ুবঃ। আয়ুনাম্ন্যঃ।

(২৬) যশ্চন্দ্রমা, গন্ধর্ব্বঃ কিম্ভূতঃ? সূর্য্যরশ্মিঃ? কতমঃ? সুষুম্নঃ সুষ্ঠু সুমনাঃ।

(২৭) তস্য চন্দ্রমসো গন্ধর্ব্বস্য অপ্সরসো নক্ষত্রাণি, কিম্ভূতানি? ভেকুরয়ো নাম।

ন ইদং ব্রহ্ম ক্ষত্রং পাতু তস্মৈ স্বাহা বাট্। (২৮) ইদমিষিরায় বিশ্বব্যচসে বাতায় গন্ধর্ব্বায়। ওঁ ইষিরো বিশ্বব্যচা বাতো গন্ধর্ব্বস্তস্যাপো অপ্সরস ঊর্জ্জো-নাম তাভ্যঃ স্বাহা। (২৯) ইদমদ্‌ভ্যোঽপ্সরোভ্য উর্গ্‌ভ্যঃ। ওঁ ভুজ্যুঃ সুপর্ণো যজ্ঞো গন্ধর্ব্বঃ স ন ইদং ব্রহ্ম ক্ষত্রং পাতু তস্মৈ স্বাহা বাট্। (৩০) ইদং ভুজ্যবে সুপর্ণায় যজ্ঞায় গন্ধর্ব্বায়। ওঁ ভুজ্যুঃ সুপর্ণো গন্ধর্ব্বস্তস্য দক্ষিণা অপ্সরসস্তাবা-নাম তাভ্যঃ স্বাহা। (৩১) ইদং দক্ষিণাভ্যোঽপ্সরোভ্যস্তাবাভ্যঃ। ওঁ প্রজাপতি র্বিশ্বকর্ম্মা মনো গন্ধর্ব্বঃ স ন ইদং ব্রহ্ম ক্ষত্রং পাতু তস্মৈ স্বাহা বাট্। (৩২) ইদং প্রজাপতয়ে বিশ্বকর্ম্মণে মনসে গন্ধর্ব্বায়। ওঁ প্রজাপতির্বিশ্বকর্ম্মা মনো গন্ধর্ব্বস্তস্য ঋক্‌সামান্যপ্সরস এষ্টয়ো নাম তাভ্যঃ স্বাহা। (৩৩) ইদমৃক্‌ সামভ্যোঽপ্সরোভ্য এষ্টিভ্যঃ। (কেচিদন্যথা মন্ত্রপ্রয়োগং কুর্ব্বন্তি স প্রদর্শ্যতে। ঋতাষাড়্‌তধামাগ্নির্গন্ধর্ব্বঃ স ন ইদং ব্রহ্ম ক্ষত্রং পাতু তস্মৈ স্বাহা বাট্। ইতি প্রথমঃ। তস্যৌষধয়োঽপ্সরসো মুদো নাম তাভ্যঃ স্বাহেতি দ্বিতীয়ঃ। এবং সর্ব্বেষু মন্ত্রেষু। অস্মিন্নপি পক্ষে ত্যাগাস্ত এব।) অথ জয়হোমঃ। ওঁ চিত্তঞ্চ স্বাহা ইদং চিত্তায়। চিত্তিশ্চ স্বাহা ইদং চিত্যৈ। আকূতঞ্চ স্বাহা ইদমাকূতায়। আকূতিশ্চ স্বাহা ইদমাকূত্যৈ। বিজ্ঞাতঞ্চ স্বাহা ইদং বিজ্ঞাতায়। বিজ্ঞাতিশ্চ স্বাহা ইদং বিজ্ঞাত্যৈ।

---

(২৮) যো বাতো গন্ধর্ব্বঃ, কিম্ভূতঃ? ইষিরঃ গমনশীলঃ বিশ্বব্যচাঃ সর্ব্বগতঃ।

(২৯) তস্য বাতস্য অপ্সরস আপো জলানি, কিম্ভূতা? ঊর্জ্জো নাম ঊর্জ্জ ইতি নাম যাসাম্‌।

(৩০) যজ্ঞো গন্ধর্ব্বঃ ভুজ্যুঃ সর্ব্বাণি ভূতানি ভুনক্তি পালয়তীতি সুপর্ণঃ শোভনপর্ণঃ সুগতিরিতি যাবৎ।

(৩১) যতস্তস্য গন্ধর্ব্বস্যাপ্‌সরসো দক্ষিণা, কিম্ভূতা স্তাবানাম দক্ষিণায়াং দত্তায়াং যজ্ঞস্য স্তবো ভবতি তা স্তাবাঃ।

(৩২) মনঃ অন্তরিন্দ্রিয়ং গন্ধর্ব্বঃ, কিম্ভূতঃ? প্রজাপতিঃ প্রজানামীশঃ বিশ্বকর্ম্মা বিশ্বং কর্ম্ম যস্য সঃ মনসো ব্যাপারেণ বিশ্বস্য নির্ম্মাণাৎ।

(৩৩) তস্য মনসো গন্ধর্ব্বস্যাপ্‌সরস ঋক্‌ সামানি ঋচঃ সামানি চ। কিম্ভূতানি? এষ্টয়ো নাম আ ইষ্টিঃ ইচ্ছা পুত্রাদীচ্ছয়া ঋগাদিমন্ত্রপ্রযুক্তৌ পুত্রাদিফলং সম্পদ্যতে।

মনশ্চ স্বাহা ইদং মনসে। শক্করীশ্চ স্বাহা ইদং শক্করীভ্যঃ। দর্শশ্চ স্বাহা ইদং দর্শায়। পৌর্ণমাসঞ্চ স্বাহা ইদং পৌর্ণমাসায়। বৃহচ্চ স্বাহা ইদং বৃহতে। রথন্তরঞ্চ স্বাহা ইদং রথন্তরায়। (৩৪) (চিত্তঞ্চেত্যেবমাদীনাং পদানাং চতুর্থ্যন্তানাং প্রয়োগং কেচিদিচ্ছন্তি তদসাম্প্রতম্। কুতঃ? ন হ্যেতানি দেবতাপদানি, কিন্তু মন্ত্রা এতে, মন্ত্রাশ্চ যথাম্নাতা এব প্রযুজ্যন্তে।) প্রজাপতির্জয়ানিন্দ্রায় বৃষ্ণে প্রাযচ্ছদুগ্রঃ পৃতনা জয়েষু। তস্মৈ বিশঃ সমনমন্ত সর্ব্বাঃ স উগ্রঃ স হি হব্যো বভূব স্বাহা (৩৫) ইদং প্রজাপতয়ে। অথাভ্যাতানহোমঃ। ওঁ অগ্নির্ভূতানামধিপতিঃ স মাবত্বস্মিন্ ব্রহ্মণ্যস্মিন্ ক্ষেত্রেঽস্যামাশিষ্যস্যাং পুরোধায়ামস্মিন্ কর্ম্মণ্যস্যাং দেবহূত্যাং স্বাহা। (৩৬) ইদমগ্নয়ে ভূতানামধিপতয়ে। ওঁ ইন্দ্রো জ্যেষ্ঠানামধিপতিঃ সমাবত্বস্মিন্ ব্রহ্মণ্যস্মিন্ ক্ষেত্রেঽস্যামাশিষ্যস্যাং পুরোধায়ামস্মিন্ কর্ম্মণ্যস্যাং দেবহূত্যাং স্বাহা ইদমিন্দ্রায় জ্যেষ্ঠানামধিপতয়ে। ওঁ যমঃ পৃথিব্যা অধিপতিঃ

---

(৩৪) চিত্তং জ্ঞানং মহ্যং জয়ং দদাতু, এবং সর্ব্বত্রাশংসা ভবিষ্যতি। সৈবাত্র মন্ত্রে চকারেণ সমুচ্চিতা। চিত্তিশ্চ পরিচ্ছেদঃ, আকূতঞ্চাভিমতম্। আকূতিশ্চ আত্মনো ধর্ম্মবিশেষো যেন মনসঃ প্রেরণং ক্রিয়তে, বিজ্ঞাতং শিল্পাদিজ্ঞানং, বিজ্ঞাতশ্চ বিজ্ঞাতার্থঃ। শক্করী চ শক্তিঃ, বৃহচ্চ সাম, রথন্তরঞ্চ সামবিশেষঃ।

(৩৫) প্রজাপতিঃ পৃতনা জয়েষু উগ্রো বিপক্ষতেজোঽভিভাবী ইন্দ্রায় বৃষ্ণে বৃষণনাম্নে, জয়ান্ প্রাযচ্ছৎ দত্তবান্। কথমিন্দ্রায়? দেবরাজায় তস্মৈ জয়ং দত্তবান্ হি যতঃ কারণাৎ তস্মৈ প্রজাপতয়ে সর্ব্বা বিশঃ প্রজাঃ সমনমন্ত সম্যক্ প্রণামং কৃতবত্যঃ। যতশ্চ স প্রজাপতিরুগ্রো বভূব সর্ব্বতেজোঽভিভাবী বভূব, যতশ্চ স হব্যো হব্যদ্রব্যার্হো বভূব। ইত্থমাহুতিদানেন তুষ্টো মহ্যমপি জয়ং দদাতু।

(৩৬) যোঽগ্নির্ভূতানাং প্রাণিনাম্ অধিপতিঃ স মা মাং অবতু পালয়তু। কুত্র কুত্র? অস্মিন্ ব্রহ্মণি ব্রাহ্মণ্যে যজ্ঞে বা অস্মিন্ ক্ষেত্রে বীর্য্যে অস্যাম্ আশিষি আশাস্তে অর্থে অস্যাং পুরোধায়াং পুরঃস্থিতায়াং কন্যায়াং অস্মিন্ কর্ম্মণি বিবাহে অস্যাং দেবহূত্যাং দেবানাং হূতিরাহ্বানং তস্যাং প্রাণিনাং প্রভুরগ্নির্মাং ব্রাহ্মণ্যাদিষু রক্ষত্বিতি বাক্যার্থঃ।

স মাবত্বস্মিন্ ব্রহ্মণ্যস্মিন্ ক্ষেত্রেঽস্যামাশিষ্যস্যাং পুরোধায়ামস্মিন্ কর্ম্ম-ণ্যস্যাং দেবহুত্যাং স্বাহা ইদং যমায় পৃথিব্যা অধিপতয়ে। ততো জল-স্পর্শঃ। এবং ওঁ বায়ুরন্তরিক্ষস্যাধিপতিঃ স মাবত্বস্মিন্ ইত্যাদি মন্ত্রস্য সর্ব্বমন্ত্রেষু বক্ষ্যমাণেষ্বনুষঙ্গঃ। ইদং বায়বে অন্তরিক্ষস্যাধিপতয়ে। ওঁ সূর্য্যো দিবো-ঽধিপতিরিত্যাদি। ইদং সূর্য্যায় দিবোঽধিপতয়ে। ওঁ চন্দ্রমা নক্ষত্রাণা-মধিপতিরিত্যাদি। ইদং চন্দ্রমসে নক্ষত্রাণামধিপতয়ে। ওঁ বৃহস্পতি-র্ব্রহ্মণোঽধিপতিরিত্যাদি। ইদং বৃহস্পতয়ে ব্রহ্মণোঽধিপতয়ে। ওঁ মিত্রঃ সত্যানামধিপতিরিত্যাদি। ইদং মিত্রায় সত্যানামধিপতয়ে। ওঁ বরুণো-ঽপামধিপতিরিত্যাদি ইদং বরুণায় অপামধিপতয়ে। ওঁ সমুদ্রঃ স্রোত্যা-নামধিপতিরিত্যাদি ইদং সমুদ্রায় স্রোত্যানামধিপতয়ে। ওঁ অন্নং সাম্রাজ্যানামধিপতিরিত্যাদি ইদমন্নায় সাম্রাজ্যানামধিপতয়ে। ওঁ সোম ওষধীনামধিপতিরিতি ইদং সোমায়ৌষধীনামধিপতয়ে। ওঁ সবিতা প্রসবানামধিপতিরিতি ইদং সবিত্রে প্রসবানামধিপতয়ে। ওঁ রুদ্রঃ পশূনা-মধিপতিরিতি ইদং রুদ্রায় পশূনামধিপতয়ে। ততো জলস্পর্শঃ। ওঁ ত্বষ্টা রূপাণামধিপতিরিতি ইদং ত্বষ্ট্রে রূপাণামধিপতয়ে। ওঁ বিষ্ণুঃ পর্ব্বতানা-মধিপতিঃ ইতি ইদং বিষ্ণবে পর্ব্বতানামধিপতয়ে। ওঁ মরুতো গণানামধি-পতয়স্তে মাবন্ত্বস্মিন্ ইতি ইদং মরুদ্ভ্যো গণানামধিপতিভ্যঃ। (৩৭) ওঁ পিতরঃ পিতামহাঃ পরেঽবরে ততাস্ততামহা ইহ মাবন্ত্বস্মিন্ ব্রহ্মণীত্যাদি ইদং পিতৃভ্যঃ পিতামহেভ্যঃ পরেভ্যোঽবরেভ্যস্ততেভ্যস্ততামহেভ্যঃ। (৩৮) ততো জল-স্পর্শঃ। এতে অষ্টাদশমন্ত্রা অভ্যাতানসংজ্ঞকাঃ। ওঁ অগ্নিরৈতু প্রথমো দেবতানাং সোঽস্যৈ প্রজাং মুঞ্চতু মৃত্যুপাশাৎ। তদয়ং রাজা

---

(৩৭) জ্যেষ্ঠানাম্ শ্রেষ্ঠানাম্। পৃথিব্যা অধিপতিরিত্যাদি—পৃথিবীশব্দেন তৎস্থত্বাৎ প্রাণী উচ্যতে, ব্রহ্মণঃ বেদস্য। সত্যানাম্ অবিনাশিনাম্। স্রোত্যা-নাম্ নদীনাম্। প্রসবানাং প্রসূতিধর্ম্মিণাং পুনঃ সবিতুরুপাদানং মূর্ত্তিভেদ-প্রদর্শনার্থম্। পশূনাম্ দেবানাম্, রূপাণাম্ প্রতিমানাম্।

(৩৮) যে পিতরঃ পিতামহাঃ পরে প্রপিতামহাঃ অবরে বৃদ্ধপ্রপিতামহাঃ ততাস্তস্মাদপি পূর্ব্বে ততামহাঃ তস্মাদপি পূর্ব্বে এবং ষট্ পুরুষা উদাহৃতাঃ। বহুবচনমাদরার্থম্।

বরুণোঽনুমন্যতাং যথেয়ং স্ত্রী পৌত্রমঘং ন রোদাৎ স্বাহা। (৩৯) ইদমগ্নয়ে। ওঁ ইমামগ্নিস্ত্রায়তাং গার্হপত্যঃ প্রজামস্যৈ নয়তু দীর্ঘমায়ুঃ। অশূন্যোপস্থা জীবতামস্তু মাতা পৌত্রমানন্দমভিবিবুধ্যতামিয়ং স্বাহা। (৪০) ইদমগ্নয়ে গার্হপত্যায়। ওঁ স্বস্তি নো অগ্নে দিব আপৃথিব্যা বিশ্বানি ধেহ্যযথা যজত্র। যদস্যাং মহি দিবি জাতং প্রশস্তং তদস্মাসু দ্রবিণং ধেহি চিত্রং স্বাহা। (৪১) ইদমগ্নয়ে। ওঁ সুগন্নু পন্থা প্রদিশন্ন এহি জ্যোতিষ্মধ্যে হ্যজরন্ন আয়ুঃ। অপৈতু মৃত্যুরমৃতং ম আগাদ্ বৈবস্বতো নো অভয়ং কৃণোতু স্বাহা। (৪২) ইদং বৈবস্বতায়।

---

(৩৯) অগ্নিঃ ঐতু আ এতু আগচ্ছতু। কিম্ভূতঃ? দেবতানাং প্রথমঃ ইন্দ্রাদীনাং মুখ্যঃ। আগত্য চ সোঽগ্নিঃ অস্যৈ অস্যাঃ কন্যায়াঃ প্রজাং পুত্রাদিকাং মুঞ্চতু মোচয়তু। কুতঃ? মৃত্যুপাশাৎ মৃত্যোঃ মরণাৎ পাশাদ্ বন্ধনাচ্চ। তৎ মৃত্যুপাশমোচনং অয়ং বরুণো রাজা অনুমন্যতাম্ তত্রায়মনুমতো ভবত্বিত্যর্থঃ। কিমর্থম্? যথা ইয়ং স্ত্রী পৌত্রমঘং পুত্রভবং দুঃখং ন রোদাৎ ন রোদিতু।

(৪০) গার্হপত্যোঽগ্নিঃ ইমাং কন্যাং ত্রায়তাং রক্ষতু তথা অস্যৈ কন্যায়ৈ প্রজাং পুত্রাদিকাং নয়তু প্রাপয়তু, তথা দীর্ঘমায়ুশ্চ নয়তু। তথা সতী ইয়ং কন্যা অশূন্যোপস্থা অস্তু নিত্যং ভর্তৃসঙ্গতা ভবতু। তথা জীবতাং মাতা অস্তু জীবপুত্রা ভবতু। তথা পৌত্রমানন্দং পুত্রভবং সুখং অভিবিবুধ্যতাং সর্ব্বতোভাবেনানুভবতু।

(৪১) হে অগ্নে! কিম্ভূত! যজত্র! যজন্তং ত্রায়তে ইতি নঃ অস্মাকং স্বস্তি কল্যাণানি ধেহি ধারয়। কথম্? অযথা ক্রমব্যতিরেকেণ একদৈবেত্যর্থঃ। কিম্ভূতানি? বিশ্বানি সকলানি, কুত্র কুত্র? দিবঃ আকাশে পৃথিব্যা পৃথিব্যাঞ্চ। কিঞ্চ প্রশস্তং শুভং যদ্দ্রবিণং ধনং অস্যাং মহি পৃথিব্যাং দিবি জাতম্ উৎপন্নং চিত্রং নানারূপং গোভূহিরণ্যাদিকং তদস্মাসু আধেহি।

(৪২) নু ভো! জ্যোতিষ্মধ্যে জ্যোতিষাং মধ্যে সারভূত অগ্নে! নঃ অস্মাকং পন্থা পন্থানং প্রদিশন্ উপদিশন্ এহি আগচ্ছ। কিম্ভূতং পন্থানং? সুগং সুগন্তব্যং, তথা নোঽস্মাকং মৃত্যুরপৈতু অপগচ্ছতু। মন্ত্রান্তঃস্থং নঃ-পদং মৃত্যুপদেন যোজ্যম্। মে মম অমৃতং মোক্ষম্ আগাৎ আগচ্ছতু। তথা বৈবস্বতো যমঃ নঃ অস্মাকং অভয়ং কৃণোতু করোতু।

ওঁ পরং মৃত্যো অনু পরেহি পন্থাং যস্তে অন্য ইতরো দেবযানাৎ। চক্ষুষ্মতে শৃণ্বতে তে ব্রবীমি মা নঃ প্রজাং রীরিষো মোত বীরান্ স্বাহা। (৪৩) ইদং মৃত্যবে। তত উদকোপসংস্পর্শঃ। ততঃ কুমারীভ্রাতা শূর্পেণ চতুর্ভাগী-কৃতশমী-পলাশ-মিশ্রিতলাজানামেকভাগম্ অঞ্জলিনা গৃহীত্বা স্রুবেণ ঘৃতেনাভিঘার্য্য বরেণ গৃহীতে কুমার্য্যা অঞ্জলাবাবপতি, পুনর্ঘৃতেনাভি-ঘারয়েৎ। তান্ লাজান্ প্রাঙ্মুখী তিষ্ঠন্তী কুমারী অঞ্জলিনা জুহোত্যেভি-র্মন্ত্রৈঃ। ওঁ অর্য্যমণং দেবং কন্যা অগ্নিমযক্ষত। স নো অর্য্যমা দেবঃ প্রেতো মুঞ্চতু মা পতেঃ স্বাহা। (৪৪) ইদমর্য্যম্ণে। ইত্যনেন মন্ত্রেণ তৃতীয়াংশং জুহোতি। ওঁ ইয়ং নার্য্যুপব্রূতে লাজানাবপন্তিকা। আয়ুষ্মানস্তু মে পতিরে-ধন্তাং জ্ঞাতয়ো মম স্বাহা। (৪৫) ইদমগ্নয়ে। ইত্যনেন মন্ত্রেণাঞ্জলিস্থিতানাং লাজানামর্দ্ধং জুহোতি। ওঁ ইমান্ লাজানাবপাম্যগ্নৌ সমৃদ্ধিকরণাং তব মম (তুভ্য চ) (তুভ্যঞ্চ) সংবননং তদগ্নিরনুমন্যতামিয়ং স্বাহা। (৪৬) ইদমগ্নয়ে। ইত্যনেনাবস্থিতলাজান্ সর্ব্বান্ জুহোতি। ইতি মন্ত্রত্রয়ং কন্যৈব পঠেৎ। অথ

---

(৪৩) হে মৃত্যো! পরম্ উৎকৃষ্টং পন্থাং পন্থানং অহিংসাত্মকম্ অনু ইহি অনুগচ্ছ। তে তব যোঽন্যঃ পন্থাঃ হিংসাত্মকস্তং পন্থাং পরা ইহি পরাবৃত্যা-গচ্ছ। কিম্ভূতঃ পন্থাঃ? দেবযানাদিতরঃ কেনাপ্যন্যেন দেবেন নানুগতঃ। এতদেব তে তব ব্রবীমি। কিম্ভূতস্য তে? চক্ষুষ্মতে শৃণ্বতে সকলব্যবহারং দৃষ্টবতঃ শ্রুতবতশ্চ। কিং ব্রবীমি? নঃ অস্মাকং প্রজাং মা রীরিষঃ অস্মৎসম্বন্ধি-মনুজান্ মা হিংসীঃ। উত অপি চ নোঽস্মাকং পুত্রান্ বীরান্ মা রীরিষঃ। মমানয়া আহুত্যা তুষ্টো মম পুত্রাদিহিংসাং মা কুর্ব্বিত্যর্থঃ।

(৪৪) ইয়ং কন্যা অর্য্যমণং সূর্য্যং দেবমগ্নিস্বরূপম্ অযক্ষত অপূজয়ৎ। কিমর্থং? সোঽর্য্যমা দেবঃ ইতঃ পতেঃ পত্যুঃ সকাশাৎ মা মাং নো প্রমুঞ্চতু ন প্রমোচয়তু।

(৪৫) ইয়ং নারী উপব্রূতে বদতি। কিং কুর্ব্বতী? লাজান্ আবন্তিকা আবপন্তী প্রক্ষিপন্তী। কিং ব্রূতে? মম পতিরায়ুষ্মান্ অস্তু মম জ্ঞাতয় এধন্তাং বৃদ্ধিযুক্তা ভবন্তু।

(৪৬) ইয়ম্ অহং ইমান্ লাজান্ অগ্নৌ আবপামি প্রক্ষিপামি। কিম্ভূতান্? তব পত্যুঃ সমৃদ্ধিকরণং তব বৃদ্ধ্যর্থং। অপি তু যদেতৎ মম তুভ্য ন চ সম্বদনং

বরঃ কন্যায়াঃ সাঙ্গুষ্ঠং দক্ষিণং হস্তং গৃহ্লাতি ওঁ গৃভ্ণামি তে সৌভগত্বায় হস্তং ময়া পত্যা জরদষ্টির্যথাসঃ। ভগো অর্য্যমা সবিতা পুরন্ধি (পুরন্ধি) র্মহ্যং ত্বাদুর্গার্হপত্যায় দেবাঃ। অমোঽহমস্মি সা ত্বꣳ সা ত্বমস্যমোঽহং সামাঽহমস্মি ঋক্ ত্বং দ্যৌরহং পৃথিবী ত্বং তাবেহি বিবহাবহৈ সহ রেতো দধাবহৈ প্রজাং প্রজনয়াবহৈ পুত্রান্ বিন্দাবহৈ বহূꣳস্তে সন্তু জরদষ্টয়ঃ, সংপ্রিয়ৌ রোচিষ্ণূ সুমনস্যমানৌ পশ্যেম শরদঃ শতং জীবেম শরদঃ শতꣳ শৃণুয়াম শরদঃ শতম্। (৪৭) ইত্যন্তেন মন্ত্রসন্দর্ভেন। ততো বরঃ কুমার্য্যা দক্ষিণং পাদং দক্ষিণ-হস্তেন গৃহীত্বা অগ্নেরুত্তরতঃ স্থিতায়াঃ শিলায়া উপরি কারয়ত্যনেন মন্ত্রেণ—ওঁ আরোহেমমশ্মানমশ্মেব ত্বং স্থিরা ভব। অভিতিষ্ঠ পৃতন্যতো-ঽববাধস্ব পৃতনায়তঃ। (৪৮) ততো বরো গাথাং গায়তি—ওঁ সরস্বতি প্রেদমব সুভগে বাজিনীবতী যাং ত্বা বিশ্বস্য ভূতস্য প্রগায়ামস্যাগ্রতঃ।

---

বশীকরণং তদগ্নিরনুমন্যতামিত্যেতদর্থঞ্চ। তুভ্যেতি ষষ্ঠ্যর্থে চতুর্থী সুপাং সুলুগিতি বিভক্তিলোপঃ।

(৪৭) তে তব হস্তং গৃভ্ণামি। কিমর্থং? সৌভগত্বায় সৌভাগ্যায়, ন কেবলং সৌভগত্বায় অপি তু ময়া পত্যা সহ জরদষ্টির্যথা আসঃ বৃদ্ধা ভবসীত্যর্থঃ। স্বয়মেব কিমর্থং গৃহ্লামীত্যাহ ত্বা ত্বাং মহ্যং দেবাঃ অদুঃ দত্তবন্তঃ। কে দেবাঃ? ভগঃ অর্য্যমা সবিতা চ ত্বাং পুরন্ধিঃ গার্হস্থ্যাধিকারিণীং। কিমর্থমদুঃ? গার্হপত্যায় গৃহপতিত্বায়। কিন্তু তাঽহং ত্বাঞ্চ কিম্ভূতাম্? অহমমঃ মা লক্ষ্মীর্যস্য নাস্তি সঃ সা ত্বং লক্ষ্মীঃ ত্বয়া বিনা লক্ষ্মীশূন্যোঽহম্। সা ত্বমসি অমোঽহমিতি আদরার্থং পুনরুক্তম্। অহং সাম সামবেদোঽস্মি ত্বমৃক্ ঋগ্‌বেদঃ অহং স্বর্গঃ ত্বং পৃথিবী তত এহি অভিমুখীভব। তাবাবাং বিবহাবহৈ বিবাহং করবাবহৈ, তথা রেতঃ শুক্রং সহ দধাবহৈ ধারয়াবঃ, প্রজাং সন্ততিং জনয়াবহৈ উৎপাদয়াবঃ, বহূন্ পুত্রান্ বিন্দাবহৈ প্রাপ্নবঃ। তে পুত্রাঃ জরদষ্টয়ঃ সন্তু দীর্ঘায়ুষো ভবন্তু, কিঞ্চ আবাং শরদঃ শতমিত্যাদি সরলার্থঃ। গৃভ্ণামীতি হৃগ্রহোর্ভশ্ছন্দসীতি হকারস্য ভকারঃ। সম্প্রিয়ৌ অন্যোন্যানুরক্তৌ, রোচিষ্ণূ দীপ্তিযুক্তৌ সুমনস্যমানৌ সৌমনস্যং কুর্ব্বাণৌ।

(৪৮) হে কন্যে! ত্বমিমমশ্মানং শিলাম্ আরোহ আক্রাম। কিমর্থং? অশ্মারোহণেন স্থিরা ভব। ক ইব? অশ্মেব কিঞ্চ, পৃতন্যতঃ ত্বৎপ্রতিপক্ষতয়া

যস্যাং ভূতং সমভবদ্ যস্যাং বিশ্বমিদং জগৎ। তামদ্য গাথাং গাস্যামি যা স্ত্রীণামুত্তমং যশঃ। (৪৯) অথ সবধূকো বরঃ অগ্নিং প্রদক্ষিণীকুর্ব্বন্ ইমং মন্ত্রং পঠেৎ—ওঁ তুভ্যমগ্রে পর্য্যবহৎ সূর্য্যাং বহতু না সহ। পুনঃ পতিভ্যো জায়ান্দা অগ্নে প্রজয়া সহ। (৫০) এবং পুনর্ব্বারদ্বয়ং লাজাবপনাদি-পরিক্রমণান্তং কর্ম্ম কুর্য্যাৎ। ততঃ কুমার্য্যা ভ্রাতা শূর্পকোণপ্রদেশেন সর্ব্বান্ লাজান্ ঘৃতাভিঘারিতে কুমার্য্যঞ্জলাবাবপতি, তিষ্ঠন্তী কুমারী ভগায় স্বাহেতি মন্ত্রে বরেণোক্তে তান্ জুহোতি,ইদং ভগায় ইতি প্রত্যুদ্দেশঃ। তত আচারাৎ তূষ্ণীং সবধূকো বরশ্চতুর্থ-পরিক্রমণং কুর্য্যাৎ। তত উপবিশ্য ব্রহ্মণোঽন্বারব্ধপূর্ব্বকং ঘৃতেন ওঁ প্রজাপতয়ে স্বাহা ইদং প্রজাপতয়ে। ইতি ত্যাগং বিধায় বরোঽগ্নেরুত্তরে যথোত্তরকৃতসপ্ত-মণ্ডলেষ্বিমাং প্রত্যেকং প্রতিমন্ত্রং সপ্তপদানি প্রক্রময়তি। যথা—ওঁ একমিষে বিষ্ণুস্ত্বা নয়তু ইতি বরেণোক্তে বধূরেকং পদং উদগ্‌দদাতি। এবং ওঁ দ্বে ঊর্জ্জে বিষ্ণুস্ত্বা নয়তু ইত্যুক্তে দ্বিতীয়ং। ওঁ ত্রীণি রায়স্পোষায় বিষ্ণুস্ত্বা নয়তু। ইতি তৃতীয়ম্। ওঁ চত্বারি মায়োভবায় বিষ্ণুস্ত্বা নয়তু। ইতি চতুর্থম্। ওঁ পঞ্চ পশুভ্যো বিষ্ণুস্ত্বা নয়তু। ইতি পঞ্চমং। ওঁ ষড়্‌ ঋতুভ্যো বিষ্ণুস্ত্বা নয়তু। ইত্যুক্তে

---

আত্মনঃ পৃতনাং সেনামিচ্ছতঃ পুরুষান্ অভিতিষ্ঠ অভিভূয় তিষ্ঠ। কিঞ্চ পৃতনায়তস্তাদৃশানেব অববাধস্ব খণ্ডয়। পৃতন্যত ইতি কব্যধ্বরপৃতনস্য র্চিলোপ ইত্যাকারলোপঃ। পৃতনায়ত ইতি লোহিতাদিগণে পাঠাৎ ক্যপ্রত্যয়েন সিদ্ধম্।

(৪৯) হে সরস্বতি! যাং ত্বা ত্বাং প্রগায়ামি ·উৎকীর্ত্তয়াম্, সা ত্বমিদং বিবাহকর্ম্ম প্রাব প্রকর্ষেণ পালয়। কিম্ভূতে? সুভগে! মনোহরে! বাজিনীবতী বাজিনা ঘোটিকা সা যস্যা অস্তীতি বাজিনীবতী ঘোটিকাবৎ কীর্ত্তিরূপা শীঘ্রগামিনী, ত্বমপি কুত্র গায়সীত্যাহ অস্য ভূতস্য প্রাণিনঃ বিশ্বস্য সর্ব্বস্য অগ্রতঃ। কীদৃশং তদ্‌গানং? যস্যাং সরস্বত্যাং ভূতং পৃথিব্যপ্‌তেজোবায়্বাকাশাত্মকং সমভবৎ যস্যাং বিশ্বমিদং জগৎ তিষ্ঠতি তাং গাথামদ্য ইদানীং গাস্যামি। যা গাথা স্ত্রীণামুত্তমং যশঃ।

(৫০) হে অগ্নে! অগ্রে প্রথমং সূর্য্যাং সূর্য্যবৎকান্তিশালিনীং এতাং কন্যাং পর্য্যবহৎ ত্বং বিবাহিতবান্, এতাং ত্বয়া সহ পুনঃ না মনুষ্যঃ বহতু বিবাহয়তু, ততঃ পতিভ্যঃ মনুষ্যপতয়ে এতাং জায়াং দা দেহি প্রজয়া সন্তত্যা সহ।

ষষ্ঠম্। (৫১) ওঁ সখে সপ্তপদা ভব সা মামনুব্রতা ভব বিষ্ণুস্ত্বানয়তু ইতি সপ্তমম্। (৫২) ততো বরঃ স্কন্ধকৃতাদুদককুম্ভাদুদকমাদায় বধূং বারমেকং মূর্দ্ধ্ন্যভিষিঞ্চতি। ওঁ আপঃ শিবাঃ শিবতমাঃ শান্তাঃ শান্ততমাস্তাস্তে কৃণ্বন্তু ভেষজম্। (৫৩) ইতি মন্ত্রেণ। পুনস্তথৈবোদকমাদায় ওঁ আপো হি ষ্ঠেত্যাদি আপো জনয়থা চ ন ইত্যন্তাভিস্তিসৃভির্বারত্রয়ং মূর্দ্ধ্ন্যভিষিঞ্চতি। ততো বরঃ সূর্য্যমুদীক্ষস্বেতি প্রৈষং দত্ত্বা ওঁ তচ্চক্ষুরিতি মন্ত্রং পঠন্ বধূং সূর্য্যং দর্শয়তি ওঁ তচ্চক্ষুর্দেবহিতং পুরস্তাচ্ছুক্রমুচ্চরৎ। পশ্যেম শরদঃ শতং জীবেম শরদঃ শতং শৃণুয়াম শরদঃ শতম্। প্রব্রবাম শরদঃ শতমদীনাঃ স্যাম শরদঃ শতং ভূয়শ্চ শরদঃ শতাৎ। (৫৪) ততো বধ্বা দক্ষিণাংসস্যোপরি হস্তং নীত্বা তস্যা হৃদয়মালভতে অনেন মন্ত্রেণ—ওঁ মম ব্রতে তে হৃদয়ং দধামি মম চিত্তমনুচিত্তন্তেঽস্তু মম বাচমেকমনা জুষস্ব প্রজাপতিষ্ট্বা নিযুনক্তু

---

(৫১) এষু সপ্তমন্ত্রেষু সখে ইতি বক্ষ্যমাণং সম্বোধনং সর্ব্বত্র সম্বধ্যতে। হে সখে, ত্বামেকং পদং বিষ্ণুর্নয়তু, কিমর্থং? ইষে অভীষ্টলাভায়। দ্বে পদে উর্জ্জে বলায়, ত্রীণি পদানি রায়স্পোষায় ধনসমৃদ্ধয়ে, চত্বারি পদানি মায়োভবায় মায়ঃ সৌখ্যং তস্য ভব উৎপত্তিঃ তস্মৈ। পঞ্চ পদানি পশুভ্যঃ গবাদিভ্যঃ পশু-প্রাপ্তয়ে ইত্যর্থঃ। ষট্ পদানি ঋতুভ্যঃ ঋতুসময়প্রাপ্তয়ে।

(৫২) হে সখে, যাং ত্বাং সপ্তপদানি বিষ্ণুর্নয়তু সা ত্বং সপ্তপদা ভূরাদি-সপ্তলোকস্থা ভব, তথা মামনুব্রতা ভব, মদীয়ব্রতং পালয়ন্তী ভব ভূরাদিসপ্ত-লোকপ্রাপ্তয়ে। পতিব্রতাত্বায় সপ্তমং পদং বিষ্ণুস্ত্বাং নয়তু।

(৫৩) যা আপঃ শিবাঃ কল্যাণকারিণ্যঃ, শিবতমাঃ অতিশয়েন কল্যাণ্যঃ, শান্তাঃ অনুপদ্রবকারিণ্যঃ, শান্ততমাঃ অতিশয়েন শান্তাস্তা আপস্তে তব ভেষজং রোগনাশং কৃণ্বন্তু কুর্ব্বন্তু।

(৫৪) তৎ পূর্ব্বোক্তং চক্ষুঃ, কিম্ভূতং? দেবহিতং দেবানাং সমীহিতং। পুনঃ কীদৃশং? শুক্রং শুক্লং নির্ম্মলং, তথা পুরস্তাৎ প্রাচ্যাং দিশি উচ্চরৎ উদ্‌গচ্ছৎ, তদেতস্য উপস্থানং কৃত্বা বয়ং শরদঃ শতং বর্ষাণি পশ্যেম, তথা শরদঃ শতং জীবেম, তথা শৃণুয়াম প্রব্রবাম, অস্খলিতবাগিন্দ্রিয়া ভবেম, অদীনাঃ স্যাম ন কস্যাপ্যগ্রে দৈন্যং কুর্য্যাম,শতাৎ শরদঃ শতবর্ষোপর্য্যপি ভূয়শ্চ বহুকালং পশ্যেম ইত্যাদি যোজ্যম্।

মহম্। (৫৫) ততো বরো বিবাহপ্রেক্ষকান্ লোকান্ পশ্যন্ পঠেৎ—ওঁ সুমঙ্গলী-রিয়ং বধূরিমাং সমেত পশ্যত সৌভাগ্যমস্যৈ দত্ত্বায়াথাস্তং বিপরেতন। (৫৬) তত আচারাৎ বরস্য বামভাগে বধূমুপবেশয়তি, তস্যাঃ সীমন্তে সিন্দূরমপি দাপয়তি। * ততোঽগ্নেঃ প্রাগুদক্ বা কল্পিতগুপ্তদেশে উত্তরলোম্নি প্রাগ্-গ্রীবে আনডুহলোহিতচর্ম্মণি তাং বধূমুপবেশয়তি বরঃ দৃঢ়পুরুষো বা ওঁ ইহ গাবো নিষীদন্ত্বিহাশ্বা ইহ পুরুষাঃ। ইহোত সহস্রদক্ষিণো যজ্ঞ ইহ পূষা নিষীদন্ত ইতি মন্ত্রেণ।(৫৭) তত আগত্য পূর্ব্ববদ্‌যথাস্থানমুপবিশ্য ব্রহ্মণোঽন্বারব্ধঃ বরঃ ওঁ অগ্নয়ে স্বিষ্টকৃতে স্বাহা ইদমগ্নয়ে স্বিষ্টকৃতে ইতি হুত্বা ততঃ সংস্রবং প্রাশ্য ব্রহ্মণে পূর্ণপাত্রবরয়োরন্যতরং দক্ষিণাং দদ্যাৎ। ওঁ অদ্যেত্যাদি কৃতৈতন্মদীয়-বিবাহহোমকর্ম্মণি কৃতাকৃতাবেক্ষণাদিব্রহ্মকর্ম্মপ্রতিষ্ঠার্থং দক্ষিণামিদং পূর্ণপাত্রং তদনুকল্পভোজ্যং বা ব্রহ্মণে তুভ্যমহং সম্প্রদদে। স্বস্তীতি ব্রহ্মা। ব্রাহ্মণশ্চেৎ স্বকীয়াচার্য্যায় গাং দক্ষিণাং দদাতি, ক্ষত্রিয়শ্চেদ্‌গ্রামং বৈশ্যশ্চেদশ্বং অন্যশ্চেৎ সুবর্ণাদিকং। ওঁ অদ্যেত্যাদি কৃতৈতন্মদীয়বিবাহকর্ম্মপ্রতিষ্ঠার্থমমুকগোত্রায়া-মুকবেদান্তর্গতামুকশাখৈকদেশাধ্যায়িনে অমুকদেবশর্ম্মণে আচার্য্যায় ইমাং গাং দক্ষিণাং তুভ্যমহং সম্প্রদদে। ততো বরঃ ( প্রণীতোদকেন ওঁ সুমিত্রিয়া ন ইত্যাদিনা আত্মানং বধূঞ্চাভিষিচ্য) আশীর্ব্বিবায়াচ্ছিদ্রাবধারণং কুর্য্যাৎ। ততো ধ্রুবমীক্ষস্বেতি প্রৈষং দত্ত্বা বরো বধূং ধ্রুবং দর্শয়তি—ওঁ ধ্রুবমসি ধ্রুবং ত্বা পশ্যামি ধ্রুবৈধি পোষ্যে ময়ি। মহ্যং ত্বাদাদ্ বৃহস্পতির্ময়া পত্যা প্রজাবতী সংজীব শরদঃ

---

( ৫৫ ) অস্যার্থঃ সামবেদি-বিবাহপ্রকরণে দ্রষ্টব্যঃ।

( ৫৬ ) হে সভ্যাঃ! ইয়ং বধূঃ সুমঙ্গলীঃ শোভনমঙ্গলযুক্তা ইমাং ইত্থম্-ভূতাং সমেত সমাগচ্ছত, তথা ইমাং পশ্যত আলোকয়ত, অস্যৈ সৌভাগ্যং দত্ত্বায় দত্ত্বা অথ অনন্তরং অস্তং গৃহং স্বং স্বং স্থানং বিপরেতন গচ্ছত। ইমাং মঙ্গল্যাদিকং দত্ত্বা স্বস্থানং যাতেতি বাক্যার্থঃ।

( ৫৭ ) ইহ বৃষচর্ম্মণি ত্বয়া উপবিশন্ত্যা সহ গাবো অশ্বাঃ পুরুষাশ্চ নিষী-দন্তু। ইহ উতশব্দোঽপ্যর্থঃ, যজ্ঞঃ সহস্রং দক্ষিণা যস্য সঃ সহস্রদক্ষিণঃ পূষা পুষ্টিকারী আদিত্যো নিষীদন্ত নিষীদতু। গবাশ্বাদিভিঃ সহ বৃষচর্ম্মণি ত্বমুপবিশ ইতি বাক্যার্থঃ।

---

* অত্র সিন্দূরদানে কেচিন্মন্ত্রমপি পঠন্তি যথা—ওঁ সিন্ধোরিব প্রাধ্বনে শূঘনাশাঃ পতয়ন্তি যহ্বাঃ। ঘৃতস্য ধারা অরুষোন বাজী কাষ্ঠাভিন্দন্নূর্ম্মিভিঃ পিন্বমানঃ।

শতম্। ( ৫৮ ) সা যদি ন পশ্যেৎ তথাপি পশ্যামীত্যেব ব্রূয়াৎ। ত্রিরাত্রমক্ষার-লবণাশিনৌ স্যাতাম্, অধঃ শয়ীয়াতাম্, চতুর্থীহোমানন্তরং সংবৎসরং ন মৈথুনমুপেয়াতাম্, দ্বাদশরাত্রং ষড়রাত্রং ত্রিরাত্রমন্ততঃ। যদি দিবাভাগে বিবাহস্তদা রাত্রৌ ভোজনোত্তরং ধ্রুবদর্শনম্। ইতি বিবাহপদ্ধতিঃ। *

## অথ চতুর্থী-হোমঃ

ততো বিবাহদিনাচ্চতুর্থী যা রাত্রিস্তস্যাঃ সার্দ্ধপ্রহরদ্বয়োপরি † গৃহাভ্যন্তর এব স্বগৃহ্যোক্তাঘারাজ্যভাগান্তাং কুশণ্ডিকাং বিধায় দ্রব্যাণ্যাসাদয়েৎ। বিশেষস্তু আজ্যস্থাল্যুত্তরে চরুস্থালীব্রীহিতণ্ডুলাঃ। অভিষেকার্থং চূতপল্লবাদ্যোদকপূর্ণ-ঘটঃ। আজ্যং নিরূপ্য চরুস্থাল্যাং প্রণীতোদকং দত্ত্বা তত্রাসাদিতব্রীহি-তণ্ডুলান্ দত্ত্বা চরুমগ্নৌ শ্রপয়েৎ। ততোঽবতার্য্য চরুস্থাল্যাঃ পর্য্যগ্নিকরণং বিধায় আজ্যস্থাল্যা উত্তরে স্থাপয়েৎ। ব্রহ্মণোঽন্বারম্ভত্যাগং বিধায় আজ্যেনৈব পঞ্চাহুতীর্জুহুয়াৎ। আসাং সংস্রবানুদকুম্ভে স্থাপয়েৎ। ওঁ অগ্নে প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি ব্রাহ্মণস্ত্বা নাথকাম উপ-ধাবামি যাস্যৈ পতিঘ্নী তনূস্তামস্যৈ নাশয় স্বাহা। ( ৫৯ ) ইদমগ্নয়ে। ওঁ বায়ো

---

( ৫৮ ) হে বধু! ধ্রুবমসি অবিনাশিনী ভবসি, ত্বা ত্বাং ধ্রুবং তারারূপং পশ্যামি দর্শয়ামি। কিমর্থম্? ত্বং ময়ি ধ্রুবা শাশ্বতী সতী পোষ্যা পোষণীয়া এধি ভবেতি। কিঞ্চ বৃহস্পতিস্ত্বা ত্বাং মহ্যম্ অদাৎ দত্তবান্, তথা সতি ত্বং প্রজা-বতী পুত্রবতী ময়া সহ শরদঃ শতং বর্ষাণি জীব।

( ৫৯ ) হে অগ্নে! প্রায়শ্চিত্তে! দোষহরস্বরূপ! ত্বং দেবানামিন্দ্রাদীনাং প্রায়শ্চিত্তিরসি দোষনাশকঃ ভবসি। অতঃ কারণাৎ ব্রাহ্মণো নাথকামঃ যাচ্ঞাকামঃ অহং ত্বা ত্বামুপধাবামি উপসর্পয়ামি। কা যাচ্ঞা? অস্যৈ অস্যাঃ কন্যায়া যা পতিঘ্নী পতিহিংসকং যদঙ্গং অস্যৈ অস্যাঃ তাং তনুং প্রশময়। অস্যৈ ইতি ষষ্ঠ্যর্থে চতুর্থী। প্রজাঘ্নী সন্তানবিরোধিনী, পশুঘ্নী গবাদিবিরোধিনী, গৃহঘ্নী গার্হপত্যবিরোধিনী। হে গন্ধর্ব্ব! যশঃপ্রকাশক! যশোঘ্নী অস্যা যশোবিরোধি যদঙ্গং তন্নাশয়।

---

* অথ যানভঙ্গাদৌ নিমিত্তে জাতে পারস্করঃ—পর্য্যুক্ষণান্তাং কুশণ্ডিকাং সমাপ্য ইহ রতিঃ ইহ রমধ্বং ইহ ধৃতিঃ ইহ স্বধৃতিঃ স্বাহেতি প্রথমামাহুতিং জুহুয়াৎ, ইদমগ্নয়ে। ওঁ উপ-সৃজন্ ধরুণম্মাত্রে ধরুণো মাতরন্ধয়ম্। রায়স্পোষমস্মাসু দীধরৎ স্বাহা, ইদমগ্নয়ে। ইতি হুত্বা আঘারাদিস্বিষ্টকৃদন্তং চতুর্দ্দশাহুতিকং হোমং কুর্য্যাদিতি প্রযোগমাহ।

† সার্দ্ধপ্রহরত্রয়োপরি ইতি মতান্তরম্।

প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি ব্রাহ্মণস্ত্বা নাথকাম উপধাবামি যাস্যৈ প্রজাঘ্নী তনূস্তামস্যৈ নাশয় স্বাহা। ইদং বায়বে। ওঁ সূর্য্য প্রায়শ্চিত্তে ত্বং দেবানামিত্যাদি পশুঘ্নী তনূস্তামস্যৈ নাশয় স্বাহা। ইদং সূর্য্যায়। ওঁ চন্দ্র প্রায়শ্চিত্তে ত্বং দেবানামিত্যাদি যাস্যৈ গৃহঘ্নী তনূস্তামস্যৈ নাশয় স্বাহা। ইদং চন্দ্রায়। ওঁ গন্ধর্ব্ব প্রায়শ্চিত্তে ত্বমিত্যাদি যশোঘ্নী তনূস্তামস্যৈ নাশয় স্বাহা। ইদং গন্ধর্ব্বায়। স্থালীপাকস্যৈকদেশং জুহোতি ওঁ প্রজাপতয়ে স্বাহা। ইদং প্রজাপতয়ে। ইতঃ পরং স্বিষ্টকৃদাদিদশাহুতীনাং সংস্রবান্ প্রোক্ষণ্যাং ধারয়েৎ। ব্রহ্মণোঽন্বারব্ধঃ স্থালীপাকেন ওঁ অগ্নয়ে স্বিষ্টকৃতে স্বাহা ইদমগ্নয়ে স্বিষ্টকৃতে। ততো মহাব্যাহৃত্যাদিপ্রাজাপত্যান্তা নবাহুতীরাজ্যেন জুহুয়াৎ। ততঃ পরিস্তরণকুশানগ্নৌ প্রক্ষিপ্য চূতপল্লবেন পাত্রান্তরস্থান্ সংস্রবান্ প্রাশ্য পূর্ণপাত্রবরয়োরন্যতরং ব্রহ্মণে দক্ষিণাং দত্ত্বা তত উদপাত্রাদুদকমাদায় বধূং মূর্দ্ধ্ন্যভিষিঞ্চতি—ওঁ যা তে পতিঘ্নী প্রজাঘ্নী যশোঘ্নী পশুঘ্নী গৃহঘ্নী নিন্দিতা তনূর্জারঘ্নী তাং ত এনাং করোমি সা জীর্য্য ত্বং ময়া সহাসৌ (৬০) ইতি সম্বোধনান্তং বধূনাম প্রযোক্তব্যম্। অথ বরো বধূং স্থালীপাকং প্রাশয়তি অনেন মন্ত্রেণ—ওঁ প্রাণৈস্তে প্রাণান্ সন্দধাম্যস্থিভিরস্থীনি মাংসৈর্মাংসানি ত্বচা ত্বচমিতি মন্ত্রেণ। (৬১) বারদ্বয়ং তূষ্ণীম্, সা চ ভর্ত্রা মন্ত্রে পঠিতে প্রাশ্নাতি। ততঃ প্রণীতোদকেন ( ওঁ সুমিত্রিয়া ন ইত্যাদিমন্ত্রৈঃ ) আত্মানং বধূঞ্চাভিষিচ্যাশীর্ব্বাদং কৃত্বাচ্ছিদ্রাবধারণং কুর্য্যাৎ।

ইতি চতুর্থীহোমপদ্ধতিঃ।

## অথ গর্ভাধানম্

তত্র কৃতনিত্যক্রিয়ো যজমান ওঁ কর্ত্তব্যেঽস্মিন্ অমুকগোত্রায়া মৎপত্ন্যা অমুকীদেব্যাঃ শুভগর্ভাধানকর্ম্মাঙ্গীভূত-গণপত্যাদি-নানাদেবতা-পূজাপূর্ব্বক-ষষ্ঠীমার্কণ্ডেয়পূজাকর্ম্মণি ওঁ পুণ্যাহং ভবন্তো ব্রুবন্তু ইত্যাদি পুণ্যাহাদীনি বাচয়িত্বা

---

(৬০) হে অসৌ! অমুকি! তে তব যা তনূঃ নিন্দিতা দোষাবহা, তামেনাং জারঘ্নীং উপপতিঘাতিনীং তনূং ততঃ করোমি; কা সা তনূঃ? পতিঘ্নীত্যাদি যোজ্যম্। অনেনাভিষেককর্ম্মণা ময়া সহ জীর্য্য জরাং প্রাপ্নুহি।

(৬১) হে কন্যে! তে তব প্রাণান্ মদীয়প্রাণৈঃ সন্দধামি যোজয়ামি। অপরং স্পষ্টম্।

সঙ্কল্প্য ষষ্ঠীং মার্কণ্ডেয়ঞ্চ যথাবিধি সম্পূজ্য গৌর্য্যাদি-ষোড়শ-মাতৃকাপূজা-বসুধারা-বৃদ্ধিশ্রাদ্ধানি বিধায় পত্নীসহিত উত্থায় তাম্রাদিপাত্রে বা নূতনশরাবে দুগ্ধ-রক্তচন্দন জবাপুষ্পাদিযুক্তমর্ঘ্যং গৃহীত্বা ওঁ নমো বিবস্বতে ব্রহ্মন্ ভাস্বতে বিষ্ণুতেজসে। জগৎসবিত্রে শুচয়ে সবিত্রে কর্ম্মদায়িনে। ওঁ এহি সূর্য্য সহস্রাংশো তেজোরাশে জগৎপতে। পুত্রার্থিনী দদাম্যর্ঘং গৃহাণ ত্বং দিবাকর। ওঁ বিশ্বপা বিশ্ববন্ধুশ্চ বিশ্বাত্মা বিশ্বসম্ভবঃ। নবপুষ্পোৎসবে চার্ঘং গৃহাণ ত্বং দিবাকর। এষোঽর্ঘঃ শ্রীসূর্য্যায় নমঃ। ইতি দত্ত্বা প্রণমেৎ—ওঁ কমলস্কন্দমূল ত্বং সংসারাৎ ত্রাহি মাং প্রভো। পুত্রার্থিনী প্রপন্নাহং স্বর্গদীপ নমোঽস্তু তে॥ ততঃ স্বদক্ষিণে পত্নীমুপবেশ্য (তস্যা দক্ষিণস্কন্ধাবসক্ত) দক্ষিণপাণিনা বধ্বা হৃদয়ং স্পৃষ্ট্বা জপেৎ—ওঁ যত্তে সুসীমে হৃদয়ং দিবি চন্দ্রমসি শ্রিতম্। বেদাহং তন্মাং তদ্বিদ্যাৎ পশ্যেম শরদঃ শতং জীবেম শরদঃ শতꣳ শৃণুয়াম শরদঃ শতম্। ততঃ পত্ন্যা নাভিদেশে হস্তং দত্ত্বা ইমং মন্ত্রং পঠেৎ—ওঁ গর্ভং ধেহি সিনীবালি গর্ভং ধেহি সরস্বতি। গর্ভন্তে অশ্বিনৌ দেবাবাধত্তাং পুষ্করস্রজৌ॥ ইতি পঠিত্বা নিষেকং কুর্য্যাৎ। ইতি পশুপতিমতম্। অথ হলায়ুধমতং লিখ্যতে —দক্ষিণপাণিনা বধ্বা যোনিমনেন মন্ত্রেণ স্পৃশতি—যাজ্ঞবল্ক্যঋষির্বিরাট্‌ছন্দঃ পূষ-সবিতৃ-রুদ্র-ত্বষ্টৃ-বৈশ্বানরা দেবতা গর্ভাধানে বিনিয়োগঃ। ওঁ পূষা ভগং তে সবিতা দধাতু রুদ্রস্ত্বষ্টা কল্পয়তু সামগং ত্বষ্টা রূপাণি তেজো বৈশ্বানরো দধাতু। (১) ততো বধূমভিমন্ত্রয়েদনেন মন্ত্রেণ—ওঁ গর্ভং ধেহি সিনীবালি গর্ভং ধেহি সরস্বতি। গর্ভন্তে অশ্বিনৌ দেবাবাধত্তাং পুষ্করস্রজৌ। (২) ততো নিষেকং কুর্য্যাদনেন

---

(১) প্রস্তুতত্বাৎ পত্নী সম্বোধ্যা। হে পত্নি! তে তব ভগং কামং প্রসবশীলং সূর্য্যো দধাতু পুষ্ণাতু। কিম্ভূতঃ? পূষা পোষকঃ রুদ্রঃ শিবঃ ত্বষ্টা ত্বষ্টৃরূপো নির্ম্মাণকারকঃ, সামগং পুত্রং কল্পয়তু দধাতু। কিঞ্চ ত্বষ্টা প্রজাপতিঃ রূপাণি দধাতু, তথা বৈশ্বানরো অগ্নিঃ তেজো দধাতু।

(২) হে সিনীবালি! চন্দ্রপোষিকে ভমিস্রে! গর্ভং ধেহি ধারয়. হে সরস্বতি! গর্ভং ধেহি। কিঞ্চ হে পত্নি! তে তব গর্ভং অশ্বিনৌ অশ্বিনীকুমারৌ আধত্তাং। কিম্ভূতৌ? দেবৌ দেবরূপৌ। পুনঃ কিম্ভূতৌ? পুষ্করস্রজৌ পদ্মমালিনৌ, এতেন বীজকলাপালিকা রাত্রিরূপা লক্ষ্মীঃ ব্যাহাররূপা সরস্বতী চ প্রার্থিতা। ততশ্চ দ্যুতি অশ্বিনৌ চ প্রার্থ্যেতে, এতেষাং গুণৈর্যুক্তো মম পুত্রো ভবত্বিতি প্রার্থনা।

মন্ত্রেণ—ওঁ রেতোঽমৃতং বিজহাতি যোনিং প্রবিশদিন্দ্রিয়ম্। গর্ভো জরায়ুণা বৃত উল্বং জহাতি জন্মনা। (৩) ততোঽভিগমানন্তরং পতির্বধ্বা দক্ষিণস্কন্ধোপরি দক্ষিণহস্তং দত্ত্বা হৃদয়ং স্পৃশত্যনেন মন্ত্রেণ—ওঁ যত্তে সুসীমে হৃদয়ং দিবি চন্দ্রমসি শ্রিতম্। বেদাহং তন্মাং তদ্বিদ্যাৎ পশ্যেম শরদঃ শতং জীবেম শরদঃ শতম্ শৃণুয়াম শরদং শতম্। (৪) ইত্যন্তম্। এবং কৃতে যদি গর্ভো ন ভবতি তদাঽন্যস্মিন্নৃতৌ রজোদর্শনচতুর্থদিবসে দিবা দম্পতী নিরাহারৌ স্যাতাম্। ততঃ পতিঃ সায়ংসন্ধ্যাং নির্ব্বর্ত্ত্য শুভে লগ্নেঽহতবাসঃ পরিদধানাং স্বাচান্তাং কৃতমঙ্গলাং প্রাঙ্মুখীমাত্মবামে উপবেশ্য পূর্ব্বদিনে উপোষ্য পুষ্যানক্ষত্রে প্রাতঃ সমুদ্ধৃতং শ্বেতকণ্টকারিকামূলং শিশিরজলেন পিষ্ট্বা মঙ্গলপূর্ব্বকং তস্যা নাসাপুটে সিঞ্চেদনেন মন্ত্রেণ—ওঁ ইয়মোষধী ত্রায়মাণা সহমানা সরস্বতী। অস্যাং বৃহত্যাং পুত্রঃ পিতুরিব নাম জগ্রভত॥ ততো যথাসুখং ভুঞ্জীয়াতাম্। ততঃ পূর্ব্বোক্তনিষেকং কুর্য্যাৎ।

(৩) মম ইন্দ্রিয়ং শেফঃ রেতঃ বিজহাতি বিশিষ্টং ত্যজতি। কিম্ভূতং? অমৃতং সুধারূপং। কিম্ভূতমিন্দ্রিয়ং যোনিং প্রবিশৎ। রেতোঽমৃতমমোঘঞ্চেৎ অত এব গর্ভঃ সন্ উল্বং ক্লেদং জহাতি জহাতু ত্যজতু। কেন? জন্মনা উৎপত্ত্যা। কিম্ভূতঃ? জরায়ুণা বৃতঃ নানারূপেণাবেষ্টিতঃ।

(৪) হে সুসীমে! শোভনা সীমা অবয়বসন্ধির্যস্যা সা সুসীমা হে শোভনাবয়বসন্ধানে! তে তব যৎ হৃদয়ং মনঃ তৎ অহং বেদ জানামি। দিবি আকাশে চন্দ্রমসি শ্রিতং সম্বদ্ধং প্রথমতো নারীণাং চন্দ্রঃ স্বামীতি শ্রুতেঃ। অতস্তদাশ্রিতং চিত্তম্ ইত্যভিপ্রায়ঃ। ইদানীং তদ্ধৃদয়ং মাং বিদ্যাৎ মাং পতিত্বেন জানাতু। কিঞ্চ পশ্যেম শরদঃ শতং আবাং শতং বর্ষাণি পশ্যাবঃ। এবং জীবেম শরদঃ শতং শৃণুয়াম শরদঃ শতম্।

(৫) ইয়ম্ ওষধী বৃহতী ব্যাধিনাশকরী ত্রায়মাণা রক্ষাকরী সহমানা উৎপন্নদোষমর্ষিণী সরস্বতী বাগিব প্রসাদহেতুঃ অস্যাং কণ্টকারিকায়াং পুত্রঃ নাম জগ্রভত প্রকাশকত্বং গৃহ্ণাতু। কিম্ভূতং নাম? পিতুরিব পিতৃসদৃশমিত্যর্থঃ।

## অথ পুংসবনম্

তত্র গর্ভাধানাৎ দ্বিতীয়ে তৃতীয়ে বা মাসি পুংনক্ষত্রেষু হস্তা-মূলা-শ্রবণ-পুনর্ব্বসু-পুষ্যা-মৃগশিরার্দ্রাসু কুম্ভমিথুন-সিংহ-ধনুর্মীনলগ্নেষু রবিমঙ্গল-বৃহস্পতিবারেষু পুংসবনে কর্ত্তব্যে পতিঃ প্রাতঃ নির্ব্বর্ত্তিতনিত্যকৃত্যঃ সগণেশ-গৌর্য্যাদি-ষোড়শ-মাতৃকা-পূজা-বসুধারায়ুষ্যসূক্তজপাভ্যুদয়িক-শ্রাদ্ধানি বিধায় সপত্নীকো দিবা নিরাহারস্তিষ্ঠেৎ। ততঃ সায়ংসন্ধ্যাং কৃত্বা আচান্তাং কৃতমঙ্গলাং প্রাঙ্মুখীমাত্মবামে উপবেশ্য বটারোহং বটশুঙ্গাং কুশমূলং সোমলতাঞ্চ শিশিরজলেন শীতলজলেন বা শিলায়াং পিষ্ট্বা মঙ্গলপূর্ব্বকং দক্ষিণনাসাপুটে সিঞ্চেদাভ্যাং মন্ত্রাভ্যাম্—(ওঁ হিরণ্যগর্ভঋষিঃ প্রজাপতি-র্দেবতা ত্রিষ্টুপ্ ছন্দশ্চয়নে হিরণ্যগর্ভপুরুষোপধানে বিনিয়োগঃ)। ওঁ হিরণ্য-গর্ভঃ সমবর্ত্ততাগ্রে ভূতস্য জাতঃ পতিরেক আসীৎ। স দাধার পৃথিবীং দ্যামু-তেমাং কস্মৈ দেবায় হবিষা বিধেম। (১) (নারায়ণঋষির্জগদ্বীজস্তৎপুরুষো দেবতা ত্রিষ্টুপ্ ছন্দঃ পুরুষমেধেজ্যাদিত্যোপস্থানে বিনিয়োগঃ)। ওঁ অদ্ভ্যঃ সম্ভৃতঃ পৃথিব্যৈ রসাচ্চ বিশ্বকর্ম্মণঃ সমবর্ত্ততাগ্রে তস্য ত্বষ্টা বিদধদ্রূপমেতি তন্মর্ত্ত্যস্য দেবত্বমাজানমগ্রে। (২) পুত্রবীর্য্যবত্ত্বকামনায়াস্তু বধ্বা যোনিসন্নিধৌ

---

(১) হিরণ্যগর্ভঃ হিরণ্যগর্ভাখ্যঃ পুরুষঃ অগ্রে সমবর্ত্তত প্রথমং সমবর্ত্তত যো হিরণ্যগর্ভো জাতমাত্রো ভূতস্য প্রাণিমাত্রস্য একঃ অদ্বিতীয়ঃ পতিরাসীৎ স্বামী বভূব। স এব পৃথিবীং দাধার ন কেবলং পৃথিবীমুত ইমাং দ্যাম্ অন্ত-রীক্ষমেব। এবম্ভূতায় কস্মৈ কায় প্রজাপতয়ে হবিষা হবিঃ বিধেম দদ্মঃ। দাধার ইতি ছান্দস আকারঃ। কায়েতি প্রাপ্তে কস্মৈ আদেশ্চান্দসঃ।

(২) যো বিষ্ণুরগ্রে প্রথমম্ অদ্ভ্যো জলাৎ পৃথিব্যৈ চ পৃথিব্যা অপি, সম্ভৃতঃ সমবর্ত্তত উৎপন্নোঽভবৎ, জলপৃথিব্যোরুপাদানং পঞ্চমহাভূতানামুপ-লক্ষণম্, কুতো নিমিত্তকারণাৎ? রসাৎ কামাৎ সিসৃক্ষারূপাৎ বিশ্বকর্ম্মণঃ বিশ্বং সর্ব্বং কর্ম্ম যস্য তস্য বিষ্ণো রূপং মূর্ত্তিং বিদধৎ ধারয়ন্ ত্বষ্টা আদিত্যঃ অগ্রে পুরতঃ সর্ব্বেষামপরোক্ষমিত্যর্থঃ। এতি গচ্ছতি। তদ্রূপং মর্ত্ত্যস্য মনুষ্যস্য দেবত্বং দেবত্বেনৈব ভবতি। কিম্ভূতং? আজানং যাবজ্জন্ম। বিষ্ণুঃ সৃষ্ট্যাদৌ পঞ্চভূতেভ্যঃ উপাদানকারণেভ্যঃ সিসৃক্ষাং নিমিত্তকারণং প্রাপ্য উৎপদ্যতে। তদয়মর্থঃ—আদিত্যস্তস্য বিষ্ণোর্যদ্রূপং ধারয়ন্ গচ্ছতীতি সর্ব্বেষাং

জলশরাবং স্থাপয়িত্বা তজ্জলমভিমন্ত্রয়েদনেন মন্ত্রেণ—( প্রজাপতির্ঋষির্গরুড়ো দেবতা প্রকৃতিশ্ছন্দশ্চয়নস্থলাভিমন্ত্রণে বিনিয়োগঃ ) ওঁ সুপর্ণোঽসি গরুত্মাং-স্ত্রিবৃত্তে শিরোগায়ত্র্যং চক্ষুর্বৃহদ্রথন্তরে পক্ষৌ। স্তোম আত্মা ছন্দাংস্যঙ্গানি যজূংষি নাম সাম তে তনুর্বামদেব্যং যজ্ঞা যজ্ঞিয়ং পুচ্ছং ধিষ্ণ্যাঃ শফাঃ সুপর্ণোঽসি গরুত্মান্ দিবং গচ্ছ স্বঃ পত। (৩) ততঃ শান্তিং কৃত্বাশীর্ব্বাদং বিধায়াচ্ছিদ্রাবধারণং কুর্য্যাৎ।

ইতি পুংসবনম।

## অথ সীমন্তোন্নয়নম্

তত্র প্রথমে গর্ভে গর্ভাধানাবধি ষষ্ঠেঽষ্টমে বা মাসি পুংনক্ষত্রে রিক্তান্যতিথৌ পুংসবনোক্তনক্ষত্রেষু অনুরাধায়াঞ্চ মকর-মেষাদ্যতিরিক্ত লগ্নে রবি-মঙ্গল-গুরুবারেষু চন্দ্রতারানুকূলে দিবসে সীমন্তোন্নয়নে কর্ত্তব্যে পতিঃ প্রাতঃ সগণেশ-গৌর্য্যাদি-মাতৃকাপূজা-বসুধারা-সম্পাতনায়ুষ্যসূক্তজপাভ্যুদয়িকশ্রাদ্ধানি বিধায় বহিঃশালায়াং স্বগৃহ্যোক্তবিধিনা পরিস্তরণান্তাং কুশণ্ডিকাং বিধায় দ্রব্যাণ্যাসা-দয়েৎ। তত্র বিশেষঃ—তিল-তণ্ডুল-মুদ্গাঃ মৃদুপীঠং শঙ্খ-চক্র-গদা-পদ্ম-বিষ্ণুপদ-যুগ্মাঙ্কিতং যুগ্মান্যুড়ুম্বরফলানি একস্তবকনিবদ্ধানি ত্রয়োদশদর্ভপিঞ্জল্যঃ প্রাদেশমিত-কুশত্রয়নির্ম্মিতাঃ ত্রিশ্বেতশল্লকীকণ্টকং বীরুধতরুশঙ্কুঃ ( কাণ্ডং ) আশ্বত্থো বা শঙ্কুঃ শরেষীকা তর্কুঃ পূর্ণপাত্রং বীণাগাথিনৌ চেতি। তত আজ্যমধিশ্রিত্য চরুস্থাল্যাং মুদ্গান্ প্রক্ষিপ্যাধিশ্রিত্য ঈষৎশ্রিতেষু তিলতণ্ডুলপ্রক্ষেপং তেষু কৃত্বা প্রণীতোদকং দত্ত্বা সোদকং চরুমগ্নের্দক্ষিণতঃ

---

প্রত্যক্ষং তদ্রূপং মনুষ্যস্ত দেবত্বেন ভবতীতি। পৃথিব্যৈ ইতি পঞ্চম্যর্থে চতুর্থী। দেবত্বমিতি তৃতীয়ার্থে দ্বিতীয়া।

(৩) সুপর্ণঃ শোভনপক্ষঃ গরুত্মান্ দূরগামিত্বাদিগুণযোগেন প্রশস্ত-পক্ষবান্ ত্রিবৃত্ত ওঁকারঃ তে তব শিরঃ মস্তকম্, গায়ত্র্যং সাম তে চক্ষুঃ, বৃহদ্রথ-ন্তরে সামনী তে পক্ষৌ, স্তোম স্তোমাখ্যপঞ্চবিংশতিসামানি তে আত্মা স্বরূ-পম্, ছন্দাংস্যনুষ্টুবাদীনি অঙ্গানি, যজূংষি যজুর্ব্বেদো নাম সংজ্ঞা, সাম তে তব তনুঃ শরীরং, কতমৎ সাম? বামদেব্যং সাম, যজ্ঞা যজ্ঞিয়ং সাম চ পুচ্ছং লাঙ্গূলম্, ধিষ্ণ্যাঃ অগ্নয়ঃ শফাঃ নখাঃ, যতস্ত্বং সুপর্ণোঽসি গরুত্মাংশ্চ অতো দিবম্ আকাশং গচ্ছ স্বঃ স্বর্গং পত যাহি।

শ্রুপয়িত্বা অবতার্য্য আজ্যস্যোত্তরতো নিধায় পর্য্যগ্নিকরণায় জ্বলদিন্ধনং গৃহীত্বা ঈশানকোণাদারভ্য দক্ষিণাবর্ত্তেন চরুং ত্রিঃ পরিবেষ্ট্য তমগ্নিং তত্রৈবাগ্নৌ নিক্ষিপ্যাজ্যভাগান্তে অগ্নে ত্বং মঙ্গলনামাসীতি নাম কৃত্বাবাহ্য সম্পূজ্য স্থালীপাকেন ওঁ প্রজাপতয়ে স্বাহা ইতি হুত্বা ইদং প্রজাপতয়ে ইতি ত্যাগং বিধায় ব্রহ্মণোঽন্বারব্ধঃ .স্থালীপাকেনোত্তরার্দ্ধাৎ স্বিষ্টকৃদাহুতিং হুত্বা আজ্যেন মহাব্যাহৃত্যাদি-প্রাজাপত্যান্তা নবাহুতীর্হুত্বা ব্রহ্মণোঽন্বারব্ধত্যাগং বিধায় পরিস্তরণ-কুশান্ অগ্নৌ প্রক্ষিপ্য সংস্রবং প্রাশ্য পূর্ণপাত্র বরয়োরন্যতরং ব্রহ্মণে দক্ষিণাং দত্ত্বা অগ্নেঃ পশ্চান্মৃদ্বাসনোপরি স্থিতাং সুস্নাতাং পরিহিতাহতবস্ত্রযুগ্মাং গর্ভিণীমুপবেশ্য ঔডুম্বরাদিপূর্ণপাত্রান্তদ্রব্যেণ পুঞ্জীকৃতেন পত্ন্যা ললাটোপরি শিরঃপ্রদেশস্থকেশান্ (তস্যাঃ সীমন্তং) ওঁ ভূর্ভুবঃস্বর্বিনয়ামি ইতি মন্ত্রেণ সকৃদ্ বিনয়তি ( ললাটমারভ্য কেশান্ দ্বিধা করোতি।) অথবা ওঁ ভূর্বিনয়ামি ওঁ ভুবো বিনয়ামি ওঁ স্বর্বিনয়ামি (১) ইতি মন্ত্রত্রয়েণ বিবিক্তান্ কুর্য্যাৎ। ততস্তেন কেশেন গুচ্ছত্রয়েণ বেণীকৃতকেশকলাপং প্রাপ্য তত ঔডুম্বরাদি পঞ্চ গর্ভিণ্যা বেণ্যাং বধ্নাতি—ওঁ অয়মূর্জ্জাবতো বৃক্ষ উর্জ্জীব ফলিনী ভব ( ২ ) ইতি মন্ত্রেণ। ততো বীণাগাথিনৌ রাজানং সংগায়তামিতি প্রৈষেণ বদতি অথবা অমুকং বীরতরং গায়তাম্ ইতি। যদি তৌ ন প্রাপ্যেতে তদেমাং গাথাং স্বয়ং সংগায়তি। সা যথা—ওঁ সোম এব নো রাজেমা মানুষীঃ প্রজাঃ। অবিমুক্তচক্রা আসীরংস্তীরে তুভ্যমসৌ। (৩) অসাবিতি সমীপাবস্থিতায়া নদ্যা গঙ্গাযমুনাদি প্রথমান্তং নাম

---

(১) ভূর্লোকং পৃথক্ করোমি, অন্তরীক্ষং পৃথক্ করোমি. স্বর্গলোকং পৃথক্ করোমি। পুংসবনে হিরণ্যগর্ভ ইত্যাদিমন্ত্রদ্বয়েন নস্যং দত্ত্বা ত্রৈলোক্যপতিস্ত্রৈলোক্যাধারঃ পুরুষোত্তমো গর্ভে আহিতঃ। অতো গর্ভিণীয়ং ত্রৈলোক্যময়ী বর্ত্ততে। তথা চ সতি ভূরাদিলোকত্রয়মসঙ্কীর্ণং ভবতু।

(২) হে গর্ভিণি! অয়ং বৃক্ষ উর্জ্জাবতো বলবান্ উর্জ্জীব উদুম্বরীব ফলিনী ভব, যথা উদুম্বরী ফলযুক্তা তথা ত্বমপি পুত্রিণী ভব। উর্জ্জাবৎ ইতি সুপাংসুপো ভবন্তি ইতি বিভক্তিব্যত্যয়েন প্রথমৈকবচনস্থানে দ্বিতীয়াবহুবচনম্।

(৩) হে অসৌ! অমুকনদি! তুভ্যং তব তীরে ইমাঃ প্রজাঃ আসীরন্

গৃহ্লাতি গর্ভিণ্যেব। * ততঃ অদ্যেত্যাদি মৎপত্ন্যাঃ শুভসীমন্তোন্নয়নকর্ম্মণি ইদং ভোজ্যত্রয়ং গন্ধাদ্যর্চ্চিতং প্রজাপতিদৈবতং যথাসম্ভবগোত্রশাখা-নামভ্যো ব্রাহ্মণেভ্যোঽহং সম্প্রদদে ইত্যুৎসৃজেৎ। তত ঋচং বাচমিত্যাদিনা পারস্করমতে (শান্তিপ্রকরণে মন্ত্রোঽনুসন্ধেয়ঃ) শান্তিং কৃত্বা পশুপতিমতে ওঁ সুমিত্রিয়া ন আপ ওষধয়ঃ সন্তু ইত্যনেন আত্মানং বধূঞ্চাভিষিচ্য দুর্মিত্রিয়া ইত্যাদিনা পবিত্রক্ষেপাদিকং কৃত্বা অচ্ছিদ্রাবধারণং কুর্য্যাৎ। তত আচারাৎ পত্ন্যাশ্চরুশেষভক্ষণম্। দৈবাদকৃতসীমন্তায়াঃ প্রসবে ক্রোড়-স্থিতপুত্রায়াঃ সীমন্তোন্নয়নং কার্য্যম্। তথাহি—নারী যাঽকৃতসীমন্তা প্রসবেত কথঞ্চন। ক্রোড়ে নিধায় তং বালং পুনঃ সংস্কারমর্হতি। ইতি মার্কণ্ডেয়-পুরাণবচনাৎ।

ইতি সীমন্তোন্নয়নম্।

## অথ সোষ্যন্তীকর্ম্ম

তত্র শূলবতীং পত্নীমালক্ষ্য শুচিরাচান্তো ভর্ত্তা জলং গৃহীত্বা বিলম্বিতপ্রসবাং কুশোদকেন স্ত্রিয়মভ্যুক্ষতি। ওঁ এজতু দশমাস্যো গর্ভো জরায়ুণা সহ। যথায়ং বায়ুরেজতি যথা সমুদ্র এজতি। এবায়ং দশমাস্যো অস্রজ্জরায়ুণা সহ। (১)

---

তিষ্ঠন্তি। কিম্ভূতাঃ? মানুষীঃ মানুষ্যঃ। পুনঃ কিম্ভূতাঃ? অবিমুক্তচক্রাঃ অবিমুক্ত-মপরিত্যক্তং চক্রং মণ্ডলং যাভিস্তাঃ তাসাং প্রজানাং রাজা ইব রাজা রক্ষকঃ পোষ্টা চ স এব নঃ অস্মাকং সোমশ্চন্দ্রো রক্ষকঃ পোষ্টা চ ভবতু।

(১) যথায়ং বায়ুরেজতি কম্পতে যথা সমুদ্রঃ এজতি কম্পতে তথা যদ্গর্ভো দশমাস্যঃ সম্পূর্ণপ্রসবকালীনো গর্ভ এজতু কম্পতাম্ তেন সহ। ন কেবলং গর্ভঃ অপি তু জরায়ুণা সহ জরায়ুর্গর্ভবেষ্টনং চর্ম্মপুটকম্। যথা বায়ুঃ সমুদ্রশ্চ এজতি তথা গর্ভো দশমাস্যঃ জরায়ুণা সহ অস্রৎ অধঃপাতী ভবতু। অস্রৎ স্রংসু অধঃপতনে আশংসায়াং লিঙ্ ছান্দস অড়াগমঃ আগমশাসন-মনিত্যমিতি যাৎ ন ভবতি।

---

* যত্র নদ্যা অসম্ভবস্তত্র হে গঙ্গে হে যমুনে ইতি বদেৎ।

যদি পুত্রপ্রসবে জরায়ুপতনে বা বিলম্বো ভবতি, তদা শুচিরাচান্তঃ পতির্জপেদিমম্ মন্ত্রং, যথা—ওঁ অবৈতু পৃশ্নিঃ শেবলংঁ শুনে জরায়্বত্তবে। নৈব মাংসেন পীবরীং ন কস্মিংশ্চনায়ত রাজরায়ু পদ্যতামিতি। (ইমং মন্ত্রং স্ত্রিয়ং শ্রাবয়ন্ পঠেদিতি পশুপতিঃ)। ইতি সোষ্যন্তীকর্ম্ম।

## অথ জাতকর্ম্ম

তত্রাদৌ পুত্রে জাতে সচেলং স্নাত্বা পিতা অচ্ছিন্নায়াং নাড্যাং পুত্রজন্ম-পুত্রমুখদর্শন-নিমিত্তদ্বয়োল্লেখেন তন্ত্রেণ সগণেশমাতৃকাপূজাদিকং বৃদ্ধিশ্রাদ্ধং চ বিধায় মেধাজননায়ুষ্যে করোতি। মেধাজননঞ্চ অনামিকয়া সুবর্ণান্তর্হিতয়া মধুঘৃতে প্রাশয়তি, কেবলং ঘৃতং বা, তেন কুমারজিহ্বাং পরিমার্ষ্টি ওঁ ভূস্ত্বয়ি দধামি ওঁ ভুবস্ত্বয়ি দধামি ওঁ স্বস্ত্বয়ি দধামি ওঁ ভূর্ভুবঃস্বঃ (সর্ব্বং) ত্বয়ি দধামীত্যনেন মন্ত্রেণ। (১) এতচ্চ কালাতিক্রমে মন্ত্রপাঠমাত্রম্। অথায়ুষ্যম্। কুমারস্য দক্ষিণকর্ণসমীপে নাভিসমীপে বা অগ্নিরায়ুষ্মানিত্যাদিকান্ সমুদ্র আয়ুষ্মান্ ইত্যন্তানষ্টৌ মন্ত্রান্ ত্রির্জপতি—ওঁ অগ্নিরায়ুষ্মান্ স বনস্পতিভিরায়ুষ্মাংস্তেন ত্বায়ুষা আয়ুষ্মন্তং করোমি। (২) (ক) ওঁ সোম আয়ুষ্মান্ স ঔষধীভিরায়ুষ্মাংস্তেন ত্বায়ুষায়ুষ্মন্তং করোমি। (খ) ওঁ ব্রহ্ম আয়ুষ্মৎ তদ্ব্রাহ্মণৈরায়ুষ্মৎ তেন ইত্যাদি। (গ) ওঁ দেবা আয়ুষ্মন্তস্তে অমৃতেনায়ুষ্মন্তস্তেনেত্যাদি। (ঘ) ওঁ ঋষয় আয়ুষ্মন্তস্তে ব্রতৈরায়ুষ্মন্তস্তেনেত্যাদি। (ঙ) ওঁ পিতর আয়ুষ্মন্তস্তে

---

(১) ত্বয়ি কুমারে ভূর্লোকম্ আদধামি, অন্তরীক্ষলোকং ত্বয়ি দধামি, স্বঃ স্বর্গলোকং ত্বয়ি দধামি ভূর্ভুবঃস্বরেতল্লোকত্রয়োপলক্ষিতমেতদাশ্রিতং সর্ব্বং প্রমেয়জাতং ত্বয়ি দধামি। ত্বমনেন ত্রৈলোক্যগতপ্রমেয়জাতাধানকর্ম্মণা মেধাযুক্তো ভব।

(২) (ক) যোঽয়মগ্নিরায়ুষ্মান্ চিরস্থায়ী স বনস্পতিভির্বৃক্ষৈঃ দারুতয়া অগ্নেরাশ্রয়ত্বমুপগতৈঃ আয়ুষ্মান্ তেন অগ্নিসম্বন্ধিনা আয়ুষা ত্বা ত্বাং কুমারম্ আয়ুষ্মন্তং করোমীতি সম্বন্ধঃ। (খ) সোমশ্চন্দ্রঃ ঔষধীভিঃ বীর্য্যাদিভিরমাবস্যায়াং ক্ষীণশ্চন্দ্রো বনস্পতিং বিশতি ততঃ শুক্লপক্ষে তাভিরাপ্যায়মানঃ ক্রমেণ বৃদ্ধিমাসাদয়ন্ আয়ুষ্মান্ ভবতি। (গ) ব্রহ্ম বেদঃ ব্রাহ্মণৈ শিষ্যোপাধ্যায়ক্রমেণ ধার্য্যমাণো বেদ আয়ুষ্মান্ ভবতি। (ঘ) দেবানাং হি অমৃতং প্রাপ্যামরত্বম্। (ঙ) ঋষয়ঃ মরীচ্যাদয়ঃ ব্রতৈঃ চান্দ্রায়ণাদিভিঃ ঋষীণাং

স্বধাভিরায়ুষ্মন্তস্তেনেত্যাদি। (চ) ওঁ যজ্ঞ আয়ুষ্মান্ স দক্ষিণাভিরায়ুষ্মাংস্তেনেত্যাদি। (ছ) ওঁ সমুদ্র আয়ুষ্মান্ স স্রবন্তীভিরায়ুষ্মাংস্তেনেত্যাদি। (জ) ওঁ কশ্যপস্য ত্র্যায়ুষং, জমদগ্নেঃ ত্র্যায়ুষং ত্র্যায়ুষং। যদ্দেবানাং ত্র্যায়ুষমিতি কাণ্বশাখীয়ানাম্। যদ্দেবেষু ত্র্যায়ুষমিতি মাধ্যন্দিনানাং, তন্মেঽস্তু ত্র্যায়ুষমিতি ত্রির্জপতি। (৩) ততঃ পিতা যদি কাময়েত সর্ব্বমায়ুরিয়াদিতি বাৎসপ্রেণৈনমভিমৃশেৎ। দিবস্পরীত্যারভ্য উষিজো বিবক্রুরিত্যন্তা মন্ত্রা বাৎসপ্রসংজ্ঞকাঃ, তৈঃ কুমারং হৃদি স্পৃশেৎ। যথা—(দিবস্পরীত্যাদ্যেকাদশর্চ্চানাং বৎসপ্রঋষিস্ত্রিষ্টুপ্ ছন্দোঽগ্নির্দেবতা অগ্ন্যুপস্থাপনে বিনিয়োগঃ।) ওঁ দিবস্পরি প্রথমং জজ্ঞে অগ্নিরস্মদ্দ্বিতীয়ং পরিজাতবেদাস্তৃতীয়মপ্সু নৃমণা অজস্রমিন্ধান এনং জরতে স্বাধীঃ। (৪) ওঁ বিদ্মাতে অগ্নে ত্রেধা ত্রয়াণি বিদ্মাতে ধাম বিভৃতা পুরুত্রা। বিদ্মাতে নাম পরমং গুহা, যদ্বিদ্মা তমুৎসং যত আজগন্থ। (৫) ওঁ সমুদ্রে ত্বা নৃমণা অপ্সন্তর্নৃচক্ষা ঈধে দিবো

---

তপস ইব দীর্ঘায়ুষ্ট্বম্। (চ) পিতরঃ অগ্নিষ্বাত্তাদয়ঃ স্বধাভিঃ পিতৃণামন্নৈঃ (ছ) যজ্ঞো দক্ষিণাভিঃ সমৃদ্ধঃ। (জ) সমুদ্রঃ স্রবন্তীভিঃ নদীভিঃ, বনস্পতিভিরিতি অন্যেষামপি দৃশ্যতে ইতি দীর্ঘত্বম্।

(৩) ত্রীণি আয়ুংষি সমাহৃতানি ত্র্যায়ুষং।—আয়ুঃশব্দোঽত্রাবস্থাবাচী-বাল্য-যৌবন-বার্দ্ধক্যাত্মকমবস্থাত্রয়ম্। কশ্যপস্য জমদগ্নেশ্চ ঋষের্দেবানাং যৎ ত্র্যায়ুষং তন্মে অস্তু। যদ্যপি তন্মে অস্তু ইতি কর্ত্তৃগোচরা আশংসা তথাপি কুমারগোচরৈব বোদ্ধব্যা। যাং বৈ কাঞ্চন যজ্ঞ ঋত্বিজ আশিষমাশাসতে তাং যজমানস্যৈব ইতি শ্রুতেঃ।

(৪) অগ্নিঃ দিবস্পরি আকাশমধিকৃত্য প্রথমং জজ্ঞে জাতবান্ জাতবেদাঃ অগ্নিরেব অস্মৎপরি অস্মৎসদৃশং পুরুষরূপং বিষ্ণুমধিকৃত্য দ্বিতীয়ং জজ্ঞে অপ্সু জলেষু তৃতীয়ং জজ্ঞে। নৃষু মনুষ্যেষু মনো যস্য নৃমণাঃ প্রজাপতিরেনমগ্নিমিন্ধানঃ অজস্রং দীপয়ন্ জরতে জরয়তি। কিম্ভূতঃ প্রজাপতিঃ? স্বাধীঃ সুশোভনম্ আহিতা ধী বুদ্ধির্যস্য সঃ।

(৫) হে অগ্নে! তে তব ত্রেধা ত্রিপ্রকারং ত্রয়াণি অগ্নিবায়ুসূর্য্যাখ্যানি রূপাণি বিদ্মঃ জানীমঃ, কিঞ্চ তে ধাম স্থানানি আহবনীয়-গার্হপত্য-দক্ষিণাগ্নিস্বরূপাণি বিদ্মঃ। কিম্ভূতানি? বিভৃতা বিভৃতানি বিশেষেণ ভৃতানি। পুরু

অগ্ন ঊধন্। তৃতীয়ে ত্বা রজসি তস্থিবাংসমপামুপস্থে মহিষা অবর্দ্ধন্। (৬) ওঁ অক্রন্দদগ্নিঃ স্তনয়ন্নিব দ্যৌঃ ক্ষামা রেরিহদ্ বীরুধঃ সমঞ্জন্। সদ্যো-জজ্ঞানো বি হীমিদ্ধো অখ্যদারোদসী ভানুনা ভাত্যন্তঃ। (৭) ওঁ শ্রীণামুদারো ধরুণো রয়ীণাং মনীষাণাং প্রার্পণঃ সোমগোপাঃ। বসুঃ সূনুঃ সহসো অপ্সু রাজা বিভাত্যগ্র উষসামিধানঃ। (৮) ওঁ বিশ্বস্য কেতুর্ভুবনস্য

---

কিম্ভূতানি? পুরুত্রা পুরু বহু ত্রায়তে ইতি পুরুত্রং তানি জগদ্রক্ষাকারকাণী-ত্যর্থঃ। অপি চ তে তব নাম বিদ্মঃ পরমম্ উত্তমম্। ন কেবলমুত্তমম্ অপি তু যদ্গুহা গুহায়ামিব স্থিতং গুহ্যমিতি যাবৎ, অপি চ যতঃ সকাশাৎ আজগন্থ আগতোঽসি।

(৬) হে অগ্নে! ত্বা ত্বাং নৃমণাঃ প্রজাপতিঃ ঈধে দীপয়াঞ্চকার। কিম্ভূতং ত্বাং? সমুদ্রে অপ্সু জলে অন্তর্মধ্যে বড়বাগ্নিত্বেন অবস্থিতং। কিম্ভূতো নৃমণাঃ? নৃষু চক্ষুরস্যেতি নৃচক্ষাঃ। পুনঃ কিম্ভূতং ত্বাং? দিবঃ স্বর্গস্য ঊধন্ ঊধসি আপীনস্থানে আদিত্যতয়া স্থিতম্ আদিত্যো হি পৃথিবীগতং রসং রশ্মিভিরাদায় বর্ষাসু ত্যজতি। তৃতীয়ে রজসি ভূমিরাকাশং স্বর্গশ্চ ইতি গণনক্রমেণ তৃতীয়ঃ স্বর্গো ভবতি। তৃতীয়ে স্বর্গে লোকে অপাম্ উপস্থে জলানাম্ সন্নিধৌ উৎসঙ্গে চ তস্থিবাংসং স্থিতবন্তং ত্বা ত্বাং মহিষা প্রাণবায়বঃ অবর্দ্ধন্ বর্দ্ধয়াঞ্চক্রুঃ। ঊধন্ ইতি ঊধঃশব্দাৎ সপ্তম্যেকবচনান্তস্য সুপাং লুগিতি লুক্ ব্যত্যয়ো বহুলমিতি সস্য নকারঃ। সমুদ্রে বাড়বাগ্নিতয়া দিবি আদিত্যতয়া স্থিতং ত্বামগ্নিং বায়বো বর্দ্ধয়ন্তি ইত্যগ্নেঃ স্তুতিঃ।

(৭) অগ্নিঃ অক্রন্দৎ শব্দং করোতি, কিঞ্চ ক্ষামা ক্ষমাং ভূমিং রেরিহৎ লেঢ়ি, কিং কুর্ব্বন্? বীরুধঃ ওষধীঃ সমঞ্জন্ ব্যাপ্নুবন্, অপি চ ইদ্ধঃ সন্ধুক্ষিতঃ সন্ ব্যখ্যৎ বিখ্যাপয়তি। কিম্ভূতঃ? সদ্যোজজ্ঞানঃ তাৎকালিকং জায়মানঃ হি-ঈংশব্দৌ পাদপূরণে। কিঞ্চ, আরোদসী দ্যাবাপৃথিব্যৌ অন্তর্মধ্যে ভানুনা রশ্মিনা আভাতি প্রকাশতে। ক ইব? দ্যৌরিব দ্যোশব্দেন মেঘ উচ্যতে উপচারাৎ যথা মেঘঃ স্তনয়শব্দং কুর্ব্বন্ পৃথিবীমুদকেন লেঢ়ি ওষধীর্ব্যাপ্নোতি বিখ্যাপয়তি ভানুনা বিদ্যুৎপ্রকারেণ প্রকাশয়তি এবমগ্নিরপি। ক্ষামা ক্ষমা-শব্দস্য দ্বিতীয়ার্থে প্রথমা ছান্দসো দীর্ঘঃ।

(৮) বসুঃ অগ্নিঃ বিভাতি প্রকাশতে। উষসাং উষসি প্রভাতসময়ে অগ্রে প্রথমম্ ইধানঃ দেদীপ্যমানঃ প্রত্যুষসময়ে অগ্নীনাং প্রাদুষ্করণং

গর্ভ আ রোদসী অপৃণাজ্জায়মানঃ। বীড়ুঞ্চিদদ্রিমভিনৎ পরায়ন্ জনা যদগ্নিমযজন্ত পঞ্চ। (৯) ওঁ উশিক্ পাবকো অরতিঃ সুমেধা মর্ত্ত্যেষ্বগ্নিরমৃতো নিধায়ি। ইয়র্ত্তি ধূমমরুষং ভরিভ্রচ্ছুক্রেণ শোচিষা দ্যামিনক্ষন্। (১০) ওঁ দৃশানো রুক্ম উর্ব্ব্যা ব্যদ্যৌদ্দুর্মর্ষমায়ুঃ শ্রিয়ে রুচানঃ। অগ্নিরমৃতো অভবদ্বয়োভির্যদেনং দ্যৌরজনয়ৎ সুরেতাঃ। (১১) ওঁ যস্তে

---

ক্রিয়তে। অগ্নিঃ কিম্ভূতঃ? শ্রীণাম্ উদারঃ আধাতা, রয়ীণাং ধনানাং ধরুণো ধারয়িতা, মনীষাণাং মনোঽভিলষিতানাং প্রার্পণঃ প্রাপয়িতা ধনমিচ্ছেদ্হুতাশনাদিতি শ্রুতেঃ। সোমগোপাঃ সোমং গোপায়তি যঃ সঃ, সহসো বলস্য, সূনুঃ পুত্রঃ বলবতা মথ্যমানশ্চেদুৎপদ্যতে। অপ্সু জলেষু রাজা বরুণঃ সর্ব্বাসামেব শ্রীণামুদারঃ।

(৯) যমগ্নিং পঞ্চ চত্বারো ব্রাহ্মণাদয়ঃ নিষাদাখ্যঃ পঞ্চমশ্চেতি পঞ্চজনা মনুষ্যা অযজন্ত পূজিতবন্তঃ। সোঽগ্নিঃ বিশ্বস্য প্রাণিজাতস্য কেতুর্জ্ঞাতা সর্ব্বসাক্ষী। ভুবনস্য ভুবনবর্ত্তিনঃ প্রাণিজাতস্য গর্ভোঽন্তর্ব্বর্ত্তী প্রাণবায়ুঃ। আ ইত্যুপসর্গোঽপৃণাদিত্যনেন সম্বধ্যতে। কিম্ভূতোঽগ্নিঃ? রোদসী দ্যাবাপৃথিব্যৌ আ অপৃণাৎ পূরিতবান্ আদিত্যতয়া জায়মান উৎপদ্যমানঃ, কিঞ্চ অদ্রিং পর্ব্বতং বীড়ুং দৃঢং অভিনৎ বিদারিতবান্ চিৎশব্দোঽপ্যর্থে। কিং কুর্ব্বন্? পরায়ন্ পরাগচ্ছন্ তত্র পর্ব্বতে পতন্নিতি যাবৎ। এতেন অগ্নিরেব ইন্দ্র ইত্যুক্তং ভবতি।

(১০) অগ্নিঃ মর্ত্ত্যেষু নিধায়ি নিহিতঃ, উশিক্ কান্তঃ, পাবকঃ পবিত্রতাকারী, অরতিঃ পর্য্যাপ্তবুদ্ধিঃ সুমেধাঃ সুবুদ্ধিঃ অমৃতঃ অমরণধর্ম্মা এবম্ভূতোঽগ্নিঃ স ধূমম্ উদিয়র্ত্তি উর্দ্ধং গময়তি। উদিতি ব্যবহিতমত্র সম্বদ্ধম্। কিম্ভূতং ধূমম্? অরুষং আরোচনং রূপবৎ। কিং কুর্ব্বন্ অগ্নিঃ? অবিভ্রৎ জগদ্ধারয়ন্, অপিচ শোচিষা রশ্মিনা দ্যাম্ আকাশং ইনক্ষন্ ব্যাপ্নুবন্। কিম্ভূতেন শোচিষা? শুক্রেণ শুক্লবর্ণেন। অরতিঃ অলং মতিরস্য ইতি ব্যত্যয়ো বহুলমিত্যনুস্বারমকারয়োর্লোপঃ।

(১১) অগ্নিঃ ব্যদ্যৌৎ বিদ্যোততে, কয়া? উর্ব্ব্যা মহত্যা দীপ্ত্যা ইত্যর্থাৎ। কিম্ভূতঃ? দৃশানঃ প্রত্যক্ষীভূতঃ, রুক্মঃ রোচনঃ রূপবান্, ন কেবলং দ্যোততে বস্তাগ্নেরায়ুর্জীবনং দুর্মর্ষং দুঃখেন মৃষ্যতে খণ্ডয়িতুং ন শক্যতে ইতি যাবৎ। সোঽগ্নিঃ অমৃতঃ অমরণধর্ম্মা অভবৎ। কিং কুর্ব্বন্? রুচানঃ

অদ্য কৃণবদ্ ভদ্রশোচেঽপূপন্দেব ঘৃতবন্তমগ্নে। প্র তং নয় প্রতরং বস্যো অচ্ছাভি সুম্নং দেবভক্তং যবিষ্ঠ। (১২) ওঁ আ তং ভজ সৌশ্রবসেম্বগ্ন উক্‌থ উক্‌থ আভজ শস্যমানে। প্রিয়ঃ সূর্য্যে প্রিয়ো অগ্না ভবাত্যুজ্জাতেন ভিনদদুজ্জনিত্বৈঃ। (১৩) ওঁ ত্বামগ্নে যজমানা অনুদ্যূন্ বিশ্বা বসু দধিরে বার্য্যাণি। ত্বয়া সহ দ্রবিণমিচ্ছমানা ব্রজং গোমন্তমুশিজো বিবব্রুঃ। (১৪)

---

ইচ্ছন্। কস্মৈ? শ্রিয়ে লক্ষ্ম্যৈ লক্ষ্মীং দাতুমিচ্ছন্ ইত্যর্থঃ। কিঞ্চ যম্ এনম্ অপরোক্ষনির্দ্দেশমাদিত্যং দ্যৌরজনয়ৎ জনিতবতী শোভনং রেতঃ শুক্রং যস্যাঃ সুরেতাঃ দ্যৌঃ শোভনত্বঞ্চ রেতস এব তদেব যৎ তেনাদিত্যো বিশ্বপ্রকাশকো জনিতঃ। কৈরজনয়ৎ? বয়োভিঃ রথৈঃ পশুপুরোডাশাদিভিঃ পশ্বাদয়ো হুগ্নৌ হুতা আদিত্যোদয়হেতুভাবং ভজন্ত ইতি ভাবঃ।

(১২) হে ভদ্রশোচে! কল্যাণরশ্মে! দেব! দেবনাদিগুণযুক্ত! অগ্নে! যো যজমানস্তব অদ্য ইদানীং অপূপং পুরোডাশং ঘৃতবন্তং ঘৃতেন যুক্তং কৃণবৎ করোতি, যস্য যজমানস্য বস্যঃ বস্যং বাসোচিতস্থানং প্র তং নয় নয়সি প্রণয়সি। কিম্ভূতং বস্যং? প্রতরং প্রকর্ষেণ তীর্য্যং গম্যং তথা অচ্ছ অচ্ছং নির্ম্মলং নিষ্পাপমিতি যাবৎ, কিঞ্চ তং যজমানং হে যবিষ্ঠ যুবতম! সুম্নং সুখম্ অভিমুখং নয়। কিম্ভূতং সুম্নম্? দেবভক্তং দেবসেবিতম্। হে অগ্নে! যো যজমানস্তব পুরোডাশং করোতি, তং সুখাভিমুখং কৃত্বা ত্বদীয়প্রসাদপ্রাপ্যং স্বর্গং প্রাপয়। বস্য ইতি দ্বিতীয়ৈকবচনে প্রথমৈকবচনম্। অচ্ছ ইতি অনুস্বারলোপশ্ছান্দসঃ।

(১৩) হে অগ্নে! তং যজমানম্ আভজ তস্য সন্নিহিতো ভব। তথা চ কিং স্যাদিত্যাহ যস্য যজমানস্য উক্‌থে উক্‌থে স্তোত্রে স্তোত্রে শস্যমানে প্রশস্যমানে সৌশ্রবসেষু সাধুশ্রবণীয়েষু স্তোত্রেষু আভজ আসেবসে সন্নিহিতো ভবসীত্যর্থঃ। অসৌ যজমানঃ সূর্য্যে সূর্য্যস্য প্রিয়ঃ উদ্‌ভবতি উৎপদ্যতে। অগ্না অগ্নেঃ প্রিয় উদ্‌ভবতি ন কেবলমেবং অপি তু জাতেন পুত্রেণ জনিত্বৈশ্চ জনিষ্যমাণৈঃ পুত্রপৌত্রাদিভিঃ উদ্‌ভিনদৎ উদ্ভিনত্তি ধর্ম্মার্থকামান্।

(১৪) হে অগ্নে! ত্বা ত্বাং যজমানা বিশ্বা বিশ্বানি সর্ব্বাণি গোহিরণ্যাদীনি বসু বসূনি ধনানি দধিরে ধারয়ন্তি। কিম্ভূতানি? বার্য্যাণি বরণীয়ানি। কথং? অনুদ্যূন্ অনুদিবসম্ প্রত্যহমিতি যাবৎ, কিঞ্চ, ত্বয়া সহ ত্বয়া

ইত্যেকাদশর্চ্চাঃ। ততঃ কুমারস্য চতুর্দ্দিক্ষু মধ্যে চ পঞ্চ ব্রাহ্মণান্ সংস্থাপ্য পিতা ওঁ ইমমনু প্রাণিতেতি তান্ ব্রূয়াৎ। ততঃ পূর্ব্বদিক্‌স্থিতো ব্রাহ্মণঃ কুমারং লক্ষ্যীকৃত্য ওঁ প্রাণ ইতি, দক্ষিণওঁ ব্যান ইতি, পশ্চিম ওঁ অপান ইতি, উত্তর ওঁ উদান ইতি, পঞ্চমঃ ওঁ সমান ইতি উপরিষ্টাদবেক্ষমাণো ব্রূয়াৎ। অবিদ্যমানেষু তু ব্রাহ্মণেষু স্বয়মেব তস্যাং তস্যাং দিশি গত্বা কুমারাভিমুখং স্থিত্বা প্রাণেত্যাদি পূর্ব্বোক্তং ব্রূয়াৎ। অস্মিন্ পক্ষে ন প্রৈষঃ। ততো যস্মিন্ দেশে কুমারো জাতস্তং দেশমভিমন্ত্রয়েৎ। ওঁ বেদ তে ভূমি হৃদয়ং দিবি চন্দ্রমসি শ্রিতম্। বেদাহং তন্মাং তদ্‌বিদ্যাৎ পশ্যেম শরদঃ শতং জীবেম শরদঃ শতꣳ শৃণুয়াম শরদঃ শতম্ ইতি মন্ত্রেণ। (১৫) ততো নাড়ীং ছিত্ত্বা কুমারমভিমৃশতি—ওঁ অশ্মা ভব পরশুর্ভব হিরণ্যমস্রুতং ভব। আত্মা বৈ পুত্রনামাসি স জীব শরদঃ শতম্। (১৬) ততঃ কুমারমাতরমভিমন্ত্রয়েৎ। ওঁ ইড়াসি মৈত্রাবরুণী বীরে বীরমজীজনথাঃ। সা ত্বং বীরবতী ভব যাস্মান্ বীরবতোঽকরৎ ইত্যনেন মন্ত্রেণ। (১৭) ততঃ কুমারমাতুর্দক্ষিণস্তনং প্রক্ষাল্য প্রযচ্ছতি। (পরমেষ্ঠী ঋষিস্ত্রিষ্টুপ্ ছন্দো অগ্নির্দেবতা

---

সহিতাঃ সাগ্নয় ইত্যর্থঃ যজমানাঃ দ্রবিণং যজ্ঞফলং মোক্ষরূপমিচ্ছমানাঃ ব্রজং বর্ম্মতং বিবব্রুঃ বিবৃতং কৃতবন্তঃ। কিম্ভূতং ? গোমন্তং রশ্মিমন্তং আদিত্যমিত্যর্থঃ। কিম্ভূতা যজমানাঃ ? উশিজো জ্ঞানিনঃ, ত্বাং যজমানাঃ যদা ধনাদিকমিচ্ছন্তি তদা তৎ প্রাপ্নুবন্তি যদা মোক্ষমিচ্ছন্তি তদা জ্ঞানিনো ভূত্বা জ্ঞানকর্ম্মসমুচ্চয়েনাদিত্যং ভিত্ত্বা মোক্ষং প্রাপ্নুবন্তি ইতি ভাবঃ।

(১৫) হে ভূমি! তে তব হৃদয়ং বেদ জানামি। কিম্ভূতং ? দিবি চন্দ্রমসি শ্রিতং সম্বদ্ধম্। তন্মাং বিদ্যাৎ মামপি জানাতীত্যর্থঃ। অন্যৎ সুগমম্।

(১৬) হে কুমার! ইত্যধ্যাহার্য্যম্। অশ্মা ভব প্রস্তর ইব দৃঢ়ো ভব, পরশুঃ কুঠার ইব বিরোধিনাং ছেদকো ভব, হিরণ্যমস্রুতং অক্ষয়ং যথা ত্বমপি তথা ভব. কিঞ্চ ত্বং মমাত্মা ভবসি পুত্রনামা। অন্যৎ সুগমম্।

(১৭) হে বীরে! ত্বম্ ইড়া দেবমাতাসি তথা মৈত্রাবরুণী মিত্রাবরুণাসুতা বীরং পুত্রান্তরং অজীজনথাঃ উৎপাদিতবতী। সা ত্বং বীরবতী বীরমাতা ভব। তথা অস্মান্ বীরবতঃ পুত্রযুক্তান্ অকরৎ কৃতবতী।

চয়নে যজমানবচনে বিনিয়োগঃ) ওঁ ইমণ্ডঁ স্তনমূর্জ্জস্বন্তং ধয়াপাং প্রপীনমগ্নে শরীরস্য মধ্যে উৎসং জুষস্ব শতধারমর্ব্বন্ সমুদ্রিয়ণ্ডঁ সদনমাবিশস্ব। (১৮) ইতি মন্ত্রেণ দক্ষিণং দত্ত্বা তথৈব বামং দদ্যাৎ, ইমং স্তনং যস্তে স্তন ইত্যেতাভ্যাং ঋগ্‌ভ্যাং পায়য়েৎ। (যস্তে স্তন ইত্যেতস্য দীর্ঘতপা ঋষিস্ত্রিষ্টুপ্ ছন্দো গৌর্দেবতা মহাবীরাখ্যস্তয়োর্বিনিয়োগঃ।) ওঁ যস্তে স্তনঃ শশয়ো যো ময়োভূর্যো রত্নধা বসুবিদ্‌যঃ সুদত্রঃ। যেন বিশ্বা পুষ্যসি বার্য্যাণি সরস্বতি তমিহ ধাতবেঽকঃ। (১৯) (উর্ব্বন্তরিক্ষমন্বেমি) ইতি মন্ত্রেণ। অথ হলাযুধমতম্—ততঃ কুমারশিরঃপ্রদেশে জলপূর্ণপাত্রং স্থাপয়ত্যনেন মন্ত্রেণ—ওঁ আপো দেবেষু জাগ্রথ এবমস্যাং সূতিকায়াং সপুত্রিকায়াং জাগ্রথ। (২০) ইত্যনেন তৎ উদপাত্রং প্রাগুত্থানাৎ স্থাপিতমেব তিষ্ঠতি। অত্র গৃহ্যসূত্র-সংস্কারমঞ্জরীমতে—ততঃ কুমারশিরঃপ্রদেশে জলপূর্ণপাত্রং স্থাপয়ত্যনেন মন্ত্রেণ—ওঁ আপো দেবেষু জাগ্রথ যথা দেবেষু জাগ্রথ এবমস্যাং সূতিকায়াং সপুত্রিকায়াং জাগ্রথ ইতি।

---

(১৮) হে অগ্নে! ত্বমিমং স্তনম্ উর্জ্জস্বন্তং প্রাণহেতুভূতম্ অপাং দুগ্ধৈঃ প্রপীনং পূরিতং ধয় পিব। কুত্র স্থিতমিত্যাকাঙ্ক্ষায়ামাহ—শরীরস্য মধ্যে অপ্‌শব্দেন স্বগ্‌দুগ্ধমুচ্যতে সাদৃশ্যাৎ। উৎসং স্রবন্তং ইমং জুষস্ব সেবস্ব শতধারং বহুধারং সর্ব্বতোগতং সর্ব্বদেহগতং হে অর্ব্বন্! সর্ব্বদেহগত! সমুদ্রিয়ং সমুদ্রসম্বন্ধি স্থানম্ আবিশস্ব প্রবিশ। যথা সমুদ্রস্থো বড়বানলঃ সর্ব্বমেব জরয়তি তথা ভবানপি তথাভূতমাহারং জরয়তু।

(১৯) হে সরস্বতি! সরস্বতীনদীসদৃশে! বৎসমাতঃ! সাদৃশ্যঞ্চ স্রবদ্রূপতয়া, তে তব যঃ স্তনঃ শশয়ঃ সর্ব্বৈরুপভুজ্যমানোঽপি সুপ্ত ইবানুদ্বিগ্নঃ, যো ময়োভূঃ ময়ঃ সুখং তস্য ভূঃ স্থানম্। যো রত্নধা রত্নং রমণীয়ং পয়ঃ তস্য ধারয়িতা বসু বলং বেদয়তি প্রাপয়তি বসুবিৎ। যঃ সুদত্রঃ শোভনদানশীলঃ, যেন স্তনেন বিশ্বা বিশ্বানি পুষ্যসি পুঞ্চাসি। কিম্ভূতানি? বার্য্যাণি প্রার্থনীয়ানি তং স্তনমিহাস্য ধাতবে পানায় অকঃ কুরু। হে পুত্রিণি! তব যঃ স্তনঃ পুত্রেণ পীয়মানোঽপ্যনুদ্বিগ্নঃ সুখকারী রমণীয়স্তস্য বসুধারী বলপ্রাপকঃ শুভদায়ী বিশ্বপোষ্টা তং স্তনমস্য কুমারস্য পানায় কুর্ব্বিত্যর্থঃ।

(২০) হে আপঃ! যূয়ং দেবেষু জাগ্রথ ইতি অপাং স্বরূপমুৎকীর্ত্ত্য অস্যাঃ সপুত্রায়াঃ রক্ষার্থং জাগ্রথ।

ইদমুদপাত্রং আউত্থানাৎ স্থাপিতমেব তিষ্ঠতি ) ততঃ সূতিকায়া উত্থান-পর্য্যন্তং সন্ধ্যয়োঃ সূতিকাগৃহদ্বারদেশে কুশণ্ডিকাব্যতিরেকেণ পঞ্চভূ-সংস্কারান্ কৃত্বা সূতিকাগ্নিং স্থাপয়িত্বা সন্ধ্যাদ্বয়ে তণ্ডুলকণামিশ্রিতান্ সর্ষপান্ তস্মিন্নগ্নৌ হস্তেন স্বাহান্তেন ওঁ শণ্ডামর্কা উপবীরঃ শৌণ্ডিকেয় উলূখলঃ। মলিম্লুচোদ্রোণাসশ্চ্যবনো নশ্যতাদিতঃ স্বাহা। (২১) ওঁ আলিখন্ননিমিষঃ কিম্বদন্ত উপশ্রুতির্হর্য্যক্ষঃ কুম্ভী শত্রুঃ পাত্রপাণির্নৃমণি-র্হন্ত্রীমুখঃ সর্ষপারুণশ্চ্যবনো নশ্যতাদিতঃ স্বাহা। (ইদমগ্নয়ে) (২২) ইত্যাহুতিদ্বয়ং যথাক্রমং সন্ধ্যয়োর্দ্দ্যাৎ। অথ যদি কুমারমুপদ্রবেৎ তদা তং বালং জালেন উত্তরীয়বস্ত্রেণ বা আচ্ছাদ্য পিতা অঙ্ক আধায় জপতি—ওঁ কূর্কুরঃ সুকূর্কুরঃ কূর্কুরো বালবন্ধনঃ। চেচ্চেচ্ছুনক সৃজ নমস্তে অস্তু সীসরো লপেতাপহ্বর তৎ সত্যম্। যত্তে দেবা বরমদদুঃ স ত্বং কুমারমেব বাবৃণীথাঃ। চেচ্চেচ্ছুনক সৃজ নমস্তে অস্তু সীসরো লপেতাপহ্বর তৎ সত্যং যত্তে সরমা মাতা সীসরঃ পিতা শ্যামশবলৌ ভ্রাতরৌ চেচ্চেচ্ছুনক সৃজ নমস্তে অস্তু সীসরো লপেতাপহ্বর। (২৩) ততঃ কুমারং হৃদি স্পৃষ্ট্বা-ঽভিমৃশতি—ওঁ ন নামযতি ন রুদতি ন হৃষ্যতি ন গ্লায়তি যত্র বয়ং

---

(২১) শণ্ডাভিধানো বালগ্রহ ইত আহুতের্নশ্যতাৎ নষ্টো ভবতু। এবং মর্কা-দয়শ্চ্যবনান্তাঃ সপ্তবালগ্রহা নশ্যতাদিতি প্রত্যেকং সম্বধ্যতে।

(২২) আলিখন্নিত্যাদয়ো বালগ্রহা দশ, অত্রাপি নশ্যতাদিতি ক্রিয়াপদং প্রত্যেকং সম্বধ্যতে।

(২৩) কূর্কুরাদীনি ত্রীণি নামানি বালং কুমারং বধ্নাতীতি বালবন্ধনঃ কুমারগ্রহঃ ত্রিভিরেব কূর্কুরাদিভিঃ সহ প্রত্যেকং সম্বধ্যতে। তথা চ কূর্কুর-শ্চেদ্বালবন্ধনঃ, সুকূর্কুরশ্চেদ্বালবন্ধনঃ, কূর্কুরশ্চেদ্বালবন্ধনঃ। এতেষাং মধ্যে যদি কশ্চিদ্বালবন্ধন আস্তে তদা হে শুনক! তে তব নমোঽস্তু, ত্বং সৃজ কুমারং সন্ত্যজেত্যর্থঃ। হে শুনকেতি ত্রয়াণাং সম্বোধনম্। কিঞ্চ, সীসরস্তেষামেব পিতা লপেতা বদতি, অপহ্বর অপগচ্ছ কুটিলো ভব। হে শুনক! যত্তে তব দেবাঃ ব্রহ্মাদয়ঃ বরং প্রার্থিতম্ অদদুঃ দত্তবন্তঃ স পূর্ব্বোক্তরূপস্ত্বং কুমারমেব বরং আবৃণীথাঃ কৃতবানসি, অত্রাপি দেবৈর্ব্বরদানং ত্বয়া চ বরত্বেন কুমারস্য প্রার্থনমিত্যুভয়েন সহ তৎ সত্যমিত্যস্য সম্বন্ধো বিবক্ষিতঃ। যদ্যপি তদুভয়ং

বদামো যত্র চাভিমৃশামসি ইতি মন্ত্রেণ। (২৪) (দক্ষিণহস্তেন কুমারং সর্ব্বতঃ স্পৃশেদিতি পশুপতিঃ)। ততো দক্ষিণাং কাঞ্চনাদিকং দত্ত্বা অচ্ছিদ্রাবধারণং কুর্য্যাৎ। ইতি জাতকর্ম্ম।

## অথ নামকরণম্

তত্র পিতা একাদশেঽহনি কৃতনিত্যক্রিয়ঃ সগণেশ-মাতৃকাপূজা-বসুধারা-বৃদ্ধিশ্রাদ্ধাদিকং বিধায় ভোজ্যত্রয়মুৎসৃজেৎ। ওঁ তৎসদিত্যাদি মদীয়াভিনবজাতকুমার-নামকরণকর্ম্মণি যথাসম্ভব-বেদ-গোত্র-শাখানামভ্যো ব্রাহ্মণেভ্যস্তৃপ্তৌপয়িকভোজ্যান্যহং দদে। কৃতৈতদ্-ভোজ্যদানকর্ম্মণঃ সাঙ্গতার্থং দক্ষিণাং তাম্বূলং যথাসম্ভবগোত্র-বেদ-শাখানাম্নে ব্রাহ্মণায়াহং দদে। তত আচারাৎ ঘটস্থাপনং কৃত্বা তত্র গণপতি-নবগ্রহ-দিক্‌পালাদীন্ সম্পূজ্য শিলাপট্টকে শিলাপুত্রকেণ রেখাদ্বয়ং কৃত্বা কঠিন্যাপি তদেব রেখাদ্বয়ং পুনরুজ্জ্বাল্য উজ্জ্বলঘৃতপ্রদীপ-দ্বয়ং নামরূপেণ হৃদা পরিকল্প্য তদধো নামদ্বয়ং বিলিখ্য তত্র ঘৃতপ্রদীপ-দ্বয়ং স্থাপয়েৎ। ততঃ পিতা প্রাঙ্মুখস্তয়োরন্যতরম্ উজ্জ্বলং কৃত্বা তদধো-লিখিত-দ্ব্যক্ষর-চতুরক্ষরয়োরন্যতরেণ নাম্না সালঙ্কারায়াঃ পত্ন্যা স্ববাম-স্থিতায়াঃ পূর্ব্বাভিমুখ্যাঃ ক্রোড়স্থিতস্য কুমারস্য দক্ষিণকর্ণে অমুকদেবশর্ম্মা-সীতি নাম কুর্য্যাৎ। কন্যা চেৎ কন্যায়া বামকর্ণে অযুগ্মাক্ষরদীর্ঘান্তা-মুকদেব্যসীতি নাম কুর্য্যাৎ। ততো ব্রাহ্মণায় বাসসী দক্ষিণাং দত্ত্বা

---

সত্যং তথাপি তে নমোঽস্তু ইত্যাদি পূর্ব্ববৎ। হে শুনক! যত্তে মাতা সরমা সীসরঃ পিতা শ্যামশবলৌ ভ্রাতরৌ তচ্চেৎ চেৎ সত্যং তথাপি তে নমোঽস্তু ইত্যাদি পূর্ব্ববৎ, তথাপি মম নমস্কারেণ তুষ্টঃ পিতৃবাক্যেন চৈনং কুমারং ত্যজেতি প্রার্থনা।

(২৪) যত্র কুমারে বয়ং বদামঃ, কিং বদামঃ? রক্ষামন্ত্রমিতি সাকাঙ্ক্ষত্বাৎ বোধ্যম্। যত্র চ বয়ম্ অভিমৃশামসি অভি সর্ব্বতোভাবেন যত্র স্পর্শনং কুর্ম্মঃ স কুমারো ন নাময়তি অঙ্গনামনং ন করোতি, ন রুদতি ন হৃষ্যতি ন গ্লায়তি রোদন-হর্ষগ্লানিযুক্তো ন ভবতি।

শান্ত্যুদকেন শান্তিং কৃত্বা কুমারমভিষিচ্য আশিষং কৃত্বাঽচ্ছিদ্রাবধারণং কুর্য্যাৎ। *

ইতি নামকরণম্।

## অথ নিষ্ক্রমণম্

তত্র চতুর্থে মাসি শুক্লে পক্ষে চন্দ্রতারানুকূলে জীবভার্গবসৌম্যবারাণামন্যতমে তদভাবে ভৌমশনীতরদিনে জ্যোতিঃ-শাস্ত্রোক্ত-নক্ষত্রেষু সিংহতুলাকুম্ভাদ্যন্যতমলগ্নে শিশোর্নিষ্ক্রমণে কর্ত্তব্যে পিতা সগণেশ-গৌর্য্যাদি-মাতৃকা-পূজাং বসোর্ধারাং বৃদ্ধিশ্রাদ্ধঞ্চ কৃত্বা কৃতমঙ্গলাভরণং কুমারং মাতুরঙ্কস্থিতম্ অলঙ্কৃতং বহিরানীয় ওঁ তচ্চক্ষুর্দেবহিতং পুরস্তাচ্ছুক্রমুচ্চরৎ পশ্যেম শরদঃ শতং জীবেম শরদঃ শতং শৃণুয়াম শরদঃ শতং। (প্রব্রবাম শরদঃ শত মদীনাঃ স্যাম শরদঃ শতং ভূয়শ্চ শরদঃ শতাৎ) † ইত্যনেন সূর্য্যং দর্শয়তি। তত আচারাৎ পিতা কুশ-কুসুম-তিলাক্ষত-দূর্ব্বা-গন্ধ-ফল-জলান্বিতমর্ঘং তাম্রাদি-পাত্রস্থিতং গৃহীত্বা ওঁ আকৃষ্ণেন রজসা বর্ত্তমানো নিবেশয়ন্নমৃতং মর্ত্ত্যঞ্চ হিরণ্যয়েন সবিতা রথেনা দেবো যাতি ভুবনানি পশ্যন্ ইতি মন্ত্রেণ (১) (সম্পূজ্য ওঁ এহি সূর্য্য সহস্রাংশো তেজোরাশে জগৎপতে। অনুকম্পয় মাং ভক্তং গৃহাণার্ঘং দিবাকর॥ ইতি মন্ত্রেণ নমো বিবস্বতে ইত্যাদি মন্ত্রেণ বা) ‡ সূর্য্যার্ঘং দত্ত্বা ব্রাহ্মণায় তাম্রপাত্রং দক্ষিণাং দত্ত্বা অচ্ছিদ্রাবধারণং কৃত্বা ব্রাহ্মণেভ্যো ভোজ্যত্রয়ং দদ্যাৎ।

ইতি নিষ্ক্রমণম্।

---

(১) অস্যার্থঃ সামবেদিসামান্যকুশণ্ডিকায়াং গ্রহহোমে দ্রষ্টব্যঃ।

---

* অত্র কচিৎ পুস্তকে পশুপতিমতে বিশেষঃ—বালস্তু কৃতনামানং পূজিতস্তু গদাভৃতঃ। নিবেদয়েন্মহাভাগ তব পুত্রোঽয়মিত্যুত। শিষ্যঃ প্রেষ্যশ্চ দাসশ্চ সংবিভজ্যাশ্চ কেশব। নিত্যং মতিবিভাগে চ শুভে চ মধুসূদন। ইত্যনেন পূজিতশ্রীগদাধরান্তিকে কুমারং সমর্পয়েৎ। ইতি।

† বন্ধনীমধ্যস্থোঽতিরিক্তঃ পাঠঃ সংস্কারমঞ্জরীধৃতঃ।

‡ বন্ধনীমধ্যস্থঃ পাঠোঽতিরিক্তো ব্রহ্মসংস্কারমঞ্জরীধৃতঃ।

## অথ নৈমিত্তিকং পুত্র-মূর্দ্ধাভিঘ্রাণম্

* যথা গৃহ্যসূত্রম্—প্রোষ্যেত্য গৃহানুপতিষ্ঠতে পূর্ব্ববৎ। পুত্রং দৃষ্ট্বা জপতি—ওঁ অঙ্গাদঙ্গাৎ সম্ভবসি হৃদয়াদধিজায়সে আত্মা বৈ পুত্রনামাসি স জীব শরদঃ শতম্। অথাস্য মূর্দ্ধানমবজিঘ্রতি। ওঁ প্রজাপতেষ্ট্বা হিঙ্কারেণাবজিঘ্রামি সহস্রায়ুষাঽমুকদেবশর্ম্মন্ জীব শরদঃ শতম্। ইত্যন্তেন মন্ত্রেণ সকৃৎ দ্বিস্তূষ্ণীমবজিঘ্রতি। পুনঃ ওঁ গবাং ত্বা হিঙ্কারেণাবজিঘ্রামি সহস্রায়ুষামুকদেবশর্ম্মন্ জীব শরদঃ শতমিতি মন্ত্রেণ সকৃদ্ মূর্দ্ধানমবঘ্রায় দ্বিস্তূষ্ণীমবজিঘ্রতি। দক্ষিণেঽস্য কর্ণে জপতি—ওঁ অস্মে প্রয়ন্ধি মঘবন্নৃজীষিন্নিন্দ্র রায়ো বিশ্ববারস্য ভূরেঃ, অস্মে শতꣳ শরদো জীবসেধা অস্মে বীরাঞ্ছশ্বত ইন্দ্র শিপ্রিন্। অথ সব্যে কর্ণে ওঁ ইন্দ্র শ্রেষ্ঠানি দ্রবিণানি ধেহি চিত্তিং দক্ষস্য সুভগত্বমস্মে। পোষং রয়ীণামরিষ্টিং তনূনাꣳ স্বাদ্মানং বাচঃ সুদিনত্বমহ্নামিতি জপেৎ। কন্যায়ৈ তু মূর্দ্ধানমেবাবজিঘ্রতি তূষ্ণীম্।

ইতি মূর্দ্ধাভিঘ্রাণম্।

## অথান্নপ্রাশনম্

তত্র জন্মদিনাবধিসাবনগণনয়া ষষ্ঠেঽষ্টমে বর্ষাভ্যন্তরে বা কন্যায়াশ্চ সপ্তমমাসাদৌ শুক্লপক্ষে জ্যোতিঃশাস্ত্রোক্ত-তিথি-নক্ষত্র-বারেষু বৃষ-মীন-কন্যা-মিথুনান্যতমলগ্নেঽন্নাশনে কর্ত্তব্যে কৃতনিত্যক্রিয়ঃ পিতা সগণেশ-গৌর্য্যাদি-মাতৃকাপূজা-বসুধারা-বৃদ্ধিশ্রাদ্ধানি বিধায় (স্বগৃহোক্ত-বিধিনা শুচিনামাগ্নিং সংস্থাপ্য আঘারাজ্যভাগান্তাং কুশণ্ডিকাং চরুসহিতাং বিধায়) ব্রহ্মণোঽন্বারম্ভ-ত্যাগং কৃত্বা † ইতি ব্রহ্মসংস্কারমঞ্জরী-ক্রমঃ। আজ্যেন ওঁ দেবীং বাচমজনয়ন্ত দেবাস্তাং বিশ্বরূপাঃ পশবো বদন্তি। সা নোমন্দ্রেষমূর্জ্জং দুহানা ধেনুর্বাগস্মানুপসুষ্টুতৈতু স্বাহেতি (১) প্রথমাহুতিং হুত্বা

(১) দেবা ব্রহ্মাদয়ো বাচং বাণীম্ অজনয়ন্ত উৎপাদিতবন্তঃ। কিম্ভূতাম্? দেবীং কান্তিগুণযুক্তাং তাঃ বাচং পশবো বদন্তি, কে তে পশবঃ? বিশ্বরূপাঃ বিশ্বং মানুষাদিরূপং যেষাং সা বাক্ ধেনুর্ধেনুর্ভূত্বা অস্মান্ উপৈতু উপগচ্ছতু,

* পশুপতিনা ব্রহ্মসংস্কারমঞ্জর্য্যা চ ন ধৃতম্। পরন্তু গৃহ্যসূত্রানুমোদিতম্।

† গৃহাভ্যন্তরে অগ্নিমুপসমাধায়—প্রাণাপানচক্ষুঃশ্রোত্র-পুষ্টিদৈবতং স্থালীপাকং শ্রপয়িত্বা পর্য্যুক্ষণান্তাং কুশণ্ডিকাং সমাপ্য ব্রহ্মণোঽন্বারম্ভেণাজ্যেন আঘারাজ্যভাগৌ হুত্বা ব্রহ্মণোঽন্বারম্ভ-ত্যাগং বিধায় তমগ্নিং শুচিনামাসীতি নাম কৃত্বা আবাহ্য সম্পূজ্য ইতি পশুপতিক্রমঃ।

ইদং বাচে ইতি ত্যাগং বিধায় পুনঃ ওঁ দেবীং বাচমজনয়ন্ত দেবাস্তাং বিশ্বরূপাঃ পশবো বদন্তি ইত্যাদিপাঠান্তে বাজো নো অদ্য প্রসুবাতি দানং বাজো দেবা ঋতুভিঃ কল্পয়াতি। বাজো হি মা সর্ব্ববীরং জজান বিশ্বা (সর্ব্বা) আশা বাজপতির্জয়েয়ং স্বাহা (২) ইতি দ্বিতীয়াহুতিং হুত্বা ইদং বাচে ইদং বাজায় ইতি ত্যাগং কুর্য্যাৎ। ততঃ স্থালীপাকেনাবদানপূর্ব্বকং চতস্র আহুতীর্জুহোতি যথা—ওঁ প্রাণেনান্নমশীয় স্বাহা ইদং প্রাণায়। ওঁ অপানেন গন্ধানশীয় স্বাহা ইদমপানায়। ওঁ চক্ষুষা রূপাণ্যশীয় স্বাহা ইদং চক্ষুষে। ওঁ শ্রোত্রেণ যশোঽশীয় স্বাহা ইদং শ্রোত্রায়। (৩) ততো ব্রহ্মণোঽন্বারব্ধঃ স্থালী-পাকেনৈব ওঁ অগ্নয়ে স্বিষ্টকৃতে স্বাহা ইদমগ্নয়ে স্বিষ্টকৃতে। ইতি হুত্বা মহা-ব্যাহৃত্যাদি-প্রাজাপত্যান্তা নবাহুতীরাজ্যেন হুত্বা (পরিস্তরণকুশান্ হুত্বা ইতি পশুপতৌ বিশেষঃ) প্রোক্ষণীপাত্রস্থং হুতশেষং প্রাশ্যাচম্য ব্রহ্মণে পূর্ণপাত্রং দক্ষিণাং দদ্যাৎ—ওঁ অদ্যেত্যাদি অমুকগোত্রস্য মৎপুত্রস্যামুকদেবশর্ম্মণোঽন্ন-প্রাশনাঙ্গ-হোমকর্ম্মণি কৃতাকৃতাবেক্ষণ-ব্রহ্মকর্ম্ম-প্রতিষ্ঠার্থং দক্ষিণামিদং পূর্ণপাত্রং ব্রহ্মণেঽহং সম্প্রদদে ইতি দক্ষিণাং দদ্যাৎ। ততশ্চতুরস্র-ত্রিকোণ-বর্ত্তুলার্দ্ধ-চন্দ্রাকৃতিং মণ্ডলিকাং ব্রাহ্মণাদিক্রমেণ ভূমৌ কৃত্বা তত্র পাত্রং সংস্থাপ্য

---

উপেতি ব্যবহিতম্ এত্বিত্যনেন সম্বধ্যতে। সা কথং ধেনুর্ভবতি ইত্যাকাঙ্ক্ষায়াম্ আহ—নো অস্মাকম্ উর্জ্জং সামর্থ্যং দুহানা পূরয়ন্তী। কিম্ভূতম্? মন্দ্রেষুং মন্দ্রো গম্ভীরঃ তস্য ইষুং গমকং জ্ঞাপকমিত্যর্থঃ। অব্যক্তঃ পরোক্ষোঽব্যর্থো যেনাব-গম্যতে তৎ সামর্থ্যম্ অস্মাকং পূরয়ন্তী সা বাণীত্যর্থঃ। কিম্ভূতা? সুষ্টুতা সুষ্ঠু স্তুতা যা বাক্ প্রথমতো দেবৈর্জনিতা ততো মানুষাদিভিঃ সর্ব্বৈরুচ্যতে।

(২) বাজঃ অন্নং নো অস্মাকম্ অদ্য অন্নপ্রাশনসময়ে দানং হোমরূপং প্রসুবাতি অভ্যনুজানাতি, কিঞ্চ বাজো দেবান্ ইন্দ্রাদীন্ ঋতুভিঃ সময়বিশেষৈঃ কল্পয়াতি যোজয়তি, অস্মিন্ কর্ম্মণি হুতেনান্নেন দেবাশ্চিরকালং বর্ত্তন্তা-মিত্যর্থঃ। বাজো হি যতঃ মা মাং সর্ব্ববীরং সর্ব্বত্র কার্য্যে বীরং ক্ষমং জজান চকার, অতঃ বাজপতিরন্নস্যেশ্বরোঽহং সর্ব্বা আশাঃ প্রত্যাশা জয়েয়ম্।

(৩) প্রাণেন প্রাণবায়ুনা অন্নম্ অদনীয়ং অশীয় ভুঞ্জীয়, অপানেন বায়ুনা গন্ধানশীয়, চক্ষুষা চক্ষুরিন্দ্রিয়েণ শুক্লাদীনি রূপাণি অশীয়। শ্রোত্রেন্দ্রিয়েণ কীর্ত্তিমশীয়। অনেন আহুতিচতুষ্টয়েন চক্ষুরাদিভোগ্যাননুভবামীত্যাংশসা।

তত্রান্নাদিকং নিধায় সর্ব্বান্ রসান্ সর্ব্বঞ্চান্নং হুতশেষসহিতমেকীকৃত্য সকৃদেব কুমারং তূষ্ণীং প্রাশয়তি। ওঁ হন্ত ইতি মন্ত্রেণ বা (শ্রীঅমুকদেবশর্ম্মন্নিদমন্নং হন্ত ইত্যনেন পঞ্চধা প্রাশয়েৎ ইতি পশুপতিমতম্) স পিতা যদি কুমারস্য বাগ্মিত্বমিচ্ছেত্তদা ভারদ্বাজমাংসং প্রাশয়েৎ। যদ্যন্নাদ্যং কাময়তে তদা কপিঞ্জলমাংসং যদি বেগিত্বং তদা মৎস্যং যদি দীর্ঘায়ুষ্ট্বং তদা কৃকষামাংসং যদি ব্রহ্মবর্চ্চসং তদা শরারিমাংসং যদি সর্ব্বকামঃ তদা সর্ব্বমাংসানি ক্রমেণ প্রাশয়েৎ একীকৃত্য বা। ততঃ কুমারমাচাম্য তাম্বূলং দত্ত্বা কুমারস্যাগ্রতো দেবব্রাহ্মণসন্নিধৌ জীবিকাভাণ্ডান্যবতারয়েৎ। তেষাং যদাদৌ কুমারঃ স্পৃশতি তেনৈবাস্য জীবিকা ভবিষ্যতীতি জ্ঞানায়। যথা মার্কণ্ডেয়পুরাণম্—দেবাগ্রতোঽথ বিন্যস্য শিল্পভাণ্ডানি সর্ব্বশঃ। শস্ত্রাণি চৈব শাস্ত্রাণি ততঃ পশ্যেত্তু লক্ষণম্। প্রথমং যং স্পৃশেদ্বালঃ শিল্পভাণ্ডং স্বয়ং তদা। জীবিকা তস্য বালস্য তেনৈব তু ভবিষ্যতি। ততো ব্রাহ্মণভোজনমুৎসৃজেৎ। ওঁ অদ্যেত্যাদি মৎপুত্রস্যান্নপ্রাশনকর্ম্মণঃ সমৃদ্ধ্যর্থং ব্রাহ্মণেভ্যো যথোপকল্পিতং তৃপ্ত্যোপযিকমন্নমহং সম্প্রদদে ইত্যুৎসৃজ্য কৃতৈতদ্ভোজ্যদানকর্ম্মণঃ সাঙ্গতার্থং দক্ষিণামিদং তাম্বূলং যথাসম্ভববেদগোত্রশাখানামভ্যো ব্রাহ্মণেভ্যোঽহং সম্প্রদদে। ইতি দক্ষিণাং দদ্যাৎ। ততঃ কাংস্যপাত্রং দক্ষিণাং দত্ত্বা শান্তিং কৃত্বাঽচ্ছিদ্রাবধারণং কুর্য্যাৎ। ইত্যন্নপ্রাশনম্।

## অথ চূড়াকরণম্

তত্র প্রথমেঽব্দে তৃতীয়ে বা যুগ্মমাসে শুক্লে পক্ষে জ্যোতিঃশাস্ত্রোক্ত-তিথি-নক্ষত্র-বারেষু চন্দ্র-তারানুকূলে কালে বৃষ-মিথুন-ধনুর্ম্মকরমীনলগ্নেষু চূড়াকর্ম্মণি কর্ত্তব্যে পিতা কৃতনিত্যক্রিয়ঃ সগণেশ-গৌর্য্যাদি-মাতৃকাপূজা-বসুধারা-বৃদ্ধি-শ্রাদ্ধাদীনি বিধায় ব্রাহ্মণেভ্যস্তৃপ্ত্যোপযিকভোজ্যান্যুৎসৃজেৎ। ওঁ অদ্যেত্যাদি অমুকগোত্রস্যামুকদেবশর্ম্মণশ্চূড়াকরণকর্ম্মণি কর্ত্তব্যে ব্রাহ্মণেভ্যো ভোজ্যান্যহং দদে ইত্যুৎসৃজ্য তাম্বূলং দক্ষিণাং দত্ত্বা বহিঃশালায়াং স্বগৃহ্যোক্তবিধিনা চরুরহিতাং স্বিষ্টিকৃদন্তাং কুশণ্ডিকাং বিধায় অগ্নে ত্বং সত্যনামাসীতি নাম কৃত্বা পাদ্যাদিভিঃ পূজয়েৎ। ততঃ প্রয়োজনদ্রব্যাণ্যাসাদয়েৎ। তত্রায়ং বিশেষঃ। শীতোষ্ণোদকে নবনীত-ঘৃতদধি-পিণ্ডানামন্যতমং ত্রিশ্বেতশল্লকীকণ্টকং কুশপত্রত্রয়নির্ম্মিত-কুশপিঞ্জলীনবকং

তাম্রক্ষুরং নূতনশরাবস্থিত-বলীবর্দ্দ-গোময়পিণ্ডং তাম্রপরিষ্কৃতায়সক্ষুরং নাপিতশ্চেতি ব্রহ্মসংস্কারমঞ্জরীধৃতক্রমঃ। (পশুপতিমতে ব্রহ্মোপবেশনাদি-পর্য্যুক্ষণান্তাং কুশণ্ডিকাং সমাপ্য দ্রব্যাণ্যাসাদ্য ব্রহ্মণোঽন্বারদ্ধে-ণাঘারাজ্যভাগৌ হুত্বা সত্যনামানমগ্নিং সংস্থাপ্যাভ্যর্চ্চ্যাজ্যেন মহাব্যাহৃত্যাদি-স্বিষ্টকৃদন্তা দশাহুতীর্জুহুয়াৎ) ততঃ সংস্রবং প্রাশ্য ব্রহ্মণে দক্ষিণাং দদ্যাৎ। ওঁ অদ্যেত্যাদি অমুকগোত্রস্যামুকদেবশর্ম্মণঃ শুভচূড়া-করণকর্ম্মাঙ্গহোমকর্ম্মণি কৃতাকৃতাবেক্ষণাদি-ব্রহ্মকর্ম্মপ্রতিষ্ঠার্থং দক্ষিণামিদং পূর্ণপাত্রং (তদনুকল্পভোজ্যং বা) ব্রহ্মণেঽহং সম্প্রদদে ইত্যুৎসৃজ্য দদ্যাৎ। ততঃ শীতলজলেন উষ্ণজলং মিশ্রয়ত্যনেন মন্ত্রেণ—ওঁ উষ্ণেন বায় উদকেনেহ্যদিতে কেশান্ বপ (১) ইতি মন্ত্রেণ, কেশান্তে তু কেশশ্মশ্রু বপ ইতি বিশেষঃ। ততস্তস্মিঞ্জলে নবনীতাদিপিণ্ডানামন্যতমং নিক্ষিপ্য তেন পয়সা কুমারশিরো-দক্ষিণভাগস্থং কেশমার্দ্রীকরোত্যনেন মন্ত্রেণ—ওঁ সবিত্রা প্রসূতা দৈব্যা আপ উন্দন্তু তে তনুং দীর্ঘায়ুত্বায় (দীর্ঘায়ুষ্ট্বায়) বর্চ্চসে। (২) ততস্ত্রিশ্বেত-শল্লকীকণ্টকেন তূষ্ণীং কুমারকেশান্ বিজটীকৃতান্ ত্রিধা বিভজ্যেত ত্রিভাগমপি ত্রিধা কুর্য্যাৎ। ততো দক্ষিণত্রিভাগস্যৈকভাগে একাং কুশপিঞ্জলীং যোজয়ত্যনেন মন্ত্রেণ—ওঁ ওষধে ত্রায়স্ব স্বধিতে মৈনꣳ হিꣳসীরিতি। (৩) ততস্তাম্রক্ষুরং গৃহ্লাতি—ওঁ শিবো নামাসি স্বধিতিস্তে পিতা নমস্তে অস্তু মা মা হিꣳসীরিত্যনেন মন্ত্রেণ। (৪)

---

(১) হে বায়ো! বায়ুসম্বোধনেনাত্র কার্য্যে কারণোপচারাজ্জলং সম্বোধি-তম্ অদিতে! অখণ্ডিত! শীত ত্বম্ উষ্ণেন উদকেনৈহি সঙ্গতো ভব। সঙ্গত্য চ কেশান্ বপ ছিন্ধি।

(২) আপঃ সবিত্রা আদিত্যেন প্রসূতাঃ দৈব্যা দিবি ভবাস্তব তনুং দেহা-বয়বম্ উন্দন্তু ক্লেদয়ন্তু। কিমর্থম্? দীর্ঘায়ুত্বায়, উকারান্ত আয়ুশব্দঃ। বর্চ্চসে তেজসে চ।

(৩) হে ওষধে! কুশ! কুমারমেনং ত্রায়স্ব রক্ষ। অত্র এনমিতি দ্বিতীয়পাদে শ্রুতে তদেব কর্ম্মতয়া বোদ্ধব্যং সাকাঙ্ক্ষত্বাৎ। স্বধিতে! বজ্র! মা এনং হিংসীঃ হিংসামস্য মা কুরু।

(৪) হে ক্ষুর! শিবো নামাসি কল্যাণরূপো ভবসি, তে তব স্বধিতিঃ পিতা বজ্র উৎপত্তিরিত্যর্থঃ। এবম্ভূতায় নমোঽস্তু তুভ্যম্ মা মাং মা হিংসীঃ মা মাং ব্যথয়।

ততঃ কুশতরুণান্তর্হিতেষু কুশেষু তাম্রক্ষুরং যোজয়তি—ওঁ নিবর্ত্তয়াম্যায়ুষেঽন্নাদ্যায় প্রজননায় রায়স্পোষায় সুপ্রজাস্ত্বায় সুবীর্য্যায় (৫) ইত্যনেন মন্ত্রেণ। ততঃ তূষ্ণীং লৌহক্ষুরমাদায় সকুশান্ কেশান্ ছিনত্তি—ওঁ যেনাবপৎ সবিতা ক্ষুরেণ সোমস্য রাজ্ঞো বরুণস্য বিদ্বান্ তেন ব্রাহ্মণো বপতেদমস্যায়ুষ্যং জরদষ্টির্যথাসৎ (৬) ইত্যনেন মন্ত্রেণ। ততঃ সকুশান্ কেশান্ আনডুহে গোময়পিণ্ডে কুমারস্যোত্তরে বিধৃতে তূষ্ণীং নিক্ষিপেৎ। * ততস্তস্যৈবাপরভাগদ্বয়ে উন্দনাদিনিক্ষেপান্তং কর্ম্ম তূষ্ণীং কুর্য্যাৎ। ততঃ কুমারশিরঃ-পশ্চিমাংশস্থিত-কেশভাগং ত্রিধা বিভজ্য ত্রিভাগীকৃতস্যৈকভাগে উন্দনাদিসর্ব্বং তত্তন্মন্ত্রৈঃ পূর্ব্ববৎ বিধায় ওঁ ত্র্যায়ুষং জমদগ্নেঃ কশ্যপস্য ত্র্যায়ুষং যদ্দেবেষু ত্র্যায়ুষং তন্নো অস্তু ত্র্যায়ুষমিতি মন্ত্রেণ † (ওঁ কশ্যপস্য ত্র্যায়ুষং ওঁ জমদগ্নেস্ত্র্যায়ুষং ওঁ যদ্দেবানাং ত্র্যায়ুষং ওঁ তন্মেঽস্তু ত্র্যায়ুমমিতি মন্ত্রেণ ইতি পশুপতিমতম্) ছেদনং কৃত্বা পূর্ব্ববদ্গোময়পিণ্ডে তূষ্ণীং নিক্ষিপেৎ। কাণ্বানান্ত যদ্দেবানাং ত্র্যায়ুষং ইতি পাঠঃ। অপরভাগদ্বয়ে সর্ব্বমেবমমন্ত্রকং কুর্য্যাৎ। ততঃ কুমারস্য শির উত্তরভাগং ত্রিধা বিভজ্য তস্যৈকভাগে উন্দনাদিকং তত্তন্মন্ত্রৈঃ পূর্ব্ববৎ বিধায় ওঁ যেন ভূরিশ্চরাদিবং জ্যোক্ চ পশ্যামি সূর্য্যং (ওঁ যেন ভূরিশ্চরাদিবং জোক্তং পশ্চাদধিসূর্য্যম্

---

(৫) নিবর্ত্তয়ামি সংলাগয়ামি অহং ক্ষুরমিতি শেষঃ। কিমর্থং? আয়ুষে জীবনায়, তথা অন্নাদ্যায় অন্নঞ্চ তদ্ আদ্যং ভক্ষ্যঞ্চেতি অন্নাদ্যং তদর্থং, তথা প্রজননায় প্রসবশক্তয়ে, রায়স্পোষায় রায়ো ধনস্য পুষ্ট্যর্থং, সুপ্রজাস্ত্বায় শোভনসন্ততয়ে, সুবীর্য্যায় উৎকৃষ্টবীর্য্যার্থম্। অনেন ক্ষুরলাগনকর্ম্মণা কুমারস্য অন্নাদীনি ভবন্তু।

(৬) হে কুমার! যেন ক্ষুরেণ সবিতা আদিত্যঃ সোমস্য রাজ্ঞঃ অর্থাৎ কেশান্ অবপৎ খণ্ডিতবান্। ন কেবলং সোমস্য বরুণস্য চ, বিদ্বান্ বেদবিৎ তেন ক্ষুরেণ তে তব ব্রাহ্মণো ব্রহ্মা বপতি মুণ্ডয়তি। যথা ইদং চূড়াকর্ম্মাস্য তব আয়ুষ্যং সৎ ভূয়াৎ। কিম্ভূতমায়ুষ্যং? জরদষ্টিঃ জরত্বাৎ বার্দ্ধক্যমশ্নুতে ব্যাপ্নোতি বার্দ্ধক্যপর্য্যন্তমস্যায়ুর্যথা স্যাৎ। যচ্চূড়াকর্ম্ম আদিত্যেন বেদবিদা সোমবরুণয়োঃ কৃতং তত্তব ব্রহ্মা করোতু।

---

* পারস্করমতে শিবোনামাসীতি লৌহক্ষুরমাদায় তৎ নিবর্ত্তয়ামীতি কুশতরুণান্তর্হিতেষু কেশেষু সংযোজয়তি তেন যেনাবপদিতি সকেশানি কুশতরুণানি প্রচ্ছিন্দ্যাৎ।

† ইতি গৃহ্যসূত্র-ব্রহ্মসংস্কারমঞ্জরীমতম্।

ইতি পাঠান্তরম্ ) তেন তে বপামি ব্রহ্মণা জীবাতবে জীবনায় সুশ্লোক্যায় স্বস্তয়ে (৭) ইত্যনেন মন্ত্রেণ ছেদনং কৃত্বা পূর্ব্ববত্তৃণীং নিক্ষিপেৎ। অপরভাগদ্বয়ে সর্ব্বমুন্দনাদিকং অমন্ত্রকং কুর্য্যাৎ। ততঃ ক্ষুরং দক্ষিণাবর্ত্তেন বারত্রয়ং শিরসি কুমারস্য ভ্রাময়েৎ। কেশান্তে তু মুখে শিরসি চ। ওঁ যৎক্ষুরেণ মজ্জয়তা সুপেশসা বপ্তা বপতি কেশাংশ্ছিন্ধি শিরোমাস্যায়ুঃ প্রমোষীরিত্যনেন মন্ত্রেণ। (৮) কেশান্তে তু তত্র শির ইত্যনন্তরং মুখমিতি মন্ত্রে পাঠ্যম্। ততস্তেনৈবোদকেন সমস্তশির আর্দ্রমাপাদ্য পিতা নাপিতায় ক্ষুরং দদাতি—ওঁ অক্ষণ্বন্ পরিবপেত্যনেন মন্ত্রেণ। ততঃ ( অক্ষুণ্ণং পরিবপেতি পশুপতিঃ ) পঞ্চশিখং ত্রিশিখং মুণ্ডিতং বা যথাকুলাচারং ক্ষৌরং কারয়িত্বা কেশাংস্তস্মিন্ গোময়পিণ্ডে নিক্ষিপ্য মঙ্গলাচারপূর্ব্বকং সরসি গোষ্ঠে বা স্থাপয়েৎ। ততঃ স্নাপিতং কুমারং কৃতমঙ্গলং তথৈবাগ্নেঃ পশ্চিমে উপবেশ্য ( কর্ণবেধং কৃত্বা ) শান্তিং কৃত্বাচ্ছিদ্রাবধারণং কুর্য্যাৎ। তত আচার্য্যায়াভিলষিতদ্রব্যং দক্ষিণাং দদ্যাৎ। কেশান্তে তু গাম্। ততঃ সম্বৎসরং কুমারস্য ব্রহ্মচর্য্যমিতি অশক্তৌ দ্বাদশরাত্রং ষড্রাত্রং ত্রিরাত্রমিতি।

## অথোপনয়নম্।

তত্র শুক্রাস্তাদি-রহিতে শুদ্ধে কালে জন্ম-তৃতীয়-চতুর্থ-পঞ্চম-ষষ্ঠাষ্টম-দশম-দ্বাদশাতিরিক্তে গুরৌ রবৌ চ গোচরশুদ্ধে গর্ভমাসাবধ্যষ্টমে নবমে সপ্তমে দশমে একাদশে ত্রয়োদশে বা বর্ষে মাঘাদিষট্কে বসন্তাদিঋতৌ যথোক্তমাসে

---

(৭) যেন ক্ষুরেণ ভূরিশ্চন্দ্রমাঃ, কিম্ভূতঃ ? চরা ভ্রমণশীলঃ দিবং জ্যোক্স্বর্গে সঙ্গতঃ সমভবৎ। পশ্চাধি পশ্চাদধি সূর্য্যং সূর্য্যে জ্যোক্তঃ স এব চন্দ্রমাঃ সূর্য্যে সঙ্গতো ভূতস্তেন ক্ষুরেণ তে তব বপামি ত্বাং ক্ষৌরয়ামি। কস্মৈ ফলায়েত্যাহ—ব্রহ্মণা ব্রহ্মণে বেদলাভার্থং, জীবাতবে জীবনোপায়ার্থঞ্চ, জীবনায় চিরকাল-জীবনার্থং, সুশ্লোক্যায় শোভনযশসে, স্বস্তয়ে কল্যাণার্থঞ্চ।

(৮) অস্য কুমারস্য যৎ ক্ষুরেণ বপ্তা বপতি বপামি এতস্য কুমারস্য যৎ ক্ষৌরং সমাপ্য পুনর্ব্বারত্রয়ং ক্ষুরং ভ্রাময়ামি। ততস্তেন পুনঃ পুনঃ ক্ষৌরে-ণাপ্যস্য কেশান্ ছিন্ধি ছেদয়। মা শিরঃ অস্য শিরশ্ছেদনং মা কুরু। মা অস্য আয়ুঃ প্রমোষীঃ আয়ুঃখণ্ডনং মা অস্য কুরু। কিম্ভূতেন ক্ষুরেণ ? মজ্জয়তা শোধয়তা শিরো নিষ্কলুষং কুর্ব্বতা ইতি যাবৎ, তথা সুপেশসা শোভনাবয়বেন। বপতীতিমধ্যমৈকবচস্থানে প্রথমৈকবচনম্।

আপূর্য্যমাণপক্ষে জ্যোতিঃশাস্ত্রোক্ততিথি-নক্ষত্র-বারেষু ষষ্ঠাষ্টমভিন্ন-চন্দ্রতারানুকূলে অনধ্যায়রহিতদিনেষু বৃষ-তুলা-সিংহ-ধনুর্মীনলগ্নেষু উপনয়নে কর্ত্তব্যে প্রাতর্নিবর্ত্তিতনিত্যকৃত্যঃ পিতা সগণেশ-গৌর্য্যাদি-মাতৃকা-পূজা-বসুধারা-বৃদ্ধিশ্রাদ্ধানি বিধায় ব্রাহ্মণেভ্যো ভোজ্যত্রয়মুৎসৃজেৎ। ওঁ অদ্যেত্যাদি অমুকগোত্রস্যামুকদেবশর্ম্মণঃ উপনয়নকর্ম্মণি সমৃদ্ধ্যর্থং ব্রাহ্মণেভ্যো ভোজ্যান্যহং সম্প্রদদে। ইতি দত্ত্বা তান্ ভোজয়িত্বা অদ্যেত্যাদি-কৃতৈতদ্ভোজ্যদানকর্ম্মণঃ সাঙ্গতার্থং দক্ষিণামেতত্তাম্বূলং যথাসম্ভবগোত্র-বেদ-শাখা-নামভ্যো ব্রাহ্মণেভ্যোঽহং সম্প্রদদে ইতি উৎসৃজ্য দশকুমারাংশ্চ ভোজয়িত্বা বহিঃশালায়াম্ অগ্নিস্থাপনপর্য্যন্তাং কুশণ্ডিকাং কুর্য্যাৎ। ততঃ পর্য্যুপ্তশিরসম্ অলঙ্কৃতং ভুক্তক্ষীরান্নং কুমারমাচার্য্যপুরুষা আচার্য্যসমীপমানয়ন্তি। আচার্য্য আনীতং কুমারং পশ্চাদগ্নেঃ স্বস্য দক্ষিণতোঽবস্থাপ্য ব্রহ্মচর্য্যমাগামিতি ব্রূহি ইতি কুমারং প্রতিবদতি। কুমারঃ ওঁ ব্রহ্মচর্য্যমাগামিতি ব্রূয়াৎ। (১) পুনরাচার্য্যঃ ওঁ ব্রহ্মচার্য্যসানীতি ব্রূহি ইতি কুমারং প্রতিব্রূয়াৎ। কুমারঃ ওঁ ব্রহ্মচার্য্যসানি ইতি বদেৎ। (২) তত আচার্য্যো মাণবকং শাণং বাসঃ পরিধাপয়তি। ওঁ যেনেন্দ্রায় বৃহস্পতির্বাসঃ পর্য্যদধাদমৃতং তেন ত্বা পরিদধাম্যায়ুষে দীর্ঘায়ুত্বায় (দীর্ঘায়ুষ্টায়) বলায় বর্চ্চসে (৩) ইতি মন্ত্রেণ। * ততো গুরুঃ ওঁ ইয়ং দুরুক্তং পরিবাধমানা বর্ণং পবিত্রং পুনতী ম অগাৎ। প্রাণাপানাভ্যাং বলমাদধানা স্বসা দেবী সুভগা মেখলেয়ম্। (৪) ইতি মন্ত্রং পঠিতবতো

---

(১) হে আচার্য্য! অহং ব্রহ্মচর্য্যং বেদাধ্যয়নার্থং ব্রতম্, আগাম আগতবানস্মি।

(২) হে আচার্য্য! অহং ব্রহ্মচারী অসানি ভবামি।

(৩) বৃহস্পতির্দ্দেবানামাচার্য্যো যেন বিধানেন ইন্দ্রায় ইন্দ্রং বাসঃ বস্ত্রং পর্য্যদধাৎ পরিধাপিতবান্। কিম্ভূতং বাসঃ? অমৃতমহতম্ তেন বিধানেন ত্বা ত্বাং পরিদধামি পরিধাপয়ামি। কিমর্থম্? আয়ুষে জীবনায় দীর্ঘায়ুত্বায় চিরকালজীবিত্বার্থং বলায় সামর্থ্যায় বর্চ্চসে তেজসে চ।

(৪) ইয়ং মেখলা আগাৎ আগতবতী। কিং কুর্ব্বাণা? মে মম দুরুক্তমনুপনীতমিতি দোষং পরিবাধমানা পরি সর্ব্বতোভাবেন খণ্ডয়ন্তী, অতএব

---

* বস্ত্রং পরিধায় দ্বিরাচামেৎ।

মাণবকস্য কটিদেশে ত্রিরাবৃতাং প্রবরসংখ্যগ্রন্থিযুতাং মৌঞ্জীং মেখলাং প্রাদক্ষিণ্যেন বধ্নীয়াৎ। ততো গুরুর্যজ্ঞোপবীতমিত্যাদি মন্ত্রং পঠিতবতো মাণবকস্য দক্ষিণং বাহুমুদ্ধৃত্য বামস্কন্ধে একং যজ্ঞোপবীতং নিবেশয়তি। ওঁ যজ্ঞোপবীতং পরমং পবিত্রং বৃহস্পতের্যৎ (প্রজাপতের্যৎ) সহজং পুরস্তাৎ। আয়ুষ্যমগ্র্যং প্রতিমুঞ্চ শুভ্রং যজ্ঞোপবীতং বলমস্তু তেজঃ। (৫) (যজ্ঞোপবীতমসি যজ্ঞস্যত্বা যজ্ঞোপবীতেনোপনহ্যামি ইতি অতিরিক্তঃ সূত্রকারধৃতঃপাঠঃ) ততস্তূষ্ণীমৈণেয়মুত্তরীয়মাচার্য্যো মাণবকং পরিধাপয়তি ইত্যাহ ভাষ্যকারঃ। পশুপতি-সূত্রকারৌ তু ওঁ মিত্রস্য চক্ষুর্বরুণং বলীয়স্তেজোযশস্বী স্থবিরং সমিদ্ধম্। অনাহনস্যং বসনং জরিষ্ণু পরীদং বাজ্যজিনং দধেঽহম্ (৬) ইতি মন্ত্রেণ ইত্যাহতুঃ। * ততস্তূষ্ণীম্ আচার্য্যো দণ্ডং কুমারায় প্রযচ্ছতি। কুমারশ্চ ওঁ যো মে দণ্ডঃ পরাপতদ্বৈহায়সোঽধিভূম্যাং। তমহং পুনরাদদ আয়ুষে ব্রহ্মণে ব্রহ্মবর্চ্চসায় (৭) ইত্যনেন মন্ত্রেণ গৃহ্নাতি। ততঃ কুমারস্যাঞ্জলিমাচার্য্যঃ স্বাঞ্জলিস্থাভিরদ্ভিঃ পূরয়তি আভিস্তিসৃভির্ঋগ্‌ভিঃ। ওঁ আপো

---

দেবী স্তুত্যাদিবিষয়া, কিঞ্চ পবিত্রম্ উৎকৃষ্টং বর্ণং দ্বিজজাতিং পুনতী পাবয়ন্তী, ঈদৃশী ইয়ং মেখলা স্বসা অস্তু ইতি শেষঃ ভগিনীব নিত্যমভ্যুদয়ৈষিণী ভবতু। কিম্ভূতা ? প্রাণাপানাভ্যাং বলং সামর্থ্যমাদধানা প্রাণাপানয়োর্বলমর্পয়ন্তী তথা সুভগা অকর্কশা সুখস্পর্শেতি যাবৎ।

(৫) হে মাণবক! যজ্ঞোপবীতং প্রতিমুঞ্চ ধারয়। কিম্ভূতম্? আয়ুষ্যম্ আয়ুর্বৃদ্ধিহেতুম্ অগ্র্যং শ্রেষ্ঠং, শুভ্রং নির্ম্মলং, পরমং, পবিত্রং, তথা পুরস্তাৎ পূর্ব্বং প্রজাপতেঃ সহজং প্রজাপতিনা সহ একসময়ে জাতমিত্যর্থঃ। কিমর্থমস্য ধারণম্ ইত্যাহ বলং সামর্থ্যম্ অস্তু। তেজোঽস্তু।

(৬) অস্যার্থঃ সামগোপনয়নে দ্রষ্টব্যঃ।

(৭) যে মম যো দণ্ডঃ অধিভূম্যাং ভূমেরুপরি পরাপতৎ পতিতঃ, কিম্ভূতঃ ? বৈহায়সঃ বিহায়ঃ আকাশং তত্রভূতঃ অহং তং দণ্ডং পুনরাদদামি প্রাক্তনজন্মন্যহং দ্বিজ আসম্ এবমস্মিন্নপি জন্মনি দণ্ডং গৃহ্নামীত্যভিপ্রায়ঃ। কিমর্থম্? আয়ুষে জীবনায়, ব্রহ্মণে বেদার্থং, ব্রহ্মবর্চ্চসায় ব্রহ্মতেজঃপ্রাপ্ত্যর্থম্।

---

* ক্বচিৎপাশুপতপুস্তকে গৃহভাষ্যে চ তূষ্ণীং কৃষ্ণাজিনগ্রহণমিতি লিখিতম্।

হি ষ্ঠা ময়ো ভুবস্তা ন.উর্জ্জে দধাতন মহে রণায় চক্ষসে। (৮) ওঁ যো বঃ শিবতমো রসস্তস্য ভাজয়তেহ নঃ। উশতীরিব মাতরঃ। (৯) ওঁ তস্মা অরঙ্গমাম বো যস্য ক্ষয়ায় জিন্বথ আপো জনয়থা চ নঃ। (১০) ইতি। পশুপতিস্তু বারত্রয়ং তিসৃভি-র্ঋগ্ভিঃ পূরণমাহ। ততো গুরুর্মাণবকং প্রেষয়তি ওঁ সূর্য্যমুদীক্ষস্বেতি। মাণব-কশ্চ প্রেষিতস্তচ্চক্ষুরিত্যাদিমন্ত্রেণ সূর্য্যম্ অঞ্জলিং দত্ত্বা উর্দ্ধবাহুঃ উদীক্ষেত। ওঁ তচ্চক্ষুর্দেবহিতং পুরস্তাচ্ছুক্রমুচ্চরৎ। পশ্যেম শরদঃ শতং জীবেম শরদঃ শতং শৃণুয়াম শরদঃ শতং * (প্রব্রবাম শরদঃ শতমদীনাঃ স্যাম শরদঃ শতং ভূয়শ্চ শরদঃ শতাৎ)। ততো গুরুর্মাণবকস্য দক্ষিণাংসস্যোপরি স্বং দক্ষিণং হস্তং নীত্বা হৃদয়মালভতে অনেন মন্ত্রেণ—ওঁ মম ব্রতে তে হৃদয়ং দধামি মম চিত্তমনুচিত্তং তে অস্তু মম বাচমেকমনা জুষস্ব বৃহস্পতিষ্ট্বা নিযুনক্তু মহ্যম্। (১১) অথাচার্য্যো মাণবকস্য দক্ষিণং হস্তং সাঙ্গুষ্ঠং স্বদক্ষিণহস্তেন গৃহীত্বা পৃচ্ছতি—ওঁ

---

(৮) হে আপঃ! হি যস্মাৎ যূয়ং ময়ঃ সুখং তস্য ভুবঃ ভাবয়িত্র্যঃ স্থ ভবথ, সুখদায়িন্যো ভবথেত্যর্থঃ। তাঃ তাদৃশ্যো যূয়ং নো অস্মান্ উর্জ্জে অন্নায় দধাতন স্থাপয়ত। কিঞ্চ মহে মহতে রণায় রমণীয়ায় চক্ষসে দর্শনায়। হে আপঃ! যস্মাৎ যূয়ং সুখং প্রাপয়থ তস্মাৎ কারণাৎ অস্মান্ ঐহিকেনা-নেনামুষ্মিকেণ চ মহারমণীয়দর্শনেন পরব্রহ্মণা সংযোজয়ত ইতি ভাবঃ।

(৯) হে আপঃ! বো যুষ্মাকং যো রসঃ নির্য্যাসঃ, কীদৃশঃ? শিবতমঃ অত্যন্তকল্যাণরূপঃ, তস্য রসস্য ইহ নঃ অস্মান্ ভাজয়ত ভাগিনঃ কুরুত। কিম্ভূতা যূয়ং আপঃ? উশতীঃ ইচ্ছন্ত্যো মাতর ইব। অয়মর্থঃ—হে আপঃ! যথা সস্নেহা মাতরঃ পুত্রান্ কল্যাণযুক্তান্ কুর্ব্বন্তি, তথা যূয়মপি কল্যাণা-ত্মক-যুষ্মদীয়রসেন অস্মান্ সম্বদ্ধান্ কুরুতেতি অপ্সু প্রার্থনা।

(১০) হে আপঃ! বো যুষ্মাকং তস্মৈ তস্য রসস্য। অরং অলং পর্য্যাপ্তং বৈতৃষ্ণ্যং গমাম গচ্ছেম। কিঞ্চ তত্রৈব রসবিষয়ে নঃ অস্মান্ যূয়ং জনয়থা চ তদ্রসভোক্তৃত্বে নঃ অস্মান্ যূয়ং পরিকল্পয়তেত্যর্থঃ। কস্য? যস্য রসস্য ক্ষয়ায় ক্ষয়স্য স্থানস্য একদেশেন জিন্বথ প্রীণয়থ। ব্রহ্মাদিস্তম্বপর্য্যন্তং জগৎ।

(১১) হে মাণবক! তে তব হৃদয়ং মম ব্রতে দধামি তব হৃদয়ং মদেক-ব্রতং সম্পাদয়ামি। কিন্তুৎ মদেকব্রতমিত্যাকাঙ্ক্ষায়ামাহ—তে তব চিত্তং

---

* বন্ধনীপূর্ব্বপর্য্যন্তঃ পাঠঃ পশুপতিসম্মতঃ, প্রব্রবামেত্যাদি অতিরিক্তঃ পাঠো ব্রহ্মসংস্কার-মঞ্জরীধৃতঃ।

কো নামাসি ইতি। পৃষ্টঃ কুমারঃ শ্রীঅমুকদেবশর্ম্মাঽহং ভোঃ ইতি প্রাহ। ততো গুরুর্ম্মাণবকং পৃচ্ছতি—ওঁ কস্য ব্রহ্মচার্য্যসীতি। ভবত ইতি কুমারেণোক্তো গুরুঃ পঠতি—ওঁ ইন্দ্রস্য ব্রহ্মচার্য্যস্যগ্নিরাচার্য্যস্তবাহমাচার্য্যস্তবাসৌ (১২) ইতি পঠেৎ। অসৌ ইতি সর্ব্বনামস্থানে অমুকদেবশর্ম্মন্নিতি সম্বোধনান্তং কুমারনাম গ্রহীতব্যম্। তত আচার্য্য এনং কুমারং ভূতেভ্যঃ পরিদদাতি—ওঁ প্রজাপতয়ে ত্বা পরিদদামি দেবায় ত্বা সবিত্রে পরিদদাম্যদ্ভ্যস্ত্বৌষধিভ্যঃ পরিদদামি দ্যাবাপৃথিবীভ্যাং ত্বা পরিদদামি বিশ্বেভ্যস্ত্বা দেবেভ্যঃ পরিদদামি সর্ব্বেভ্যস্ত্বা ভূতেভ্যঃ পরিদদাম্যরিষ্টৈ (১৩) ইতি। ততো মাণবকোঽগ্নিং প্রদিক্ষণীকৃত্যাচার্য্যস্যোত্তরত উপবিশতি। তত আচার্য্যো ব্রহ্মোপবেশনাদিপর্য্যুক্ষণান্তাং কুশণ্ডিকাং সমাপ্যাজ্যেন আঘারাজ্যভাগৌ হুত্বা সমুদ্ভবনামাগ্নিং সংস্থাপ্যাজ্যেন মহাব্যাহৃত্যাদিস্বিষ্টিকৃদন্তাশ্চতুর্দ্দশাহুতীর্হুত্বা (অগ্নে ত্বং সমুদ্ভবনামাসীতি নাম কৃত্বা সম্পূজ্য ইতি ব্রহ্মসংস্কারমঞ্জরীমতম্) হুতশেষং প্রাশ্য পূর্ণপাত্রং বরং বা ব্রহ্মদক্ষিণাং দত্ত্বা গুরুর্ম্মাণবকং শিক্ষয়তি—ওঁ ব্রহ্মচার্য্যসীতি, ভবামীতি (অসানীতি) মাণবকেনোক্তো গুরুঃ আপোঽশান ইতি বদতি। অশ্নানি ইতি মাণবকঃ, কর্ম্ম কুরু ইতি গুরুঃ, করবাণীতি মাণবকঃ,( কস্যচিন্মতে ওঁ আপোঽশানং কর্ম্ম কুরু ইতি গুরুঃ, ওঁ করবাণীতি মাণবকঃ) মা দিবা স্বাপ্সীঃ ইত্যাচার্য্যঃ, ন স্বপানি ইতি ব্রহ্মচারী, বাচং যচ্ছেত্যাচার্য্যঃ, যচ্ছানীতি ব্রহ্মচারী, সমিধমাধেহীতি আচার্য্যঃ, আদধানীতি ব্রহ্মচারী, পুনর্গুরুঃ অপোঽশান ইতি বদেৎ, মাণবকঃ ওঁ অশানীতি ব্রূয়াৎ। ততো গুরুরগ্নেরুত্তরে প্রাঙ্মুখ

---

মম চিত্তমনু অনুকূলমস্তু, ত্বমেকমনাঃ একচিত্তঃ সন্ মম বাচং জুষস্ব সেবস্ব, বৃহস্পতির্দেবাচার্য্যস্ত্বা ত্বাং মহ্যং নিযুনক্তু নিযোজয়তু।

(১২) হে মাণবক! ইন্দ্রস্য ত্রৈলোক্যনাথস্য ব্রহ্মচারী অসি ভবসি। তব অগ্নিঃ আচার্য্যঃ গুরুরগ্নির্দ্বিজাতীনামিতি শ্রুতেঃ। ইদানীন্তু এতদুপনয়নকর্ত্তৃত্বেনাহং তবাচার্য্যঃ।

(১৩) হে মাণবক! প্রজাপতয়ে ত্বা ত্বাং পরিদদামি সমর্পয়ামি। কিঞ্চ সবিত্রে সূর্য্যায় পরিদদামীতি সর্ব্বত্র যোজ্যম্। কীদৃশায়? দেবায় দেবনাদিগুণযুক্তায়। এবং অদ্ভ্যঃ জলেভ্যঃ ওষধীভ্যঃ ব্রীহ্যাদিভ্যঃ দ্যাবাপৃথিবীভ্যাং আকাশভূমিভ্যাং বিশ্বেভ্যো দেবেভ্যঃ সর্ব্বেভ্যো ভূতেভ্যঃ রাক্ষসাদিভ্যস্ত্বাং পরিদদামীতি। কিমর্থং সমর্পনম্? অরিষ্টৈ রিষ্টিরুৎপাতস্তদুপশমনায়।

উপবিষ্টঃ প্রত্যঙ্মুখায় শিষ্যায় গুরুমুখং সমীক্ষমাণায় স্বয়মপ্যাচার্য্যেণ সমীক্ষিতায় দক্ষিণহস্তেন গুরোর্দক্ষিণং পাদং বামহস্তেন বামপাদং গৃহীত্বা উপসন্নায় গায়ত্রীং দদ্যাৎ। যথা—প্রথমং ( গায়ত্র্যা বিশ্বামিত্রঋষির্গায়ত্রীচ্ছন্দঃ সবিতা দেবতা সায়মগ্নিহোত্রহোমানন্তরং গার্হপত্যাগ্ন্যুপস্থাপনে [ আহবনীয়াগ্ন্যুপস্থাপনে ] বিনিয়োগঃ। ইতি ব্রহ্মচারিণে ব্রাহ্মণায়। গায়ত্র্যা বৃহস্পতির্ঋষিস্ত্রিষ্টুপ্ ছন্দঃ সবিতা দেবতা বাজপেয়ে আজ্যহোমে বিনিয়োগঃ। ইতি ক্ষত্রিয়ায়। গায়ত্র্যা প্রজাপতির্ঋষির্জগতীচ্ছন্দঃ সবিতা দেবতা রুক্মপাশপ্রতিমোচনে উখাসংস্তরণে বিনিয়োগঃ। ইতি বৈশ্যায় শ্রাবয়িত্বা ) ওঁকারব্যাহৃতিপূর্ব্বকং প্রথমং পাদং ওঁ তৎসবিতুর্বরেণ্যং প্রথমং পাঠয়েৎ। ( পুনর্গায়ত্র্যা বিশ্বামিত্রঋষিরিত্যনন্তরং দ্বিতীয়ং পাদং এবং ঋষিচ্ছন্দোদেবতাবিনিয়োগশ্রবণানন্তর্য্যং সর্ব্বত্র। ) ভর্গো দেবস্য ধীমহীত্যন্তম্, তদনন্তরং তৃতীয়ং পাদং ধিয়ো য়ো নঃ প্রচোদয়াৎ ইত্যন্তং দ্বিতীয়বারে প্রথমং ধীমহীত্যন্তং ততঃ প্রচোদয়াদিত্যন্তং তৃতীয়বারে সমগ্রাং সাবিত্রীং ব্রহ্মচারিণা সহৈব পঠেৎ। ততো মাণবকোঽগ্নিং পর্য্যুক্ষ্য সমিদাধানং কুর্য্যাৎ। যথা—প্রাদেশপ্রমিতাভির্ঘৃতাক্তাভিঃ পঞ্চযজ্ঞীয়কাষ্ঠিকাভিঃ ওঁ অগ্নে সুশ্রবঃ সুশ্রবসং মা কুরু। ১। যথা ত্বমগ্নে সুশ্রবঃ সুশ্রবা অসি। ২। এবমগ্নে সুশ্রবঃ সুশ্রবসং মা কুরু। * ৩। যথা ত্বমগ্নে দেবানাং যজ্ঞস্য নিধিপা অসি। ৪। এবমহং মনুষ্যাণাং বেদস্য নিধিপো ভূয়াসম্। ৫। (১৪) ইত্যেতৈঃ পঞ্চভির্মন্ত্রৈঃ প্রতিঋচং ইন্ধনাধানৈরগ্নিং জ্বালয়তি। কেচিত্তু মা কুরু ইত্যন্তমেকং সুশ্রবসং মা কুরু ইত্যপরং ভূয়াসমিত্যন্তং

(১৪) হে অগ্নে! ত্বং কিম্ভূতঃ? সুশ্রবঃ শোভনঃ শ্রবঃ নাম যস্যাসৌ মা মাং সুশ্রবসং কুরু সুষ্ঠু শ্রবঃ কর্ণেন্দ্রিয়মস্য তং বেদাধ্যয়নে মামবিকলেন্দ্রিয়ং কুর্ব্বিত্যর্থঃ। হে অগ্নে! সুশ্রবঃ! ত্বং যথা সুশ্রবা অসি সুশ্রবস্তবাদৌ সুশ্রবাঃ শোভনকর্ণো ভবসি এবং তথা হে অগ্নে, সুশ্রবঃ মা মাং সৌশ্রবসং কুরু, সুশ্রবে যশসি শোভন-শ্রবণ-জনিতজ্ঞানশালিনং কুরু। হে অগ্নে! ত্বং যথা দেবানাং যজ্ঞস্য নিধিপা অসি ইন্দ্রাদীনাং যজ্ঞস্য যজ্ঞসম্বন্ধেন নিধিপা নিধিরক্ষকঃ এবমহং মনুষ্যাণাং বেদস্য নিধিপো বেদভাণ্ডাগারিকো ভবামীত্যর্থঃ।

* এবং মাং সুশ্রবঃ সৌশ্রবসং কুরু ইতি গৃহ্যসূত্রপাঠঃ।

তৃতীয়মাহুঃ। ততঃ প্রদক্ষিণমীশানাদিতো দক্ষিণহস্তেনাগ্নিমভিষিচ্য উত্থায় একাং সমিধমাদধাত্যনয়া ঋচা—ওঁ অগ্নয়ে সমিধমাহার্ষং বৃহতে জাতবেদসে যথা ত্বমগ্নে সমিধা সমিধ্যস এবমহমায়ুষা মেধয়া বর্চ্চসা প্রজয়া পশুভির্ব্রহ্মবর্চ্চসেন সমিন্ধে। জীবপুত্রো মমাচার্য্যো মেধাব্যহমসান্য-নিরাকরিষ্ণুরায়ুষ্মান্ যশস্বী তেজস্বী ব্রহ্মবর্চ্চস্যন্নাদো ভূয়াসং স্বাহা। (১৫) এবং (পূর্ব্বোক্তমন্ত্রৈঃ) সমিদাধানাদিক্রমেণাপরং সমিদ্দ্বয়ং হুত্বা ততো মাণবকস্তূ-ষ্ণীমগ্নৌ হস্তৌ প্রতপ্য প্রতিমন্ত্রং সপ্তভির্মন্ত্রৈঃ পাণিভ্যাং ললাটাদিচিবুকান্তং মুখং পরিমাষ্টি—ওঁ তনূপা অগ্নেঽসি তন্বং মে পাহি। ১। ওঁ আয়ুর্দা অগ্নেঽস্যা-য়ুর্মে দেহি। ২। ওঁ বর্চ্চোদা অগ্নেঽসি বর্চ্চো মে দেহি। ৩। ওঁ অগ্নে যন্মে তন্বা উনং তন্ম আপৃণ। ৪। ওঁ মেধাং মে দেবঃ সবিতা আদধাতু। ৫। ওঁ মেধাং দেবী সরস্বতী (আদধাতু)। ৬। ওঁ মেধামশ্বিনৌ দেবাবাধত্তাং পুষ্করস্রজৌ। ৭। (১৬) ততঃ (জলেন) শিরঃপ্রভৃতিপাদান্তং সর্ব্বাঙ্গাণ্যালভতে

---

(১৫) হে অগ্নে! সমিধমাহার্ষম্ আহৃতবানস্মি। কস্মৈ? জাতবেদসে অগ্নয়ে তুভ্যমেবেত্যর্থঃ। কিম্ভূতায়? বৃহতে জাজ্বল্যমানায়, হে অগ্নে! ত্বং যথা সমিধা সমিধ্যসে ময়া আহৃতয়া অনয়া সমিধা জ্বলসি এবমহং সমিন্ধে সপ্রকাশো ভবামি। কৈঃ? আয়ুষা জীবনেন,মেধয়া বুদ্ধ্যা, বর্চ্চসা তেজসা,প্রজয়া সন্তানেন, পশুভির্গবাদিভিঃ, ব্রহ্মবর্চ্চসেন ব্রহ্মতেজসা। কিঞ্চ মম আচার্য্যঃ জীবপুত্রো মেধাবী চ অস্তু, অহম্ অনিরাকরিষ্ণুঃ অসানি ভবানি, অগ্নিমাধায় যাগস্যা-করণং নিরাকরণং তৎকারী নিরাকরিষ্ণুঃ ন তথা অনিরাকরিষ্ণুঃ নিত্যং যাগকারী ভবামীত্যর্থঃ। অপি চাহম্ আয়ুষ্মান্ যশস্বী তেজস্বী ব্রহ্মবর্চ্চস্বী বেদাধ্যয়নর্দ্ধিমান্ অন্নাদঃ ভূয়াসং কদাচিদপি মমান্নাদিচ্ছেদো মা ভবত্বিত্যর্থঃ।

(১৬) হে অগ্নে! তনূপা অসি তনুঃ শরীরং তস্যাঃ পাতা রক্ষকো ভবসি, অতো মে মম তন্বং তনুং পাহি রক্ষ। হে অগ্নে! আয়ুর্দা অসি আয়ুষো দাতা ভবসি, অত আয়ুর্ম্মে দেহি। হে অগ্নে! বর্চ্চোদা তেজসো দাতা ভবসি, অতো বর্চ্চো মে দেহি। মম তন্বাঃ শরীরস্য যদূনং অসম্পূর্ণং তন্মে আপৃণ আপূরয়। মে মম মেধাং বুদ্ধিং সবিতা দেব আদধাতু অর্পয়তু। তথা সরস্বতী দেবী মেধাং মে আদধাতু ইত্যন্বয়ঃ। অশ্বিনৌ দেবৌ অশ্বিনী-কুমারৌ মম মেধামাধত্তাম্। কিম্ভূতৌ? পুষ্করস্রজৌ পদ্মমাল্যধরৌ। সবিত্রাদয়ো দেবা মেধাং মে জনয়ন্তু ইতি আশংসাবাক্যার্থঃ।

অনেন মন্ত্রেণ—ওঁ অঙ্গানি চ ম আপ্যায়ন্তাম্। (১৭) ওঁ বাক্ চ ম আপ্যায়তাম্। ইতি মুখম্। ওঁ প্রাণশ্চ ম আপ্যায়তামিতি নাসিকে যুগপৎ। ওঁ চক্ষুশ্চ ম আপ্যায়তামিতি যুগপচ্চক্ষুষী। ওঁ শ্রোত্রঞ্চ ম আপ্যায়তামিতি ক্রমেণ মন্ত্রাবৃত্তিপূর্ব্বকং দক্ষিণবামকর্ণৌ। ওঁ যশোবলঞ্চ ম আপ্যায়তামিতি পাঠমাত্রম্। ততঃ শিষ্টাচারাদনামিকয়া ভস্ম গৃহীত্বা ললাটে ওঁ কশ্যপস্য ত্র্যায়ুষং, গ্রীবায়াং ওঁ জমদগ্নেস্ত্র্যায়ুষং, দক্ষিণাংসে ওঁ যদ্দেবেষু ত্র্যায়ুষং, তথৈব বামাংসে। ওঁ যদ্দেবানাং ত্র্যায়ুষমিতি কাণ্বশাখীয়ানাং পাঠঃ, হৃদি ওঁ তন্নো অস্তু (তন্মেঽস্তু) ত্র্যায়ুষমিতি দদাতি। (অত্রানুক্তমপি স্মৃত্যন্তরোক্তমভিবাদনং ব্রহ্মচারী কুর্য্যাৎ। ওঁ অমুকগোত্রোঽমুকপ্রবরোঽমুকদেবশর্ম্মাহং ভো অমুকদেবশর্ম্মন্ ত্বামভিবাদয়ে ইত্যুক্ত্বা দক্ষিণবামচরণৌ দক্ষবামপাণিভ্যাং গুরোঃ স্পৃশেৎ। ততো গুরুরায়ুষ্মান্ ভব সৌম্যামুকদেবশর্ম্মন্ ভো ইতি প্লুতান্তং বদেৎ।) ততো ভিক্ষাচরণম্। তদ্যথা—ভবতি ভিক্ষাং দেহীতি ব্রাহ্মণঃ। ভিক্ষাং ভবতি দেহীতি রাজন্যঃ। ভিক্ষাং দেহি ভবতীতি বৈশ্যঃ। তত্র প্রথমং মাতরং ভগিনীং মাতৃস্বসারং অন্যাং বা কামপি ষড়্ বা দ্বাদশ বা স্ত্রিয়ো ভিক্ষেত। ততো গুরবে নিবেদয়েৎ—ইয়ং ভিক্ষা ময়া লব্ধেতি। ততো ভিক্ষান্তরং যাচেত। অথ গুরুণা তবৈতদেব ভোজনায় ইত্যভিহিতো ভিক্ষাং স্বীকুর্য্যাৎ। ততো গুরুঃ শান্ত্যুদকং কৃত্বা শিষ্যমভিষিচ্যাচ্ছিদ্রাবধারণং কুর্য্যাৎ। ততো ব্রহ্মচারী মৌনী (অরণ্যাদ্বৃক্ষচ্ছেদং বিনা সমিধমাহৃত্য) অহঃশেষং নীত্বা সন্ধ্যামুপাস্য পূর্ব্ববত্ত্র্যায়ুষকরণান্তং সমিদাধানং কুর্য্যাৎ। অতঃ পরমাসমাবর্ত্তনম্ অধঃশয়ীত অক্ষারলবণাশী দণ্ডধারী সায়ং প্রাতঃ পর্য্যুক্ষণপূর্ব্বকং ত্র্যায়ুষকরণান্তং সমিদাধানকারী গুরুশুশ্রূষাপরঃ ভিক্ষাচারী মধুমাংসাদন-নদ্যাদ্যবগাহন-খট্টাদ্যারোহণচেলাসনোপবেশনস্ত্রীমধ্যাবস্থানানৃতভাষণাদত্তদানাদীনি বর্জ্জয়েৎ। সংস্কারাণাং যথোক্তকালাতিক্রমে অনাদিষ্টপ্রায়শ্চিত্তহোমঃ কার্য্যঃ। যথা—ভূসংস্কারৈর্লৌকিকাগ্নিং সংস্থাপ্য স্থাল্যামাজ্যং তূষ্ণীং নিরূপ্যাগ্নাবধিশ্রিত্য স্রুবং দর্ভৈঃ সম্মার্জ্জ্যাজ্যমুদ্বাস্য কুশতরুণাভ্যামুৎপূয়াজ্যং স্রুবেণাদায় উপরি সমিধং নিধায় উথায়

---

(১৭) যে মমাঙ্গানি শরীরাবয়বা আপ্যায়ন্তাং স্ফীতানি ভবন্তু, ন কেবলমেবং ভবতু এতদপি ভবত্বিতি বাক্যার্থঃ।

স্রুবং সব্যে পাণৌ কৃত্বা দক্ষিণেনাগ্নৌ তিষ্ঠন্ সমিধমাধায় উপবিশ্য দক্ষিণং জান্বাচ্য ওঁ ভূঃ স্বাহেতি স্রুবস্থিতাজ্যেনৈকাহুতিং হুত্বা তথৈব তিস্রঃ ওঁ ভুবঃ স্বাহা ওঁ স্বঃ স্বাহা ওঁ ভূর্ভুবঃস্বঃ স্বাহা ইতি হুত্বা ওঁ ত্বন্নো অগ্নে ইত্যাদিভিঃ পূর্ব্বোক্তাভিঃ পঞ্চভির্ঋগ্ভিঃ * পঞ্চাহুতীর্জুহোতি। ইত্যনাদিষ্টপ্রায়শ্চিত্তম্। ইত্যুপনয়নম্।

---

* ৯৬।৯৭ পৃষ্ঠায়াঃ ত্বন্ন ইত্যাদয়ঃ পঞ্চঋচো দ্রষ্টব্যাঃ ; অত্র তাসাং ব্যাখ্যাঃ :—

(ক) হে অগ্নে! ত্বং বরুণস্য দেবস্য হেলঃ ক্রোধং অস্মিন্ কর্ম্মণি বৈগুণ্যজনিতং অবযাসিসীষ্ঠাঃ অপনয়। কিম্ভূতস্ত্বং? নো অস্মান্ বিদ্বান্ ত্বমেব অস্মাকং কর্ম্মসাক্ষী। ন কেবলং বরুণস্য ক্রোধমপনয়, অস্মৎ অস্মত্তঃ বিশ্বা সর্ব্বাণি দ্বেষাংসি দৌর্ভাগ্যানি তথা যজিষ্ঠঃ যষ্টৃতমঃ, বহ্নিতমঃ হবিষাং বোঢৃতমঃ, শোশুচানঃ দেদীপ্যমানঃ। প্রমুমুগ্ধি মুঞ্চ। হেল হেড্ অনাদরে। দ্বিতীয়ায়াং প্রথমৈকবচনম্।

(খ) হে অগ্নে! স ত্বং নো অস্মাকং অবমো পালয়িতৃতমো নেদিষ্ঠঃ নিত্যং পাবকত্বেন সন্নিহিতশ্চ ভব। স কঃ? যস্ত্বমূতী উত্যা অবনেন। কস্মিন্ সময়ে অবমঃ? অস্যা উষসঃ প্রভাতস্য ব্যুষ্টৌ সমাপ্তৌ অস্মিন্নেব দিবসে কেবলমেবং নঃ অস্মান্ প্রতি এধি আগচ্ছ। কিম্ভূতস্ত্বং? সুহবঃ সুখাহ্বানঃ, আগত্য বরুণং অবযক্ষ্ব পূজয়। কিং কুর্ব্বন্? নো অস্মাকং মৃড়ীকং মৃলীকং ররাণঃ অস্মৎ-সম্বন্ধি সুখকরং হবির্দধানঃ স্বয়ঞ্চ বীহি এতদেব ভক্ষয়। অয়মর্থঃ—হে অগ্নে! যতস্ত্বং লোকস্য পালনেন নিত্যং সন্নিহিতঃ স ত্বমদ্যৈব অস্মাকং পালকো ভব, অস্মান্ প্রত্যাগচ্ছ আগত্য চ অস্মদীয়হবির্দ্দানে বরুণং পূজয় স্বয়মপি ভক্ষয়।

(গ) হে অগ্নে! ত্বম্ অয়াশ্চ প্রাণিনা শুভাবহবিধিরসি, অপরম্ অনভিশস্তিপাশ্চ অবিদ্যমানা অভিশস্তির্যাচ্ঞা যস্য সঃ তং পাসীতি অনভিশস্তিপাঃ। অয়মর্থঃ—যস্তাং রক্ষণার্থং ন যাচতে, তস্যাপি ত্বং মাহাত্ম্যাৎ রক্ষকো ভবসি, এতদ্ভূতস্ত্বং অয়া আগচ্ছ, আগত্য নো অস্মাকং যজ্ঞং বহ, বহুবিরেতচ্ছুভং তদ্দেবান্ প্রাপয়। কিঞ্চ ত্বং সত্যমি সত্যমেব অয়া অসি জ্ঞাতাসি জগতো নিস্তারকোপায়ং জানাসি, অতোঽপি কারণাৎ ত্বম্ অয়া আগচ্ছ, আগত্য নো অস্মাকং ভেষজং ধেহি, নিস্তারকোপায়ভেষজং পরিকল্পয়। সত্যমি ইশব্দোঽব্যয়ম্ অবধারণার্থঃ। অয়ঃশব্দঃ সান্তঃ শুভবাচকোঽপ্যস্তি। অয়া অয়া ইতি ক্রিয়াদ্বয়মত্যন্তার্থদ্যোতনার্থম্।

## অথ বেদারম্ভঃ

তত্র পুণ্যেঽহনি কৃতনিত্যক্রিয়ো গুরুঃ সগণেশ-মাতৃকাপূজা-বসুধারা-বৃদ্ধিশ্রাদ্ধানি বিধায় স্বগৃহ্যোক্তবিধিনা (লৌকিক) ঽগ্নিং সংস্থাপ্য ব্রহ্মচারিণমাহূয়াগ্নেঃ পশ্চাৎ স্বস্যোত্তরত উপবেশ্য ব্রহ্মোপবেশনাদি-আঘারাজ্যভাগান্তং কৃত্বা ব্রহ্মণোঽন্বারম্ভত্যাগং বিধায় জাতবেদোনামাগ্নিং সংস্থাপ্য জাতবেদসে অগ্নয়ে নম ইতি সম্পূজ্য (পশুপতিমতে সমুদ্ভবনামাগ্নিং সংস্থাপ্য ততো ব্রহ্মণোঽন্বারম্ভত্যাগং কুর্য্যাৎ) অন্তরীক্ষায় স্বাহা ওঁ বায়বে স্বাহা ইতি দ্বে আহুতী হুত্বা ওঁ ব্রহ্মণে স্বাহা ইদং ব্রহ্মণে। ওঁ ছন্দোভ্যঃ স্বাহা ইদং ছন্দোভ্যঃ। ওঁ প্রজাপতয়ে স্বাহা ইদং প্রজাপতয়ে। ওঁ দেবেভ্যঃ স্বাহা ইদং দেবেভ্যঃ। ওঁ ঋষিভ্যঃ স্বাহা ইদম্ ঋষিভ্যঃ। ওঁ শ্রদ্ধায়ৈ স্বাহা ইদং শ্রদ্ধায়ৈ। ওঁ মেধায়ৈ স্বাহা ইদং মেধায়ৈ। ওঁ সদসম্পতয়ে স্বাহা ইদং সদসম্পতয়ে। ওঁ অনুমতয়ে স্বাহা ইদমনুমতয়ে। নবাহুতীর্জুহুয়াৎ। যদি ঋগ্‌বেদঃ সমারভ্যতে তদা ওঁ পৃথিব্যৈ স্বাহা ওঁ অগ্নয়ে স্বাহা ইতি দ্বে আহুতী হুত্বা ব্রহ্মণে ছন্দোভ্য ইত্যাদি নবাহুতীর্হুত্বা শেষং সমাপয়েৎ। যদি সামবেদঃ তদা আজ্যভাগানন্তরং ওঁ দিবে স্বাহা ওঁ সূর্য্যায় স্বাহা। ওঁ ব্রহ্মণে স্বাহেত্যাদি নবাহুতীর্জুহুয়াৎ। যদি অথর্ব্ববেদস্তদাজ্যভাগান্তং

---

(ঘ) হে বরুণ! তব শতং পাশা বিততা বিস্তীর্ণাঃ অপি চ যে সহস্রাঃ সহস্রসংখ্যাঃ যজ্ঞিয়াঃ যজ্ঞানুষ্ঠানজনিতাঃ মহান্তঃ সর্ব্বলোকব্যাপকাঃ তেভিঃ তৈঃ পাশৈঃ নঃ অস্মান্ অদ্য ইদানীং সবিতা উত বিষ্ণুঃ বিশ্বেদেবা মরুতঃ বায়বঃ স্বর্কাঃ সুষ্ঠু অর্কাঃ আদিত্যাঃ মুঞ্চন্তু মুক্তান্ কুর্ব্বন্তু। অয়ং বাক্যার্থঃ—অস্মিন্ কর্ম্মণি প্রমাদাদিকৃতানি পাপানি দুঃখহেতুত্বগুণযোগাৎ পাশশব্দাভিধেয়ানি তৈঃ পাপৈঃ সবিত্রাদয়ো দেবাঃ অনয়া আহুত্যা তোষিতা অস্মান্ মুক্তান্ কুর্ব্বন্তু। তেভিরিতি বহুলং ছন্দসীতি ঐসাদেশনিষেধঃ।

(ঙ) হে বরুণ! উত্তমং পাশং অস্মৎ অস্মত্তঃ উৎশ্লথা উৎশ্লথয় উৎ ঊর্দ্ধং শ্লথং কৃত্বা নয়। অধমং পাশং অবশ্লথয় অব নীচং শ্লথয়। পূর্ব্ববত্তদেবং মধ্যমমুত্তমাধময়োরন্তর্দ্বিশ্রথয় স্বস্থান এব বিশেষেণ শ্রথয়। অথৈবং সতি হে আদিত্য অদিতেঃ পুত্র! বরুণ! তব ব্রতে কর্ম্মণি বর্ত্তমানা বয়ম্ অনাগসঃ অনপরাধাঃ সন্তঃ অদিতয়ে অদীনতায়ৈ স্যাম অদীনা ভবেম ইতি। অয়মর্থঃ—বরুণে উত্তমাধমমধ্যমপাশত্রয়শ্লথীকরণমভ্যর্থ্য বারুণব্রতাচরণেনাদীনা ভবেম ইত্যাশংসা।

কৃত্বা ওঁ দিগ্‌ভ্যঃ স্বাহা ওঁ চন্দ্রমসে স্বাহা। শেষং প্রাগ্‌বৎ। নবাহুতীর্হুত্বা ব্রহ্মণোঽন্বারব্ধো মহাব্যাহৃত্যাদি-স্বিষ্টকৃদন্তা দশাহুতীর্হুত্বা (বর্হির্হোমং সমাপ্য ইতি পশুপতিমতে) সংস্রবং প্রাশ্যাচম্য ব্রহ্মণে পূর্ণপাত্র-বরয়োরন্যতরং দক্ষিণাং দত্ত্বা ব্রহ্মচারিণং বেদমধ্যাপয়েৎ। যথা—গুরুরগ্নেরুত্তরতঃ প্রাঙ্মুখ উপবিষ্টঃ প্রত্যঙ্মুখায় দক্ষবামকরাভ্যাং গুরোর্দক্ষিণ-বামপাদৌ গৃহীত্বা গুরুমুখং সমীক্ষমাণায় ওঁকারমহাব্যাহৃতিপূর্ব্বিকাং গায়ত্রীং মাণবকেন সার্দ্ধং পঠিত্বা। ওঁ ইষে ত্বোর্জ্জে ত্বা বায়বঃ স্থ। দেবো বঃ সবিতা প্রার্পয়তু। শ্রেষ্ঠতমায় কর্ম্মণে (ইতি যজুর্ব্বেদাদিমন্ত্রঃ) এবং ক্রমেণ ওঁ অগ্নিমীলে পুরোহিতং। যজ্ঞস্য দেবমৃত্বিজং। হোতারং রত্নধাতমম্। (ইতি সামবেদাদিঃ)। ওঁ অগ্ন আয়াহি বীতয়ে। গৃণানো হব্যদাতয়ে। নিহোতা সৎসি বর্হিষি। (ইতি ঋগ্‌বেদাদিঃ)। ওঁ শন্নো দেবীরভিষ্টয়ে। আপো ভবন্তু পীতয়ে। শং যোরভিস্রবন্তু নঃ। (ইতি অথর্ব্ববেদাদি।) ইমান্ মন্ত্রান্ পাঠয়েৎ প্রথমং পাদাবচ্ছেদেন। দ্বিতীয়ে অর্দ্ধাবচ্ছেদেন। তৃতীয়ে সহৈব সর্ব্বাম্ ঋচং পঠন্ মাণবকং পাঠয়েৎ। (ততঃ প্রণবমুচ্চার্য্য ভূমিং স্পৃষ্ট্বা বিরমেদিতি পশুপতিঃ) ততঃ শান্ত্যুদকং কৃত্বা শিষ্যমভিষিচ্যাশীর্ব্বাদং বিধায়াচ্ছিদ্রাবধারণং কৃত্বা অনধ্যায়বর্জ্জং শিষ্যং পাঠয়েৎ। ইতি বেদারম্ভঃ।

## অথ সমাবর্ত্তনম্

তত্র মাণবকো বেদং বেদৌ বেদান্ বা সমাপ্য গুরবে দক্ষিণাং দত্ত্বা আচার্য্যাহং স্নাস্যে ইত্যনুমতিং গৃহ্ণীয়াৎ। গুরুঃ স্নাহীত্যনুজ্ঞাং দত্ত্বা বহিঃশালায়াং কৃতনিত্যকৃত্যঃ সগণেশ-গৌর্য্যাদি-মাতৃকাপূজা-বসুধারা-বৃদ্ধিশ্রাদ্ধানি বিধায় স্বগৃহ্যোক্তবিধিনাঽ(লৌকিক)গ্নিং স্থাপয়েৎ। ততো দ্রব্যাসাদনে ত্বয়ং বিশেষঃ। শুচিজলপূর্ণাশ্চূতপল্লবাস্যাঃ সকুশা অষ্টৌ কলসাঃ ঔডুম্বরদ্বাদশাঙ্গুলদন্তকাষ্ঠম্ অনুলেপনার্থং পিষ্টতিলপিণ্ডং সুগন্ধি দ্রব্যং পরিধেয়োত্তরীয়ং বাসোযুগ্মম্ উষ্ণীষং যজ্ঞোপবীতদ্বয়ং পরিধেয়পুষ্পং সৌবর্ণকুণ্ডলদ্বয়ম্ অঞ্জনং দর্পণং ছত্রং পাদুকাযুগ্মং বৈণবো দণ্ডঃ, কুশাঃ দধি নাপিতশ্চেতি। ততো ব্রহ্মোপবেশনাদি আজ্যভাগান্তং কর্ম্ম নির্বর্ত্ত্য ব্রহ্মণোঽন্বারম্ভত্যাগং বিধায় বেদারম্ভবৎ স্ববেদাদিক্রমেণ বেদাহুতীর্জুহুয়াৎ। ততো ব্রহ্মণোঽন্বারব্ধো মহাব্যাহৃত্যাদিস্বিষ্টকৃদন্তা দশাহুতীর্হুত্বা অগ্নে ত্বং তেজোনামাসীতি নাম কৃত্বা গন্ধাদিভিরভ্যর্চ্চ্য সংস্রবং প্রাশ্যাচম্য ব্রহ্মণে দক্ষিণাং পূর্ণপাত্র-বরয়োরন্যতরং দদ্যাৎ।

অথ ব্রহ্মচারী উপসংগ্রহণপূর্ব্বকং গুরুং নমস্কৃত্য পূর্ব্ববৎ সমিদাধানাদি-ত্র্যায়ুষ-করণান্তমস্মিন্নগ্নৌ সমিদাধানং কুর্য্যাৎ। ততোঽগ্নেরুত্তরে আচার্য্যপুরুষ-স্থাপিতানাং দক্ষিণোত্তরায়তানামষ্টানাং জলপূর্ণকলসানাং পূর্ব্বভাগে আস্তৃতেষু প্রাগগ্রেষু কুশেষু উদঙ্মুখো মাণবকঃ স্থিত্বা ওঁ যেঽপ্স্বন্তরগ্নয়ঃ প্রবিষ্টা গোহ্য উপ-গোহ্যো ময়ূখো মনোহা খলো বিরুজস্তনূদূষিরিন্দ্রিয়হা তান্ বিজহামি (অতিতান্ সৃজামি ইতি পাঠান্তরম্) যো রোচনস্তমিহ গৃহ্লামি। (১) ইতি মন্ত্রেণ দক্ষিণক্রমেণ প্রথমকলসাৎ দক্ষিণহস্তচুলুকেন জলমাদায়ানেন মন্ত্রেণাত্মানমভিষিঞ্চতি—ওঁ তেন মামভিষিঞ্চামি শ্রিয়ৈ যশসে ব্রহ্মণে ব্রহ্মবর্চ্চসায়। (২) ততো দ্বিতীয়াদিজল-কুম্ভেভ্যঃ—ওঁ যেঽপ্স্বন্তরগ্নয়ঃ ইত্যাদিমন্ত্রেণ একৈকস্মাজ্জলমাদায় ওঁ যেন শ্রিয়মকৃণুতাং যেনাবমৃশতাং সুরাম্। যেনাক্ষ্যাবভ্যষিঞ্চতাং যদ্বাং তদশ্বিনা যশঃ। (৩) ইতি দ্বিতীয়কলসজলেনাভিষেচনম্। ওঁ আপো হি ষ্ঠা ময়ো ভুবস্তা ন ঊর্জ্জে দধাতন মহে রণায় চক্ষসে ইতি তৃতীয়কলসজলেন। ওঁ যো বঃ শিবতমো রসস্তস্য ভাজয়তে হ নঃ। উশতীরিব মাতরঃ। ইতি চতুর্থকলসজলেন। ওঁ তস্মা

---

(১) অপ্সু জলেষু অন্তর্মধ্যে যেঽগ্নয়ঃ প্রবিষ্টাস্তান্ বিজহামি ত্যজামি। তে কে? গোহ্যঃ উপগোহ্যঃ ময়ূখঃ মনোহাঃ খলো বিরুজঃ তনূদূষিঃ ইন্দ্রিয়হা ইত্যষ্টৌ অগ্নিনামানি। ইহ জলে যোঽগ্নিঃ রোচনঃ রোচননামা কল্যাণ-নামা তং গৃহ্লামি। স্নানার্থং জলে গৃহ্যমাণে জলে অগ্নয়স্তিষ্ঠন্তি তেষু মধ্যে গোহ্যাদয়ো দোষাবহাস্তান্ বিহায় কল্যাণপ্রকাশকাগ্নিসহিতং জলং গৃহ্লামীতি বাক্যার্থঃ।

(২) শ্রিয়ৈ লক্ষ্মীলাভায় যশসে যশোলাভায় ব্রহ্মণে ব্রহ্মবর্চ্চসায় ব্রাহ্ম-তেজোলাভায় চাহং মাম্ আত্মানং তেন জলেন অভিষিঞ্চামি।

(৩) কেন? যেন জলেন হে অশ্বিনা! অশ্বিনৌ! ভবন্তৌ শ্রিয়ং লক্ষ্মীং অকৃণুতাং কৃতবন্তৌ। তথা যেন সুরাং সুরাজনিতং দোষমবমৃশতাং মার্জ্জিতবন্তৌ। তথা যেনাক্ষ্যৌ অক্ষিণী অভ্যষিঞ্চতাম্ অভিষিক্তবন্তৌ। তথা বাং যুবয়োঃ যজ্জলং যশো যশোহেতুকং তজ্জলং মমাস্ত্ব ইত্যধ্যাহার্য্যম্। যেন জলেন অশ্বিনীকুমারয়োর্লক্ষ্মীর্জনিতা সুরাদোষশ্চ মার্জ্জিতঃ চক্ষুরভিষিচ্য দিব্যং কৃতং তয়োরিত্থমভ্যুদয়কারণং যজ্জলং তেনাভিষেকান্মম লক্ষ্মীযশোজ্ঞান-ব্রহ্মতেজাংসি ভবন্বিত্যাশংসাবাক্যার্থঃ।

অরঙ্গমাম বো যস্য ক্ষয়ায় জিন্বথ। আপো জনয়থা চ নঃ ইতি পঞ্চমকলস-জলেনাভিষেচনম্। ইতরেষাং ত্রয়াণাং কলসানাং জলেন তূষ্ণীমভিষেচনানি। ততো মাণবকঃ শিরোমার্গেণ মেখলামুন্মোচয়েৎ অনেন মন্ত্রেণ—ওঁ উদুত্তমং বরুণপাশমস্মদবাধমং বিমধ্যমং শ্রথায় অথাবয়মাদিত্যব্রতে তবানাগসো অদিতয়ে স্যাম ইতি মন্ত্রেণ তাং মেখলাং (শিরোমার্গেণ নিঃসার্য্য বৈল্বং দণ্ডমগ্নৌ প্রক্ষিপ্যেতি পশুপতিমতম্) ভূমৌ নিধায় দণ্ডকৌপীনমপি তূষ্ণীং ভূমৌ সংস্থাপয়েৎ। অন্তর্বাসঃ পরিধায়াচম্যাদিত্যমুপতিষ্ঠতে। ওঁ উদ্যন্ ভ্রাজভৃষ্ণুরিন্দ্রো মরুদ্ভিরস্থাৎ প্রাতর্যাবভিরস্থাদ্দশসনিরসি দশসনিং মা কুর্ব্বা বিদন্মাগময়। ওঁ উদ্যন্ ভ্রাজভৃষ্ণুরিন্দ্রো মরুদ্ভিরস্থাদ্দিবা যাবভিরস্থাৎ শতসনি-রসি শতসনিং মা কুর্ব্বা বিদন্মাগময়। ওঁ উদ্যন্ ভ্রাজভৃষ্ণুরিন্দ্রো মরুদ্ভিরস্থাৎ সায়ং যাবভিরস্থাৎ সহস্রসনিরসি সহস্রসনিং মা কুর্ব্বা বিদন্মাগময়। (৪) ইত্যাদি-ত্যোপস্থানমন্ত্রঃ। ততো মাণবকঃ দধি-তিলান্ বা দক্ষিণ-হস্তগতসোমতীর্থেন কেশেষু ম্রক্ষয়িত্বা জটালোমনখানি বাপয়িত্বা স্নাত্বাচম্য পূর্ব্বাসাদিতদন্তকাষ্ঠেন দন্তধাবনং কুর্য্যাদনেন মন্ত্রেণ—ওঁ অন্নাদ্যায় বূ্যহধ্বং সোমো রাজায়মাগমৎ। স মে মুখং প্রমার্ক্ষ্যতে যশসা চ ভগেন চ। তত আচম্য সুগন্ধিদ্রব্যমিশ্রি-তেন যবাদিচূর্ণেন তৈলসমন্বিতেন শরীরমুদ্বর্ত্ত্য পুনঃ সশিরস্কং স্নাত্বাচম্য চন্দনাদ্যনুলেপনং পাণিভ্যাং গৃহীত্বা মুখং নাসিকাঞ্চালভতে এভির্মন্ত্রৈঃ। ওঁ প্রাণাপানৌ মে তর্পয় চক্ষুর্মে তর্পয় শ্রোত্রং মে তর্পয় (৫) ইতি। ততঃ পাণ্যোঃ

---

(৪) ইন্দ্রঃ আদিত্যঃ উদ্যন্ উদয়ং কুর্ব্বন্ অস্থাৎ স্থিতো বভূব। কিম্ভূতঃ? ভ্রাজভৃষ্ণুঃ ভ্রাজং রশ্মিং বিভর্ত্তীতি প্রাতঃ প্রত্যূষসি মরুদ্ভিঃ দেবৈঃ সহ অস্থাৎ। কিম্ভূতৈঃ? যাবভিঃ যাবন্তো দেবাস্তৈঃ সর্ব্বৈঃ সহ স্থিতো বভূবেতি। হে বিদন্! সর্ব্বং জানন্ আদিত্য! ত্বং দশসনিরসি বহুধনো ভবসি অতো মা মাং দশসনিং বহুধনং কুরু। কিঞ্চ মা মাং ব্রহ্মচর্য্যাদুত্তীর্ণমাগময় জানীহি। দ্বিতীয়তৃতীয়পাঠয়োশ্চ দিবা যাবদ্ভিঃ সায়ঞ্চ যাবদ্ভিঃ শতসনিরসি সহস্রসনিরসি, শতসহস্রশব্দৌ বহুবাচিনৌ। আদিত্যঃ কালত্রয়েঽপি রশ্মীন্ ধারয়ন্ দেবৈঃ সর্ব্বৈঃ সহ স্থিতো বভূবেতি তমুৎকীর্ত্ত্য মাং বহুধনং কুরু ব্রহ্মচর্য্যাদুত্তীর্ণং জানীহি চেতি ঋচঞাবাক্যার্থঃ।

(৫) হে অনুলেপন! মে মম প্রাণাপানৌ শরীরবায়ূ চক্ষুঃ শ্রোত্রঞ্চ তর্পয়েতি। অপরং সুগমম্।

প্রক্ষালনজলাঞ্জলিমাদায় অপসব্যং কৃত্বা দক্ষিণামুখো ভূত্বা দক্ষিণস্যাং দিশি ওঁ পিতরঃশুন্ধধ্বং (৬) ইত্যনেন মন্ত্রেণ ভূমৌ নিষিঞ্চেৎ পিতৃতীর্থেন। * অথ যজ্ঞোপবীতী ভূত্বা অপ উপস্পৃশ্য চন্দনাদিনা আত্মানমনুলিপ্য এতন্মন্ত্রং জপতি—ওঁ সুচক্ষা অহমক্ষীভ্যাং ভূয়াসꣳ সুবর্চ্চা মুখেন সুশ্রুৎ কর্ণাভ্যাং ভূয়াসম্। (৭) ততো মাণবকঃ অহতং বাসঃ পরিদধাত্যনেন মন্ত্রেণ—ওঁ পরিধাস্যৈ ( পরিধাস্যে ) যশোধাস্যৈ (যশোধাস্যে) দীর্ঘায়ুত্বা(ত্বা)য় জরদষ্টিরস্মি শতঞ্চ জীবামি শরদঃ পুরুচী রায়স্পোষমভিসংব্যয়িষ্যে। (৮) ইতি। ততো মাণবকঃ উত্তরীয়ং বাসঃ অনেন মন্ত্রেণ পরিদধ্যাৎ—ওঁ যশসা মা দ্যাবাপৃথিবী যশসেন্দ্রাবৃহস্পতী যশো ভগশ্চ মা বিদদ্যশো মা প্রতিপদ্যতামিতিমন্ত্রেণ। (৯) ততো যজ্ঞোপবীতমিত্যাদিনা যজ্ঞোপবীতদ্বয়ং ধারয়েৎ। পূর্ব্বস্থিতযজ্ঞোপবীতমুত্তার্য্য জলে নিক্ষিপেৎ। ততঃ পুষ্পাঞ্জলিং গৃহ্নাত্যনেন মন্ত্রেণ—ওঁ যা আহরজ্জমদগ্নিঃ শ্রদ্ধায়ৈ মেধায়ৈ †

---

(৬) হে পিতরঃ! শুন্ধধ্বং শোধয়ত মামিতি অধ্যাহার্য্যম্।

(৭) অহম্ অক্ষীভ্যাং সুচক্ষা ভূয়াসং শোভনদৃষ্টিঃ সুচক্ষাঃ, মুখেন সুবর্চ্চাঃ শোভনদীপ্তিঃ, কর্ণাভ্যাং সুশ্রুৎ সুশ্রুতঃ শোভনশ্রাবী।

(৮) পরিধাস্যে পরিধানং করিষ্যামি, পরিধায় যশঃকীর্ত্তিং ধাস্যে ধারয়িষ্যামি অপি দীর্ঘায়ুত্বায় দীর্ঘায়ুষ্ট্বার্থং, কিঞ্চ জরদষ্টিরস্মি জরা বার্দ্ধকমশ্নুতে ব্যাপ্নোতীতি বৃদ্ধো ভবামীতি, কিঞ্চ শোভনদীপ্তিঃ সন্ শরদঃ শতং জীবামি, রায়স্পোষম্ ধনবৃদ্ধার্থং চতুর্থ্যর্থে দ্বিতীয়া, এতাবদ্ভিঃ প্রয়োজনৈঃ অভিসংব্যয়িষ্যে সর্ব্বতোভাবেন সম্বরণং করিষ্যামি।

(৯) দ্যাবাপৃথিবী দ্যাবাপৃথিব্যৌ মা মাং ছাদয়তাম্ ইতি ক্রিয়াপদমধ্যাহার্য্যম্। কেন? যশসা। কিঞ্চ ইন্দ্রাবৃহস্পতী যশসা মাং ছাদয়তাং, কিঞ্চ যশো মা মাম্ অবিদৎ প্রাপ্নোতু, ন কেবলং যশো ভগশ্চ মামবিদৎ প্রাপ্নোতু, কিঞ্চ যশো মা মাং প্রতিপদ্যতাম্ অভিগচ্ছতু। পুনঃ পুনরভিধানমাদরার্থম্।

---

* এতৎ তর্পণং জীবৎপিতৃকেনাপি কর্ত্তব্যং সামান্যতো বিহিতত্বাৎ। ইতি ধ্যেয়ম্।
† গৃহ্যসূত্রে 'মেধায়ৈ' ইতি ন ধৃতম্।

কামায়েন্দ্রিয়ায় ত্বা অহং প্রতিগৃহ্লামি যশসা চ ভগেন চ। (১০) ইতি। ততো মাল্যং পরিদধাত্যনেন মন্ত্রেণ—ওঁ যদ্ যশোঽপ্সরসামিন্দ্রশ্চকার বিপুলং পৃথু। তেন সংগ্রথিতাঃ সুমনস আবধ্নামি যশো ময়ি। (১১) ইতি শিরসি বদ্ধা উষ্ণীষং বধ্নাত্যনেন মন্ত্রেণ—ওঁ যুবা সুবাসাঃ পরিবীত আগাৎ স উ শ্রেয়ান্ ভবতি জায়মানঃ। তং ধীরাসঃ কবয় উন্নয়ন্তি স্বাধ্যো মনসা দেবয়ন্তঃ। (১২) ততঃ সুবর্ণকুণ্ডলাদ্যলঙ্করণাদি ধারয়েদনেন মন্ত্রেণ—ওঁ অলঙ্করণমসি ভূয়ো অলঙ্করণং মে ভূয়াঃ ( ভূয়াদিতি গৃহ্যসূত্রপাঠঃ )। (১৩) ইতি দক্ষিণকুণ্ডলং ধৃত্বা অনেনৈব বামকর্ণে পরিধায় চক্ষুষী অঞ্জয়তি অনেন মন্ত্রেণ—ওঁ বৃত্রস্যাসি কনীনিকাশ্চক্ষুর্দা অসি চক্ষুর্মে দেহি। (১৪) ইতি দক্ষিণং অঙ্‌ক্ত্বা তথৈব

---

(১০) যাঃ পুষ্পমালাঃ জমদগ্নিঃ আহরৎ আহৃতবান্ গৃহীতবান্। কিমর্থম্? শ্রদ্ধায়ৈ এবমেবেতি বেদে প্রত্যয়ঃ শ্রদ্ধা তদর্থং, মেধায়ৈ ধিয়ে, কামায় অভিলষিতসিদ্ধ্যর্থং, ইন্দ্রিয়ায় চক্ষুরাদিসিদ্ধ্যর্থং, যশোঽর্থং ভাগ্যার্থং, ত্বা অহং প্রতিগৃহ্লামি।

(১১) ইন্দ্রোঽপ্‌সরসাং স্বর্বেশ্যাদীনাং যদ্‌যশঃ উর্ব্বশীপ্রভৃতয়ো রূপবত্য ইত্যেবংরূপং যদ্‌যশঃ বিপুলং বিস্তীর্ণং চকার কৃতবান্। কিম্ভূতং? পৃথু বহুতরং, তেন যশসা সংগ্রথিতাঃ সম্যক্ গ্রথিতাঃ সুমনসঃ পুষ্পাণি ময়ি আবধ্নামি। কিমর্থং? যশো যশসে, মমাপি অপ্‌সরসামিব রূপপ্রাপ্তয়ে ইন্দ্রেণাপ্‌সরসাং রূপবত্তয়া যদ্‌যশঃ কৃতং তেন যশসা সূত্রস্থানীয়েন গ্রথিতানি পুষ্পাণি মমাপি রূপবত্তয়া যশো ভবতু এতদর্থম্ মাল্যং ধারয়ামি ইতি বাক্যার্থঃ।

(১২) যো যুবা পরিবীতঃ বস্ত্রবেষ্টিতঃ আগাৎ আগতবান্ শ্রেয়ান্ শ্রেষ্ঠো ভবতি উ ছান্দসঃ স্তোত্রার্থঃ। কিম্ভূতং? সুবাসাঃ শোভনবস্ত্রধারী জায়মানঃ তং যুবানং ধীরাসঃ পণ্ডিতাঃ কবয়ঃ কীর্ত্তিবক্তারঃ স্বাধ্যঃ সুষ্ঠু আহিতা ধীর্যেষাং তে সুবুদ্ধয়ঃ মনসা হৃদয়েন দেবয়ন্তঃ স্তবন্তঃ উৎকীর্ত্তয়ন্তি।

(১৩) হে কর্ণকুণ্ডল! অলঙ্করণমসি ভূষাসাধনং ভবসি ইতি তব স্বরূপম্। অতো ভূয় উত্তরোত্তরম্ অলঙ্করণং মম ভূষণং ভূয়াঃ।

(১৪) হে অঞ্জন! বৃত্রস্যাসুরস্য কনীনিকা অক্ষিতারকাসি ততশ্চক্ষুর্দা অসি ত্বমন্যেষাং চক্ষুর্দাসি অতো মে মহ্যং চক্ষুর্দেহি। যতঃ বৃত্রাসুরস্যাক্ষি-তারকোৎপন্নম্ অঞ্জনং অতস্ত্বদীয়াঞ্জনেনান্যেষামপি অক্ষিপ্রকাশং কুরু।

ধামমজ্যাৎ। ওঁ রোচিষ্ণুরসি। (১৫) ইতি আদর্শে মুখং বিলোক্য ছত্রং গৃহ্ণাত্য-
নেন মন্ত্রেণ—ওঁ বৃহস্পতেশ্ছদিরসি পাপ্মনো মামন্তর্ধেহি তেজসো যশসো
মামন্তর্ধেহি। (১৬) ততঃ স্বপাদয়োরুপানহৌ দধাত্যনেন মন্ত্রেণ—ওঁ প্রতিষ্ঠে
স্থো বিশ্বতো মা পাতম্। (১৭) ততো বৈণবং দণ্ডমাদত্তে অনেন মন্ত্রেণ—ওঁ
বিশ্বাভ্যো মা নাষ্ট্রাভ্যঃ পরিপাহি সর্ব্বতঃ ইতি। (১৮) ততঃ পূর্ণহোমং সমাপ্য
গুরুর্যথাচারমঙ্গলং কৃত্বা (সুমিত্রিয়া ন ইত্যাদিনাভিষেচনং পশুপতিমতে)
শান্ত্যুদকৈঃ শিষ্যমভিষিচ্যাশীর্ব্বাদং কৃত্বা অচ্ছিদ্রাবধারণং কুর্য্যাৎ। ততো
মাণবকো গুরবে বৃষমূল্যোপকল্পিতং বৃষং বা দক্ষিণাং দত্ত্বা গুরূক্তস্নাতক-
যমনিয়মান্ আচরেৎ। ইতি সমাবর্ত্তনম্।

ইতি-রাজপণ্ডিত-পশুপতিকৃতা গৃহ্যসূত্রানুমোদিতা দশকর্ম্মপদ্ধতিঃ
বাশিষ্ঠশ্রীনারায়ণ-তর্কবাগীশরচিতা ব্রহ্মসংস্কারমঞ্জরী চ সম্পূর্ণা।

---

(১৫) হে দর্পণ! রোচিষ্ণুরসি প্রকাশশীলোঽসি, অতো মাং সর্ব্বত্র প্রকাশনশীলং কুরু।

(১৬) হে ছত্র! ত্বং বৃহস্পতেশ্ছদিরাবরণমসি, অতঃ পাপ্মনঃ মাম্ অন্তর্ধেহি আবৃতং কুরু। যথা মে পাপসম্বন্ধোঽপি ন ভবেৎ, তথা কুরু। ন কেবলং পাপাদপি তু তেজসঃ আদিত্যতাপাৎ রক্ষ। কিমর্থং? যশসঃ যশসে। যতস্ত্বং বৃহস্পতেরপি পাপসন্তাপাদিবারণমতো মামপি তেভ্যোঽন্তর্দ্ধায় যশস্বিনং কুরু।

(১৭) হে উপানহৌ! যুবাং প্রতিষ্ঠে স্থঃ উপক্রান্তগতিক্রিয়ায়া অত্যাগঃ প্রতিষ্ঠা তন্নিমিত্তত্বাৎ যুবামেব প্রতিষ্ঠে স্থঃ ভবথঃ, ততো মা মাং পাতম্ রক্ষতম্। কুতঃ? বিশ্বতঃ সর্ব্বস্মাৎ গতিবিরোধিনঃ কণ্টকাদেঃ।

(১৮) হে বৈণবদণ্ড! মা মাং পরিপাহি। কুতঃ? নাষ্ট্রাভ্যঃ নাশকারিণীভ্যঃ। কিম্ভূতাভ্যঃ? বিশ্বাভ্যঃ সর্ব্বাভ্যঃ রাক্ষসাদিভ্যঃ। সর্ব্বতঃ সর্ব্বাসু দিক্ষু ইত্যর্থঃ।

ইতি হলায়ুধোক্ত-যজুঃ-সংস্কার-মন্ত্র-ব্যাখ্যা।

# ঋগ্‌বেদীয়-দশসংস্কারপদ্ধতিঃ

## ( কালেশিকৃতা গৃহ্যসূত্র-বাসুদেব-সম্মতা চ )

### অথ সর্ব্বসাধারণী কুশণ্ডিকা

তত্র কর্ত্তা প্রাঙ্মুখ উপবিশ্য ইষুমাত্রাবরং * স্থণ্ডিলং বিধায় সর্ব্বতো গোময়েনোপলিপ্য যজ্ঞিয়শকলমূলেন ( কুশমূলেন ) প্রাদেশমাত্রাঃ ষড় রেখা উল্লিখেৎ। † যথা একা উদগগ্রা প্রাদেশমাত্রা অগ্নিপ্রতিষ্ঠাপনদেশস্য পশ্চাৎ, তস্যা উপরি অন্তয়োর্দ্ধে প্রাগগ্রে অসংশ্লিষ্টে, মধ্যে তিস্রঃ প্রাগগ্রাঃ সর্ব্বাঃ প্রাদেশপ্রমাণা অসংশ্লিষ্টা রেখাঃ কার্য্যাঃ। উল্লেখনশকলং তত্রৈব নিধায় তাশ্চাদ্ভিরভ্যুক্ষ্য শকলমাগ্নেয্যাং নিরস্য ‡ অপ উপস্পৃশ্য বাগ্-যতো ভবেৎ। ততোঽগ্নিমুভাভ্যাং পাণিভ্যাং গৃহীত্বা যথা—অয়ন্তে যোনিরিত্যস্য বিশ্বামিত্রঋষিরগ্নির্দেবতা অনুষ্টুপ্ ছন্দোঽগ্ন্যারোপণে ( সমিৎসমারোপণে ) বিনিয়োগঃ। ওঁ অয়ন্তে যোনিঋর্ত্বিয়ো যতো জাতো অরোচথাঃ। তং জানন্নগ্ন আসীদাথানো বর্দ্ধয়া গিরঃ। ইত্যগ্নি-মুপনয়েৎ। ক্রব্যাদমগ্নিমিত্যর্দ্ধর্চ্চস্য বিশ্বামিত্রঋষিরগ্নির্দেবতা ত্রিষ্টুপ্ ছন্দো পূর্ব্বার্দ্ধেন ক্রব্যাদাংশপরিত্যাগে বিনিয়োগঃ। ওঁ ক্রব্যাদমগ্নিং প্রহিণোমি দূরং যমরাজ্ঞো গচ্ছতু রিপ্রবাহঃ ইত্যগ্নের্দক্ষিণস্যাং দিশি নিক্ষিপেৎ। ইহৈবায়মিত্যর্দ্ধর্চ্চস্য বিশ্বামিত্রঋষিরগ্নির্দেবতা ত্রিষ্টুপ্ ছন্দো উত্তরার্দ্ধেনাগ্নি-গ্রহণে বিনিয়োগঃ। ওঁ ইহৈবায়মিতরো জাতবেদা দেবেভ্যো হব্যং বহতু প্রজানন্। ইতি জ্বলদগ্নিং গৃহীত্বা জুষ্টোদমূনা ইত্যস্য বসুশ্রুতঋষিরগ্নি-র্দেবতা ত্রিষ্টুপ্ ছন্দোঽগ্নিস্থাপনে বিনিয়োগঃ। ওঁ জুষ্টোদমূনা অতিথি-র্দুরোণ ইমং নো যজ্ঞমুপযাহি বিদ্বান্। বিশ্বা অগ্নে অভিযুজো বিহত্যা শত্রূয়তা মা ভরা ভোজনানি। ওঁ ভূর্ভুবঃস্বঃ ¶ ইত্যনেন মন্ত্রেণোপরি স্থাপয়েৎ। ততঃ প্রচুরতরকাষ্ঠাদিনাঽগ্নিমুপবৃংহয়েৎ যথা

---

* শরপরিমাণান্যূনমিত্যর্থঃ।

† স্থণ্ডিলমধ্যদেশাপেক্ষয়া দক্ষিণেঽষ্টৌ প্রতীচ্যাং চত্বারি উদীচ্যাং দ্বে অঙ্গুলানি ত্যক্ত্বা রেখাঃ কুর্য্যাৎ।

‡ প্রাচ্যাং বা ইতি হস্তলিখিতপুস্তকেষু দৃশ্যতে, পরিশিষ্টকৃতা অধৃতত্বাৎ তদুপেক্ষিতম্।

¶ অগ্নে জুষস্ব নো হবিঃ পুরোডাশং জাতবেদঃ প্রাতঃ সাবেধিয়াবসো ইত্যধিকো মন্ত্রঃ কুত্রচিৎ পুস্তকে দৃশ্যতে।

কর্ম্মসমাপ্তিপর্য্যন্তং স্থিরো ভবতি। ততোঽগ্নিমাবাহয়েৎ। এহ্যগ্ন ইত্যস্য রাহূগণো গোতমঋষিরগ্নির্দেবতা ত্রিষ্টুপ্ ছন্দোঽগ্ন্যাবাহনে বিনিয়োগঃ। ওঁ এহ্যগ্ন ইহ হোতা নিষীদাদব্ধঃ সুপুর এতা ভবানঃ। অবতাং ত্বা রোদসী বিশ্বমিম্বে যজামহে সৌমনসায় দেবান্। ইত্যাবাহ্য ওঁ এষো হ দেবঃ প্রদিশোঽনু সর্ব্বাঃ পূর্ব্বো হ জাতঃ স উ গর্ভে অন্তঃ। স এব জাতঃ স জনিষ্য-মাণঃ প্রত্যঙ্জনস্তিষ্ঠতি সর্ব্বতোমুখঃ। * ইতি মন্ত্রেণ জলগণ্ডূষং গৃহীত্বা প্রদক্ষিণীকুর্ব্বন্নগ্নিং সম্মুখীকুর্য্যাৎ। ততোঽদ্যেত্যাদি অমুককর্ম্মাঙ্গী-ভূতহোমকর্ম্মাহং করিষ্যে ইতি সঙ্কল্প্য ধ্যায়েদ্‌যথা—[ সপ্তহস্ত ইত্যস্য বামদেবঋষিরগ্নির্দেবতা ত্রিষ্টুপ্ ছন্দো ( অনুষ্টুপ্ ছন্দঃ ) ঽগ্নিধ্যানে বিনি-য়োগঃ ] ( কেচিদিতি ঋষিচ্ছন্দোদেবতাঃ পঠন্তি )। ওঁ সপ্তহস্তশ্চতুঃশৃঙ্গঃ সপ্তজিহ্বো দ্বিশীর্ষকঃ। ত্রিপাৎ প্রসন্নবদনঃ সুখাসীনঃ শুচিস্মিতঃ। স্বাহান্তু দক্ষিণে পার্শ্বে দেবীং বামে স্বধাস্তথা। বিভ্রদ্দক্ষিণহস্তৈস্তু শক্তিমন্নং স্রুবং স্রুচম্। তোমরং ব্যজনং বামৈর্ঘৃতপাত্রঞ্চ ধারয়ন্। আত্মাভিমুখমাসীন এবংরূপো হুতাশনঃ। † ইতি ধ্যাত্বা যথোক্তনাম্না অগ্নিমাবাহ্য পাদ্যাদ্যুপচারৈঃ পূজয়েৎ। ততঃ প্রাদেশমাত্রে ঘৃতাক্তসমিধৌ ‡ প্রজাপতিং মনসা ধ্যাত্বা তূষ্ণীমগ্নৌ ক্ষিপেৎ। ¶ ততঃ পরিসমূহনম্। যথা—অগ্নিস্থানাদষ্টাঙ্গুলপরিমিতে দেশে ঐশানীং দিশমারভ্য দক্ষিণাদিক্রমেণ উত্তরাং দিশং যাবৎ সোদকেন পাণিনা ত্রিঃ পরিমার্জ্জনং কুর্য্যাৎ। পর্য্যুক্ষণম্ অগ্নেঃ পূর্ব্বত আরভ্য দক্ষিণাদিক্রমেণ উত্তরং যাবৎ সোদকেন পাণিনা অগ্নেস্ত্রিঃ পর্য্যুক্ষণং কার্য্যম্। যথা হোমীয়দ্রব্যমপি পর্য্যুক্ষিতং ভবতি। অথ পরিস্তরণম্। সাগ্রান্ দর্ভানাদায়াগ্নেঃ সকাশাদষ্টাঙ্গুলপরিমিতে দেশে প্রাচ্যামুদগগ্রৈর্দক্ষিণস্যাং প্রাগগ্রৈঃ প্রতীচ্যামুদগগ্রৈরুদীচ্যাং প্রাগগ্রৈর্দর্ভৈস্ত্রিস্ত্রিঃ পরিস্তৃণীয়াৎ। অথ ব্রহ্মবরণম্। যথাশক্তি ব্রহ্মবরণং কুর্য্যাৎ। কুশময়ব্রহ্মপক্ষে

---

* বিশ্বতোমুখ ইতি পাঠান্তরম্।

† চত্বারি ওঁ শৃঙ্গা ইত্যাদি শ্রোতোধ্যানমন্ত্রং কেচিদ্‌ব্যবহরন্তি।

‡ কচিৎ পুস্তকে অত্র মন্ত্রো বিহিতো যথা—ওঁ পূর্ণমসি পূর্ণং মে ভূয়াঃ সুপূর্ণমসি সুপূর্ণং মে ভূয়াঃ, সদসিসদ্মে ভূয়াঃ সর্ব্বমসি সর্ব্বং মে ভূয়াঃ অক্ষিতিরসি মামেক্ষেষ্ঠাঃ। প্রাচ্যাদ্দিশি দেবা ঋত্বিজো মার্জ্জয়ন্তাম্। দক্ষিণস্যাদ্দিশি মাসাঃ পিতরো মার্জ্জয়ন্তাং। প্রতীচ্যাদ্দিশি গ্রহাঃ পশবো মার্জ্জয়ন্তাম্। উদীচ্যাং আপ ওষধয়ো বনস্পতয়ো মার্জ্জয়ন্তাম্, ঊর্দ্ধে যজ্ঞঃ সম্বৎসরঃ প্রজাপতির্ম্মার্জ্জয়তাম্ ইতি।

¶ কচিৎ পুস্তকেঽত্রাগ্ন্যাধানং বিহিতম্। তচ্চ বাসুদেবপদ্ধত্যা অনুমোদিতম্।

ব্রহ্মবরণং নাস্তি। ব্রাহ্মণব্রহ্মপক্ষে ব্রহ্মা অগ্নেঃ পূর্ব্বেণ দক্ষিণদেশং গত্বা অগ্নের্দক্ষিণতঃ প্রাগগ্রাস্তীর্ণকুশোপরি কুশাসনং বিষ্টরং বা পরিকল্প্য প্রত্যঙ্মুখস্তিষ্ঠন্ অহেদৈধিম ব্যোদতস্তিষ্ঠান্নস্য সদনে সীদ যো অস্মৎ পাকতর ইত্যুচ্চার্য্য নিরস্ত ইত্যস্য প্রজাপতির্ঋষিঃ প্রজাপতির্দেবতা অনুষ্টুপ্ ছন্দঃ তৃণাদিনিরসনে বিনিয়োগঃ। ওঁ নিরস্তঃ পরাবসুঃ। ইত্যনেন ব্রহ্মাসনাৎ বামহস্তানামিকাঙ্গুষ্ঠাভ্যাং আস্তীর্ণকুশানাং কুশপত্রমেকং গৃহীত্বা নৈঋর্ত্যাং দিশি ক্ষিপেৎ। অথ অপ উপস্পৃশ্য ইদমহমিত্যস্য প্রজাপতির্ঋষিরনুষ্টুপ্ ছন্দোঽগ্নির্দেবতা ব্রহ্মোপবেশনে বিনিয়োগঃ। ওঁ ইদমহমর্ব্বাবসোঃ সদনে সীদামি ইতি জপেৎ। * কুশময়াদিপক্ষে হোতৈব ব্রহ্মকার্য্যং কুর্য্যাৎ। ততো হোতা গন্ধাদিভিস্তমর্চ্চয়েৎ অনেন মন্ত্রেণ—ব্রহ্মা দেবানামিত্যস্য দৈবোদাসি প্রতর্দ্দনঋষিস্ত্রিষ্টুপ্ ছন্দঃ পবমানসোমো দেবতা ব্রহ্মাসাদনে বিনিয়োগঃ। ওঁ ব্রহ্মা দেবানাং পদবীঃ কবীনামৃষির্বিপ্রাণাং মহিষো মৃগাণাম্। শ্যেনো গৃধ্রাণাং স্বধিতির্বনানাং সোমঃ পবিত্রমভ্যেতি রেভন্। ততো ব্রহ্মা প্রজাপতির্ঋষিরনুষ্টুপ্ ছন্দো ব্রহ্মা দেবতা ব্রহ্মজপে বিনিয়োগঃ। ওঁ বৃহস্পতির্ব্রহ্মা ব্রহ্মসদন আশিষ্যতে বৃহস্পতে যজ্ঞং গোপায় (স যজ্ঞং পাহি যজ্ঞপতিং পাহি স মাং পাহি ভূর্ভুবঃস্বঃ বৃহস্পতিপ্রসূতঃ।) ইতি জপেৎ। কুশময়ব্রহ্মপক্ষে হোতৈব এতজ্জপেৎ। ততঃ পাত্রাণামাসাদনম্ উদগগ্রেষু দর্ভেষু কুর্য্যাৎ। প্রোক্ষণীপাত্রং প্রণীতাপাত্রং আজ্যস্থালী-চরুস্থালী-দর্ব্বী-মেক্ষণ-কমণ্ডলুস্রুক্-স্রুব-বর্হিরিধ্মানি অন্যদ্ যাবদুপযুজ্যতে তস্যাপ্যাসাদনং কার্য্যম্। অথেধ্মানি পঞ্চদশ অরত্নিপ্রমাণানি পলাশোদ্ভবানি অসম্ভবে যজ্ঞীয়বৃক্ষোদ্ভবানি চ ততো নবকুশপত্রৈস্ত্রিগুণং কৃত্বা সকৃদ্বেষ্টিতরজ্জুদ্বয়ং কৃত্বা স্থাপয়েৎ। † ততো দ্বে দ্বে

---

* অত্র পরিশিষ্টমতম্। বৃতো ব্রহ্মা সমস্তপাণাঙ্গুষ্ঠো ভূত্বাগ্রেণাগ্নিং পরীত্য দক্ষিণত আস্তীর্ণেষু কুশেষু ওঁ নিরস্তঃ পরাবসুরিতি তৃণমঙ্গুষ্ঠোপকনিষ্ঠাভ্যাং নৈঋর্ত্যাং নিরস্যাপ উপস্পৃশ্য ওঁ ইদমহমর্ব্বাবসোঃ সদনে সীদামি ইতি। উদঙ্মুখ উপবিশ্য ওঁ বৃহস্পতির্ব্রহ্মা ব্রহ্মসদনমাশিষ্যতে বৃহস্পতে যজ্ঞং গোপায় ইতি মন্ত্রং জপেৎ।

† অথেধ্মাহিষী সন্নহ্য দর্ভৈঃ প্রাদেশমাত্রৈঃ ত্রিসন্ধী ত্রিবৃতৌ রজ্জূ কুর্য্যাৎ, পাণিভ্যাং সব্যোত্তরাভ্যাং পূর্ব্বং বর্ত্তয়েৎ, ততো দক্ষিণোত্তরাভ্যামন্তে প্রদক্ষিণাবৃতং রজ্জুং কুর্য্যাদেতৎ রজ্জুকরণম্। মতান্তরে রজ্জুকরণং যথা—প্রাদেশমাত্রান্ ষট্‌ত্রিংশদ্দর্ভান্ গৃহীত্বা ত্রিভিঃ ত্রিভিঃ (দ্বাদশভিঃ) কুশৈঃ সন্ধিত্রয়বতীং রজ্জুং প্রাদাক্ষিণ্যেন কৃত্বা পুনরন্যামেবং কৃত্বা উভয়মপি প্রাদক্ষিণ্যেন সমস্য পুনরন্যামেবং কৃত্বা প্রাদক্ষিণ্যেন ত্রিবৃতাং সমস্যান্তে প্রদক্ষিণগ্রন্থিং কুর্য্যাদিতি রজ্জুকরণম্। প্রথমাং রজ্জুমুদগগ্রামাস্তীর্য্য প্রাদেশমাত্রং দর্ভমুষ্টিং ছিত্ত্বা প্রাগগ্রাং তস্যাং নিধায় তথা বর্হির্দ্বিরাবেষ্ট্য তন্মূলঞ্চ দ্বিরাবেষ্ট্য তাং প্রথমবেষ্টনস্যাধস্তাদ্‌ধুনুয়াদেবং দ্বিতীয়য়া ইধ্মং

পাত্রে * অসংশ্লিষ্টে পাণিভ্যাং গৃহীত্বা অধোমুখে স্থাপনীয়ে। † অথানামিকায়াং কুশান্ বদ্ধা প্রোক্ষণীমুত্তোলয়েৎ। ইতরপাত্রাণ্যপি। প্রোক্ষণীমদ্ভিঃ পূরয়িত্বা কিঞ্চিদুদকং স্রাবয়েৎ। তজ্জলেন সর্ব্বাণি পাত্রাণি প্রোক্ষয়েৎ। ততঃ কমণ্ডলো-রুদকং গৃহীত্বা তেনোদকেন প্রণীতাং পূরয়েৎ। প্রাক্প্লবনং কিঞ্চিদুদকং স্রাবয়েৎ প্রোক্ষয়েচ্চ। উৎপবনন্তু বক্ষ্যামঃ। প্রণীতা-প্রোক্ষণ্যোরুৎপবনং পরিশিষ্টস্বরসসিদ্ধম্। তথা চ—অদ্ভিঃ পূরয়িত্বা উৎপূয় তদিতরপাত্রাণি প্রোক্ষতি ইতি পরিশিষ্টম্। প্রণীতাপাত্রে কমণ্ডলূদকং দত্ত্বা তত্র যবং পুষ্পং পবিত্রে চ দত্ত্বা ত্রিরুৎপূয় ব্রহ্মাণং পৃচ্ছেৎ। ‡ প্রজাপতির্ঋষির্ব্রহ্মা দেবতা গায়ত্রীচ্ছন্দোঽপঃ প্রণয়নার্থজপে বিনিয়োগঃ। ওঁ ব্রহ্মন্নপঃ প্রণেষ্যামি। (ওঁ বৃহস্পতির্ব্রহ্মা ব্রহ্মসদন আশিষ্যতে। বৃহস্পতে যজ্ঞং গোপায়) স পতিং পাহি স মাং পাহি। ততো ব্রহ্মা প্রজাপতির্ঋষির্ব্রহ্মা দেবতা ব্রহ্মজপে বিনিয়োগঃ। যজ্ঞং পাহি যজ্ঞ ওঁ ভূর্ভুবঃস্বর্বৃহস্পতিপ্রসূত ইতি জপ্ত্বা ওঁ প্রণয় ইতি বদেৎ। ¶ ততঃ প্রণীতামগ্নেরুত্তরতো (ব্রহ্মসম্মুখে) স্থাপয়িত্বা কুশাষ্টপত্রৈঃ প্রচ্ছাদয়েৎ। আজ্যস্থাল্যাং সর্পিঃ কৃত্বাঽগ্নেরুত্তর-তোঽঙ্গারমাকৃষ্য দ্রবীকুর্য্যাৎ। জ্বলৎকুশেনাজ্যং সংবেষ্ট্য কুশপত্রদ্বয়মাজ্যে নিক্ষিপ্যাজ্যং শোধয়েৎ। পুনরাজ্যং জ্বলতা কুশেন সংবেষ্ট্য তৎকুশমাজ্যে

---

সকৃদাবেষ্ট্য সন্নহেৎ অরত্ন্যায়াম ইধ্মঃ পঞ্চদশদারুকস্তদুপরি নিদধ্যাদেতদিধ্মাবর্হিষোঃ সন্নহনম্। অথ সোদকেন পাণিনা প্রাগুদীচ্যা আরভ্য প্রদক্ষিণমগ্নিং ত্রিঃ পরিসমূহ্য প্রাদেশমাত্রৈর্দর্ভৈঃ প্রদক্ষিণং প্রাচ্যাদিষু প্রতিদিশমুদক্সংস্থং পরিস্তৃণীয়াৎ দক্ষিণোত্তরয়োঃ সন্ধিষু মূলাগ্রৈরাচ্ছাদয়ে-দ্দ্রাঘিষ্ঠান্ বা দর্ভাংস্তয়োস্তৃণীয়াৎ। উত্তরতঃ পাত্রাসাদনায় দক্ষিণতো ব্রহ্মাসনায় কাংশ্চিদ্দ-র্ভানাস্তীর্য্যাগ্নিং পর্য্যুক্ষেদেষোঽগ্নিসংস্কারঃ। ইতি গৃহ্যপরিশিষ্টকৃতা ক্রমনির্ণয়ঃ কৃতঃ।

* চরু-স্থালীপ্রোক্ষণ্যৌ, দর্ব্বীস্রুবৌ, প্রণীতাজ্যপাত্রে, ইধ্মবর্হিষী, শূর্পকৃষ্ণাজিনে, উদূখল-মুসলে চ।

† অথেদানীং গৃহ্যসূত্রপরিশিষ্টমতং লিখ্যতে।

‡ অথ প্রচলিতমতং লিখ্যতে যথা—দ্বে দ্বে পাত্রে অসংশ্লিষ্টে পাণিভ্যাং গৃহীত্বা অধোমুখে স্থাপনীয়ে। ততঃ প্রোক্ষণীপাত্রমুত্তানং কৃত্বা তত্র পবিত্রে নিধায় তৎ পাত্রমদ্ভিঃ পূরয়িত্বা হস্তয়োরনামাঙ্গুষ্ঠাভ্যাং পবিত্রে উদগগ্রে ধৃত্বা প্রোক্ষণীপাত্রস্থজলং ত্রিরুৎপূয় ইতরপাত্রাণি উত্তানানি কৃত্বা ইধ্মং বিস্রস্য প্রোক্ষণীজলেন সর্ব্বাণি পাত্রাণি ত্রিঃ প্রোক্ষেৎ। ততঃ প্রোক্ষণী-পাত্রাৎ কিঞ্চিজ্জলং কমণ্ডলৌ নিধায় প্রণীতাপাত্রং অগ্নেঃ প্রত্যঙ্ নিধায় তত্র প্রাগগ্রে পবিত্রে নিধায় উৎপূতাভিঃ কমণ্ডলোরদ্ভিঃ প্রণীতাপাত্রং পূরয়িত্বা তত্র গন্ধপুষ্পাক্ষতানি বিন্যস্য ব্রহ্মাণং পৃচ্ছেৎ। প্রজাপতির্ঋষিরিত্যাদি।

¶ অত্র পরিশিষ্টম্—অপাং প্রণয়নে ওঁ ব্রহ্মন্নপঃ প্রণেষ্যামীত্যতিসৃষ্টঃ ওঁ ভূর্ভুবঃস্বর্বৃহস্পতি-প্রসূত ইতি জপিত্বা ওঁ প্রণয় ইতি অতি সৃজেৎ সর্ব্বদা চ যজ্ঞমনা ভবেৎ।

নিক্ষিপ্যাজ্যমানীয় সম্মুখে বর্হিষি স্থাপয়েৎ। আকৃষ্টাঙ্গারমগ্নৌ প্রক্ষিপ্য আজ্যোৎপবনং কুর্য্যাৎ। ততঃ পবিত্রং গৃহীত্বা প্রজাপতির্ঋষিঃ পবিত্রে দেবতে পবিত্রচ্ছেদনে বিনিয়োগঃ। ওঁ পবিত্রে স্থো বৈষ্ণব্যৌ ইত্যনখং ছিত্ত্বা প্রজাপতির্ঋষিঃ পবিত্রে দেবতে পবিত্রমার্জ্জনে বিনিয়োগঃ। ওঁ বিষ্ণোর্মনসা পূতে স্থঃ। ইত্যভ্যুক্ষেৎ। যথা—পবিত্রদ্বয়ং অসংশ্লিষ্টং প্রাগগ্রমগ্রে বামহস্তা-নামাঙ্গুষ্ঠাভ্যাং মূলে চ দক্ষিণহস্তানামাঙ্গুষ্ঠাভ্যাং গৃহীত্বা তয়োর্মধ্যেনাগ্নৌ আজ্যোৎক্ষেপণং সবিতুষ্ট্বেত্যস্য হিরণ্যস্তূপঋষিঃ সবিতা দেবতা পুরউষ্ণিক্ ছন্দ আজ্যোৎপবনে বিনিয়োগঃ। ওঁ সবিতুষ্ট্বা প্রসব উৎপুনাম্যচ্ছিদ্রেণ পবিত্রেণ বসোঃ সূর্য্যস্য রশ্মিভিঃ ইত্যনেন প্রথমমুৎপুনাতি দ্বিস্তূষ্ণীম্। * ততস্তৎ পবিত্রদ্বয়ং প্রক্ষাল্যাগ্নৌ ক্ষিপেৎ। (ওঁ ভূর্ভুবঃস্বরোম্ তৎসবিতুরিত্যাদি। ওঁ সবিতুষ্ট্বা ইতি পঠেৎ।) † অথ স্রুবাদিসংস্কারঃ। স্রুক্স্রুবৌ ‡ প্রক্ষাল্য প্রতাপ্য দর্ভৈরবমৃজ্য পুনঃ প্রতাপ্য সুতপ্তং কৃত্বা স্থাপয়েৎ। ¶ যদি প্রকৃতে কর্ম্মণি চরুহোমোঽস্তি তদা অস্মিন্নেব সময়ে চরুং শ্রপয়েৎ। চরুস্থালী তাম্রময়ী মৃন্ময়ী বা কর্ত্তব্যা। চরুস্থালীং বামহস্তেন গ্রীবায়াং ধৃত্বা তন্মধ্যে উত্তরাগ্রং পবিত্রং দত্ত্বা

---

* তথাচ সূত্রং সকৃন্মন্ত্রেণ দ্বিস্তূষ্ণীম্।

† অথ পরিশিষ্টমতং যথা—চমসং প্রত্যগগ্নের্নিধায় তে পবিত্রে অন্তর্ধায়াদ্ভিঃ পূরয়িত্বা গন্ধাদি প্রক্ষিপ্য দক্ষিণোত্তরাভ্যাং পাণিভ্যাং নাসিকান্তমুদ্ধৃত্য উত্তরতোঽগ্নের্দর্ভেষু নিধায় দর্ভৈঃ প্রচ্ছাদয়েৎ। ইতি প্রণীতা-প্রণয়নম্। অথ তে এব পবিত্রে প্রাগগ্রেঽরাজ্যপাত্রেঽন্তর্দ্ধায়াজ্যমাসিচ্য বহিঃ পরিস্তরণাদঙ্গারানুদগপোহ্য তেষ্বাজ্যমধিশ্রিত্যোল্মুকেনাবজ্বাল্য দর্ভাগ্রে প্রচ্ছিদ্য প্রোক্ষ্যাজ্যে প্রাস্য জ্বলতা তেনৈবোল্মুকেনাজ্যং ত্রিঃ পরিহৃত্যোল্মুকং নিরস্যাপ উপস্পৃশ্যাজ্যং কর্ষন্নিব উদগুদ্বাস্যাঙ্গারানতিসৃজ্য আজ্যমুৎপূয় পবিত্রে প্রোক্ষ্যাগ্নৌ প্রাস্যাপ উপস্পৃশেদেষ আজ্যসংস্কারঃ।

‡ অথ পরিশিষ্টমতম্—বর্হিরাত্মনোঽগ্রে প্রাগগ্রমাস্তীর্য্য তত্রাজ্যমাসাদ্য সহদর্ভৈর্দর্ব্বীস্রুবা-বাদায়াগ্নৌ প্রতাপ্য দর্ব্বীং নিধায় স্রুবং সব্যেন ধারয়ন্ দক্ষিণেন পাণিনা দর্ভাগ্রৈর্বিলং প্রাগারভ্য প্রাদক্ষিণ্যং প্রাগপবর্গং ত্রিঃ পরিমৃজ্য তৈরেব বিলপৃষ্ঠমভ্যাত্মং ত্রিঃ সংমৃজ্যাথ পৃষ্ঠাদারভ্য যাবদুপরি বিলং দণ্ডং দর্ভমূলৈস্ত্রিঃ সংমৃজ্য স্রুবং প্রোক্ষ্য প্রতাপ্য উদগাজ্যাদ্বর্হিষ্যা-সাদ্য উদকস্পৃষ্টৈস্তৈরেব দর্ভৈরেবং দর্ব্বীঞ্চ সংস্কৃত্য স্রুবাদুদঙ্ নিধায় দর্ভান্ প্রোক্ষ্যাগ্নৌ প্রহরেদেষ স্রুক্স্রুবসংমার্গঃ।

¶ অত্র স্রুবাদিসংস্কারে মতান্তরম্—স্রুবং স্রুচঞ্চ প্রক্ষাল্য দক্ষিণহস্তেন গৃহীত্বা বামেন দর্ভানাদায় মূলাদগ্রং সম্মার্জ্য ওঁ প্রত্যুষ্টং রক্ষ প্রত্যুষ্টা অরাতয়ো নিষ্টপ্তং রক্ষ নিষ্টপ্তা অরাতয়ঃ। অনেনাগ্নৌ প্রতাপ্য দক্ষিণহস্তেনাস্য বিলং দর্ভাগ্রৈঃ ত্রিরুন্মৃজ্য এবমন্তর্বারদ্বয়ং কৃত্বা প্রোক্ষ্যা-জ্যেনাভিঘার্য্য অগ্ন্যাজ্যয়োর্মধ্যে নীত্বা আজ্যদক্ষিণতো বর্হিষি স্থাপয়েৎ। এবমেব দর্ব্বীং মেক্ষণঞ্চ সংস্কুর্য্যাৎ। নিয়সনমুপবেশনং জপঃ প্রায়শ্চিত্তজহোমঃ সংস্থাজপেনোপস্থানং চেতি পঞ্চকর্ম্মাণি ব্রহ্মণঃ। ইতি পরিশিষ্টকারসম্মতক্রমনির্ণয়ঃ।

অতপ্তমিততণ্ডুলান্ আনীয় দেবতানাং নাম প্রযোক্তব্যম্। ওঁ অমুষ্মৈ ত্বা জুষ্টং নির্ব্বপামি প্রোক্ষামীতি চতুরশ্চতুরো মুষ্টীন্ নির্ব্বপেৎ প্রোক্ষেৎ। ত্রিঃ ফলীকৃতান্ ত্রিঃ প্রক্ষাল্য পাকানুরূপং তুষ্কং দদ্যাৎ। ততঃ সুসিদ্ধং জ্ঞাত্বা ভূতানি হবীংষি দত্ত্বা উদগুদ্বাস্যাগ্ন্যাজ্যয়োর্মধ্যেন নীত্বা আজ্যাদ্দক্ষিণতো বর্হিষি স্থাপয়েৎ। ততোঽগ্নে ত্বং পাবকনামাসি ইতি নাম কৃত্বাভ্যর্চ্চ্য গন্ধপুষ্পাক্ষতানি গৃহীত্বা—বিশ্বানি ন ইতি তিসৃণাং বসুশ্রুতঋষিরগ্নির্দেবতা ত্রিষ্টুপ্ ছন্দোঽগ্ন্যর্চ্চনে বিনিয়োগঃ। ওঁ বিশ্বানি নো দুর্গহা জাতবেদঃ সিন্ধুং ন নাবা দুরিতাতিপর্ষি। অগ্নে অত্রিবন্ নমসা গৃণানো অস্মাকং বোধ্যবিতা তনূনাম্। ওঁ যস্ত্বা হৃদা কীরিণা মন্যমানঃ অমর্ত্যং মর্ত্ত্যো জোহবীমি। জাতবেদো যশোঽস্মাসু ধেহি প্রজাভিরগ্নেরমৃতত্বমশ্যাম্। ওঁ যস্মৈ ত্বং সুকৃতে জাতবেদ উলোকমগ্নে কৃণবস্যোনং। অশ্বিনং সপুত্রিণং বীরবন্তং গোমন্তং রয়িং ন শতে স্বস্তি। এবং বহ্নিমভ্যর্চ্চ্য ইধ্মবন্ধনরজ্জুং বামকরে সংবেষ্ট্য ইধ্মাধানং কুর্য্যাৎ। অথেধ্মাধানম্। প্রজাপতিঋষিরগ্নির্দেবতা ইন্ধনাদিপ্রতাপনে বিনিয়োগঃ। ওঁ প্রত্যুষ্টংং রক্ষঃপ্রত্যুষ্টা অরাতয়ো নিষ্টপ্তংং রক্ষো নিষ্টপ্তা অরাতয়ঃ। (উর্ব্বন্তরিক্ষমন্বেমি।) ইত্যনেন প্রতপেৎ। যদা পুনরেককালমাজ্যহোমচরুহোমৌ ভবতঃ তদা স্রুক্স্রুবপ্রতাপানন্তরং চরুং প্রসাধ্যাবতার্য্য ইধ্মাধানং কুর্য্যাৎ। অন্যথা নিরুক্তক্রমেণ। * বামহস্তে ইধ্মং কৃত্বা মূলমধ্যাগ্রদেশেষু আজ্যেনাভিঘার্য্য দক্ষিণহস্তে ইধ্মং গৃহীত্বা অয়ন্ত ইধ্ম ইত্যস্য বামদেবঋষির্জাতবেদা অগ্নির্দেবতা ত্রিষ্টুপ্ ছন্দ ইধ্মাধানে বিনিয়োগঃ। ওঁ অয়ন্ত ইধ্ম আত্মা জাতবেদস্তেনেধ্যস্ব বর্দ্ধস্ব চেদ্ধ বর্দ্ধয় চাস্মান্ প্রজয়া পশুভির্ব্রহ্মবর্চ্চসেনান্নাদ্যেন সমেধয় স্বাহা। ইতি হুত্বা ওঁ অগ্নয়ে জাতবেদসে ইতি নমম ইদং ত্যজন্ ততস্তূষ্ণীং আঘারাজ্যাহুতীর্জুহুয়াৎ। যথা—স্রুবেণ চতুরাজ্যং স্রুচি দত্ত্বা বায়ুকোণাদারভ্য আগ্নেয়ীং যাবৎ তূষ্ণীং হুত্বা পুনস্তথৈবাজ্যমাদায় নৈঋতীমারভ্য ঐশানীং যাবৎ অবিচ্ছিন্নামাজ্যধারাং হুনেৎ। † আজ্যভাগৌ যথা—অগ্নেরুত্তরপার্শ্বে ওঁ অগ্নয়ে স্বাহা ওঁ অগ্নয়

* তথা চ সূত্রং—(একবর্হিরিধ্মাজ্যস্বিষ্টকৃতঃ স্যুস্তন্যাকালতা)। তথা শৃতানি হবীংষ্যভিঘার্য্যোদগুদ্বাস্য বর্হিষ্যাসাদ্যাভিঘার্য্য অয়ন্তে ইতি তূষ্ণীমাঘারৌ আঘার্য্য আজ্যভাগৌ জুহুয়াৎ।

† কশ্চিত্তু প্রজাপতিং মনসা স্মরন্ স্বাহা ইত্যুচ্চার্য্য অবিচ্ছিন্নামৃজুধারাং জুহুয়াৎ। প্রজাপতয় ইদং নমম। পুনস্তথৈবাজ্যমাদায় ওঁ প্রজাপতিম্ মনসা স্মরন্ স্বাহেত্যনেন জুহুয়াৎ।

ইদং নমম। এবং দক্ষিণপার্শ্বে ওঁ সোমায় স্বাহা সোমায় ইদং নমম। ইতি স্রুবেণোভৌ জুহুয়াৎ। * উপলেপনাদ্যাজ্যভাগান্তং যাবৎ সর্ব্বকর্ম্ম সমানম্।

ইতি আজ্যভাগান্তা কুশণ্ডিকা।

## অথ প্রকৃতহোমঃ

প্রকৃতকর্ম্মোক্তাগ্নের্নাম কৃত্বা আবাহ্য অভ্যর্চ্চ্য তত্র যো বিহিতো হোমঃ স কর্ত্তব্যঃ। ততঃ প্রকৃতং কর্ম্ম সমাপ্য প্রায়শ্চিত্তহোমং কুর্য্যাৎ। †

## অথ উদীচ্যং কর্ম্ম

তত্রাদৌ বিধুনামানমগ্নিমাবাহ্য সম্পূজ্য সঙ্কল্পং কুর্য্যাৎ। অয়াশ্চাগ্ন ইত্যস্য বিমদঋষিরয়ানামাগ্নির্দেবতা পঙ্‌ক্তিশ্ছন্দঃ প্রায়শ্চিত্তাজ্যহোমে বিনিয়োগঃ। অয়াশ্চাগ্নেঽস্যনভিশস্তিপাশ্চ সত্বমিত্বময়া অসি অয়াসা বয়সা কৃতোঽযাসন্ হব্যমূহিষে অয়ানো ধেহি ভেষজং স্বাহা। অয়াসে অগ্নয়ে ইদং নমম। অতো দেবা ইত্যস্য মেধাতিথির্ঋষির্দেবা দেবতা গায়ত্রীচ্ছন্দঃ প্রায়শ্চিত্তাজ্যহোমে বিনিয়োগঃ। ওঁ অতো দেবা অবন্তু নো যতো বিষ্ণুর্বিচক্রমে। পৃথিব্যাঃ সপ্তধামভিঃ স্বাহা। দেবেভ্য ইদং নমম। ইদং বিষ্ণুরিত্যস্য মেধাতিথির্ঋষির্বিষ্ণুর্দেবতা গায়ত্রীচ্ছন্দঃ প্রায়শ্চিত্তাজ্যহোমে বিনিয়োগঃ। ওঁ ইদং বিষ্ণুর্বিচক্রমে ত্রেধা নিদধে পদং সমূঢ়মস্য পাংশুলে স্বাহা। বিষ্ণবে ইদং নমম। ভূরাদিব্যাহৃতীনাং বিশ্বামিত্র-জমদগ্নি-ভরদ্বাজা ঋষয়োঽগ্নি-বায়ু-সূর্য্যা দেবতা গায়ত্র্যুষ্ণিগনুষ্টুভশ্ছন্দাংসি প্রায়শ্চিত্তাজ্যহোমে বিনিয়োগঃ। ওঁ ভূরগ্নয়ে চ পৃথিব্যৈ চ দিব্যায় চ মহতে চ স্বাহা। ভূরগ্নয়ে ইদং নমম। ওঁ ভুবো বায়বে চান্তরীক্ষায় চ দিব্যায় চ মহতে চ স্বাহা। ভুবো বায়বে চান্তরীক্ষায় চ ইদং নমম। ওঁ স্বঃ সূর্য্যায় চ দিব্যায় চ মহতে চ স্বাহা। সূর্য্যায় দিব্যায় মহতে ইদং নমম। সমস্তানাং ব্যাহৃতীনাং প্রজাপতির্ঋষির্বৃহতীচ্ছন্দঃ প্রজাপতিশ্চন্দ্রমো-নক্ষত্রদিশো দেবতাঃ প্রায়শ্চিত্তাজ্যহোমে বিনিয়োগঃ। ওঁ ভূর্ভুবঃস্বঃ প্রজাপতয়ে চ চন্দ্রমসে চ নক্ষত্রেভ্যশ্চ দিগ্‌ভ্যশ্চ দিব্যায় চ মহতে চ স্বাহা। ইদং প্রজাপতি-চন্দ্রমো-নক্ষত্র-দিগ্‌ভ্যো নমম।

---

* ইমাবাজ্যভাগৌ ভবতঃ। তথা চ সূত্রং চক্ষুষী এতে যজ্ঞস্য যদাজ্যভাগৌ অনয়োর্মধ্যে হবীংষি জুহুয়াৎ।

† যত্র প্রকৃতে কর্ম্মণি আজ্যেনৈব হোমস্তত্রাদৌ আজ্যেনৈব প্রায়শ্চিত্তং তদন্তে স্বিষ্টকৃদ্ধোমঃ, যত্র তু চরুহোমস্তত্রাদৌ চরুণৈব স্বিষ্টকৃৎ তদন্তেন প্রায়শ্চিত্তং ইতি ধ্যেয়ম্।

যৎ পাকত্রা ইত্যস্য ত্রিতঋষিরগ্নির্দেবতা ত্রিষ্টুপ্ ছন্দঃ সর্ব্বপ্রায়শ্চিত্তাজ্যহোমে বিনিয়োগঃ। ওঁ যৎ পাকত্রা মনসা দীনদক্ষা ন যজ্ঞস্য মন্বতে মর্ত্যাসঃ। অগ্নিষ্টদ্ধোতা ক্রতুবিদ্বিজানন্ যজিষ্ঠো দেবাঁ ঋতুশো যজাতি স্বাহা। অগ্নয়ে ইদং নমম। পুরুষসম্মিত ইত্যস্য হিরণ্যগর্ভঋষিরগ্নির্দেবতাঽনুষ্টুপ্ ছন্দঃ প্রায়শ্চিত্তাজ্যহোমে বিনিয়োগঃ। ওঁ পুরুষসম্মিতো যজ্ঞঃ যজ্ঞঃ পুরুষসম্মিতঃ। অগ্নে তদস্য কল্পয় ত্বং হি বেত্থ যথাযথং স্বাহা। অগ্নয়ে ইদং নমম। যদ্বো দেবা ইত্যস্য সৌর্য্যোঽভিতপা ঋষিঃ সূর্য্যো দেবতা ত্রিষ্টুপ্ ছন্দো দ্রব্যবিপর্য্যাসকাল-বিপর্য্যাস-মন্ত্রবিপর্য্যাস-তন্ত্রবিপর্য্যাসার্থপ্রায়শ্চিত্তাজ্যহোমে বিনিয়োগঃ। ওঁ যদ্বো দেবাশ্চকৃম জিহ্বয়া গুরু মনসো বাপ্রযুতী দেবহেলনম্। অরা বা যো নো অভিদুচ্ছুনায়তে তস্মিন্ তদেনো বসবো নিধতেন স্বাহা। যদ্বো দেবা ইত্যস্য অভিতপাঋষির্মরুতো দেবতাস্ত্রিষ্টুপ্ ছন্দো দ্রব্যবিপর্য্যাস-কালবিপর্য্যাস-মন্ত্রবিপর্য্যাস-তন্ত্রবিপর্য্যাসার্থ-প্রায়শ্চিত্তাজ্যহোমে বিনিয়োগঃ। ওঁ যদ্বো দেবা অভিপাতয়ানি বাচা চ প্রযুতী দেবহেলনম্। অরা যো অস্মান্ অভিদুচ্ছুনায়তে অন্যত্রাস্মান্ মরুতস্তন্নিধতেন স্বাহা। মরুদ্ভ্য ইদং নমম।*

অথ স্বিষ্টকৃদ্ধোমঃ। যত্র চরুহোমোঽস্তি তত্র চরুণৈব স কর্ত্তব্যঃ। যত্র ন চরুহোমস্তত্র প্রায়শ্চিত্তশেষেনাজ্যেন স্বিষ্টকৃদ্ধোমঃ। আজ্যেনেষ্টিং সমাপয়েৎ ইতি বচনাৎ। স্রুবেণ চতুরাজ্যং স্রুচি দত্ত্বা অগ্নেঃ প্রাক্ উদক্স্বিষ্টিকৃদ্দানম্। যদস্যেত্যস্য ( হিরণ্যগর্ভঋষিঃ ) প্রজাপতির্ঋষিঃ স্বিষ্টকৃদগ্নির্দেবতা অতিধৃতিশ্ছন্দঃ স্বিষ্টকৃদ্ধোমে বিনিয়োগঃ। ওঁ যদস্য কর্ম্মণোঽত্যরীরিচং যদ্বা ন্যূনমিহাকরম্। অগ্নিষ্টৎ স্বিষ্টকৃদ্বিদ্বান্ সর্ব্বং স্বিষ্টং সুহুতং করোতু মে। অগ্নয়ে স্বিষ্টকৃতে সুহুতহুতে সর্ব্বপ্রায়শ্চিত্তাহুতীনাং কামানাং সমর্দ্ধয়িত্রে সর্ব্বান্নঃ কামান্ সমর্দ্ধয় স্বাহা। অগ্নয়ে স্বিষ্টকৃতে ইদং নমম। ইত্যগ্নীশানকোণে জুহুয়াৎ। ওঁ রুদ্রায় স্বাহা ইতীধ্মবন্ধনরজ্জুং জুহুয়াৎ। রুদ্রায় ইদং নমম ইতিপ্রত্যুদ্দেশঃ। যদি যজমানঃ স্বয়ং হোতা তদাসৌ বর্হিষি প্রণীতামাদায় তেনোদকেনাত্মানমভিষিঞ্চেৎ। † যদ্যন্যস্তদাসৌ যজমানমিতি বিশেষঃ।—আপোঽস্মানিত্যস্য

---

* অনাজ্ঞাতমিতি মন্ত্রস্য হিরণ্যগর্ভঋষিরগ্নির্দেবতাঽনুষ্টুপ্ ছন্দঃ জ্ঞাতাজ্ঞাত-দোষনির্হরণার্থং প্রায়শ্চিত্তাজ্যহোমে বিনিয়োগঃ। ওঁ অনাজ্ঞাতং যজ্ঞস্য ক্রিয়তে মিথু। অগ্নে তদস্য কল্পয় ত্বং হি বেত্থ যথাতথং স্বাহা অগ্নয় ইদং নমম ইতি মন্ত্রেণ অধিকো হোমঃ কুত্রচিৎ লিখিতঃ।

† কেষাঞ্চিন্মতেঽস্মিন্ সময়ে পূর্ণহোমঃ ততো মার্জ্জনম্। ততশ্চ সংস্রাজপো বিহিতঃ।

(প্রজাপতিঃ) দেবশ্রবা ঋষিরাপো দেবতাস্ত্রিষ্টুপ্ ছন্দো মার্জ্জনে বিনিয়োগঃ। ওঁ আপো অস্মান্ মাতরঃ শুন্ধয়ন্তু ঘৃতেন নো ঘৃতপঃ পুনন্তু। বিশ্বং হি রিপ্রং প্রবহন্তি দেবীরুদিদাভ্যঃ শুচিরাপূত এমি। ইদমাপ ইত্যস্য সিন্ধুদ্বীপঋষিরাপো দেবতা অনুষ্টুপ্ ছন্দো মার্জ্জনে বিনিয়োগঃ। ওঁ ইদমাপঃ প্রবহত যৎ কিঞ্চিৎ দুরিতং ময়ি। যদ্বাহমভিদুদ্রোহ যদ্বা শেপ উতানৃতম্। সুমিত্র্যা ন আপ ইত্যস্য নারায়ণঋষিরাপো দেবতাস্ত্রিষ্টুপ্ ছন্দোঽভিষেকে বিনিয়োগঃ। ওঁ সুমিত্র্যা ন আপ ওষধয়ঃ সন্তু ইতি ভূমৌ নিক্ষিপেৎ। ওঁ দুর্ম্মিত্র্যাস্তস্মৈ সন্তু যোঽস্মান্ দ্বেষ্টি যঞ্চ বয়ং দ্বিষ্মঃ ইত্যাত্মানমভিষিঞ্চেৎ। ততঃ পরিস্তরণকুশৈঃ স্রুক্স্রুবৌ অগ্রে মধ্যে মূলে চ প্রোক্ষ্যাগ্নৌ ক্ষিপেৎ। * ততোঽগ্ন্যুপস্থাপনম্। কৃতাঞ্জলিঃ পঠেৎ। অগ্নে ত্বন্নো অন্তম ইতি চতুর্ঋচস্য গৌপায়না (লৌপায়না বা) বন্ধুঃ সুবন্ধুঃ শ্রুতবন্ধুঃ প্রিয়বন্ধুঃ ক্রমেণ ঋষয়োঽগ্নির্দেবতা দ্বিপদা বিরাট্‌ছন্দোঽগ্ন্যুপস্থানে বিনিয়োগঃ। ওঁ অগ্নে ত্বন্নো অন্তম উত ত্রাতা শিবোভবাবরূথ্যঃ। বসুরগ্নির্বসুশ্রবা আচ্ছানক্ষিদ্যুমত্তমং রয়িং দাঃ। ওঁ সনো বোধি শ্রুধীহবমুরুষ্যানো অঘায়তঃ সমস্মাৎ। তং ত্বা শোচিষ্ঠ দীদিবঃ সুম্নায় নূনমীমহে সখিভ্যঃ। † ততো মৃড়নামানমগ্নিং সংস্থাপ্য সম্পূজ্য মূর্দ্ধানমিত্যস্য বার্হস্পত্যঋষি (বামদেবঋষিঃ) বৈশ্বানরো দেবতা (অগ্নির্দেবতা) ত্রিষ্টুপ্ ছন্দঃ পূর্ণহোমে বিনিয়োগঃ। ওঁ মূর্দ্ধানং দিবো অরতিং পৃথিব্যা বৈশ্বানরমৃত আজাতমগ্নিং। কবিং সম্রাজমতিথিং জনানামাসন্না পাত্রং জনয়ন্ত দেবাঃ স্বাহা। অগ্নয়ে ইদং নমম। ধামন্তে বিশ্বমিত্যস্য বামদেবঋষিরাপো দেবতা জগতীচ্ছন্দঃ পূর্ণহোমে বিনিয়োগঃ। ওঁ ধামন্তে বিশ্বং ভুবনমধিশ্রিতমন্তঃ সমুদ্রে হৃদ্যন্তরায়ুষি। অপামনীকে সমিথে ব আভৃতস্তমশ্যাম মধুমন্তং ত উর্ম্মিং স্বাহা। অদ্ভ্য ইদং নমম। নাভিং যজ্ঞানামিত্যস্য বার্হস্পত্যঋষি (বামদেবঋষিঃ) বৈশ্বানরো দেবতা (অগ্নির্দেবতা) ত্রিষ্টুপ্ ছন্দঃ পূর্ণহোমে বিনিয়োগঃ। ওঁ নাভিং যজ্ঞানাং সদনং রয়ীণাং মহামাহাবমভি সংনবন্ত। বৈশ্বানরং রথ্যমধ্বরাণাং যজ্ঞস্য কেতুং জনয়ন্ত দেবাঃ। বৈশ্বানরায় ইদং

---

* অত্র পুস্তকান্তরে বিশেষো লিখিতঃ। ওঁ যাহং প্রজাং পরাসিচং যানঃ স যাবরীস্থন। সমুদ্রে বো নিনয়ানি স্বাং পাথো অসীম ইতি কুশাগ্রৈরপঃ সিঞ্চেৎ।

† পুস্তকান্তরে অত্রৈব চ মে ইত্যাদি মন্ত্রজপো লিখিতঃ।

নমম।* ইতি ঋকৃত্রয়েণ পূর্ণাহুতিং দদ্যাৎ। ততঃ সংস্থাজপঃ। † ওঁ চম ইত্যস্য হিরণ্যস্তূপঋষিঃ সারস্বতোঽগ্নির্দেবতা উপরিষ্টাদ্বৃহতীচ্ছন্দঃ সংস্থাজপে বিনিয়োগঃ। ওঞ্চমে স্বরশ্চ মে যজ্ঞোপচ তে নমঃ। যত্তে ন্যূনং তস্মৈ ত উপযত্তেঽতিরিক্তং তস্মৈ তে নমঃ। ওঁ যজ্ঞ যজ্ঞপতিং গচ্ছ স্বাং যোনিং গচ্ছ স্বাহা। ওঁ স্বস্তি। শ্রদ্ধাং মেধাং যশঃ প্রজ্ঞাং বিদ্যাং বুদ্ধিং শ্রিয়ং বলম্। আয়ুষ্যং তেজ আরোগ্যং দেহি মে হব্যবাহন দেহি মে হব্যবাহন ওঁ নমঃ। ততো ব্রহ্মদক্ষিণাং দদ্যাৎ। ততঃ স্থালীস্থঘৃতেন সর্ব্বপরিস্তরণকুশান্ ওঁ সর্পেভ্যঃ স্বাহেতি জুহুয়াৎ, ‡ তত ওঁ পৃথ্বি ত্বং শীতলা ভবেতি দধি নিঃক্ষিপ্য ভস্ম গৃহীত্বা মানস্তোক ইত্যস্য কুৎসঋষির্জগতীচ্ছন্দো রুদ্রো দেবতা বিভূতিগ্রহণে রক্ষাকরণে বিনিয়োগঃ। ওঁ মানস্তোকে তনয়ে মান আযৌ মানো গোষু মানো অশ্বেষু রীরিষঃ। বীরান্ মানো রুদ্র ভামিতো বধীর্হবিষ্মন্তঃ সদমি ত্বা হবামহে। ইতি দক্ষিণাবর্ত্তেনাভিমন্ত্র্য ওঁ ত্র্যায়ুষং জমদগ্নেরিতি ললাটে। ওঁ কশ্যপস্য ত্র্যায়ুষমিতি হৃদি। ওঁ অগস্ত্যস্য ত্র্যায়ুষমিতি বাহুমূলয়োঃ। ওঁ যদ্দেবানাং ত্র্যায়ুষমিতি কণ্ঠে। ওঁ তন্নোঽস্তু ত্র্যায়ুষমিতি ব্রহ্মরন্ধ্রে দদ্যাৎ। ¶ ততোঽগ্নিং বিসর্জ্জয়েৎ, যথা—ত্রিতঋষির্গায়ত্রীচ্ছন্দোঽগ্নির্দেবতা অগ্নিবিসর্জ্জনে বিনিয়োগঃ। ওঁ অভ্যারমিদদ্রয়ো নিষিক্তং পুষ্করে মধু। অব তস্য বিসর্জ্জনে।

ইতি সামান্য-কুশণ্ডিকা।

## অথ বিবাহঃ

তত্র সম্প্রদাতা কৃতনিত্যক্রিয় আচম্য পুণ্যাহং স্বস্তি-ঋদ্ধিঞ্চ বাচয়িত্বা স্বস্তি নো মিমীতা ইত্যাদি স্বস্তিসূক্তং পঠিত্বা সূর্য্যঃ সোম ইত্যাদিনা দেবসান্নিধ্যং

---

* কচিত্তু নাভিং যজ্ঞানামিতি মন্ত্রস্থানে ওঁ সপ্ত তে অগ্নে সমিধঃ সপ্তজিহ্বাঃ সপ্তঋষয়ঃ, সপ্তধাম প্রিয়াণি। সপ্তহোত্রাঃ সপ্তধা ত্বা যজন্তি সপ্তযোনীরাপৃণস্ব ঘৃতেন ইতি মন্ত্রনিবেশঃ।

† মতান্তরে ইদানীং অগ্ন্যুপস্থাপনমন্ত্রজপঃ।

‡ অত্র কচিৎ ক্রমভেদো দৃশ্যতে যথা—সর্ব্বমস্তু শতায়ুষমিতি বিভূতিগ্রহণাৎ পরং মূর্দ্ধানং দিব ইত্যাদি মন্ত্রত্রয়েণ পূর্ণহোমান্তে সংস্থাজপঃ। যথা ওঁ পঞ্চম ইত্যস্য হিরণ্যস্তূপঋষিরিত্যাদি। ততোঽগ্নিবিসর্জ্জনম্ ওঁ যজ্ঞ যজ্ঞং গচ্ছ যজ্ঞপতিং গচ্ছ স্বাং যোনিং গচ্ছ স্বাহা এষ তে যজ্ঞো যজ্ঞপতে সহ সূক্তবাকস্তং জুষস্ব স্বাহা। ততো দুগ্ধাদিনা পৃথ্বি ত্বং শীতলা ভবেতি শান্তিং নীত্বা ব্রহ্মণে দক্ষিণাং দদ্যাৎ।

¶ অত্র কেচিৎ ওঁ ত্র্যায়ুষং জমদগ্নেঃ ইতি ললাটে, ওঁ কশ্যপস্য ত্র্যায়ুষমিতি হৃদি, ওঁ অগস্ত্যস্য ত্র্যায়ুষমিতি নাভৌ, ওঁ যদ্দেবানাং ত্র্যায়ুষং ইতি দক্ষিণস্কন্ধে, তন্মে অস্তু ত্র্যায়ুষমিতি বামস্কন্ধে, সর্ব্বমস্তু শতায়ুষমিতি শিরসি ধারয়েৎ। ইতি ক্রমভেদং বর্ণয়ন্তি। কস্মিংশ্চিৎ পুস্তকে অত্রৈব ব্রহ্মদক্ষিণা উদাহৃতা।

কল্পয়িত্বা প্রাঙ্মুখং বরং বস্ত্রাদিভিরর্চ্চয়েৎ। যথা—দাতা ওঁ সাধু ভবানাস্তাং, বরঃ ওঁ সাধ্বহমাসে, দাতা ওঁ অর্চ্চয়িষ্যামো ভবন্তম্, বরঃ ওঁ অর্চ্চয় ইতি বদেৎ। ততো দাতা গন্ধপুষ্পবস্ত্রাদিভিরভ্যর্চ্চ্য দক্ষিণং জানু ধৃত্বা ওঁ তৎসদদ্য অমুকে মাসি অমুকরাশিস্থে ভাস্করে অমুকে পক্ষে অমুকতিথৌ অমুকগোত্রঃ শ্রীঅমুকদেবশর্ম্মা অমুকগোত্রস্যামুকপ্রবরস্যামুকদেবশর্ম্মণঃ প্রপৌত্রং এবং পৌত্রং পুত্রং অমুকগোত্রামুমকপ্রবরম্ অমুকদেবশর্ম্মাণং অমুকগোত্রস্যামুক-প্রবরস্যামুকদেবশর্ম্মণঃ প্রপৌত্রীং এবং পৌত্রীং পুত্রীং অমুকগোত্রামমুক-প্রবরাম্ অমুকীং শুভব্রাহ্মবিবাহেন দাতুমেভির্গন্ধাদিভিরভ্যর্চ্চ্য বরত্বেন ভবন্তমহং বৃণে ইতি বৃণুয়াৎ। বরঃ ওঁ বৃতোঽস্মীতি স্বীকুর্য্যাৎ। দাতা ওঁ যথাবিহিতং বরকর্ম্ম কুরু ইতি বদেৎ। বরঃ ওঁ যথাজ্ঞানং করবাণীতি প্রতিবদেৎ। ততো বরকন্যয়োর্মুখচন্দ্রিকাং কারয়েৎ। ততো দাতা ওঁ বিষ্টরো বিষ্টরো বিষ্টরঃ ইতি প্রৈষেণোক্তে প্রতিগৃহ্যতামিতি দদ্যাৎ, বরঃ ওঁ বিষ্টরং প্রতিগৃহ্লামীতি গৃহীত্বা ওঁ অহং বর্ষ্ম সজাতানাং বিদ্যুতামিব সূর্য্যঃ। ইদন্তমধিতিষ্ঠামি যো মা কশ্চাভিদাসতি ইত্যুদগগ্রে বিষ্টরে উপ-বিশেৎ। দাতা পুনর্বিষ্টরং তথৈব দদ্যাৎ। বরস্তং পূর্ব্ববদ্‌গৃহীত্বা উক্ত-ক্রমেণ পুনর্বামপদে দদ্যাৎ। ততো দাতা পাদ্যং পাদ্যং পাদ্যং প্রতি-গৃহ্যতামিত্যুক্ত্বা প্রযচ্ছেৎ, বরঃ ওঁ পাদ্যং প্রতিগৃহ্লামীতি গৃহীত্বা দক্ষিণবাম-ক্রমেণ পাদৌ প্রক্ষালয়েৎ। দাতা অর্ঘ্যমর্ঘ্যমর্ঘ্যং প্রতিগৃহ্যতামিত্যুক্ত্বা অর্পয়েৎ, গ্রহীতা ওঁ অর্ঘ্যং প্রতিগৃহ্লামীতি গৃহীত্বা শিরসি নিদধ্যাৎ অনেন মন্ত্রেণ—ওঁ অর্চ্চত প্রার্চ্চত প্রিয়মেধাসো অর্চ্চত ইতি। * ততো দাতা ওঁ আচমনীয়মাচমনীয়মাচমনীয়ং প্রতিগৃহ্যতামিতি ত্রিরুক্ত্বার্পিতং জলং বরঃ ওঁ আচমনীয়ং প্রতিগৃহ্লামীতি গৃহীত্বা ওঁ অমৃতোপস্তরণমসি স্বাহা ইতি আচামেৎ। দাতা মধুপর্কো মধুপর্কো মধুপর্কঃ প্রতিগৃহ্যতাম্ ইতি দদ্যাৎ। বরঃ ওঁ মধুপর্কং প্রতিগৃহ্লামীতি গৃহীত্বা ওঁ মিত্রস্য ত্বা চক্ষুষা প্রতীক্ষে ইতি পশ্যেৎ। ওঁ দেবস্য ত্বা সবিতুঃ প্রসবেঽশ্বিনোর্বাহুভ্যাং পূষ্ণো হস্তাভ্যাং প্রতিগৃহ্লামীতি তমঞ্জলিনা প্রতিগৃহ্য মধু বাতেতি তিসৃণাং রাহুগণো গৌতমঋষির্বিশ্বেদেবা দেবতা গায়ত্রীচ্ছন্দো মধুপর্কাবেক্ষণে বিনিয়োগঃ। ওঁ মধু বাতা ঋতায়তে মধু ক্ষরন্তি সিন্ধবঃ। মাধ্বীর্নঃ সন্তো-

* অত্র গৃহ্যসূত্রে পরিশিষ্টে ভাষ্যে চ মন্ত্রো ন ধৃতঃ।

যন্তীঃ। ওঁ মধু নক্তমুতোষসো মধুমৎ পার্থিবং রজঃ। মধু দ্যৌরস্তু নঃ পিতা। ওঁ মধুমান্নো বনস্পতির্মধুমাঁ অস্তু সূর্য্যঃ। মাধ্বীর্গাবো ভবন্তু নঃ। ইতি ত্র্যচেণাবেক্ষ্যানামিকয়া চাঙ্গুষ্ঠেন চ ত্রিঃ প্রদক্ষিণমালোড্য বসবস্ত্বেতি চতসৃণাং বস্বুশ্রুতঋষির্লিঙ্গোক্তা দেবতা উষ্ণিক্‌ছন্দো মধুপর্কনির্ম্মার্জ্জনে (প্রক্ষেপণে) বিনিয়োগঃ। ওঁ বসবস্ত্বা গায়ত্রেণ ছন্দসা ভক্ষয়ন্তু ইতি পুরস্তান্নির্মাষ্টি ওঁ রুদ্রাস্ত্বা ত্রৈষ্টুভেন ছন্দসা ভক্ষয়ন্তু ইতি দক্ষিণতঃ ওঁ আদিত্যাস্ত্বা জাগতেনচ্ছন্দসা ভক্ষয়ন্তু ইতি পশ্চাৎ, ওঁ বিশ্বে ত্বা দেবা আনুষ্টুভেন ছন্দসা ভক্ষয়ন্তু ইতি উত্তরত ওঁ ভূতেভ্যস্ত্বা প্রক্ষিপামি ইতি মধ্যতঃ গৃহীত্বা ত্রিরূর্দ্ধং-ক্ষিপতি। ততো ভূমৌ পাত্রং নিধায় বিরাজো দোহোঽসীত্যস্য ত্রিতঋষির্লিঙ্গোক্তা দেবতা গায়ত্রীচ্ছন্দো মধুপর্কপ্রাশনে বিনিয়োগঃ। ওঁ বিরাজো দোহোঽসি ইতি প্রথমমশ্নীয়াৎ। ওঁ বিরাজো দোহমশীয় ইতি দ্বিতীয়ং, ওঁ ময়ি দোহঃ পদ্যায়ৈ বিরাজ, ইতি তৃতীয়ং, ন সর্ব্বমশ্নীয়াৎ শেষং শিষ্যেভ্যো দদ্যাৎ, অপ্সু বা ক্ষিপেৎ। শৌচার্থমাচমনং কৃত্বা অথাচমনীয়েনাম্বাচামতি ওঁ অমৃতাপিধানমসি (স্বাহা) ইতি প্রথমম্। ওঁ সত্যং যশঃ শ্রীর্ময়ি শ্রীঃ শ্রয়তামিতি দ্বিতীয়ং। আচান্তোদকায় বরায় দাতা একদেশে বদ্ধাং গাং গৌর্গৌর্গৌরিতি নিবেদয়েৎ। ওঁ হতো মে পাপ্মা পাপ্মা মে হত ইতি জপিত্বা মাতা রুদ্রাণামিতি ভার্গব-জামদগ্নিঋষির্গৌর্দেবতা ত্রিষ্টুপ্ ছন্দো গোমোক্ষণে বিনিয়োগঃ। ওঁ মাতা রুদ্রাণাং দুহিতা বসূনাং স্বসাদিত্যানামমৃতস্য নাভিঃ। প্রণুবোচং চিকিতুষে জনায় মা গামনাগামদিতিং বধিষ্ট। ততো দাতা মঙ্গলমহৌষধিলিপ্তং কন্যায়া দক্ষিণহস্তং বরহস্তোপরি নিদধ্যাৎ। ততো ব্রাহ্মণান্ বাচয়েৎ *—ওঁ শিবা আপঃ সন্তু, সৌমনস্যমস্তু অক্ষতঞ্চারিষ্টঞ্চাস্তু,দীর্ঘমায়ুরস্তু,শ্রীঃ কান্তিঃ পুষ্টিঃ শান্তিঃ স্থিতিরস্তু। ওঁ অস্তু ইতি অপরব্রাহ্মণো বরোঽপ্যেতৎসর্ব্বং বদেৎ।

## অথ কন্যাদানম্

ওঁ এতস্যৈ সবস্ত্রাচ্ছাদনালঙ্কৃতায়ৈ কন্যায়ৈ নমঃ ইতি ত্রিঃ প্রোক্ষ্য সম্পূজ্য বামপাণিনা ধৃত্বা ওঁ অদ্যেত্যাদি অমুকগোত্রঃ শ্রীঅমুকদেবশর্ম্মা

---

* অত্র পরিশিষ্টং—দাতা বৃণীধ্বমিতি ত্রয়াদেবং ত্রিঃ প্রযুজ্য দাতা প্রদাস্যানীতি চোচ্চৈস্ত্রির্ব্রূয়াৎ, অথ ব্রাহ্মণা উক্তস্বস্ত্যয়নাঃ শিবা আপঃ সন্তু সৌমনস্যমস্তু অক্ষতং চারিষ্টং চাস্তু দীর্ঘমায়ুঃ শ্রেয়ঃ শান্তিঃ পুষ্টিস্তুষ্টিশ্চাস্তু ইত্যুক্ত্বা এতদ্বচঃ সত্যমস্ত্বিত্যনুক্ত্ব সমানী আকূতিঃ প্রস্থগ্-মন্ত্রাধিয় সানস্য সঙ্কনীত্যেতা পঠেয়ুঃ। ইতি বিশেষমাহ।

শ্রীবিষ্ণুপ্রীতিকামঃ অমুকগোত্রস্যামুকপ্রবরস্য অমুকদেবশর্ম্মণঃ প্রপৌত্রায় এবং পৌত্রায়, পুত্রায়ামুকগোত্রায়ামুকপ্রবরায়ামুকদেবশর্ম্মণে বরায় ব্রাহ্মণায়ার্চ্চিতায়—অমুকগোত্রস্যামুকপ্রবরস্যামুকদেবশর্ম্মণঃ প্রপৌত্রীং পৌত্রীং পুত্রীং অমুকগোত্রামমুকপ্রবরাং শ্রীঅমুকীদেবীমর্চ্চিতাং, এবং ত্রিরাবৃত্তং কৃত্বা এনাং কন্যাং সালঙ্কারামাচ্ছাদিতাং প্রজাপতিদেবতাকাং তুভ্যমহং সম্প্রদদে। ইতি জলং বরহস্তে দদ্যাৎ। ততো বরঃ স্বস্তীত্যুক্ত্বা গায়ত্রীং পঠেৎ। ততঃ কন্যেয়ং প্রজাপতিদেবতাকা ইতি বদেৎ। ততো দাতা ওঁ ধর্ম্মে চার্থে চ কামে চ নাতিচরিতব্যা ত্বয়েয়মিতি বদেৎ। বরোঽপি ওমিতি প্রতিগৃহ্য স্বস্তীত্যুক্ত্বা। * কামস্তুতিং পঠেৎ—প্রজাপতির্ঋষিঃ কামো দেবতা বৃহতীচ্ছন্দঃ কামস্তুতিপাঠে বিনিয়োগঃ। ওঁ ক ইদং কস্মা অদাৎ কামঃ কামায়াদাৎ কামো দাতা কামঃ প্রতিগ্রহীতা কামং সমুদ্রমাবিশ কামেন ত্বাং প্রতিগৃহ্লামি কামৈতত্তে, বৃষ্টিরসি দ্যৌস্ত্বা (পরি) দদাতু পৃথিবী প্রতিগৃহ্লাতু। † ততো ব্রাহ্মণান্ বাচয়েৎ। ওঁ দক্ষিণাঃ পান্তু বহু দেয়ঞ্চ নো অস্তু প্রজাপতিঃ প্রীয়তাং তিথি-মুহূর্ত্ত-করণ-নক্ষত্র-গ্রহলগ্ন-সম্পদঃ সন্তু। ‡ ততঃ পুণ্যাহাদিকং বাচয়িত্বা কন্যাং কুশৈরভিষিঞ্চেৎ—ওঁ অনাবৃষ্টমস্যনাধৃষ্টং দেবানামোজোঽভিশস্তিপাঃ অনভিশস্ত্যঞ্জসাসত্যমুপাগসাংস্বস্তি তে মেধা। ওঁ যৎকক্ষীবাংসং বননং পুত্রো আঙ্গিরসামদ তেন নৈত্যে বিশ্বেদেবাঃ সংপ্রিয়াং সমজীজনম্। ওঁ সমুদ্রজ্যেষ্ঠা সলিলস্য মধ্যাৎ পুনানাযন্ত্যনিবিশমানাঃ। ইন্দ্রো যা বজ্রী বৃষভো ররাদ তা আপো দেবীরিহ মামবন্তু। ওঁ যা আপো দিব্যা উত বা স্রবন্তি খনিত্রিমা উত বা যাঃ স্বয়ংজাঃ। সমুদ্রার্থা যাঃ শুচয়ঃ পাবকাস্তা আপো দেবীরিহ মামবন্তু। ওঁ যাসাং রাজা বরুণো যাতি মধ্যে সত্যানৃতে অবপশ্যন্ জনানাম্। মধুশ্চ্যুতঃ শুচয়ো যাঃ পাবকাস্তা আপো দেবীরিহ মামবন্তু। ওঁ যাসু রাজা বরুণো যাসু সোমো বিশ্বেদেবা যাসূর্জ্জং মদন্তি। বৈশ্বানরো যাস্বগ্নিঃ প্রবিষ্টস্তা আপো দেবীরিহ মামবন্তু। ওঁ আপো হি ষ্ঠেতি, যো বঃ শিবতম ইতি, তস্মা অরঙ্গমাম ইতি। সূর্য্যা সাবিত্রী ঋষিঃ প্রজাপতির্দেবতা জগতীচ্ছন্দঃ

---

* দক্ষিণেঽংসে কন্যামভিমৃশ্যেতি পরিশিষ্টম্।

† অত্র পরিশিষ্টং—প্রজাপতিমনুস্মৃত্য ধর্ম্মপ্রজাসিদ্ধ্যর্থং কন্যাং প্রতিগৃহ্লামীতি ক্রয়াদেবং ত্রিঃ প্রযুজ্য পুরোধা দাতৃবরৌ প্রতি ঋতস্য হি শুরুধঃ সন্তি পূর্ব্বীরিতি তিস্রো জপিত্বা এতদ্বঃ সত্যসম্বন্ধমস্ত্বিতি ক্রয়াৎ। ইতি অতিরিক্তপ্রয়োগমাহ।

‡ এতত্তু পরিশিষ্টমতম্।

কন্যামভিমৃশ্য জপে বিনিয়োগঃ। ওঁ আনঃ প্রজাং জনয়তু প্রজাপতি-রাজরসায় সমনক্ত্বর্য্যমা। অতুর্মঙ্গলীঃ পতিলোকমাবিশ শন্নো ভব দ্বিপদেশঞ্চতুষ্পদে। ইতি কন্যামভিমৃশ্য জপেৎ। ততো দক্ষিণাং দদ্যাৎ—ওঁ অদ্যেত্যাদি কৃতৈতৎ কন্যাসম্প্রদানকর্ম্মণঃ প্রতিষ্ঠার্থং দক্ষিণামিদং কাঞ্চনং তন্মূল্যং বা শ্রীবিষ্ণুদৈবতমর্চ্চিতমমুকগোত্রায়ামুকপ্রবরায়ামুকদেবশর্ম্মণে বরায় তুভ্যমহং সম্প্রদদে। বরঃ স্বস্তীত্যুক্ত্বা দক্ষিণাং গৃহ্ণীয়াৎ। ততোঽচ্ছিদ্রাবধারণং কৃত্বা বৈগুণ্যশান্তিং কুর্য্যাৎ। আচারাৎ পত্যুর্দক্ষিণে বধূমুপবেশয়েৎ।

ইতি সম্প্রদানম্।

## অথ বিবাহ-কুশণ্ডিকা

তত্র বরঃ স্নাত আচারাৎ ষষ্ঠীমার্কণ্ডেয়পূজানন্তরং সামান্যকাণ্ডোক্তমগ্নিং সংস্থাপ্যান্বাধায় চরুং প্রসাধ্য * ইধ্মাধানান্তং কর্ম্ম সমাপ্যাত্মবামে পত্নীমুপবেশ্য তস্যা দক্ষিণকেশপক্ষে ঊর্ণাসূত্রং বধ্নীয়াদনেন মন্ত্রেণ—† অগ্নে বিশ্বেভিরিত্যস্য ভরদ্বাজঋষিরগ্নির্দেবতা ত্রিষ্টুপ্ ছন্দো বধূদক্ষিণকেশপক্ষে ঊর্ণাসূত্রবন্ধনে বিনিয়োগঃ। ওঁ অগ্নে বিশ্বেভিঃ স্বনীকদেবৈরূর্ণাবন্তং প্রথমঃ সীদযোনিম্। কুলায়িনং ঘৃতবন্তং সবিত্রে যজ্ঞং নয় যজমানায় সাধু। (তথৈব বামকেশপক্ষে বন্ধনম্) ইতি। ততো বরঃ কন্যায়ৈ বস্ত্রযুগ্মং দদ্যাৎ। যুবং বস্ত্রাণীত্যস্য দীর্ঘতমাঋষির্মিত্রাবরুণৌ দেবতে ত্রিষ্টুপ্ ছন্দো বস্ত্রপ্রদানে বিনিয়োগঃ। ওঁ যুবং বস্ত্রাণি পীবসা বসাথে যুবোরচ্ছিদ্রামন্তবোহসর্গাঃ। অবাতিরতমনৃতানি বিশ্ব ঋতেন মিত্রাবরুণা সচেথে। ততঃ কন্যাসখী বাসসী গৃহীত্বা পরিধাপয়েৎ। ওঁ যুবা সুবাসাঃ পরিবীত আগাৎ স উ শ্রেয়ান্ ভবতি জায়মানঃ। তং ধীরাসঃ কবয় উন্নয়ন্তি সাধ্যো মনসা বেদয়ন্তঃ।

---

* বাসুদেবপদ্ধতৌ অগ্নৌ অন্বাধানপ্রকারো দর্শিতঃ। যথা—সমিদ্দ্বয়মাদায় ওঁ অদ্যেত্যাদি অমুকগোত্রঃ শ্রীঅমুকদেবশর্ম্মা করিষ্যমাণ বিবাহ-কর্ম্মাঙ্গহোমকর্ম্মণি দেবতাপরিগ্রহার্থমন্বাধানমহং করিষ্যে। অস্মিন্নন্বাহিতেঽগ্নৌ জাতবেদসমগ্নিমিধ্মেন প্রজাপতিমাঘারাজ্যেনাগ্নিং পবমানমর্য্যমণং প্রজাপতিঞ্চ এতাঃ প্রধানদেবতা আজ্যদ্রব্যেণার্য্যমণং বরুণং প্রজাপতিং পূষণমেতাঃ প্রধানদেবতা লাজদ্রব্যেণাগ্নিং হবিঃশেষেণ স্বিষ্টকৃতমাজ্যেন ইধ্মসন্নহনেন রুদ্রং বিশ্বান্ দেবান্ সংস্রবেণ সর্ব্বপ্রায়শ্চিত্তদেবতা অগ্নিং দেবান্ বিষ্ণুমগ্নিং বায়ুং সূর্য্যং প্রজাপতিঞ্চাজ্ঞাতদোষনির্হরণার্থমনাজ্ঞাতদোষনির্হরণার্থং ত্রিশ্র আজ্যদ্রব্যেণ সাঙ্গেন কর্ম্মণা সদ্যোঽহং যক্ষ্যে ইতি সঙ্কল্প্য প্রজাপতিং মনসা ধ্যাত্বা তূষ্ণীমগ্নৌ জুহুয়াৎ।

† ঊর্ণাসূত্রবন্ধনাদি পরম্পরাবলোকনান্তং কর্ম্ম বাসুদেবপদ্ধতৌ ন ধৃতম্।

ততো বরঃ জাতবেদস ইত্যস্য কশ্যপঋষির্জাতবেদা অগ্নির্দেবতা ত্রিষ্টুপ্ ছন্দঃ স্বস্ত্যয়নে বিনিয়োগঃ। ওঁ জাতবেদসে সুনবাম সোমমরাতী যতো নিদহাতি বেদঃ। স নঃ পর্ষদতি দুর্গাণি বিশ্বা নাবেব সিন্ধুং দুরিতাত্যগ্নিঃ। ইতি পঠেৎ। ততঃ কন্যাবরয়োরন্যোন্যাবলোকনম্। ওঁ অঘোরচক্ষুরপতিঘ্নোধি শিবা পশুভ্যঃ সুমনাঃ সুবর্চ্চাঃ। বীরসূর্দেবকামা স্যোনা শন্নো ভব দ্বিপদে শং চতুষ্পদে। ততোঽগ্নেঃ পশ্চিমতঃ সপুত্রাং শিলাং প্রতিষ্ঠাপ্য শমী-পত্র-মিশ্রিতান্ লাজান্ সূর্পে নিধায় সপ্তমণ্ডলিকার্থং পিষ্টাতকমগ্নেঃ পূর্ব্বোত্তরকোণে উদকুম্ভঞ্চ স্থাপয়েৎ। ততঃ কন্যয়া সমন্বারব্ধো বর আজ্যেন পঞ্চাহুতীর্জুহুয়াৎ। অগ্ন আয়ূংষীতি তিসৃণাং শতং বৈখানসা ঋষয়ঃ পবমানোঽগ্নির্দেবতা গায়ত্রীচ্ছন্দো বিবাহে প্রধানাজ্যহোমে বিনিয়োগঃ। ওঁ অগ্ন আয়ূংষি পবস আসুবোর্জ্জমিষঞ্চ নঃ। আরে বাধস্ব দুচ্ছুনাং স্বাহা। পবমানায় অগ্নয়ে ইদং নমম। ওঁ অগ্নিঋষিঃ পবমানঃ পাঞ্চজন্যঃ পুরোহিতঃ। তমীমহে মহাগয়ম্ স্বাহা। পবমানায় অগ্নয় ইদং নমম। ওঁ অগ্নে পবস্ব স্বপা অস্মে বর্চঃ সুবীর্য্যম্। দধদ্রয়িং ময়ি পোষম্ স্বাহা। পবমানায় অগ্নয়ে ইদং নমম। প্রজাপত ইত্যস্য হিরণ্যগর্ভঋষিঃ প্রজাপতির্দেবতা ত্রিষ্টুপ্ ছন্দো বিবাহে প্রধানাজ্যহোমে বিনিয়োগঃ। ওঁ প্রজাপতে ন ত্বদেতান্যন্যো বিশ্বাজাতানি পরিতা বভূব। যৎ কামাস্তে জুহুমস্তন্নো অস্তু বয়ং স্যাম পতয়ো রয়ীণাং স্বাহা। প্রজাপতয় ইদং নমম। * ত্বমর্য্যমাইত্যস্যাত্রেয়ো বসুশ্রুতঋষিরগ্নির্দেবতা † ত্রিষ্টুপ ছন্দো বিবাহে প্রধানাজ্যহোমে বিনিয়োগঃ। ওঁ ত্বমর্য্যমা ভবসি যৎ কনীনাং নাম স্বধাবন্ গুহ্যং বিভর্ষি। অঞ্জন্তি মিত্রং সুধিতং ন গোভির্যদ্দম্পতী সমনসা কৃণোষি স্বাহা। অগ্নয় ইদং নমম। ‡ ততো বরঃ প্রত্যঙ্মুখঃ প্রাঙ্মুখাসীনায়া বধ্বা হস্তং গৃহ্ণীয়াদনেন মন্ত্রেণ—গৃভ্ণামীত্যস্য সূর্য্যাসাবিত্রীঋষির্ভগাদয়ো দেবতাস্ত্রিষ্টুপ্ ছন্দঃ পাণিগ্রহণে বিনিয়োগঃ। ওঁ গৃভ্ণামি তে সৌভগত্বায় হস্তং ময়া পত্যা জরদষ্টির্যথাসঃ। ভগো অর্য্যমা সবিতা পুরন্ধির্মহ্যং ত্বা দুর্গার্হপত্যায় দেবাঃ। ¶ ইত্যনেন সাঙ্গুষ্ঠং

---

* কেচিৎ আচার্য্যা ঋগাহুতীনাং ব্যাহৃত্যাহুতীনাঞ্চ সমুচ্চয়মিচ্ছন্তি তেনাষ্টাহুতয়ঃ। নৈকে কাঞ্চন আহুতিমিত্যাহুঃ। ইতি গৃহ্যসূত্রভাষ্যকার আহ।

† কেচিদর্য্যমা দেবতা ইত্যাহুঃ। অগ্নির্দেবতা ইতি ঋক্‌সংহিতায়াং পাঠঃ।

‡ বাসুদেবপদ্ধতৌ প্রাজাপত্যাহোমাৎ প্রাক্ আর্য্যমহোমো বিহিতঃ।

¶ অত্র গৃহ্যকারঃ অঙ্গুষ্ঠমেব গৃহ্ণীয়াৎ যদি কাময়ীত পুমাংস এব মে পুত্রা জায়েরন্নিতি।

করং গৃহ্লীয়াৎ। অথ গ্রন্থিবন্ধনম্। বিশ্বেত্তাত ইত্যস্য ভার্গবনেমঋষির্লিঙ্গোক্তা দেবতা ত্রিষ্টুপ্ ছন্দো গ্রন্থিবন্ধনে বিনিয়োগঃ। ওঁ বিশ্বেত্তাতে সবনেষু প্রবাচ্যা যা চকর্থ মঘবন্নিন্দ্র সুন্বতে। পারাবতং যৎ পুরুসংভৃতং বস্বাবৃণোঃ শরভায় ঋষিবন্ধবে। ততো বরো বধূসহিতোঽগ্নিং উদকুম্ভঞ্চ প্রদক্ষিণীকৃত্য পঠেৎ—ওঁ অমোঽহমস্মি সা ত্বং সা ত্বমস্যমোঽহং দ্যৌরহং পৃথিবী ত্বং সামাঽহমৃক্ত্বং তাবেহি বিবাহবহৈ প্রজাং প্রজনয়াবহৈ সংপ্রিয়ৌ রোচিষ্ণূ সুমনস্যমানৌ জীবেব শরদঃ শতম্। ততো বরোঽগ্নেরুত্তরে দক্ষিণপাদেন বধূমশ্মানমারোহয়েৎ—ওঁ ইমমশ্মানমারোহাশ্মেব ত্বং স্থিরা ভব। সহস্ব পৃতনাযতোঽভিতিষ্ঠ পৃতন্যতঃ। ততো বধ্বঞ্জলাবুপস্তীর্য্য ত্রিরভিঘার্য্য তদ্ভ্রাতা * দ্বির্লাজানাবপতি, তত্র ঘৃতস্রুবং দত্ত্বা অর্য্যমণমিত্যস্য সূর্য্যাসাবিত্রীঋষির্লিঙ্গোক্তা দেবতা অনুষ্টুপ্ ছন্দো লাজহোমে বিনিয়োগঃ। ওঁ অর্য্যমণং নু দেবং কন্যা অগ্নিমযক্ষত। স ইমাং দেবো অর্য্যমা প্রেতো মুঞ্চাতু মামুতঃ স্বাহা ইতি-বরেণ পঠিতে বধূরঞ্জলিভেদমকুর্ব্বতী লাজান্ জুহুয়াৎ। ততোঽগ্নিপ্রদক্ষিণং কৃত্বা পূর্ব্ববৎ শিলারোহণপূর্ব্বকং পুনর্লাজান্ গৃহীত্বা ঋষ্যাদিকং পূর্ব্ববৎ পঠিত্বা ওঁ বরুণং নু দেবং কন্যা অগ্নিমযক্ষত। স ইমাং দেবো বরুণঃ প্রেতো মুঞ্চাতু মামুতঃ স্বাহা। † বরুণায় ইদং নমম। ইতি দদ্যাৎ। পুনরপি প্রদক্ষিণাশ্মারোহণপূর্ব্বকং পূর্ব্ববৎ লাজান্ গৃহীত্বা ওঁ পূষণং নু দেবং কন্যা অগ্নিমযক্ষত। স ইমাং দেবঃ পূষা প্রেতো মুঞ্চাতু মামুতঃ স্বাহা। পূষ্ণে ইদং নমম। ইতি দদ্যাৎ। চতুর্থে প্রদক্ষিণমকৃত্বৈব লাজানভিঘার্য্য সূর্পপুটে হস্তদ্বয়ং দত্ত্বা তূষ্ণীং জুহুয়াৎ। ততো বরো যদি কন্যায়া ঊর্ণাদিলোমবদ্ধে দ্বিশিখে তদানেন মন্ত্রেণ মোচয়েৎ—সূর্য্যাসাবিত্রীঋষিরনুষ্টুপ্ ছন্দঃ কন্যা দেবতা শিখামোক্ষণে বিনিয়োগঃ। ওঁ প্র ত্বা মুঞ্চামি বরুণস্য পাশাদ্-যেন ত্বা বধ্নাৎ সবিতাসু শেবঃ। ঋতস্য যোনৌ সুকৃতস্য লোকে রিষ্টাং ত্বা সহপত্যা দধামি। ইতি দক্ষিণাং শিখাং মোচয়তি। সূর্য্যাসাবিত্রী-ঋষিরনুষ্টুপ্ ছন্দঃ কন্যা দেবতা শিখামোক্ষণে বিনিয়োগঃ। ওঁ প্রেতো

---

অঙ্গুলীরেব স্ত্রীকামঃ। রোমান্তে হস্তং সাঙ্গুষ্ঠমুভয়কামঃ। ইতি পাণিগ্রহণে কামনাভেদেন বিশেষমাহ।

* ভ্রাতৃস্থানো বা ইতি গৃহ্যসূত্রম্।

† গৃহ্যসূত্রে মুঞ্চাতু নামুতঃ ইতি পাঠো ধৃতঃ।

মুঞ্চামি নামুতঃ সুবদ্ধামমুতস্করম্। যথেয়মিন্দ্রমীঢ্বঃ সুপুত্রা সুভগা সতি। ইত্যুত্তরাং শিখাং মোচয়তি। ততঃ প্রাগুদীচ্যাং দিশি বধূং সপ্তমণ্ডলিকাসু সপ্তপদানি ক্রাময়তি। সপ্তভির্ম্মন্ত্রৈঃ—বসুশ্রুতঋষিস্ত্রিষ্টুপ্ ছন্দো লিঙ্গোক্তা দেবতাঃ সপ্তপদীকরণে বিনিয়োগঃ। ওঁ ইষ একপদীভব সা মামনুব্রতা ভব পুত্রান্ বিন্দাবহৈ বহূংস্তে সন্তু জরদষ্টয়ঃ। ইতি প্রথমমণ্ডলিকাম্। ঋষ্যাদিকং পূর্ব্ববৎ—ওঁ উর্জ্জে দ্বিপদীভব সা মামনুব্রতেত্যাদি। ইতি দ্বিতীয়মণ্ডলিকাম্। এবং ওঁ রায়স্পোষায় ত্রিপদীভবেত্যাদি। ওঁ মায়োভব্যায় চতুষ্পদীভবেত্যাদি (৪) ওঁ প্রজাভ্যঃ পঞ্চপদীভবেত্যাদি। (৫) ওঁ ঋতুভ্যঃ ষট্‌পদীভবেত্যাদি। (৬) ওঁ সখা সপ্তপদীভবেত্যাদি। (৭) ততো বেদ্যাং দম্পত্যোঃ শিরসী সন্নিধায় পূর্ব্বস্থাপিতকুম্ভোদকেন জীবৎপতিপুত্রা আম্রপল্লবেনাভিষিঞ্চেয়ুঃ। ততো বধূঃ ধ্রুবমরুন্ধতীং সপ্তঋষীন্ পশ্যেৎ, বরশ্চ মন্ত্রং পঠেৎ—ওঁ ধ্রুবা দ্যৌর্ধ্রুবা পৃথিবী ধ্রুবং বিশ্বমিদং জগৎ। ধ্রুবাসঃ পর্ব্বতা ইমে ধ্রুবো রাজা বিশাময়ম্। ওঁ ধ্রুবন্তে রাজা বরুণো ধ্রুবন্দেবো বৃহস্পতিঃ। ধ্রুবন্ত ইন্দ্রশ্চাগ্নিশ্চ রাষ্ট্রং ধারয়তাং ধ্রুবম্। ইতি * দৃষ্ট্বা বাচং বিসৃজেত ওঁ জীবপত্নী প্রজাং বিন্দেয়মিতি। ততো যজ্ঞসমাবেশাদ্দিনান্তরে বধূপ্রবেশো ন ভবতি তদা প্রায়শ্চিত্তং সমাপ্যাগ্নি বিসর্জ্জয়েৎ। নচেত্তদা চতুর্থীহোমং কুর্য্যাৎ। † অস্মিন্ সময়ে আচারাৎ বরস্য বামভাগে বধূমুপবেশ্য বরেণৈব তস্যাঃ সীমন্তে সিন্দূরং দাপয়েৎ। অথ প্রাস্থানিকং যথাদৌ বরো বধূং যানমারোহয়েৎ। ওঁ পূষা ত্বেতো নয়তু ইত্যস্য সূর্য্যাসাবিত্রী দেবতে ত্রিষ্টুপ্ ছন্দো যানারোহণে বিনিয়োগঃ। ওঁ পূষা ত্বেতো নয়তু হস্তগৃহ্যাশ্বিনা ত্বা প্রবহতাং রথেন। গৃহান্ গচ্ছ গৃহপত্নী যথাসো বশিনী ত্বং বিদথমাবদাসি। অথ পথি যদি নাবাগমনং ভবতি তদা তাং নাবমারোহয়েৎ—ওঁ অশ্মন্বতী রীয়ত ইত্যস্য দেবা ঋষয়োঽগ্নির্দেবতা ত্রিষ্টুপ্ ছন্দো

---

* বাসুদেবপদ্ধতৌ ধ্রুবদর্শনানন্তরং বক্ষ্যমাণা আশীর্ব্বাচকা মন্ত্রা উল্লিখিতাঃ। যথা—ওঁ অবিধবা ভব বর্ষাণি শতংসাগ্রন্তু সুব্রতা। তেজস্বী চ যশস্বী চ ধর্ম্মপত্নী পতিব্রতা। জনয়েদ্বহুপুত্রাণি মা চ দুঃখং লভেৎ ক্বচিৎ। ভর্ত্তা তে সোমপা নিত্যং ভবেদ্ধর্ম্মপরায়ণঃ। অষ্টপুত্রা ভব ত্বঞ্চ সুভগা চ পতিব্রতা। ভর্ত্তুশ্চৈব পিতুর্ভ্রাতুর্হৃদয়ানন্দিনী সদা। ইন্দ্রস্য তু যথেন্দ্রাণী শ্রীধরস্য যথা শ্রিয়া। শঙ্করস্য যথা গৌরী তদ্বর্ত্তুরপি ভর্ত্তরি (তথা ত্বমপি ভর্ত্তরি ইতি পাঠান্তরম্)। অত্রের্যথানুসূয়া স্যাৎ বশিষ্ঠস্যাপ্যরুন্ধতী। কৌশিকস্য যথা শচী (যথা সতী) তথা ত্বমপি ভর্ত্তরি। ধ্রুবৈধি পোষ্যা ময়ি মহ্যং ত্বাদাদ্‌বৃহস্পতিঃ। ময়া পত্যা প্রজাবতী সংজীব শরদঃ শতম্ ইতি॥

† প্রাস্থানিকং কর্ম্ম প্রাথমিকত্বাৎ চতুর্থীহোমাৎ প্রাক্ কার্য্যম্। বাসুদেবপদ্ধতৌ তথা লিখিতত্বাচ্চ ইত্যবধেয়ম্।

নাবারোহণে বিনিয়োগঃ। ওঁ অশ্মন্বতী রীয়তে সংরভধ্বমুত্তিষ্ঠত প্রতরতা সখায়ঃ। ইত্যর্দ্ধর্চ্চেন। অথ তাম্ উত্তরেণোৎক্রাময়েৎ। ঋষ্যাদিকং পূর্ব্ববৎ, বিশেষস্তু নাববতারণে বিনিয়োগঃ। ওঁ অত্রাজহাম যে অসন্নশেবাঃ শিবা-ন্বয়মুত্তরে মাভিবাজান্। ইত্যর্দ্ধর্চ্চেন। অথ পত্নীং রুদতীং দৃষ্ট্বা বরো জপেৎ। ওঁ জীবং রুদন্তীত্যস্য কাক্ষীবতী ঋষির্ঘোষাশ্বিনৌ দেবতে জগতীচ্ছন্দো জপে বিনিয়োগঃ। ওঁ জীবং রুদন্তি বিময়ন্তে অধ্বরে দীর্ঘামনুপ্রসিতিং দীধিযু-র্নরঃ। বামং পিতৃভ্যো য ইদং সমেরিরেময়ঃ পতিভ্যো জনয়ঃ পরিষ্বজে। *

ততঃ কল্যাণেষু দেশচতুষ্পথেষু বিশ্রম্য জপেৎ। মা বিদন্ ইত্যস্য সূর্য্যাসাবিত্রী ঋষিঃ সূর্য্যাসাবিত্রী দেবতা অনুষ্টুপ্ ছন্দশ্চতুষ্পথামন্ত্রণে বিনিয়োগঃ। ওঁ মা বিদন্ পরিপন্থিনো য আসীদন্তি দম্পতী। সুগেভির্দুর্গমতীতামপদ্রান্ত্বরাতয়ঃ। বর্ত্মনি চেদ্বধূসমীক্ষকান্ পশ্যেৎ তদা ইমং মন্ত্রং জপেৎ—ওঁ সুমঙ্গলীরিয়ং বধূ-রিমাং সমেত পশ্যত। সৌভাগ্যমস্যৈ দত্ত্বায়াথাস্তং বিপরেতন। ততঃ শুভ-দিবসে নববধূং গৃহং প্রবেশয়েৎ—ওঁ ইহ প্রিয়ং প্রজয়া তে সমৃধ্যতামস্মিন্ গৃহে গার্হপত্যায় জাগৃহি। এনাপত্যা তন্বং সংসৃজ স্বাধাজিব্রী বিদথ মাবদাথঃ। ততঃ প্রাগগ্রীবাস্তৃতানডুচ্চর্ম্মণি বধূমুপবেশয়েৎ। তয়া সংস্পৃষ্টঃ স্বয়মেব জুহুয়াৎ—ওঁ আন ইতি চতসৃণাং সূর্য্যাসাবিত্রীঋষিঃ সূর্য্যাসাবিত্রী দেবতা (নানাচ্ছন্দাংসি) আজ্যহোমে বিনিয়োগঃ। আনঃ প্রজাং জনয়তু প্রজাপতিরাজরসায় সমন-ক্ত্বর্য্যমা। অদুর্ম্মঙ্গলীঃ পতিলোকমাবিশশন্নো ভব দ্বিপদে শং চতুষ্পদে স্বাহা।* ইদং সূর্য্যায়। † ওঁ অঘোরচক্ষুরপতিঘ্ন্যেধি শিবা পশুভ্যঃ সুমনাঃ সুবর্চ্চাঃ। বীরসূর্দেবকামা স্যোনা শন্নো ভব দ্বিপদেশং চতুষ্পদে স্বাহা। সূর্য্যায় ইদং নমম। ওঁ ইমাং ত্বমিন্দ্রমীঢ্বঃ সুপুত্রাং সুভগাং কৃণু। দশাস্যাং পুত্রানাধেহি পতিমেকাদশং কৃধি স্বাহা। সূর্য্যায় ইদং নমম। ওঁ সম্রাজ্ঞী শ্বশুরে ভব সম্রাজ্ঞী শ্বশ্রাং ভব। ননান্দরি সম্রাজ্ঞী ভব সম্রাজ্ঞী অধিদেবৃষু স্বাহা। সাবিত্র্যৈ ইদং নমম। ইতি চতুরাহুতীর্হুত্বা ওঁ সমঞ্জন্তু ইত্যস্য সূর্য্যাসাবিত্রী ঋষিঃ সূর্য্যা-সাবিত্রী দেবতা অনুষ্টুপ্ ছন্দো জপে বিনিয়োগঃ। ওঁ সমঞ্জন্তু বিশ্বেদেবাঃ সমাপো হৃদয়ানি নৌ। সম্মাতরিশ্বা সন্ধাতা সমুদেষ্ট্রী দধাতু নৌ। ইতি মন্ত্রেণ পত্ন্যৈ দধি প্রাশিতুং যচ্ছতি সা চাচাম্য দধি প্রাশ্য পুনরাচামেৎ। অথবা

---

* কালেশিপদ্ধতৌ অত্র ঋষিচ্ছন্দো দৈবতানি ন ধৃতানি বাসুদেবপদ্ধতৌ তু ধৃতমিতি।

† কালেশিপদ্ধতৌ আদর্শপুস্তকে এতেষাং মন্ত্রাণাং ঋষিচ্ছন্দোদৈবতোল্লেখো নাস্তি।

সমঞ্জন্তু ইত্যনেন আজ্যশেষেণ বধূহৃদয়ং স্বহৃদয়ঞ্চানক্তি। * অথ চতুর্থীহোমঃ। স চ ত্রিরাত্রে নিবৃর্ত্তে দ্বাদশরাত্রে সংবৎসরে বা কর্ত্তব্যঃ। শিখিনামানমগ্নিং সংস্থাপ্য উপলেপনাদ্যাজ্যপ্রতাপনান্তং কর্ম্ম কৃত্বা চরুং শ্রপয়েৎ। ততো মহা-ব্যাহৃতিভিশ্চতস্র আজ্যাহুতীর্জুহুয়াৎ। যথা—ওঁ ভূরগ্নয়ে পৃথিব্যৈ চ দিব্যায় চ মহতে চ স্বাহা। অগ্নয় ইদং নমম। ওঁ ভুবো বায়বে চান্তরীক্ষায় দিব্যায় চ মহতে চ স্বাহা। বায়ব ইদং নমম। ওঁ স্বঃ সূর্য্যায় দিব্যায় চ মহতে চ স্বাহা। সূর্য্যায় ইদং নমম। ওঁ ভূর্ভুবঃস্বশ্চন্দ্রমসে নক্ষত্রেভ্যো দিগ্‌ভ্যশ্চ † দিব্যায় চ মহতে চ স্বাহা। চন্দ্রমসে নক্ষত্রেভ্যো দিগ্‌ভ্য ইদং নমম। ততশ্চরুণা ‡ সপ্তাহুতীর্জুহুয়াৎ। ওঁ অগ্নে প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি যাস্যাঃ পতিঘ্নী তনূস্তামস্যামপজহি স্বাহা। অগ্নয়ে ইদং নমম। ওঁ বায়ো প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি যাস্যাঃ অপুত্র্যা তনূস্তামস্যামপজহি স্বাহা। বায়বে ইদং নমম। ওঁ সূর্য্য প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি যাস্যাঃ অপসব্যা তনূস্তামস্যামপজহি স্বাহা। সূর্য্যায় ইদং নমম। ওঁ অর্য্যমণং নু দেবং কন্যা অগ্নিমযক্ষত। স ইমাং দেবো অর্য্যমা প্রেতো মুঞ্চাতু মামুতঃ স্বাহা। অর্য্যম্ন ইদং নমম। ওঁ বরুণং নু দেবং কন্যা অগ্নিময়ক্ষত। স ইমাং দেবো বরুণঃ প্রেতো মুঞ্চাতু মামুতঃ স্বাহা। বরুণায় ইদং নমম। ওঁ পূষণং নু দেবং কন্যা অগ্নিমযক্ষত। স ইমাং দেবঃ পূষা প্রেতো মুঞ্চাতু মামুতঃ স্বাহা। পূষ্ণ ইদং নমম। ওঁ প্রজাপতে ন ত্বদেতান্যন্যো বিশ্বা জাতানি পরিতা বভূব। যৎ কামাস্তে জুহুমস্তন্নো অস্তু বয়ং স্যাম পতয়ো রয়ীণাং স্বাহা। প্রজাপতয় ইদং নমম। ¶ অথ চরুণা স্বিষ্টকৃতং সমাপ্য আজ্যেন প্রায়শ্চিত্তং সমাপয়েৎ। ততঃ উদীচ্যং কর্ম্ম কৃত্বা পূর্ণাহুত্যাং মৃড়নামানমগ্নিং সম্পূজ্য পূর্ণাহুতিং দত্ত্বা দক্ষিণাং সমাপ্য স্বস্ত্যয়নং বাচয়ীত। §

ইতি কালেশিপদ্ধতৌ বিবাহপদ্ধতিঃ।

---

* চতুর্থীহোমো ন সূত্রকারধৃতঃ।

† ওঁ ভূর্ভুবঃস্বঃ চন্দ্রমসে নক্ষত্রেভ্যো দিগ্‌ভ্যঃ প্রজাপতয়ে চ স্বাহা ইতি বাসুদেবপদ্ধতিঃ।

‡ গৃহ্যপরিশিষ্টমতে চতুর্থীহোমশ্চরুণৈব।

¶ ওঁ দ্যৌস্ত্বা দদাতু পৃথিবী ত্বা প্রতিগৃহ্লাতু স্বাহা ধ্রুবে ইদং নমম। ইতি অধিকো হোমো বাসুদেবপদ্ধতিসম্মতঃ।

§ ওঁ সত্যেনোত্তভিতা ভূমিঃ সূর্য্যেণোত্তভিতা দ্যৌঃ। ঋতেনাদিত্যাস্তিষ্ঠন্তি দিবি সোমো অধিশ্রিতঃ। সোমেনাদিত্যা বলিনঃ সোমেন পৃথিবী মহী। অথো নক্ষত্রাণামেষামুপস্থে

## অথ গর্ভাধানম্

তত্র মারুতো নামাগ্নিঃ। যদা পত্ন্যাঃ প্রথমং রজো ভবতি, তদা সা গৃহে ঋতুব্রতমাচরন্তী ত্রিরাত্রমতিবাহয়েৎ। ততঃ ষোড়শদিনাভ্যন্তরে জ্যোতিঃশাস্ত্রোক্তফলবন্ধন-দিবসে পতিঃ কৃতনিত্যকৃত্যঃ সঙ্কল্প্য সগণাধিপ-গৌর্য্যাদি-ষোড়শমাতৃকা-পূজা-বসুধারা-সম্পাতনায়ুষ্যসূক্তজপাভ্যুদয়িকানি কৃত্বা শুভলগ্নসময়ে প্রাঙ্গণকৃতচ্ছায়ামণ্ডপে মঙ্গলতূর্য্যঘোষেষু সৎসু প্রাঙ্মুখ আসনে উপবিশেৎ। পত্নী চ পরিহিতবস্ত্রালঙ্কারবতী নাভৌ নিহিতসুবর্ণপদ্মা পত্যুর্বামপার্শ্বে উপবিশেৎ। * তত উপলেপনাদি-মেক্ষণসংস্কারান্তং কর্ম্ম কৃত্বা প্রাজাপত্যং চরুং † প্রসাধ্য ইধ্মাধানাদিকং কৃত্বাঽগ্নের্নামকরণাঘারাজ্যভাগান্তং কর্ম্ম কুর্য্যাৎ। ততঃ পত্নীসমারব্ধঃ পতিঃ স্রুচি স্রুবেণাজ্যং দত্ত্বা পূর্ব্বার্দ্ধান্মেক্ষণেন দ্বিরবদায় পুনরাজ্যেনাভিঘার্য্য ওঁ প্রজাপতয়ে স্বাহা প্রজাপতয়ে ইদং নমম ইতি চরুণা হুত্বা বক্ষ্যমাণমন্ত্রৈঃ ‡ সপ্তাহুতীর্জুহোতি—বিষ্ণুর্যোনিমিতি ত্র্যচস্য (গর্ভকর্ত্তা) ত্বষ্টাঋষি (হিরণ্যগর্ভঋষিঃ) বিষ্ণু-ত্বষ্টৃ-প্রজাপতি-ধাতারো দেবতা অনুষ্টুপ্ ছন্দো গর্ভাধানে (চরু)হোমে বিনিয়োগঃ। ওঁ বিষ্ণুর্যোনিং কল্পয়তু ত্বষ্টা রূপাণি পিংশতু। আসিঞ্চতু প্রজাপতির্ধাতা গর্ভং দধাতু তে স্বাহা। বিষ্ণু-ত্বষ্টৃ-প্রজাপতি-ধাতৃভ্য ইদং নমম। গর্ভং ধেহীতি মন্ত্রস্য (ত্বষ্টা) হিরণ্যগর্ভঋষিঃ সিনীবালী-সরস্বত্যশ্বিনো দেবতা অনুষ্টুপ্ ছন্দো গর্ভাধানহোমে বিনিয়োগঃ। ওঁ গর্ভং ধেহি সিনীবালি গর্ভং

---

সোম আহিতঃ। সোমং মন্যতে পপিবান্ যৎ সংপিষন্ত্যোষধিম্। সোমং যং ব্রহ্মাণো বিদুর্ন তস্যাশ্নাতি কশ্চন। আচ্ছদ্বিধানৈগুপিতো বার্হতৈঃ সোমরক্ষিতঃ। গ্রাব্ণামিচ্ছৃণ্বন্তিষ্ঠসি ন তে অশ্নাতি পার্থিবঃ। যত্ত্বা দেব প্রপিবন্তি তত আপ্যায়সে পুনঃ। বায়ুঃ সোমস্য রক্ষিতা সমানাং মাস আকৃতিঃ। ইতি সূক্তার্থবিদে বিপ্রায় দক্ষিণাং দদ্যাদিতি বাসুদেবপদ্ধতিমতম্।

* গর্ভাধানে পত্যুরেবাধিকারঃ। তদঙ্গহোমে তু স্বয়মশক্তো ব্রাহ্মণং বৃণুয়াৎ। যথা—ওঁ অদ্যেত্যাদি অমুকগোত্রমৃগ্বেদান্তর্গতাশ্বলায়নশাখৈকদেশাধ্যায়িনং শ্রীঅমুকদেবশর্ম্মাণং মৎপত্ন্যাঃ শ্রীঅমুকীদেব্যাঃ প্রথমঋতুসংস্কারকর্ম্মাঙ্গসব্রহ্মহোমকর্ম্ম কর্ত্তুং ভবন্তমহং বৃণে। ওঁ বৃতোঽস্মীতি প্রতিবচনম্। যথাবিহিতং হোমকর্ম্ম কুরু ইতি প্রার্থয়েৎ। ওঁ যথাজ্ঞানং করবাণীতি প্রতিবচনম্।

† তত্র চ বিশেষঃ—ওঁ অদ্যেত্যাদি কর্ত্তব্য-গর্ভাধানকর্ম্মাঙ্গমন্বাধানমহং করিষ্যে ইত্যাদ্যূহো বাক্যে কার্য্যঃ। মুষ্টিগ্রহণমভিহিতম্ বাসুদেবপদ্ধতৌ যথা—ওঁ বিষ্ণবে ত্বা জুষ্টং গৃহ্লামি এবং নির্ব্বপামি, প্রোক্ষামি। তথা সিনীবাল্যৈ, অশ্বিনীকুমারাভ্যাং, বিষ্ণবে, পৃথিব্যৈ, বিষ্ণবে, প্রজাপতয়ে ইতি।

‡ বাসুদেবমতে চরুণৈব সপ্তাহুতয়ঃ। পরিশিষ্টমতে আজ্যেন।

ধেহি সরস্বতি। গর্ভন্তে অশ্বিনৌ দেবাবাধত্তাং পুষ্করস্রজা স্বাহা। সিনীবালী-সরস্বত্যশ্বিভ্যঃ ইদং নমম। (ত্বষ্টা) হিরণ্যগর্ভঃ ঋষিরশ্বিনৌ দেবতে অনুষ্টুপ্ ছন্দো গর্ভাধানহোমে বিনিয়োগঃ। ওঁ হিরণ্ময়ী অরণীয়ং নির্ম্মন্থতো অশ্বিনা। তন্তে গর্ভং হবামহে দশমে মাসি সূতবে স্বাহা। অশ্বিভ্যাম্ ইদং নমম। নেজমেষেতি তিসৃণাং (ত্বষ্টা) হিরণ্যগর্ভঋষিঃ প্রজাপতির্দ্দেবতা (বিষ্ণুর্দ্দেবতা) অনুষ্টুপ্ ছন্দো গর্ভাধানহোমে বিনিয়োগঃ। ওঁ নেজমেষ পরাপত সুপুত্রঃ পুনরাপত। অস্যৈ মে পুত্রকামায়ৈ গর্ভমাধেহি যঃ পুমান্ স্বাহা। প্রজাপতয়ে (বিষ্ণবে) ইদং নমম। ওঁ যথেয়ং পৃথিবী মহ্যুত্তানা গর্ভমাদধে। এবং তং গর্ভমাধেহি দশমে মাসি সূতবে স্বাহা। বিষ্ণবে (পৃথিব্যৈ) ইদং নমম। ওঁ বিষ্ণোঃ শ্রেষ্ঠেন রূপেণাস্যাং নার্য্যাং গবীন্যাং। পুমাংসং (পুত্রান্) পুত্রমাধেহি দশমে মাসি সূতবে স্বাহা। বিষ্ণবে ইদং নমম। প্রজাপত ইত্যস্য হিরণ্যগর্ভঋষিঃ প্রজাপতির্দ্দেবতা ত্রিষ্টুপ্ ছন্দো গর্ভাধানে (চরু) হোমে বিনিয়োগঃ। ওঁ প্রজাপতে ন ত্বদেতান্যন্যো বিশ্বা জাতানি পরি তা বভূব। যৎকামাস্তে জুহুমস্তন্নো অস্তু বয়ং স্যাম পতয়ো রয়ীণাং স্বাহা। প্রজাপতয়ে ইদং নমম। ইতি সপ্তাজ্যাহুতীর্জুহোতি। ততো পতির্বক্ষ্যমাণমন্ত্রৈঃ পত্ন্যা মূর্দ্ধান-মালভেত। অপ নঃ শোশুচদঘমিত্যস্য অষ্টর্চ্চস্য সূক্তস্য কুৎসঋষিঃ শুচিরগ্নি-র্দ্দেবতা গায়ত্রীচ্ছন্দঃ শির আলভনে বিনিয়োগঃ। ওঁ অপনঃ শোশুচদঘমগ্নে শুশুগ্ধ্যা রয়িম্। অপনঃ শোশুচদঘম্। ওঁ সুক্ষেত্রিয়া সুগাতুয়া বসূয়া চ যজামহে। অপনঃ শোশুচদঘম্। ওঁ প্রযদ্ ভন্দিষ্ঠ এষাং প্রাস্মাকাসশ্চ সূরয়ঃ। অপনঃ শোশুচদঘম্। ওঁ প্রযত্তে অগ্নে সূরয়ো জায়েমহি প্রতে বয়ম্। অপনঃ শোশুচদঘম্। ওঁ প্রযদগ্নেঃ সহস্বতো বিশ্বতো যন্তি ভানবঃ। অপনঃ শোশুচদঘম্। ওঁ ত্বং হি বিশ্বতোমুখ বিশ্বতঃ পরিভূরসি। অপনঃ শোশুচদঘম্। ওঁ দ্বিষো নো বিশ্বতোমুখাতিনাবেব পারয়। অপনঃ শোশুচদঘম্। ওঁ স নঃ সিন্ধুমিব নাবযাতি পর্ষা স্বস্তয়ে। অপনঃ শোশুচদঘম্। (ততো যাঃ ফলিনীর্যা অফলা অপুষ্পা যাশ্চ পুষ্পিণীঃ। বৃহস্পতিপ্রসূতাস্তা নো মুঞ্চন্ত্বংহসঃ এতাং জপিত্বা বধেন দস্যুমিতি যণ্ণাং বসুশ্রুতঋষিরগ্নি-র্দ্দেবতা ত্রিষ্টুপ্ ছন্দোঽগ্ন্যুপস্থানে বিনিয়োগঃ। ওঁ বধেন দস্যুং প্রহি চাতয়স্ব বয়ঃ কৃণ্বানস্তন্বে স্বায়ৈ। পিপর্ষি যৎ সহসস্পুত্রদেবান্ সো অগ্নে পাহি নৃতম বাজে অস্মান্। ওঁ বয়স্তে অগ্ন উকৃথৈর্বিধেম

বয়ং হব্যৈঃ পাবক ভদ্রশোচে। অস্মে রয়িং বিশ্ববারং সমিন্বাস্মে বিশ্বানি দ্রবিণানি ধেহি। ওঁ অস্মাকমগ্নে অধ্বরং জুষস্ব সহসঃ সূনো ত্রিষধস্থ হব্যম্। বয়ং দেবেষু সুকৃতঃ স্যাম শর্ম্মণা নস্ত্রিবরূথেন পাহি। ওঁ বিশ্বানি নো দুর্গহা জাতবেদঃ সিন্ধুং ন নাবা দুরিতাতিপর্ষি। অগ্নে অত্রিবন্নমসা গৃণানোঽস্মাকং বোধ্যবিতা তনূনাম্। ওঁ যস্ত্বা হৃদা কীরিণা মন্যমানো মর্ত্ত্যং মর্ত্ত্যো জোহবীমি। জাতবেদো যশো অস্মাসু ধেহি প্রজাভিরগ্নে অমৃতত্বমস্যাম্। ওঁ যস্মৈ ত্বং সুকৃতে জাতবেদ উলোকমগ্নে কৃণবঃ স্যোনম্। অশ্বিনং সপুত্রিণং বীরবন্তং গোমন্তং রয়িং নশতে স্বস্তি। অগ্নিস্ত্ব বিশ্রবস্তমমিতিদ্বয়োরাত্রেয়োবসূযবঋষিরগ্নির্দেবতা অনুষ্টুপ্ ছন্দোঽগ্ন্যুপস্থানে বিনিয়োগঃ। ওঁ অগ্নিস্ত্ব বিশ্রবস্তমং ভুবি ব্রহ্মাণমুত্তমম্। অতূর্ত্তং শ্রাবয়ৎ পতিং পুত্রং দদাতি দাশুষে। ওঁ অগ্নির্দদাতি সৎপতিং সাসাহয়ো যুধা নৃভিঃ। অগ্নিরত্যং রঘুষ্যদং জেতারমপরাজিতম্।) ইত্যষ্টাভিরগ্নিমুপস্থায় * স্বিষ্টকৃদাদিহোমশেষং (চরুণা) সমাপ্য সূর্য্যোপস্থানং † কুর্য্যাৎ। সূর্য্যো নো দিবস্পাতু ইতি পঞ্চর্চস্য সূক্তস্য চক্ষুঋষিঃ সূর্য্যো দেবতা গায়ত্রীচ্ছন্দঃ সূর্য্যোপস্থানে বিনিয়োগঃ। ওঁ সূর্য্যো নো দিবস্পাতু বাতো অন্তরিক্ষাৎ। অগ্নির্নঃ পার্থিবেভ্যঃ। জোষা সবিতর্যস্য তে হরঃ শতং সবা অর্হতি। পাহি নো দিদ্যুতঃ পতন্ত্যাঃ। চক্ষুর্নো দেবঃ সবিতা চক্ষুর্ন উত পর্ব্বতঃ। চক্ষুর্ধাতা দধাতু নঃ। চক্ষুর্নো ধেহি চক্ষুষে চক্ষুর্বিখ্যৈ তনূভ্যঃ। সংচেদং বি চ পশ্যেম। সুসন্দৃশং ত্বা বয়ং প্রতিপশ্যেম সূর্য্য। বিপশ্যেম নৃচক্ষসঃ। ‡ ততঃ পতিরুত্থায় সূর্য্যায়ার্ঘ্যদানম্ কুর্য্যাৎ ¶ —যথা আকৃষ্ণেনেতি মন্ত্রস্য হিরণ্যস্তূপঋষিঃ সবিতা দেবতা ত্রিষ্টুপ্ ছন্দঃ সূর্য্যার্ঘ্যদানে বিনিয়োগঃ। ওঁ আকৃষ্ণেন রজসা বর্ত্তমানো নিবেশয়ন্নমৃতং মর্ত্ত্যঞ্চ। হিরণ্যয়েন সবিতা রথেনা দেবো যাতি ভুবনানি পশ্যন্। ওঁ বিশ্বাত্মা বিশ্বকর্ত্তা চ বিশ্বেশো বিশ্বদক্ষিণঃ।

---

* অগ্ন্যুপস্থানং নাস্মদ্দেশীয়পুস্তকে লিখিতং ধৃতন্তু পরিশিষ্টকৃতা অতো নোপেক্ষিতম্।

† পরিশিষ্টমতে আদৌ সূর্য্যোপস্থানং ততঃ স্বিষ্টকৃদ্ধোমঃ।

‡ ততো যাঃ ফলিনীর্যা অফলা ইত্যাদি সূর্য্যমুপস্থায় ইত্যন্তো ভাগো নাস্মদ্দেশীয়পুস্তকেষু দৃশ্যতে। দৃশ্যতে তু গৃহ্যপরিশিষ্টে দেশান্তরীয়পুস্তকেষু চ নাত উপেক্ষিতঃ। অথাত্র অস্মদ্দেশীয়পুস্তকে বিশেষঃ। আকৃষ্টেনেতি সূর্য্যার্ঘ্যদানম্।

¶ পরিশিষ্টকৃতা সূর্য্যার্ঘ্যদানং ন বিহিতম্।

নবপুষ্পোৎসবে কালে গৃহাণার্ঘ্যং দিবাকর। নমস্তে পদ্মিনীকান্ত সুধাকান্তি নমোঽস্তু তে। নবপুষ্পোৎসবে হ্যেতদ্ গৃহাণার্ঘ্যং দিবাকর। এভির্মন্ত্রৈঃ সূর্য্যার্ঘ্যং দদ্যাৎ। ততঃ ফলবন্ধনম্ যথা—যাঃ ফলিনীরিতি মন্ত্রস্য ত্রিতঋষির্বনস্পতির্দেবতাঽনুষ্টুপ্ ছন্দঃ ফলদানে বিনিয়োগঃ। ওঁ যাঃ ফলিনীরিত্যাদিঃ। ওঁ যাঃ ফলিনীরিতি-মন্ত্রেণ পত্ন্যৈ ফলানি দদ্যাৎ। সা চ প্রসারিতকরা পুত্রাণামিত্যাশংসন্তী গৃহ্লীয়াৎ। ইতি চ অতিরিক্তপাঠঃ কুত্রচিৎ বর্ত্ততে, পরিশিষ্টকৃতা ন ধৃতঃ। ততঃ স্বিষ্টকৃদাদি সমাপয়েৎ। ওঁ অদ্যেত্যাদি মৎপত্ন্যা অমুকীদেব্যাঃ কৃতৈতৎ ঋতুসংস্কারকর্ম্মাঙ্গভূত-সব্রহ্মক-হোমপ্রতিষ্ঠার্থং দক্ষিণামিদং পূর্ণপাত্রামুকল্পভোজ্যং ব্রহ্মণে তুভ্যমহং সম্প্রদদে। ততোঽচ্ছিদ্রাবধারণম্। অথ গর্ভলম্ভনম্। * ঋতাবনুকূলায়াং নিশি স্বলঙ্কৃতে সুগন্ধবাসিতে বেশ্মনি তথাভূতে পর্য্যঙ্কশয়নে সুস্নাতামলঙ্কৃতাং শুক্লবসনাং স্রগ্বিণীং ভার্য্যাং স্বয়ং তথাভূতঃ প্রবেশ্য দূর্ব্বাঃ পিষ্ট্বা অশ্বগন্ধাং বা সূক্ষ্মেণ বাসসা সংগৃহ্য উদীর্ষ্বাত ইতি মন্ত্রদ্বয়স্য সূর্য্যাসাবিত্রীঋষিঃ সূর্য্যাসাবিত্রী দেবতা আদ্যা-ত্রিষ্টুব্-অন্ত্যা অনুষ্টুপ্ ছন্দো নস্যদানে বিনিয়োগঃ। ওঁ উদীর্ষ্বাতঃ পতিবতী হ্যেষা বিশ্বাবসুং নমসা গীর্ভিরীলে। অন্যামিচ্ছ পিতৃষদং ব্যক্তাং সতে ভাগো জনুষা তস্য বিদ্ধি (স্বাহা)। ওঁ উদীর্ষ্বাতো বিশ্বাবসো নম সেলামহে ত্বা। অন্যামিচ্ছ প্রফর্ব্ব্যং সংজায়াং পত্যা সৃজ (স্বাহা)। ইতি উভয়োর্নাসাবিলয়োর্নিষিচ্য ওঁ গন্ধর্ব্বস্য বিশ্বাবসোর্মুখমসীতি উপস্থমভিমৃশ্য বিষ্ণুর্যোনিমিতি মন্ত্রস্য বশিষ্ঠঋষির্লিঙ্গোক্তা দেবতা অনুষ্টুপ্ ছন্দো যোনিবিকাশে বিনিয়োগঃ। ওঁ বিষ্ণুর্যোনিং কল্পয়তু ত্বষ্টা রূপাণি পিংশতু। আসিঞ্চতু প্রজাপতির্ধাতা গর্ভং দধাতু তে। ইতি দ্বারং বিদারয়েৎ। তাং পূষন্নিতি মন্ত্রস্য সূর্য্যাসাবিত্রীঋষিঃ সূর্য্যাসাবিত্রী দেবতা পঙ্‌ক্তিশ্ছন্দঃ পত্ন্যুপগমনে বিনিয়োগঃ। ওঁ তাং পূষঞ্ছিবতমা মেরয়স্ব যস্যাং বীজং মনুষ্যা বপন্তি। যা ন উরূ উশতী বিশ্রয়াতে যস্যামুশন্তঃ প্রহরাম শেফম্। ইতি দ্বাভ্যাং বিহরেৎ (যস্যামিতি স্থানে সপ্তম্যন্তং পত্নীনাম গ্রহীতব্যম্)। অতঃ পরং পুস্তকান্তরে বিশেষো লিখ্যতে—যো গর্ভমিত্যস্য বশিষ্ঠঋষিঃ পর্জ্জন্যো দেবতা গায়ত্রীচ্ছন্দো জপে বিনিয়োগঃ। ওঁ যো গর্ভমোষধীনাং গবাং কৃণোত্যর্ব্বতাম্ পর্জ্জন্যঃ পুরুষীণাং।

---

* নস্যদানং নাস্মদ্দেশীয়পুস্তকেন ধৃতম্ পরিশিষ্টকৃতা বিহিতম্।

অহং গর্ভমিত্যস্য প্রাজাপত্যঋষিঃ পত্নী দেবতা ত্রিষ্টুপ্ ছন্দো জপে বিনিয়োগঃ। ওঁ অহং গর্ভমদধামোষধীষহং বিশ্বেষু ভুবনেষন্তঃ। অহং প্রজা অজনয়ং পৃথিব্যামহং জনিভ্যো অপরীষু পুত্রান্। ইতি জপিত্বা উপগচ্ছেৎ। ততঃ ওঁ প্রাণেতে রেতো দধাম্যসৌ ইত্যনুপ্রাণ্য ওঁ যথা ভূমিরগ্নিগর্ভা যথা দ্যৌরিন্দ্রেণ গর্ভিণী। বায়ুর্যথা দিশাং গর্ভ এবন্তে গর্ভং দধাম্যসৌ ইতি হৃদয়মভিমৃশেৎ। * ( নৈকে উপগমনে মন্ত্রবিধিমিচ্ছন্তি ন হ্যনেন কিঞ্চিৎ সংক্রিয়তে। তে ওষধীভির্নির্ষেকং কৃত্বোপগচ্ছন্তি। ) পরিশিষ্টমতম্ ইতি। অসাবিতিসর্ব্বনামস্থানে সম্বোধনান্তং বধূনাম প্রযোক্তব্যম্। ততঃ পঞ্চগব্যং বধূং পায়য়েৎ। তত আচারাৎ বধ্বা নাভিদেশাৎ স্বুবর্ণেন ঘৃতং পাতয়েৎ। ইদঞ্চ গর্ভাধানং যদি স্বকালে ন ক্রিয়তে তদা পুংসবনসীমন্তোন্নয়নকালয়োরপি কর্ত্তব্যং নিত্যত্বাৎ।

ইতি গর্ভাধানম্।

## অথ পুংসবনম্

তত্র চন্দ্রনামা অগ্নিঃ। গর্ভস্য তৃতীয়ে মাসি পুষ্যনক্ষত্রে এতৎ কর্ত্তব্যম্। ন চ সামান্যনক্ষত্রাদিশুদ্ধিরাদরণীয়া বিধিনিমিত্তত্বাৎ। ততঃ পুংসবনদিবসে নির্ব্বর্ত্তিতনিত্যকৃত্যঃ পতির্মাতৃপূজাদিপূর্ব্বকং বৃদ্ধিশ্রাদ্ধং কুর্য্যাৎ। গর্ভবতী চ পূর্ব্বদিনে সকৃৎকৃতহবিষ্যভোজনা নির্মঞ্ছনাদিমঙ্গলপূর্ব্বকং প্রাবৃতস্থানে স্নায়াৎ। ততো লগ্নসময়ে ছায়ামণ্ডপে পতিঃ প্রাঙ্মুখ আসনোপবিষ্টঃ কর্ম্ম কুর্য্যাৎ। ( স্বয়মশক্তৌ পূর্ব্ববদ্‌বৃতো ব্রাহ্মণঃ ) হোমকর্ত্তা চন্দ্রনামানমগ্নিং প্রতিষ্ঠাপ্য ( অন্বাধায় ) † পরিসমূহনপরিস্তরণাদি-প্রণীতাপ্রণয়নান্তং কৃত্বা ওঁ প্রজাপতয়ে ত্বা জুষ্টং নির্ব্বপামীতি চতুরো ব্রীহিমুষ্টীন্নিরূপ্য প্রোক্ষণাবঘাতাদি

---

* অতঃপরং পুস্তকান্তরে বিশেষঃ। ওঁ আপ ইত্বাতুভেষজীরাপোহমীব চাতনীঃ। আপঃ সর্ব্বস্য ভেষজীস্তাস্তে কৃণ ত্ত ভেষজম্ ইত্যুপস্থং প্রক্ষাল্য ওঁ হস্তাভ্যাং দশশাখাভ্যাং জিহ্বাবাচঃ পুরোগবি। অনায় ইত্যুভাভ্যাং ত্বোপস্পৃশামসি অনেন যোনিং প্রক্ষালয়েৎ। ততো হস্তৌ পাদৌ প্রক্ষাল্য দ্বিরাচম্য সূর্য্যোপস্থানমগ্ন্যুপস্থানঞ্চ পূর্ব্বোক্তমন্ত্রৈঃ কুর্য্যাৎ ইতি ক্রমভেদঃ।

† ওঁ অগ্নেত্যাদি ক্রিয়মাণে অস্মিন্ পুংসবনহোমে দেবতাপরিগ্রহার্থমন্বাধানমহং করিষ্যে অস্মিন্নন্বাহিতেঽগ্নৌ জাতবেদসমগ্নিমিধ্মেন প্রজাপতিমাঘারাজ্যেন অগ্নীষোমৌ চক্ষুষী আজ্যেন প্রজাপতিং চরুণা শেষেণ স্বিষ্টকৃতমিধ্মসন্নহনেন রুদ্রময়াসমগ্নিং দেবান্ বিষ্ণুমগ্নিং বায়ুং সূর্য্যং প্রজাপতিঞ্চৈতাঃ প্রায়শ্চিত্তদেবতা আজ্যেন বিশ্বান্ দেবান্ সংস্রবেণ সাঙ্গেন কর্ম্মণা সদ্যোঽহং যক্ষ্যে। ইতি বাসুদেবসম্মতম ।

বর্হিষি হবিরাসাদনান্তং কর্ম্ম কৃত্বা স্বদক্ষিণে আনডুহাজিনে উপবিষ্টয়া পত্ন্যা অন্বারব্ধঃ আজ্যভাগান্তং কৃত্বা তস্যা গোরোচনাদিকৃতরক্ষালঙ্কারায়াঃ পরিহিতরক্তবস্ত্রযুগ্মায়াঃ অবিঘ্নশরাবহস্তায়া লিখিতবাসুদেবাদিদ্বাদশনামধস্ত্রবেষ্টনকৃতরক্ষায়াঃ প্রসারিতদক্ষিণহস্তায়াঃ পত্ন্যাঃ প্রসৃতীকৃতে দক্ষিণে পাণৌ সমানরূপবৎসায়া অভাবে অসমানবৎসায়া অপি গোঃ প্রসৃতিপরিমিতং দধি নিক্ষিপ্য তদুপরি অণ্ডবৎ দ্বৌ মাষৌ শিশ্নবৎ যবমেকং নিধায় কিং পিবসীতি ত্রিঃ পৃচ্ছেৎ। সা চ পুংসবনমিতি ত্রিরুক্ত্বা সযবমাষং তৎ পিবেৎ। পুনরেবং দ্বিঃপ্রশ্নপ্রতিবচনপূর্ব্বকং প্রাশ্য আচামেৎ। * ততঃ পতিঃ জীববৎসাভ্যাং দম্পতিভ্যাং শিশিরপিষ্টদূর্ব্বারসেন দক্ষিণনাসাপুটে নস্যং দত্যাদনেন মন্ত্রেণ—ওঁ আতে গর্ভো যোনিমৈতু পুমান্ বাণ ইবেষুধিম্। আবীরো জায়তাং পুত্রস্তে দশমাস্যঃ। ওঁ অগ্নিরৈতু প্রথমো দেবতানাং সোঽস্যৈ প্রজাং মুঞ্চতু মৃত্যুপাশাৎ। তদয়ং রাজা বরুণোঽনুমন্যতাং যথেয়ং স্ত্রীপৌত্রমঘং ন রোদাৎ। ততো হৃদয়দেশমস্যা আলভেত যত্তে সুসীম ইত্যস্য প্রজাপতিঋর্ষিশ্চন্দ্রো দেবতাঽনুষ্টুপ্ ছন্দো হৃদয়ালভনে বিনিয়োগঃ। ওঁ যত্তে সুসীমে হৃদয়ে হিতমন্তঃ প্রজাপতৌ। মন্যেঽহং মাং তদ্বিদ্বাংসং মাহং পৌত্রমঘং নিয়াম্। ততঃ † পত্নীসমারব্ধো হোমকর্ত্তা চরুণা ওঁ প্রজাপতয়ে স্বাহা প্রজাপতয়ে ইদং নমম ইতি হুত্বা বক্ষ্যমাণমন্ত্রৈশ্চরুভিঃ ষড়াহুতীর্জুহোতি। ব্রহ্মণাগ্নিরিতি ষড়্চস্য সূক্তস্য সাংখ্যঋষিব্রর্হ্মাগ্নী দেবতে অনুষ্টুপ্ ছন্দঃ প্রধানচরুহোমে বিনিয়োগঃ। ওঁ ব্রহ্মণাগ্নিঃ সংবিদানো রক্ষোহা বাধতামিতঃ। অমীবা যস্তে গর্ভং দুর্ণামা যোনিমাশয়ে স্বাহা। ইদমগ্নীব্রহ্মভ্যাং নমম। ওঁ যস্তে গর্ভমমীবা দুর্ণামা যোনিমাশয়ে। অগ্নিষ্টং ব্রহ্মণা সহ নিষ্ক্রব্যাদমনীনশৎ স্বাহা। ইদমগ্নীব্রহ্মভ্যাং নমম। ওঁ যস্তে হন্তি পতয়ন্তং নিষৎস্নং যঃ সরীসৃপম্। জাতং যস্তে জিঘাংসতি তমিতো নাশয়ামসি স্বাহা। ইদমগ্নীব্রহ্মভ্যাং নমম। ওঁ যস্ত উরূ বিহরত্যন্তরা দম্পতী শয়ে। যোনিং যো অন্তরারেঢ়ি তমিতো নাশয়ামসি স্বাহা।. অগ্নয়ে ইদং নমম। ওঁ যস্ত্বা ভ্রাতা পতির্ভূত্বা জারো ভূত্বা নিপদ্যতে। প্রজাং যস্তে জিঘাংসতি তমিতো নাশয়ামসি স্বাহা। ব্রহ্মণে ইদং নমম। ওঁ যস্ত্বা স্বপ্নেন তমসা মোহয়িত্বা নিপদ্যতে।

* গৃহ্যসূত্রে আতে গর্ভমিতি অগ্নিরৈতু ইতি মন্ত্রাভ্যাং দূর্ব্বারসসেক উক্তঃ।

† বাসুদেবপদ্ধতৌ ইদানীং গর্ভিণীনাসাপুটে দূর্ব্বারসসেকঃ তূষ্ণীং কার্য্যঃ ততশ্চরুণা প্রজাপতয়ে একাং আহুতিং দত্বা গর্ভিণ্যা হৃদয়ালম্ভনম্ কর্ত্তব্যম্।

প্রজাং যস্তে জিঘাংসতি তমিতো নাশয়ামসি স্বাহা। ব্রহ্মণে ইদং নমম।* ততোঽস্যাঃ সর্ব্বাঙ্গাণি হস্তাভ্যাং মার্জ্জয়েৎ। ওঁ অক্ষীভ্যাস্তে নাসিকাভ্যাং কর্ণাভ্যাং চিবুকাদধি। যক্ষ্মং শীর্ষণ্যং মস্তিকাজ্জিহ্বায়া বিবৃহামি তে। গ্রীবাভ্যস্ত উষ্ণিহাভ্যঃ কীকসাভ্যো অনূক্যাৎ। যক্ষ্মং দোষণ্যমংসাভ্যাং বাহুভ্যাং বিবৃহামি তে। আন্ত্রেভ্যস্তে গুদাভ্যো বনিষ্ঠোর্হৃদয়াদধি। যক্ষ্মং মতস্নাভ্যাং যক্নঃ প্লাশিভ্যো বিবৃহামি তে। উরুভ্যাং তে অষ্ঠীবদ্ভ্যাং পাণিভ্যাং প্রপদাভ্যাম্। যক্ষ্মং শ্রোণিভ্যাং ভাসদাদ্ ভংসসো বিবৃহামি তে। মেহনাদ্বনংকরণাৎ লোমভ্যস্তে নখেভ্যঃ। যক্ষ্মং সর্ব্বস্মাদাত্মনস্তমিদং বিবৃহামি তে। অঙ্গাদঙ্গাল্লোম্নো লোম্নো জাতং পর্ব্বণি পর্ব্বণি। যক্ষ্মং সর্ব্বস্মাদাত্মনস্তমিদং বিবৃহামি তে। † ইতি। ততশ্চরুণা স্বিষ্টকৃতং সমাপ্য আজ্যেন প্রায়শ্চিত্তং সমাপয়েৎ। ব্রাহ্মণায় দক্ষিণাং দদ্যাৎ ইতি।

## অথ অনবলোভনম্ ‡

তচ্চ চতুর্থে মাসি কর্ত্তব্যম্। তত্র জ্যোতিঃশাস্ত্রোক্তশুভদিবসে প্রাতর্নির্বর্ত্তিতনিত্যকৃত্যঃ পতির্মাতৃকাপূজনপূর্ব্বকং বৃদ্ধিশ্রাদ্ধং কুর্য্যাৎ। ততশ্ছায়ামণ্ডপে প্রাঙ্মুখ আসনোপবিষ্টঃ পতির্বামপার্শ্বে উপবিষ্টয়া পুংসবনোক্তবেশয়া গর্ভবত্যা স্পৃষ্টঃ উপলেপনাদি-পূর্ণপাত্র-নিধানান্তং কর্ম্ম কৃত্বা প্রাজাপত্যং পৌরুষঞ্চ চরুদ্বয়ং শ্রপয়েৎ। (অসম্ভবে উভয়দৈবত্য একশ্চরুঃ)। ততঃ আজ্যভাগান্তং কর্ম্ম সমাপ্য প্রাঙ্মুখ্যাঃ পত্ন্যাঃ পশ্চিমতস্তিষ্ঠন্ পতিস্তদাননমুন্নময্য তস্যা দক্ষিণনাসাপুটে প্রজাবদাখ্যজীবপুত্রাখ্যসূক্তদ্বয়ং জপন্ শিলাপিষ্টদূর্ব্বারসেন নস্যং দদ্যাৎ। § তত্র প্রজাবদাখ্যসূক্তং যথা—ওঁ আ তে গর্ভো যোনিমৈতু পুমান্ বাণ ইবেষুধিম্। আ বীরো জায়তাং পুত্রস্তে দশমাস্যঃ। জীবপুত্রাখ্যং সূক্তং—ওঁ অগ্নিরৈতু প্রথমো দেবতানাং সোঽস্যৈ প্রজাং মুঞ্চতু মৃত্যুপাশাৎ। তদয়ং রাজা বরুণোঽনুমন্যতাং যথেয়ং স্ত্রী পৌত্রমঘং ন রোদাৎ। তত আচান্তজলয়া পত্ন্যা স্পৃষ্টঃ প্রাজাপত্যচরুমবদানধর্ম্মেণাদায়

---

* ততঃ প্রাজাপত্যস্থালীপাকহোমঃ ইতি গৃহ্যকারসম্মতঃ।

† অয়ং মার্জ্জনব্যাপারঃ পরিশিষ্টসম্মতঃ।

‡ নেদমনবলোভনম্ পরিশিষ্টকৃতা বাসুদেবপদ্ধতৌ বা লিখিতম্। তদিদমস্মদ্দেশীয়প্রাচীনপুস্তকধৃতত্বাৎ গৃহ্যসূত্রানুমোদিতব্যবহৃতত্বাচ্চ শিষ্টৈরনুপেক্ষিতমস্মাভিঃ।

§ বধূনাসাপুটে নস্যরসদানং ন সার্ব্বত্রিকম্।

ওঁ প্রজাপতয়ে স্বাহা ইত্যেকাহুতিং হুত্বা প্রজাপতয়ে ইদং নমম ইতি ত্যাগং বিধায় ততঃ পত্ন্যা হৃদয়দেশমালভেত—যত্তে সুসীম ইতি মন্ত্রস্য হিরণ্যগর্ভঋষিঃ প্রজাপতির্দেবতা অনুষ্টুপ্ ছন্দো ভার্য্যায়া হৃদয়ালম্ভনে বিনিয়োগঃ। ওঁ যত্তে সুসীমে হৃদয়ং হিতমন্তঃ প্রজাপতৌ। মন্যেঽহং মাং তদ্বিদ্বাংসং মাহং পৌত্রমঘং নিয়াম্। ইত্যনেন মন্ত্রেণ। ততশ্চরোর্ভাগমুদ্ধৃত্য হিরণ্যগর্ভ ইত্যস্য হিরণ্যগর্ভঋষিঃ প্রজাপতির্দেবতা ত্রিষ্টুপ্ ছন্দশ্চরুহোমে বিনিয়োগঃ। ওঁ হিরণ্যগর্ভঃ সমবর্ত্ততাগ্রে ভূতস্য জাতঃ পতিরেক আসীৎ। স দাধার পৃথিবীং দ্যামুতেমাং কস্মৈ দেবায় হবিষা বিধেম স্বাহা। প্রজাপতয়ে ইদং নমম। শঙ্খঋষিস্ত্রিষ্টুপ্ ছন্দো লিঙ্গোক্তা দেবতা প্রধানচরুহোমে বিনিয়োগঃ। ওঁ য আত্মদা বলদা যস্য বিশ্ব উপাসতে প্রশিষং যস্য দেবাঃ। যস্য চ্ছায়ামৃতং যস্য মৃত্যুঃ কস্মৈ দেবায় হবিষা বিধেম স্বাহা। প্রজাপতয়ে ইদং নমম। ততঃ পৌরুষচরোর্ভাগমুদ্ধৃত্যাহুতিমেকাং জুহুয়াৎ। সহস্রশীর্ষেত্যস্য নারায়ণঋষিঃ পুরুষো দেবতা অনুষ্টুপ্ ছন্দঃ প্রধানচরুহোমে বিনিয়োগঃ। ওঁ সহস্রশীর্ষা পুরুষঃ সহস্রাক্ষঃ সহস্রপাৎ। স ভূমিং বিশ্বতো বৃত্বাত্যতিষ্ঠদ্দশাঙ্গুলং স্বাহা। ইদমাদিপুরুষায় বিষ্ণবে নমম। তত আয়ুষ্যং বর্চ্চস্যমিত্যায়ুষ্যসূক্তং (১৮৫ পৃঃ) পঠিত্বা গর্ভবত্যাশ্চতুর্দ্দিক্ষু রক্ষাং কুর্য্যাৎ। ততশ্চরুণা স্বিষ্টকৃতং সমাপ্য আজ্যেন প্রায়শ্চিত্তাদিহোমশেষং সমাপয়েৎ। ব্রাহ্মণায় দক্ষিণাং দত্ত্বা ব্রাহ্মণান্ ভোজয়েৎ। ইত্যনবলোভনম্।

## সীমন্তোন্নয়নম্

তত্র চতুর্থে গর্ভমাসে ষষ্ঠেঽষ্টমে বা শুক্লপক্ষে জ্যোতিঃশাস্ত্রোক্ত-নক্ষত্রাদি-শুভলগ্নে পতির্মাতৃকাপূজাপূর্ব্বকং কৃতবৃদ্ধিশ্রাদ্ধো মঙ্গলনামানমগ্নিং প্রতিষ্ঠাপ্য ওঁ অদ্যেত্যাদি অমুকগোত্রায়া মৎপত্ন্যাঃ শ্রীঅমুকীদেব্যাঃ সীমন্তোন্নয়ন-কর্ম্মাঙ্গ-সব্রহ্মক-হোমকর্ম্মাহং করিষ্যে। * আঘারাজ্যভাগান্তাং কুশণ্ডিকাং বিধায় বামপার্শ্বে প্রাগ্গ্রীবোর্দ্ধলোমানুডুহচর্ম্মাসীনয়া পুংসবনোক্তবেশয়া স্নাতয়া প্রাঙ্মুখ্যা পত্ন্যা সমারব্ধঃ অষ্টাবাজ্যাহুতীর্জুহুয়াৎ। ধাতা দধাতু দাশুষ ইত্যাদি মন্ত্রদ্বয়স্য হিরণ্যগর্ভঋষির্ধাতা দেবতা প্রথমস্যানুষ্টুব্ দ্বিতীয়স্য ত্রিষ্টুপ্ ছন্দঃ সীমন্তোন্নয়নে প্রধানাজ্যহোমে

---

* অগ্ন্যাধানং বাসুদেবসম্মতম্।

বিনিয়োগঃ। ওঁ ধাতা দধাতু দাশুষে প্রাচীং জীবাতুমক্ষিতাম্। বয়ং দেবস্য ধীমহি। সুমতিং বাজিনীবতঃ স্বাহা। ধাত্রে ইদং নমম। ওঁ ধাতা প্রজানামুত বা ব ঈশে ধাতেদং বিশ্বং ভুবনং জজান। ধাতা কৃষ্টীরনিমিষা-ভিচষ্টে ধাত্র ইদ্ধব্যং ঘৃতবজ্জুহোত স্বাহা। ধাত্রে ইদং নমম। রাকামহমিতি দ্বয়োর্গৃৎসমদঋষী রাকা দেবতা জগতীচ্ছন্দঃ সীমন্তোন্নয়নে প্রধানাজ্যহোমে বিনিয়োগঃ। ওঁ রাকামহং সুহবাং সুষ্টুতী হুবে শৃণোতু নঃ সুভগা বোধতু ত্মনা। সীব্যত্বপঃ সূচ্যাচ্ছিদ্যমানয়া দদাতু বীরং শতদায়মুক্থ্যং স্বাহা। রাকায়ৈ ইদং নমম। ওঁ যাস্তে রাকে সুমতয়ঃ সুপেশসো যাভির্দদাসি দাশুষে বসূনি। তাভির্নো অদ্য সুমনা উপাগহি সহস্রপোষং সুভগে ররাণা স্বাহা। রাকায়ৈ ইদং নমম। নেজমেষেতি তিসৃণাং ত্বষ্টা (হিরণ্যগর্ভঃ) ঋষির্বিষ্ণু-র্দেবতা অনুষ্টুপ্ ছন্দঃ সীমন্তোন্নয়নে প্রধানাজ্যহোমে বিনিয়োগঃ। ওঁ নেজমেষ পরাপত সুপুত্রঃ পুনরাপত। অস্যৈ মে পুত্রকামায়ৈ গর্ভমাধেহি যঃ পুমান্ স্বাহা। বিষ্ণবে ইদং নমম। ওঁ যথেয়ং পৃথিবী মহ্যুত্তানা গর্ভমাদধে। এবং তং গর্ভমাধেহি দশমে মাসি সূতবে স্বাহা। বিষ্ণবে ইদং নমম। ওঁ বিষ্ণোঃ শ্রেষ্ঠেন রূপেণাস্যাং নার্য্যাং গবীন্যাং। পুমাংসং পুত্রমাধেহি দশমে মাসি সূতবে স্বাহা। বিষ্ণবে ইদং নমম। প্রজাপত ইত্যস্য হিরণ্যগর্ভঋষিঃ প্রজাপতির্দেবতা ত্রিষ্টুপ্ ছন্দঃ সীমন্তোন্নয়নে প্রধানাজ্যহোমে বিনিয়োগঃ। ওঁ প্রজাপতে ন ত্বদেতান্যন্যো বিশ্বা জাতানি পরি তা বভূব। যৎ কামাস্তে জুহুমস্তন্নো অস্তু বয়ং স্যাম পতয়ো রয়ীণাং স্বাহা। প্রজাপতয়ে ইদং নমম। ততোঽপক্বোডুম্বরফলযুগ্মান্বিতস্তবকদ্বয়ং ত্রিশুক্লং শল্লকীকণ্টকং প্রাদেশমাত্র-সাগ্রকুশপত্রদ্বয়রূপ-পিঞ্জূলত্রয়ঞ্চৈকীকৃতং পাণিনা গৃহীত্বা তন্মূলেন পত্ন্যাঃ কেশললাটয়োঃ সন্ধিমারভ্য আমূর্দ্ধপ্রদেশাৎ ওঁ ভূর্ভুবঃস্বরিতি মন্ত্রত্রয়স্য প্রজাপতির্ঋষিঃ প্রজাপতির্দেবতা বৃহতীচ্ছন্দঃ সীমন্তব্যূহনে বিনিয়োগঃ। ওঁ ভূর্ভুবঃস্বঃ ইতি মন্ত্রাবৃত্ত্যা ত্রিশ্চতুর্ব্বা সীমন্তমুন্নয়েৎ। ততঃ পতির্বীণাগাথিনৌ দ্বিজৌ ভবন্তৌ সোমং রাজানং সংগায়েতাম্ ইতি প্রেষয়েৎ। তৌ চ— ওঁ সোমো নো রাজা অবতু মানুষীঃ প্রজাঃ নিবিষ্টচক্রা অসৌ। অসাবিতি যাং নদীং সেবেত তস্যা নাম সম্বোধনান্তং পাঠ্যম্। সেবনাসম্ভবে সমীপস্থনদ্যাঃ সম্বুদ্ধ্যন্তং গঙ্গে যমুনে ইত্যাদিরূপং নাম নির্দ্দিশন্তৌ বীণয়া গায়েতাম্। ততঃ পতিঃ সৌবর্ণচক্রাদিকং পত্ন্যাঃ কণ্ঠে বধ্নীয়াৎ—ওঁ আয়ুষ্যং বর্চ্চস্যং রায়স্পোষমৌদ্ভিদম্। ইদং হিরণ্যং বর্চ্চস্ব জৈত্রায়াবিশাদিমাম্ ইতি

মন্ত্রেণ। * ততঃ স্বিষ্টকৃদাদি-হোমশেষং সমাপ্য কর্ম্মকারয়িতৃব্রাহ্মণায় দক্ষিণাং দদ্যাৎ।

ইতি সীমন্তোন্নয়নম্।

## অথ জাতকর্ম্ম †

জাতমাত্রং কুমারং শ্রুত্বা সচেলং কৃতস্নানঃ পিতা কৃতবৃদ্ধিশ্রাদ্ধঃ প্রগল্ভ-নামানমগ্নিং প্রতিষ্ঠাপ্য অদ্যেত্যাদি অস্মিন্ জাতকর্ম্মাঙ্গহোমকর্ম্মণি দেবতা-পরিগ্রহার্থমিত্যাদি চক্ষুষী আজ্যেন ইত্যন্তমুক্ত্বা অগ্নিমিন্দ্রং প্রজাপতিং বিশ্বান্ দেবান্ ব্রহ্মাণমাজ্যেন শেষেণ স্বিষ্টকৃতমিত্যাদি সপ্তো যক্ষ্যে ইত্যন্তমুক্ত্বা অগ্নি-মন্বাধায় ‡ আঘারাজ্যভাগান্তং কর্ম্ম কৃত্বা প্রগল্ভনামানমগ্নিং সংস্থাপ্য অগ্নীন্দ্র-প্রজাপতি-বিশ্বদেব-ব্রহ্মভ্যঃ পঞ্চাজ্যাহুতীর্হুত্বা প্রাঙ্নাভিচ্ছেদনাৎ অন্যস্পর্শনাৎ পূর্ব্বং কুমারং হিরণ্যসংসৃষ্টে মধুসর্পিষী হিরণ্যেন প্রাশয়েদনেন মন্ত্রেণ § — প্রতেদদামীত্যস্য হিরণ্যগর্ভঋষিঃ সবিতা দেবতা ত্রিষ্টুপ্ ছন্দঃ কুমারস্য মধুসর্পিঃ-প্রাশনে বিনিয়োগঃ। ওঁ প্র তে দদামি মধুনো ঘৃতস্য বেদং সবিত্রা প্রসূতং মঘোনাম্। আয়ুষ্মান্ গুপ্তো দেবতাভিঃ শতং জীব শরদো লোকে অস্মিন্। ইতি কুমারং মধুসর্পিষী পায়য়িত্বা তদ্ধিরণ্যং প্রক্ষাল্য কুমারস্য দক্ষিণে কর্ণে নিধায় তৎকর্ণসমীপে স্বমুখমানীয় মেধান্ত ইতি মন্ত্রস্য হিরণ্যগর্ভঋষিঃ সবিতৃ-সরস্বত্যশ্বিনো দেবতা অনুষ্টুপ্ ছন্দঃ কুমারস্য মেধাজননজপে বিনিয়োগঃ। ওঁ মেধাং তে দেবঃ সবিতা মেধাং দেবী সরস্বতী। মেধাং তে অশ্বিনৌ দেবাবাধত্তাং পুষ্করস্রজৌ॥ ইত্যৃচং জপিত্বা পুনস্তদ্ধিরণ্যং সব্যে কর্ণে নিধায় তথৈব তাম্ ঋচং জপেৎ। ততঃ অশ্মা ভবেত্যস্যাথর্ব্বণঋষির্লিঙ্গোক্তা দেবতা অনুষ্টুপ্ ছন্দঃ কুমারস্যাংসাভিমর্শনে বিনিয়োগঃ। ওঁ অশ্মা ভব পরশুর্ভব হিরণ্যমস্তৃতং ভব। বেদো বৈ পুত্রনামাসি স জীব শরদঃ শতম্। ইন্দ্র শ্রেষ্ঠানীত্যস্য গৃৎসমদঋষিরিন্দ্রো দেবতা ত্রিষ্টুপ্ ছন্দঃ কুমারস্যাংসাভিমর্শনে বিনিয়োগঃ। ওঁ ইন্দ্র শ্রেষ্ঠানি দ্রবিণানি ধেহি চিত্তিং দক্ষস্য সুভগত্বমস্মে।

---

* সমন্ত্রকং সৌবর্ণচক্রাদিধারণং ন সূত্রকারেণ পরিশিষ্টকৃতা চ ধৃতম্। লিখিতঞ্চাস্ম-দবলম্ব্য-প্রাচীনপুস্তকেষু শিষ্টৈরিতি নোপেক্ষিতম্।

† জাতকর্ম্মনামকরণান্নপ্রাশনেষু সূত্রকারেণ হোমো ন বিহিতঃ, বৃত্তিকারেণ পরিশিষ্ট-কৃতা চ এষু হোমস্য বিহিতত্বাৎ কর্ত্তব্যত্বমস্ত্যেব ইতি বহুসম্মতিঃ।

‡ অন্বাধানং বাসুদেবপদ্ধতৌ ধৃতম্, পরন্তু কালেশিপদ্ধতৌ সর্ব্বত্র ন দৃশ্যতে।

§ কাংস্যপাত্রে নিধায় সুবর্ণেন তোলয়িত্বা কুমারজিহ্বায়াং দদ্যাৎ ইতি কুত্রচিৎ পাঠঃ।

পোষং রয়ীণামরিষ্টিং তনূনাং স্বাদ্মানং বাচঃ সুদিনত্বমহ্নাম্॥ অস্মে প্রযন্ধী-ত্যস্য বিশ্বামিত্রঋষিরিন্দ্রো দেবতা ত্রিষ্টুপ্ ছন্দঃ কুমারস্যাংসাভিমর্শনে বিনি-য়োগঃ। ওঁ অস্মে প্রযন্ধি মঘবন্নৃজীষিন্নিন্দ্র রায়ো বিশ্ববারস্য ভূরেঃ। অস্মে শতং শরদো জীবসেধা অস্মে বীরাঞ্ছশ্বত ইন্দ্র শিপ্রিন্। ইতি মন্ত্রত্রয়ান্তে যুগপৎ কুমারস্যাংসাবভিমৃশেৎ। * ততো নাড়ীচ্ছেদং কারয়িত্বা হিরণ্যোদ-কেন মাতুর্দক্ষিণং স্তনং প্রক্ষাল্য ওঁ ইমাং কুমারো জরাং ধয়তু দীর্ঘমায়ুঃ প্রজীবসে। অস্মৈ স্তনৌ প্রযুঞ্জানা আয়ুর্ব্বর্চ্চো যশো বলম্। ইতি দক্ষিণং স্তনং মাত্রা পায়য়িত্বা তথৈব বামং প্রক্ষাল্য পায়য়েৎ। ততো হোমশেষং সমাপ্য ব্রাহ্মণায় দক্ষিণাং দদ্যাৎ। কুমার্য্যা এতদমন্ত্রকং কুর্য্যাৎ।

ইতি জাতকর্ম্ম।

## প্রোষিতাগত কর্ম্ম ( গুপ্তনামকরণম্ ) †

যদি দেশান্তরগতঃ পিতা শৃণোতি পুত্রো মে জাতঃ তদাগতঃ সূতকান্তে কৃতস্নানঃ পুত্রস্য মূর্দ্ধানং গৃহীত্বা জপেৎ—ওঁ অঙ্গাদঙ্গাৎ সম্ভবসি হৃদয়াদধি-জায়সে। আত্মা বৈ পুত্রনামাসি স জীব শরদঃ শতম্। ইতি মূর্দ্ধানং ত্রিরবঘ্রায় ( পরিচুম্ব্য ) জপেৎ। ( ততঃ প্রায়শ্চিত্তাদি সমাপয়েৎ। )

## অথ নামকরণম্

তত্র পার্থিবনামাগ্নিঃ। পিতা অন্যো ভ্রাত্রাদির্ব্বা মাতৃকাপূজাপূর্ব্বকং কৃতবৃদ্ধিশ্রাদ্ধঃ প্রাঙ্মুখ আসনে উপবিশ্য স্বয়ং হোমকরণাসামর্থ্যে ব্রাহ্মণ-মর্চ্চয়িত্বা ইধ্মাধানান্তং কর্ম্ম কুর্য্যাৎ। মাতাপি স্নাতং কৃতমঙ্গলং নূতন-বস্ত্রাচ্ছাদিতং দূর্ব্বাক্ষতশিরসং কুমারমঙ্কে কৃত্বা প্রাঙ্মুখী উপবিশেৎ। ততঃ সুবর্ণ-বদ্ধকুশৈস্তাম্রপাত্রস্থজলেন কুমারমভিষিঞ্চেদেভির্মন্ত্রৈঃ—সমুদ্রজ্যেষ্ঠা ইতি মন্ত্রচতুষ্টয়স্য বশিষ্ঠঋষিরাপো দেবতাস্ত্রিষ্টুপ্ ছন্দো মার্জ্জনে বিনিয়োগঃ। ওঁ সমুদ্রজ্যেষ্ঠাঃ সলিলস্য মধ্যাৎ পুনানা যন্ত্যনিবিশমানাঃ। ইন্দ্রো যা বজ্রী

---

* অস্মদ্দেশীয়পুস্তকেষু প্রায়শঃ সর্ব্বত্রৈব অস্মেতি মন্ত্রেণাংসাভিমর্শঃ। ততো দক্ষিণস্তন-প্রক্ষালনপূর্ব্বকং ইমাং কুমার ইতি মন্ত্রেণ স্তনদানানন্তরং বামস্তনদানে ইন্দ্রজ্যেষ্ঠানীতি অস্মে ইতি মন্ত্রদ্বয়ং প্রযুক্তম্। তচ্চ সূত্রকৃতা পরিশিষ্টকৃতা চ অধৃতত্বাৎ পরিহৃতমস্মাভিঃ।

† অস্যৈব গুপ্তনামকরণমিতি সংজ্ঞান্তরং পুস্তকান্তরে লিখিতম্।

বৃষভো ররাদ তা আপো দেবীরিহ মামবন্তু। ওঁ যা আপো দিব্যা উত বা স্রবন্তি খনিত্রিমা উত বা যাঃ স্বয়ঞ্জাঃ। সমুদ্রার্থা যাঃ শুচয়ঃ পাবকাস্তা আপো দেবীরিহ মামবন্তু। ওঁ যাসাং রাজা বরুণো যাতি মধ্যে সত্যানৃতে অবপশ্যন্ জনানাম্। মধুশ্চ্যুতঃ শুচয়ো যাঃ পাবকাস্তা আপো দেবীরিহ মামবন্তু। ওঁ যাসু রাজা বরুণো যাসু সোমো বিশ্বেদেবা যাসূর্জ্জং মদন্তি। বৈশ্বানরো যাস্বগ্নিঃ প্রবিষ্টস্তা আপো দেবীরিহ মামবন্তু। আপো হি ষ্ঠা ইতি ত্র্যৃচস্য সিন্ধু-দ্বীপঋষিরাপো দেবতা গায়ত্রীচ্ছন্দো মার্জ্জনে বিনিয়োগঃ। ওঁ আপো হি ষ্ঠা ময়ো ভুবস্তা ন উর্জ্জে দধাতন মহে রণায় চক্ষসে। ওঁ যো বঃ শিবতমো রসস্তস্য ভাজয়তে হ নঃ। উশতীরিব মাতরঃ। ওঁ তস্মা অরঙ্গমাম বো যস্য ক্ষয়ায় জিন্বথ আপো জনয়থা চ নঃ। দেবস্য ত্বেতি মন্ত্রস্য প্রজাপতির্ঋষিঃ সবিত্রশ্বি-পূষণো দেবতা মার্জ্জনে বিনিয়োগঃ। ওঁ দেবস্য ত্বা সবিতুঃ প্রসবে-ঽশ্বিনোর্বাহুভ্যাং পূষ্ণো হস্তাভ্যাম্। * ওঁ অপ নঃ শোশুচদঘমগ্নে শুশুগ্ধ্যা রয়িম্। অপ নঃ শোশুচদঘম্। সুক্ষেত্রিয়া সুগাতুয়া বসূয়া চ যজামহে। অপনঃ শোশুচদঘম্। প্রযদ্ভন্দিষ্ঠ এষাং প্রাস্মাকাসশ্চ সূরয়ঃ। অপ নঃ শোশুচদঘম্। প্রযত্তে অগ্নে সূরয়ো জায়েমহি প্রতে বয়ম্। অপ নঃ শোশুচ-দঘম্। প্রযদগ্নেঃ সহস্বতো বিশ্বতো যন্তি ভানবঃ। অপ নঃ শোশুচদঘম্। ত্বং হি বিশ্বতোমুখ বিশ্বতঃ পরিভূরসি। অপ নঃ শোশুচদঘম্। দ্বিষো নো বিশ্বতোমুখাতি নাবেব পারয়। অপ নঃ শোশুচদঘম্। স নঃ সিন্ধুমিব নাব-যাতি পর্ষা স্বস্তয়ে। অপ নঃ শোশুচদঘম্। ইত্যষ্টাভির্ঋগ্ভিরভিষিঞ্চেৎ। ততঃ পার্থিবনামানমগ্নিং প্রতিষ্ঠাপ্য আঘারাজ্যভাগান্তং কর্ম্ম সমাপ্য পঞ্চাহুতীর্জুহুয়াৎ। ওঁ অগ্নয়ে স্বাহা। অগ্নয়ে ইদং নমম। ওঁ ইন্দ্রায় স্বাহা। ইন্দ্রায় ইদং নমম। ওঁ প্রজাপতয়ে স্বাহা। প্রজাপতয় ইদং নমম। ওঁ বিশ্বেভ্যো দেবেভ্যঃ স্বাহা। বিশ্বেভ্যো দেবেভ্য ইদং নমম। ওঁ ব্রহ্মণে স্বাহা। ব্রহ্মণে ইদং নমম। ততঃ পুত্রিণী উত্তরশিরসং পুত্রং নামকর্ত্তুর্ভর্ত্তুঃ ক্রোড়ে দদ্যাৎ। সমঙ্গলতূর্য্যঘোষেষু সৎসু শিলায়াং ঘোষবদাদিযুগ্মাক্ষরেণ নাম-দ্বয়ং লিখিত্বা প্রদীপদ্বয়ম্ উজ্জ্বলং কৃত্বা কুমারস্য দক্ষিণকর্ণে নাম বদেৎ

---

* অপন ইত্যষ্টর্চ্চস্য সূক্তস্য কুৎসঋষিঃ শুচিরগ্নির্দেবতা গায়ত্রীচ্ছন্দো মার্জ্জনে বিনিয়োগঃ। ইতি কুত্রচিৎ পাঠঃ।

শ্রীঅমুকদেবশর্ম্মাসি। এবং বামকর্ণেঽপি। তন্মাত্রে চ কথয়েৎ—শ্রীঅমুকদেবশর্ম্মায়ন্তে পুত্রঃ। * ততো হোমং সমাপ্য স্বিষ্টকৃতং সমাপয়েৎ। কর্ম্মকারয়িতৃ-ব্রাহ্মণায় দক্ষিণাং দদ্যাৎ। †

ইতি নামকরণম্।

## অথ নিষ্ক্রমণম্ ‡

তত্র পিতা কৃতনিত্যক্রিয়ো মাতৃপূজাং বসোর্ধারাদানং বৃদ্ধিশ্রাদ্ধঞ্চ কুর্য্যাৎ। ততশ্চ বিষ্ণুধর্ম্মোক্তমন্ত্রৈস্তত্তদ্দেবতাপূজাং কুর্য্যাৎ। যথা—ওঁ যত ইন্দ্র ভয়ামহে ততো নো অভয়ং কৃধি। মঘবন্ ছগ্ধি তব তন্ন ঊতিভির্বি দ্বিষো বিমৃধো জহি। ইতি ইন্দ্রস্য। ওঁ অগ্নিং দূতং বৃণীমহে হোতারং বিশ্ববেদসম্। অস্য যজ্ঞস্য সুক্রতুম্। ইত্যগ্নেঃ। ওঁ যমায় সোমং সুনুত যমায় জুহুতা হবিঃ। যমং হয়জ্ঞো গচ্ছত্যগ্নিদূতো অরং কৃতঃ। ইতি যমস্য। ওঁ মোষুণঃ পরাপরা নির্ঋতির্দুর্হণা বধীৎ। পদীষ্ট তৃষ্ণয়া সহ। ইতি নির্ঋতেঃ। ওঁ তত্ত্বায়ামি ব্রহ্মণা বন্দমানস্তদাশাস্তে যজমানো হবির্ভিঃ। অহেলমানো বরুণেহ বোধ্যুরুশংসমান আয়ুঃ প্রমোষীঃ। ইতি বরুণস্য। ওঁ তব বায় বৃতস্পতে ত্বষ্টুর্জামাতরদ্ভুত। অবাংস্যা বৃণীমহে। ইতি বায়োঃ। ওঁ সোমো ধেনুং সোমো অবন্তমাশুং সোমো বীরং কর্ম্মণ্যং দদাতি। সাদন্যং বিদথ্যং সভেয়ং পিতৃশ্রবণং যো দদাশদস্মৈ। ইতি সোমস্য। ওঁ তমীশানং জগতস্তস্থুষস্পতিং ধিয়ং জিন্বমবসে হূমহে বয়ম্। পূষাণো যথা বেদ সাম সদ্বৃধে রক্ষিতা পায়ুরদব্ধঃ স্বস্তয়ে। ইতি ঈশানস্য। ওঁ ব্রহ্ম জজ্ঞানং প্রথমং পুরস্তাদ্ বি সীমতঃ সুরুচোবেন আবঃ। স বুধ্ন্যা উপমা অস্য বিষ্ঠাঃ সতশ্চ যোনিমসতশ্চ বিবঃ ইতি ব্রহ্মণঃ। ওঁ কালিকো নাম সর্পো নবনাগসহস্রবলঃ। যমুনাহ্রদে সো জাতোঽসৌ নারায়ণবাহনঃ। যদি কালিকদূতস্য যদি বা কালিকাদ্‌ভয়ম্। জন্মভূমিপরিক্রান্তো নির্ব্বিষো যাতু কালিকঃ। ইতি অনন্তস্য। ওঁ স্যোনা

---

* ওঁ স্বস্ত্যস্তু বিষ্ণুমিত্রায় স্বস্ত্যস্তু ব্রাহ্মী ইতি ব্রাহ্মণা ব্রূয়ুঃ। ইত্যতিরিক্তঃ পাঠঃ কুত্রচিৎ দৃশ্যতে।

† বাসুদেবপদ্ধতৌ নামকরণে অগ্নীন্দ্রপ্রজাপতিবিশ্বদেবব্রহ্মণাং হোমমাত্রং বিহিতম্।

‡ নিষ্ক্রমণং ন সূত্রকারমতম্।

পৃথিবি নো ভবা নৃক্ষরা নিবেশনী। যচ্ছা নঃ শর্ম্ম সপ্রথাঃ। ইতি পৃথিব্যাঃ। ওঁ সোমং রাজানং বরুণমগ্নিমন্বারভামহে। আদিত্যং বিষ্ণুং সূর্য্যং ব্রহ্মাণঞ্চ বৃহস্পতিম্। ওঁ আকৃষ্ণেন রজসা বর্ত্তমানো নিবেশয়ন্নমৃতং মর্ত্ত্যঞ্চ হিরণ্যয়েন সবিতা রথেনা দেবো যাতি ভুবনানি পশ্যন্। ইতি সবিতুঃ। ওঁ তদ্বিষ্ণোঃ পরমং পদমিত্যাদি বাসুদেবস্য। ওঁ আদিৎপ্রত্নস্য রেতসো জ্যোতিঃ পশ্যন্তি বাসরম্। পরো যদিধ্যতে দিবি। ইতি গণেশস্য পূজামন্ত্রঃ। ততো মাতা শুভলগ্নসময়ে নূতনবস্ত্রাচ্ছাদিতং উত্তরশিরসং কুমারং ক্রোড়ে কৃত্বা পত্যুর্দক্ষিণে দণ্ডায়মানা ভর্ত্রে মঙ্গলতূর্য্যধ্বনিসহকারেণ সমর্পয়তি। পতিশ্চ স্বস্তি নো মিমীতা ইত্যাদি সূক্তমপ্রতিরথমন্ত্রং বিষ্ণুধর্ম্মোক্তমন্ত্রাংশ্চ জপতি।

স্বস্তি নো মিমীতামিতি সপ্তর্চ্চস্য সূক্তস্য স্বস্ত্যাত্রেয়শ্যাবাশ্বঋষির্বিশ্বেদেবা দেবতাস্তিস্র আদ্যাস্ত্রিষ্টুভো মধ্যে দ্বে অনুষ্টুভাবন্তে দ্বে ত্রিষ্টুভৌ কুমারগ্রহণে বিনিয়োগঃ। ওঁ স্বস্তি নো মিমীতামশ্বিনাভগঃ স্বস্তি দেব্যদিতিরনর্ব্বণঃ স্বস্তি পূষা অসুরো দধাতু নঃ স্বস্তি দ্যাবাপৃথিবী সুচেতুনা। স্বস্তি নো ( স্বস্তয়ে ) বায়ুমুপব্রবামহৈ। সোমং স্বস্তি ভুবনস্য যস্পতিঃ। বৃহস্পতিং সর্ব্বগণং স্বস্তয়ে স্বস্তয় আদিত্যাসো ভবন্তু নঃ। বিশ্বেদেবা নো অদ্যা স্বস্তয়ে। বৈশ্বানরো বসুরগ্নিঃ স্বস্তয়ে। দেবা অবন্তৃভবঃ স্বস্তয়ে স্বস্তি নো রুদ্রঃ পাত্বংহসঃ। স্বস্তি মিত্রাবরুণা স্বস্তি পথ্যেরেবতি স্বস্তি ন ইন্দ্রশ্চাগ্নিশ্চ স্বস্তি নো অদিতে কৃধি। স্বস্তি পন্থামনুচরেম সূর্য্যাচন্দ্রমসাবিব। পুনর্দ্দদতা ঘ্নতা জানতা সঙ্গমেমহি। স্বস্ত্যয়নং তার্ক্ষ্যমরিষ্টনেমিং মহদ্ভূতং বায়সং দেবতানাম্। অসুরঘ্নমিন্দ্রসখং সমৎসু বৃহদ্যশো নাবমিবারুহেম। অংহোমুচমাঙ্গিরসং গয়ঞ্চ স্বস্ত্যাত্রেয়ং মনসা চ তার্ক্ষ্যম্। প্রয়তপাণিঃ শরণং প্রপদ্যে স্বস্তি সংবাধেম্বভয়ং নো অস্তু॥ ১॥

আশুঃ শিশান ইতি ত্রয়োদশর্চ্চস্য সূক্তস্য পৈলঋষির্লিঙ্গোক্তা দেবতা ত্রিষ্টুপ্ ছন্দো অপ্রতিরথজপে বিনিয়োগঃ। ওঁ আশুঃ শিশানো বৃষভো ন ভীমো ঘনাঘনঃ ক্ষোভণশ্চর্ষণীনাম্। সংক্রন্দনো নিমিষ একবীরঃ শতং সেনা অজয়ৎ সাকমিন্দ্রঃ। সংক্রন্দনেনানিমেষেণ জিষ্ণুনা যুৎকারেণ দুশ্চ্যবনেন ধৃষ্ণুনা। তদিন্দ্রেণ জয়ত তৎসহধ্বং যুধোনর ইষুহস্তেন বৃষ্ণা। স ইষুহস্তৈঃ স নিষঙ্গিভির্ব্বশীসংস্রষ্টা সযুধ ইন্দ্রো গণেন। সংসৃষ্টজিৎসোমপা বাহুশর্দ্ধ্যুগ্রধন্বা প্রতিহিতাভিরস্তা। বৃহস্পতে পরিদীয়া রথেন রক্ষোহামিত্রাঁ অপবাধমানঃ। প্রভঞ্জনৎ সেনাঃ প্রমৃণো যুধাজয়ন্নস্মাকমেধ্যবিতা রথানাং। বলবিজ্ঞায়ঃ স্থবিরঃ

প্রবীর সহস্বান্ বাজী সহমান উগ্রঃ। অভিবীরো অভিসত্বা সহোজাজৈত্র-মিন্দ্ররথমাতিষ্ঠ গোবিৎ। গোত্রভিদং গোবিদং বজ্রবাহুং জয়ন্তমজ্মপ্রমৃণন্তমোজসা। ইমং সজাতা অনুবীরয়ধ্বমিন্দ্রং সখায়ো অনুসংরভধ্বং। অভিগোত্রাণি সহসা গাহমানো দয়ো বীরঃ শতমন্যুরিন্দ্রঃ। দুশ্চ্যবনঃ পৃতনাষাড়্ যুধ্যোঽস্মাকং সেনা অবতু প্রযৎসু। ইন্দ্র আসাং নেতা বৃহস্পতির্দ্দক্ষিণাযজ্ঞঃ পুর এতু সোমঃ। দেবসেনানামভিভঞ্জতীনাং জয়ন্তীনাং মরুতোযন্ত্বগ্রম্। ইন্দ্রস্য বৃষ্ণো বরুণস্য রাজ্ঞ আদিত্যানাং মরুতাং শর্দ্ধ উগ্রং। মহামনসাং ভুবনচ্যবানাং ঘোষো দেবানাং জয়তামুদস্থাৎ। উদ্ধর্ষয় মঘবন্নায়ুধান্যুৎসত্বানাং মামকানাং মনাংসি। উদ্ বৃত্রহন্বাজিনাং বাজিনান্যুদ্রথানাং জয়তাং যন্তু ঘোষাঃ। অস্মাকমিন্দ্রঃ সমৃতেষু ধ্বজেষস্মাকং যা ইষবস্তা জয়ন্তু। অস্মাকং বীরা উত্তরে ভবন্ত্বস্মাঁ উ দেবা অবতাহবেষু। অমীষাং চিত্তং প্রতিলোভয়ন্তী গৃহাণাঙ্গান্যপ্বে পরেহি। অভিপ্রেহি নির্দ্দহহৃৎসু শোকৈরন্ধেনামিত্রাস্তমসাসচন্তাং। প্রেতাজয়তা নর ইন্দ্রো বঃ শর্ম্ম যচ্ছতু। উগ্রা বঃ সন্তু বাহবে অনাধৃষ্যা যথাসথ ॥ ২ ॥

ওঁ অসৌ যা সেনামরুতঃ পরেষামভ্যেতি ন ওজসা স্পর্দ্ধমানা। তাং গূহত তমসাপব্রতেন যথা মীষামন্যোঽন্যং ন জানাৎ। অন্ধা অমিত্রাভবতা শীর্ষাণ অহয় ইব। তেষাং বো অগ্নিদগ্ধানামগ্নিমূঢ়ানামিন্দ্রো হন্তু বরং বরং। ততস্তত্র পঠেন্মন্ত্রং যত্তদ্রামা নিবোধ মে। চন্দ্রার্কয়োর্দ্দিগীশানাং বিশাঞ্চগগনস্য চ। নিক্ষেপার্থমহং দদ্মি তে মে রক্ষন্তু সর্ব্বদা। অপ্রমত্তং প্রমত্তং বা দিবারাত্রমথাপি বা। রক্ষন্তু সর্ব্বতঃ সর্ব্বে দেবাঃ শক্রপুরোগমাঃ ॥ ৩ ॥

ততো ব্রাহ্মণ-বান্ধবাদি-পরিবৃতং কুমারং বস্ত্রাচ্ছাদিতমুখং বহির্নিষ্ক্রময়েৎ। বহির্নিষ্ক্রম্য মুখাচ্ছাদনমুন্মোচ্য তচ্চক্ষুরিত্যাদিনা সূর্য্যং দর্শয়েৎ।

তচ্চক্ষুরিতি মন্ত্রত্রয়স্য বশিষ্ঠঋষিঃ সূর্য্যো দেবতা গায়ত্রীচ্ছন্দঃ কুমারস্য সূর্য্যদর্শনে বিনিয়োগঃ। ওঁ তচ্চক্ষুর্দ্দেবহিতং পুরস্তাচ্ছুক্রমুচ্চরৎ। পশ্যেম শরদঃ শতং জীবেম শরদঃ শতং নন্দাম শরদঃ শতং মোদাম শরদঃ শতং ভবাম শরদঃ শতং শৃণুয়াম শরদঃ শতং প্রব্রবাম শরদঃ শতং প্রতীতাঃ স্যাম শরদঃ শতম্। ততঃ সূর্য্যার্ঘং দদ্যাৎ—আকৃষ্ণেনেত্যস্য হিরণ্যস্তূপঋষিঃ সবিতা দেবতা ত্রিষ্টুপ্ ছন্দঃ সূর্য্যার্ঘ্যদানে বিনিয়োগঃ। ওঁ আকৃষ্ণেন রজসা বর্ত্তমানো নিবেশয়ন্নমৃতং মর্ত্ত্যঞ্চ হিরণ্যয়েন সবিতা রথেনাদেবো যাতি ভুবনানি পশ্যন্।

ততঃ মাত্রে সমর্পয়তি মাতাঽপি পতিপুত্রবত্যা পরিবৃতা মঙ্গলতূর্য্যধ্বনি-সংকারেণ কুমারং গৃহং স্বমানয়েৎ। ইতি। *

## অথান্নপ্রাশনম্

তত্র শুচিনামা অগ্নিঃ। ষষ্ঠে অষ্টমে দশমে বা মাসি তৎ কার্য্যম্। ততঃ শুদ্ধদিবসে কৃতনিত্যক্রিয়ঃ পিতা সগণেশ-মাতৃকা-পূজাং বিধায় কৃত-বৃদ্ধিশ্রাদ্ধঃ ব্রহ্মাণং শঙ্করং বিষ্ণুং চন্দ্রার্কৌ চ দিগীশ্বরান্। ভুবং দিশশ্চ সম্পূজ্য হুত্বা বহ্নৌ যথাধৃতমিতি বিষ্ণুধর্ম্মোত্তরবচনাৎ ব্রহ্মাদীন্ সম্পূজ্য শুচিনামানমগ্নিং প্রতিষ্ঠাপ্য আঘারাজ্যভাগান্তং কর্ম্ম কৃত্বা জাতকর্ম্ম-নাম-করণবৎ অনাদেশদেবভাভ্যঃ পঞ্চাহুতীর্হুত্বা † মাতুঃ ক্রোড়ে উপবিষ্টং সুস্নাতং কৃতমঙ্গলং পরিহিতনূতনবস্ত্রালঙ্কারং কুমারমন্নং প্রাশয়েদনেন মন্ত্রেণ। ‡ অন্নপত ইত্যস্য নলকূবরঋষিরন্নপতির্দেবতা বৃহতীচ্ছন্দঃ শিশোরন্ন-প্রাশনে বিনিয়োগঃ। ওঁ অন্নপতেঽন্নস্য নো দেহ্যনমীবস্য শুষ্মিণঃ। প্রপ্রদাতারং তারিষ ঊর্জ্জং নো ধেহি দ্বিপদে চতুষ্পদে। ততঃ ওঁ অমৃতোপ-স্তরণমসি স্বাহেতি জলগণ্ডূষং কারয়িত্বা ওঁ প্রাণায় স্বাহেতি পঞ্চাহুতী-র্ভক্ষয়িত্বা ওঁ অমৃতাপিধানমসি স্বাহেতি আপোঽশানং কারয়িত্বা তাম্বূলং প্রাশ্য শিশুং ভূমাবুপবেশ্য তদগ্রে পুস্তক-শস্ত্র-বস্ত্রাদি-শিল্পভাণ্ডানি নিধায় তস্য

---

* পরিশিষ্টমতং যথা—চতুর্থে মাসি আপূর্য্যমাণপক্ষে স্বস্তি বাচয়িত্বা স্বিষ্টকৃতঃ প্রাক্-সুস্নাতালঙ্কৃতং কুমারমাদায় সহভার্য্যাজ্ঞাতিবান্ধবৈঃ পুরন্ধ্রীভিশ্চ মঙ্গলতূর্য্যনির্ঘোষেণ গৃহান্নি-ক্রম্য দেবায়তনমেত্য দেবতামুপহারেণাভ্যর্চ্চ্যাশিষো বাচয়িত্বায়তনং প্রদক্ষিণীকৃত্য গৃহমেয়াৎ সম্বন্ধিনো বা গৃহং নীত্বানয়েদিতি। অত্র বাসুদেবপদ্ধতিমতং লিখ্যতে। তদ্‌যথা—জননাৎ চতুর্থে মাসি শুভলগ্নতিথ্যাদিষু পুণ্যাহং বাচয়িত্বা সগণেশ-গৌর্য্যাদি-ষোড়শমাতৃকাপূজাং বিধায়াভ্যু-দয়িকং কৃত্বা সুস্নাতং স্বলঙ্কৃতং বিহিতস্বস্ত্যয়নং কুমারমাদায় গেহান্নির্গত্য প্রাতঃ ওঁ এহি সূর্য্য সহস্রাংশো তেজোরাশে জগৎপতে। অনুকম্পয় মাং ভক্তং গৃহাণার্ঘ্যং দিবাকর ইতি সূর্য্যায়ার্ঘ্যং দত্ত্বা প্রণম্য দেবতালয়ং গত্বা দেবতাং সমভ্যর্চ্চ্য কুমারায়াশিষো দত্ত্বা দেবালয়ং প্রদক্ষিণীকৃত্য স্বকীয়াদিগৃহে বালকমভিনন্দ্য সায়ং ওঁ ক্ষীরোদার্ণবসম্ভূত অত্রি-নেত্রসমুদ্ভব। গৃহাণার্ঘ্যং শশাঙ্কেদং রোহিণীসহিতো মম ইদমর্ঘ্যং ওঁ চন্দ্রায় নমঃ ওঁ দিব্যশঙ্খতুষারাভং ক্ষীরোদার্ণব-সম্ভবম্। নমামি শশিনং ভক্ত্যা শম্ভোর্মুকুটভূষণমিতি প্রণমেৎ। ইতি বহির্নিক্রমণম্।

† ওঁ অগ্নয়ে স্বাহা অগ্নয়ে ইদং নমম, ওঁ ইন্দ্রায় স্বাহা ইন্দ্রায় ইদং নমম। ওঁ প্রজাপতয়ে স্বাহা প্রজাপতয় ইদং নমম। ওঁ বিশ্বেভ্যো দেবেভ্যঃ স্বাহা বিশ্বেভ্যো দেবেভ্য ইদং নমম। ওঁ ব্রহ্মণে স্বাহা ব্রহ্মণে ইদং নমম। ইতি পঞ্চাহুতয়ঃ।

‡ ওঁ আজমন্নাদ্যকামঃ। তৈত্তিরং ব্রহ্মবর্চ্চসকামঃ। ঘৃতৌদনং তেজস্কামঃ। দধি-মধু-ঘৃতমিশ্রমন্নং প্রাশয়েৎ সর্ব্বকামঃ।

জীবিকাং পরীক্ষেত। শিশুঃ স্বেচ্ছয়া প্রথমং যৎ স্পৃশেৎ তদস্য জীবিকেতি বিদ্যাৎ। ততঃ স্বিষ্টকৃদাদিহোমশেষং সমাপ্য কর্ম্মকাররিত্বব্রাহ্মণায় দক্ষিণাং দদ্যাৎ। কুমার্য্যা এতৎ সর্ব্বমমন্ত্রকম্।

## অথ চূড়াকরণম্

অত্র সত্যনামাগ্নিঃ। ততঃ শুদ্ধদিবসে প্রাতর্নির্ব্বর্ত্তিতনিত্যকৃত্যঃ পিতা সগণাধিপ-মাতৃকা-পূজাদিকং নির্ব্বর্ত্ত্য বৃদ্ধিশ্রাদ্ধং কুর্য্যাৎ। ততো লগ্নসময়ে প্রাঙ্গণে ছায়ামণ্ডপে শুচিরাচান্তঃ প্রাঙ্মুখ উপবিশ্য পূর্ব্ববৎ উপলেপনাদি-পর্য্যুক্ষণান্তাং কুশণ্ডিকাং কৃত্বা অগ্নে ত্বং সত্যনামাসীতি নাম কৃত্বাবাহ্য সম্পূজ্য কুমারেণান্বারব্ধঃ স্রুবেণাঘারাজ্যভাগৌ জুহুয়াৎ। তত্র দ্রব্যাসাদনে বিশেষঃ। ব্রীহিযব-মাষ-তিল-পূর্ণপাত্রত্রয়ং * তাম্রময়ং লৌহময়ং বা ক্ষুরং শীতমুষ্ণমুদকং বলীবর্দ্দ-গোময়ং নবনীতং শমীপত্রং ত্রিশ্বেতশল্লকীকণ্টকং দধি চাসাদয়েৎ। ততো মাতা কুমারমঙ্কে কৃত্বা পত্যুর্ব্বামপার্শ্বে অগ্নেঃ পশ্চিমতঃ প্রাঙ্মুখী উপবিশতি। ততঃ পিতা একবিংশতিকুশপিঞ্জূলীর্দক্ষিণহস্তে কৃত্বা তিষ্ঠেৎ। ততো হোমকর্ত্তা আজ্যভাগান্তং কর্ম্ম কৃত্বা চতস্র আহুতীর্জুহোতি—অগ্ন আয়ূংষীত্যস্য ত্র্যচস্য বৈখানসা ঋষয়োঽগ্নিঃ পবমানো দেবতা গায়ত্রীচ্ছন্দ আজ্যহোমে বিনিয়োগঃ। ওঁ অগ্ন আয়ূংষি পবস আসুবোর্জ্জমিষঞ্চ নঃ। আরে বাধস্ব দুচ্ছুনাম্ স্বাহা। অগ্নয়ে পবমানায় ইদং নমম। অগ্নিঋর্ষিঃ পবমানঃ পাঞ্চজন্যঃ পুরোহিতঃ। তমীমহে মহাগয়ম্ স্বাহা। অগ্নয়ে পবমানায় ইদং নমম। ওঁ অগ্নে পবস্ব স্বপা অস্মে বর্চ্চঃ সুবীর্য্যম্। দধদ্রয়িং ময়ি পোষং স্বাহা। অগ্নয়ে পবমানায় ইদং নমম। প্রজাপতে ন ত্বদিত্যস্য হিরণ্যগর্ভঋষিঃ প্রজাপতির্দেবতা ত্রিষ্টুপ্ ছন্দ আজ্যহোমে বিনিয়োগঃ। ওঁ প্রজাপতে ন ত্বদেতান্যন্যো বিশ্বাজাতানি পরি তা বভূব। যৎকামাস্তে জুহুমস্তন্নো অস্তু বয়ং স্যাম পতয়ো রয়ীণাং স্বাহা। প্রজাপতয়ে ইদং নমম। ইতি চতস্র আহুতীর্হুত্বা পিতা শীতমুষ্ণোদকম্ একপাত্রে মিশ্রীকুর্য্যাৎ—ওঁ উষ্ণেন বায় উদকেনেহি। ততঃ কিঞ্চিন্মিশ্রিতজলং নবনীতঞ্চ গৃহীত্বা তেন কুমারস্য বামপ্রদেশমারভ্য পুরস্তাদ্দক্ষিণদেশপর্য্যন্তং প্রদক্ষিণং

---

* মতান্তরে পাত্রচতুষ্টয়ম্।

ত্রিঃ ক্লেদয়েৎ অনেন মন্ত্রেণ—ওঁ অদিতিঃ কেশানিত্যস্য প্রজাপতির্ঋষিরদিতির্দেবতা (আপো দেবতাঃ) গায়ত্রীচ্ছন্দশ্চূড়াকরণে বিনিয়োগঃ। ওঁ অদিতিঃ কেশান্ বপতু আপ উন্দন্তু (মেদসে দীর্ঘায়ুষ্টায় বলায়) বর্চ্চসে। তত স্ত্রিশ্বেত-শল্লকী-কণ্টকেন সর্ব্বান্ কেশান্ দক্ষিণবামক্রমেণ ভাগদ্বয়ং কুর্য্যাৎ। ততো দক্ষিণভাগং চতুর্দ্ধা বামভাগং ত্রিধা কুর্য্যাৎ। ততস্ত্রীণি কুশপিঞ্জূলানি আদায় (অভ্যাত্মাগ্রাণি) দক্ষিণকেশভাগে নিদধাতি—ওষধ ইত্যস্য প্রজাপতির্ঋষিরোষধির্দেবতা গায়ত্রীচ্ছন্দশ্চূড়াকরণে বিনিয়োগঃ। ওঁ ওষধে ত্রায়স্বৈনং। ততো দক্ষিণহস্তেন তাম্রক্ষুরেণ পীড়য়েৎ—স্বধিত ইত্যস্য প্রজাপতির্ঋষিঃ স্বধিতির্দেবতা গায়ত্রীচ্ছন্দশ্চূড়াকরণে বিনিয়োগঃ। ওঁ স্বধিতে মৈনং হিংসীঃ। ততো লৌহক্ষুরেণ ছিন্দাৎ—ওঁ যেনাবপৎ সবিতা ক্ষুরেণ সোমস্য রাজ্ঞো বরুণস্য বিদ্বান্ তেন ব্রহ্মাণো বপতেদমস্যায়ুষ্মান্ জরদষ্টির্যথাসৎ ইতি মন্ত্রেণ শমীপত্রকুশপিঞ্জূলীসহিতকেশান্ প্রচ্ছিদ্য প্রাগগ্রান্ শমীপর্ণৈঃ সহ মাত্রে প্রযচ্ছতি সা চ তান্ আনডুহে গোময়ে নিদধাতি। ততঃ পুনরপি অপরকেশেষু পূর্ব্ববন্মন্ত্রৈঃ উষ্ণোদক-নবনীতম্রক্ষণ-দর্ভপিঞ্জূলীত্রয়ার্পণ-তাম্রক্ষুর-পীড়নান্তং কর্ম্ম কৃত্বা লৌহক্ষুরং গৃহীত্বা—প্রজাপতির্ঋষির্ধাতা দেবতা ত্রিষ্টুপ্ ছন্দশ্চূড়াকরণে বিনিয়োগঃ। ওঁ যেন ধাতা বৃহস্পতেরগ্নেরিন্দ্রস্য চায়ুষেঽবপৎ। তেন ত আয়ুষে বপামি সুশ্লোক্যায় স্বস্তয়ে। ইতি দ্বিতীয়কেশং ছিত্ত্বা শমীপত্রৈঃ সহ পূর্ব্ববৎ গোময়ে নিক্ষিপেৎ। ততোঽপরভাগেঽপি পূর্ব্ববৎ উন্দনাদিকং কৃত্বা লৌহক্ষুরমাদায়—ওঁ যেন ভূয়শ্চ রাত্র্যাং জ্যোক্ চ পশ্যাতি সূর্য্যম্। তেন ত আয়ুষে বপামি সুশ্লোক্যায় স্বস্তয়ে ইতি ছিত্ত্বা মাত্রে শমীপত্রৈঃ সহ দদাতি, মাতা চ গোময়ে নিক্ষিপেৎ। ততঃ পুনরপ্যপরভাগে সর্ব্বং পূর্ব্ববৎ কৃত্বা পূর্ব্বোক্তমন্ত্রৈঃ সর্ব্বৈশ্চতুর্থভাগচ্ছেদনং কুর্য্যাৎ। বামভাগেঽপি উষ্ণোদকনবনীত-ক্লেদনং দর্ভপিঞ্জূলীত্রয়ার্পণং তাম্রক্ষুরপীড়নান্তং কৃত্বা পূর্ব্বোক্তপ্রথমচ্ছেদনমন্ত্রেণ প্রথমং দ্বিতীয়েন দ্বিতীয়ং তৃতীয়েন তৃতীয়ং কেশং ছিত্ত্বা মাত্রে প্রযচ্ছেৎ, মাতা চ গোময়শরাবে নিক্ষিপেৎ। চতুর্থভাগচ্ছেদনং নাপিতেনৈব কর্ত্তব্যম্। ততঃ কর্ত্তা অঙ্গুষ্ঠোপকনিষ্ঠাভ্যাং ক্ষুরধারাং মার্জ্জয়েৎ—যৎক্ষুরেণেত্যস্য প্রজাপতির্ঋষিঃ ক্ষুরো দেবতা ক্ষুরধারামার্জ্জনে বিনিয়োগঃ। ওঁ যৎক্ষুরেণ মর্চয়তা সুপেশসা বপ্তা বপসি কেশান্ শুন্ধি শিরো মাস্যায়ুঃ প্রমোষীঃ। ততো নাপিতায় ক্ষুরং দত্ত্বা বদেৎ—ওঁ শীতোষ্ণাভিরদ্ভিরবর্ধং

কুর্ব্বাণোঽক্ষুণ্বন্ কুশলীকুরু। নাপিতঃ করবাণীতি বদেৎ। ততোঽগ্নিসমীপে সর্ব্বান্ কেশান্ মুণ্ডয়েৎ। ততঃ কুমারং বেদীং নীত্বা পতিপুত্রবত্যো মঙ্গলপূর্ব্বকং স্নাপয়িত্বাঽলঙ্কৃত্য কর্ণবেধং কারয়িত্বা মাতুরঙ্কে দদ্যুঃ। ততো হোতা প্রায়শ্চিত্তং স্বিষ্টকৃতঞ্চ সমাপ্য- কর্ম্মকারয়িতৃব্রাহ্মণায় দক্ষিণাং দদ্যাৎ। অচ্ছিদ্রাবধারণঞ্চ কুর্য্যাৎ। কেশাংশ্চ গোষ্ঠে বংশবিটপে বা স্থাপয়েৎ। ব্রীহ্যাদিচতুরঃ শরাবান্ নাপিতায় দদ্যাৎ। তূষ্ণীমেবৈতৎ কুমার্য্যাঃ।

ইতি চূড়াকরণম্।

## অথোপনয়নম্

তত্র সমুদ্ভবনামা অগ্নিঃ। পিতা কৃতনিত্যক্রিয়ো মাতৃপূজাং বিধায় বৃদ্ধিশ্রাদ্ধং কুর্য্যাৎ। মাণবকং প্রাতর্ভোজয়িত্বা আচাম্য শিখাধারণপূর্ব্বকং ক্ষৌরং কারয়েৎ। ততঃ কুমারং স্নাপয়িত্বা গৈরিকাদিবস্ত্রমেকং পরিধাপয়েৎ। ততঃ পিতা উপলেপনাদি-মেক্ষণ-সংস্কারান্তং কৃত্বা চরুং শ্রপয়েৎ। তত্র ওঁ সদসস্পতয়ে ত্বা জুষ্টং গৃহ্লামি ওঁ সদসস্পতয়ে ত্বা জুষ্টং নির্ব্বপামি ওঁ সদসস্পতয়ে ত্বা জুষ্টং প্রোক্ষামি ইতি যথাক্রমং গ্রহণ-নির্ব্বাপণ-প্রোক্ষণরূপসংস্কারান্ কুর্য্যাৎ। এবং গায়ত্র্যৈ ঋষিভ্যঃ ব্রহ্মণে। ততঃ প্রস্ফোটনাদি-পাকান্তং কর্ম্ম কৃত্বাবতারয়েৎ। অথ যজ্ঞোপবীতমেকং কুমারস্য বামস্কন্ধে দক্ষিণভাগাবলম্বনং কুর্য্যাদনেন *—ওঁ যজ্ঞোপবীতমিত্যস্য পরমব্রহ্মঋষিঃ পরমাত্মা দেবতা ত্রিষ্টুপ্ ছন্দো যজ্ঞোপবীতধারণে বিনিয়োগঃ। ওঁ যজ্ঞোপবীতং পরমং পবিত্রং বৃহস্পতের্যৎ সহজং পুরস্তাৎ। আয়ুষ্যমগ্র্যং প্রতিমুঞ্চ শুভ্রং যজ্ঞোপবীতং বলমস্তু তেজঃ। ততঃ কৃষ্ণাজিনোত্তরীয়ং দদ্যাদনেন মন্ত্রেণ—প্রজাপতির্ঋষিস্ত্রিষ্টুপ্ ছন্দঃ কৃষ্ণাজিনং দেবতা কৃষ্ণাজিনপরিধাপনে বিনিয়োগঃ। ওঁ মিত্রস্য চক্ষুর্বরুণং বলীয়স্তেজো যশস্বী স্থবিরং সমিদ্ধং। অনাহনস্যং বসনং জরিষ্ণু পরীদং বাহ্বজিনং দধেঽহম্। ততো যথাবিভবং কুণ্ডলাদিনা অলঙ্কুর্য্যাৎ। ততো মাণবকঃ করসম্পুটৌ বদ্ধা যাচেত ওঁ উপনয়স্ব মাং যুষ্মৎপাদাঃ। গুরুঃ ওঁ উপনেষ্যামি ভবন্তমিতি বদেৎ। তত আচার্য্যোঽগ্নেরুত্তরতো গত্বা কুমারেণান্বারব্ধশ্চতস্র আহুতীর্জুহুয়াৎ। অগ্ন আয়ূংষীতি তিসৃণাং শতং বৈখানসা ঋষয়োঽগ্নিঃ পবমানো দেবতা গায়ত্রীচ্ছন্দ

---

* গৃহ্যসূত্রে পরিশিষ্টে চ যজ্ঞসূত্রকৃষ্ণাজিনমেখলাপরিধাপনেষু মন্ত্রো ন বিহিতঃ।

আজ্যহোমে বিনিয়োগঃ। ওঁ অগ্ন আয়ূংষি পবস আসুবোর্জ্জমিষঞ্চনঃ। আরে বাধস্ব দুচ্ছুনাং স্বাহা। অগ্নয়ে পবমানায় ইদং নমম। ওঁ অগ্নির্ঋষিঃ পবমানঃ পাঞ্চজন্যঃ পুরোহিতঃ। তমীমহে মহাগয়ম্ স্বাহা। অগ্নয়ে পবমানায় ইদং নমম। ওঁ অগ্নে পবস্ব স্বপা অস্মে বর্চ্চঃ সুবীর্য্যম্। দধদ্রয়িং ময়ি পোষং স্বাহা। অগ্নয়ে পবমানায় ইদং নমম। প্রজাপত ইত্যস্য হিরণ্যগর্ভঋষি-স্ত্রিষ্টুপ্ ছন্দঃ প্রজাপতির্দেবতা আজ্যহোমে বিনিয়োগঃ। ওঁ প্রজাপতে ন ত্বদেতান্যন্যো বিশ্বাজাতানি পরি তা বভূব। যৎকামাস্তে জুহুমস্তন্নো অস্তু বয়ং স্যাম পতয়ো রয়ীণাং স্বাহা। প্রজাপতয়ে ইদং নমম। তত উত্তরতোঽগ্নেঃ প্রাঙ্মুখ আচার্য্য উর্দ্ধস্তিষ্ঠেৎ। তত আচার্য্যস্য পুরস্তাৎ প্রত্যঙ্মুখো মাণবকঃ কৃতাঞ্জলিস্তিষ্ঠেৎ। অথাচার্য্যো ব্রহ্মচারিণোঽঞ্জলিমদ্ভিঃ পূরয়েৎ। আচার্য্য-স্যাপ্যঃ শুচির্ব্রাহ্মণঃ। আচার্য্যো মন্ত্রং পঠন্ ব্রহ্মচারিণোঽঞ্জলিং স্বাঞ্জলৌ মিশ্রী-করোতি, যথা—শ্যাবাশ্বঋষিঃ সবিতা দেবতা অনুষ্টুপ্ ছন্দো জলাঞ্জলিসেকে বিনিয়োগঃ। ওঁ তৎসবিতুর্ব্বৃণীমহে বয়ং দেবস্য ভোজনম্। শ্রেষ্ঠং সর্ব্বধাতমং তুরং ভগস্য ধীমহি। ইতি তেনোদকেন ব্রহ্মচারিণোঽঞ্জলৌ আত্মনো-ঽঞ্জলিমাসিঞ্চতি। ততো মাণবকস্য দক্ষিণহস্তং সাঙ্গুষ্ঠং গৃহীত্বা পঠেৎ—দেবস্য ত্বেত্যস্য শঙ্খঋষিঃ সবিত্রশ্বিপূষণো দেবতা উপনয়নে মাণবক-হস্তগ্রহণে বিনিয়োগঃ। ওঁ দেবস্য ত্বা সবিতুঃ প্রসবেঽশ্বিনোর্বাহুভ্যাং পূষ্ণো হস্তাভ্যাং হস্তং গৃহ্ণামি শ্রীঅমুকদেবশর্ম্মন্। ততঃ পুনরঞ্জলি-পূরণান্তং কর্ম্ম বিধায় পুনঃ সাঙ্গুষ্ঠং দক্ষিণং পাণিং দক্ষিণেন পাণিনা গৃহীত্বা সবিতেত্যস্য প্রজাপতির্ঋষিঃ সবিতা দেবতা উপনয়নে মাণবক-হস্তগ্রহণে বিনিয়োগঃ। ওঁ সবিতা তে হস্তমগ্রহীৎ শ্রীঅমুকদেবশর্ম্মন্। পুনরপ্যঞ্জলিপূরণান্তং কর্ম্ম কৃত্বা সাঙ্গুষ্ঠং পাণিং গৃহীত্বা—অগ্নিরিত্যস্য প্রজাপতির্ঋষিরগ্নির্দেবতা উপনয়নে মাণবকহস্তগ্রহণে বিনিয়োগঃ। ওঁ অগ্নিরাচার্য্যস্তব শ্রীঅমুকদেবশর্ম্মন্। তত আচার্য্যো মাণবকম্ আদিত্য-মীক্ষয়েৎ। ওঁ দেব সবিতরেষ তে ব্রহ্মচারী তং গোপায় স মামৃত। ইত্যাচার্য্যো জপেৎ। আচার্য্যো মাণবকং পৃচ্ছতি কিন্নামাসি ইতি। মাণবকঃ শ্রীঅমুকদেবশর্ম্মাহং ভোঃ ইতি বদেৎ। * অথাচার্য্যঃ ওঁ কস্য ব্রহ্মচার্য্যসি

* কিন্নামাসীতি অমুকদেবশর্ম্মাঽহমিতি চ পাঠো ন সূত্রকারধৃতঃ প্রচলিতাস্মদ্দেশীয়-পুস্তকেষু বর্ত্ততে।

প্রাণস্য ব্রহ্মচার্য্যসি কস্ত্বামুপনয়তে কায় ত্বা পরিদদামি। অথাচার্য্যো ব্রহ্মচারিণং প্রদক্ষিণমাবর্ত্তয়েৎ। যুবেত্যস্য গৃৎসমদঋষির্যূপো দেবতা ত্রিষ্টুপ্ ছন্দঃ প্রদক্ষিণাবর্ত্তনে বিনিয়োগঃ। ওঁ যুবা সুবাসাঃ পরিবীত আগাৎ স উ শ্রেয়ান্ ভবতি জায়মানঃ। ইত্যর্দ্ধর্চ্চেন। আচার্য্যঃ সমাবৃত্তমুখস্য ব্রহ্মচারিণ ঊর্দ্ধস্থিতস্য পৃষ্ঠদেশে স্থিত্বা স্কন্ধয়োরুপরি হস্তং দত্ত্বা উত্তরার্দ্ধেন হৃদয়দেশমালভেত। তন্ধীরাস ইত্যস্য গৃৎসমদঋষির্যূপো দেবতা ত্রিষ্টুপ্ ছন্দো মাণবকহৃদয়দেশালম্ভনে বিনিয়োগঃ। ওঁ তন্ধীরাসঃ কবয় উন্নয়ন্তি স্বাধ্যো মনসা দেবয়ন্তঃ। তত উভৌ প্রাঙ্মুখৌ অগ্নিসমীপে উপবিশেতাম্। ততো মাণবকস্তূষ্ণীমেকাং সমিধমগ্নৌ হুত্বা অপরাং গৃহীত্বা—প্রজাপতির্ঋষিরগ্নির্দেবতা বৃহতীচ্ছন্দঃ সমিদ্ধোমে বিনিয়োগঃ। ওঁ অগ্নয়ে সমিধমাহার্ষং বৃহতে জাতবেদসে। তয়া ত্বমগ্নে বর্দ্ধস্ব সমিধা ব্রহ্মণা বয়ং স্বাহা। অগ্নয় ইদং নমম। ততো মাণবকোঽগ্নিমুপস্পৃশ্য সোদকেন পাণিনা বারত্রয়ং মুখং নির্ম্মার্ষ্ট্যনেন মন্ত্রেণ—ওঁ তেজসা মা সমনজ্মি। অথাঞ্জলিং বদ্ধাগ্নিমুপতিষ্ঠেৎ। ময়ি মেধামিতি মন্ত্রাং বসুশ্রুতঋষির্লিঙ্গোক্তা দেবতা ত্রিষ্টুপ্ ছন্দোঽগ্ন্যুপস্থানে বিনিয়োগঃ। ওঁ ময়ি মেধাং ময়ি প্রজাং ময্যগ্নিস্তেজো দধাতু ওঁ ময়ি মেধাং ময়ি প্রজাং ময়ীন্দ্র ইন্দ্রিয়ং দধাতু। ওঁ ময়ি মেধাং ময়ি প্রজাং ময়ি সূর্য্যো ভ্রাজো দধাতু। ওঁ যত্তে অগ্নে তেজস্তেনাঽহং তেজস্বী ভূয়াসম্। ওঁ যত্তে অগ্নে বর্চ্চস্তেনাঽহং বর্চ্চস্বী ভূয়াসম্। ওঁ যত্তে অগ্নে হরস্তেনাহহং হরস্বী ভূয়াসম্। * (ততঃ কৌৎসঋষিঃ রুদ্রো দেবতা জগতীচ্ছন্দ্ আশীঃকর্ম্মণি বিনিয়োগঃ। ওঁ মানস্তোকে তনয়ে মান আয়ুষি মানো গোষু মানো অশ্বেষু রীরিষঃ। মানো বীরান্ রুদ্র ভামিতো বধীর্হবিষ্মন্তঃ সদমি ত্বা হবামহে। ওঁ ত্র্যায়ুষং জমদগ্নেঃ কশ্যপস্য ত্র্যায়ুষং অগস্ত্যস্য ত্র্যায়ুষং যদ্দেবানাং ত্র্যায়ুষং তন্মে অস্তু ত্র্যায়ুষম্। ওঁ স্বস্তি শ্রদ্ধাং যশঃ প্রজ্ঞাং বিদ্যাং বুদ্ধিং শ্রিয়ং বলম্। আয়ুষ্যং তেজ আরোগ্যং দেহি মে হব্যবাহন)। † ততো ব্রহ্মচারী জানুদ্বয়ং ভূমৌ নিপাত্য গুরোর্দক্ষিণপাদং দক্ষিণহস্তেন বামেন বামং গৃহীত্বা বদেৎ শ্রীঅমুকদেবশর্ম্মাহং ভো অভিবাদয়ে। আচার্য্যঃ ওঁ আয়ুষ্মান্

---

* ময়ি মেধামিতি মন্ত্রাং হিরণ্যগর্ভঋষিঃ পূর্ব্বত্রয়াণামগ্নীন্দ্রাগস্ত্যসূর্য্যা দেবতা উত্তরত্রয়াণামগ্নির্দেবতা মন্ত্রামাহুরী গায়ত্রীচ্ছন্দোঽগ্ন্যুপস্থাপনে বিনিয়োগঃ। ইতি ঋষিদেবতাচ্ছন্দসাং পাঠো বাসুদেবপদ্ধতৌ দৃশ্যতে।

† বন্ধনীমধ্যস্থপাঠঃ কেবলং বাসুদেবপদ্ধতৌ ধৃতঃ ন সার্ব্বত্রিকঃ।

ভব সৌম্য শ্রীঅমুকদেবশর্ম্মন্ ইতি। ততো ব্রহ্মচারী পাদাবুপসংগৃহ্য ব্রূয়াৎ—ওঁ অধীহি ভোঃ সাবিত্রীং ভো অনুব্রূহীতি। * আচার্য্যো ব্রহ্মচারিহস্তৌ হস্তাভ্যাং সংগৃহ্য উত্তরীয়বাসসা আচ্ছাদ্য † গায়ত্রীমুপদিশেৎ। বিশ্বামিত্রঋষির্গায়ত্রীচ্ছন্দঃ সবিতা দেবতা গায়ত্র্যুপদেশে (সাবিত্রীজপে) বিনিয়োগঃ। ততো ধ্যানম্—ওঁ শ্বেতবর্ণা সমুদ্দিষ্টা কৌষেয়বসনা তথা। শ্বেতৈর্বিলেপনৈঃ পুষ্পৈরলঙ্কারৈশ্চ শোভিতা। অক্ষমালাধরা দেবী পদ্মাসনগতা শুভা। আদিত্যমণ্ডলান্তঃস্থা ব্রহ্মলোকগতা স্থিতা॥ ‡ ওঁ ভূর্ভুর্বঃস্বস্তৎ সবিতুর্বরেণ্যং, পুনরপি বিশ্বামিত্রঋষিরিত্যাদি ওঁ ভূর্ভুর্বঃস্বস্তৎসবিতুর্ব্বরেণ্যং ভর্গো দেবস্য ধীমহি। ততঃ পুনরপি বিশ্বামিত্রঋষিরিত্যাদি ওঁ ভূর্ভুর্বঃস্বস্তৎ সবিতুর্বরেণ্যম্। ভর্গো দেবস্য ধীমহি ধিয়ো যো নঃ প্রচোদয়াৎ ওঁ। ¶ ততঃ ওঁ ভূঃ ওঁ ভুবঃ ওঁ স্বরিতি পাঠয়েৎ। ততো আচার্য্যো মাণবকস্য হৃদয়ে ঊর্দ্ধাঙ্গুলিং দক্ষিণং করং দত্ত্বা পঠেৎ—মম ব্রত ইত্যস্য পরাকদাসঋষির্হৃদয়ং দেবতা ত্রিষ্টুপ্ ছন্দো মাণবকহৃদয়দেশালভনে বিনিয়োগঃ। ওঁ মম ব্রতে তে হৃদয়ং দধামি মম চিত্তমনুচিত্তন্তে অস্তু। মম বাচমেকমনা জুষস্ব বৃহস্পতিষ্টা নিযুনক্তু মহ্যম্। ততো মাণবকস্য কটিদেশে মেখলাং বধ্নাতি—বিশ্বামিত্রঋষির্মেখলা দেবতা ত্রিষ্টুপ্ ছন্দো মেখলাবন্ধনে বিনিয়োগঃ। ওঁ ইয়ং দুরুক্তাৎ পরিবাধমানা শর্ম্ম বরূথং পুনতী ন(ম) আগাৎ। প্রাণাপানাভ্যাং বলমাবহন্তী স্বসাদেবী সুভগে মেখলেয়ম্। ওঁ ঋতস্য গোপ্ত্রী তপসঃ পরস্বী ঘ্নতী রক্ষঃ সহমানা অরাতীঃ। সা মা সমন্তমভিপর্য্যেহি ভদ্রে ধর্ত্তারস্তে মেখলে মারিষাম। ততো মাণবককেশাগ্রসম্মিতং পলাশদণ্ডং দদ্যাদনেন মন্ত্রেণ—আত্রেয়ঋষিস্ত্রিষ্টুপ্ ছন্দো বিশ্বেদেবা দেবতা দণ্ডপ্রদানে বিনিয়োগঃ। ওঁ

---

* বাসুদেবমতে অধীহি ভোঃ সাবিত্রীমিত্যাচার্য্যস্য ভো অনুব্রূহীতি মাণবকস্য উক্তিঃ।

† আত্মানং ব্রহ্মচারিণং বাসসাচ্ছাদ্য ইতি বাসুদেবঃ।

‡ ধ্যানং ন গৃহ্যসূত্রকারেণ বাসুদেবেন বা ধৃতম্।

¶ বাসুদেবস্তু ওঁ ভূর্ভুর্বঃস্বস্তৎসবিতুর্বরেণ্যম্। ইতি প্রথমং পাদং। ওঁ ভূর্ভুর্বঃস্বঃ ভর্গো দেবস্য ধীমহি। ইতি দ্বিতীয়ং পাদং। ওঁ ভূর্ভুর্বঃস্বঃ। ধিয়ো যো নঃ প্রচোদয়াৎ ওঁ ইতি তৃতীয়ং পাদম্। ততঃ সর্ব্বাং। পাদং পাদং যদি বক্তুং ন শক্নোতি তদা পাদার্দ্ধং পাদার্দ্ধং যথা—ওঁ তৎসবিতুঃ। বরেণিয়ং। ভর্গো দেব। স্য ধীমহি। ধিয়ো যো নঃ। প্রচোদয়াৎ ওঁ ইতি বাচয়িত্বা সর্ব্বাং বাচয়ীত। ইতি ক্রমমাহ। মম ব্রতে ইত্যাদি মন্ত্রস্য ঋষ্যাদিকং ন বাসুদেবেন লিখিতম্। ন বা মেখলাপরিধাপনে মন্ত্রো বিহিতঃ। সূত্রকারেণাপি মেখলাবন্ধনে ন মন্ত্রঃ সমুপদিষ্টঃ।

স্বস্তি নো মিমীতামশ্বিনা ভগঃ স্বস্তি দেব্যদিতিরনর্ব্বণঃ। স্বস্তি পূষা অসুরো দধাতু নঃ স্বস্তি দ্যাবাপৃথিবী সুচেতুনা। * ততো ব্রহ্মচারিণমাদিশেৎ। ওঁ ব্রহ্মচার্য্যসি, অপোঽশান, কর্ম্ম কুরু, মা দিবা স্বাপ্সীঃ আচার্য্যাধীনো বেদমধীষ † উদকসমিৎকুশাদ্যাহরণং কুরু, সায়ং প্রাতঃ সমিধমাধেহি, সায়ং প্রাতর্ভিক্ষাচরণং কুরু। ব্রহ্মচারী সর্ব্বত্র বাঢ়মিতি ব্রূয়াৎ। ‡ ততো ব্রহ্মচারী উদকং স্পৃষ্ট্বা বদ্ধাঞ্জলির্বদেৎ—ওঁ ব্রতানাং ব্রতপতিরসি ব্রতং সাবিত্রীকং বৈদিকমিমং কালং চরিষ্যামি তচ্ছকেয়ং তেনাধ্যাসম্ ইতি যথাশক্তি কালনির্দ্দেশং কুর্য্যাৎ। ¶ ততো গৃহীতদণ্ডো ব্রহ্মচারী ভিক্ষাপাত্রং হস্তে কৃত্বা প্রার্থয়েৎ—ওঁ ভবতী ভিক্ষাং দদাতু। § ইতি মাতরং ততো ভগিনীং ততো ভবান্ ভিক্ষাং দদাতু ইতি পিতরং যাচেত। তে চ যথাশক্তি দদ্যুঃ। ততো ভৈক্ষ্যমাচার্য্যায় নিবেদয়েৎ। আচার্য্যোঽপি উপযুজ্যতামিতি অনুজ্ঞাং দদ্যাৎ। মাণবকোঽপি তৎ সায়ং ভোক্তুং স্থাপয়েৎ। (ততো বেদাধ্যয়নং কুর্য্যাৎ)। অথাচার্য্যো (ভিক্ষালব্ধৈস্তণ্ডুলৈর্মুষ্টিগ্রহণাদিপূর্ব্বকং চরুং শ্রপয়িত্বা) ব্রহ্মচারিণান্বারব্ধঃ স্রুচি ঘৃতস্রুবং দত্ত্বা চরোর্মধ্যাৎ পূর্ব্বার্দ্ধাচ্চ মেক্ষণেনান্নং দ্বিরবদায় অন্নোপরি ঘৃতস্রুবমবদানস্থানে ঘৃতস্রুবদ্বয়ং দত্ত্বা বশিষ্ঠঋষিঃ সদসস্পতির্দেবতা গায়ত্রীচ্ছন্দোঽনুপ্রবচনীয়চরুহোমে বিনিয়োগঃ। ওঁ সদসস্পতিমদ্ভুতং প্রিয়মিন্দ্রস্য কাম্যং সনিং মেধাময়াসিষং স্বাহা। সদসস্পতয়ে ইদং নমম। ওঁ তৎসবিতুর্বরেণ্যমিত্যাদি দ্বিতীয়ং গায়ত্র্যা

---

* বাসুদেবপদ্ধতৌ দণ্ডপ্রদানে অন্যবিধো মন্ত্রো লিখিতঃ। যথা—এষ ক্ষেতি ইতি মন্ত্রস্যাত্রেয়ঃ শ্রুতবিদৃষিঃ মিত্রাবরুণৌ দেবতে ত্রিষ্টুপ্ ছন্দো দণ্ডপ্রদানে বিনিয়োগঃ। ওঁ এষ ক্ষেতি রথবীতির্মঘবা গোমতী রনু। পর্ব্বতেষপশ্রিতঃ।

† উদকেত্যাদি সায়ং প্রাতর্ভিক্ষাচরণং কুর্ব্বিত্যন্তঃ পাঠো ন সূত্রকারধৃতঃ।

‡ অত্র বাসুদেবঃ—ওঁ ব্রহ্মচার্য্যসীতি গুরু; ব্রহ্মচার্য্যস্মীতি বটুঃ। আপোশানং কর্ম্ম কুরু ইতি গুরুঃ। করোমীতি বটুঃ। মূত্রপুরীষাদৌ মৃত্তিঃ শৌচাচমনং কুরু। করোমীতি বটুঃ। আচার্য্যাধীনো ভব। ভবামীতি বটুঃ। দিবা মা স্বাপ্সীঃ, ন দিবা স্বাপমীতি বটুঃ। সন্ধ্যামুপাস্ব। উপাসে ইতি বটুঃ। সায়ং প্রাতঃ সমিধমাধৎস্ব। আদধে ইতি বটুঃ। বেদানধীষ। পঠামীতি বটুঃ। সায়ং প্রাতর্ভিক্ষ। ভিক্ষামীতি বটুঃ। ইতি মন্ত্রভেদমাহ।

¶ ওঁ ব্রতানামিত্যাদি মন্ত্রো ন সূত্রকারসম্মতঃ ধৃতঃ, বাসুদেবপদ্ধতৌ বা ন ধৃতঃ, প্রচলিতপুস্তকেষু দৃশ্যতে।

§ অয়ং সূত্রকারধৃতঃ পাঠঃ—ভবতি ভিক্ষাং দেহীতি বা ভবন্ ভিক্ষাং দেহীতি প্রচলিতপুস্তকেষু গৃহীতঃ পাঠঃ। ততঃ স্বিষ্টকৃদাদিহোমং সমাপয়েদিতি কেষাঞ্চিন্মতম্।

ইদং নমম। ওঁ ঋষিভ্যঃ স্বাহা ঋষিভ্য ইদং নমম। (ততঃ সমিদ্ধোমঃ।—* সদসস্পতিমিত্যস্য বশিষ্ঠঋষিঃ সদসম্পতির্দেবতা গায়ত্রীচ্ছন্দঃ সমিদ্ধোমে বিনিয়োগঃ। ওঁ সদসস্পতিমদ্ভুতমিত্যাদি। সদসস্পতয় ইদং নমম। এবং গায়ত্র্যা গায়ত্র্যৈ ইদং নমম। ঋষিভ্যঃ স্বাহা ঋষিভ্য ইদং নমম)। † অথ সন্ধ্যোপাসনম্। ততো ব্রহ্মচারী তূষ্ণীমেকাং সমিধং হুত্বা অপরাং গৃহীত্বা প্রজাপতিঋষিরগ্নির্দেবতা বৃহতীচ্ছন্দঃ সমিদ্ধোমে বিনিয়োগঃ। ওঁ অগ্নয়ে সমিধমাহার্ষং বৃহতে জাতবেদসে তয়া ত্বমগ্নে বর্দ্ধস্ব সমিধা ব্রহ্মণা বয়ং স্বাহা,অগ্নয়ে ইদং নমম। ততঃ স্বিষ্টকৃদ্ধোমং সমাপ্য ব্রাহ্মণান্ ভোজয়িত্বা তান্ মাণবকোঽঞ্জলিং বদ্ধা যাচেত—ওঁ বেদসমাপ্তিং ভবন্তো ব্রুবন্তু। তে চ বেদসমাপ্তিরস্তু ইতি ব্রূয়ুঃ। ‡ ততো মেধাজননম্। আচার্য্যঃ কুম্ভোদকেন সিঞ্চন্তং ব্রহ্মচারিণমিমং মন্ত্রং পাঠয়েদ্‌যথা—¶ ওঁ সুশ্রবঃ সুশ্রবা অসি যথা ত্বং সুশ্রবঃ সুশ্রবা অস্যেবং মাং সুশ্রবঃ সৌশ্রবসং কুরু। যথা ত্বং দেবানাং যজ্ঞস্য নিধিপোঽস্যেবমহং মনুষ্যাণাং বেদস্য নিধিপো ভূয়াসম্। অথ বেদারম্ভঃ। গুরুঃ সঙ্কল্পং কৃত্বাজ্যহোমং কুর্য্যাৎ—ওঁ পৃথিব্যৈ স্বাহা পৃথিব্যৈ ইদং নমম। এবম্ অগ্নয়ে, ব্রহ্মণে, প্রজাপতয়ে, ছন্দোভ্যঃ, দেবেভ্যঃ, ঋষিভ্যঃ, শ্রদ্ধায়ৈ, মেধায়ৈ, সদসস্পতয়ে, অনুমতয়ে। ততো আচার্য্যোঽগ্নেরুত্তরতঃ প্রাঙ্মুখায় শিষ্যায় গুরুমীক্ষমাণায় দক্ষিণহস্তেন গুরুদক্ষিণপাদং গৃহীত্বা উপসন্নায় ওঁকারমহাব্যাহৃতিপাঠপূর্ব্বকং বেদাদীন্ পাঠয়েৎ, যথা—মধুচ্ছন্দঋষিরগ্নির্দেবতা গায়ত্রীচ্ছন্দো ব্রহ্মযজ্ঞজপে বিনিয়োগঃ। ওঁ অগ্নিমীলে পুরোহিতং। পুনরপি ঋষিদেবতাচ্ছন্দাংসি পঠিত্বা ওঁ ভূর্ভুবঃস্বঃ ওঁ অগ্নিমীলে পুরোহিতং যজ্ঞস্য দেবমৃত্বিজম্। পুনরপি ঋষ্যাদিকং পঠিত্বা ওঁ ভূর্ভুবঃস্বঃ ওঁ অগ্নিমীলে পুরোহিতং যজ্ঞস্য দেবমৃত্বিজম্। হোতারং রত্নধাতমম্। এবং সর্ব্বত্র পচ্ছঃ

---

* সমিদ্ধোমো ন সূত্রকৃতা পরিশিষ্টকারেণ বা ধৃতঃ ধৃতস্তু কৈশ্চিৎ প্রাচীনপুস্তকৈরিতি লিখিতোঽয়ং হোমঃ।

† অত্র বাসুদেবঃ—ওঁ অগ্নয়ে স্বাহা ইতি হুত্বা সদসস্পতিরিত্যস্য মেধাতিথি-কণ্বঋষির্গায়ত্রীচ্ছন্দঃ সদসস্পতির্দেবতা চরুহোমে বিনিয়োগঃ। ওঁ সদসস্পতিমিত্যাদিনা জুহুয়াৎ। অথ বিশ্বামিত্রঋষিঃ সবিতা দেবতা গায়ত্রীচ্ছন্দশ্চরুহোমে বিনিয়োগঃ। ওঁ তৎসবিতুরিত্যাদি সবিতৃহোমং ঋষিভ্যঃ স্বাহেতি ঋষিহোমঞ্চ সমাপয়েৎ। ইত্যাহ।

‡ অত ঊর্দ্ধমক্ষারলবণাশী ব্রহ্মচার্য্যধঃশায়ী ত্রিরাত্রং দ্বাদশরাত্রং সম্বৎসরং বা ইতি গৃহ্যসূত্রম্।

¶ অনিন্দিতায়াং দিশ্যেকমূলং পলাশং কুশস্তম্বং বা পলাশাপচারে প্রদক্ষিণমুদকুম্ভেন ত্রিঃ পরিষিঞ্চন্তং বাচয়তি। ইতি গৃহ্যসূত্রধৃতপ্রয়োগঃ।

অর্দ্ধশঃ সর্ব্বাম্ তু আদৌ ঋষ্যাদি ওঁকার-মহাব্যাহৃতি-পাঠপূর্ব্বকমধ্যাপয়েৎ। ইতি ঋগ্‌বেদাধ্যয়নম্। * যাজ্ঞবল্ক্যঋষিরুষ্ণিক্‌ছন্দো বায়ুর্দেবতা ব্রহ্মযজ্ঞজপে বিনিয়োগঃ। ওঁ ভূর্ভুবঃস্বঃ ওঁ ইষে ত্বোর্জ্জে ত্বা বায়বঃ স্থ। দেবো বঃ সবিতা প্রার্পয়তু। শ্রেষ্ঠতমায় কর্ম্মণে। ইতি যজুর্বেদাধ্যয়নম্। গৌতমভরদ্বাজ-ঋষির্গায়ত্রীচ্ছন্দোঽগ্নির্দেবতা ব্রহ্মযজ্ঞজপে বিনিয়োগঃ। ওঁ ভূর্ভুবঃস্বঃ ওঁ অগ্ন আয়াহি বীতয়ে। গৃণানো হব্যদাতয়ে। নিহোতা সৎসি বর্হিষি। ইতি সামবেদাধ্যয়নম্। নারদঋষির্গায়ত্রীচ্ছন্দো বরুণো দেবতা ব্রহ্মযজ্ঞজপে বিনিয়োগঃ। ওঁ শন্নো দেবীরভিষ্টয়ে। আপো ভবন্তু পীতয়ে। শং যোরভিস্রবন্তু নঃ। ইতি অথর্ব্ববেদাধ্যয়নম্। ইত্যুপনয়নম্।

## অথ সমাবর্ত্তনম্

ব্রহ্মচারী প্রিয়বচনপ্রণিপাতাশ্রয়ানুরূপ-পারিতোষিকপ্রদানেন গুরুং তোষয়িত্বা স্নাত্বা প্লবননামকসংস্কারং করোতি। তত্রৈতানি দ্রব্যাণি যথা—কর্ণে কাঞ্চনাদিনির্ম্মিতকুণ্ডলং কণ্ঠে পরিধানযোগ্যং মণিং বস্ত্রম্ উপানদ্‌যুগ্মং বৈণব-দণ্ডং সর্ব্বৌষধিগন্ধানুলেপনম্ উষ্ণীষং ছত্রং সর্ব্বমাচার্য্য এব দদ্যাৎ। ততঃ সর্ব্বাঃ সমিধোঽগ্নিসমীপে স্থাপয়েৎ। আচার্য্যায় ভোজ্যং গাঞ্চ দত্ত্বা অন্যেভ্যো-ঽপি ভোজ্যানি দদ্যাৎ। ততঃ কর্ত্তা অদ্যেত্যাদি অমুকদেবশর্ম্মণঃ সমাবর্ত্তনকর্ম্মাঙ্গহোমমহং করিষ্যামি। ততঃ শ্মশ্রাদিসংস্কারং কুর্য্যাৎ। তত্রাদৌ চৌড়সমাপকো হোমঃ। ততঃ কুশপিঞ্জূল্যাধান-তাম্র-লৌহক্ষুর-পীড়নাদিকাঃ ক্রিয়াঃ কার্য্যাঃ। তন্মন্ত্রাশ্চূড়াকরণপ্রকরণে দ্রষ্টব্যাঃ। তৈস্তৈর্ম্মন্ত্রৈঃ সপ্তধা ছিত্ত্বা মাত্রে সমর্পণান্তং কৃত্বা শিখাধারণপূর্ব্বকং ক্ষৌরং কারয়েৎ। ততো মাণবকঃ সর্ব্বৌষধীভিঃ স্নাত্বা বস্ত্রাদিকং গুরবে নিবেদ্য স্বয়ং গৃহ্নীয়াৎ যথা—দীর্ঘতমা ঋষির্মিত্রাবরুণৌ দেবতে ত্রিষ্টুপ্ ছন্দো বস্ত্রপরিধানে বিনিয়োগঃ। ওঁ যুবং বস্ত্রাণি পীবসা বসাথে যুবোরচ্ছিদ্রামন্তবোহসর্গাঃ। অবাতিরতমনৃতানি বিশ্বঋতেন মিত্রাবরুণাসচেথে। ইত্যনেন বস্ত্রৈকং পরিধায়াপরবস্ত্রমুপধায় উষ্ণীষং বধ্নীয়াৎ। ততঃ—পরমাত্মঋষিঃ পরমাত্মা দেবতা

---

* কেচিত্তু ওঁ ভূর্ভুবঃ স্বঃ অগ্নিমীলে পুরোহিতম্। ওঁ ভূর্ভুবঃ স্বঃ যজ্ঞস্য দেবমৃত্বিজম্। ওঁ ভূর্ভুবঃ স্বঃ হোতারং রত্নধাতমম্। ইতিপচ্ছঃ পাঠয়িত্বা ওঁ ভূর্ভুবঃ স্বঃ ওঁ অগ্নিমীলে পুরো-হিতং যজ্ঞস্য দেবম্ ওঁ ভূর্ভুবঃ স্বঃ ঋত্বিজং হোতারং রত্ন ধাতমম্ ইতি অর্দ্ধশঃ ততঃ সর্ব্বং পাঠয়েৎ ইত্যেবং ক্রমমাহুঃ।

গায়ত্রীচ্ছন্দো যজ্ঞোপবীতধারণে বিনিয়োগঃ। ওঁ যজ্ঞোপবীতং পরমং পবিত্রং বৃহস্পতের্যৎ সহজং পুরস্তাৎ। আয়ুষ্যমগ্র্যং প্রতিমুঞ্চ শুভ্রং যজ্ঞোপবীতং বলমস্তু তেজঃ ইতি গৃহ্লীয়াৎ। তত ওঁ উদুত্তমং বরুণপাশমস্মদবাধমং বিমধ্যমং শ্রথায় অথাদিত্যব্রতে বয়ং তবানাগসোঽদিতয়ে স্যামঃ। ইতি মেখলাকৃষ্ণাজিনে মোচয়িত্বা ওঁ অশ্মনস্তেজোঽসি চক্ষুর্মে পাহি ইত্যনেন অঞ্জনং গৃহ্লীয়াৎ। * ওঁ অশ্মনস্তেজোঽসি শ্রোত্রং মে পাহি ইতি কুণ্ডলে বধ্নীয়াৎ। অনুলেপনেন পাণী প্রলিপ্য মুখমগ্রে ব্রাহ্মণো লিম্পেত ওঁ অনার্ত্তাঽস্যনার্ত্তোঽহং ভূয়াসমিতি শিখায়াং স্রজং বধ্নীয়াৎ। ওঁ দেবানাং প্রতিষ্ঠে স্থঃ সর্ব্বতো মা পাতমিত্যুপানহাবাস্থায় ওঁ দিবশ্ছদ্মাসি ইতি ছত্রং। ওঁ বেণুরসি বানস্পত্যোঽসি সর্ব্বতো মা পাহি ইতি বৈণবং দণ্ডং গৃহীত্বা। ওঁ আয়ুষ্যং বর্চ্চস্যং রায়স্পোষমৌদ্ভিদম্। ইদং হিরণ্যং বর্চ্চস্ব জৈত্রায়াবিশতাদিমাম্। ইতি কণ্ঠে মণিং বধ্নীয়াৎ। ততো মাণবকো লম্বমানোষ্ণীষং কৃত্বা উপানহৌ সন্ত্যজ্যাগ্নিসমীপমাগত্যাগ্নেরৈশান্যাং দিশি ঊর্দ্ধাস্থিতো বক্ষ্যমাণমন্ত্রেণ সমিধমেকাং জুহুয়াৎ। ওঁ স্মৃতঞ্চ মে অস্মৃতঞ্চ মে তন্ম উভয়ব্রতঞ্চ(মে) নিন্দা চ মে অনিন্দা চ মে তন্ম উভয়ব্রতঞ্চ(মে), বিদ্যা চ মে অবিদ্যা চ মে তন্ম উভয়ব্রতঞ্চ(মে), শ্রদ্ধা চ মে অশ্রদ্ধা চ মে তন্ম উভয়ব্রতঞ্চ(মে), প্রজ্ঞা চ মে অপ্রজ্ঞা চ মে তন্ম উভয়ব্রতঞ্চ(মে), ইষ্টঞ্চ মে অনিষ্টঞ্চ মে তন্ম উভয়ব্রতঞ্চ(মে), দত্তঞ্চ মে অদত্তঞ্চ মে তন্ম উভয়ব্রতঞ্চ(মে), অধীতঞ্চ মে অনধীতঞ্চ মে তন্ম উভয়ব্রতঞ্চ (মে), কৃতঞ্চ মে অকৃতঞ্চ মে তন্ম উভয়ব্রতঞ্চ(মে), সত্যঞ্চ মে অসত্যঞ্চ মে তন্ম উভয়ব্রতঞ্চ(মে), শ্রুতঞ্চ মে অশ্রুতঞ্চ মে তন্ম উভয়ব্রতঞ্চ(মে), ব্রতঞ্চ মে অব্রতঞ্চ মে তন্ম উভয়ব্রতঞ্চ(মে), যদগ্নে সেন্দ্রস্য সপ্রজাপতিকস্য সঋষিকস্য সঋষিরাজন্যস্য সাকাশস্য সাতীকাশস্য সানূকাশস্য সপ্রতীকাশস্য সদেবমনুষ্যস্য সগন্ধর্ব্বাপ্সরস্কস্য সহায়ন্যৈশ্চ পশুভির্গ্রাম্যৈশ্চ যন্ম আত্মন আত্মনি ব্রতং তন্মে সর্ব্বব্রতমিদমহমগ্নে সর্ব্বব্রতো ভবামি স্বাহা। অগ্নয়ে ইদং নমম। ততো ব্রহ্মচারী উপবিশ্য মণ্ডপাৎ সমিধমাকৃষ্য বক্ষ্যমাণদশভির্মন্ত্রৈঃ সমিদ্ধোমং করোতি। মমাগ্ন ইতি নবর্চ্চস্য সূক্তস্যাঙ্গিরসো বিহব্যঋষির্বিশ্বেদেবা দেবতা আদ্যাঅষ্টৌ ত্রিষ্টুভঃ অন্ত্যা চ জগতীচ্ছন্দাংসি সমিদ্ধোমে বিনিয়োগঃ। ওঁ মমাগ্নে বর্চ্চো বিহবেষস্তু বয়ং ত্বেন্ধানাস্তন্বং পুষেম। মহ্যং

---

* সব্যং পূর্ব্বমঞ্জয়িত্বা ততো দক্ষিণমঞ্জয়ীত। প্রতিচক্ষুর্মন্ত্রাবৃত্তিঃ ইতি গৃহ্যভাষ্যম্।

নমস্তাং প্রদিশশ্চতস্রস্ত্বয়াধ্যক্ষেণ পৃতনা জয়েম স্বাহা। বিশ্বেভ্যো দেবেভ্য ইদং নমম। ওঁ মম দেবা বিহবে সন্ত সর্ব্ব ইন্দ্রবন্তো মরুতো বিষ্ণুরগ্নিঃ। মমান্তরিক্ষমুরুলোকমস্ত মহ্যং বাতঃ পবতাং কামে অস্মিন্ স্বাহা। বিশ্বেভ্যো দেবেভ্য ইদং নমম। ওঁ ময়ি দেবা দ্রবিণমাযজন্তাং ময্যাশীরস্ত ময়ি দেবহূতিঃ। দৈব্যা হোতারো বনুষন্ত পূর্ব্বেরিষ্টাঃ স্যাম তন্বা সুবীরাঃ স্বাহা। বিশ্বেভ্যো দেবেভ্য ইদং নমম। ওঁ মহ্যং যজন্ত মম যানি হব্যা কূতিঃ সত্যা মনসো মে অস্ত। এনোমা নিগাং কতমচ্চ নাহং বিশ্বেদেবাসো অধিবোচতা নঃ স্বাহা। বিশ্বেভ্যো দেবেভ্য ইদং নমম। ওঁ দেবীঃ ষড়ূর্ব্বীরুরুণঃ কৃণোত বিশ্বেদেবাস ইহ বীরয়ধ্বম্। মাহা স্মহি প্রজয়া মা তনূভির্মারধাম দ্বিষতে সোম রাজন্ স্বাহা। বিশ্বেভ্যো দেবেভ্য ইদং নমম। ওঁ অগ্নে মন্যুং প্রতিনুদন্ পরেষামদব্ধো গোপাঃ পরিপাহি নস্ত্বম্। প্রত্যঞ্চো যন্ত নিগুতঃ পুনস্তে মৈষাং চিত্তং প্রবুধাং বিনেশৎ স্বাহা। বিশ্বেভ্যো দেবেভ্য ইদং নমম। ওঁ ধাতা ধাতৄণাং ভুবনস্য যস্পতির্দেবং ত্রাতারমভিমাতিষাহম্। ইমং যজ্ঞমশ্বিনোভা বৃহস্পতির্দেবাঃ পান্ত যজমানং ন্যর্থাৎ স্বাহা। বিশ্বেভ্যো দেবেভ্য ইদং নমম। ওঁ উরুব্যচা নো মহিষঃ শর্ম্ম যং সদস্মিন্ হবে পুরুহূতঃ পুরুক্ষুঃ। স নঃ প্রজায়ৈ হর্য্যশ্ব মৃড়য়েন্দ্র মানো রীরিষো মা পরাদাঃ স্বাহা। বিশ্বেভ্যো দেবেভ্য ইদং নমম। ওঁ যে নঃ সপত্না অপতে ভবন্ত্বিন্দ্রাগ্নিভ্যামববাধামহে তান্। বসবো রুদ্রা আদিত্যা উপরিস্পৃশং মোগ্রং চেত্তারমধিরাজমক্রন্ স্বাহা। বিশ্বেভ্যো দেবেভ্য ইদং নমম। ওঁ অর্ব্বাঞ্চমিন্দ্রমমুতো হবামহে যো গোজিদ্ধন জিদশ্বজিদ্যঃ। ইমং নো যজ্ঞং বিহবে জুষস্বাস্য কুর্ম্মোহরিবো মে দিনং ত্বা স্বাহা। * সূর্য্যায় ইদং নমম। ততঃ প্রায়শ্চিত্তং সমাপ্য স্বিষ্টকৃতং সমাপয়েৎ। ব্রহ্মদক্ষিণাং দত্ত্বা কর্ম্মকারয়িতৃব্রাহ্মণায় দক্ষিণাং দদ্যাৎ। ততোঽচ্ছিদ্রাবধারণাদিকং কুর্য্যাৎ। তিলকঞ্চ দদ্যাৎ।†

---

* অর্ব্বাঞ্চমিত্যস্য ঋষ্যাদিকং ন দৃশ্যতে।

† বাসুদেবমতে সমাবর্ত্তনম্। যথাচরিতব্রহ্মচর্য্যো বিদ্যান্তে গুরুমর্থেন সন্তোষ্য তেনানুজ্ঞাতঃ স্বয়মেব সমাবর্ত্তনং কুর্য্যাৎ। ওঁ অদ্যেত্যাদি ব্রহ্মচর্য্যাৎ সমাবর্ত্তয়িষ্যে ইতি সঙ্কল্প্য কৃতপ্রাণায়ামো ব্রহ্মচারী সূর্য্যনামানমগ্নিং স্থাপয়েৎ। দ্রব্যাসাদনে বিশেষঃ—ব্রীহিযবমাষতিলৈঃ পৃথক্ পৃথক্ পূর্ণানি শরাবাণি ক্ষুরং শীতমুষ্ণোদকং নবনীতং দধি মণিকুণ্ডলদ্বয়ং বাসসীচ্ছত্রং উপানদ্‌যুগলং বৈণবং দণ্ডং কমণ্ডলুং স্রজং করঞ্জবীজপিষ্টম্ উষ্ণীষমঞ্জনং শ্রীখণ্ডং সুবর্ণময়ং মণিঞ্চাসাদয়েৎ। আধারান্তং বহ্নিস্থাপনং বিধায় প্রকৃতকর্ম্ম কুর্য্যাৎ। যথা—একাদশপ্রাদেশমাত্রাঃ সমিধ আসাদ্যাগ্নিমর্চ্চয়েৎ। তস্মিন্নেবাগ্নৌ অগ্ন আয়ূষীতি তিসৃণাং শতং বৈখানসা

ঋষয়োঽগ্নিঃ পবমানো দেবতা গায়ত্রীচ্ছন্দ আজ্যহোমে বিনিয়োগঃ। ওঁ অগ্ন আয়ূংষীত্যাদি অগ্নিঋষিরিত্যাদি অগ্নে পবস্বেত্যাদি হুত্বা প্রজাপতে ন ত্বাদিতি হিরণ্যগর্ভঋষিঃ প্রজাপতি-দেবতা ত্রিষ্টুপ্ ছন্দ আজ্যহোমে বিনিয়োগঃ। ওঁ প্রজাপতে ন ত্বদেতাদিত্যাদি প্রজাপতয়ে হুত্বা শীতোষ্ণাম্ভসী গৃহীত্বা একস্মিন্ পাত্রে ওঁ উষ্ণেন বায় উদকেনেহীতি মিশ্রীকুর্য্যাৎ। নবনীতং দধি চ অপ্সু নিক্ষিপ্য তাসামেকদেশং গৃহীত্বা ত্রিঃ প্রদক্ষিণং শ্মশ্রূণাং মুণ্ডনং ওঁ অদিতিঃ শ্মশ্রূণি বপতু আপ উন্দন্তু বর্চ্চসে ইতি প্রদক্ষিণশ্মশ্রুপক্ষে কুশানভ্যাগ্রান্ শমী-পত্রাণি চ নিদধ্যাৎ। ওঁ ওষধে ত্রায়স্ব মাং ইতি ওঁ স্বধিতে মা মা হিংসীরিতি ক্ষুরেণাবপীড ওঁ যেনাবপৎ সবিতা ক্ষুরেণ সোমস্য রাজ্ঞো বরুণস্য বিদ্বান্ তেন তে ব্রহ্মণো বপতেদমস্তায়ুষ্মান্ জরদষ্টির্যথাসৎ ইতি ছিনত্তি। এবমুত্তরশ্মশ্রুচতুষ্টয়চ্ছেদনে কুশপিঞ্জূলান্যবপীড়নান্তং কৃত্বা ওঁ যেন ধাতা বৃহস্পতেরগ্নেরিন্দ্রস্য চাবপৎ। তেন ত আয়ুষে বপামি সুশ্লোক্যায় স্বস্তয়ে। ইতি দ্বিতীয়ং ছিন্দ্যাৎ। পুনস্তথৈবাবপীডা ওঁ যেন.ভূয়শ্চরাদিবং জ্যোক্ চ পশ্যতি সূর্য্যম্। তেনায়ুষে বপামি সুশ্লোক্যায় স্বস্তয়ে ইতি তৃতীয়ং পূর্ব্বোক্তত্রিভির্মন্ত্রৈশ্চতুর্থং ছিন্দ্যাৎ। ওঁ যৎ-ক্ষুরেণ মর্চয়তা সুপেশসা বপ্তা বপসি শ্মশ্রূণি শুন্ধি মুখং মাস্যায়ু প্রশেষীরিতিশ্মশ্রূবপনং কুর্য্যাৎ। এবং শ্মশ্রুনখলোমানি বাপয়িত্বা পিষ্টকরঞ্জবীজেনাঙ্গমনুলিপ্য মঙ্গলস্নানং কুর্য্যাৎ। তত আচম্যাগ্নিসমীপমাগত্য যুবং বস্ত্রাণীতি দীর্ঘতমা ঋষিরিত্যাদিনা বস্ত্রং পরিদধ্যাৎ আচম্য ওঁ যজ্ঞোপবীতমিত্যাদিনা যজ্ঞোপবীতং তূষ্ণীমুষ্ণীষং পরিধায় দ্বিরাচম্য ওঁ অশ্মনস্তেজোঽসি চক্ষুর্মে পাহি ইতি চক্ষুষী অঞ্জয়িত্বা ওঁ অশ্মনস্তেজোঽসি শ্রোত্রং মে পাহি ইতি কুণ্ডলে পরিধায় কুঙ্কুমাদ্যনুলিপ্তাভ্যাং পাণিভ্যাং ব্রাহ্মণরাজন্য-বৈশ্য-শূদ্রস্ত্রীসেবকা যথা-ক্রমং মুখবাহূদরোপস্থোরূনমুলিম্পেয়ুঃ। পশ্চাৎ করৌ প্রক্ষাল্য ওঁ অনার্ত্তেত্যাদি স্রগ্‌বন্ধনং ওঁ দেবানামিত্যাদি উপানদ্ধারণং কুর্য্যাৎ, ওঁ দিব ইত্যাদি ছত্রং বেণুরিত্যাদি বৈণবং দণ্ডং তূষ্ণীং কমণ্ডলুং চন্দনঞ্চ গৃহ্লীয়াৎ। ওঁ আয়ুষ্যং বর্চ্চস্যমিত্যাদি ইমং নো যজ্ঞং বিহবে জুষস্বাস্য কুর্ম্মো হরিবোমে দিনং ত্বা ইত্যন্তেনায়ুষ্যসূক্তেন সুবর্ণময়ং মণিং কণ্ঠে বধ্নীয়াৎ। ততো ব্রহ্মচারী উর্দ্ধাস্থিত উপানহৌ ত্যক্ত্বা আসাদিতৈকাদশসমিধাং প্রাদেশপ্রমাণামেকাং সমিধমাদায় ওঁ স্মৃতং নিন্দা শ্রদ্ধা বিদ্যা প্রজ্ঞেষ্টং দত্তং সত্যং শ্রুতং যদগ্নেঃ সেন্দ্রস্য সরাজস্য সপ্রজাপতিকস্য সদেবস্য সদেবরাজস্য সপিতৃকস্য সপিতৃরাজস্য সমনুষ্যস্য সমনুরাজস্য সগন্ধর্ব্বাপ্সরস্কস্য সাকাশস্য সাতীকাশস্য সানুকাশস্য সপ্রতীকাশস্য সহারণ্যোঃ পশুভির্গ্রাম্যৈর্বয়ষ্যাত্মানাত্মনি ব্রতং তন্মে সর্ব্বব্রতমিদমহমগ্নে সর্ব্বব্রতো ভূয়াসং স্বাহা ইদমগ্নয়ে নমম ইতি হুত্বা উপবিশ্য মমাগ্নে বর্চ্চ ইতি দশভির্ঋগ্‌ভির্মন্ত্রা দশ সমিধো জুহুয়াৎ। মমাগ্নে ইতি সূক্তস্য বিহব্যঋষিরিত্যাদি ওঁ মমাগ্নে বর্চ্চোবিহবেষিত্যাদি।১। ওঁ মম দেবা বিহবে ইত্যাদি।২ ওঁ ময়ি দেবা দ্রবিণমিত্যাদি।৩। ওঁ মহ্যং যজন্ত ইত্যাদি।৪। ওঁ দৈবীঃ ষড়ুর্ব্বীরিত্যাদি।৫। ওঁ অগ্নে মন্যুং প্রতিনুদন্নিত্যাদি।৬। ওঁ ধাতা ধাতৃণামিত্যাদি।৭। ওঁ উরুব্যচা ইত্যাদি।৮। ওঁ যে নঃ সপত্না অপত ইত্যাদি। ৯। ওঁ অর্ব্বাঞ্চমিন্দ্র ইত্যাদি।১০। ইতি সমিধো হুত্বা ওঁ ভূর্ভুবঃ স্বঃ স্বাহা ইদং প্রজাপতয়ে নমম। ইতি হুত্বা স্বিষ্টকৃদাদিহোমশেষং বিধায় তিলকং কৃত্বা ব্রহ্মণে পূর্ণপাত্রং দক্ষিণাং দত্ত্বা আশিষো বাচয়িত্বা ব্রাহ্মণান্ ভোজয়েৎ। ইতি বাসুদেবমতে ঋগ্‌বেদসংস্কারপদ্ধতিঃ।

ইতি ঋগ্‌বেদিনাং দশবিধসংস্কারপদ্ধতিঃ।

# দ্বিতীয়ঃ প্রবাহঃ

## পাঠ্য-প্রকরণম্

## বিরাটপর্ব্ব

### প্রথমোঽধ্যায়ঃ

ওঁ নারায়ণং নমস্কৃত্য নরঞ্চৈব নরোত্তমম্ ।
দেবীং সরস্বতীঞ্চৈব ততো জয়মুদীরয়েৎ ॥

ওঁ নমো ভগবতে বাসুদেবায় ।

ওঁ জনমেজয় উবাচ। কথং বিরাটনগরে মম পূর্ব্বপিতামহাঃ। অজ্ঞাতবাসমুষিতা দুর্য্যোধনভয়ার্দ্দিতাঃ ॥ পতিব্রতা মহাভাগা সততং ব্রহ্মবাদিনী। দ্রৌপদী চ কথং ব্রহ্মন্নজ্ঞাতা দুঃখিতাঽবসৎ ॥

বৈশম্পায়ন উবাচ। যথা বিরাটনগরে তব পূর্ব্বপিতামহাঃ। অজ্ঞাতবাসমুষিতাস্তচ্ছৃণুষ্ব নরাধিপ ॥ তথা তু স বরাঁল্লব্ধ্বা ধর্ম্মাদ্ধর্ম্মভৃতাম্বরঃ। গত্বাশ্রমং ব্রাহ্মণেভ্য আচখ্যৌ সর্ব্বমেব তৎ ॥ কথয়িত্বা তু তৎ সর্ব্বং ব্রাহ্মণেভ্যো-যুধিষ্ঠিরঃ। অরণীসহিতং তস্মৈ ব্রাহ্মণায় ন্যবেদয়ৎ ॥ ততো যুধিষ্ঠিরো রাজা ধর্ম্মপুত্রো মহামনাঃ। সন্নিবর্ত্ত্যানুজান্ সর্ব্বানিতি হোবাচ ভারত। দ্বাদশেমানি বর্ষাণি স্বরাষ্ট্রাৎ প্রোষিতা বয়ম্ ॥ ত্রয়োদশোঽয়ং সংপ্রাপ্তঃ কৃচ্ছ্রাৎ পরমদুর্ব্বসঃ। স সাধু কৌন্তেয় ইতো বাসমর্জ্জুন রোচয়। সম্বৎসরমিমং যত্র বসেমাবিদিতাঃ পরৈঃ ॥

অর্জ্জুন উবাচ। তস্যৈব বরদানেন ধর্ম্মস্য চ মহাত্মনঃ (মনুজাধিপ)। অজ্ঞাতা বিচরিষ্যামো নরাণাং ভরতর্ষভ ॥ কিন্তু বাসায় রাষ্ট্রাণি কীর্ত্তয়িষ্যামি কানিচিৎ। রমণীয়ানি গুপ্তানি তেষাং কিঞ্চিৎ স্ম রোচয় ॥ সন্তি রম্যা জনপদা বহ্বন্নাঃ পরিতঃ কুরূন্। পাঞ্চালাশ্চেদি-মৎস্যাশ্চ শূরসেনাঃ পটচ্চরাঃ ॥

দশার্ণা (নব) নবরাষ্ট্রাশ্চ মল্লাঃ শাল্বা যুগন্ধরাঃ। কুন্তিরাষ্ট্রং সুবিস্তীর্ণং সুরাষ্ট্রাবন্তয়স্তথা॥ এতেষাং কতমো রাজন্নিবাসস্তব রোচতে। বৎস্যামো যত্র রাজেন্দ্র সম্বৎসরমিমং বয়ম্॥

যুধিষ্ঠির উবাচ। এবমেতন্মহাবাহো যথা স ভগবান্ প্রভুঃ। অব্রবীৎ সর্ব্বভূতেশস্তত্তথা ন তদন্যথা॥ অবশ্যমেব বাসার্থং রমণীয়ং শিবং সুখম্। সম্মন্ত্র্য সহিতৈঃ সর্ব্বৈর্বস্তব্যমকুতোভয়ৈঃ॥ মৎস্যো বিরাটো বলবান-ভিরক্ষেৎ স (ভিরক্ষোঽথ) পাণ্ডবান্। ধর্ম্মশীলো বদান্যশ্চ বৃদ্ধশ্চ সুমহাধনঃ॥ বিরাটনগরে তাত সম্বৎসরমিমং বয়ম্। কুর্ব্বন্তস্তস্য কর্ম্মাণি বিহরিষ্যাম ভারত॥ যানি যানি চ কর্ম্মাণি তস্য বক্ষ্যামহে বয়ম্। কর্ত্তুং যোগ্যাঃ স তৎ কর্ম্ম ব্রবীতু কুরুনন্দনাঃ॥

অর্জ্জুন উবাচ। নরদেব কথং তস্য রাষ্ট্রে কর্ম্ম করিষ্যসি। বিরাটনগরে সাধো বৎস্যসে কেন কর্ম্মণা॥ মৃদুর্ব্বদান্যো হ্রীমাংশ্চ ধার্ম্মিকঃ সত্যসঙ্গরঃ। রাজংস্ত্বমাপদাক্লিষ্টঃ কিং করিষ্যসি পাণ্ডব॥ ন দুঃখমুচিতং কিঞ্চিদ্রাজা বেদ যথা জনঃ। স ইমামাপদং প্রাপ্য কথং ঘোরান্তরিষ্যসি॥

যুধিষ্ঠির উবাচ। শৃণুধ্বং যৎ করিষ্যামি কর্ম্ম বৈ কুরুনন্দনাঃ। বিরাটমনু সংপ্রাপ্য রাজানং পুরুষর্ষভাঃ॥ সভাস্তারো ভবিষ্যামি তস্য রাজ্ঞো মহাত্মনঃ। কঙ্কো নাম দ্বিজো ভূত্বা মতাক্ষঃ প্রিয়দেবনঃ॥ বৈদূর্য্যান্ কাঞ্চনান্ দান্তান্ ফলৈর্জ্যোতীরসৈঃ সহ। কৃষ্ণাক্ষাঁল্লোহিতাক্ষাংশ্চ নির্ব্বৎর্স্যামি মনোরমান্॥ বিরাটরাজং রময়ন্ সামাত্যং সহ বান্ধবম্। ন চ মাং বেৎস্যতে কশ্চিত্তো-ষয়িষ্যামি (তোষয়িষ্যে চ) তং নৃপম্॥ আসং যুধিষ্ঠিরস্যাহং পুরা প্রাণসমঃ সখা। ইতি বক্ষ্যামি নৃপতিং যদি মাং সোঽনুযোক্ষ্যতে॥ ইত্যেতদ্বো ময়া খ্যাতং বিহরিষ্যাম্যহং যথা। বৃকোদর বিরাটে ত্বং বৎস্যসে কেন কর্ম্মণা॥ ১—২৭॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি বাস-সংমন্ত্রণে যুধিষ্ঠিরবাক্যং নাম প্রথমোঽধ্যায়ঃ।

---

## দ্বিতীয়োঽধ্যায়ঃ

ভীমসেন উবাচ। পৌরোগবো ব্রুবাণোঽহং বল্লবো নাম নামতঃ। উপস্থাস্যামি রাজানং বিরাটমিতি মে মতিঃ॥ সূপানস্য করিষ্যামি কুশলোঽস্মি মহানসে। কৃতপূর্ব্বাণি যৈরস্য ব্যঞ্জনানি সুশিক্ষিতৈঃ॥ তানপ্যভিভবিষ্যামি

প্রীতিং সংজনয়ন্নহম্। আহরিষ্যামি দারূণাং নিচয়ান্মহতোঽপি চ॥ যৎ প্রেক্ষ্য বিপুলং কর্ম্ম রাজা প্রীতো ভবিষ্যতি। অমানুষাণি কুর্ব্বাণং তানি কর্ম্মাণি ভারত॥ রাজ্ঞস্তস্য পরিপ্রেষ্যা মংস্যন্তে মাং ভৃশং (যথা) নৃপম্। ভক্ষ্যান্নরসপানানাং ভবিষ্যামি তথেশ্বরঃ॥ দ্বিপা বা বলিনো রাজন্ বৃষভা বা মহাবলাঃ। বিনিগ্রাহ্যা যদি ময়া নিগ্রহীষ্যামি তানপি॥ যে চ কেচিন্নিযোৎস্যন্তি সমাজেষু নিযোধকাঃ। তানহং নিহনিষ্যামি রতিং তস্য বিবর্দ্ধয়ন্॥ ন ত্বেতান্ যুধ্যমানান্ বৈ হনিষ্যামি কথঞ্চন। অথ তান্ পাতয়িষ্যামি যথা যাস্যন্তি ন ক্ষয়ম্॥ আরালিকো গোবিকর্ত্তা সূপকর্ত্তা নিযোধকঃ। আসং যুধিষ্ঠিরস্যাহমিতি বক্ষ্যামি (পৃচ্ছতঃ) রাজনি॥ আত্মানমাত্মনা রক্ষংশ্চরিষ্যামি বিশাম্পতে। ইত্যেতৎ প্রতিজানামি বিহরিষ্যাম্যহং যথা॥

যুধিষ্ঠির উবাচ। যমগ্নির্ব্রাহ্মণো ভূত্বা সমাগচ্ছনৃণাং বরম্। দিধক্ষুঃ খাণ্ডবং দাবং দাসার্হসহিতং পুরা॥ মহাবলং মহাবাহুমজিতং কুরুনন্দনম্। সোঽয়ং কিং কর্ম্ম কৌন্তেয়ঃ করিষ্যতি ধনঞ্জয়ঃ॥ যোঽয়মাসাদ্য তং দাবং তর্পয়ামাস পাবকম্। বিজিত্যৈকরথেনেন্দ্রং হত্বা পন্নগ-রাক্ষসান্॥ বাসুকেঃ সর্পরাজস্য স্বসারং হৃতবাংশ্চ যঃ। শ্রেষ্ঠঃ (যঃ প্রতিযোধানাং) প্রতিযুধাং নাম সোঽর্জ্জুনঃ কিং করিষ্যতি॥ সূর্য্যঃ প্রতপতাং শ্রেষ্ঠো দ্বিপদাং ব্রাহ্মণো বরঃ। আশীবিষশ্চ সর্পাণামগ্নিস্তেজস্বিনাং বরঃ॥ আয়ুধানাং বরো বজ্রঃ ককুদ্মাংশ্চ গবাং বরঃ। হ্রদানামুদধিঃ শ্রেষ্ঠঃ পর্জ্জন্যো বর্ষতাং বরঃ॥ ধৃতরাষ্ট্রশ্চ হংসানাং (নাগানাং) হস্তিষ্বৈরাবণো বরঃ। পুত্রঃ প্রিয়াণামধিকো ভার্য্যা চ সুহৃদাং বরা। যথৈতানি বিশিষ্টানি জাত্যাং জাত্যাং বৃকোদর॥ এবং যুবা গুড়াকেশঃ শ্রেষ্ঠঃ সর্ব্বধনুষ্মতাম্। সোঽয়মিন্দ্রাদনবরো বাসুদেবান্মহাদ্যুতিঃ॥ গাণ্ডীবধন্বা বীভৎসুঃ শ্বেতাশ্বঃ কিং করিষ্যতি। উষিত্বা পঞ্চবর্ষাণি সহস্রাক্ষস্য বেশ্মনি॥ অস্ত্রযোগং সমাসাদ্য স্ববীর্য্যান্মানুষাদ্ভুতম্। দিব্যান্যস্ত্রাণি চাপ্তানি দেবরূপেণ ভাস্বতা॥ যং মন্যে দ্বাদশং রুদ্রমাদিত্যানাং ত্রয়োদশম্। বসূনাং নবমং মন্যে গ্রহাণাং দশমং তথা॥ যস্য বাহূ সমৌ দীর্ঘৌ জ্যাঘাত-কঠিনত্বচৌ। দক্ষিণে চৈব সব্যে চ গবামিব বহঃ কৃতঃ॥ হিমবানিব শৈলানাং সমুদ্রঃ সরিতামিব। ত্রিদশানাং যথা শক্রো বসূনামিব হব্যরাট্ (হব্যবাট্)॥ মৃগাণামিব শার্দ্দূলো গরুত্মান্ পততামিব। বরঃ সন্নহ্যমানানাং সোঽর্জ্জুনঃ কিং করিষ্যতি॥

অর্জ্জুন উবাচ। প্রতিজ্ঞাং ষণ্ঢকোঽস্মীতি করিষ্যামি মহীপতে। জ্যাঘাতৌ সুমহান্তৌ মে সম্বর্ত্তুং নৃপ দুষ্করৌ॥ বলয়ৈশ্ছাদয়িষ্যামি বাহূ কৃতকিণাবুভৌ। কর্ণয়োঃ প্রতিমুচ্যাহং কুণ্ডলে জ্বলনোপমে॥ পিনদ্ধকম্বুঃ পাণিভ্যাং তৃতীয়াং প্রকৃতিং গতঃ। বেণীকৃতশিরা রাজন্নাম্না চৈব বৃহন্নলা॥ পঠন্নাখ্যায়িকাশ্চৈব স্ত্রীভাবেন পুনঃ পুনঃ। রময়িষ্যে মহীপালমন্যাংশ্চান্তঃ-পুরে জনান্॥ গীতং নৃত্যং বিচিত্রঞ্চ বাদিত্রং বিবিধং তথা। শিক্ষয়িষ্যা-ম্যহং রাজন্ বিরাটস্য পুরস্ত্রিয়ঃ॥ প্রজানাং সমুদাচারং বহু কর্ম্ম কৃতং বদন্। ছাদয়িষ্যামি কৌন্তেয় মায়য়াত্মানমাত্মনা॥ যুধিষ্ঠিরস্য গেহে বৈ দ্রৌপদ্যাঃ পরিচারিকা। উষিতাস্মীতি বক্ষ্যামি পৃষ্টো রাজ্ঞা চ পাণ্ডব (ভারত)॥ এতেন বিধিনাচ্ছন্নঃ কৃতকেন যথানলঃ। বিহরিষ্যামি রাজেন্দ্র বিরাট-ভবনে সুখম্॥

বৈশম্পায়ন উবাচ। ইত্যেবমুক্‌্বা পুরুষপ্রবীরস্তথার্জ্জুনো ধর্ম্মভৃতাং বরিষ্ঠঃ। বাক্যং তথাসৌ বিররাম ভূয়ো, নৃপোঽপরং ভ্রাতরমাবভাষে॥ ১-৩৩॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাট-পর্ব্বণি বাসসংমন্ত্রণে অর্জ্জুনবাক্যং নাম দ্বিতীয়োঽধ্যায়ঃ॥

---

## তৃতীয়োঽধ্যায়ঃ

যুধিষ্ঠির উবাচ। কিং ত্বং নকুল কুর্ব্বাণস্তত্র তাত চরিষ্যসি। কর্ম্ম তৎ ত্বং সমাচক্ষ্ব রাষ্ট্রে তস্য মহীপতেঃ। সুকুমারশ্চ শূরশ্চ দর্শনীয়ঃ সুখোচিতঃ॥

নকুল উবাচ। অশ্ববন্ধো ভবিষ্যামি বিরাটনৃপতেরহম্। সর্ব্বথা জ্ঞানসম্পন্নঃ কুশলঃ পরিরক্ষণে॥ গ্রন্থিকো নাম নাম্নাহং কর্ম্মৈতৎ সুপ্রিয়ং মম। কুশ-লোঽস্ম্যশ্বশিক্ষায়াং তথৈবাশ্বচিকিৎসিতে॥ প্রিয়াশ্চ সততং মেঽশ্বাঃ কুরুরাজ যথা তব। ন দুষ্টাশ্চ ভবিষ্যন্তি কিশোরা বড়বা অপি॥ ন চ দুষ্টা (অদুষ্টাশ্চ) ভবিষ্যন্তি (সুপৃষ্ঠাশ্চ) পৃষ্ঠেষু চ রথেষু চ। পুরা যুধিষ্ঠিরস্যাহং হয়জ্ঞো ভরত-র্ষভ॥ যে চ মাং মন্ত্রয়িষ্যন্তি বিরাটনগরে জনাঃ। তেভ্য এবং প্রবক্ষ্যামি বিহরিষ্যাম্যহং যথা॥ পাণ্ডবেন পুরা তাত অশ্বেষধিকৃতঃ পুরা। বিরাটনগরে ছন্নশ্চরিষ্যামি মহীপতে। ন চ মাং বেৎস্যতে কশ্চিত্তোষয়িষ্যে চ তং নৃপম্॥

যুধিষ্ঠির উবাচ। সহদেব কথং তস্য সমীপে বিচরিষ্যসি। কিং বা ত্বং কর্ম্ম (তাত) কুর্ব্বাণঃ প্রচ্ছন্নো বিহরিষ্যসি॥

সহদেব উবাচ। গোসংখ্যাতা ভবিষ্যামি বিরাটস্য মহীপতেঃ। প্রতিষেদ্ধা চ দোগ্ধা চ সংখ্যানে কুশলো গবাম্॥ তন্তিপাল ইতি খ্যাতো নাম্না বিদিতমস্তু তে। নিপুণস্তু চরিষ্যামি ব্যেতু তে মানসো জ্বরঃ॥ অহং হি ভবতা গোষু সততং প্রহিতঃ পুরা। তত্র মে কৌশলং কর্ম্ম হ্যনুবুদ্ধং বিশাম্পতে॥ লক্ষণঞ্চরিতঞ্চাপি গবাং যচ্চাপি মঙ্গলম্। তৎসর্ব্বং মে সুবিদিতমন্যচ্চাপি মহীপতে॥ ঋষভানপি জানামি রাজন্ পূজিতলক্ষণান্। যেষাং মূত্রমুপাঘ্রায় অপি বন্ধ্যা প্রসূয়তে॥ সোঽহমেবঞ্চরিষ্যামি প্রীতিরত্র হি মে সদা। ন চ মাং বেৎস্যতে কশ্চিত্তোষয়িষ্যে চ পার্থিবম্॥

যুধিষ্ঠির উবাচ। ইয়ং হি নঃ প্রিয়া ভার্য্যা প্রাণেভ্যোঽপি গরীয়সী। মাতেব পরিপাল্যা চ পূজ্যা জ্যেষ্ঠেব চ স্বসা॥ কেন সা ( স্ম ) কর্ম্মণা কৃষ্ণা দ্রৌপদী বিচরিষ্যতি। ন হি কিঞ্চিদ্বিজানাতি কর্ম্ম কর্ত্তুং যথা স্ত্রিয়ঃ॥ সুকুমারী চ বালা চ রাজপুত্রী যশস্বিনী। পতিব্রতা মহাভাগা কথন্তু(নু) বিচরিষ্যতি॥ মাল্য-গন্ধানলঙ্কারান্ বস্ত্রাণি বিবিধানি চ। এতান্যেবাভি-জানাতি যতো যাতা হি ভাবিনী॥

দ্রৌপদ্যুবাচ। সৈরন্ধ্র্যো রক্ষিতা লোকে ভুজিষ্যাঃ সন্তি ভারত। নৈবমন্যাঃ ( মন্যং ) স্ত্রিয়ো যান্তি ইতি লোকস্য নিশ্চয়ঃ॥ ( একপত্নীব্রতাশ্চৈব ইতি লোকস্য নিশ্চয়ঃ )॥ সাহং ব্রুবাণা সৈরন্ধ্রী কুশলা কেশকর্ম্মণি। যুধিষ্ঠিরস্য গেহে বৈ দ্রৌপদ্যাঃ পরিচারিকা॥ উষিতাস্মীতি বক্ষ্যামি পৃষ্টা রাজ্ঞা চ ভারত। আত্মগুপ্তা চরিষ্যামি যন্মাং ত্বং পরিপৃচ্ছসি॥ সুদেষ্ণাং প্রত্যুপস্থাস্যে রাজভার্য্যাং যশস্বিনীম্। সা রক্ষিষ্যতি মাং প্রাপ্তাং মা ভূত্তে দুঃখমীদৃশম্॥

যুধিষ্ঠির উবাচ। কল্যাণং ভাষসে কৃষ্ণে কুলে জাতাসি ভাবিনি। ন পাপমভিজানাসি সাধ্বী সাধুব্রতে স্থিতা॥ যথা ন দুষ্টহৃদয়া ( যথা ন দুর্হৃদঃ পাপা ) ভবন্তি সুখিনঃ পুনঃ। কুর্য্যাস্তথা ত্বং কল্যাণি লক্ষয়েযুর্ন তে যথা॥১-২৩॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি বাসমন্ত্রণং নাম তৃতীয়োঽধ্যায়ঃ।

## চতুর্থোঽধ্যায়ঃ

যুধিষ্ঠির উবাচ। কর্ম্মাণ্যুক্তানি যুষ্মাভির্যানি যানি করিষ্যথ। মম চাপি যথাবুদ্ধ্যা (যথাবুদ্ধি) রুচিতানি বিনিশ্চয়াৎ॥ পুরোহিতোঽয়মস্মাকমগ্নিহোত্রাণি রক্ষতু। সূত-পৌরোগবৈঃ সার্দ্ধং দ্রুপদস্য নিবেশনে॥ ইন্দ্রসেনমুখাশ্চেমে রথানাদায় কেবলান্। যান্তু দ্বারবতীং শীঘ্রমিতি মে বর্ত্ততে মতিঃ॥ ইমাশ্চ নার্য্যো দ্রৌপদ্যাঃ সর্ব্বাশ্চ পরিচারিকাঃ। পাঞ্চালানেব গচ্ছন্তু সূত পৌরোগবৈঃ সহ॥ সর্ব্বৈরপি চ বক্তব্যং ন প্রাজ্ঞায়ন্ত পাণ্ডবাঃ। গতা হ্যস্মানপাকীর্য্য সর্ব্বে দ্বৈতবনাদিতি॥

বৈশম্পায়ন উবাচ। এবন্তেঽন্যোঽন্যমামন্ত্র্য কর্ম্মাণ্যুক্ত্বা পৃথক্ পৃথক্। ধৌম্যমামন্ত্রয়ামাসুঃ স চ তান্মন্ত্রমব্রবীৎ॥

ধৌম্য উবাচ। বিদিতাঃ (বিহিতং) পাণ্ডবাঃ সর্ব্বে (সর্ব্বং) ব্রাহ্মণেষু সুহৃৎসু চ। যানে প্রহরণে চৈব তথৈবাগ্নিষু ভারত॥ ত্বয়া রক্ষা বিধাতব্যা কৃষ্ণায়াঃ ফাল্গুনেন চ। বিদিতং বো যথা সর্ব্বং (যথান্যায়ং) লোকবৃত্তমিদং তব (নৃপাঃ)॥ বিদিতে চাপি বক্তব্যং সুহৃদ্ভিরনুরাগতঃ। এষ ধর্ম্মশ্চ কামশ্চ অর্থশ্চৈব সনাতনঃ॥ অতোঽহমপি বক্ষ্যামি হেতুমত্র নিবোধত। হন্তেমাং রাজবসতিং রাজপুত্রা ব্রবীম্যহম্ (ব্রবীমি বঃ)। যথা রাজকুলং প্রাপ্য সর্ব্বান্ দোষাংস্তরিষ্যথ। দুর্ব্বসং হ্যেব (ত্বেব) কৌরব্যা জানতাং রাজবেশ্মনি॥ পাণ্ডবাগ্নিরয়ং লোকে সর্ব্বশস্ত্রময়ো মহান্। ভর্ত্তা গোপ্তা চ ভূতানাং রাজা পুরুষবিগ্রহঃ॥ অমানিতৈর্ম্মানিতৈর্ব্বা অজ্ঞাতৈঃ পরিবৎসরম্। ততশ্চতুর্দ্দশে বর্ষে চরিষ্যথ যথাসুখম্॥ দিষ্টদ্বারো (দৃষ্টদ্বারো) লভেদ্ দ্রষ্টুং রহস্যেষু ন বিশ্বসেৎ। তদেবাসনমন্বিচ্ছেদ্ যত্র নাভিষজেৎ পরঃ। যো ন যানং ন পর্য্যঙ্কং ন পীঠং ন গজং রথম্। আরোহেৎ সম্মতোঽস্মীতি স রাজবসতিং বসেৎ॥ অথ (যত্র) যত্রৈন-মাসীনং শঙ্কেরন্ দুষ্টচারিণঃ। ন তত্রোপবিশেদ্ যো বৈ স রাজবসতিং বসেৎ॥ ন চানুশিষ্যাদ্রাজানমপৃচ্ছন্তং কদাচন। তূষ্ণীন্ত্বেনমুপাসীত কালে সমভিপূজয়েৎ॥ অসূয়ন্তি হি রাজানো নরাননৃতবাদিনঃ। তথৈব চাব-মন্যন্তে মন্ত্রিণং বাদিনং মৃষা॥ নৈষাং দারেষু কুর্ব্বীত মৈত্রীং প্রাজ্ঞঃ কদাচন। অন্তঃপুরচরা যে চ দ্বেষ্টি যানহিতাশ্চ যে॥ বিদিতে চাস্য কুর্ব্বীত কার্য্যাণি সুলঘূন্যপি। এবং বিচরতো রাজ্ঞি(জ্ঞো) ন ক্ষতির্জায়তে ক্বচিৎ॥ গচ্ছন্নপি পরাং ভূমিমপৃষ্টোঽপ্যনিযোজিতঃ। জাত্যন্ধ ইব মন্যেত

মর্য্যাদামনুচিন্তয়ন্॥ ন হি প্রজাং (পুত্রং) ন নপ্তারং ন ভ্রাতরমরিন্দমাঃ। সমতিক্রান্তমর্য্যাদং পূজয়ন্তি নরাধিপাঃ॥ যত্নাচ্চোপচরেদেনমগ্নিবদ্দেববৎ সদা। অনৃতেনোপচীর্ণো হি হন্যাদেব ন সংশয়ঃ॥ যদ্‌যদ্ভর্ত্তানুযুঞ্জীত তদেবাভ্যনু-বর্ত্তয়েৎ। প্রমাদমবলেপঞ্চ কোপঞ্চ পরিবর্জ্জয়েৎ॥ সমর্থনাসু সর্ব্বাসু হিতঞ্চ প্রিয়মেব চ। সংবর্ণয়েত্তদেবাস্য প্রিয়াদপি হিতং বদেৎ॥ অনুকূলো ভবে-চ্চাস্য সর্ব্বার্থেষু কথাসু চ। অপ্রিয়ঞ্চাহিতং যৎ স্যাত্তদস্মৈ নানুবর্ণয়েৎ॥ নাহমস্য প্রিয়োঽস্মীতি মত্বা সেবেত পণ্ডিতঃ। অপ্রমত্তশ্চ যত্নাচ্চ হিতং কুর্য্যাৎ প্রিয়ঞ্চ যৎ॥ নাস্যানিষ্টানি সেবেত নাহিতৈঃ সহ সংবসেৎ। স্বস্থা-নান্ন বিকম্পেত স রাজবসতিং বসেৎ॥ দক্ষিণং বাথ বামং বা পার্শ্বমাসীত পণ্ডিতঃ। রক্ষিণাং হ্যাত্তশস্ত্রাণাং স্থানং পশ্চাদ্বিধীয়তে॥ নিত্যং হি প্রতি-ষিদ্ধঞ্চ পুরস্তাদাসনং মহৎ। ন চ সন্দর্শনে কিঞ্চিৎ প্রবৃত্তমপি সঞ্জপেৎ (সঞ্জয়েৎ)॥ অপি হ্যেতদ্দরিদ্রাণাং ব্যলীকস্থানমুত্তমম্। ন মৃষাভিহিতং রাজ্ঞাং মনুষ্যেষু প্রকাশয়েৎ॥ অসূয়ন্তি হি রাজানো নরাননৃতবাদিনঃ। তথৈব চাবমন্যন্তে নরান্ পণ্ডিতমানিনঃ॥ শূরোঽস্মীতি ন দৃপ্তঃ স্যাদ্‌বুদ্ধিমানিতি বা পুনঃ। প্রিয়মেবাচরন্ রাজ্ঞঃ প্রিয়ো ভবতি ভোগবান্॥ ঐশ্বর্য্যং প্রাপ্য দুষ্প্রাপং প্রিয়ং বা প্রাপ্য ভারত। অপ্রমত্তো ভবেদ্রাজ্ঞঃ প্রিয়েষু চ হিতেষু চ॥ যস্য কোপো মহাবাধঃ প্রসাদশ্চ মহাফলঃ। কস্তস্য মনসাপীচ্ছেদনর্থং প্রাজ্ঞসম্মতঃ॥ ন চৌষ্ঠৌ ন ভুজৌ জানূ (ন চৌষ্ঠৌ ন ভুজৌ জাতু) ন চ বাক্যং সমাক্ষিপেৎ। সদা বাতঞ্চ বাচঞ্চ ষ্ঠীবনঞ্চাচরেচ্ছনৈঃ॥ হাস্যবস্তুষু চাপ্যস্য বর্ত্তমানেষু কেষুচিৎ। নাতিগাঢ়ং প্রহৃষ্যেত ন চাপ্যুন্মত্তবদ্ধসেৎ। ন চাতিধৈর্য্যেণ চরেদ্‌গুরুতাং হি ব্রজেত্তথা। স্মিতন্তু মৃদুপূর্ব্বেণ দর্শ-য়েদপ্রমাদজম্॥ লাভে ন হর্ষয়েদ্‌যস্তু ন ব্যথেদ্‌যোঽবমানিতঃ। অসং-মূঢ়শ্চ যো নিত্যং স রাজবসতিং বসেৎ॥ রাজানং রাজপুত্রং বা সংবর্ণয়তি যঃ সদা। অমাত্যঃ পণ্ডিতো ভূত্বা স চিরং তিষ্ঠতে প্রিয়ঃ (শ্রিয়া)॥ প্রগৃহীতশ্চ যোঽমাত্যো নিগৃহীতশ্চ কারণৈঃ। ন নির্ব্বধ্নাতি (নির্ব্বদতি) রাজানং লভতে সম্পদং পুনঃ॥ প্রত্যক্ষঞ্চ পরোক্ষঞ্চ গুণবাদী বিচক্ষণঃ। উপজীবী ভবেদ্রাজ্ঞো বিষয়ে যোঽপি বা বসেৎ॥ অমাত্যোঽপি বলাদ্ভোক্তুং রাজানং প্রার্থয়েত্তু যঃ। ন স তিষ্ঠেচ্চিরং স্থানে গচ্ছেচ্চ প্রাণসংশয়ম্॥ শ্রেয়ঃ সদাত্মনো দৃষ্ট্বা পররাজ্ঞা ন সংবদেৎ। বিশেষয়েন্ন রাজানং যোগ্যভূমিষু সর্ব্বদা॥ অম্লানো (অগ্লানো) বলবাঞ্ছূরশ্ছায়েবানুগতঃ সদা। সত্যবাদী মৃদুর্দ্দান্তঃ

স রাজবসতিং বসেৎ॥ অন্যস্মিন্ প্রেষ্যমাণে তু পুরস্তাদ্যঃ সমুৎপতেৎ। অহং কিং করবাণীতি স রাজবসতিং বসেৎ॥ অভাবে চৈব ভাবে চ (আন্তরে চৈব বাহ্যে চ) রাজ্ঞা যশ্চৈব সর্ব্বদা। আদিষ্টো ন বিকম্পেত স রাজবসতিং বসেৎ॥ যো বৈ গৃহেভ্যঃ প্রবসন্ প্রিয়াণাং নানুসংস্মরেৎ। দুঃখেন সুখমন্বিচ্ছেৎ স রাজবসতিং বসেৎ॥ সমং বেশং ন কুর্ব্বীত নোচ্চৈঃ সন্নিহিতো হসেৎ। মন্ত্রং ন বহুধা কুর্য্যাদেবং রাজ্ঞঃ প্রিয়ো ভবেৎ॥ ন কর্ম্মণি নিযুক্তঃ সন্ ধনং কিঞ্চিদপি স্পৃশেৎ। প্রাপ্নোতি হি হরন্ দ্রব্যং বন্ধনং যদি বা বধম্॥ যানং বস্ত্রমলঙ্কারং যচ্চান্যৎ সংপ্রযচ্ছতি। তদেব ধারয়েন্নিত্যমেবং প্রিয়তরো ভবেৎ॥ এবং সংযম্য চিত্তানি যত্নতঃ পাণ্ডুনন্দনাঃ। সম্বৎসরমিমং তাতাস্তথাশীলা বুভূষবঃ (ত)॥ অথ স্ববিষয়ং প্রাপ্য যথাকামং চরিষ্যথ॥

যুধিষ্ঠির উবাচ। অনুশিষ্টাঃ স্ম ভদ্রস্তে নৈতদ্বক্তাস্তি কশ্চন। কুন্তীমৃতে মাতরং নো বিদুরং বা মহামতিম্॥ যদেবানন্তরং কার্য্যং তদ্ভবান্ কর্ত্তুমর্হতি। তারণায়াস্য দুঃখস্য প্রস্থানায় জয়ায় চ॥

বৈশম্পায়ন উবাচ। এবমুক্তস্ততো রাজ্ঞা ধৌম্যোঽথ দ্বিজসত্তমঃ। অকরোদ্বিধিবৎ সর্ব্বং প্রস্থানে যদ্বিধীয়তে॥ তেষাং সমিধ্য তানগ্নীন্মন্ত্রবচ্চ জুহাব সঃ। সমৃদ্ধি-বৃদ্ধিলাভায় পৃথিবীবিজয়ায় চ॥ অগ্নিং প্রদক্ষিণীকৃত্য ব্রাহ্মণাংশ্চ তপোধনান্। যাজ্ঞসেনীং পুরস্কৃত্য ষড়েবাথ প্রবব্রজুঃ॥ গতেষু তেষু বীরেষু ধৌম্যোঽথ জপতাং বরঃ। অগ্নিহোত্রাণ্যুপাদায় পাঞ্চালানভ্যগচ্ছত॥ ইন্দ্রসেনাদয়শ্চৈব যথোক্তাঃ প্রাপ্য যাদবান্। রথানশ্বাংশ্চ রক্ষন্তঃ সুখমূষুঃ সুসম্বৃতাঃ॥ ১-৫৮॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং
বিরাটপর্ব্বণি ধৌম্যশিক্ষা নাম চতুর্থোঽধ্যায়ঃ।

---

## পঞ্চমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। তে বীরা বদ্ধনিস্ত্রিংশাস্তথায়ুধকলাপিনঃ। বদ্ধগোধাঙ্গুলিত্রাণাঃ কালিন্দীমভিতো যযুঃ॥ ততস্তে দক্ষিণং তীরমন্বগচ্ছন্ পদাতয়ঃ। নিবৃত্তা বনবাসাদ্বৈ (নিবৃত্তবনবাসা বৈ) স্বরাষ্ট্রং প্রেপ্সবস্তদা॥ বসন্তো বনদুর্গেষু গিরিদুর্গেষু ধন্বিনঃ। সিংহান্ ব্যাঘ্রান্ বরাহাংশ্চ মারয়ন্তি চ সর্ব্বশঃ॥ বিধ্যন্তো মৃগযূথানি মহেষ্বাসা মহাবলাঃ। উত্তরেণ দশার্ণাংস্তে

পাঞ্চালান্ দক্ষিণেন তু॥ অন্তরেণ 'যকৃল্লোমান্ শূরসেনাংশ্চ পাণ্ডবাঃ। লুব্ধা ব্রুবাণা মৎস্যস্য বিষয়ং প্রাবিশন্ বনাৎ (বলাৎ)॥ ধন্বিনো বদ্ধনিস্ত্রিংশা বিবর্ণাঃ শ্মশ্রুধারিণঃ। গবাঢ্যমন্নসম্পন্নং হৃষ্টপুষ্টজনাবৃতম্॥ ততো জানপদং প্রাপ্য কৃষ্ণা রাজানমব্রবীৎ। পশ্যৈক (ষষ্ঠৈক) পন্থো দৃশ্যন্তে ক্ষেত্রাণি বিবিধানি চ॥ ব্যক্তং দূরে বিরাটস্য রাজধানী ভবিষ্যতি। বসামেহাপরাং রাত্রিং বলবান্মে পরিশ্রমঃ॥

যুধিষ্ঠির উবাচ। ধনঞ্জয় সমুদ্যম্য পাঞ্চালীং বহ ভারত। রাজধান্যাং নিবৎস্যামো বিমুক্তাশ্চ বনাদিতঃ॥

বৈশম্পায়ন উবাচ॥ তামাদায়ার্জ্জুনস্তূর্ণং দ্রৌপদীং গজরাড়িব। সংপ্রাপ্য নগরাভ্যাসমবতারয়দর্জ্জুনঃ॥ স রাজধানীং সংপ্রাপ্য কৌন্তেয়োঽর্জ্জুনমব্রবীৎ। কায়ুধানি সমাসজ্য প্রবেক্ষ্যামঃ পুরং বয়ম্॥ সায়ুধাশ্চ প্রবেক্ষ্যামো বয়ং তাত পুরং যদি। সমুদ্বেগং জনস্যাস্য করিষ্যামো ন সংশয়ঃ॥ গাণ্ডীবঞ্চ মহাচাপং লোকে চ বিদিতং নৃণাম্। তচ্চেদায়ুধমাদায় গচ্ছামো নগরং বয়ম্॥ ক্ষিপ্রমস্মান্ বিজানীয়ুর্মনুষ্যা নাত্র সংশয়ঃ। ততো দ্বাদশবর্ষাণি প্রবেষ্টব্যং (বস্তব্যানি) বনে পুনঃ॥ একস্মিন্নপি বিজ্ঞাতে প্রতিজ্ঞাতং হি নস্তথা॥

অর্জ্জুন উবাচ। ইয়ং কূটে মনুষ্যেন্দ্র গহনে মহতী শমী। ভীমশাখা দুরারোহা শ্মশানস্য সমীপতঃ॥ ন চাপি বিদ্যতে কশ্চিন্মনুষ্য ইতি মে মতিঃ। যোঽস্মান্নিদধতো দ্রষ্টা ভবেচ্ছস্ত্রাণি পাণ্ডব॥ উৎপথে হি বনে জাতা মৃগব্যালনিষেবিতে। সমীপে চ শ্মশানস্য গহনস্য বিশেষতঃ॥ সমাধায়ায়ুধং শম্যাং (সমাসজ্যায়ুধান্যস্যাং) গচ্ছামো নগরং প্রতি। এবমত্র যথাজোষং বিহরিষ্যাম ভারত॥

বৈশম্পায়ন উবাচ। এবমুক্ত্বা স রাজানং ধর্ম্মাত্মানং যুধিষ্ঠিরম্। প্রচক্রমে নিধানায় শস্ত্রাণাং ভরতর্ষভ॥ যেন দেবান্মনুষ্যাংশ্চ সর্ব্বাং-(সর্পাং)শ্চৈকরথোঽজয়ৎ। স্ফীতান্ জনপদাংশ্চান্যানজয়ৎ কুরুপুঙ্গবঃ॥ তদুদারং মহাঘোরং (ঘোষং) সপত্নগণসূদনম্। অপজ্যমকরোৎ পার্থো গাণ্ডীবং সুভয়ঙ্করম্॥ যেন বীরঃ কুরুক্ষেত্রমভ্যরক্ষৎ পরন্তপঃ। অমুঞ্চদ্ধনুষস্তস্য জ্যাম ক্ষয্যাং যুধিষ্ঠিরঃ॥ পাঞ্চালান্ যেন সংগ্রামে ভীমসেনোঽজয়ৎ প্রভুঃ। প্রত্যষেধদ্বহূনেকঃ সপত্নাংশ্চৈব দিগ্জয়ে॥ নিশম্য যস্য বিস্ফারং ব্যদ্রবন্ত রণাৎ পরে। পর্ব্বতস্যেব দীর্ণস্য বিস্ফোটমশনেরিব॥ সৈন্ধবং যেন (সংগ্রামে) রাজানং পর্য্যামৃশত চানঘঃ। জ্যাপাশং ধনুষস্তস্য ভীমসেনোঽবতারয়ৎ॥

অজয়ৎ পশ্চিমামাশাং ধনুষা যেন পাণ্ডবঃ। মাদ্রীপুত্রো মহাবাহুস্তাম্রাস্যো মিতভাষিতঃ॥ তস্য মৌর্বীমপাকর্ষক্ষূরঃ সংক্রন্দনো যুধি। কুলে নাস্তি সমো রূপে যস্যেতি নকুলঃ স্মৃতঃ॥ দক্ষিণাং দক্ষিণাচারো দিশং যেনাজয়ৎ প্রভুঃ। অপজ্যমকরোদ্বীরঃ সহদেবস্তদায়ুধম্॥ খড়্গাংশ্চ (দীপ্তান্) পীতান্ দীর্ঘাংশ্চ কলাপাংশ্চ মহাধনান্। বিপাঠান্ ক্ষুরধারাংশ্চ ধনুর্ভির্নিদধুঃ সহ॥

বৈশম্পায়ন উবাচ। অথান্বশাসন্নকুলং কুন্তীপুত্রো যুধিষ্ঠিরঃ। আরুহেমাং শমীং বীর ধনূংষ্যেতানি নিক্ষিপ॥ তামুপারুহ্য নকুলো ধনূংষি নিদধে স্বয়ম্। যানি তস্যাবকাশানি দৃঢ়রূপাণ্যমন্যত॥ যত্র চাপশ্যত স বৈ তিরোবর্ষাণি বর্ষতি। তত্র তানি দৃঢ়ৈঃ পাশৈঃ সুগাঢ়ং পর্য্যবন্ধত॥ শরীরঞ্চ মৃতস্যৈকং সমবধ্নন্ত পাণ্ডবাঃ। বিবর্জ্জয়িষ্যন্তি নরা দূরাদেব শমীমিমাম্॥ আবদ্ধং শবমত্রেতি গন্ধমাদায় (ঘ্রায়) পূতিকম্। অশীতিশতবর্ষেয়ং মাতা ন ইতি বাদিনঃ॥ কুলধর্ম্মোঽয়মস্মাকং পূর্ব্বৈরাচরিতোঽপি চ। সমাসজ্যাথ বৃক্ষেঽস্মিন্নিতি বৈ ব্যাহরন্তি তে॥ আগোপালা বিপালেভ্য আচক্ষাণাঃ পরন্তপাঃ। আজগ্মুর্নগরাভ্যাসং যোধাঃ (পার্থাঃ) শত্রুনিবর্হণাঃ॥ জয়ো জয়ন্তো বিজয়ো জয়ৎসেনো জয়দ্বলঃ। ইতি গুহ্যানি নামানি তেষাং চক্রে যুধিষ্ঠিরঃ॥ ততো যথাপ্রতিজ্ঞাতং প্রাবিশন্নগরং মহৎ। অজ্ঞাতচর্য্যাং বৎস্যন্তো রাষ্ট্রে বর্ষং ত্রয়োদশম্॥১-৩৬॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি পাণ্ডবপ্রবেশপর্ব্বণি অস্ত্রসংস্থাপনে পঞ্চমোঽধ্যায়ঃ॥

---

## ষষ্ঠোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। বিরাটনগরং রম্যং গচ্ছমানো যুধিষ্ঠিরঃ। অস্তুবন্মনসা দেবীং দুর্গাং ত্রিভুবনেশ্বরীম্॥ যশোদাগর্ভসম্ভূতাং নারায়ণবরপ্রিয়াম্। নন্দগোপকুলে জাতাং মঙ্গল্যাং কুলবর্দ্ধিনীম্॥ কংসবিদ্রাবণকরীমসুরাণাং ক্ষয়ঙ্করীম্। শিলাতটবিনিক্ষিপ্তামাকাশং প্রতি গামিনীম্॥ বাসুদেবস্য ভগিনীং দিব্যমালাবিভূষিতাম্। দিব্যাম্বরধরাং দেবীং খড়্গখেটকধারিণীম্॥ ভারাবতরণে পুণ্যে যে স্মরন্তি সদা শিবাম্। তান্ বৈ তারয়সে পাপাৎ পঙ্কে গামিব দুর্ব্বলাম্॥ স্তোতুং প্রচক্রমে ভূয়ো (ভূপো) বিবিধৈঃ স্তোত্রসম্ভবৈঃ। আমন্ত্র্য দর্শনাকাঙ্ক্ষী রাজা দেবীং সহানুজঃ॥ নমোঽস্তু বরদে কৃষ্ণে কুমারি ব্রহ্মচারিণি। বালার্কসদৃশাকারে পূর্ণচন্দ্রনিভাননে॥ চতুর্ভুজে চতুর্বক্ত্রে

( তনুমধ্যে ) পীনশ্রোণিপয়োধরে। ময়ূরপিচ্ছবলয়ে কেয়ূরাঙ্গদধারিণি॥ ভাসি দেবি যথা পদ্মা নারায়ণপরিগ্রহা। স্বরূপং ব্রহ্মচর্য্যঞ্চ বিশদং তব খেচরি॥ কৃষ্ণচ্ছবিসমা কৃষ্ণা ( শ ) সঙ্কর্ষণসমাননা ( নিভাননা )। বিভ্রতী বিপুলৌ বাহূ শক্রধ্বজসমুচ্ছ্রয়ৌ॥ পাত্রী চ পঙ্কজী ঘণ্টী স্ত্রী বিশুদ্ধা চ যা ভুবি। পাশং ধনুর্মহাচক্রং বিবিধান্যায়ুধানি চ। কুণ্ডলাভ্যাং সুপূর্ণাভ্যাং কর্ণাভ্যাঞ্চ বিভূষিতা॥ চন্দ্রবিস্পর্দ্ধিনা দেবি মুখেন ত্বং বিরাজসে। মুকুটেন বিচিত্রেণ কেশবন্ধেন শোভিনা॥ ভুজঙ্গাভোগবাসেন শ্রোণিসূত্রেণ রাজতা। ভ্রাজসে চাপবিদ্ধেন ভোগেনেবেহ মন্দরঃ॥ ধ্বজেন শিখিপুচ্ছানা-মুচ্ছ্রিতেন বিরাজসে। কৌমারং ব্রতমাস্থায় ত্রিদিবং পালিতং ত্বয়া॥ তেন ত্বং স্তূয়সে দেবি ত্রিদশৈঃ পূজ্যসেঽপি চ॥ ত্রৈলোক্যরক্ষণার্থায় মহিষাসুর-নাশিনি। প্রসন্না মে সুরশ্রেষ্ঠে দয়াং কুরু শিবা ভব॥ জয়া ত্বং বিজয়া চৈব সংগ্রামে চ জয়প্রদা। মমাপি বিজয়ং দেহি বরদা ত্বঞ্চ ( বরয়ে ত্বাঞ্চ ) সাম্প্রতম্॥ বিন্ধ্যে চৈব নগশ্রেষ্ঠে তব স্থানং হি শাশ্বতম্। কালি কালি মহাকালি সীধুমাংসপশুপ্রিয়ে॥ কৃতানুযাত্রাভূতৈস্ত্বং ( কৃত্বা যাত্রাং স্বভূতৈস্ত্বাং ) বরদে কামচারিণি। ভারাবতারে যে চ ত্বাং সংস্মরিষ্যন্তি মানবাঃ॥ প্রণমন্তি চ যে ত্বাং হি প্রভাতে চ নরা ভুবি। ন তেষাং দুর্লভং কিঞ্চিৎ পুত্রতো ধনতোঽপি বা॥ দুর্গাত্তারয়সে দুর্গে তত্ত্বং দুর্গা স্মৃতা জনৈঃ। কান্তারেষ্ববসন্নানাং মগ্নানাঞ্চ মহার্ণবে। দস্যুভির্বা নিরুদ্ধানাং ত্বং গতিঃ পরমা নৃণাম্॥ জলপ্রতরণে চৈব কান্তারেষ্বটবীষু চ। যে স্মরন্তি মহাদেবি ন চ সীদন্তি তে নরাঃ॥ ত্বং কীর্ত্তিঃ শ্রীর্ধৃতিঃ সিদ্ধির্হ্রীর্বিদ্যা সন্ততির্মতিঃ। সন্ধ্যা রাত্রিঃ প্রভা নিদ্রা জ্যোৎস্না কান্তিঃ ক্ষমা দয়া॥ নৃণাঞ্চ বন্ধনং মোহং পুত্রনাশং ধনক্ষয়ম্। ব্যাধিং মৃত্যুং ভয়ঞ্চৈব পূজিতা তর্পয়িষ্যসি (নাশয়িষ্যসি)॥ সোঽহং রাজ্যাৎ পরিভ্রষ্টঃ শরণং ত্বাং প্রপন্নবান্। প্রণতশ্চ যথা মূর্দ্ধ্না তব দেবি সুরেশ্বরি॥ ত্রাহি মাং পদ্মপত্রাক্ষি সত্যে সত্যা ভবস্ব নঃ। শরণং ভব মে দুর্গে শরণ্যে ভক্তবৎসলে॥ এবং স্তুতা হি সা দেবী দর্শয়ামাস পাণ্ডবান্। উপগম্য তু রাজানমিদং বচনমব্রবীৎ॥

দেব্যুবাচ। শৃণু রাজন্মহাবাহো মদীয়ং বচনং শুভম্। ভবিষ্যত্যচিরাদেব সংগ্রামে বিজয়স্তব॥ মম প্রসাদান্নির্জ্জিত্য হত্বা কৌরববাহিনীম্। রাজ্যং নিষ্কণ্টকং কৃত্বা ভোক্ষ্যসে মেদিনীং পুনঃ॥ ভ্রাতৃভিঃ সহিতো রাজন্ প্রীতিং প্রাপ্স্যসি পুষ্কলাম্। মৎপ্রসাদাচ্চ তে সৌখ্যমারোগ্যঞ্চ ভবিষ্যতি॥

যে চ মাং কীর্ত্তয়িষ্যন্তি লোকে বিগতমৎসরাঃ। তেষাং তুষ্টা প্রদাস্যামি রাজ্যমায়ুর্ব্বপুঃ সুতম্॥ প্রবাসে নগরে বাপি সংগ্রামে শত্রুসঙ্কটে। অটব্যাং দুর্গকান্তারে সাগরে গহনে গিরৌ॥ যে স্মরিষ্যন্তি মাং রাজন্ যথাহং ভবতা স্মৃতা। ন তেষাং দুর্লভং কিঞ্চিদস্মিল্লোঁকে ভবিষ্যতি॥ ইদং স্তোত্রবরং ভক্ত্যা শৃণুয়াদ্বা পঠেত বা। তস্য সর্ব্বাণি কার্য্যাণি (কর্ম্মাণি) সিদ্ধিং যাস্যন্তি পাণ্ডবাঃ॥ মৎপ্রসাদাচ্চ বঃ সর্ব্বান্ বিরাটনগরে স্থিতান্। প্রজ্ঞাস্যন্তি ন কুরবো নরা বা তন্নিবাসিনঃ॥ ইত্যুক্ত্বা বরদা দেবী যুধিষ্ঠিরমরিন্দমম্। রক্ষাং কৃত্বা চ পাণ্ডূনাং তত্রৈবান্তরধীয়ত॥ ৬-৩৬॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং
বিরাটপর্ব্বণি শ্রীদুর্গাস্তবে ষষ্ঠোঽধ্যায়ঃ।

---

## সপ্তমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। ততো বিরাটং প্রথমং যুধিষ্ঠিরো, রাজা সভায়ামুপবিষ্টমাব্রজৎ। বৈদূর্য্যরূপান্ প্রতিমুচ্য কাঞ্চনানক্ষান্ স কক্ষে পরিরভ্য বাসসা॥ নরাধিপো রাষ্ট্রপতিং যশস্বিনং, মহাযশাঃ কৌরববংশবর্দ্ধনঃ। মহানুভাবো নররাজসৎকৃতো, দুরাসদস্তীক্ষ্ণবিষো যথোরগঃ॥ বলেন রূপেণ নরর্ষভো মহান্, প্রচ্ছন্নরূপেণ যথামরস্তথা। মহাভ্রজালৈরিব সংবৃতো রবির্যথানলো ভস্মবৃতশ্চ বীর্য্যবান্॥ তমাপতন্তং প্রসমীক্ষ্য পাণ্ডবং, বিরাটরাড়িন্দুমিবাভ্রসংবৃতম্। সমাগতং পূর্ণশশিপ্রভাননং, মহানুভাবং ন চিরেণ দৃষ্টবান্॥ মন্ত্রিদ্বিজান্ সূতমুখান্ বিশস্তথা, যে চাপি কেচিৎ পরিতঃ সমাসতে। পপ্রচ্ছ কোঽয়ং প্রথমং সমীয়িবান্, নৃপোপমোঽয়ং প্রসমীক্ষতে সভাম্॥ ন তু দ্বিজোঽয়ং ভবিতা নরোত্তমঃ, পতিঃ পৃথিব্যা ইতি মে মনোগতম্। ন চাস্য বাজী (দাসো) ন রথো ন কুঞ্জরঃ, সমীপতো ভ্রাজতি চায়মিন্দ্রবৎ॥ শরীরলিঙ্গৈরুপসূচিতো হ্যয়ং, মূর্দ্ধাভিষিক্তস্তিতি মেঽত্র মানসম্। সমীপমায়াতি চ মে গতব্যথো, যথা গজস্তামরসীং মদোৎকটঃ॥ বিতর্কয়ন্তন্তু নরর্ষভস্তথা, যুধিষ্ঠিরোঽভ্যেত্য বিরাটমব্রবীৎ॥

যুধিষ্ঠির উবাচ। সম্রাড়্ বিজানাদ্বিহ জীবিতার্থিনং, বিনষ্টসর্ব্বস্বমুপাগতং দ্বিজম্। ইহাহমিচ্ছামি তবানঘান্তিকে, বস্তুং যথা কামচরস্তথা বিভো॥ তমব্রবীৎ স্বাগতমিত্যনন্তরং, রাজা প্রহৃষ্টঃ প্রতিসংগৃহাণ চ। তং

রাজসিংহং প্রতিপূজ্য রাজা, প্রীতাত্মনা চৈনমিদং বভাষে॥ কামেন তাতাভিবদাম্যহং ত্বাং, কস্যাসি রাজ্ঞো বিষয়াদিহাগতঃ। গোত্রঞ্চ নামাপি চ শংস তত্ত্বতঃ, কিঞ্চাপি শিল্পং তব বিদ্যতে কৃতম্॥

যুধিষ্ঠির উবাচ। যুধিষ্ঠিরস্যাসমহং পুরা সখা, বৈয়াঘ্রপদ্যঃ পুনরস্মি বৈ দ্বিজঃ। অক্ষান্ প্রবোক্তুং কুশলোঽস্মি দেবিতা, কঙ্কেতি নাম্নাস্মি বিরাটবিশ্রুতঃ॥

বিরাট উবাচ। দদামি তে হন্ত বরং যদিচ্ছসি, প্রশাধি মৎস্যান্ বশগো হ্যহং তব। প্রিয়া হি ধূর্ত্তা মম দেবিনঃ সদা, ভবাংশ্চ দেবোপম রাজ্যমর্হতি॥

যুধিষ্ঠির উবাচ। আপ্তো (প্রাপ্তো) বিবাদঃ প্রথমং বিশাম্পতে, ন বিদ্যতে কশ্চন মৎস্য হীনতঃ। ন মে জিতঃ কশ্চন ধারয়েদ্ধনং, বরো মমৈষোঽস্তু তব প্রসাদতঃ॥

বিরাট উবাচ। হন্যামবধ্যং যদি তেঽপ্রিয়ঞ্চরেৎ, প্রব্রাজয়েয়ং বিষয়াদ্দ্বিজাং-স্তথা। শৃণ্বন্তু মে জানপদাঃ সমাগতাঃ, কঙ্কো যথাহং বিষয়ে প্রভুস্তথা॥ সমানজাতো (যানো) ভবিতাসি মে সখা, প্রভূতবস্ত্রো বহুপানভোজনঃ। পশ্যেস্ত্বমন্তশ্চ বহিশ্চ সর্ব্বদা, কৃতঞ্চ তে দ্বারমপাবৃতং ময়া॥ যে ত্বানুবাদেয়ুর-বৃত্তিকর্ষিতা, ব্রুয়াশ্চ তেষাং বচনেন মাং সদা। দাস্যামি সর্ব্বং তদহং ন সংশয়ো, ন তে ভয়ং বিদ্যতি সন্নিধৌ মম॥

বৈশম্পায়ন উবাচ। এবং স লব্ধ্বা তু বরং সমাগতো, বিরাটরাজ্ঞোঽথ নরর্ষভস্তদা। উবাস ধীরঃ পরমার্চ্চিতঃ সুখী, ন চাপি কশ্চিচ্চরিতং বুবোধ তৎ॥১-১৮॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং
বিরাটপর্ব্বণি যুধিষ্ঠিরপ্রবেশো নাম সপ্তমোঽধ্যায়ঃ।

## অষ্টমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। অথাপরো ভীমবলঃ শ্রিয়া জ্বলন্নুপাযযৌ সিংহ-বি(লাস) শালবিক্রমঃ। খজাঞ্চ দর্ব্বীঞ্চ করেণ ধারয়ন্নসিঞ্চ কালাঙ্গমকোষম-ব্রণম্॥ স সূদরূপঃ পরমেণ বর্চ্চসা, রবির্যথা লোকমিমং প্রকাশয়ন্। সুকৃষ্ণবাসা গিরিরাজ-সারবাংস্তং মৎস্যরাজং সমুপেত্য তস্থিবান্॥ তং প্রেক্ষ্য

রাজানমিবাস্তিকাগতং, ততোঽব্রবীজ্জানপদান্ সমাগতান্। সিংহোন্নতাংসোঽয়মতীব রূপবান্, প্রদৃশ্যতে কো নু নরর্ষভো যুবা॥ অদৃষ্টপূর্ব্বঃ পুরুষো রবির্যথা, বিতর্কয়ন্নাস্য লভামি নিশ্চয়ম্। তথাস্য চিত্তং হ্যনিশং বিতর্কয়ন্নরর্ষভস্যাস্য ন যামি তত্ত্বতঃ॥ দৃষ্টৈব চৈনং ন বিচারয়াম্যহং, গন্ধর্ব্বরাজো যদি বা পুরন্দরঃ। জানীত কোঽয়ং মম দর্শনে স্থিতো, যদীপ্সিতং তল্লভতাঞ্চ মাচিরম্॥ বিরাটবাক্যেন চ তেন চোদিতা, নরা বিরাটস্য সুশীঘ্রগামিনঃ। উপেত্য কৌন্তেয়মথাব্রুবংস্তদা, যথা স রাজাবদদচ্যুতানুজম্॥ ততো বিরাটং সমুপেত্য পাণ্ডবঃ, সুদীনরূপং বচনং মহামনাঃ। উবাচ সূদোঽস্মি নরেন্দ্র বল্লবো, ভজস্ব মাং ব্যঞ্জনকারমুত্তমম্॥

বিরাট উবাচ। ন সূদতাং মানদ শ্রদ্দধামি তে, সহস্রনেত্রপ্রতিমো হি দৃশ্যসে। শ্রিয়া চ রূপেণ চ বিক্রমেণ চ, প্রভাসসে ত্বং নৃবরো নরেষ্বিহ॥

ভীমসেন উবাচ। নরেন্দ্র সূদঃ পরিচারকোঽস্মি তে, জানামি সূপান্ প্রথমং ন কেবলান্। আস্বাদিতা যে নৃপতে পুরাভবন্ যুধিষ্ঠিরেণাপি নৃপেণ সর্ব্বশঃ॥ বলেন তুল্যশ্চ ন বিদ্যতে ময়া, নিযুদ্ধশীলশ্চ সদৈব পার্থিব। গজৈশ্চ সিংহৈশ্চ সমীয়িবানহং, সদা করিষ্যামি তবানঘ প্রিয়ম্॥

বিরাট উবাচ। দদামি তে হন্ত বরং মহানসে, তথা চ কুর্য্যাঃ কুশলং প্রভাষসে। ন চৈব মন্যে তব কর্ম্ম তৎ সমং, সমুদ্রনেমিং পৃথিবীং ত্বমর্হসি॥ যথা হি কামস্তব তত্তথা কৃতং, মহানসে ত্বং ভব মে পুরস্কৃতঃ। নরাশ্চ যে তত্র সমাহিতাঃ পুরা, ভবাংশ্চ তেষামধিপো ময়া কৃতঃ॥

বৈশম্পায়ন উবাচ। তথা স ভীমো নি (বি) হিতো মহানসে, বিরাটরাজ্ঞো দয়িতোঽভবদ্ দৃঢ়ম্। উবাস রাজ্যে ন চ তং পৃথগ্জনো, বুবোধ তত্রানুচরাশ্চ কেচন॥১-১৩॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং
বিরাটপর্ব্বণি ভীমসেনপ্রবেশো নাম অষ্টমোঽধ্যায়ঃ।

---

## নবমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। ততঃ কেশান্ সমুৎক্ষিপ্য বেল্লিতাগ্রাননিন্দিতান্। কৃষ্ণান্ সূক্ষ্মান্ মৃদূন্ দীর্ঘান্ সমুদ্গ্রথ্য শুচিস্মিতা॥ জুগূহ দক্ষিণে পার্শ্বে মৃদূনসিতলোচনা। বাসশ্চ পরিধায়ৈকং কৃষ্ণা সুমলিনং মহৎ॥ কৃত্বা বেশঞ্চ

সৈরন্ধ্র্যাস্ততো ব্যচরদার্ত্তবৎ॥ তাং নয়াঃ পরিধাবন্তীং স্ত্রিয়শ্চ সমুপাদ্রবন্। অপৃচ্ছংশ্চৈব তাং দৃষ্ট্বা কা ত্বং কিঞ্চ চিকীর্ষসি॥ সা তামুবাচ রাজেন্দ্র সৈরন্ধ্র্যহমুপাগতা। কর্ম্ম চেচ্ছামি বৈ কর্ত্তুং তস্য যো মাং বুভূর্ষতি (যুযুক্ষতি পুপুক্ষতি)॥ তস্যা রূপেণ বেশেন শ্লক্ষ্ণয়া চ তথা গিরা। ন শ্রদ্দধত তাং দাসীমন্নহেতোরুপস্থিতাম্॥ বিরাটস্য তু কৈকেয়ী ভার্য্যা পরমসম্মতা। আলোকয়ন্তী দদৃশে প্রাসাদাদ্দ্রুপদাত্মজাম্॥ সা সমীক্ষ্য তথারূপামনাথা-মেকবাসসম্। সমাহূয়াব্রবীদ্ ভদ্রে কা ত্বং কিঞ্চ চিকীর্ষসি॥ সা তামুবাচ হে রাজ্ঞি সৈরন্ধ্র্যহমিহাগতা। কর্ম্ম চেচ্ছামি বৈ কর্ত্তুং তস্য যো মাং যুযুক্ষতি (পুপুক্ষতি)॥

সুদেষ্ণোবাচ। নৈবংরূপা ভবন্ত্যেব যথা বদসি ভাবিনি। প্রেষয়ন্তী চ বৈ দাসীর্দাসাংশ্চ বিবিধান্ বহূন্॥ গূঢ়গুল্ফা সংহতোরুস্ত্রিগম্ভীরা ষডুন্নতা। রক্তা পঞ্চসু রক্তেষু হংসগদ্গদভাষিণী॥ সুকেশী সুস্তনী শ্যামা পীনশ্রোণি-পয়োধরা। তেন তেনৈব সম্পন্না কাশ্মীরীব তুরঙ্গমী॥ অরালপক্ষ্মনয়না বিম্বোষ্ঠী তনুমধ্যমা। কম্বুগ্রীবা গূঢ়শিরা পূর্ণচন্দ্রনিভাননা॥ শারদোৎ-পলপত্রাক্ষ্যা শারদোৎপলগন্ধয়া। শারদোৎপলসেবিন্যা রূপেণ সদৃশী শ্রিয়া॥ কা ত্বং ব্রূহি যথা ভদ্রে নাসি দাসী কথঞ্চন। যক্ষী বা যদি বা দেবী গন্ধর্ব্বী যদি বাপ্সরাঃ॥ দেবকন্যা ভুজঙ্গী বা নগরস্যাধিদেবতা। বিদ্যাধরী কিন্নরী বা যদি বা রোহিণী স্বয়ম্॥ অলম্বুষা মিশ্রকেশী পুণ্ডরীকাথ মালিনী। ইন্দ্রাণী বারুণী বা ত্বং ত্বষ্টুর্ধাতুঃ প্রজাপতেঃ॥ মেনকা সহজন্যা বা রম্ভা বাপি তিলোত্তমা। দেব্যো দেবেষু বিখ্যাতাস্তাসাং ত্বং কতমা শুভে॥

দ্রৌপদ্যুবাচ। নাস্মি দেবী ন গন্ধর্ব্বী নাসুরী ন চ রাক্ষসী। সৈরন্ধ্রী তু ভুজিষ্যাস্মি সত্যমেতদ্ ব্রবীমি তে॥ কেশাঞ্জানাম্যহং কর্ত্তুং পিংষে সাধু বিলেপনম্। মল্লিকোৎপলপদ্মানাং চম্পকানাং তথা শুভে॥ গ্রথয়িষ্যে বিচিত্রাশ্চ স্রজঃ পরমশোভনাঃ। আরাধয়ং সত্যভামাং কৃষ্ণস্য মহিষীং প্রিয়াম্। কৃষ্ণাঞ্চ ভার্য্যাং পাণ্ডূনাং কুরূণামেকসুন্দরীম্॥ তত্র তত্র চরাম্যেবং লভমানা সুভোজনম্। বাসাংসি যাবচ্চ লভে তাবত্তাবদ্রমে তথা॥ মালিনীত্যেব মে নাম স্বয়ং দেবী চকার সা। সাহমভ্যাগতা দেবি সুদেষ্ণে ত্বন্নিবেশনম্॥

সুদেষ্ণোবাচ। মূর্দ্ধ্নি ত্বাং বাসয়েয়ং বৈ সংশয়ো নাত্র বিদ্যতে। ন চেদিচ্ছতি রাজা ত্বাং গচ্ছেৎ সর্ব্বেণ চেতসা॥ স্ত্রিয়ো রাজকুলে যাশ্চ

যাশ্চেমা মম বেশ্মনি। প্রসক্তাস্ত্বাং নিরীক্ষন্তে পুমাংসং কং ন মোহয়েঃ॥ বৃক্ষাংশ্চাবস্থিতান্ পশ্য য ইমে মম বেশ্মনি। তেঽপি ত্বাং সন্নমন্তীব পুমাংসং কং ন মোহয়েঃ॥ রাজা বিরাটঃ সুশ্রোণি দৃষ্ট্বা বপুরমানুষম্। বিহায় মাং বরারোহে গচ্ছেৎ সর্ব্বেণ চেতসা॥ যং হি ত্বমনবদ্যাঙ্গি তরলায়তলোচনে। প্রসক্তমভিবীক্ষেথাঃ স কামবশগো ভবেৎ॥ যশ্চ ত্বাং সততং পশ্যেৎ পুরুষশ্চারু-হাসিনি। এবং সর্ব্বানবদ্যাঙ্গি স চানঙ্গবশো ভবেৎ॥ অধ্যারোহেদ্ যথা বৃক্ষান্ বধায়ৈবাত্মনো নরঃ। রাজবেশ্মনি তে সুভ্রু বাসস্তে স্যাত্তথা মম॥ যথা কর্কটকী গর্ভমাধত্তে মৃত্যুমাত্মনঃ। তথাবিধমহং মন্যে বাসং তব শুচিস্মিতে॥

দ্রৌপদ্যুবাচ। নাস্মি লভ্যা বিরাটেন ন চান্যেন কদাচন। গন্ধর্ব্বাঃ পতয়ো মহ্যং যুবানঃ পঞ্চ ভাবিনি॥ পুত্রা গন্ধর্ব্বরাজস্য মহাসত্ত্বস্য কস্যচিৎ। রক্ষন্তি তে চ মাং নিত্যং দুঃখাচারা তথা হ্যহম্॥ যো মে ন দদ্যাদুচ্ছিষ্টং ন চ পাদৌ প্রধাবয়েৎ। প্রীয়েরংস্তেন বাসেন গন্ধর্ব্বাঃ পতয়ো মম॥ যো হি মাং পুরুষো গৃধ্যেদ্ যথান্যাঃ প্রাকৃতাঃ স্ত্রিয়ঃ। তামেব নিবসেদ্রাত্রিং প্রবিশেদ-পরাস্তনুম্॥ ন চাপ্যহং চালয়িতুং শক্যা কেনচিদঙ্গনে। দুঃখশীলা হি গন্ধর্ব্বাস্তে চ মে বলবৎপ্রিয়াঃ। প্রচ্ছন্নাশ্চাভিরক্ষন্তি তে মাং নিত্যং শুচিস্মিতে॥

সুদেষ্ণোবাচ। এবং ত্বাং বাসয়িষ্যামি যথা ত্বং নন্দিনীচ্ছসি। ন চ পাদৌ ন চোচ্ছিষ্টং স্প্রক্ষ্যসি ত্বং কথঞ্চন॥

বৈশম্পায়ন উবাচ। এবং কৃষ্ণা বিরাটস্য ভার্য্যয়া পরিসান্ত্বিতা। উবাস নগরে তস্মিন্ পতিধর্ম্মবতী সতী। ন চৈনাং বেদ তত্রান্যস্তত্ত্বেন জনমেজয়॥১-৩৭॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং
বিরাটপর্ব্বণি দ্রৌপদীপ্রবেশো নাম নবমোঽধ্যায়ঃ।

---

## দশমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। সহদেবোঽপি গোপানাং কৃত্বা বেশমনুত্তমম্। ভাষাঞ্চৈষাং সমাস্থায় বিরাটমুপয়াদথ॥ গোষ্ঠমাসাদ্য তিষ্ঠন্তং ভবনস্য সমী-পতঃ। রাজাথ দৃষ্ট্বা পুরুষান্ প্রাহিণোজ্জাতবিস্ময়ঃ॥ তমায়ান্তমভিপ্রেক্ষ্য ভ্রাজমানং নরর্ষভম্। সমুপস্থায় বৈ রাজা পপ্রচ্ছ কুরুনন্দনম্॥ কস্য বা

ত্বং কুতো বা ত্বং কিং বা তাত (বস্তু) চিকীর্ষসি। ন হি মে দৃষ্টপূর্ব্বস্ত্বং তত্ত্বং ব্রূহি নরর্ষভ ॥

সহদেব উবাচ। সংপ্রাপ্য রাজানমমিত্রতাপনং, ততোঽব্রবীন্মেঘমহৌঘ-নিস্বনঃ। বৈশ্যোঽস্মি নাম্নাহমরিষ্টনেমির্গোসংখ্য আসং কুরুপুঙ্গবানাম্ ॥ বস্তুং ত্বয়ীচ্ছামি বিশাং বরিষ্ঠ, তান্ রাজসিংহান্ ন হি বেদ্মি পার্থান্। ন শক্যতে জীবিতুমপ্যকর্ম্মণা, ন চ ত্বদন্যো মম রোচতে নৃপঃ ॥

বিরাট উবাচ। ত্বং ব্রাহ্মণো বা যদি বা ক্ষত্রিয়োঽসি, সমুদ্রনেমীশ্বর-রূপবানসি। আচক্ষ্ব মে তত্ত্বমমিত্রকর্ষণ, ন বৈশ্যকর্ম্ম ত্বয়ি বিদ্যতে ক্ষমম্ ॥ কস্যাসি রাজ্ঞো বিষয়াদিহাগতঃ, কিং বাপি শিল্পং তব বিদ্যতে কৃতম্। কথং ত্বমস্মাসু নিবৎস্যসে সদা, বদস্ব কিঞ্চাপি তবেহ বেতনম্ ॥

সহদেব উবাচ। পঞ্চানাং পাণ্ডুপুত্ত্রাণাং জ্যেষ্ঠো ভ্রাতা যুধিষ্ঠিরঃ। তস্যাষ্টশতসাহস্রা গবাং (বর্গাঃ) বর্গাঃ শতং শতম্ ॥ অপরে দশসাহস্রা দ্বিস্তাবন্তস্তথাপরে। তেষাং গোসংখ্য আসং বৈ তন্তিপালেতি মাং বিদুঃ ॥ ভূতং ভব্যং ভবিষ্যঞ্চ যচ্চ সংখ্যাগতং গবাম্। ন মেঽস্ত্যবিদিতং কিঞ্চিৎ সমন্তাদ্দশযোজনম্ ॥ গুণাঃ সুবিদিতা হ্যাসন্মম তস্য মহাত্মনঃ। আসীচ্চ স ময়া তুষ্টঃ কুরুরাজো যুধিষ্ঠিরঃ ॥ ক্ষিপ্রং হি গাবো বহুলা ভবন্তি, ন তাসু রোগো ভবতীহ কশ্চন। তৈস্তৈরুপায়ৈর্বিদিতং মমৈতদেতানি শিল্পানি ময়ি স্থিতানি ॥ ঋষভানপি জানামি রাজন্ পূজিতলক্ষণান্। যেষাং মূত্রমুপাঘ্রায় অপি বন্ধ্যা প্রসূয়তে ॥

বিরাট উবাচ। শতং সহস্রাণি সমাহিতানি, সবর্ণবর্ণস্য বিমিশ্রিতান্ গুণৈঃ (বর্গস্য বর্গস্য বিনিশ্চিতানি)। পশূন্ সপালান্ ভবতে দদাম্যহং, ত্বদাশ্রয়া মে পশবো ভবন্ত্বিহ ॥

বৈশম্পায়ন উবাচ। তথা স রাজ্ঞো বিদিতো বিশাম্পতে, হ্যবাস তত্রৈব সুখং নরেশ্বর। ন চৈনমন্যেঽপি বিদুঃ কথঞ্চন, প্রাদাচ্চ তস্মৈ ভরণং যথেপ্সিতম্ ॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং
বিরাটপর্ব্বণি সহদেবপ্রবেশো নাম দশমোঽধ্যায়ঃ।

---

## একাদশোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। অথাপরোঽদৃশ্যত রূপসম্পদা, স্ত্রীণামলঙ্কারধরো বৃহৎ পুমান্। প্রাকারবপ্রে প্রতিমুচ্য কুণ্ডলে, দীর্ঘে চ কম্বূ পরিহাটকে শুভে॥ বাহূ চ দীর্ঘাংশ্চ বিকীর্য্য মূর্দ্ধজান্মহাভুজো বারণতুল্যবিক্রমঃ। গতেন ভূমীং প্রতিকম্পয়ংস্তদা, বিরাটমাসাদ্য সভাসমীপতঃ॥ তং প্রেক্ষ্য রাজোপগতং সভাতলে, সত্রপ্রতিচ্ছন্নমরিপ্রমাথিনম্। বিরাজমানং পরমেণ বর্চ্চসা, সুতং মহেন্দ্রস্য গজেন্দ্রবিক্রমম্॥ সর্ব্বানপৃচ্ছচ্চ সভানুচারিণঃ, কুতোঽয়মায়াতি পুরা ন মে শ্রুতঃ। ন চৈনমূচুর্বিদিতং তদা নরাঃ, স বিস্মিতো বাক্যমিদং নৃপোঽব্রবীৎ। সত্ত্বোপপন্নঃ পুরুষোঽমরোপমঃ, শ্যামো যুবা বারণযূথপোপমঃ। আমুচ্য কম্বূ পরিহাটকে শুভে, বিমুচ্য বেণীমপিনহ্য কুণ্ডলে॥ শিখী সুকেশী পরিধায় বাসসী (চান্যথা), শোভস্ব ধন্বী কবচী শরী যথা। আরুহ্য যানং পরিধাবতাং ভবান্, সুতৈঃ সমো মে ভব বা ময়া সমঃ॥ বৃদ্ধো হ্যহং বৈ পরিহাতুকামঃ, সর্ব্বাংস্তু মৎস্যান্ পরিপালয়স্ব। নৈবংবিধাঃ ক্লীবরূপা ভবন্তি, কথঞ্চনেতি প্রতিভাতি মে মনঃ॥

অর্জ্জুন উবাচ। গায়ামি নৃত্যাম্যথ বাদয়ামি, ভদ্রোঽস্মি নৃত্যে কুশলোঽস্মি গীতে। ত্বমুত্তরায়ৈ প্রদিশস্ব মাং স্বয়ং, ভবামি দেব্যা নরদেব নর্ত্তকঃ॥ ইদন্তু রূপং মম যেন কিন্নু তৎ, প্রকীর্ত্তয়িত্বা ভৃশশোকবর্দ্ধনম্। বৃহন্নলাং মাং নরদেব বিদ্ধি বৈ, সুতং সুতাং বা পিতৃ-মাতৃবর্জ্জিতাম্॥

বিরাট উবাচ। দদামি তে হন্ত বরং বৃহন্নলে, সুতাঞ্চ মে নর্ত্তয় যাশ্চ তাদৃশীঃ। ইদন্তু তে কর্ম্ম সমং ন মে মতং, সমুদ্রনেমীং পৃথিবীং ত্বমর্হসি॥

বৈশম্পায়ন উবাচ। বৃহন্নলাং তামভিবীক্ষ্য মৎস্যরাট্, কলাসু নৃত্যেষু তথৈব বাদিতে। সংমন্ত্র্য রাজা বিবিধৈঃ সুমন্ত্রিভিঃ, পরীক্ষ্য চৈনং প্রমদাভিরাশু বৈ। অপুংস্ত্বমপ্যস্য নিশম্য চ স্থিরং, ততঃ কুমারীপুর উৎসসর্জ্জ তাম্। স শিক্ষয়ামাস চ গীত-বাদিতং, সুতাং বিরাটস্য ধনঞ্জয়ঃ প্রভুঃ॥ সখীশ্চ তস্যাঃ পরিচারিকাস্তথা, প্রিয়শ্চ তাসাং স বভুব পাণ্ডবঃ॥ তথা স সত্রেণ ধনঞ্জয়োঽবসৎ, প্রিয়াণি কুর্ব্বন্ সহ তাভিরাত্মবান্। তথা চ তং তত্র ন জজ্ঞিরে জনা, বহিশ্চরা বাপ্যথ বান্তরেচরাঃ॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং
বিরাটপর্ব্বণ্যর্জ্জুনপ্রবেশো নাম একাদশোঽধ্যায়ঃ।

## দ্বাদশোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। অথাপরোঽদৃশ্যত পাণ্ডবঃ প্রভুর্বিরাটরাজ্ঞস্তুরগান্ সমীক্ষিতুম্। তমাপতন্তং দদৃশুঃ পৃথগ্জনা, বিমুক্তমভ্রাদিব সূর্য্যমণ্ডলম্॥ স বৈ হয়াৈনক্ষত তাংস্ততস্ততঃ, সমীক্ষমাণঞ্চ দদর্শ মৎস্যরাট্। ততোঽব্রবীত্তাননুগানমিত্রহা, কুতোঽয়মায়াতি নরোঽমরপ্রভুঃ॥ অয়ং হয়ানীক্ষতি মামকান্ দৃঢ়ং, ধ্রুবং হয়জ্ঞো ভবিতা বিচক্ষণঃ। প্রবেশ্যতামেষ সমীপমাশু মে, বিভাতি বীরো হি যথামরস্তথা॥ সোঽভ্যেত্য রাজানমমিত্রহাব্রবীজ্জয়োঽস্তু তে পার্থিব ভদ্রমস্তু বঃ। হয়ে প্রযুক্তো নৃপসম্মতঃ সদা, তবাশ্বসূতো নিপুণো ভবাম্যহম্॥

বিরাট উবাচ। দদামি যানানি ধনং নিবেশনং, মমাশ্বসূতো ভবিতুং ত্বমর্হসি। কুতোঽসি কস্যাসি কথং ত্বমাগতঃ, প্রব্রূহি শিল্পং তব বিদ্যতে চ যৎ॥

নকুল উবাচ। পঞ্চানাং পাণ্ডুপুত্রাণাং জ্যেষ্ঠো ভ্রাতা যুধিষ্ঠিরঃ। তেনাহমশ্বেষু পুরা নিযুক্তঃ শত্রুকর্ষণ॥ অশ্বানাং প্রকৃতিং বেদ্মি বিনয়ঞ্চাপি সর্ব্বশঃ। দুষ্টানাং প্রতিপত্তিঞ্চ কৃৎস্নঞ্চৈব চিকিৎসিতম্॥ ন কাতরং স্যান্মম জাতু বাহনং, ন মেঽস্তি দুষ্টা বড়বা কুতো হয়াঃ। জনস্তু মামাহ স চাপি পাণ্ডবো, যুধিষ্ঠিরো গ্রন্থিকমেব নামতঃ॥

বিরাট উবাচ। যদস্তি কিঞ্চিন্মম বাজি-বাহনং, তদস্তু সর্ব্বং ত্বদধীনমদ্য বৈ। যে চাপি কেচিন্মম বাজিযোজকাস্ত্বদাশ্রয়াঃ সারথয়শ্চ সন্তু মে॥ ইদং তবেষ্টং যদি বৈ সুরোপম, প্রব্রূহি যত্তে প্রসমীক্ষিতং বসু। ন তেঽনুরূপং হয়কর্ম্ম বিদ্যতে, প্রভাসি রাজেব হি সম্মতো মম॥ যুধিষ্ঠিরস্যেব হি দর্শনেন,সমং তবেদং প্রিয়মত্র দর্শনম্। কথন্তু ভৃত্যৈঃ স বিনাকৃতো বনে, বসত্যনিন্দ্যো রমতে চ পাণ্ডবঃ॥

বৈশম্পায়ন উবাচ। তথা স গন্ধর্ব্ববরোপমো যুবা, বিরাটরাজ্ঞা মুদিতেন পূজিতঃ। ন চৈনমন্যেঽপি বিদুঃ কথঞ্চন, প্রিয়াভিরামং বিচরন্তমন্তরা॥ এবং হি মৎস্যে ন্যবসন্ত পাণ্ডবা, যথাপ্রতিজ্ঞাভিরমোঘদর্শনাঃ। অজ্ঞাতচর্য্যাং ব্যচরন্ সমাহিতাঃ, সমুদ্রনেমীপতয়োঽতিদুঃখিতাঃ॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং
বিরাটপর্ব্বণি নকুলপ্রবেশো নাম দ্বাদশোঽধ্যায়ঃ।

## ত্রয়োদশোঽধ্যায়ঃ

জনমেজয় উবাচ। এবং তে মৎস্যনগরে বসন্তস্তত্র পাণ্ডবাঃ। (এবং মৎস্যস্য নগরে প্রচ্ছন্নাস্তত্র পাণ্ডবাঃ)। অত উর্দ্ধং মহাবীর্য্যাঃ কিমকুর্ব্বত বৈ দ্বিজ॥

বৈশম্পায়ন উবাচ। এবং তে মৎস্যনগরে প্রচ্ছন্নাঃ কুরুনন্দনাঃ। আরাধয়ন্তো রাজানং যদকুর্ব্বত তচ্ছৃণু॥ তৃণবিন্দুপ্রসাদাচ্চ ধর্ম্মস্য চ মহাত্মনঃ। অজ্ঞাতবাসমেবন্তু বিরাটনগরে বসন্॥ যুধিষ্ঠিরঃ সভাস্তারো মৎস্যানামভবৎ প্রিয়ঃ। তথৈব চ বিরাটস্য সপুত্রস্য বিশাম্পতে॥ স চাক্ষহৃদয়জ্ঞস্তান্ ক্রীড়য়ামাস পাণ্ডবঃ। অক্ষবত্যাং যথাকামং সূত্রবদ্ধানিব দ্বিজান্॥ অজ্ঞাতঞ্চ বিরাটস্য বিজিত্য বসু ধর্ম্মরাট্। ভ্রাতৃভ্যঃ পুরুষব্যাঘ্রো যথার্হং স্বং প্রযচ্ছতি॥ ভীমসেনোঽপি মাংসানি ভক্ষ্যাণি বিবিধানি চ। অতিসৃষ্টানি মৎস্যেন বিক্রীণীতে যুধিষ্ঠিরে॥ বাসাংসি পরিজীর্ণানি লব্ধান্যন্তঃপুরেঽর্জ্জুনঃ। বিক্রীণানশ্চ সর্ব্বেভ্যঃ পাণ্ডবেভ্যঃ প্রযচ্ছতি॥ সহদেবোঽপি গোপানাং বেশমাস্থায় পাণ্ডবঃ। দধি ক্ষীরং ঘৃতঞ্চৈব পাণ্ডবেভ্যঃ প্রযচ্ছতি॥ নকুলোঽপি ধনং লব্ধা কৃতে কর্ম্মণি বাজিনাম্। তুষ্টে তস্মিন্নরপতৌ পাণ্ডবেভ্যঃ প্রযচ্ছতি॥ কৃষ্ণা তু সর্ব্বান্ ভর্ত্তৃংস্তান্নিরীক্ষন্তী তপস্বিনী। যথা পুনরবিজ্ঞাতা তথা চরতি ভাবিনী॥ এবং সম্পাদয়ন্তস্তে তদান্যোঽন্যং মহারথাঃ। বিরাটনগরে চেরুঃ পুনর্গর্ভে ধৃতা ইব॥ সশঙ্কা ধার্ত্তরাষ্ট্রস্য ভয়াৎ পাণ্ডুসুতাস্তদা। প্রেক্ষমাণাস্তদা কৃষ্ণামূষুশ্ছন্না নরাধিপ॥ অথ মাসে চতুর্থে তু ব্রহ্মণঃ সুমহোৎসবঃ। আসীৎ সমৃদ্ধো মৎস্যেষু পুরুষাণাং সুসম্মতঃ॥ তত্র মল্লাঃ সমাপেতুর্দিগ্ভ্যো রাজন্ সহস্রশঃ। সমাজে ব্রহ্মণো রাজন্ তথা পশুপতেরপি॥ মহাকায়া মহাবীর্য্যাঃ কালকঞ্জা ইবাসুরাঃ। বীর্য্যোন্মত্তা বলোদগ্রা রাজ্ঞা সমভিপূজিতাঃ॥ সিংহস্কন্ধকটিগ্রীবাঃ স্ববদাতা মনস্বিনঃ। অসকৃল্লব্ধলক্ষাস্তে রঙ্গে পার্থিবসন্নিধৌ॥ তেষামেকো মহানাসীৎ সর্ব্বমল্লান্ সমাহ্বয়ৎ। আবল্গমানং তং রঙ্গে নোপতিষ্ঠেত (তিষ্ঠতি) কশ্চন॥ যদা সর্ব্বে বিমনসস্তে মল্লা হতচেতসঃ। অথ সূদেন তং মল্লং যোধয়ামাস মৎস্যরাট্॥ নোদ্যমানস্তদা ভীমো দুঃখেনৈবাকরোন্মতিম্। ন হি শক্নোতি বিবৃতে প্রত্যাখ্যাতুং নরাধিপম্॥ ততঃ স পুরুষব্যাঘ্রঃ শার্দ্দূল-শিথিলশ্চরন্। প্রবিবেশ মহারঙ্গং বিরাটমভিপূজয়ন্॥ ববন্ধ কক্ষাঃ কৌন্তেয়স্ততঃ সংহর্ষয়ংস্তনুম্ (সংহর্ষয়ন্ জনম্)। ততস্তু বৃত্রসঙ্কাশং ভীমো মল্লং সমাহ্বয়ৎ॥ জীমূতং নাম তং তত্র মল্লং প্রখ্যাতবিক্রমম্

তাবুভৌ সুমহোৎসাহাবুভৌ ভীমপরাক্রমৌ॥ মত্তাবিব মহাকায়ৌ বারণৌ ষষ্টিহায়নৌ। ততস্তৌ নরশার্দ্দূলৌ বাহুযুদ্ধে সমীয়তুঃ॥ বীরৌ পরমসংহৃষ্টা-বন্যোঽন্যজয়কাঙ্ক্ষিণৌ। আসীৎ সুভীমঃ সম্পাতো বজ্রপর্ব্বতয়োরিব॥ উভৌ পরমসংহৃষ্টৌ বলেনাতিবলাবুভৌ। অন্যোঽন্যস্যান্তরং প্রেপ্সূ পরস্পরজয়ৈষিণৌ॥ উভৌ পরমসংহৃষ্টৌ মত্তাবিব মহাগজৌ। কৃতপ্রতি-কৃতৈশ্চিত্রৈর্ব্বাহুভিশ্চ সুসঙ্কটৈঃ (সকণ্টকৈঃ)॥ সন্নিপাতাবধূতৈশ্চ প্রমাথোন্মথনৈস্তথা। ক্ষেপণৈর্মুষ্টিভিশ্চৈব বরাহোদ্ধূতনিস্বনৈঃ॥ তলৈর্বজ্র-নিপাতৈশ্চ প্রসৃষ্টাভিস্তথৈব চ। শলাকানখপাতৈশ্চ পাদোদ্ধূতৈশ্চ দারুণৈঃ॥ জানুভিশ্চাশ্মনির্ঘোষৈঃ শিরোভিশ্চাবঘট্টিতৈঃ (ঘট্টনৈঃ)। তদ্যুদ্ধমভবদ্ঘোর-মশস্ত্রং বাহুতেজসা॥ বলপ্রাণেন শূরাণাং সমাজোৎসবসন্নিধৌ। অরুধ্যত জনঃ সর্ব্বঃ সোৎক্রুষ্টনিনদোত্থিতঃ॥ (কীচকোঽপি যদা মল্লং ন বিশেষয়তে বলী। তদা সূদেন তং রাজা যোধয়ামাস ভারত॥) বলিনোঃ সংযুগে রাজন্ বৃত্র-বাসবয়োরিব। প্রকর্ষণাকর্ষণাভ্যামভ্যাকর্ষবিকর্ষণৈঃ॥ আকর্ষতু-রথান্যোঽন্যং জানুভিশ্চাপি জঘ্নতুঃ। ততঃ শব্দেন মহতা ভর্ৎসয়ন্তৌ পরস্পরম্॥ ব্যূঢ়োরস্কৌ দীর্ঘভুজৌ নিযুদ্ধকুশলাবুভৌ। বাহুভিঃ সমসজ্জেতা-মায়সৈঃ পরিঘৈরিব॥ চকর্ষ দোর্ভ্যামুৎপাট্য ভীমো মল্লমমিত্রহা। নিনদন্তমভিক্রোশঞ্ছার্দ্দূল ইব বারণম্॥ সমুদ্যম্য মহাবাহুর্ভ্রাময়ামাস বীর্য্যবান্। ততো মল্লাশ্চ মৎস্যাশ্চ বিস্ময়ং চক্রিরে পরম্॥ ভ্রাময়িত্বা শতগুণং গতসত্ত্বম-চেতনম্। প্রত্যপিংষন্মহাবাহুর্ম্মল্লং ভুবি বৃকোদরঃ॥ তস্মিন্ বিনিহতে বীরে জীমূতে লোক-বিশ্রুতে। বিরাটঃ পরমং হর্ষমগচ্ছদ্বান্ধবৈঃ সহ॥ প্রহর্ষাৎ প্রদদৌ বিত্তং বহু রাজা মহামনাঃ। বল্লবায় মহারঙ্গে যথা বৈশ্রবণস্তথা॥ এবং স সুবহূন্ মল্লান্ পুরুষাংশ্চ মহাবলান্। বিনিঘ্নন্মৎস্যরাজস্য প্রীতিমাহর-দুত্তমাম্॥ যদাস্য তুল্যঃ পুরুষো ন কশ্চিত্তত্র বিদ্যতে। ততো ব্যাঘ্রৈশ্চ সিংহৈশ্চ দ্বিরদৈশ্চাপ্যযোধয়ৎ॥ পুনরন্তঃপুরগতঃ স্ত্রীণাং মধ্যে বৃকোদরঃ। যোধ্যতে স্ম বিরাটেন সিংহৈর্ম্মত্তৈর্ম্মহাবলৈঃ॥ বীভৎসুরপি গীতেন সুনৃত্যেন চ পাণ্ডবঃ। বিরাটং তোষয়ামাস সর্ব্বাশ্চান্তঃপুরে স্ত্রিয়ঃ॥ অশ্বৈর্বিনীতৈর্জবনৈস্তত্র তত্র সমাগতৈঃ। তোষয়ামাস রাজানং নকুলো রাজসত্তমম্॥ তস্মৈ প্রদেয়ং প্রাযচ্ছৎ প্রীতো রাজা ধনং বহু। বিনীতান্ বৃষভান্ দৃষ্ট্বা সহদেবস্য বৈ বিভো॥ তথৈব প্রদদৌ বিত্তমনেকং মৎস্যরাট্ স্বয়ম্॥ দ্রৌপদী প্রেক্ষ্য তান্ সর্ব্বান্ ক্লিশ্যমানান্মহারথান্। নাতিপ্রীতিমতী

রাজন্নিশ্বাসপরমাভবৎ॥ এবন্তে স্তবসংস্তত্র প্রচ্ছন্নাঃ পুরুষর্ষভাঃ। কর্ম্মাণি তস্য কুর্ব্বাণা বিরাটনৃপতেস্তদা॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং
বিরাটপর্ব্বণি জীমূত-মল্লবধো নাম ত্রয়োদশোঽধ্যায়ঃ।

---

## চতুর্দ্দশোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। বসমানেষু পার্থেষু মৎস্যস্য নগরে তদা। মহারথেষু ছন্নেষু মাসা দশ সমত্যয়ুঃ॥ যাজ্ঞসেনী সুদেষ্ণান্তু শুশ্রূষন্তী বিশাম্পতে। অবসৎ পরিচারার্হা সুদুঃখং জনমেজয়॥ তথা চরন্তী পাঞ্চালী সুদেষ্ণায়া নিবেশনে। তাং দেবীং তোষয়ামাস তথা চান্তঃপুরে স্ত্রিয়ঃ॥ তস্মিন্ বর্ষে গতপ্রায়ে কীচকস্তু মহাবলঃ। সেনাপতির্বিরাটস্য দদর্শ দ্রুপদাত্মজাম্॥ তাং দৃষ্ট্বা দেবগর্ভাভাং চরন্তীং দেবতামিব। কীচকঃ কাময়ামাস কামবাণ-প্রপীড়িতঃ॥ স তু কামাগ্নিসন্তপ্তঃ সুদেষ্ণামভিগম্য বৈ। প্রহসন্নিব সেনানীরিদং বচনমব্রবীৎ॥ নেয়ং ময়া জাতু পুরেহ দৃষ্টা, রাজ্ঞো বিরাটস্য নিবেশনে শুভা। রূপেণ চোন্মাদয়তীব মাং ভৃশং, গন্ধেন জাতা মদিরেব ভামিনী॥ কা দেবরূপা হৃদয়ঙ্গমা শুভা, হ্যাচক্ষ্ব মে কস্য কুতোঽত্র শোভনে। চিত্তং বিনির্ম্মথ্য করোতি মাং বশে, ন চান্যদত্রৌষধমস্তি মে মতম্॥ অহো তবেয়ং পরিচারিকা শুভা, প্রত্যগ্ররূপা প্রতিভাতি মামিয়ম্। অযুক্তরূপং হি করোতি কর্ম্ম তে, প্রশাস্তু মাং যচ্চ মমাস্তি কিঞ্চন॥ প্রভূতনাগাশ্বরথং সভাজনং, সমৃদ্ধিযুক্তং বহুপান-ভোজনম্। মনোহরং কাঞ্চন-চিত্রভূষণং, গৃহং মহচ্ছোভয়তামিয়ং মম॥ ততঃ সুদেষ্ণামনুমন্ত্র্য কীচকস্তথা সমভ্যেত্য নরাধিপাত্মজাম্। উবাচ কৃষ্ণামভিসান্ত্বয়ংস্তদা, মৃগেন্দ্রকন্যামিব জম্বুকো বনে॥

কীচক উবাচ। কা ত্বং কস্যাসি কল্যাণি কুতো বা ত্বং বরাননে। প্রাপ্তা বিরাটনগরং তত্ত্বমাচক্ষ্ব শোভনে॥ রূপমগ্র্যং তথা কান্তিঃ সৌকুমার্য্য-মনুত্তমম্। কান্ত্যা বিভাতি বক্ত্রন্তে শশাঙ্ক ইব নির্ম্মলম্॥ নেত্রে সুবিপুলে সুভ্রু পদ্মপত্রনিভে শুভে। বাক্ চ তে চারুসর্ব্বাঙ্গি পরপুষ্টরুতোপমা॥ এবং-রূপা ময়া নারী কাচিদন্যা মহীতলে। ন দৃষ্টপূর্ব্বা সুশ্রোণি যাদৃশী ত্বমনিন্দিতে॥ লক্ষ্মীঃ পদ্মালয়া কা ত্বমথ ভূতিঃ সুমধ্যমে। হ্রীঃ শ্রীঃ কান্তিরথো কীর্ত্তিরাসাং কা ত্বং বরাননে॥ রতীব রূপিণী কিং ত্বমনঙ্গাঙ্গবিহারিণী। অতীব ভ্রাজসে

সুভ্রু প্রভেবেন্দোরনুত্তমা ॥ অপি চেক্ষণপক্ষ্মাঙ্কং ( পক্ষ্মাণাং ) স্মিতজ্যোৎস্নোপমং শুভম্। দিব্যাংশুরশ্মিভির্ব্যাপ্তং দিব্যকান্তিমনোরমম্॥ নিরীক্ষ্য চন্দ্রবক্ত্রং তে লক্ষ্ম্যানুপময়া যুতম্। কৃৎস্নে জগতি কো নেহ কামস্য বশগো ভবেৎ॥ হারালঙ্কারযোগ্যৌ তে স্তনৌ চোভৌ সুশোভনৌ। সুজাতৌ সহিতৌ লক্ষ্ম্যা পীনৌ বৃত্তৌ নিরন্তরৌ॥ কুট্মলাম্বু ( কুড্মলাম্বু ) রুহাকারৌ তব সুভ্রু পয়োধরৌ। কামপ্রতোদাবিব মাং তুদতশ্চারুহাসিনি॥ বলীবিভঙ্গচতুরং স্তনভারাবনামিতম্। করাগ্রসম্মিতং মধ্যং তবেদং তনুমধ্যমে॥ দৃষ্টৈব চারুজঘনং সরিৎপুলিনসন্নিভম্। কামব্যাধিরসাধ্যো মামপ্যাক্রমতি ( বাধতেঽতীব ) ভামিনি॥ জ্বালাবানস্য (জজ্বাল চাগ্নি) মদনো দাবাগ্নিরিব নির্দ্দয়ঃ। ত্বৎসঙ্গমাভিসঙ্কল্পো বিবৃদ্ধো মাং দহত্যয়ম্॥ আত্মপ্রদানবর্ষেণ সঙ্গমাম্ভোধরেণ চ। শময়স্ব বরারোহে জ্বলন্তং মন্মথানলম্॥ মচ্চিত্তোন্মাদনকরা মন্মথস্য শরোত্তমাঃ। ত্বৎসঙ্গমেন শমিতাস্তীব্রাঃ শশিনিভাননে॥ মহ্যং বিদার্য্য হৃদয়মিদং নির্দ্দয়বেগিতাঃ। প্রবিষ্টাশ্চাসিতাপাঙ্গি প্রচণ্ডাশ্চণ্ডদারুণাঃ॥ (অ) রত্যুন্মাদসমারম্ভাঃ প্রীত্যুন্মাদকরা মম। আত্মপ্রদানসম্ভোগৈর্মামুদ্ধর্ত্তুমিহার্হসি॥ চিত্রমাল্যাম্বরধরা সর্ব্বাভরণভূষিতা। কামং প্রকামং সেব ত্বং ময়া সহ বিলাসিনি॥ নার্হসীহাসুখং বস্তুং সুখার্হা সুখবর্জ্জিতা। প্রাপ্নুহ্যনুত্তমং সৌখ্যং মত্তস্ত্বং গজগামিনি॥ স্বাদূন্যমৃতকল্পানি পানানি বিবিধানি চ পিবমানা মনোজ্ঞানি রমমাণা যথাসুখম্॥ ভোগোপচারান্ বিবিধান্ সৌভাগ্যঞ্চাপ্যনুত্তমম্। পানং পাহি ( পিব ) মহাভাগে ভোগৈরনুপমৈঃ শুভৈঃ॥ ইদঞ্চ রূপং প্রথমঞ্চ তে বয়ো, নিরর্থকং কেবলমদ্য ভাবিনি। অধার্য্যমাণা স্রগিবোত্তমা শুভা, ন শোভতে ( সে ) সুন্দরি শোভনা সতী॥ ত্যজামি দারান্মম যে পুরাতনা, ভবন্তু দাস্যস্তব চারুহাসিনি। অহঞ্চ তে সুন্দরি দাসবৎ স্থিতঃ, সদা ভবিষ্যে বশগো বরাননে॥

সৈরন্ধ্রী উবাচ। অপ্রার্থনীয়ামিহ মাং সূতপুত্রাভিমন্যসে। নিহীনবর্ণাং সৈরন্ধ্রীং বীভৎসাং কেশকারিণীম্॥ পরদারাঽস্মি ভদ্রন্তে ন যুক্তং তব সাম্প্রতম্। দয়িতাঃ প্রাণিনাং দারা ধর্ম্মং সমনুচিন্তয়॥ পরদারে ন তে বুদ্ধির্জাতু কার্য্যা কথঞ্চন। বিবর্জ্জনং হ্যকার্য্যাণামেতৎ সৎপুরুষব্রতম্॥ মিথ্যাভিগৃধ্নো হি নরঃ পাপাত্মা মোহমাস্থিতঃ। অযশঃ প্রাপ্নুয়াদ্ঘোরং মহদ্বা প্রাপ্নুয়াদ্ভয়ম্॥

বৈশম্পায়ন উবাচ। এবমুক্তস্তু সৈরন্ধ্র্যা কীচকঃ কামমোহিতঃ। জানন্নপি সুদুর্বুদ্ধিঃ পরদারাভিমর্ষণে॥ দোষান্ বহূন্ প্রাণহরান্

সর্ব্বলোকবিগর্হিতান্। প্রোবাচেদং সুদুর্বুদ্ধির্দ্রৌপদীমজিতেন্দ্রিয়ঃ॥ নার্হস্যেবং বরারোহে প্রত্যাখ্যাতুং বরাননে। মাং মন্মথসমাবিষ্টং ত্বৎকৃতে চারুহাসিনি॥ প্রত্যাখ্যায় চ মাং ভীরু বশগং প্রিয়বাদিনম্। নূনং ত্বমসিতাপাঙ্গি পশ্চাত্তাপং গমিষ্যসি॥ অহং হি সুভ্রু রাজ্যস্য কৃৎস্নস্যাস্য সুমধ্যমে। প্রভুর্বাসয়িতা চাস্মি বীর্য্যে চাপ্রতিমঃ ক্ষিতৌ॥ পৃথিব্যাং মৎসমো নাস্তি কশ্চিদন্যঃ পুমানিহ। রূপ-যৌবন-সৌভাগ্যৈর্ভোগৈশ্চানুত্তমৈঃ শুভৈঃ॥ সর্ব্বকামসমৃদ্ধেষু ভোগেষ্বনুপমেষ্বিহ। ভোক্তব্যেষু চ কল্যাণি কস্মাদ্দাস্যে রতা হ্যসি॥ ময়া দত্তমিদং রাজ্যং স্বামিন্যস্মিন্ বরাননে। ভজস্ব মাং বরারোহে ভুঙ্ক্ষ্ব ভোগাননুত্তমান্॥

বৈশম্পায়ন উবাচ। এবমুক্তা তু সা সাধ্বী কীচকেনাশুভং বচঃ। কীচকং প্রত্যুবাচেদং গর্হয়ন্ত্যস্য তদ্বচঃ॥ (উবাচ পরমক্রুদ্ধা সৈরন্ধ্রী কীচকং প্রতি)।

সৈরন্ধ্রী উবাচ। মা সূতপুত্র হৃষ্যস্ব মাদ্য ত্যক্ষ্যসি জীবিতম্। জানীহি পঞ্চভির্নিত্যং মাং বীরৈরভিরক্ষিতাম্॥ ন চাপ্যহং ত্বয়া লভ্যা গন্ধর্ব্বাঃ পতয়ো মম। তে ত্বাং নিহন্যুঃ কুপিতাঃ সাধ্বলং মা ব্যনীনশঃ॥ অশক্যরূপং পুরুষৈরধ্বানং গন্তুমিচ্ছসি। যথা নিশ্চেতনো বালঃ কূলস্থঃ কূলমুত্তরম্॥ তর্ত্তুমিচ্ছতি মন্দাত্মা তথা ত্বং তর্ত্তুমিচ্ছসি। অন্তর্মহীং বা যদিবোর্দ্ধমুৎপতেঃ, সমুদ্রপারং যদি বা প্রধাবসি। তথাপি তেভ্যো ন বিমোক্ষমর্হসি, প্রমাথিনো দেবসুতা হি তে বরাঃ॥ ত্বং কালরাত্রীমিব কশ্চিদাতুরঃ, কিং মাং দৃঢ়ং প্রার্থয়সেঽদ্য কীচক। কিং মাতুরঙ্কে শয়িতো যথা শিশুশ্চন্দ্রং জিঘৃক্ষুরিব মন্যসে হি মাম্॥ (তেষাং প্রিয়াং প্রার্থয়তো ন তে ভুবি, গত্বা দিবং বা শরণং ভবিষ্যতি। নিবর্ত্ততে কীচক নেদৃশং শুভং, জ্ঞাত্বৈব সংজীবিতমস্য সুপ্রিয়ম্॥)

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি কীচক-বধে কীচক-কৃষ্ণাসংবাদে চতুর্দ্দশোঽধ্যায়ঃ।

---

## পঞ্চদশোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। প্রত্যাখ্যাতো রাজপুত্র্যা সুদেষ্ণাং কীচকোঽব্রবীৎ। অমর্য্যাদেন কামেন ঘোরেণাভিপরিপ্লুতঃ॥

কীচক উবাচ। যথা কৈকেয়ি সৈরন্ধ্রী মামিয়াত্তদ্বিধীয়তাম্। যেনোপায়েন সৈরন্ধ্রী ভজেন্মাং গজগামিনী। ত্বং সুদেষ্ণে পরীপ্সস্ব মাহং প্রাণান্ প্রহাসিষম্॥

বৈশম্পায়ন উবাচ। তস্য তাং বহুশঃ শ্রুত্বা বাচং বিলপতস্তদা। বিরাটমহিষী দেবী কৃপাঞ্চক্রে মনস্বিনী॥ স্বমর্থমভিসন্ধায় তস্যার্থমনুচিন্ত্য চ। উদ্বেগঞ্চৈব কৃষ্ণায়াঃ সুদেষ্ণা সূতমব্রবীৎ॥

সুদেষ্ণোবাচ। পর্ব্বণি ত্বং সমুদ্দিশ্য সুরামন্নঞ্চ কারয়। তত্রৈনাং প্রেষয়িষ্যামি সুরাহারীং তবান্তিকম্॥ তত্র সংপ্রেষিতামেনাং বিজনে নিরবগ্রহে। সান্ত্বয়েথা যথাকামং সান্ত্ব্যমানা রমেদ্‌যদি॥

বৈশম্পায়ন উবাচ। ইত্যুক্তঃ স বিনিষ্ক্রম্য ভগিন্যা ভবনাত্তদা। সুরামাহারয়ামাস রাজার্হাং সুপরিস্রুতাম্॥ (আজৌরভ্রঞ্চ সুভৃশং বহূংশ্চোচ্চাবচান্ মৃগান্] ভক্ষ্যাংশ্চ বিবিধাকারান্ বহূংশ্চোচ্চাবচাংস্তদা। কারয়ামাস কুশলৈরন্নং পানং সুশোভনম্॥ তস্মিন্ কৃতে তদা দেবী কীচকেনোপমন্ত্রিতা। সুদেষ্ণা প্রেষয়ামাস সৈরন্ধ্রীং কীচকালয়ম্॥

সুদেষ্ণোবাচ। উত্তিষ্ঠ গচ্ছ সৈরন্ধ্রি কীচকস্য নিবেশনম্। পানমানয় কল্যাণি পিপাসা মাং প্রবাধতে॥

সৈরন্ধ্রী উবাচ। ন গচ্ছেয়মহং তস্য কীচকস্য নিবেশনম্। ত্বমেব রাজ্ঞি জানাসি যথা স নিরপত্রপঃ॥ ন চাহমনবদ্যাঙ্গি তব বেশ্মনি ভাবিনি। কামবৃত্তা ভবিষ্যামি পতীনাং ব্যভিচারিণী॥ ত্বঞ্চৈব দেবি জানাসি যথা স সময়ঃ কৃতঃ। প্রবিশন্ত্যা ময়া পূর্ব্বং তব বেশ্মনি ভাবিনি॥ কীচকশ্চ সুকেশান্তে মূঢ়ো মদনদর্পিতঃ। সোঽবমংস্যতি মাং দৃষ্ট্বা ন যাস্যে তত্র শোভনে॥ সন্তি বহ্ব্যস্তব প্রেষ্যা রাজপুত্রি বশানুগাঃ। অন্যাং প্রেষয় ভদ্রং তে স হি মামবমংস্যতে॥

সুদেষ্ণোবাচ। নৈব ত্বাং জাতু হিংস্যাৎ স ইতঃ সংপ্রেষিতাং ময়া। ইত্যস্যাঃ প্রদদৌ পাত্রং সপিধানং হিরণ্ময়ম্॥ সা শঙ্কমানা রুদতী দৈবং শরণমীয়ুষী। প্রাতিষ্ঠত সুরাহারী কীচকস্য নিবেশনম্॥

সৈরন্ধ্রী উবাচ। যথাহমন্যং ভর্তৃভ্যো (পাণ্ডুভ্যো) নাভিজানামি কঞ্চন। তেন সত্যেন মাং প্রাপ্তাং মা কুর্য্যাৎ কীচকো বশে॥

বৈশম্পায়ন উবাচ। উপাতিষ্ঠত সা সূর্য্যং মুহূর্ত্তমবলা ততঃ। স তস্যাস্তনুমধ্যায়াঃ সর্ব্বং সূর্য্যোঽববুদ্ধবান্॥ অন্তর্হিতং ততস্তস্যা রক্ষো রক্ষার্থমাদিশৎ।

তচ্চৈনাং নাজহাত্তত্র সর্ব্বাবস্থাস্বনিন্দিতাম্॥ তাং মৃগীমিব সন্ত্রস্তাং দৃষ্ট্বা কৃষ্ণাং সমীপগাম্। উদতিষ্ঠন্মুদা সূতো নাবং লব্ধ্বেব পারগঃ॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি দ্রৌপদীসুরাহরণে পঞ্চদশোঽধ্যায়ঃ।

---

## ষোড়শোঽধ্যায়ঃ

কীচক উবাচ। স্বাগতন্তে বরারোহে সুব্যুষ্টা রজনী মম। স্বামিনী ত্বমনুপ্রাপ্তা প্রকুরুষ মম প্রিয়ম্॥ সুবর্ণমালাঃ কম্বূংশ্চ কুণ্ডলে পরিহাটকে। নানাপত্তনজে শুভ্রে মণিরত্নঞ্চ শোভনম্। আহরন্তু (আহরন্তু চ) বস্ত্রাণি কৌশেয়ান্যজিনানি চ॥ অস্তি মে শয়নং দিব্যং ত্বদর্থমুপকল্পিতম্। এহি তত্র ময়া সার্দ্ধং পিবস্ব মধু-মাধবীম্॥

দ্রৌপদ্যুবাচ। অপ্রৈষীদ্রাজপুত্রী মাং সুরাহারীং তবান্তিকম্। পানমাহর মে ক্ষিপ্রং পিপাসা মেঽতি চাব্রবীৎ॥

কীচক উবাচ। অন্যা ভদ্রে নয়িষ্যন্তি রাজপুত্র্যাঃ পরিস্রুতম্ (প্রতিশ্রুতম্)। ইত্যেনাং দক্ষিণে পাণৌ সূতপুত্রঃ পরামৃষৎ॥

দ্রৌপদ্যুবাচ। যথৈবাহং নাভিচরে কদাচিৎ, পতীন্মদাদ্বৈ মনসাঽপি জাতু। তেনৈব সত্যেন বশীকৃতং ত্বাং, দ্রষ্টাস্মি পাপং পরিকৃষ্যমাণম্॥

বৈশম্পায়ন উবাচ। স তামনুপ্রেক্ষ্য বিশালনেত্রাং, জিঘৃক্ষমাণঃ পরিভৎসয়ন্তীম্॥ জগ্রাহ তামুত্তরবস্ত্রদেশে, সা কীচকং তং সহসা ক্ষিপন্তী॥ প্রগৃহ্যমাণা তু মহাজবেন, মুহুর্বিনিশ্বস্য চ রাজপুত্রী। চিক্ষেপ তং গাঢ়মমৃষ্যমাণা, প্রবেপমানাতিরুষা শুভাঙ্গী॥ তয়া সমাক্ষিপ্ততনুঃ স পাপঃ, পপাত শাখীব নিকৃত্তমূলঃ স। গৃহীতা বিধুন্বানা ভূমাবাক্ষিপ্য কীচকম্। সভাং শরণমাগচ্ছদ্ যত্র রাজা যুধিষ্ঠিরঃ॥ তাং কীচকঃ প্রধাবন্তীং কেশপাশে পরামৃশৎ। অথৈনাং পশ্যতো রাজ্ঞঃ পাতয়িত্বা পদাবধীৎ॥ তস্যা যোঽসৌ তদার্কেণ রাক্ষসঃ সন্নিযোজিতঃ। স কীচকমপোবাহ বাতবেগেন ভারত॥ স পপাত তদা ভূমৌ রক্ষোবলসমাহতঃ। বিঘূর্ণমানো নিশ্চেষ্টশ্ছিন্নমূল ইব দ্রুমঃ॥ তাঞ্চাসীনৌ দদৃশতুর্ভীমসেন-যুধিষ্ঠিরৌ। অমৃষ্যমাণৌ কৃষ্ণায়াঃ কীচকেন পরাভবম্॥ তস্য ভীমো বধং প্রেপ্সুঃ কীচকস্য দুরাত্মনঃ। দন্তৈর্দন্তাংস্তদা

রোষাগ্নিম্পিপেষ মহামনাঃ॥ ধূমচ্ছায়ামভজতাং নেত্রে চোচ্ছ্রিতপক্ষ্মণী। সস্বেদা ভ্রূকুটী চোগ্রা ললাটে সমবর্ত্তত॥ হস্তেন মমৃদে চৈব ললাটং পর-বীরহা। ভূয়শ্চ ত্বরিতঃ ক্রুদ্ধঃ সহসোত্থাতুমৈচ্ছত॥ অথাঙ্গুষ্ঠেনাবমৃদন্নঙ্গুষ্ঠং তস্য ধর্ম্মরাট্। (অথাবমৃদ্নাদঙ্গুষ্ঠমঙ্গুষ্ঠেন যুধিষ্ঠিরঃ।) প্রবোধনভয়াদ্রাজা ভীমং তং প্রত্যবেধয়ৎ॥ তং মত্তমিব মাতঙ্গং বীক্ষমাণং বনস্পতিম্। স তমাবারয়া-মাস ভীমসেনং যুধিষ্ঠিরঃ॥ (আলোকয়সি কিং বৃক্ষং সূদ দারুকৃতেন বৈ। যদি তে দারুভিঃ কৃত্যং বহির্বৃক্ষান্নিগৃহ্যতাম্)॥ সা সভাদ্বারমাসাদ্য রুদতী মৎস্যমব্রবীৎ। অবেক্ষমাণা সুশ্রোণী পতীংস্তান্দীনচেতসঃ॥ আকারমভির-ক্ষন্তী প্রতিজ্ঞাং ধর্ম্মসংহিতাম্ (প্রতিজ্ঞাধর্ম্মসংহিতা)। দহ্যমানেব রৌদ্রেণ চক্ষুষা দ্রুপদাত্মজা॥

দ্রৌপদ্যুবাচ। যেষাং বৈরী ন স্বপিতি ষষ্ঠেঽপি বিষয়ে বসন্। তেষাং মাং মানিনীং ভার্য্যাং সূতপুত্রঃ পদাবধীৎ। যে দদ্যুর্ন চ যাচেয়ুর্ব্রহ্মণ্যাঃ সত্যবাদিনঃ। তেষাং মাং মানিনীং ভার্য্যাং সূতপুত্রঃ পদাবধীৎ॥ যেষাং দুন্দুভিনির্ঘোষো জ্যাঘোষঃ শ্রূয়তেঽনিশম্। তেষাং মাং মানিনীং ভার্য্যাং সূতপুত্রঃ পদাবধীৎ॥ যে চ তেজস্বিনো দান্তা বলবন্তোঽতিমানিনঃ। তেষাং মাং মানিনীং ভার্য্যাং সূতপুত্রঃ পদাবধীৎ॥ সর্ব্বলোকমিমং হন্যুর্ধর্ম্মপাশসিতাস্তু যে। তেষাং মাং মানিনীং ভার্য্যাং সূতপুত্রঃ পদাবধীৎ॥ শরণং যে প্রপন্নানাং ভবন্তি শরণার্থিনাম্। তেষাং মাং মানিনীং ভার্য্যাং সূতপুত্রঃ পদাবধীৎ॥ চরন্তি লোকে প্রচ্ছন্নাঃ ক নু তেঽদ্য মহারথাঃ। কথন্তে সূতপুত্রেণ বধ্যমানাং প্রিয়াং সতীম্। মর্ষয়ন্তি যথা ক্লীবা বলবন্তোঽমিতৌজসঃ॥ ক নু তেষামমর্ষশ্চ বীর্য্যন্তেজশ্চ বর্ত্ততে। ন পরীপ্সন্তি যে ভার্য্যাং বধ্যমানাং দুরাত্মনা॥ ময়া তু শক্যং কিং কর্ত্তুং বিরাটে ধর্ম্মদূষকে। যঃ পশ্যন্মাং মর্ষয়তি বধ্যমানামনাগসম্॥ ন রাজা রাজবৎ কিঞ্চিৎ সমাচরতি কীচকে। দস্যূনামিব ধর্ম্মস্তে ন হি সংসদি শোভতে॥ নাহমেতেন যুক্তা বৈ হন্তুং মৎস্য তবান্তিকে। সভাসদশ্চ পশ্যন্তু কীচকস্য ব্যতিক্রমম্॥ ন কীচকশ্চ ধর্ম্মজ্ঞো ন চ মৎস্যঃ কথঞ্চন সভাসদোঽপ্যধর্ম্মজ্ঞা য এনং পর্য্যুপাসতে॥

বৈশম্পায়ন উবাচ। এবম্বিধৈর্বচোভিঃ সা তদা কৃষ্ণাশ্রুলোচনা। উপাল-ভত রাজানং মৎস্যানাং বরবর্ণিনী॥

বিরাট উবাচ। পরোক্ষং নাভিজানামি বিগ্রহং যুবয়োরহম্। অর্থতত্ত্বম-বিজ্ঞায় কিন্নু স্যাৎ কৌশলং মম॥

বৈশম্পায়ন উবাচ। ততস্তু সভ্যা বিজ্ঞায় কৃষ্ণাং ভূয়োঽভ্যপূজয়ন্। সাধু সাধ্বিতি চাপ্যাহুঃ কীচকঞ্চ ব্যগর্হয়ন্॥

সভ্যা উচুঃ। যস্যেয়ং চারুসর্ব্বাঙ্গী ভার্য্যা স্যাদায়তেক্ষণা। পরো লাভশ্চ তস্য স্যান্নাসম্ভাবঃ (ন চ শোচেৎ) কদাচন॥ ন হীদৃশী মনুষ্যেষু সুলভা বরবর্ণিনী। নারী সর্ব্বানবদ্যাঙ্গী দেবীং মন্যামহে বয়ম্॥

বৈশম্পায়ন উবাচ। এবং সংপূজয়ন্তস্তে কৃষ্ণাং প্রেক্ষ্য সভাসদঃ। যুধিষ্ঠিরস্য কোপাত্তু ললাটে স্বেদ আগমৎ॥ অথাব্রবীদ্রাজপুত্রীং কৌরব্যো মহিষীং প্রিয়াম্। গচ্ছ সৈরন্ধ্রি মাঽত্র স্থাঃ সুদেষ্ণায়া নিবেশনম্॥ ভর্তারমবরুন্ধন্ত্যঃ ক্লিশ্যন্তে বীরপত্নয়ঃ। শুশ্রূষয়া ক্লিশ্যমানাঃ পতিলোকং জয়ন্ত্যুত॥ মন্যে ন কালং ক্রোধস্য পশ্যন্তি পতয়স্তব। তেন ত্বাং নাভিধাবন্তি গন্ধর্ব্বাঃ সূর্য্যবর্চ্চসঃ॥ অকালজ্ঞাসি সৈরন্ধ্রি শৈলূষীব বিরোদিষি। বিঘ্নং করোষি মৎস্যানাং দীব্যতাং রাজসংসদি॥ গচ্ছ সৈরন্ধ্রি গন্ধর্ব্বাঃ করিষ্যন্তি তব প্রিয়ম্। ব্যপনেষ্যন্তি তে দুঃখং যেন তে বিপ্রিয়ং কৃতম্॥

সৈরন্ধ্রী উবাচ। অতীব তেষাং ঘৃণিনাং মন্যেঽহং ধর্ম্মচারিণী। তস্য তস্যৈব তে বধ্যা যেষাং জ্যেষ্ঠোঽক্ষদেবিতা॥

বৈশম্পায়ন উবাচ। ইত্যুক্ত্বা প্রাদ্রবৎ কৃষ্ণা সুদেষ্ণায়া নিবেশনম্। কেশান্মুক্ত্বা তু সুশ্রোণী সংরম্ভাল্লোহিতেক্ষণা॥ শুশুভে বদনং তস্যা রুদিতায়াশ্চিরন্তদা। মেঘলেখা-বিনির্ম্মুক্তং দিবীব শশিমণ্ডলম্॥

সুদেষ্ণোবাচ। কস্ত্বাঽবধীদ্বরারোহে কস্মাদ্রোদিষি শোভনে। কস্যাদ্য বিরতং ভদ্রং কেন তে বিপ্রিয়ং কৃতম্॥

দ্রৌপদ্যুবাচ। কীচকো মাবধীত্তত্র সুরাহারীং গতাং তব। সভায়াং পশ্যতো রাজ্ঞো যথৈব বিজনে তথা॥

সুদেষ্ণোবাচ। ঘাতয়ামি সুকেশান্তে কীচকং যদি মন্যসে। যোঽসৌ ত্বাং কামসম্মত্তো দুর্ল্লভামবমন্যতে॥

দ্রৌপদ্যুবাচ। অন্যে বৈ তং বধিষ্যন্তি যেষামাগঃ করোতি সঃ। মন্যে চাদ্যৈব সুব্যক্তং পরলোকং গমিষ্যতি॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি কীচকবধে দ্রৌপদীপরিভবে ষোড়শোঽধ্যায়ঃ।

---

## সপ্তদশোঽধ্যায়ঃ।

বৈশম্পায়ন উবাচ। সা হতা সূতপুত্রেণ রাজপুত্রী যশস্বিনী। বধং কৃষ্ণা পরীপ্সন্তী সেনাবাহস্য ভাবিনী॥ জগামাবাসমেবাথ তদা সা দ্রুপদাত্মজা। কৃত্বা শৌচং যথান্যায়ং কৃষ্ণা বৈ তনুমধ্যমা॥ গাত্রাণি বাসসী চৈব প্রক্ষাল্য সলিলেন সা। চিন্তয়ামাস রুদতী তস্য দুঃখস্য নির্ণয়ম্॥ কিং করোমি ক্ক গচ্ছামি কথং কার্য্যং ভবেন্মম। ইত্যেবং চিন্তয়িত্বা সা ভীমং বৈ মনসাগমং॥ নান্যঃ কশ্চিদৃতে ভীমান্ মমাদ্য মনসঃ প্রিয়ম্। তত উত্থায় রাত্রৌ সা বিহায় শয়নং স্বকম্। প্রাদ্রবন্নাথমিচ্ছন্তী কৃষ্ণা নাথবতী সতী॥ ভবনং ভীমসেনস্য ক্ষিপ্রমায়তলোচনা। দুঃখেন মহতা যুক্তা মানসেন মনস্বিনী॥

দ্রৌপদ্যুবাচ। তস্মিন্ জীবতি পাপিষ্ঠে সেনাবাহে মম দ্বিষি। তৎ কর্ম্ম কৃতবত্যদ্য কথং নিদ্রাং নিষেবসে॥

বৈশম্পায়ন উবাচ। এবমুক্ত্বা তু তাং শালাং প্রবিবেশ মনস্বিনী। যস্যাং ভীমস্তথা শেতে মৃগরাজ ইব শ্বসন্॥ তস্যা রূপেণ সা শালা ভীমস্য চ মহাত্মনঃ। সংমূর্চ্ছিতেব কৌরব্য প্রজজ্বালাতিতেজসা॥ সা বৈ মহানসে প্রাপ্য ভীমসেনং শুচিস্মিতা। সর্ব্বশ্বেতেব মাহেয়ী বনে জাতা ত্রিহায়ণী॥ উপাতিষ্ঠত পাঞ্চালী বাসিতেব মহাগজম্॥ সা লতেব মহাশালং ফুল্লং (গোমতী)-গোমতিতীরজম্। পরিষ্বজতি পাঞ্চালী মধ্যমং পাণ্ডুনন্দনম্। বাহুভ্যাং পরিরভ্যৈনং প্রাবোধয়দনিন্দিতা॥ সিংহং সুপ্তং বনে দুর্গে মৃগরাজবধূরিব। ভীমসেনমুপাশ্লিষ্যদ্ধস্তিনীব মহাগজম্॥ বীণেব মধুরালাপা গান্ধারং সাধু মূর্চ্ছিতা (মূর্চ্ছতী)। অভ্যভাষত পাঞ্চালী ভীমসেনমনিন্দিতা॥ (পরিসংস্পৃশ্য পাণিভ্যাং সুপ্তং প্রাবোধয়ৎ পতিম্। শ্রীরিবাগ্র্যা মহোৎসাহা সুপ্তং কৃষ্ণা মহার্ণবে॥ শ্যামাবদাতা শয়নে শয়ানমৃষভেক্ষণম্॥ সা শচীব সহস্রাক্ষং রুদ্রাণীব চ শঙ্করম্। সাবিত্রীব চ ব্রহ্মাণং গুহং ষষ্ঠীব ভাবিনী॥ ভীমং প্রাবোধয়ৎ কৃষ্ণা লক্ষ্মীর্দামোদরং যথা। দেবগর্ভা সমা ভাসা প্রিয়ং প্রিয়বচঃ-প্রিয়া)॥ উত্তিষ্ঠোত্তিষ্ঠ কিং শেষে ভীমসেন যথা মৃতঃ। নামৃতস্য হি পাপীয়ান্ ভার্য্যামালভ্য জীবতি॥ স সংপ্রহায় শয়নং রাজপুত্র্যা প্রবোধিতঃ। উপাতিষ্ঠত মেঘাভঃ পর্য্যঙ্কে সোপসংগ্রহে॥ অথাব্রবীদ্রাজপুত্রীং কৌন্তেয়ো মহিষীং প্রিয়াম্। কেনাস্যর্থেন সংপ্রাপ্তা ত্বরিতেব মমান্তিকম্॥ ন তে প্রকৃতিমান্ বর্ণঃ কৃশা পাণ্ডুশ্চ লক্ষ্যসে। আচক্ষ্ব পরিশেষেণ সর্ব্বং বিদ্যামহং যথা॥ সুখং বা যদি বা দুঃখং প্রিয়ং বা যদি বাঽপ্রিয়ম্। যথাবৎ সর্ব্বমাচক্ষ্ব

শ্রুত্বা ধাস্যামি ( জাস্যামি ) যৎ ক্ষমম্॥ অহমেব হি তে কৃষ্ণে বিশ্বাস্যঃ সর্ব্ব-কর্ম্মসু। অহমাপৎসু চাপি ত্বাং মোক্ষয়ামি পুনঃ পুনঃ॥ শীঘ্রমুক্ত্বা যথাকামং যত্তে কার্য্যং ব্যবস্থিতম্। গচ্ছ বৈ শয়নায়ৈব যাবন্নান্যো বিবুধ্যতে॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি ভীমসেনামন্ত্রণং নাম সপ্তদশোঽধ্যায়ঃ।

---

## অষ্টাদশোঽধ্যায়ঃ

দ্রৌপদ্যুবাচ। অশোচ্যত্বং কুতস্তস্যা যস্যা ভর্ত্তা যুধিষ্ঠিরঃ। জানন্ সর্ব্বাণি দুঃখানি কিং মাং ত্বং পরিপৃচ্ছসি॥ যন্মাং দাসীপ্রবাদেন প্রাতিকামী তদানয়ৎ। সভাপরিষদো মধ্যে তন্মাং দহতি ভারত॥ পার্থিবস্য সুতা নাম কা নু জীবতি মাদৃশী। অনুভূয়েদৃশং দুঃখমত্যন্তং দ্রৌপদীমৃতে॥ বনবাস গতায়াশ্চ সৈন্ধবেন দুরাত্মনা। পরামর্ষং দ্বিতীয়ং বৈ সোঢ়ুমুৎসহতে নু কা॥ মৎস্যরাজ্ঞঃ সমক্ষন্তু তস্য ধূর্ত্তস্য পশ্যতঃ। কীচকেন পদা স্পৃষ্টা কা নু জীবেত মাদৃশী॥ এবং বহুবিধৈঃ ক্লেশৈঃ ক্লিশ্যমানাঞ্চ ভারত। ন মাং জানাসি কৌন্তেয় কিং ফলং জীবিতেন মে॥ যোঽয়ং রাজ্ঞো বিরাটস্য কীচকো নাম ভারত। সেনানীঃ পুরুষব্যাঘ্র শ্যালঃ পরমদুর্ম্মতিঃ॥ স মাং সৈরন্ধ্রিবেশেন বসন্তীং রাজবেশ্মনি। নিত্যমেবাহ দুষ্টাত্মা ভার্য্যা মম ভবেতি বৈ॥ তেনোপমন্ত্র্যমাণায়া বধার্হেণ সপত্নজিৎ। কালেনেব ফলং পক্বং হৃদয়ং মে বিদীর্য্যতে॥ ভ্রাতরঞ্চ বিগর্হস্ব জ্যেষ্ঠং দুর্দ্যূতদেবিনম্। যস্যাস্মি কর্ম্মণা প্রাপ্তা দুঃখমেতদনন্তকম্॥ কো হি রাজ্যং পরিত্যজ্য সর্ব্বস্বং চাত্মনা সহ। প্রব্রজ্যায়ৈব দীব্যেত বিনা দুর্দ্যূতদেবিনম্॥ যদি নিষ্কসহস্রেণ যচ্চান্যৎ সারবদ্ধনম্। সায়ং প্রাতরদেবিষ্যদপি সম্বৎসরান্ বহূন্॥ রুক্মং হিরণ্যং বাসাংসি যানং যুগ্যমজাবিকম্। অশ্বাশ্বতরসঙ্ঘাংশ্চ ন জাতু ক্ষয়মাবহেৎ॥ সোঽয়ং দ্যূতপ্রবাদেন শ্রিয়া প্রত্যবরোপিতঃ। তূষ্ণীমাস্তে যথা মূঢ়ঃ স্বানি কর্ম্মাণি চিন্তয়ন্॥ দশনাগসহস্রাণি পদ্মিনাং হেমমালিনাম্। যং যান্তমনুযান্তীহ সোঽয়ং দ্যূতেন জীবতি॥ তথা শতসহস্রাণি রাজ্ঞামমিত-তেজসাম্। উপাসত মহারাজমিন্দ্রপ্রস্থে যুধিষ্ঠিরম্॥ শতং দাসীসহস্রাণাং যস্য নিত্যং মহানসে। পাত্রীহস্তং দিবারাত্রমতিথীন্ ভোজয়ত্যুত॥ এষ

নিষ্কসহস্রাণাং প্রদাতা দদতাম্বরঃ। দ্যূতজেন হ্যনর্থেন মহতা সমুপাশ্রিতঃ॥ এনং হি স্বরসম্পন্না বহবঃ সূতমাগধাঃ। সায়ং প্রাতরুপাতিষ্ঠন্ সুমৃষ্টমণিকুণ্ডলাঃ॥ সহস্রমৃষয়ো যস্য নিত্যমাসন্ সভাসদঃ। তপঃশ্রুতোপসম্পন্নাঃ সর্ব্বকামৈরুপস্থিতাঃ॥ অষ্টাশীতিসহস্রাণি স্নাতকা গৃহমেধিনঃ। ত্রিংশদ্দাসীকমেকৈকং যান্ বিভর্ত্তি যুধিষ্ঠিরঃ॥ অপ্রতিগ্রাহিণাঞ্চৈব যতীনামূর্দ্ধরেতসাম্। দশ চাপি সহস্রাণি সোঽয়মাস্তে নরাধিপঃ॥ আনৃশংস্যমনুক্রোশং সংবিভাগস্তথৈব চ। যস্মিন্নেতানি সর্ব্বাণি সোঽয়মাস্তে নরাধিপঃ॥ অন্ধান্ বৃদ্ধাংস্তথানাথান্ বালান্ রাষ্ট্রেষু দুর্গতান্। বিভর্ত্তি বিবিধান্ রাজা ধৃতিমান্ সত্যবিক্রমঃ॥ যঃ সংবিভজ্য বিনয়াদানৃশংস্যাদ্ যুধিষ্ঠিরঃ। স এব নিরয়ং প্রাপ্তো মৎস্যস্য পরিচারকঃ॥ সভায়াং দেবিতা রাজ্ঞঃ কঙ্কো ব্রূতে যুধিষ্ঠিরঃ। ইন্দ্রপ্রস্থে নিবসতঃ সময়ে যস্য পার্থিবাঃ॥ আসন্ বলিভৃতঃ সর্ব্বে সোঽন্যস্মাদ্‌বৃত্তিমিচ্ছতি। পার্থিবাঃ পৃথিবীপালা যস্যাসন্ বশবর্ত্তিনঃ॥ স্ববশে বিবশে রাজা পরেষামদ্য বর্ত্ততে। প্রতাপ্য পৃথিবীং সর্ব্বাং রশ্মিমানিব তেজসা॥ সোঽয়ং রাজ্ঞো বিরাটস্য সভাস্তারো যুধিষ্ঠিরঃ। যমুপাসত রাজানঃ সভায়ামৃষিভিঃ সহ॥ তমুপাসীনমদ্যান্যং পশ্য পাণ্ডব পাণ্ডবম্। সদস্যং সমুপাসীনং পরস্য প্রিয়বাদিনম্॥ দৃষ্ট্বা যুধিষ্ঠিরং শোকো ন বিশেৎ কমসংশয়ম্। অতদর্হং মহাপ্রাজ্ঞং জীবিতার্থেঽন্যসংশ্রিতম্॥ দৃষ্ট্বা কস্য ন দুঃখং স্যাদ্ধর্ম্মাত্মানং যুধিষ্ঠিরম্। উপাস্তে স্ম সভায়াং যং কৃৎস্না বীর বসুন্ধরা॥ তমুপাসীনমপ্যন্যং পশ্য ভারত ভারতম্॥ এবং বহুবিধৈর্দুঃখৈঃ পীড্যমানামনাথবৎ। শোকসাগরমধ্যস্থাং কিং মাং ভীম ন পশ্যসি॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি কীচকবধে অষ্টাদশোঽধ্যায়ঃ।

---

## ঊনবিংশোঽধ্যায়ঃ

দ্রৌপদ্যুবাচ। ইদন্তু দুঃখং কৌন্তেয় মমাসহ্যং নিবোধ তৎ। ন মেঽভ্যসূয়া কর্ত্তব্যা দুঃখাদেতদ্ব্রবীম্যহম্॥ সূদকর্ম্মণি হীনে ত্বমসমে ভরতর্ষভ। ব্রুবন্ বল্লবজাতীয়ঃ কস্য শোকং ন বর্দ্ধয়েঃ॥ সূপকারং বিরাটস্য বল্লবং ত্বাং বিদুর্জ্জনাঃ। প্রেষ্যত্বং সমনুপ্রাপ্তং ততো দুঃখতরং নু কিম্॥ যদা

মহানসে সিদ্ধে বিরাটমুপতিষ্ঠসে। ব্রুবাণো বল্লবঃ সূদস্তদা সীদতি মে মনঃ॥ যদা প্রহৃষ্টঃ সম্রাট্ ত্বাং সংযোধয়তি কুঞ্জরৈঃ। হসন্ত্যন্তঃপুরে নার্য্যো মম তুদ্বিজতে মনঃ॥ শার্দ্দূলৈর্ম্মহিষৈঃ সিংহৈরাগারে যোধ্যসে যদা। কৈকেয্যাং প্রেক্ষমাণায়াং তদা মে কশ্মলো ভবেৎ॥ তত উত্থায় কৈকেয়ী সর্ব্বাস্তাঃ প্রত্যভাষত। প্রেষ্যাঃ সমুত্থিতাশ্চাপি কৈকেয়ী তাঃ স্ত্রিয়োঽব্রবীৎ॥ প্রেক্ষ্য মামনবদ্যাঙ্গীং কশ্মলোপহতামিব। স্নেহাৎ সংবাসজাদ্ধর্ম্মাৎ সূদমেষা শুচিস্মিতা॥ [একান্তার্পিতভাবেন বল্লবং চারুহাসিনি।] যোধ্যমানং মহাবীর্য্যৈরিয়ং সমনুশোচতি॥ কল্যাণরূপা সৈরন্ধ্রী বল্লবশ্চাপি সুন্দরঃ। স্ত্রীণাং চরিত্রং (চিত্তঞ্চ) দুর্জ্ঞেয়ং যুক্তরূপৌ চ মে মতৌ॥ সৈরন্ধ্রী প্রিয়-সংবাদা (সা) নিত্যং করুণদেবিনী (বাদিনী)। অস্মিন্ রাজকুলে চোভৌ তুল্যকালনিবাসিনৌ॥ ইতি ব্রুবাণা বাক্যানি সা মাং নিত্যমতর্জ্জয়ৎ। ক্রুশ্যন্তীং (ক্রুধ্যন্তীং) মাঞ্চ সংপ্রেক্ষ্য সমশঙ্কত মাং ত্বয়ি॥ তস্যাস্তথা ব্রুবত্যাস্তু দুঃখং মাং মহদাবিশৎ। ত্বয্যেবং নিরয়ং প্রাপ্তে ভীমে ভীমপরাক্রমে॥ শোকে যৌধিষ্ঠিরে মগ্না নাহং জীবিতুমুৎসহে। যঃ সদেবান্মনুষ্যাংশ্চ সর্ব্বাংশ্চৈ-করথোঽজয়ৎ॥ সোঽয়ং রাজ্ঞো বিরাটস্য কন্যানাং নর্ত্তকো যুবা। যোঽতর্পয়দমেয়াত্মা খাণ্ডবে জাতবেদসম্॥ সোঽন্তঃপুরগতঃ পার্থঃ কূপে-ঽগ্নিরিব সংবৃতঃ। যস্মাদ্ভয়ঽমিত্রাণাং সদৈব পুরুষর্ষভাৎ॥ স লোকপরিভূতেন বেশেনাস্তে ধনঞ্জয়ঃ। যস্য জ্যাক্ষেপকঠিনৌ বাহূ পরিঘসন্নিভৌ॥ স শঙ্খ-পরিপূর্ণাভ্যাং শোচয়াস্তে ধনঞ্জয়ঃ॥ যস্য জ্যাঘাতনির্ঘোষাৎ সমকম্পন্ত শত্রবঃ। স্ত্রিয়ো গীতস্বনং তস্য মুদিতাঃ পর্য্যুপাসতে॥ কিরীটং সূর্য্যসঙ্কাশং যস্য মূর্দ্ধন্য-শোভত। বেণীবিকৃতকেশান্তঃ সোঽয়মদ্য ধনঞ্জয়ঃ॥ তং বেণীকৃতকেশান্তং ভীমধন্বানমর্জ্জুনম্। কন্যাপরিবৃতং দৃষ্ট্বা ভীম সীদতি মে মনঃ॥ যস্মিন্নস্ত্রাণি দিব্যানি সমস্তানি মহাত্মনি। আধারঃ সর্ব্ববিদ্যানাং স ধারয়তি কুণ্ডলে॥ যস্য রাজসহস্রাণি তেজসাপ্রতিমানি বৈ। সমরে নাভ্যবর্ত্তন্ত বেলামিব মহো-দধিঃ॥ সোঽয়ং রাজ্ঞো বিরাটস্য কন্যানাং নর্ত্তকো যুবা। আস্তে বেশপ্রতিচ্ছন্নঃ কন্যানাং পরিচারকঃ॥ যস্য স্ম রথঘোষেণ সমকম্পত মেদিনী। সপর্ব্বতবনা ভীম সহস্থাবরজঙ্গমা॥ যস্মিন্ জাতে মহাভাগে কুন্ত্যাঃ শোকো ব্যনশ্যত। স শোচয়তি মামদ্য ভীমসেন তবানুজঃ॥ ভূষিতং তমলঙ্কারৈঃ কুণ্ডলৈঃ পরি-হাটকৈঃ। কম্বুপাণিং তমায়ান্তং দৃষ্ট্বা সীদতি মে মনঃ॥ যস্য নাস্তি সমো বীর্য্যে কশ্চিদুর্ব্ব্যাং ধনুর্দ্ধরঃ। সোঽদ্য কন্যাপরিবৃতো গায়মাস্তে ধনঞ্জয়ঃ॥

ধর্ম্মে শৌর্য্যে চ সত্যে চ জীবলোকস্য সম্মতম্। স্ত্রীবেশ-বিকৃতং পার্থং দৃষ্ট্বা সীদতি মে মনঃ॥ যদা হ্যেনং পরিবৃতং কন্যাভির্দ্দেবরূপিণম্। প্রভিন্নমিব মাতঙ্গং পরিকীর্ণং করেণুভিঃ॥ মৎস্যমর্থপতিং পার্থং বিরাটং সমুপস্থিতম্। পশ্যামি তূর্য্যমধ্যস্থং দিশো নশ্যন্তি মে তদা॥ নূনমার্য্যা ন জানাতি কৃচ্ছ্রং প্রাপ্তং ধনঞ্জয়ম্। অজাতশত্রুং কৌরব্যং মগ্নং দুর্দ্যূতদেবিনম্॥ তথা দৃষ্ট্বা যবীয়াংসং সহদেবং গবাং গতিম্। [ গোষু গোবেষ ] গোপালবেশমায়ান্তং পাণ্ডুভূতাস্মি ভারত॥ সহদেবস্য বৃত্তানি চিন্তয়ন্তী পুনঃ পুনঃ। ন নিদ্রামভিগচ্ছামি ভীমসেন কুতো রতিম্॥ ন বিন্দামি মহাবাহো সহদেবস্য দুষ্কৃতম্। যস্মিন্নেবংবিধং দুঃখং প্রাপ্নুয়াৎ সত্যবিক্রমঃ॥ দূয়ামি ভরতশ্রেষ্ঠ দৃষ্ট্বা তে ভ্রাতরং প্রিয়ম্। গোষু গোবৃষসঙ্কাশং মৎস্যেনাভিনিবেশিতম্॥ সংরব্ধং রক্তনেপথ্যং গোপালানাং পুরোগমম্। বিরাটমভিনন্দন্তমথ মে ভবতি জ্বরঃ॥ সহদেবং হি বীরং মে নিত্যমার্য্যা প্রশংসতি। মহাভিজনসম্পন্নঃ শীলবান্ বৃত্তবানিতি॥ হ্রীনিষেবো মধুরবাগ্ ধার্ম্মিকশ্চ প্রিয়শ্চ মে। স তেঽরণ্যেষু বোঢ়ব্যো যাজ্ঞসেনি ক্ষপাস্বপি॥ সুকুমারশ্চ শূরশ্চ রাজানঞ্চাপ্যনুব্রতঃ। জ্যেষ্ঠানুযায়িনমিমং স্বয়ং পাঞ্চালি ভোজয়েঃ॥ ইত্যুবাচ হি মাং কুন্তী রুদতী পুত্রগৃদ্ধিনী। প্রব্রজন্তং ( প্রযচ্ছন্তং ) মহারণ্যং তং ( যং ) পরিষজ্য তিষ্ঠতী॥ তং দৃষ্ট্বা ব্যাপৃতং গোষু বৎসচর্ম্মক্ষপাশয়ম্। সহদেবং যুধাং শ্রেষ্ঠং কিং নু জীবামি পাণ্ডব॥ যস্ত্রিভির্নিত্যসম্পন্নো রূপেণাস্ত্রেণ মেধয়া। সোঽশ্ববন্ধো বিরাটস্য পশ্য কালবিপর্য্যয়ম্॥ অভ্যকীর্য্যন্ত বৃন্দানি দামগ্রন্থিমুদীক্ষতাম্। বিনয়ন্তং জবেনাশ্বান্মহারাজস্য পশ্যতঃ॥ অপশ্যমেনং শ্রীমন্তং মৎস্যং ভ্রাজিষ্ণুমুত্তমম্। বিরাটমুপতিষ্ঠন্তং দর্শয়ন্তঞ্চ বাজিনঃ॥ কিন্নু মাং মন্যসে পার্থ সুখিতেতি পরন্তপ। এবং দুঃখশতাবিষ্টাং যুধিষ্ঠিরনিমিত্ততঃ॥ অতঃ প্রতিবিশিষ্টানি দুঃখান্যন্যানি ভারত। বর্ত্তন্তে ময়ি কৌন্তেয় বক্ষ্যামি শৃণু তান্যপি॥ যুষ্মাসু ধ্রিয়মাণেষু দুঃখানি বিবিধান্যুত। শোষয়ন্তি শরীরং মে কিন্নু দুঃখমতঃপরম্॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি কীচকবধে দ্রৌপদীবাক্যে ঊনবিংশোঽধ্যায়ঃ।

---

## বিংশোঽধ্যায়ঃ

দ্রৌপদ্যুবাচ। অহং সৈরন্ধ্রীবেশেন চরন্তী রাজবেশ্মনি। বশগাস্মি সুদেষ্ণায়া অক্ষধূর্ত্তস্য কারণাৎ॥ পশ্য মে বিক্রিয়াং তীব্রাং রাজপুত্র্যাঃ পরন্তপ। আসে কালমুপাসীনা সর্ব্বং দুঃখং কিলান্তবৎ॥ অনিত্যা কিল মর্ত্ত্যানামর্থসিদ্ধির্জয়াজয়ৌ। ইতি কৃত্বা প্রতীক্ষামি ভর্ত্তৃণামুদয়ং পুনঃ॥ চক্রবৎ পরিবর্ত্তন্তে হ্যর্থাশ্চ (কিল মর্ত্ত্যানামর্থাশ্চ) ব্যসনানি চ। ইতি কৃত্বা প্রতীক্ষামি ভর্ত্তৃণামুদয়ং পুনঃ॥ য এব হেতুর্ভবতি পুরুষস্য জয়াবহঃ। পরাজয়ে স হেতুঃ স্যাদিতি চ প্রতিপালয়ে॥ কিং মাং ন প্রতিজানীষে ভীমসেন মৃতামিব॥ দত্ত্বা যাচন্তি পুরুষা হত্বা বধ্যন্তি চাপরে। পাতয়িত্বা চ পাত্যন্তে পরৈরিতি চ মে শ্রুতম্॥ ন দৈবস্যাতিভারোঽস্তি ন দৈবস্য নিবর্ত্তনম্। ইতি চাপ্যাগমং ভূয়ো দৈবস্য প্রতিপালয়ে॥ স্থিতং পূর্ব্বং জলং যত্র পুনস্তত্রৈব তিষ্ঠতি। ইতি পর্য্যায়মিচ্ছন্তী প্রতীক্ষাম্যুদয়ং পুনঃ॥ দৈবেন কিল যস্যার্থঃ সুনীতোঽপি বিপদ্যতে। দৈবস্যাগমনে যত্নস্তেন কার্য্যো বিজানতা॥ যত্তু মে কথিতস্যাস্য বচনস্য প্রয়োজনম্। পৃচ্ছ মাং দুঃখিতাং ত্বমপৃষ্টা চ ব্রবীমি তে॥ মহিষী পাণ্ডুপুত্রাণাং দুহিতা দ্রুপদস্য চ। ইমামবস্থাং সংপ্রাপ্তা কা মদন্যা জিজীবিষেৎ॥ কুরূন্ পরিভবন্ সর্ব্বান্ পাঞ্চালানপি ভারত। পাণ্ডবেয়াংশ্চ সংপ্রাপ্তো মম ক্লেশো হ্যরিন্দম॥ ভ্রাতৃভিঃ শ্বশুরৈঃ পুত্রৈর্বহুভিঃ পরিবারিতা। এবং সমুদিতা নারী কা অন্যা দুঃখিতা ভবেৎ॥ নূনং হি বালয়া ধাতুর্ম্ময়া বৈ বিপ্রিয়ং কৃতম্। যস্য প্রসাদাদ্দুর্নীতং (প্রমাদাদ্দুর্নীতং) প্রাপ্তাস্মি ভরতর্ষভ॥ বর্ণাবকাশমপি মে পশ্য পাণ্ডব যাদৃশম্। তাদৃশো মে ন তত্রাসীদ্ দুঃখে পরমকে তদা॥ ত্বমেব ভীম জানীষে যন্মে পার্থ সুখং পুরা। সাহং দাসীত্বমাপন্না ন শান্তিমবশা লভে॥ নাদৈবিকমহং মন্যে যত্র পার্থো ধনঞ্জয়ঃ। ভীমধন্বা মহাবাহুরাস্তে ছন্ন ইবানলঃ॥ অশক্যা বেদিতুং পার্থ প্রাণিনাং বৈ গতির্নরৈঃ। বিনিপাতমিমং মন্যে যুষ্মাকমবিচিন্তিতম্॥ যস্যা মম সুখ-(মুখ) প্রেক্ষা যূয়মিন্দ্রসমাঃ সদা। সা প্রেক্ষে সুখ-(মুখ) মন্যাসামবরাণাং বরা সতী॥ পশ্য পাণ্ডব মেঽবস্থাং যথা নার্হামি বৈ তথা। যুষ্মাসু ধ্রিয়মাণেষু পশ্য কালস্য পর্য্যয়ম্॥ যস্যাঃ সাগরপর্য্যন্তা পৃথিবী বশবর্ত্তিনী। আসীৎ সাদ্য সুদেষ্ণায়া ভীতাস্মি বশবর্ত্তিনী॥ যস্যাঃ পুরঃসরা হ্যাসন্ পৃষ্ঠতশ্চানুযায়িনঃ। সাহমদ্য সুদেষ্ণায়াঃ পুরঃ পশ্চাচ্চ গামিনী॥ ইদন্তু দুঃখং কৌন্তেয় মমাসহ্যং নিবোধ তৎ। ন যা জাতু স্বয়ং পিংষে গাত্রোদ্বর্ত্তনমাত্মনঃ॥ অন্যত্র কুন্ত্যা ভদ্রন্তে সা পিনষ্ম্যদ্য চন্দনম্। পশ্য

কৌন্তেয় পাণী মে নৈবং যৌ ভবতঃ পুরা ॥ ইত্যস্য দর্শয়ামাস কিণবন্তৌ করাবুভৌ ॥ বিভেমি কুন্ত্যা নৈবাহং যুষ্মাকং বা কদাচন। সাত্তাগ্রতো বিরাটস্য ভীতা তিষ্ঠামি কিঙ্করী ॥ কিন্নু বক্ষ্যতি সম্রাড় মাং বর্ণকঃ সুকৃতো ন বা। নাগ্যপিষ্টং হি মৎস্যস্য চন্দনং কিল রোচতে ॥

বৈশম্পায়ন উবাচ। সা কীর্ত্তয়ন্তী দুঃখানি ভীমসেনস্য ভারত। রুরোদ শনকৈঃ কৃষ্ণা ভীমসেনমুদীক্ষতী ॥ সা বাষ্পাকুলয়া বাচা নিঃশ্বসন্তী পুনঃ পুনঃ। হৃদয়ং ভীমসেনস্য ঘট্টয়ন্তীদমব্রবীৎ ॥

দ্রৌপদ্যুবাচ। নাল্পং কৃতং ময়া ভীম দেবানাং বিপ্রিয়ং পুরা। অভাগ্যা যত্র জীবামি মর্ত্তব্যে সতি পাণ্ডব ॥

বৈশম্পায়ন উবাচ। ততস্তস্যাঃ করৌ সূক্ষ্মৌ কিণবন্তৌ বৃকোদরঃ। মুখমানীয় দ্রৌপদ্যা রুরোদ পরবীরহা ॥ তৌ গৃহীত্বা তু কৌন্তেয়ো বাষ্পমুৎসৃজ্য বীর্য্যবান্। ততঃ পরমদুঃখার্ত্ত ইদং বচনমব্রবীৎ ॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি কীচকবধে দ্রৌপদীনিবেদনে বিংশোঽধ্যায়ঃ।

---

## একবিংশোঽধ্যায়ঃ

ভীমসেন উবাচ। ধিগস্তু মে বাহুবলং গাণ্ডীবং ফাল্গুনস্য চ। যত্তে রক্তৌ পুরা ভূত্বা পাণী কৃতকিণাবুভৌ ॥ সভায়াস্তু বিরাটস্য করোমি কদনং মহৎ। তত্র মে কারণং ভাতি কৌন্তেয়ো যৎ প্রতীক্ষতে ॥ অথবা কীচকস্যাহং প্রোথয়ামি পদা শিরঃ। ঐশ্বর্য্যমদমত্তস্য ক্রীড়ন্নিব মহাদ্বিপঃ ॥ অপশ্যং ত্বাং যদা কৃষ্ণে কীচকেন পদা হতাম্। তদৈবাহং চিকীর্ষামি মৎস্যানাং কদনং মহৎ ॥ তত্র মাং ধর্ম্মরাজস্তু কটাক্ষেণ ন্যবারয়ৎ। তদহং তস্য বিজ্ঞায় স্থিত এবাস্মি ভামিনি ॥ যচ্চ রাষ্ট্রাৎ প্রচ্যবনং কুরূণামবধশ্চ যঃ। সুযোধনস্য কর্ণস্য শকুনেঃ সৌবলস্য চ ॥ দুঃশাসনস্য পাপস্য যন্ময়া ন হৃতং শিরঃ। তন্মে দহতি গাত্রাণি হৃদি শল্যমিবার্পিতম্ ॥ মা ধর্ম্মং জহি সুশ্রোণি ক্রোধং জহি সুমধ্যমে। ইমঞ্চ সমুপালম্ভং ত্বত্তো রাজা যুধিষ্ঠিরঃ ॥ শৃণুয়াদ্ যদি কল্যাণি কৃৎস্নং জহ্যাৎ স জীবিতম্ ॥ ধনঞ্জয়ো বা সুশ্রোণি যমৌ বা তনুমধ্যমে। লোকান্তরগতেষেষু নাহং শক্নোমি জীবিতুম্ ॥ পুরা

সুকন্যা শার্য্যাতী ভার্গবং চ্যবনং বনে। বল্মীকভূতং শাম্যন্তমন্বপদ্যত ভামিনী॥ নারায়ণী চেন্দ্রসেনা রূপেণ যদি তে শ্রুতা। পতিমন্বচরৎ বৃদ্ধং পুরা বর্ষসহস্রিণম্। দুহিতা জনকস্যাপি বৈদেহী যদি তে শ্রুতা। পতিমন্বচরৎ সীতা মহারণ্য-নিবাসিনম্॥ রক্ষসা নিগ্রহং প্রাপ্য রামস্য মহিষী প্রিয়া। ক্লিশ্যমানাপি সুশ্রোণী রামমেবান্বপদ্যত॥ লোপামুদ্রা তথা ভীরু বয়োরূপসমন্বিতা। অগস্ত্যমন্বিয়াদ্ধিত্বা কামান্ সর্ব্বানমানুষান্॥ দ্যুমৎসেনসুতং বীরং সত্যবন্তমনিন্দিতা। সাবিত্র্য-নুচচারৈকা যমলোকং মনস্বিনী॥ যথৈতাঃ কীর্ত্তিতা নার্য্যো রূপবত্যঃ পতিব্রতাঃ। তথা ত্বমপি কল্যাণি সর্বৈঃ সমুদিতা গুণৈঃ॥ সাঽদীর্ঘং ক্ষম কালত্বং মাসমধ্যর্দ্ধসম্মিতম্। পূর্ণে ত্রয়োদশে বর্ষে রাজ্ঞাং রাজ্ঞী ভবিষ্যসি॥

দ্রৌপদ্যুবাচ। আর্ত্তয়ৈতন্ময়া ভীম কৃতং বাষ্পপ্রমোচনম্। অপারয়ন্ত্যা দুঃখানি ন রাজানমুপালভে॥ কিমুক্তেন ব্যতীতেন ভীমসেন মহাবল। প্রত্যুপস্থিতকালস্য কার্য্যস্যানন্তরো ভব॥ মমেহ ভীম কৈকেয়ী রূপাভি-ভবশঙ্কয়া। নিত্যমুদ্বিজতে রাজা কথমেয়াদিমামিতি॥ তস্যা বিদিত্বা তং ভাবং স্বয়ঞ্চানৃতদর্শনঃ। কীচকোঽয়ং সুদুষ্টাত্মা সদা প্রার্থয়তে হি মাম্। তমহং কুপিতা ভীম পুনঃ কোপং নিশম্য (নিয়ম্য) চ। অব্রবং কামসংমূঢ়-মাত্মানং রক্ষ কীচক॥ গন্ধর্ব্বাণামহং ভার্য্যা পঞ্চানাং মহিষী প্রিয়া। তে ত্বাং নিহন্যুঃ কুপিতাঃ শূরাঃ সাহসকারিণম্॥ এবমুক্তঃ সুদুষ্টাত্মা কীচকঃ প্রত্যুবাচ হ। নাহং বিভেমি সৈরন্ধ্রি গন্ধর্ব্বাণাং শুচিস্মিতে॥ শতং সহস্রমপি বা গন্ধর্ব্বাণামহং রণে। সমাগতং হনিষ্যামি ত্বং ভীরু কুরু মে ক্ষণম্॥ ইত্যুক্তে চাব্রবং সূতং কামাতুরমহং পুনঃ। ন ত্বং প্রতিবলস্তেষাং গন্ধর্ব্বাণাং যশস্বিনাম্॥ ধর্ম্মে স্থিতাস্মি সততং কুলশীলসমন্বিতা। নেচ্ছামি কঞ্চিদ্বধ্যন্তং তেন জীবসি কীচক॥ এবমুক্তঃ স দুষ্টাত্মা প্রাহসৎ স্বনবত্তদা। অথ মাং তত্র কৈকেয়ী প্রেষয়ৎ প্রণয়েন তু॥ তেনৈব চোদিতা পূর্ব্বং ভ্রাতৃপ্রিয়চিকীর্ষয়া। সুরামানয় কল্যাণি কীচকস্য নিবেশনাৎ॥ সূতপুত্রস্তু মাং দৃষ্ট্বা মহৎ সান্ত্বমবর্ত্তয়ৎ। সান্ত্বে প্রতিহতে ক্রুদ্ধঃ পরামর্ষমনাভবৎ॥ বিদিত্বা তস্য সঙ্কল্পং কীচকস্য দুরাত্মনঃ। তথাহং রাজশরণং জবেনৈব প্রধাবিতা॥ সন্দর্শনে তু মাং রাজ্ঞঃ সূতপুত্রঃ পরামৃষৎ। পাতয়িত্বা তু দুষ্টাত্মা পদাহং তেন তাড়িতা॥ প্রেক্ষতে স্ম বিরাটস্তু কঙ্কশ্চ বহবো জনাঃ। রথিনঃ পীঠমর্দ্দা[র্দ্ধা]শ্চ হস্ত্যারোহাশ্চ নৈগমাঃ॥ উপালব্ধো ময়া রাজা কঙ্কশ্চাপি পুনঃ পুনঃ। ততো ন বারিতো রাজ্ঞা ন তস্য বিনয়ঃ কৃতঃ॥

যোঽয়ং রাজ্ঞো বিরাটস্য কীচকো নাম সারথিঃ। ত্যক্তধর্ম্মা নৃশংসশ্চ তরস্বী সম্মতঃ প্রিয়ঃ॥ শূরোঽভিমানী পাপাত্মা সর্ব্বার্থেষু চ মুগ্ধবান্। দারামর্ষী মহাভাগ লভতেঽর্থান্ বহূনপি॥ আহরেদপি বিত্তানি পরেষাং ক্রোশতামপি। ন তিষ্ঠতি স্ম সন্মার্গে ন চ ধর্ম্মং বুভূষতি॥ পাপাত্মা পাপভাবশ্চ কামরাগ-বশানুগঃ। অবিনীতশ্চ দুষ্টাত্মা প্রত্যাখ্যাতঃ পুনঃ পুনঃ॥ দর্শনে দর্শনে হন্যাদ্ যথা জহ্যাঞ্চ জীবিতম্। তদ্ধর্ম্মে যতমানানাং মহান্ ধর্ম্মো ন শিষ্যতি॥ সময়ং রক্ষ্যমাণানাং ভার্য্যা বো ন ভবিষ্যতি। ভার্য্যায়াং রক্ষ্যমাণায়াং প্রজা ভবতি রক্ষিতা॥ প্রজায়াং রক্ষ্যমাণায়ামাত্মা ভবতি রক্ষিতঃ। আত্মা হি জায়তে তস্যাং তেন জায়াং বিদুর্ব্বুধাঃ॥ ভর্ত্তা তু ভার্য্যয়া রক্ষ্যঃ কথং জায়ান্মমোদরে। বদতাং কর্ণধর্ম্মাংশ্চ ব্রাহ্মণানামিতি শ্রুতঃ॥ ক্ষত্রিয়স্য সদা ধর্ম্মো নান্যঃ শত্রুনিবর্হণাৎ। পশ্যতো ধর্ম্মরাজস্য কীচকো মাং পদাবধীৎ॥ তব চৈব সমক্ষং বৈ ভীমসেন মহাবল। ত্বয়া হ্যহং পরিত্রাতা তস্মাদ্‌ঘোরাজ্জটা-সুরাৎ॥ জয়দ্রথং তথৈব ত্বমজৈষীর্ভ্রাতৃভিঃ সহ। জহীমমপি পাপিষ্ঠং যোঽয়ং মামবমন্যতে॥ কীচকো রাজবাল্লভ্যাচ্ছোককৃন্মম ভারত। তমেবং কামসম্মত্তং ভিন্ধি কুম্ভমিবাশ্মনি॥ যো নিমিত্তমনর্থানাং বহূনাং মম ভারত। তঞ্চেজ্জীবন্তমাদিত্যঃ প্রাতরভ্যুদয়িষ্যতি॥ বিষমালোড্য পাস্যামি মা কীচক-বশং গমম্। শ্রেয়ো হি মরণং মহ্যং ভীমসেন তবাগ্রতঃ॥

বৈশম্পায়ন উবাচ। ইত্যুক্ত্বা প্রারুদৎ কৃষ্ণা ভীমস্যোরঃসমাশ্রিতা। ভীমশ্চ তাং পরিষ্বজ্য মহৎ সান্ত্বং প্রযুজ্য চ॥ আশ্বাসয়িত্বা বহুশো ভৃশমার্ত্তাং সুমধ্যমাম্। হেতু-তত্ত্বার্থসংযুক্তৈর্ব্বচোভির্দ্রুপদাত্মজাম্॥ প্রমৃজ্য বদনং তস্যাঃ পাণিনাশ্রুসমাকুলম্। কীচকং মনসাগচ্ছৎ সৃক্কণী পরিসংলিহন্। উবাচ চৈনাং দুঃখার্ত্তাং ভীমঃ ক্রোধসমন্বিতঃ॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি কীচকবধে দ্রৌপদীসান্ত্বনে একবিংশোঽধ্যায়ঃ।

---

## দ্বাবিংশোঽধ্যায়ঃ

ভীমসেন উবাচ। তথা ভদ্রে করিষ্যামি যথা ত্বং ভীরু ভাষসে। অদ্য তং সূদয়িষ্যামি কীচকং সহবান্ধবম্॥ অস্যাঃ প্রদোষে শর্ব্বর্য্যাঃ কুরুষ্বানেন সঙ্গতম্। দুঃখং শোকঞ্চ নির্দ্ধূয় যাজ্ঞসেনি শুচিস্মিতে॥ যৈষা নর্ত্তনশালেহ

মৎস্যরাজেন কারিতা। দিবাত্র কন্যা নৃত্যন্তি রাত্রৌ যান্তি যথাগৃহম্॥ তত্রাস্তি শয়নং দিব্যং দৃঢ়াঙ্গং সুপ্রতিষ্ঠিতম্। তত্রাস্য দর্শয়িষ্যামি পূর্ব্বপ্রেতান্ পিতামহান্॥ যথা চ ত্বাং ন পশ্যেয়ুঃ কুর্ব্বাণাং তত্র সংবিদম্। কুর্য্যাস্তথা ত্বং কল্যাণি যথা সন্নিহিতো ভবেৎ॥

বৈশম্পায়ন উবাচ। তথা তৌ কথয়িত্বা তু বাষ্পমুৎসৃজ্য দুঃখিতৌ। রাত্রিশেষং তমত্যুগ্রং ধারয়ামাসতুর্হৃদা॥ তস্যাং রাত্র্যাং ব্যতীতায়াং প্রাতরুত্থায় কীচকঃ। গত্বা রাজকুলায়ৈব দ্রৌপদীমিদমব্রবীৎ॥ সভায়াং পশ্যতো রাজ্ঞঃ পাতয়িত্বা পদাহনম্। ন চৈবালভসে ত্রাণমভিপন্না বলীয়সা॥ প্রবাদেনেহ মৎস্যানাং রাজা নাম্নায়মুচ্যতে। অহমেব হি মৎস্যানাং রাজা বৈ বাহিনীপতিঃ॥ সা [মাং] সুখং প্রতিপদ্যস্ব দাসো ভীরু ভবামি তে। অহ্নায় [আজ্ঞয়া] তব সুশ্রোণি শতং নিষ্কং দদাম্যহম্॥ দাসীশতঞ্চ তে দদ্যাং দাসানামপি চাপরম্। রথঞ্চাশ্বতরীযুক্তমস্তু নৌ ভীরু সঙ্গমঃ॥

দ্রৌপদ্যুবাচ। এবং মে সময়ন্ত্বদ্য প্রতিপদ্যস্ব কীচক। ন ত্বাং সখা বা ভ্রাতা বা জানীয়াৎ সঙ্গতং ময়া॥ অববোধাদ্ধি ভীতাস্মি গন্ধর্ব্বাণাং যশস্বিনাম্। এবং মে প্রতিজানীহি ততোঽহং বশগা তব॥

কীচক উবাচ। এবমেতৎ করিষ্যামি যথা সুশ্রোণি ভাষসে। একো ভদ্রে গমিষ্যামি শূন্যমাবসথং তব॥ সমাগমার্থং রম্ভোরু ত্বয়া মদনমোহিতঃ। যথা ত্বাং নাবভোৎস্যন্তি গন্ধর্ব্বাঃ সূর্য্যবর্চ্চসঃ॥

দ্রৌপদ্যুবাচ। যদেতন্নর্ত্তনাগারং মৎস্যরাজেন কারিতম্। দিবাত্র কন্যা নৃত্যন্তি রাত্রৌ যান্তি যথাগৃহম্॥ তমিস্রে তত্র গচ্ছেথা গন্ধর্ব্বাস্তন্ন জানতে। তত্র দোষঃ পরিহৃতো ভবিষ্যতি ন সংশয়ঃ॥

বৈশম্পায়ন উবাচ। তমর্থমভিজল্পন্ত্যাঃ কৃষ্ণায়াঃ কীচকেন হি। দিবসার্দ্ধং সমভবন্মাসেনৈব সমং নৃপ॥ ততঃ সা ভীমসেনস্য তমর্থং প্রত্যবেদয়ৎ। কীচকোঽথ গৃহং গত্বা ভৃশং হর্ষসমন্বিতঃ॥ সৈরন্ধ্রীরূপিণং মৃত্যুং মূঢ়স্তন্নাববুদ্ধবান্॥ গন্ধাভরণমাল্যেষু ব্যাসক্তঃ স বিশেষতঃ। অলঞ্চক্রে তদাত্মানং সত্বরং কামমোহিতঃ॥ তস্য তৎ কুর্ব্বতঃ কর্ম্ম কালো দীর্ঘ ইবাভবৎ। অনুচিন্তয়তশ্চাপি তামেবায়তলোচনাম্। আসীদভ্যধিকা চাপি শ্রীঃ শ্রিয়ং প্রমুমুক্ষতঃ। নির্ব্বাণকালে দীপস্য বর্ত্তীমিব দিধক্ষতঃ। কৃতসংপ্রত্যয়স্তস্যাঃ কীচকঃ কামমোহিতঃ। নাজানাদ্দিবসং যান্তং চিন্তয়ানঃ সমাগমম্॥ ততস্তু দ্রৌপদী গত্বা তদা ভীমং মহানসে। উপাতিষ্ঠত কল্যাণী কৌরব্যং

পতিমন্তিকে ॥ তমুবাচ সুকেশান্তা কীচকস্য ময়া কৃতঃ। সঙ্গমো নর্ত্তনাগারে যথাবোচঃ পরন্তপ ॥ শূন্যং স নর্ত্তনাগারমাগমিষ্যতি কীচকঃ। একো নিশি মহাবাহো কীচকং তং নিসূদয় ॥ তং সূতপুত্রং কৌন্তেয় কীচকং মদদর্পিতম্। গত্বা তন্নর্ত্তনাগারং নির্জীবং কুরু পাণ্ডব ॥ দর্পাচ্চ সূতপুত্রোঽসৌ গন্ধর্ব্বানবমন্যতে। তং ত্বং প্রহরতাং শ্রেষ্ঠ কন্দং নাগ ইবোদ্ধর ॥ অশ্রু দুঃখাভিভূতায়া মম মার্জ্জস্ব ভারত। আত্মনশ্চৈব ভদ্রন্তে কুরু মানং কুলস্য চ ॥

ভীম উবাচ। এবং করোম্যহং ভদ্রে যথা ত্বং ভীরু ভাষসে। স্বাগতং তে বরারোহে যন্মাং বেদয়সে প্রিয়ম্ ॥ ন হ্যন্যং কঞ্চিদিচ্ছামি সহায়ং বরবর্ণিনি। যা মে প্রীতিস্ত্বয়াখ্যাতা কীচকস্য সমাগমে। হত্বা হিড়িম্বং সা প্রীতির্মমাসীদ্বরবর্ণিনি ॥ সত্যং ভ্রাতৃংশ্চ ধর্ম্মঞ্চ পুরস্কৃত্য ব্রবীমি তে। কীচকং নিহনিষ্যামি বৃত্রং দেবপতির্যথা। তং গহ্বরে প্রকাশে বা পোথয়িষ্যামি কীচকম্ ॥ অথ চেদপি যোৎস্যন্তি হিংস্তে মৎস্যানপি ধ্রুবম্। ততো দুর্য্যোধনং হত্বা প্রতিপৎস্যে বসুন্ধরাম্ ॥ কামং মৎস্যমুপাস্তাং হি কুন্তীপুত্রো যুধিষ্ঠিরঃ ॥

দ্রৌপদ্যুবাচ। যথা ন সংত্যজেথাস্ত্বং সত্যং বৈ মৎকৃতে বিভো। নিগূঢ়স্ত্বং তথা ( মহা ) বীর কীচকং তং নিসূদয় ॥

ভীমসেন উবাচ। এবমেতৎ করিষ্যামি যথা ত্বং ভীরু ভাষসে। অদ্য তং সূদয়িষ্যামি কীচকং সহ বান্ধবৈঃ ॥ অদৃশ্যমানস্তস্যাস্য তমস্বিন্যামনিন্দিতে। নাগো বিল্বমিবাক্রম্য পোথয়িষ্যাম্যহং শিরঃ। অলভ্যামিচ্ছতস্তস্য কীচকস্য দুরাত্মনঃ ॥

বৈশম্পায়ন উবাচ। ভীমোঽথ প্রথমং গত্বা রাত্রৌ চ্ছন্ন উপাবিশৎ। মৃগং হরিরিবাদৃশ্যঃ প্রত্যাকাঙ্ক্ষত কীচকম্ ॥ কীচকশ্চাপ্যলঙ্কৃত্য যথাকামমুপাগমৎ। তাং বেলাং নর্ত্তনাগারং পাঞ্চালীসঙ্গমাশয়া ॥ মন্যমানঃ স সঙ্কেতমাগারং প্রাবিশত্ততঃ। প্রবিশ্য চ স তদ্বেশ্ম তমসা সংবৃতং মহৎ ॥ পূর্ব্বাগতং গতস্তত্র ভীমমপ্রতিমৌজসম্। একান্তাবস্থিতঞ্চৈনমাসসাদ সুদুর্ম্মতিঃ ॥ শয়ানং শয়নে তত্র সূতপুত্রঃ পরামৃষৎ। [ পতঙ্গং পাবকং দীপ্তং সিংহং ক্ষুদ্রপশুর্যথা ] জাজ্বল্যমানং কোপেন কৃষ্ণাধর্ষণজেন হ ॥ উপসঙ্গম্য চৈবৈনং কীচকঃ কামমোহিতঃ। হর্ষোন্মথিতচিত্তাত্মা স্ময়মানোঽভ্যভাষত ॥ প্রাপিতন্তে ময়া বিত্তং বহুরূপমনন্তকম্। যৎকৃতং ধনরত্নাঢ্যং দাসীশতপরিচ্ছদম্ ॥ রূপলাবণ্যযুক্তাভির্যুবতীভিরলঙ্কৃতম্। গৃহং চান্তঃপুরং সুভ্রু ক্রীড়ারতিবিরাজিতম্ ॥ তৎ

সর্ব্বং ত্বাং সমুদ্দিশ্য সহসা সমুপাগতঃ। অকস্মাম্মাং প্রশংসন্তি সদা গৃহগতাঃ স্ত্রিয়ঃ॥ সুবাসা দর্শনীয়শ্চ নান্যোঽস্তি ত্বাদৃশঃ পুমান্॥

ভীমসেন উবাচ। দিষ্ট্যা ত্বং দর্শনীয়শ্চ দিষ্ট্যাত্মানং প্রশংসসি। ঈদৃশস্তু ত্বয়া স্পর্শঃ স্পৃষ্টপূর্ব্বো ন কর্হিচিৎ॥ স্পর্শং বেৎসি বিদগ্ধস্ত্বং কামধর্ম্মবিচক্ষণঃ। স্ত্রীণাং প্রীতিকরো নান্যস্ত্বৎসমঃ পুরুষস্ত্বিহ॥

বৈশম্পায়ন উবাচ। ইত্যুক্ত্বা তং মহাবাহুর্ভীমো ভীমপরাক্রমঃ। সহসোৎপত্য কৌন্তেয়ঃ প্রহস্যোবাচ কীচকম্॥ অদ্য ত্বাং ভগিনী পাপং কৃষ্যমাণং ময়া ভুবি। দ্রক্ষ্যতেঽদ্রিপ্রতীকাশং সিংহেনেব মহাদ্বিপম্॥ নিরাবাধা ত্বয়ি হতে সৈরন্ধ্রী বিচরিষ্যতি। সুখমেব চরিষ্যন্তি সৈরন্ধ্র্যাঃ পতয়ঃ সদা॥ ততো জগ্রাহ কেশেষু মাল্যবৎসু মহাবলঃ। স কেশেষু পরামৃষ্টো বলেন বলিনাং বরঃ। আক্ষিপ্য কেশান্ বেগেন বাহ্বোর্জগ্রাহ পাণ্ডবম্॥ বাহুযুদ্ধং তয়োরাসীৎ ক্রুদ্ধয়োর্নরসিংহয়োঃ। বসন্তে বাসিতাহেতোর্বলবদ্গজয়োরিব॥ কীচকানাঞ্চ মুখ্যস্য নরাণামুত্তমস্য চ। অন্যোন্যমভিসংরব্ধৌ পরস্পরজয়ৈষিণৌ॥ বালিসুগ্রীবয়োর্ভ্রাত্রোঃ পুরেব কপিসিংহয়োঃ॥ ততঃ সমুদ্যম্য ভুজৌ পঞ্চশীর্ষাবিবোরগৌ। নখদংষ্ট্রাভিরন্যোঽন্যং জঘ্নতুঃ ক্রোধমূর্চ্ছিতৌ॥ বেগেনাভিহতো ভীমঃ কীচকেন বলীয়সা। স্থিরপ্রতিজ্ঞঃ স রণে পদান্ন চলিতঃ পদম্॥ তাবন্যোন্যং সমাশ্লিষ্য প্রকর্ষন্তৌ পরস্পরম্। উভাবপি প্রকাশেতে প্রবৃদ্ধৌ বৃষভাবিব॥ তয়োর্হ্যাসীৎ সুতুমুলঃ সম্প্রহারঃ সুদারুণঃ। নখদংষ্ট্রায়ুধবতোর্ব্যাঘ্রয়োরিব দৃপ্তয়োঃ॥ অভিপত্যাথ বাহুভ্যাং প্রত্যগৃহ্লাদমর্ষিতঃ। মাতঙ্গ ইব মাতঙ্গং প্রভিন্নকরটামুখম্॥ স চাপ্যেনং তদা ভীমঃ প্রতিজগ্রাহ বীর্য্যবান্। তমাক্ষিপৎ কীচকোঽথ বলেন বলিনাং বরঃ॥ তয়োর্ভুজবিনিষ্পেষাদুভয়োর্বলিনোস্তদা। শব্দঃ সমভবদ্ঘোরো বেণুস্ফোটসমো যুধি॥ অথৈনমাক্ষিপ্য বলাদ্গৃহমধ্যে বৃকোদরঃ। ধূনয়ামাস বেগেন বায়ুশ্চণ্ড ইব দ্রুমম্॥ ভীমেন চ পরামৃষ্টো দুর্ব্বলো বলিনা রণে। ব্যকম্পত যথাপ্রাণং বিচকর্ষ চ পাণ্ডবম্॥ ঈষদাকলিতঞ্চাপি ক্রোধাচ্চল[ দ্রুত ]পদে স্থিতম্। কীচকো বলবান্ ভীমং জানুভ্যামাক্ষিপদ্ভুবি॥ পাতিতো ভুবি ভীমস্তু কীচকেন বলীয়সা। উৎপপাতাথ বেগেন দণ্ডপাণিরিবান্তকঃ॥ স্পর্দ্ধয়া চ বলোন্মত্তৌ তাবুভৌ সূতপাণ্ডবৌ। নিশীথে পর্য্যকর্ষেতাং বলিনৌ নির্জ্জনে স্থলে॥ ততস্তদ্ভবনশ্রেষ্ঠং প্রাকম্পত মুহুর্মুহুঃ। বলবচ্চাপি সংক্রুদ্ধাবন্যোঽন্যং [ প্রতিগর্জ্জতঃ ] তাবগর্জ্জতাম্॥ তলাভ্যাং স তু ভীমেন বক্ষস্যভিহতো বলী।

কীচকো রোষসন্তপ্তঃ পদান্ন চলিতঃ পদম্॥ স মুহূর্ত্তস্তু তদ্বেগং সহিত্বা ভুবি দুঃসহম। বলাদহীয়ত তদা সূতো ভীমবলার্দ্দিতঃ॥ তং হীয়মানং বিজ্ঞায় ভীমসেনো মহাবলঃ। বক্ষস্থানীয় বেগেন মমর্দ্দৈনং বিচেতসম্॥ ক্রোধাবিষ্টো বিনিশ্বস্য পুনশ্চৈনং বৃকোদরঃ। জগ্রাহ জয়তাং শ্রেষ্ঠঃ কেশেষেব তদা ভৃশম্॥ গৃহীত্বা কীচকং ভীমো বিরুরাব মহাবলঃ। শার্দ্দূলঃ পিশিতাকাঙ্ক্ষী গৃহীত্বেব মহামৃগম্॥ তত এনং পরিশ্রান্তমুপলভ্য বৃকোদরঃ। যো[illegible]য়ামাস বাহুভ্যাং পশুং রসনয়া যথা॥ নদন্তঞ্চ মহানাদং ভিন্নভেরীসমস্বনম্। ভ্রাময়ামাস সুচিরং বিস্ফুরন্তমচেতসম্॥ প্রগৃহ্য তরসা দোর্ভ্যাং কণ্ঠং তস্য বৃকোদরঃ। অপীড়য়ত কৃষ্ণায়াস্তদা কোপোপশান্তয়ে॥ অথ তং ভগ্নসর্ব্বাঙ্গং ব্যাবিদ্ধনয়নাম্বরম্। আক্রম্য চ কটীদেশে জানুনা কীচকাধমম্॥ অপীড়য়ত বাহুভ্যাং পশুমারমমারয়ৎ॥ তং বিষীদন্তমাজ্ঞায় কীচকং পাণ্ডুনন্দনঃ। ভূতলে ভ্রাময়ামাস বাক্যঞ্চেদমুবাচ হ॥ অদ্যাহমনৃণো ভূত্বা ভ্রাতুর্ভার্য্যাপহারিণম্। শান্তিং লব্ধোঽস্মি পরমাং হত্বা সৈরন্ধ্রিকণ্টকম্॥ ইত্যেবমুক্ত্বা পুরুষপ্রবীরস্তং কীচকং ক্রোধ-সরাগনেত্রঃ। অস্রস্তবস্ত্রাভরণস্ফুরন্তমুদ্‌ভ্রান্তনেত্রং ব্যসুমুৎসসর্জ্জ॥ নিষ্পিষ্য পাণিনা পাণিং সন্দষ্টৌষ্ঠপুটো বলী। সমাক্রম্য চ সংক্রুদ্ধো বলেন বলিনাং বরঃ॥ [অভ্যহনন্মহাবাহুঃ পাদাষ্ঠীনৈস্য দারুণৈঃ॥] তস্য পাদৌ চ পাণী চ শিরো গ্রীবাঞ্চ সর্ব্বশঃ। কায়ে প্রবেশয়ামাস পশোরিব পিনাকধৃক্॥ তং সম্মথিতসর্ব্বাঙ্গং মাংসপিণ্ডোপমং কৃতম্। কৃষ্ণায়া দর্শয়ামাস ভীমসেনো মহাবলঃ॥ উবাচ চ মহাতেজা দ্রৌপদীং যোষিতাং বরাম্। পশ্যৈনমেহি পাঞ্চালি কামুকোঽয়ং যথাকৃতঃ॥ এবমুক্ত্বা মহাতেজা ভীমো ভীমপরাক্রমঃ। পাদেন পীড়য়ামাস তস্য কায়ং দুরাত্মনঃ॥ ততোঽগ্নিং তত্র প্রজ্বাল্য দর্শয়িত্বা চ কীচকম্। পাঞ্চালীং স তদা বীর ইদং বচনমব্রবীৎ॥ প্রার্থয়ন্তি সুকেশান্তে যে ত্বাং গুণসমন্বিতাম্। এবং তে ভীরু বধ্যন্তে কীচকঃ শোভতে যথা॥ তৎ কৃত্বা দুষ্করং কর্ম্ম কৃষ্ণায়াঃ প্রিয়মুত্তমম্। তথা স কীচকং হত্বা গত্বা রোষস্য বৈ শমম্। আমন্ত্র্য দ্রৌপদীং কৃষ্ণাং ক্ষিপ্রমায়ান্মহানসম্॥ কীচকং ঘাতয়িত্বা চ দ্রৌপদী যোষিতাং বরা। প্রহৃষ্টা গতসন্তাপা সভাপালানুবাচ হ॥ কীচকোঽয়ং হতঃ শেতে গন্ধর্ব্বৈঃ পতিভির্মম। পরস্ত্রীকামসম্মত্তঃ সমাগচ্ছত পশ্যত॥ তচ্ছ্রুত্বা ভাষিতং তস্যা নর্ত্তনাগাররক্ষিণঃ। সহসৈব সমাজগ্মুরাদায়োল্কাঃ সহস্রশঃ॥ ততো গত্বাথ তদ্বেশ্ম কীচকং বিনিপাতিতম্। গতাসুং দদৃশুর্ভূমৌ রুধিরেণ সমুক্ষিতম্॥ পাণিপাদবিহীনং তং দৃষ্ট্বা তে

ব্যথিতাভবন্। ততো ভয়ং যযুঃ সর্ব্বে সায়ুধা ভরতর্ষভ ॥ অথৈনং হৃষ্টরোমাণো বিস্মিতাঃ প্রেক্ষ্য কীচকম্। নিরীক্ষন্তে ততঃ সর্ব্বে পরং বিস্ময়মাগতাঃ ॥ অমানুষং কৃতং কর্ম্ম তং দৃষ্ট্বা বিনিপাতিতম্। ক্বাস্য গ্রীবা ক্ব চরণৌ ক্ব পাণী ক্ব শিরস্তথা। ইতি [ সত্যং পরীক্ষন্তে ] তাং পর্য্যপৃচ্ছন্তং গন্ধর্ব্বেণ হতং তদা।

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং
বিরাটপর্ব্বণি কীচকবধে দ্বাবিংশতিতমোঽধ্যায়ঃ।

---

## ত্রয়োবিংশোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। তস্মিন্ কালে সমাগম্য সর্ব্বে তত্রাস্য বান্ধবাঃ। রুরুদুঃ কীচকং দৃষ্ট্বা পরিবার্য্য সমন্ততঃ ॥ সর্ব্বে সংহৃষ্টরোমাণঃ সন্ত্রস্তাঃ প্রেক্ষ্য কীচকম্। তথা সম্ভিন্নসর্ব্বাঙ্গং কূর্ম্মং স্থল ইবোদ্ধৃতম্ ॥ প্রোথিতং ভীমসেনেন তমিন্দ্রেণেব দানবম্। সংস্কারয়িতুমিচ্ছন্তো বহির্নেতুং প্রচক্রমুঃ ॥ দদৃশুস্তে ততঃ কৃষ্ণাং সূতপুত্রাঃ সমাগতাঃ। অদূরাচ্চানবদ্যাঙ্গীং স্তম্ভমালিঙ্গ্য তিষ্ঠতীম্ ॥ সমবেতেষু সর্ব্বেষু তামূচুরুপকীচকাঃ। হন্যতাং শীঘ্রমসতী যৎকৃতে কীচকো হতঃ ॥ অথবা নৈব হন্তব্যা দহ্যতাং কামিনা সহ। মৃতস্যাপি প্রিয়ং কার্য্যং সূতপুত্রস্য সর্ব্বথা ॥ ততো বিরাটমূচুস্তে কীচকোঽস্যাঃ কৃতে হতঃ। সহানয়ৈব দহেম তদনুজ্ঞাতুমর্হসি ॥ পরাক্রমন্তু সূতানাং মত্বা রাজান্বমোদত। সৈরন্ধ্র্যাঃ সূতপুত্রেণ সহ দাহং বিশাম্পতে ॥ তাং সমাসাদ্য বিত্রস্তাং কৃষ্ণাং কমললোচনাম্। মোমুহ্যমানাং তে তত্র জগৃহুঃ কীচকা ভৃশম্ ॥ ততস্তু তাং সমারোপ্য নিবধ্য চ সুমধ্যমাম্। জগ্মুরুদ্যম্য তে সর্ব্বে শ্মশানাভিমুখাস্তদা ॥ হ্রিয়মাণা তু সা রাজন্ সূতপুত্রৈরনিন্দিতা। প্রাক্রোশন্নাথমিচ্ছন্তী কৃষ্ণা নাথবতী সতী ॥

দ্রৌপদ্যুবাচ। জয়ো জয়ন্তো বিজয়ো জয়ৎসেনো জয়দ্বলঃ। তে মে বাচং বিজানন্তু সূতপুত্রা নয়ন্তি মাম্ ॥ যেষাং জ্যাতলনির্ঘোষো বিস্ফূর্জ্জিতমিবাশনেঃ। ব্যশ্রূয়ত মহাযুদ্ধে ভীমঘোষস্তরস্বিনাম্ ॥ রথঘোষশ্চ বলবান্ গন্ধর্ব্বাণাং মনস্বিনাম্। তে মে বাচং বিজানন্তু সূতপুত্রা নয়ন্তি মাম্ ॥

বৈশম্পায়ন উবাচ। তস্যাস্তাঃ কৃপণা বাচঃ কৃষ্ণায়াঃ পরিদেবিতাঃ। শ্রুত্বৈবাভ্যপতদ্ভীমঃ শয়নাদবিচারয়ন্ ॥

ভীম উবাচ। অহং শৃণোমি তে বাচং ত্বয়া সৈরন্ধ্রি ভাষিতাম্। তস্মাত্তে সূতপুত্রেভ্যো ন ভয়ং ভীরু বিদ্যতে॥

বৈশম্পায়ন উবাচ। ইত্যুক্ত্বা স মহাবাহুর্বিজজৃম্ভে জিঘাংসয়া। ততঃ সব্যায়তং কৃত্বা বেশং বিপরিবর্ত্ত্য চ। অদ্বারেণাভ্যবস্কন্দ্য নির্জগাম বহিস্তদা॥ স ভীমসেনঃ প্রাকারমারুহ্য তরসা দ্রুতম্। শ্মশানাভিমুখঃ প্রায়াদ্ যত্র তে কীচকা গতাঃ॥ স লঙ্ঘয়িত্বা প্রাকারং নিঃসৃত্য চ পুরোত্তমাৎ। জবেন পতিতো ভীমঃ সূতানামগ্রতস্তদা॥ চিতাসমীপে গত্বা স তত্রাপশ্যদ্বনস্পতিম্। তালমাত্রং মহাস্কন্ধমূর্দ্ধশুষ্কং বিশাম্পতে॥ তং নাগবদুপাক্রম্য বাহুভ্যাং পরিরভ্য চ। স্কন্ধমারোপয়ামাস দশব্যামং পরন্তপঃ॥ স তং বৃক্ষং দশব্যামং সস্কন্ধবিটপং বলী। প্রগৃহ্যাভ্যদ্রবৎ সূতান্ দণ্ডপাণিরিবান্তকঃ। ঊরুবেগেন তস্যাথ ন্যগ্রোধাশ্বত্থকিংশুকাঃ। ভূমৌ নিপতিতা বৃক্ষাঃ সঙ্ঘশস্তত্র শেরতে॥ তং সিংহমিব সংক্রুদ্ধং দৃষ্ট্বা গন্ধর্ব্বমাগতম্। বিত্রেসুঃ সর্ব্বশঃ সূতা বিষাদভয়-কম্পিতাঃ॥ তমন্তকমিবায়ান্তং গন্ধর্ব্বং প্রেক্ষ্য তে তদা। দিধক্ষন্তস্তদা জ্যেষ্ঠং ভ্রাতরং হ্যুপকীচকাঃ॥ পরস্পরমথোচুস্তে বিষাদভয়কর্ষিতাঃ। গন্ধর্ব্বো বলবানেতি ক্রুদ্ধ উদ্যম্য পাদপম্। সৈরন্ধ্রি মুচ্যতাং শীঘ্রং যতো নো ভয়মাগতম্॥ তে তু দৃষ্ট্বা তদাবিদ্ধং ভীমসেনেন পাদপম্। বিমুচ্য দ্রৌপদীং তত্র প্রাদ্রবন্নগরং প্রতি॥ দ্রবতস্তাংস্তু সংপ্রেক্ষ্য স বজ্রী দানবানিব। [বৃক্ষেণ তেন রাজেন্দ্র প্রভঞ্জনসুতো বলী।] শতং পঞ্চাধিকং ভীমঃ প্রাহিণোদ্ যমসাদনম্॥ তত আশ্বাসয়ৎ কৃষ্ণাং পরিমুচ্য বিশাম্পতে। উবাচ চ মহাবাহুঃ পাঞ্চালীং পাণ্ডুনন্দনঃ। অশ্রুপূর্ণমুখীং দীনাং দুর্দ্ধর্ষঃ স বৃকোদরঃ॥ এবং তে ভীরু বধ্যন্তে যে ত্বাং ক্লিশ্যন্ত্যনাগসম্। প্রৈহি ত্বং নগরং কৃষ্ণে ন ভয়ং বিদ্যতে তব॥ অন্যেনাহং গমিষ্যামি বিরাটস্য মহানসম্॥

বৈশম্পায়ন উবাচ। পঞ্চাধিকং শতং তচ্চ নিহতং তত্র ভারত। মহাবনমিব ছিন্নং শিশ্যে বিগলিতদ্রুমম্॥ এবং তে নিহতা রাজঞ্শতং পঞ্চ চ কীচকাঃ। স চ সেনাপতিঃ পূর্ব্বমিত্যেতৎ সূত-ষট্‌শতম্॥ তদ্দৃষ্ট্বা মহদা-শ্চর্য্যং নরা নার্য্যশ্চ সঙ্গতাঃ। বিস্ময়ং পরমং গত্বা নোচুঃ কিঞ্চন ভারত॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি
উপকীচকবধো নাম ত্রয়োবিংশতিতমোঽধ্যায়ঃ।

## চতুর্বিবংশোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। তান্ দৃষ্ট্বা নিহতান্ সূতান্ রাজ্ঞে পৌরা ন্যবেদয়ন্। গন্ধর্বৈর্নিহতা রাজন্ সূতপুত্রা মহাবলাঃ॥ যথা বজ্রেণ বৈ দীর্ণং পর্বতস্য মহচ্ছিরঃ। বিনিকীর্ণাঃ প্রদৃশ্যন্তে তথা সূতা মহীতলে॥ সৈরন্ধ্রী চ বিমুক্তা সা পুনরায়াতি তে গৃহম্। সর্ব্বং সংশয়িতং রাজন্নগরং তে ভবিষ্যতি॥ যথারূপা হি সৈরন্ধ্রী গন্ধর্ব্বাশ্চ মহাবলাঃ। পুংসামিষ্টশ্চ বিষয়ো মৈথুনায় ন সংশয়ঃ॥ যথা সৈরন্ধ্রীদোষেণ ন তে রাজন্নিদং পুরম্। বিনাশমেতি বৈ ক্ষিপ্রং তথা নীতির্বিধীয়তাম্॥ তেষাং তদ্বচনং শ্রুত্বা বিরাটো বাহিনীপতিঃ। অব্রবীৎ ক্রিয়তামেষাং সূতানাং চরমক্রিয়া॥ একস্মিন্নেব তে সর্ব্বে সুসমিদ্ধে হুতাশনে। দহ্যন্তাং কীচকাঃ শীঘ্রং গন্ধৈর্মাল্যৈশ্চ সর্ব্বশঃ॥ সুদেষ্ণাঞ্চাব্রবীদ্রাজা মহিষীং জাতসাধ্বসঃ। সৈরন্ধ্রীমাগতাং ব্রূয়া মমৈব বচনাদিদম্॥ গচ্ছ সৈরন্ধ্রি ভদ্রন্তে যথাকামং বরাননে। রাজা বিভেতি সুশ্রোণি গন্ধর্ব্বেভ্যঃ পরাভবাৎ॥ ন হি ত্বামুৎসহে বক্তুং স্বয়ং গন্ধর্ব্বরক্ষিতাম্। স্ত্রিয়াস্ত্বদোষস্তাং বক্তুমতস্ত্বাং প্রব্রবীম্যহম্॥

বৈশম্পায়ন উবাচ। অথ মুক্তা ভয়াৎ কৃষ্ণা সূতপুত্রান্নিরস্য চ। মোক্ষিতা ভীমসেনেন জগাম নগরং প্রতি॥ ত্রাসিতেব মৃগী বালা শার্দ্দূলেন যশস্বিনী। গাত্রাণি বাসসী চৈব প্রক্ষাল্য সলিলেন সা॥ তাং দৃষ্ট্বা পুরুষা রাজন্ প্রাদ্রবন্ত দিশো দশ। গন্ধর্ব্বাণাং ভয়ত্রস্তাঃ কেচিদ্দৃষ্টীর্ন্যমীলয়ন্॥ ততো মহানসদ্বারি ভীমসেনমবস্থিতম্। দদর্শ রাজন্ পাঞ্চালী যথা মত্তং মহাদ্বিপম্॥ তং বিস্ময়ন্তী শনকৈঃ সংজ্ঞাভিরিদমব্রবীৎ। গন্ধর্ব্বরাজায় নমো যেনাস্মি পরিমোক্ষিতা॥

ভীমসেন উবাচ। যে পুরা বিচরন্তীহ পুরুষা বশবর্ত্তিনঃ। তবৈতে বচনং শ্রুত্বা হ্যনৃণা বিচরন্ত্যত॥

বৈশম্পায়ন উবাচ। ততঃ সা নর্ত্তনাগারে ধনঞ্জয়মপশ্যত। রাজ্ঞঃ কন্যা বিরাটস্য নর্ত্তয়ানং মহাভুজম্॥ ততস্তা নর্ত্তনাগারাদ্বিনিষ্ক্রম্য সহার্জ্জুনাঃ। কন্যা দদৃশুরায়ান্তীং কৃষ্ণাং ক্লিষ্টামনাগসম্॥

কন্যা ঊচুঃ। দিষ্ট্যা সৈরন্ধ্রি মুক্তাসি দিষ্ট্যাসি পুনরাগতা। দিষ্ট্যা বিনিহতাঃ সূতা যে ত্বাং ক্লিশ্যন্ত্যনাগসম্॥

বৃহন্নলোবাচ। কথং সৈরন্ধ্রি মুক্তাসি কথং পাপাশ্চ তে হতাঃ। ইচ্ছামি বৈ তব শ্রোতুং সর্ব্বমেতদ্‌যথাতথম্॥

সৈরন্ধ্রী উবাচ। বৃহন্নলে কিন্নু তব সৈরন্ধ্র্যা কার্য্যমস্ত বৈ। যা ত্বং বসসি কল্যাণি সদা কন্যাপুরে সুখম্॥ ন হি দুঃখং সমাপ্নোষি সৈরন্ধ্রী যদুপাশ্নুতে। তেন মাং দুঃখিতামেবং পৃচ্ছসে প্রহসন্নিব॥

বৃহন্নলোবাচ। বৃহন্নলাপি কল্যাণি দুঃখমাপ্নোত্যনুত্তমম্। তির্য্যগ্-যোনিগতা বালে ন চৈনামববুধ্যসে॥ ত্বয়া সহোষিতা চাস্মি ত্বঞ্চ সর্ব্বৈঃ [ ত্বঞ্চ সর্ব্বেষু ভূষিতা ] সহোষিতা। ক্লিশ্যন্ত্যাং ত্বয়ি সুশ্রোণি কো নু দুঃখং ন বিন্দতি॥ ন তু কেনচিদত্যন্তং কস্যচিদ্ হৃদয়ং ক্বচিৎ। বেদিতুং শক্যতে নূনং যেন মাং নাববুধ্যসে॥

বৈশম্পায়ন উবাচ। ততঃ সহৈব কন্যাভির্দ্রৌপদী রাজবেশ্ম তৎ। প্রবিবেশ সুদেষ্ণায়াঃ সমীপং গজগামিনী॥ তামব্রবীদ্রাজপত্নী বিরাট-বচনাদিদম্। সৈরন্ধ্রি গম্যতাং শীঘ্রং যত্র কাময়সে গতিম্॥ রাজা বিভেতি ভদ্রস্তে গন্ধর্ব্বেভ্যঃ পরাভবাৎ। ত্বঞ্চাপি তরুণী সুভ্রু রূপেণাপ্রতিমা ভুবি॥ পুংসামিষ্টশ্চ বিষয়ো গন্ধর্ব্বাশ্চাতিকোপনাঃ॥

সৈরন্ধ্রী উবাচ। ত্রয়োদশাহমাত্রং মে রাজা ক্ষাম্যতু ভামিনি। কৃতকৃত্যা ভবিষ্যন্তি গন্ধর্ব্বাস্তে ন সংশয়ঃ॥ ততো মামুপনেষ্যন্তি করিষ্যন্তি চ তে প্রিয়ম্। ধ্রুবঞ্চ শ্রেয়সা রাজা যোক্ষ্যতে সহ বান্ধবৈঃ॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি কীচকবধসমাপ্তির্নাম চতুর্ব্বিংশতিতমোঽধ্যায়ঃ।

## অথ গোহরণপর্ব্ব

### পঞ্চবিংশোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। কীচকস্য নিপাতেন সানুজস্য বিশাম্পতে। অত্যাহিতং চিন্তয়িত্বা ব্যস্ময়ন্ত পৃথগ্জনাঃ॥ তস্মিন্ পুরে জনপদে সঞ্জল্পো-ঽভূচ্চ সর্ব্বশঃ। শৌর্য্যাদ্ধি বল্লভো রাজ্ঞো মহাসত্ত্বশ্চ কীচকঃ॥ আসীৎ প্রহর্ত্তা চ নৃণাং দারামর্ষী চ দুর্ম্মতিঃ। স হতঃ খলু পাপাত্মা গন্ধর্ব্বৈর্দুষ্টপূরুষঃ॥ ইত্যজল্পন্মহাভাগ পরানীকবিনাশনম্। দেশে দেশে মনুষ্যাশ্চ কীচকং দুষ্প্রধর্ষণম্॥ অথ বৈ ধার্ত্তরাষ্ট্রেণ প্রযুক্তা যে বহিশ্চরাঃ। মৃগয়িত্বা বহূন্ গ্রামান্ রাষ্ট্রাণি বিবিধানি চ॥ সংবিধায় যথাদৃষ্টং যথাদেশপ্রবেশনম্।

কৃতকৃত্যা ন্যবর্ত্তন্ত তে বৈ নাগপুরং প্রতি॥ তত্র দৃষ্টা চ রাজানং কৌরব্যং ধৃতরাষ্ট্রজম্। দ্রোণকর্ণকৃপৈঃ সার্দ্ধং ভীষ্মেণ চ মহাত্মনা॥ সঙ্গতং ভ্রাতৃভিশ্চাপি ত্রিগর্ত্তৈশ্চ মহারথৈঃ। দুর্য্যোধনং সভামধ্যে আসীনমিদমব্রুবন্।

চরা উচুঃ। কৃতোঽস্মাভিঃ পরো যত্নস্তেষামন্বেষণে সদা। পাণ্ডবানাং মনুষ্যেন্দ্র তস্মিন্মহতি কাননে॥ নির্জ্জনে মৃগসঙ্কীর্ণে নানাদ্রুমলতাবৃতে। লতাপ্রতানবহুলে নানাগুল্মসমাকুলে॥ ন চ বিদ্মো গতা যেন পাণ্ডবা দৃঢ়বিক্রমাঃ। মার্গমাণাঃ পদন্যাসং তেষু তেষু তথা তথা॥ গিরিকূটেষু দুর্গেষু নানাজনপদেষু চ। জনাকীর্ণেষু দেশেষু [ক] খর্বটেষু পুরেষু চ॥ নরেন্দ্র বহুশোঽন্বিষ্টা নৈব বিদ্মশ্চ পাণ্ডবান্। অত্যন্তভাবং নষ্টাস্তে ভদ্রং তুভ্যং নরর্ষভ॥ (ন হি বিদ্মো গতিস্তেষাং বাসঞ্চাপি হি সত্তম।) বর্ত্মস্বন্বিষ্যমাণাশ্চ রথিনাং রথিসত্তম॥ কঞ্চিৎ কালং মনুষ্যেন্দ্র সূতানামনুগা বয়ম্। মৃগয়িত্বা যথান্যায়ং বিদিতার্থাঃ স্ম তত্ত্বতঃ॥ প্রাপ্তা দ্বারবতীং সূতা বিনা পার্থৈঃ পরন্তপ। ন তত্র পাণ্ডবা রাজন্ কৃষ্ণা বাপি পতিব্রতা॥ সর্ব্বথা বিপ্রনষ্টাস্তে নমস্তে ভরতর্ষভ। ন হি বিদ্মো গতিস্তেষাং বাসঞ্চাপি মহাত্মনাম্॥ পাণ্ডবানাং প্রবৃত্তিং বা বিদ্মঃ কর্ম্মাপি বা কৃতম্। স নঃ শাধি [ন তে সন্তি] মনুষ্যেন্দ্র অত ঊর্দ্ধং বিশাম্পতে॥ অন্বেষণে পাণ্ডবানাং ভূয়ঃ কিং করবামহে। ইমাঞ্চ নঃ প্রিয়াং বীর বাচং ভদ্রবতীং শৃণু॥ যেন ত্রিগর্ত্তা নিহতা বলেন মহতা নৃপ। সূতেন রাজ্ঞো মৎস্যস্য কীচকেন পুনঃ পুনঃ॥ স হতঃ পতিতঃ শেতে গন্ধর্ব্বৈর্নিশি ভারত॥ অদৃশ্যমানৈর্দুষ্টাত্মা ভ্রাতৃভিঃ সহ সোদরৈঃ॥ প্রিয়মেতদুপশ্রুত্য শত্রূণাঞ্চ পরাভবম্। কৃতকৃত্যশ্চ কৌরব্য বিধৎস্ব যদনন্তরম্॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি (গোহরণপর্ব্বণি) চারপ্রত্যাচারে পঞ্চবিংশতিতমোঽধ্যায়ঃ।

---

## ষড়্‌বিংশোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। ততো দুর্য্যোধনো রাজা শ্রুত্বা তেষাং বচস্তদা। চিরমন্তর্ম্মনা ভূত্বা প্রত্যুবাচ সভাসদঃ॥ সুদুঃখা খলু কার্য্যাণাং গতির্বিজ্ঞাতুমন্ততঃ। তস্মাৎ সর্ব্বে নিরীক্ষধ্বং ক নু তে পাণ্ডবা গতাঃ॥ অল্পাবশিষ্টং কালস্য গতভূয়িষ্ঠমন্ততঃ। তেষামজ্ঞাতচর্য্যাণামস্মিন্ বর্ষে

ত্রয়োদশে॥ অস্য বর্ষস্য শেষঞ্চেৎ ব্যতীয়ুরিহ পাণ্ডবাঃ। নিবৃত্তসময়াস্তে হি সত্য-ব্রতপরায়ণাঃ॥ ক্ষরন্ত ইব নাগেন্দ্রাঃ সর্ব্বে হ্যাশীবিষোপমাঃ। দুঃখা ভবেয়ুঃ সংরব্ধাঃ কৌরবান্ প্রতি তে ধ্রুবম্॥ অর্ব্বাক্ কালস্য বিজ্ঞাতাঃ কৃচ্ছ্ররূপধরাঃ [ততঃ] পুনঃ। প্রবিশেয়ুর্জ্জিতক্রোধাস্তাবদেব পুনর্ব্বনম্। তস্মাৎ সর্ব্বে বুভুৎসধ্বং প্রতিকর্ত্তব্যমব্যয়ম্ [প্রতিকর্ত্তব্যমস্য যৎ]। রাজ্যং নির্দ্বন্দ্বমব্যগ্রং নিঃসপত্নং চিরং ভবেৎ॥ অথাব্রবীত্ততঃ কর্ণঃ ক্ষিপ্রং গচ্ছন্তু ভারত। অন্যে ধূর্ত্ততরা দক্ষা নিভৃতাঃ সাধুকারিণঃ॥ চরন্তু দেশান্ সংবীতাঃ স্ফীতান্ জনপদান্ বহূন্। তত্র গোষ্ঠীষু রম্যাসু সিদ্ধপ্রব্রজিতেষু চ॥ পরিচারেষু তীর্থেষু বিবিধেষাকরেষু চ। বিজ্ঞাতব্যা মনুষ্যৈস্তে তর্কয়া সুবিনীতয়া॥ বিবিধৈস্তৎপরৈঃ সম্যক্ তজ্জ্ঞৈর্নিপুণসংবৃতৈঃ। অন্বেষ্টব্যাঃ সুনিপুণৈঃ পাণ্ডবাশ্ছন্নবাসিনঃ॥ নদীকুঞ্জেষু তীর্থেষু গ্রামেষু নগরেষু চ। আশ্রমেষু চ রম্যেষু পর্ব্বতেষু গুহাসু চ॥ অথাগ্রজানন্তরজঃ পাপভাবানুরাগিণম্। জ্যেষ্ঠং দুঃশাসনস্তত্র ভ্রাতা ভ্রাতরমব্রবীৎ॥ যেষু নঃ প্রত্যয়ো রাজংশ্চারেষু মনুজর্ষভ। তে যান্তু দত্তদেয়া বৈ ভূয়স্তান্ পরিমার্গিতুম্॥ এতচ্চ কর্ণো যৎ প্রাহ সর্ব্বমী-ক্ষামহে বয়ম্। যথোদ্দিষ্টং চরাঃ সর্ব্বে মৃগয়ন্তু ততস্ততঃ॥ এতে চান্যে চ বহবো দেশাদ্দেশং যথাবিধি। ন তু তেষাং গতির্ব্বাসঃ প্রবৃত্তিশ্চোপলভ্যতে॥ অত্যাহিতং বা গূঢ়াস্তে পারং বোর্ম্মিমতো গতাঃ। ব্যালৈর্বাপি মহারণ্যে ভক্ষিতাঃ শূরমানিনঃ॥ অথবা বিষমং প্রাপ্য বিনষ্টাঃ শাশ্বতীঃ সমাঃ। তস্মান্মানসমব্যগ্রং কৃত্বা ত্বং কুরুনন্দন। কুরু কার্য্যং মহোৎসাহং মন্যসে যন্নরাধিপ॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাট-পর্ব্বণি চারপ্রত্যাচারে ষড়্‌বিংশতিতমোঽধ্যায়ঃ।

---

## সপ্তবিংশোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। অথাব্রবীন্মহাবীর্য্যো দ্রোণস্তত্ত্বার্থদর্শিনঃ। ন তাদৃশা বিনশ্যন্তি নাপি যান্তি পরাভবম্॥ শূরাশ্চ কৃতবিদ্যাশ্চ বুদ্ধিমন্তো জিতেন্দ্রিয়াঃ। ধর্ম্মজ্ঞাশ্চ কৃতজ্ঞাশ্চ ধর্ম্মরাজমনুব্রতাঃ॥ নীতিধর্ম্মার্থতত্ত্বজ্ঞং পিতৃবচ্চ সমাহিতাঃ। ধর্ম্মে স্থিতং সত্যধৃতং জ্যেষ্ঠং জ্যেষ্ঠাপচায়িনঃ॥ অনুব্রতা মহাত্মানং ভ্রাতরং ভ্রাতরো নৃপ। অজাতশত্রুং শ্রীমন্তং সর্ব্বভ্রাতৄননুব্রতম্॥ তেষাং তথাবিধেয়ানাং

নিভৃতানাং মহাত্মনাম্। কিমর্থং নীতিমান্ পার্থঃ শ্রেয়ো নৈষাং করিষ্যতি॥ তস্মাদ্ যত্নাৎ প্রতীক্ষন্তে কালস্যোদয়মাগতম্। ন হি তে নাশমৃচ্ছেরন্নিতি পশ্যাম্যহং ধিয়া॥ সাম্প্রতঞ্চাপি যৎ কার্য্যং তচ্চ ক্ষিপ্রমকালিকম্। ক্রিয়তাং সাধু সঞ্চিন্ত্য বাসশ্চৈষাং প্রচিন্ত্যতাম্॥ যথাবৎ পাণ্ডুপুত্রাণাং সর্ব্বার্থেষু ধৃতাত্মনাম্। দুর্জ্ঞেয়াঃ খলু শূরাস্তে নিষ্পাপাস্তপসাবৃতাঃ॥ বুদ্ধিমান্ গুণবান্ পার্থঃ সত্যবান্ নীতিমান্ শুচিঃ। তেজোরাশিরসংখ্যেয়ো গৃহ্ণীয়াদপি চক্ষুষা॥ বিজ্ঞায় ক্রিয়তাং তস্মাদ্ভূয়শ্চ মৃগ্যতাঞ্চরৈঃ। ব্রাহ্মণৈশ্চ চরৈঃ সিদ্ধৈর্যে চান্যে তদ্বিধা জনাঃ॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি (গোহরণপর্ব্বণি) দ্রোণবাক্যে সপ্তবিংশতিতমোঽধ্যায়ঃ।

---

## অষ্টাবিংশোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। ততঃ শান্তনবো ভীষ্মো ভরতানাং পিতামহঃ। শ্রুতবান্ দেশকালজ্ঞস্তত্ত্বজ্ঞঃ সর্ব্বধর্ম্মবিৎ॥ আচার্য্যবাক্যোপরমে তদ্বাক্যমভিসন্দধৎ। হিতার্থং স উবাচেমাং ভারতীং ভরতান্ প্রতি॥ যুধিষ্ঠিরে সমাসক্তাং ধর্ম্মজ্ঞে ধর্ম্মসংশ্রিতাম্। অসতাং দুর্ল্লভাং নিত্যং সতাঞ্চাভিমতাং সদা। ভীষ্মঃ সমবদত্তত্র গিরং সাধুভিরর্চ্চিতাম্। যথৈষ ব্রাহ্মণঃ প্রাহ দ্রোণঃ সর্ব্বার্থতত্ত্ববিৎ॥ সর্ব্বলক্ষণসম্পন্না নাশং নার্হন্তি পাণ্ডবাঃ। শ্রুতব্রতোপসম্পন্না নানাশ্রুতিসমাহিতাঃ॥ বৃদ্ধানুশাসনে লগ্নাঃ সত্যব্রতপরায়ণাঃ। সময়ং সময়জ্ঞাস্তে পালয়ন্তঃ শুচিব্রতাঃ॥ ক্ষত্রধর্ম্মপরা নিত্যং কেশবানুমতাঃ সদা। প্রবীরপুরুষাস্তে বৈ মহাত্মানো মহাবলাঃ॥ নাবসীদিতুমর্হন্তি উদ্বহন্তঃ সতাং ধুরম্। ধর্ম্মতশ্চৈব গুপ্তাস্তে স্ববীর্য্যেণ চ পাণ্ডবাঃ॥ ন নাশমধিগচ্ছেয়ুরিতি মে ধীয়তে মতিঃ। তত্র বুদ্ধিং প্রণেষ্যামি পাণ্ডবান্ প্রতি ভারত॥ ন তু নীতিঃ সুনীতস্য শক্যতেঽন্বেষিতুং পরৈঃ। যত্তু শক্যমিহাস্মাভিস্তান্ বৈ সঞ্চিন্ত্য পাণ্ডবান্॥ বুদ্ধ্যা প্রবক্তুং ন দ্রোহাৎ প্রবক্ষ্যামি নিবোধ তৎ। ন ত্বিয়ং মাদৃশৈর্নীতিস্তস্য বাচ্যা কথঞ্চন॥ সা ত্বিয়ং সাধু বক্তব্যা ন ত্বনীতিঃ কথঞ্চন। বৃদ্ধানুশাসনে তাত তিষ্ঠতা সত্যশালিনা॥ অবশ্যস্ত্বিহ ধীরেণ সতাং মধ্যে বিবক্ষতা। যথামতি বিবক্তব্যং সর্ব্বথা ধর্ম্মলিপ্সয়া॥ তত্র নাহং তথা মন্যে যথায়মিতরো জনঃ। নিবাসং ধর্ম্মরাজস্য বর্ষেঽস্মিংস্তু ত্রয়োদশে॥

তত্র তাত ন তেষাস্তু রাজ্ঞাং ভাব্যমসাম্প্রতম্। পুরে জনপদে বাপি যত্র রাজা যুধিষ্ঠিরঃ॥ দানশীলো বদান্যশ্চ নিভৃতো হ্রীনিষেবকঃ। জনো জনপদে ভব্যো যত্র রাজা যুধিষ্ঠিরঃ॥ প্রিয়বাদী সদা দান্তো ভব্যঃ সত্যপরো জনঃ। হৃষ্টঃ পুষ্টঃ শুচির্দক্ষো যত্র রাজা যুধিষ্ঠিরঃ॥ নাসূয়কো ন চাপীর্ষুর্নাভিমানী ন মৎসরী। ভবিষ্যতি জনস্তত্র স্বয়ং ধর্ম্মমনুব্রতঃ॥ ব্রহ্মঘোষাশ্চ ভূয়াংসঃ পূর্ণাহুত্যস্তথৈব চ। ক্রতবশ্চ ভবিষ্যন্তি ভূয়াংসো ভূরিদক্ষিণাঃ॥ সদা চ তত্র পর্জ্জন্যঃ সম্যগ্বর্ষী ন সংশয়ঃ। সম্পন্নশস্যা চ মহী নিরীতিকা ভবিষ্যতি॥ শস্যবন্তি চ ধান্যানি রসবন্তি ফলানি চ। গন্ধবন্তি চ মাল্যানি শুভশব্দা চ ভারতী॥ বায়ুশ্চ সুখসংস্পর্শো নিষ্প্রতীপঞ্চ দর্শনম্। ভয়ং নাভ্যবিশেত্তত্র যত্র রাজা যুধিষ্ঠিরঃ॥ গাবশ্চ বহুলাস্তত্র ন কৃশা ন চ দুর্ব্বলাঃ। পয়াংসি দধিসর্পীংষি রসবন্তি হিতানি চ॥ গুণবন্তি চ পানানি ভোজ্যানি রসবন্তি চ। তত্র দেশে ভবিষ্যন্তি যত্র রাজা যুধিষ্ঠিরঃ॥ রসাঃ স্পর্শাশ্চ গন্ধাশ্চ শব্দাশ্চাপি গুণান্বিতাঃ। দৃশ্যানি চ প্রসন্নানি যত্র রাজা যুধিষ্ঠিরঃ॥ ধর্ম্মাশ্চ তত্র দৃশ্যন্তে সেবিতাশ্চ দ্বিজাতিভিঃ। স্বৈঃ স্বৈর্গুণৈঃ সম্প্রযুক্তাস্তস্মিন্ বর্ষে ত্রয়োদশে॥ দেশে তস্মিন্ ভবিষ্যন্তি তাত পাণ্ডবসংশ্রিতে। সংপ্রীতিমাঞ্জনস্তত্র সন্তুষ্টঃ শুচিরব্যয়ঃ॥ দেবতাতিথিপূজাসু সর্ব্বভাবানুরাগবান্। ইষ্টদানো মহোৎসাহঃ শশ্বদ্ধর্ম্মপরায়ণঃ॥ অশুভদ্বিট্ শুভপ্রেপ্সু র্নিত্যযজ্ঞঃ শুভব্রতঃ। ভবিষ্যতি জনস্তত্র যত্র রাজা যুধিষ্ঠিরঃ॥ ত্যক্তবাক্যানৃতস্তাত শুভকল্যাণমঙ্গলঃ। শুভলিপ্সুঃ শুভরতির্যত্র রাজা যুধিষ্ঠিরঃ॥ ( সর্ব্বভূতহিতে যুক্তঃ সদা নির্ম্মলমানসঃ। ) ভবিষ্যতি জনস্তত্র নিত্যঞ্চেষ্টপ্রিয়ব্রতঃ॥ ধর্ম্মাত্মা শক্যতে জ্ঞাতুং নাপি তাত দ্বিজাতিভিঃ। কিং পুনঃ প্রাকৃতৈঃ পার্থঃ শক্যো বিজ্ঞাতুমন্ততঃ॥ যস্মিন্ সত্যং ধৃতির্দানং পরা শান্তির্ধ্রুবা ক্ষমা। হ্রীঃ শ্রীঃ কীর্ত্তিঃ পরং তেজশ্চানৃশংস্যমথার্জ্জবম্॥ তস্মাত্তত্র নিবাসন্তু ছন্নং যত্নেন ধীমতঃ। গতিঞ্চ পরমাং তত্র নোৎসহে বক্তুমন্যথা॥ এবমেতত্তু সঞ্চিন্ত্য যৎ কৃত্যং মন্যসে হিতম্। তৎ ক্ষিপ্রং কুরু কৌরব্য যদ্যেবং শ্রদ্দধাসি মে॥ ১-৩৩

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি চারপ্রত্যাচারে ভীষ্মবাক্যে অষ্টাবিংশতিতমোঽধ্যায়ঃ।

—

## ঊনত্রিংশত্তমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। ততঃ শারদ্বতো বাক্যমিত্যুবাচ কৃপস্তদা। যুক্তং স্বা(প্রা)প্তঞ্চ বৃদ্ধেন পাণ্ডবান্ প্রতি ভাষিতম্॥ ধর্ম্মার্থসহিতং শ্লক্ষ্ণং তত্ত্বতশ্চ সহেতুকম্। তত্রানুরূপং ভীষ্মেণ মমাপ্যত্র গিরং শৃণু॥ তেষাঞ্চৈব গতিস্তর্ক্যা বাসশ্চৈষাং প্রচিন্ত্যতাম্। নীতির্বিধীয়তাং চাপি সাম্প্রতং যা হিতা ভবেৎ॥ নাবজ্ঞেয়ো রিপুস্তাত প্রাকৃতোঽপি বুভূষতা। কিং পুনঃ পাণ্ডবাস্তাত সর্ব্বাস্ত্রকুশলা রণে॥ তস্মাৎ সত্রং প্রবিষ্টেষু পাণ্ডবেষু মহাত্মসু। গূঢ়ভাবেষু চ্ছন্নেষু কালে চোদয়মাগতে॥ স্বরাষ্ট্রে পররাষ্ট্রে চ জ্ঞাতব্যং বলমাত্মনঃ। উদয়ঃ পাণ্ডবানাঞ্চ প্রাপ্তে কালে ন সংশয়ঃ॥ নিবৃত্তসময়াঃ পার্থা মহাত্মানো মহাবলাঃ। মহোৎসাহা ভবিষ্যন্তি পাণ্ডবা হ্যমিতৌজসঃ॥ তস্মাদ্বলঞ্চ কোষশ্চ নীতিশ্চাপি (স্তেষাং) বিধীয়তাম্। যথা কালোদয়ে প্রাপ্তে (সম্যক্ তৈঃ) সম্প্ৰক্তৈঃ সন্দধামহে॥ তত্র তাত হ্যহং মন্যে বুধ্যস্ব বলমাত্মনঃ। নিয়তং সর্ব্বমিত্রেষু বলবৎসু বলেষু চ॥ উচ্চাবচং বলং জ্ঞাত্বা মধ্যস্থঞ্চাপি ভারত। প্রকৃষ্টমপ্রকৃষ্টঞ্চ সন্দধামস্তথা পরৈঃ॥ সাম্না ভেদেন দণ্ডেন দানেন বলিকর্ম্মণা। ন্যায়েনাক্রম্য চ পরান্ বলেনানম্য দুর্ব্বলান্॥ সান্ত্বয়িত্বা তু মিত্রাণি বলঞ্চাভাষ্যতাং সুখম্। সকোষবলসংবৃদ্ধঃ সম্যক্ সিদ্ধিমবাপ্স্যসি॥ যোৎস্যসে চাপি বলিভিররিভিঃ প্রত্যুপস্থিতৈঃ। অন্যৈস্ত্বং পাণ্ডবৈর্ব্বাপি হীনৈশ্চ বলবাহনৈঃ॥ এবং সর্ব্বং বিনিশ্চিত্য ব্যবসায়ং স্বধর্ম্মতঃ। যথাকালং মনুয়েন্দ্র চিরং সুখমবাপ্স্যসি॥১-১৪

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি (গোহরণপর্ব্বণি) চারপ্রত্যাচারে কৃপবাক্যে একোনত্রিংশত্তমোঽধ্যায়ঃ।

---

## ত্রিংশত্তমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। অথ রাজা ত্রিগর্ত্তানাং সুশর্ম্মা রথযূথপঃ। প্রাপ্তকালমিদং বাক্যমুবাচ ত্বরিতো বলী [নৃপম্]॥ অসকৃন্নিকৃতঃ পূর্ব্বং মৎস্য-শাল্বেয়কৈঃ প্রভো। সূতেনৈব চ মৎস্যস্য কীচকেন পুনঃ পুনঃ॥ বাধিতো বন্ধুভিঃ সার্দ্ধং বলাদ্বলবতা বিভো। স কর্ণমভ্যুদীক্ষ্যাথ দুর্য্যোধনমভাষত॥ অসকৃন্মৎস্যরাজ্ঞা মে রাষ্ট্রং বাধিতমোজসা। প্রণেতা কীচকস্তস্য বলবানভবৎ পুরা॥ ক্রূরোঽমর্ষী স দুষ্টাত্মা ভুবি বিখ্যাতবিক্রমঃ। নিহতঃ স তু গন্ধর্ব্বৈঃ পাপকর্ম্মা নৃশংসবান্॥

তস্মিংশ্চ নিহতে রাজা হীনদর্পো নিরাশ্রয়ঃ। ভবিষ্যতি নিরুৎসাহো বিরাট ইতি মে মতিঃ॥ তত্র যাত্রামহং মন্যে যদি তে রোচতে মতিঃ। কৌরবাণাঞ্চ সর্ব্বেষাং কর্ণস্য চ মহাত্মনঃ॥ এতৎ প্রাপ্তমহং মন্যে কার্য্যমাত্যয়িকং হি নঃ। রাষ্ট্রং তস্যাভিযাস্যামো বহুধান্যসমাকুলম্॥ আদদামোঽস্য রত্নানি বিবিধানি বসূনি চ। গ্রামান্ রাষ্ট্রাণি বা তস্য হরিষ্যামো বিভাগশঃ॥ অথবা গোসহস্রাণি বহূনি চ শুভানি চ। বিবিধানি হরিষ্যামঃ প্রতিপীড্য পুরং বলাৎ॥ কৌরবৈঃ সহ সঙ্গত্য ত্রিগর্ত্তৈশ্চ বিশাম্পতে। গাস্তস্যাপহরামোঽস্য সহ সর্ব্বৈঃ সুসংহতাঃ॥ সংবিভাগেন (সন্ধিং বা তেন) কৃত্বা তু নিবধ্নীমোঽস্য পৌরুষম্। হত্বা চাস্য চমূং কৃৎস্নাং বশমেব নয়ামহে॥ তং বশে ন্যায়তঃ কৃত্বা সুখং বৎস্যামহে বয়ম্। ভবতো বলবৃদ্ধিশ্চ ভবিষ্যতি ন সংশয়ঃ॥ তচ্ছ্রুত্বা বচনং তস্য কর্ণো রাজানমব্রবীৎ। সূক্তং সুশর্ম্মণা বাক্যং প্রাপ্তকালং হিতঞ্চ নঃ॥ তস্মাৎ ক্ষিপ্রং বিনির্যামো যোজয়িত্বা বরূথিনীম্। বিভজ্য চাপ্যনীকানি যথা বা মন্যসেঽনঘ॥ প্রাজ্ঞো বা কুরুবৃদ্ধোঽয়ং সর্ব্বেষাং নঃ পিতামহঃ। আচার্য্যশ্চ তথা দ্রোণঃ কৃপঃ শারদ্বতস্তথা॥ মন্যন্তে তে যথা সর্ব্বে তথা যাত্রা বিধীয়তাম্॥ সংমন্ত্র্য চাশু গচ্ছামঃ সাধনার্থং মহীপতে। কিঞ্চ নঃ পাণ্ডবৈঃ কার্য্যং হীনার্থবলপৌরুষৈঃ॥ অত্যন্তং বা প্রণষ্টাস্তে প্রাপ্তা বাপি যমক্ষয়ম্। যামো রাজন্নিরুদ্বিগ্না বিরাটবিষয়ং বয়ম্। আদাস্যামো হি গাস্তস্য বিবিধানি বসূনি চ॥

বৈশম্পায়ন উবাচ। ততো দুর্য্যোধনো রাজা বাক্যমাদায় তস্য তৎ। বৈকর্ত্তনস্য কর্ণস্য ক্ষিপ্রমাজ্ঞাপয়ৎ স্বয়ম্॥ শাসনে নিত্যসংযুক্তং দুঃশাসনমনন্তরম্। সহ বৃদ্ধৈস্তু সংমন্ত্র্য ক্ষিপ্রং যোজয় বাহিনীম্॥ যথোদ্দেশং চ গচ্ছামঃ সহিতাস্তত্র কৌরবৈঃ। সুশর্ম্মা তু যথোদ্দিষ্টং দেশং যাতু মহারথঃ॥ ত্রিগর্ত্তৈঃ সহিতো রাজা সমগ্রবলবাহনঃ। প্রাগেব হি সুসংবীতো মৎস্যস্য বিষয়ং প্রতি॥ জঘন্যতো বয়ং তত্র যাস্যামো দিবসান্তরে। বিষয়ং মৎস্যরাজস্য সুসমৃদ্ধং সুসংহতাঃ॥ তে গত্বা সহসা তত্র বিরাটনগরং প্রতি। ক্ষিপ্রং গোপান্ সমাসাদ্য গৃহ্ণন্তু বিপুলং ধনম্॥ গবাং শতসহস্রাণি শ্রীমন্তি গুণবন্তি চ। বয়মপ্যনুগৃহ্নীমো দ্বিধা কৃত্বা বরূথিনীম্॥

বৈশম্পায়ন উবাচ। তে স্ম গত্বা যথোদ্দিষ্টাং দিশং বহ্নের্মহীপতেঃ। সন্নদ্ধা রথিনঃ সর্ব্বে সপদাতা বলোৎকটাঃ॥ প্রতিবৈরং চিকীর্ষন্তো গোষু সংপেতুরুদ্ধতাঃ। আদাতুং গাঃ সুশর্ম্মা তু কৃষ্ণপক্ষস্য সপ্তমীম্॥

অপরং দিবসং সর্ব্বে রাজন্ সম্ভূয় কৌরবাঃ। অষ্টম্যাং তান্যগৃহ্নন্ত গোকুলানি সহস্রশঃ॥ ১-২৭

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি গোহরণপর্ব্বণি সুশর্ম্মবাক্যং নাম ত্রিংশত্তমোঽধ্যায়ঃ।

## একত্রিংশত্তমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। ততস্তেষাং মহারাজ তত্রৈবামিততেজসাম্। ছদ্মলিঙ্গপ্রতিষ্ঠানাং পাণ্ডবানাং মহাত্মনাম্॥ ব্যতীতঃ সময়ঃ সম্যগ্ বসতাং বৈ পুরোত্তমে। কুর্ব্বতাং তস্য কর্ম্মাণি বিরাটস্য মহীপতেঃ॥ কীচকে তু হতে রাজা বিরাটঃ পরবীরহা। [আসাঞ্চক্রে সহামাত্যঃ পাণ্ডবৈর্ধর্ম্মচারিভিঃ]॥ পরাং সম্ভাবনাং চক্রে কুন্তীপুত্রে যুধিষ্ঠিরে॥ ততস্ত্রয়োদশস্যান্তে তস্য বর্ষস্য ভারত। সুশর্ম্মণা গৃহীতন্তু গোধনং তরসা বহু॥ ততো জবেন মহতা গোপাঃ পুরমথাব্রজন্। অপশ্যন্ মৎস্যরাজঞ্চ সিংহাসনগতং প্রভুম্॥ শূরৈঃ পরিবৃতা যোধৈঃ কুণ্ডলাঙ্গদধারিভিঃ। মন্ত্রিভিঃ সংবৃতং সার্দ্ধং পাণ্ডবৈশ্চ মহাত্মভিঃ॥ তং সভায়াং মহারাজমাসীনং রাষ্ট্রবর্দ্ধনম্। তেঽব্রুবন্নুপসংগম্য বিরাটং প্রণতাস্তদা॥ অস্মান্ যুধি বিনির্জ্জিত্য পরিভূয় চ বান্ধবান্। গবাং শতসহস্রাণি ত্রিগর্ত্তাঃ কালয়ন্তি তে॥ তান্ পরীপ্সস্ব রাজেন্দ্র মা নেশুঃ পশবস্তব॥ তচ্ছ্রুত্বা নৃপতিঃ সেনাং মৎস্যানাং সমযোজয়ৎ। রথনাগাশ্বকলিলাং পত্তিধ্বজসমাকুলাম্॥ রাজানো রাজপুত্রাশ্চ তনুত্রাণ্যনুভেজিরে। ভানুমন্তি বিচিত্রাণি শূরসেব্যানি ভাগশঃ॥ সবজ্রায়সগর্ভন্তু কবচং তত্র কাঞ্চনম্। বিরাটস্য প্রিয়ো ভ্রাতা শতানীকোঽভ্যহারয়ৎ॥ সর্ব্বপারশবং চর্ম্ম ( বর্ম্ম ) কল্যাণপটলং দৃঢ়ম্। শতানীকাদবরজো মদিরাক্ষো ( শ্বো ) ঽভ্যহারয়ৎ॥ শতসূর্য্যং শতাবর্ত্তং শতবিন্দু শতাক্ষিমৎ। অভেদ্যকল্পং মৎস্যস্য রাজা কবচমাহরৎ॥ উৎসেধে যস্য পদ্মানি শতং সৌগন্ধিকানি চ। সুবর্ণপৃষ্ঠং সূর্য্যাভং সূর্য্যদত্তোঽভ্যহারয়ৎ॥ দৃঢ়মায়সগর্ভন্তু শ্বেতং বর্ম্ম শতাক্ষিমৎ। বিরাটস্য সুতো জ্যেষ্ঠো বীরঃ শঙ্খোঽভ্যহারয়ৎ॥ শতশশ্চ তনুত্রাণি যথাস্বানি মহারথাঃ। যোৎস্যমানা অনহ্যন্ত দেবরূপাঃ প্রহারিণঃ॥ সুপস্করেষু শুভ্রেষু মহৎসু চ মহারথাঃ। পৃথক্কাঞ্চনসন্নাহান্ রথেম্বশ্বানযোজয়ন্॥ সূর্য্যচন্দ্রপ্রতীকাশে রথে দিব্যে হিরণ্ময়ে। মহানুভাবো মৎস্যস্য ধ্বজ উচ্ছিশ্রিয়ে তদা॥ অথান্যান্ বিবিধাকারান্

ধ্বজান্ হেমপরিষ্কৃতান্। যথাস্বং ক্ষত্রিয়াঃ শূরা রথেষু সমযোজয়ন্॥ অথ মৎস্যো-ঽব্রবীদ্রাজা শতানীকং জঘন্যজম্। কঙ্ক-বল্লব-গোপালা দামগ্রন্থিশ্চ বীর্য্যবান্॥ যুধ্যেয়ুরিতি মে বুদ্ধির্বর্ত্ততে নাত্র সংশয়ঃ। এতেষামপি দীয়ন্তাং রথা ধ্বজ-পতাকিনঃ॥ কবচানি বিচিত্রাণি মৃদূনি চ দৃঢ়ানি চ। প্রতিমুঞ্চন্তু গাত্রেষু দীয়ন্তামায়ুধানি চ॥ বীরাঙ্গরূপাঃ পুরুষা নাগরাজকরোপমাঃ। নেমে জাতু ন যুধ্যেরন্নিতি মে ধীয়তে মতিঃ॥ এতচ্ছ্রুত্বা তু নৃপতের্বাক্যং ত্বরিতমানসঃ। শতানীকস্তু পার্থেভ্যো রথান্ রাজন্ সমাদিশৎ॥ সহদেবায় ভীমায় রাজ্ঞেঽথ নকুলায় চ। তান্ প্রহৃষ্টাংস্ততঃ সূতা রাজভক্তিপুরস্কৃতাঃ॥ নির্দ্দিষ্টা নরদেবেন রথাঞ্ছীঘ্রমযোজয়ন্। কবচানি বিচিত্রাণি মৃদূনি চ দৃঢ়ানি চ॥ বিরাটঃ প্রাদি-শদ্ যানি তেষামক্লিষ্টকর্ম্মণাম্। তান্যামুচ্য শরীরেষু দংশিতাস্তে পরন্তপাঃ। রথান্ হয়ৈঃ সুসম্পন্নানাস্থায় চ নরোত্তমাঃ। নির্যযুর্মুদিতাঃ পার্থাঃ শত্রুসঙ্ঘাত-মর্দ্দিনঃ॥ তরস্বিনশ্ছন্নরূপাঃ সর্ব্বে যুদ্ধবিশারদাঃ। রথান্ হেমপরিচ্ছন্নানা-স্থায় চ মহারথাঃ॥ বিরাটমন্বয়ুঃ পার্থাঃ সহিতাঃ কুরুপুঙ্গবাঃ। চত্বারো ভ্রাতরঃ শূরাঃ পাণ্ডবাঃ সত্যবিক্রমাঃ॥ ভীমাশ্চ মত্তমাতঙ্গাঃ প্রভিন্নকরটামুখাঃ। ক্ষরন্ত ইব জীমূতাঃ সুদন্তাঃ ষষ্টিহায়নাঃ॥ স্বারূঢ়া যুদ্ধকুশলৈঃ শিক্ষিতৈর্হস্তি-সাদিভিঃ। রাজানমন্বয়ুঃ পশ্চাচ্চলন্ত ইব পর্ব্বতাঃ॥ বিশারদানাং মুখ্যানাং হৃষ্টানাঞ্চানুযায়িনাম্॥ অষ্টৌ রথসহস্রাণি দশনাগশতানি চ। ষষ্টিশ্চাশ্বসহ-স্রাণি মৎস্যানামভিতো যযুঃ॥ তদনীকং বিরাটস্য শুশুভে ভরতর্ষভ॥ সংপ্র-য়ান্তং তদা রাজন্নিনীষন্তং (নিরীক্ষন্তং) গবাং পদম্। তদ্বলাগ্র্যং বিরাটস্য সম্প্রস্থিতমশোভত। দৃঢ়ায়ুধজনাকীর্ণং গজাশ্বরথসঙ্কুলম্॥ ১-৩৫

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি গোহরণপর্ব্বণি সেনানির্যাণে একত্রিংশত্তমোঽধ্যায়ঃ।

---

## দ্বাত্রিংশত্তমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। নির্যায় নগরাচ্ছূরা ব্যূঢ়ানীকাঃ প্রহারিণঃ। ত্রিগর্ত্তা-নস্পৃশন্মৎস্যাঃ সূর্য্যে পরিণতে সতি॥ তে ত্রিগর্ত্তাশ্চ মৎস্যাশ্চ সংরব্ধা যুদ্ধ-দুর্ম্মদাঃ। অন্যোঽন্যমভিগর্জ্জন্তো গোষু গৃদ্ধা মহাবলাঃ॥ ভীমাশ্চ মত্তমাতঙ্গা-স্তোমরাঙ্কুশচোদিতাঃ। গ্রামণীয়ৈঃ সমারূঢ়াঃ কুশলৈর্হস্তিসাদিভিঃ॥ তেষাং স সমরো ঘোরস্তুমুলো লোমহর্ষণঃ। ঘ্নতাং পরস্পরং রাজন্ যমরাষ্ট্রবিবর্দ্ধনঃ॥

দেবাসুরসমো রাজন্নাসীৎ সূর্য্যেঽবলম্বতি। পদাতিরথনাগেন্দ্র-হয়ারোহ-বলৌঘবান্॥ অন্যোঽন্যমভ্যাপততাং নিঘ্নতাঞ্চেতরেতরম্। উদতিষ্ঠদ্রজো ভৌমং ন প্রাজ্ঞায়ত কিঞ্চন॥ পক্ষিণশ্চাপতন্ ভূমৌ সৈন্যেন রজসাবৃতাঃ। ইষুভির্ব্যতিসংবদ্ভিরাদিত্যোঽন্তরধীয়ত॥ খদ্যোতৈরিব সংযুক্তমন্তরীক্ষং ব্যরাজত। রুক্মপৃষ্ঠানি চাপানি ব্যতিষক্তানি ধন্বিনাম্॥ পততাং লোকবীরাণাং সব্যদক্ষিণমস্যতাম্। রথা রথৈঃ সমাজগ্মুঃ পাদাতৈশ্চ পদাতয়ঃ॥ সাদিভিঃ সাদিনশ্চৈব গজৈশ্চাপি মহাগজাঃ। অসিভিঃ পট্টিশৈঃ প্রাসৈঃ শক্তিভিস্তোমরৈরপি॥ সংরব্ধা সমরে রাজন্নিজঘ্নুরিতরেতরম্। নিঘ্নন্তঃ সমরেঽন্যোঽন্যং শূরাঃ পরিঘবাহবঃ॥ ন শেকুরভিসংরব্ধাঃ শূরান্ কর্ত্তুং পরাঙ্মুখান্। কৢপ্তোত্তরোষ্ঠং সুনসং কৢপ্তকেশমলঙ্কৃতম্॥ অদৃশ্যত শিরশ্ছিন্নং রজোধ্বস্তং সকুণ্ডলম্। অদৃশ্যন্ত চ গাত্রাণি শরৈশ্ছিন্নানি ভাগশঃ॥ শালস্কন্ধনিকাশানি ক্ষত্রিয়াণাং মহামৃধে। নাগভোগনিকাশৈশ্চ বাহুভিশ্চন্দনোক্ষিতৈঃ। আস্তীর্ণা বসুধা ভাতি শিরোভিশ্চ সকুণ্ডলৈঃ॥ রথিনাং রথিভিশ্চাত্র সংপ্রহারোঽভ্যবর্ত্তত। সাদিনাং সাদিভিশ্চাপি পদাতীনাং পদাতিভিঃ॥ উপাশাম্যদ্রজো ভৌমং রুধিরেণ প্রসর্পতা। কশ্মলং প্রাবিশদ্ঘোরং নির্ম্মর্য্যাদমবর্ত্তত॥ উপাক্রোশংস্তদান্যোন্যং শরৈর্গাঢ়ং প্রবেজিতাঃ। অন্তরীক্ষে গতির্যেষাং দর্শনঞ্চাপ্যরুধ্যত॥ তে ঘ্নন্তঃ সমরেঽন্যোঽন্যং শূরাঃ পরিঘবাহবঃ। ন শেকুরভিসংরব্ধাঃ শূরান্ কর্ত্তুং পরাঙ্মুখান্॥ শতানীকঃ শতং হত্বা বিশালাক্ষশ্চতুঃশতম্। প্রবিষ্টৌ মহতীং সেনাং ত্রিগর্ত্তানাং মহারথৌ॥ তাং প্রবিষ্টৌ মহাসেনাং বলবন্তৌ যশস্বিনৌ। আর্চ্ছেতাং বাহুসংরব্ধাৎ কেশাকেশি নখানখি॥ লক্ষয়িত্বা ত্রিগর্ত্তানাং তৌ প্রবিষ্টৌ রথব্রজম্। অগ্রতঃ সূর্য্যদত্তশ্চ মদিরাক্ষশ্চ পৃষ্ঠতঃ॥ বিরাটস্তত্র সংগ্রামে হত্বা পঞ্চশতান্ রথান্। হয়ানাঞ্চ শতান্যষ্টৌ হত্বা পঞ্চ মহারথান্॥ চরন্ স বিবিধান্মার্গান্ রথেষু রথযূথপঃ। ত্রিগর্ত্তানাং সুশর্ম্মাণমার্চ্ছদ্রুক্মরথং রণে॥ তৌ ব্যবাহরতাং তত্র মহাত্মানৌ মহাবলৌ। অন্যোঽন্যমভিগর্জ্জন্তৌ গোষ্ঠেষু বৃষভাবিব॥ ততো রাজা ত্রিগর্ত্তানাং সুশর্ম্মা যুদ্ধদুর্ম্মদঃ। মৎস্যং সমীয়াদ্রাজানং দ্বৈরথং যুদ্ধমাহ্বয়ন্॥ ততো রথাভ্যাং রথিনৌ ব্যতীয়তুরমর্ষিণৌ। শরান্ ব্যসৃজতাং শীঘ্রং তোয়ধারা ঘনাবিব॥ অন্যোঽন্যঞ্চাপি সংরব্ধৌ বিচেরতুরমর্ষিণৌ কৃতাস্ত্রৌ নিশিতৈর্ব্বাণৈরসি-শক্তি-গদাভৃতৌ॥ ততো রাজা সুশর্ম্মাণং বিব্যাধ দশভিঃ শরৈঃ। পঞ্চভিঃ পঞ্চভিশ্চাস্য বিব্যাধ চতুরো হয়ান্॥ তথৈব

মৎস্যরাজানং সুশর্ম্মা যুদ্ধদুর্ম্মদঃ। পঞ্চাশদ্ভিঃ শিতৈর্ব্বাণৈর্বিব্যাধ পরমাস্ত্রবিৎ॥ ততঃ সৈন্যং সমাহৃত্য মৎস্যরাজ-সুশর্ম্মণৌ। ন জানীতাং তদান্যোঽন্যং সৈন্যেন রজসাবৃতে॥ ১-৩০

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি গোহরণপর্ব্বণি সুশর্ম্মবিরাটযুদ্ধে দ্বাত্রিংশত্তমোঽধ্যায়ঃ।

---

## ত্রয়স্ত্রিংশত্তমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। তমসাভিপ্লুতে লোকে রজসা চৈব ভারত। ব্যতিষ্ঠন্ বৈ মুহূর্ত্তন্তু ব্যূঢ়ানীকাঃ প্রহারিণঃ॥ ততোঽন্ধকারং প্রণুদন্নুদতিষ্ঠত চন্দ্রমাঃ। কুর্ব্বাণো বিমলাং রাত্রিং নন্দয়ন্ ক্ষত্রিয়ান্ যুধি॥ ততঃ প্রকাশমাসাদ্য পুনর্যুদ্ধমবর্ত্তত। ঘোররূপং ততস্তস্মিন্ নাবৈক্ষন্ত পরস্পরম্॥ ততঃ সুশর্ম্মা ত্রৈগর্ত্তঃ সহ ভ্রাত্রা যবীয়সা। অভ্যদ্রবন্মৎস্যরাজং রথব্রাতেন সর্ব্বশঃ॥ ততো রথাভ্যাং প্রস্কন্দ্য ভ্রাতরৌ ক্ষত্রিয়র্ষভৌ। গদাপাণী সুসংরব্ধৌ সমভ্যদ্রবতাং হয়ান্॥ তথৈব তেষান্তু বলানি তানি, ক্রুদ্ধান্যথান্যোঽন্যমভিদ্রবন্তি। খড়্গৈর্গদাভিশ্চ পরশ্বধৈশ্চ, পাশৈশ্চ তীক্ষ্ণাগ্রসুতীক্ষ্ণধারৈঃ॥ বলং স মৎস্যস্য বলেন রাজা, সর্ব্বং ত্রিগর্ত্তাধিপতিঃ সুশর্ম্মা। প্রমথ্য জিত্বা চ প্রসহ্য মৎস্যং, বিরাটমোজস্বিনমভ্যধাবৎ॥ তৌ নিহত্য পৃথগ্ধুর্য্যাবুভৌ তৌ পার্ষ্ণিসারথী। বিরথং মৎস্যরাজানং জীবগ্রাহমগৃহ্ণতাম্॥ তমুন্মথ্য সুশর্ম্মা তু যুবতীমিব কামুকঃ। স্যন্দনং স্বং সমারোপ্য প্রযযৌ শীঘ্রবাহনঃ॥ তস্মিন্ গৃহীতে বিরথে বিরাটে বলবত্তরে। প্রাদ্রবন্ত ভয়ান্মৎস্যাস্ত্রিগর্ত্তৈরর্দ্দিতা ভৃশম্॥ তেষু সন্ত্রাস্যমানেষু কুন্তীপুত্রো যুধিষ্ঠিরঃ। প্রত্যভাষন্মহাবাহুং ভীমসেনমরিন্দমম্॥ মৎস্যরাজঃ পরামৃষ্টস্ত্রিগর্ত্তেন সুশর্ম্মণা। তং মোচয় মহাবাহো ন গচ্ছেদ্দ্বিষতাং বশম্॥ উষিতাঃ স্ম সুখং সর্ব্বে সর্ব্বকামৈঃ সুপূজিতাঃ। ভীমসেন ত্বয়া কার্য্যা তস্য বাসস্য নিষ্কৃতিঃ॥

ভীম উবাচ। অহমেনং পরিত্রাস্যে শাসনাত্তব পার্থিব। পশ্য মে সুমহৎ কর্ম্ম যুধ্যতঃ সহ শত্রুভিঃ॥ স্ববাহুবলমাশ্রিত্য তিষ্ঠ ত্বং ভ্রাতৃভিঃ সহ। একান্তমাশ্রিতো রাজন্ পশ্য মেঽদ্য পরাক্রমম্॥ সুস্কন্ধোঽয়ং মহাবৃক্ষো গদারূপ ইব স্থিতঃ। এনমেবং সমাশ্রিত্য দ্রাবয়িষ্যামি শাত্রবান্॥

বৈশম্পায়ন উবাচ। তং মত্তমিব মাতঙ্গং বীক্ষমাণং বনস্পতিম্॥

অব্রবীদ্ ভ্রাতরং বীরং ধর্ম্মরাজো যুধিষ্ঠিরঃ॥ মা ভীম সাহসং কার্ষীস্তিষ্ঠত্বেষ বনস্পতিঃ। মা ত্বাং বৃক্ষেণ কর্ম্মাণি কুর্ব্বাণমতিমানুষম্। জনাঃ সমববুধ্যেরন্ ভীমোঽয়মিতি ভারত॥ অন্যদেবায়ুধং কিঞ্চিৎ প্রতিপদ্যস্ব মানুষম্। চাপং বা যদি বা শক্তিং নিস্ত্রিংশং বা পরশ্বধম্॥ যদেব মানুষং ভীম ভবেদন্যৈরলক্ষিতম্। তদেবায়ুধমাদায় মোক্ষয়াশু মহীপতিম্॥ যমৌ চ চক্ররক্ষৌ তে ভবিতারৌ মহাবলৌ। ব্যূহতঃ সমরে তাত মৎস্যরাজং পরীপ্সতঃ॥

বৈশম্পায়ন উবাচ। এবমুক্তস্তু বেগেন ভীমসেনো মহাবলঃ। গৃহীত্বা তু ধনুঃ শ্রেষ্ঠং জবেন সুমহাজবঃ॥ ব্যমুঞ্চচ্ছরবর্ষাণি সতোয় ইব তোয়দঃ। তং ভীমো ভীমকর্ম্মাণং সুশর্ম্মাণমথাদ্রবৎ॥ বিরাটং সম বীক্ষ্যৈনং তিষ্ঠ তিষ্ঠেতি চাবদৎ। সুশর্ম্মা চিন্তয়ামাস কালান্তকযমোপমম্॥ তিষ্ঠ তিষ্ঠেতি ভাষন্তং পৃষ্ঠতো রথপুঙ্গবঃ। পশ্যতাং সুমহৎ কর্ম্ম মহদ্ যুদ্ধমুপস্থিতম্॥ পরাবৃত্তো ধনুর্গৃহ্য সুশর্ম্মা ভ্রাতৃভিঃ সহ। নিমেষান্তরমাত্রেণ ভীমসেনেন তে রথাঃ॥ রথানাঞ্চ গজানাঞ্চ বাজিনাঞ্চ সসাদিনাম্। সহস্রশতসঙ্খ্যাতাঃ শূরাণামুগ্রধন্বিনাম্॥ পাতিতা ভীমসেনেন বিরাটস্য সমীপতঃ। পত্তয়ো নিহতাস্তেষাং গদাং গৃহ্য মহাত্মনা॥ তদ্দৃষ্ট্বা তাদৃশং যুদ্ধং সুশর্ম্মা যুদ্ধদুর্ম্মদঃ। চিন্তয়ামাস মনসা কিং শেষং হি বলস্য মে॥ অপরো দৃশ্যতে কোঽন্যো পুরা মগ্নো মহাবলে। আকর্ণপূর্ণেন তদা ধনুষা প্রত্যদৃশ্যত। সুশর্ম্মা সায়কাংস্তীক্ষ্ণান্ ক্ষিপতে চ পুনঃ পুনঃ॥ ততঃ সমস্তাস্তে সর্ব্বে তুরগানভ্যচোদয়ন্। দিব্যমস্ত্রং বিকুর্ব্বাণাস্ত্রিগর্ত্তান্ প্রত্যমর্ষণাঃ॥ তান্নিবৃত্তরথান্ দৃষ্ট্বা পাণ্ডবান্ সা মহাচমূঃ। বৈরাটিঃ পরমক্রুদ্ধো যুযুধে পরমাদ্ভুতম্॥ সহস্রমবধীত্তত্র কুন্তীপুত্রো যুধিষ্ঠিরঃ। ভীমঃ সপ্তসহস্রাণি [সপ্তশতান্ যোধান্] যমলোকমদর্শয়ৎ। নকুলশ্চাপি সপ্তৈব শতানি প্রাহিণোচ্ছরৈঃ। শতানি ত্রীণি শূরাণাং সহদেবঃ প্রতাপবান্॥ যুধিষ্ঠিরসমাদিষ্টো নিজঘ্নে পুরুষর্ষভঃ। ততোঽভ্যপতদত্যুগ্রং সুশর্ম্মাণমুদায়ুধম্॥ ভিত্ত্বা তাং মহতীং সেনাং ত্রিগর্ত্তানাং মহারথঃ। ততো যুধিষ্ঠিরো রাজা ত্বরমাণো মহাবলঃ। অভিদ্রুত্য সুশর্ম্মাণং শরৈরভ্যাহনদ্ ভৃশম্॥ সুশর্ম্মাপি সুসংক্রুদ্ধস্ত্বরমাণো যুধিষ্ঠিরম্। অবিধ্যন্নবভির্ব্বাণৈশ্চতুর্ভিশ্চতুরো হয়ান্॥ ততো রাজন্নাশুকারী কুন্তীপুত্রো বৃকোদরঃ। সমাসাদ্য সুশর্ম্মাণমশ্বানস্য ব্যপোথয়ৎ॥ পৃষ্ঠগোপাংশ্চ তস্যাথ হত্বা পরমসায়কৈঃ। অথাস্য সারথিং ক্রুদ্ধো রথোপস্থাদপাতয়ৎ॥ চক্ররক্ষশ্চ শূরো বৈ মদিরাক্ষেতি [মদিরাশ্বেতি] বিশ্রুতঃ। স তদা বিরথং দৃষ্ট্বা ত্রিগর্ত্তান্

প্রাহরত্তদা॥ ততো বিরাটঃ প্রস্কন্দ্য রথাদথ সুশর্ম্মণঃ। গদামস্য পরামৃশ্য তমেবাভ্যদ্রবদ্বলী॥ স চচার গদাপাণির্বৃদ্ধোঽপি তরুণো যথা। পলায়মানং ত্রৈগর্ত্তং দৃষ্ট্বা ভীমোঽভ্যভাষত॥ রাজপুত্র নিবর্ত্তস্ব ন তে যুক্তং পলায়নম্। অনেন বীর্য্যেণ কথং গাস্ত্বং প্রার্থয়সে বলাৎ॥ কথঞ্চানুচরাংস্ত্যক্ত্বা শত্রুমধ্যে বিষীদসি॥ ইত্যুক্তঃ স তু পার্থেন সুশর্ম্মা রথযূথপঃ। তিষ্ঠ তিষ্ঠেতি ভীমং স সহসাভ্যদ্রবদ্বলী॥ ভীমস্তু ভীমসঙ্কাশো রথাৎ প্রস্কন্দ্য পাণ্ডবঃ। প্রাদ্রবত্তূর্ণমব্যগ্রো জীবিতেপ্সুঃ সুশর্ম্মণঃ॥ তং ভীমসেনো ধাবন্তমভ্যধাবত বীর্য্যবান্। ত্রিগর্ত্তরাজমাদাতুং সিংহঃ ক্ষুদ্রমৃগং যথা॥ অভিদ্রুত্য সুশর্ম্মাণং কেশপক্ষে পরামৃষৎ। সমুদ্যম্য তু রোষাত্তং নিষ্পিপেষ মহীতলে॥ পদা মূর্দ্ধ্নি মহাবাহুঃ প্রাহরদ্বিলপিষ্যতঃ। তস্য জানুং দদৌ ভীমো জঘ্নে চৈনমরত্নিনা॥ স মোহমগমদ্রাজা প্রহারবরপীড়িতঃ॥ তস্মিন্ গৃহীতে বিরথে ত্রিগর্ত্তানাং মহারথে। অভজ্যত বলং সর্ব্বং ত্রৈগর্ত্তং তদ্ভয়াতুরম্॥ নিবর্ত্ত্য গাস্ততঃ সর্ব্বাঃ পাণ্ডুপুত্রা মহারথাঃ। অবজিত্য সুশর্ম্মাণং ধনঞ্চাদায় সর্ব্বশঃ॥ স্ববাহুবলসম্পন্না হ্রীনিষেবা যতব্রতাঃ। বিরাটস্য মহাত্মনঃ পরিক্লেশবিনাশকাঃ॥ স্থিতাঃ সমক্ষং তে সর্ব্বে ত্বথ ভীমোঽভ্যভাষত। [ বিরাটস্য মহারাজ পরিক্লেষ্টা নরাধমঃ। ] নায়ং পাপসমাচারো মত্তো জীবিতুমর্হতি॥ কিন্নু শক্যং ময়া কর্ত্তুং যদ্রাজা সততং ঘৃণী। গলে গৃহীত্বা রাজানমানীয় বিবশং বশম্॥ তত এনং বিচেষ্টন্তং বদ্ধ্বা পার্থো বৃকোদরঃ। রথমারোপয়ামাস বিসংজ্ঞং পাংশুগুণ্ঠিতম্॥ অভ্যেত্য রণমধ্যস্থমভ্যগচ্ছদ্ যুধিষ্ঠিরম্। দর্শয়ামাস ভীমস্তু সুশর্ম্মাণং নরাধিপম্॥ প্রোবাচ পুরুষব্যাঘ্রো ভীমমাহবশোভিনম্। তং রাজা প্রাহসদ্ দৃষ্ট্বা মুচ্যতাং বৈ নরাধিপঃ॥ এবমুক্তোঽব্রবীদ্ভীমঃ সুশর্ম্মাণং মহাবলঃ॥

ভীম উবাচ। জীবিতুঞ্চেচ্ছসে মূঢ় হেতুং মে গদতঃ শৃণু। দাসোঽস্মীতি ত্বয়া বাচ্যঃ সংসৎসু চ সভাসু চ॥ এবং তে জীবিতং দদ্যামেষ যুদ্ধজিতো বিধিঃ। তমুবাচ ততো জ্যেষ্ঠো ভ্রাতা সপ্রণয়ং বচঃ॥

যুধিষ্ঠির উবাচ। মুঞ্চ মুঞ্চাধমাচারং প্রমাণং যদি তে বয়ম্। দাসভাবং গতো হ্যেষ বিরাটস্য মহীপতেঃ। অদাসো গচ্ছ মুক্তোঽসি মৈবং কার্ষীঃ পুনঃ কচিৎ॥ ১-৬১

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি দক্ষিণ-গোগ্রহে সুশর্ম্মপরাজয়ো নাম ত্রয়স্ত্রিংশত্তমোঽধ্যায়ঃ।

## চতুস্ত্রিংশত্তমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। এবমুক্তস্তু সব্রীড়ঃ সুশর্ম্মাসীদধোমুখঃ। স মুক্তো ঽভ্যেত্য রাজানমভিবাদ্য প্রতস্থিবান্॥ প্রমুচ্য চ সুশর্ম্মাণং পাণ্ডবাস্তে হতদ্বিষঃ। স্ববাহুবলসম্পন্না হ্রীনিষেবা যতব্রতাঃ। সংগ্রামশিরসো মধ্যে তাং রাত্রিং সুখিনোঽবসন্॥ ততো বিরাটঃ কৌন্তেয়ানতিমানুষ-বিক্রমান্। অর্চ্চয়ামাস বিত্তেন মানেন চ মহারথান্॥

বিরাট উবাচ। যথৈব মম রত্নানি যুষ্মাকং তানি বৈ তথা। কার্য্যং কুরুত বৈ সর্ব্বে যথাকামং যথাসুখম্॥ দদাম্যলঙ্কৃতাঃ কন্যা বসূনি বিবিধানি চ। মনসশ্চাপ্যভিপ্রেতং যদ্বঃ শত্রুনিবর্হণাঃ॥ যুষ্মাকং বিক্রমাদদ্য মুক্তোঽহং স্বস্তিমানিহ। তস্মাদ্ভবন্তো মৎস্যানামীশ্বরাঃ সর্ব্ব এব হি॥

বৈশম্পায়ন উবাচ। তথাভিবাদিনং মৎস্যং কৌরবেয়াঃ পৃথক্ পৃথক্। উচুঃ প্রাঞ্জলয়ঃ সর্ব্বে যুধিষ্ঠিরপুরোগমাঃ॥ প্রতিনন্দাম তে বাক্যং সর্ব্বঞ্চৈব বিশাম্পতে। এতেনৈব প্রতীতাঃ স্ম যত্ত্বং মুক্তোঽদ্য শত্রুভিঃ॥ ততোঽব্রবীৎ প্রীতমনা মৎস্যরাজো যুধিষ্ঠিরম্। পুনরেব মহাবাহুর্ব্বিরাটো রাজসত্তমঃ॥ এহি ত্বামভিষেক্ষ্যামি মৎস্যরাজোঽস্তু নো ভবান্। মনসশ্চাপ্যভিপ্রেতং যথেষ্টং ভুবি দুর্লভম্॥ তত্তেঽহং সংপ্রদাস্যামি সর্ব্বমর্হতি নো ভবান্। রত্নানি গাঃ সুবর্ণঞ্চ মণিমুক্তামথাপি চ॥ বৈয়াঘ্রপদ্য বিপ্রেন্দ্র সর্ব্বথৈব নমোঽস্তু তে। ত্বৎকৃতে হ্যদ্য পশ্যামি রাজ্যমাত্মানমেব চ॥ যতশ্চ জাতসংরম্ভো ন চ শত্রুবশং গতঃ। ততো যুধিষ্ঠিরো মৎস্যং পুনরেবাভ্যভাষত॥ প্রতিনন্দামি তে বাক্যং মনোজ্ঞং মৎস্য ভাষসে। আনৃশংস্যপরো নিত্যং সুমনাঃ সততং ভব॥ গচ্ছন্তু দূতাস্ত্বরিতং নগরং তব পার্থিব। সুহৃদাং প্রিয়মাখ্যাতুং ঘোষয়ন্তু চ তে জয়ম্॥ তস্য তদ্বচনং শ্রুত্বা দূতান্ রাজা সমাদিশৎ। আচক্ষধ্বং পুরং গত্বা সংগ্রামে বিজয়ং মম॥ কুমার্য্যঃ সমলঙ্কৃত্য পর্য্যাগচ্ছন্তু মে পুরাৎ। বাদিত্রাণি চ সর্ব্বাণি গণিকাশ্চ স্বলঙ্কৃতাঃ॥ তে তদাজ্ঞাং ততঃ শ্রুত্বা রাজা মৎস্যেন চোদিতাম্। তামাজ্ঞাং শিরসা কৃত্বা প্রস্থিতা হৃষ্টমানসাঃ॥ তে গত্বা কেবলাং রাত্রিমথ সূর্য্যোদয়ং প্রতি। বিরাটস্য পুরাভ্যাসে দূতা জয়মঘোষয়ন্॥ ১-১৯

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি সুশর্ম্মপরাজয়ো নাম চতুস্ত্রিংশত্তমোঽধ্যায়ঃ।

## পঞ্চত্রিংশত্তমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। যাতে ত্রিগর্ত্তাম্মৎস্যে তু পশূংস্তান্ বৈ পরীপ্সতি। দুর্য্যোধনঃ সহামাত্যো বিরাটমুপয়াদথ॥ ভীষ্মো দ্রোণশ্চ কর্ণশ্চ কৃপশ্চ পরমাস্ত্রবিৎ। দ্রৌণিশ্চ সৌবলশ্চৈব তথা দুঃশাসনঃ প্রভুঃ॥ বিবিংশতির্ব্বিকর্ণশ্চ চিত্রসেনশ্চ বীর্য্যবান্। দুর্ম্মুখো দুঃসহ (ল)শ্চৈব যে চান্যে চ মহারথাঃ॥ এতে মৎস্যানুপাগম্য বিরাটস্য মহীপতেঃ। ঘোষান্ বিদ্রাব্য তরসা গোধনং জহ্রুরোজসা॥ ষষ্টিং গবাং সহস্রাণি কুরবঃ কালয়ন্তি চ। মহতা রথবংশেন পরিবার্য্য সমন্ততঃ॥ গোপালানাস্তু ঘোষস্তু হন্যতাং তৈর্মহারথৈঃ। আরাবঃ সুমহানাসীৎ সম্প্রহারে ভয়ঙ্করে॥ গোপাধ্যক্ষো ভয়ত্রস্তো রথমাস্থায় সত্বরঃ। জগাম নগরায়ৈব পরিক্রোশংস্তদার্ত্তবৎ॥ সম্প্রবিশ্য পুরং রাজ্ঞো রাজবেশ্মাভ্যয়াত্ততঃ। অবতীর্য্য রথাত্তূর্ণমাখ্যাতুং প্রবিবেশ হ॥ দৃষ্ট্বা ভূমিঞ্জয়ং নাম পুত্রং মৎস্যস্য মানিনম্। তস্মৈ তৎ সর্ব্বমাচষ্ট রাষ্ট্রস্য পশুকর্ষণম্॥ ষষ্টিং গবাং সহস্রাণি কুরবঃ কালয়ন্তি তে। তদ্বিজেতুং সমুত্তিষ্ঠ গোধনং রাষ্ট্রবর্দ্ধনম্॥ রাজপুত্র হিতং প্রেপ্সুঃ ক্ষিপ্রং নির্যাহি বৈ স্বয়ম্। ত্বাং হি মৎস্যো মহীপালঃ সৈন্যপালমিহাকরোৎ॥ ত্বাং বৈ পরিষদো মধ্যে শ্লাঘতে স নরাধিপঃ। পুত্রো মমানুরূপশ্চ শূরশ্চেতি কুলোদ্বহঃ॥ ইম্বস্ত্রে নিপুণো যোধঃ সদা বীরশ্চ মে সুতঃ। তস্য তৎ সত্যমেবাস্তু মনুষ্যেন্দ্রস্য ভাষিতম্॥ আবর্ত্তয় কুরূন্ জিত্বা পশূন্ পশুমতাম্বর। নির্দ্দহৈষামনীকানি ভীমেন শরতেজসা॥ ধনুশ্চ্যুতৈ রুক্মপুঙ্খৈঃ শরৈঃ সন্নতপর্ব্বভিঃ। দ্বিষতাং ভিন্ধ্যনীকানি গজানামিব যূথপঃ॥ পাশোপধানাং জ্যাতন্ত্রীং চাপদণ্ডাং মহাস্বনাম্। শরবর্ণাং ধনুর্বীণাং শত্রুমধ্যে প্রবাদয়॥ শ্বেতা রজতসঙ্কাশা রথে যুজ্যন্তু তে হয়াঃ। ধ্বজঞ্চ সিংহং সৌবর্ণমুচ্ছ্রয়ন্তু চ তে বিভো॥ রুক্মপুঙ্খাঃ প্রসন্নাগ্রা মুক্তা হস্তবতা ত্বয়া। ছাদয়ন্তু শরাঃ সূর্য্যং রাজ্ঞাং মার্গনিরোধকাঃ॥ রণে জিত্বা কুরূন্ সর্ব্বান্ বজ্রপাণিরিবাসুরান্। যশো মহদবাপ্য ত্বং প্রবিশেদং পুনঃ পুরম্। ত্বং হি রাষ্ট্রস্য পরমা গতির্মৎস্যপতেঃ সুতঃ। যথা হি পাণ্ডুপুত্রাণামর্জ্জুনো জয়তাংবরঃ॥ এবং গতিস্ত্বং মৎস্যানাং ভব বংশবিবর্দ্ধনঃ। গতিমন্তো ভবন্ত্বদ্য সর্ব্বে বিষয়বাসিনঃ॥

বৈশম্পায়ন উবাচ। স্ত্রীমধ্য উক্তস্তেনাসৌ তদ্বাক্যমভয়ঙ্করম্। অন্তঃপুরে শ্লাঘমান ইদং বচনমব্রবীৎ॥ ১-২২

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি গোহরণপর্ব্বণি পঞ্চত্রিংশত্তমোঽধ্যায়ঃ।

## ষট্‌ত্রিংশত্তমোঽধ্যায়ঃ

উত্তর উবাচ। অদ্যাহমনুগচ্ছেয়ং দৃঢ়ধন্বা গবাং পদম্। যদি মে সারথিঃ কশ্চিদ্ভবেদশ্বেষু কোবিদঃ॥ তত্ত্বহং নাধিগচ্ছামি যো মে যন্তা ভবেন্নরঃ। পশ্য ত্বং সারথিং ক্ষিপ্রং মম যুক্তং প্রযাস্যতঃ॥ অষ্টাবিংশতিরাত্রং বা মাসং বা ন্যূনমন্ততঃ। যত্তদাসীন্মহদ্ যুদ্ধং তত্র মে সারথির্হতঃ॥ স লভেয়ং যদি ত্বন্যং হয়যানবিদং নরম্। ত্বরাবানদ্য যাত্বাহং সমুচ্ছ্রিতমহাধ্বজম্॥ বিগাহ্য তৎ-পরানীকং গজবাজিরথাকুলম্। শস্ত্রপ্রতাপনির্বীর্য্যান্ কুরূন্ জিত্বানয়ে পশূন্॥ দুর্য্যোধনং শান্তনবং কর্ণং বৈকর্ত্তনং কৃপম্। দ্রোণঞ্চ সহপুত্রং বৈ মহেষ্বাসান্ সমাগতান্॥ বিত্রাসয়িত্বা সংগ্রামে দানবানিব বজ্রভৃৎ। অনেনৈব মুহূর্ত্তেন পুনঃ প্রত্যানয়ে পশূন্॥ শূন্যমাসাদ্য কুরবঃ প্রয়াস্ত্যাদায় গোধনম্। কিন্নু শক্যং ময়া কর্ত্তুং যদহং তত্র নাভবম্॥ পশ্যেয়ুরদ্য মে বীর্য্যং কুরবস্তে সমাগতাঃ। কিন্নু পার্থোঽর্জ্জুনঃ সাক্ষাদয়মস্মান্ প্রবাধতে॥

বৈশম্পায়ন উবাচ। (শ্রুত্বা তদর্জ্জুনবাক্যং রাজ্ঞঃ পুত্রস্য ভাষতঃ। অতীত-সময়ে কালে প্রিয়াং ভার্য্যামনিন্দিতাম্॥ দ্রুপদস্য সুতাং তন্বীং পাঞ্চালীং পাবকাত্মজাম্। সত্যার্জ্জবগুণোপেতাং ভর্ত্তুঃ প্রিয়হিতে রতাম্॥ উবাচ রহসি প্রীতঃ কৃষ্ণাং সর্ব্বার্থকোবিদঃ। উত্তরং ব্রূহি কল্যাণি ক্ষিপ্রং মদ্বচনা-দিদম্॥ অয়ং বৈ পাণ্ডবস্যাসীৎ সারথিঃ সম্মতো দৃঢ়ঃ। মহাযুদ্ধেষু সংসিদ্ধঃ স তে যন্তা ভবিষ্যতি॥ বৈশম্পায়ন উবাচ।) তস্য তদ্বচনং স্ত্রীষু ভাষতশ্চ পুনঃ পুনঃ। ন চামর্ষত পাঞ্চালী বীভৎসোঃ পরিকীর্ত্তনম্॥ অথৈনমুপসঙ্গম্য স্ত্রীমধ্যে সা যশস্বিনী। ব্রীড়মানেব শনকৈরিদং বচনমব্রবীৎ॥ যোঽসৌ বৃহদ্বারণাভো যুবা সুপ্রিয়দর্শনঃ। বৃহন্নলেতি বিখ্যাতঃ পার্থস্যাসীৎ স সারথিঃ॥ ধনুষ্মতাং বর-শ্চাসীত্তস্য শিষ্যো মহাত্মনঃ। দৃষ্টপূর্ব্বো ময়া বীরশ্চরন্ত্যা পাণ্ডবান্ প্রতি॥ যদা তৎ পাবকো দাবমদহৎ খাণ্ডবং বনম্। অর্জ্জুনস্য তদানেন সংগৃহীতা হয়োত্তমাঃ॥ তেন সারথিনা পার্থঃ সর্ব্বভূতানি সর্ব্বশঃ। অজয়ৎ খাণ্ডবপ্রস্থে ন হি যন্তাস্তি তাদৃশঃ॥

উত্তর উবাচ। সৈরন্ধ্রি জানাসি তথা যুবানং, নপুংসকো নৈব ভবেদ্ যথাসৌ। অহং ন শক্নোমি বৃহন্নলাং শুভে, বক্তুং স্বয়ং যচ্ছ হয়ান্ মমেতি বৈ॥

দ্রৌপদ্যুবাচ। যেয়ং কুমারী সুশ্রোণী ভগিনী তে যবীয়সী। অস্যাঃ স বীর বচনং করিষ্যতি ন সংশয়ঃ॥ যদি বৈ সারথিঃ স স্যাৎ কুরূন্ সর্ব্বান্ন সংশয়ঃ।

জিত্বা গাশ্চ সমাদায় ধ্রুবমাগমনং ভবেৎ॥ এবমুক্তঃ স সৈরন্ধ্র্যা ভগিনীং প্রত্যভাষত। গচ্ছ ত্বমনবদ্যাঙ্গি তামানয় বৃহন্নলাম্॥ সা ভ্রাত্রা প্রেষিতা শীঘ্রমগচ্ছন্নর্ত্তনালয়ম্। যত্রাস্তে স মহাবাহুশ্ছন্নঃ সত্রেণ পাণ্ডবঃ॥ ১-২৪

ইতি মহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণ্যুত্তর-গোগ্রহে সৈরন্ধ্রীবাক্যং নাম ষট্‌ত্রিংশত্তমোঽধ্যায়ঃ।

---

## সপ্তত্রিংশত্তমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। সা প্রাদ্রবৎ কাঞ্চনমাল্যধারিণী, জ্যেষ্ঠেন ভ্রাত্রা প্রহিতা যশস্বিনী। সুদক্ষিণা বেদিবিলগ্নমধ্যা, সা পদ্মপত্রাভনিভা শিখণ্ডিনী॥ তন্বী শুভাঙ্গী মণিচিত্রমেখলা, মৎস্যস্য রাজ্ঞস্তনয়া শ্রিয়া বৃতা। তন্নর্ত্তনাগারমরাল-পক্ষ্মা, শতহ্রদা মেঘমিবাভ্যপদ্যত॥ সা হস্তিহস্তোপমসংহতোরুরনিন্দিতা চারুদতী সুমধ্যমা। আসাদ্য তং বৈ বরমাল্যধারিণী, পার্থং শুভা নাগবধূরিব দ্বিপম্॥ সা রত্নভূতা মনসঃ প্রিয়ার্চ্চিতা, [ শ্রিয়াবৃতা ] সুতা বিরাটস্য যথেন্দ্র-লক্ষ্মীঃ। সুদর্শনীয়া প্রমুখে যশস্বিনী, প্রীত্যাব্রবীদর্জ্জুনমায়তেক্ষণা॥ সুসংহ-তোরুং কনকোজ্জ্বলত্বচং, পার্থঃ কুমারীং স তদাভ্যভাষত। কিমাগমঃ কাঞ্চন-মাল্যধারিণি, মৃগাক্ষি কিং ত্বং ত্বরিতেব ভামিনি॥ কিং তে মুখং সুন্দরি ন প্রসন্নমাচক্ষ্ব তত্ত্বং মম শীঘ্রমঙ্গনে॥

বৈশম্পায়ন উবাচ। স তাং দৃষ্ট্বা বিশালাক্ষীং রাজপুত্রীং সখীং সখা। প্রহসন্নব্রবীদ্রাজন্ কিমাগমনমিত্যুত॥ তমব্রবীদ্রাজপুত্রী সমুপেত্য নরর্ষভম্। প্রণয়ং ভাবয়ন্তী সা সখীমধ্য ইদং বচঃ॥ গাবো রাষ্ট্রস্য কুরুভিঃ কাল্যন্তে নো বৃহন্নলে। তান্ বিজেতুং মম ভ্রাতা প্রযাস্যতি ধনুর্দ্ধরঃ॥ নাচিরং নিহতস্তস্য সংগ্রামে রথসারথিঃ। তেন নাস্তি সমঃ সূতো যোঽস্য সারথ্যমাচরেৎ॥ তস্মৈ প্রযতমানায় সারথ্যর্থং বৃহন্নলে। আচচক্ষে হয়জ্ঞানে সৈরন্ধ্রী কৌশলং তব॥ (অর্জ্জুনস্য কিলাসীস্ত্বং সারথির্দয়িতঃ পুরা। ত্বয়াজয়ৎ সহায়েন পৃথিবীং পাণ্ডবর্ষভঃ॥) সারথ্যঞ্চ মম ভ্রাতুঃ কুরু সাধু বৃহন্নলে। দূরাদ্দূরতরং গাবো হ্রিয়ন্তে কুরুভির্হি নঃ॥ অথৈতদ্বচনং মেঽদ্য নিযুক্তা ন করিষ্যসি। প্রণয়াদুচ্যমানা ত্বং পরিত্যক্ষ্যামি জীবিতম্॥ এবমুক্তস্তু সুশ্রোণ্যা তয়া সখ্যা পরন্তপঃ। জগাম রাজপুত্রস্য সকাশমমিতৌজসঃ॥ তং সা ব্রজন্তং ত্বরিতং প্রভিন্নমিব কুঞ্জরম্। অন্বগচ্ছদ্বিশালাক্ষী গজং গজবধূরিব॥ দূরাদেব তু তাং

প্রেক্ষ্য রাজপুত্রোঽভ্যভাষত। ত্বয়া সারথিনা পার্থঃ খাণ্ডবেঽগ্নিমতর্পয়ৎ॥ পৃথিবীমজয়ৎ কৃৎস্নাং কুন্তীপুত্রো ধনঞ্জয়ঃ। সৈরন্ধ্রী ত্বাং সমাচষ্টে সা হি জানাতি পাণ্ডবান্॥ সংযচ্ছ মামকানশ্বাংস্তথৈব ত্বং বৃহন্নলে। কুরুভির্যোৎস্যমানস্য গোধনানি পরীপ্সতঃ॥ অর্জ্জুনস্য কিলাসীত্বং সারথির্দ্দয়িতঃ পুরা। ত্বয়াঽজয়ৎ সহায়েন পৃথিবীং পাণ্ডবর্ষভঃ॥ এবমুক্তা প্রত্যুবাচ রাজপুত্রং বৃহন্নলা। কা শক্তির্ম্মম সারথ্যং কর্তুং সংগ্রামমূর্দ্ধনি॥ গীতং বা যদি বা নৃত্যং বাদিত্রং বা পৃথগ্বিধম্। তৎ করিষ্যামি ভদ্রন্তে সারথ্যন্তু কুতো মম॥

উত্তর উবাচ। গায়নো নর্ত্তনো বাপি বাদনো বা পুনর্ভব। ক্ষিপ্রং মে রথমাস্থায় নিগৃহ্ণীষ হয়োত্তমান্॥

বৈশম্পায়ন উবাচ। স তত্র নর্ম্মসংযুক্তমকরোৎ পাণ্ডবো বহু। উত্তরায়াঃ প্রমুখতঃ সর্ব্বং জানন্নরিন্দমঃ॥ ঊর্দ্ধমুৎক্ষিপ্য কবচং শরীরে প্রত্যমুঞ্চত। কুমার্য্যস্তত্র তং দৃষ্ট্বা প্রাহসন্ পৃথুলোচনাঃ॥ স তু দৃষ্ট্বা পিনহ্যন্তং স্বয়মেবোত্তরস্ততঃ। কবচেন মহার্হেণ সমনহ্যদ্ বৃহন্নলাম্॥ বভার কব চঞ্চাগ্র্যং স্বয়মপ্যংশুমৎপ্রভম্। ধ্বজং সিংহং সমুচ্ছ্রিত্য সারথ্যং সমকল্পয়ৎ॥ ধনূংষি চ মহার্হাণি বাণাংশ্চ রুচিরান্ বহূন্। আদায় প্রযযৌ বীরঃ স বৃহন্নলসারথিঃ॥ অথোত্তরা চ কন্যাশ্চ সখ্যস্তামব্রুবংস্তদা। বৃহন্নলে আনয়েথা বাসাংসি রুচিরাণি চ॥ পাঞ্চালিকার্থং চিত্রাণি সূক্ষ্মাণি চ মৃদূনি চ। বিজিত্য সংগ্রামগতান্ ভীষ্মদ্রোণমুখান্ কুরূন্॥ এবং তা ব্রুবতীঃ কন্যাঃ সহিতাঃ পাণ্ডুনন্দনঃ। প্রত্যুবাচ হসন্ পার্থো মেঘদুন্দুভিনিস্বনঃ॥

বৃহন্নলোবাচ। যদ্যুত্তরোঽয়ং সংগ্রামে বিজেষ্যতি মহারথান্। তদা হরিষ্যে বাসাংসি দিব্যানি রুচিরাণি চ॥

বৈশম্পায়ন উবাচ। এবমুক্ত্বা তু বীভৎসুস্ততঃ প্রাচোদয়দ্ধয়ান্। কুরূনভিমুখঃ শূরো নানাধ্বজপতাকিনঃ॥ তমুত্তরং বীক্ষ্য রথোত্তমস্থিতং, বৃহন্নলায়াঃ সহিতং মহাভুজম্। স্ত্রিয়শ্চ কন্যাশ্চ দ্বিজাশ্চ সুব্রতাঃ, প্রদক্ষিণং চক্রুরথোচুরঙ্গনাঃ॥ যদর্জ্জুনস্যর্ষভতুল্যগামিনঃ, পুরাভবৎ খাণ্ডবদাহমঙ্গলম্। কুরূন্ সমাসাদ্য রণে বৃহন্নলে, সহোত্তরেণাদ্য তদস্তু মঙ্গলম্॥ ১—৩৪

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণ্যুত্তরগোগ্রহে সপ্তত্রিংশত্তমোঽধ্যায়ঃ।

## অষ্টাত্রিংশত্তমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। স রাজধান্যা নির্য্যায় বৈরাটিঃ পৃথিবীঞ্জয়ঃ। প্রয়াহীত্যব্রবীৎ সূতং যত্র তে কুরবো গতাঃ॥ সমবেতান্ কুরূন্ সর্ব্বান্ বিজিগীষূন্ বিজিত্য বৈ। গাস্তেষাং ক্ষিপ্রমাদায় পুনরেষ্যাম্যহং পুরম্॥ ততস্তাংশ্চোদয়ামাস সদশ্বান্ পাণ্ডুনন্দনঃ। তে হয়া নরসিংহেন চোদিতা বাতরংহসঃ॥ আলিখন্ত ইবাকাশমূহুঃ কাঞ্চনমালিনঃ॥ নাতিদূরমথো গত্বা মৎস্যপুত্রধনঞ্জয়ৌ। অবৈক্ষেতামমিত্রঘ্নৌ কুরূণাং বলিনাং বলম্॥ শ্মশানাভিমুখো গত্বা আসসাদ কুরূনথ। তৎসমীপেঽন্ববীক্ষেতাং ব্যূঢ়ানীকঞ্চ সর্ব্বশঃ॥ তদনীকং মহত্তেষাং বিততং সাগরোপমম্। সর্পমাণমিবাকাশে বনং বহুলপাদপম্॥ দদৃশে পার্থিবো রেণুর্জনিতস্তেন সর্পতা॥ দৃষ্টিপ্রণাশো ভূতানাং দিবস্পৃক্ কুরুসত্তম। তদনীকং মহদ্ দৃষ্ট্বা গজাশ্বরথসংকুলম্॥ কর্ণ-দুর্য্যোধন-কৃপৈর্গুপ্তং শান্তনবেন চ। দ্রোণেন চ সপুত্রেণ মহেষ্বাসেন ধীমতা॥ হৃষ্টরোমা ভয়োদ্বিগ্নঃ পার্থং বৈরাটিরব্রবীৎ॥

উত্তর উবাচ। নোৎসহে কুরুভির্যোদ্ধুং রোমহর্ষঞ্চ পশ্য মে। বহুপ্রবীরমত্যুগ্রং দেবৈরপি দুরাসদম্॥ প্রতিযোদ্ধুং ন শক্নোমি কুরুসৈন্যমনন্তকম্। নাশংসে ভারতীং সেনাং প্রবেষ্টুং ভীমকার্ম্মুকাম্। রথনাগাশ্বকলিলাং পত্তিধ্বজসমাকুলাম্॥ দৃষ্ট্বৈব হি পরানাজৌ মনঃ প্রব্যথতীব মে। যত্র দ্রোণশ্চ ভীষ্মশ্চ কৃপঃ কর্ণো বিবিংশতিঃ। অশ্বত্থামা বিকর্ণশ্চ সোমদত্তশ্চ বাহ্লিকঃ। দুর্য্যোধনস্তথা বীরো রাজা চ রথিনাং বরঃ॥ দ্যুতিমন্তো মহেষ্বাসাঃ সর্ব্বে যুদ্ধবিশারদাঃ। দৃষ্ট্বৈব হি কুরূনেতান্ ব্যূঢ়ানীকান্ প্রহারিণঃ। হৃষিতানি চ রোমাণি কশ্মলঞ্চাগতং মম॥

বৈশম্পায়ন উবাচ। অবিজাতো বিজাতস্য মূর্খো ধূর্ত্তস্য পশ্যতঃ। পরিদেবয়তে মন্দঃ সকাশে সব্যসাচিনঃ॥

উত্তর উবাচ। ত্রিগর্ত্তান্ মে পিতা যাতঃ শূন্যেঽস্মিন্ সন্নিধায় মাম্। সর্ব্বাং সেনামুপাদায় ন মে সন্তীহ সৈনিকাঃ॥ সোঽহমেকো বহূন্ বালঃ কৃতাস্ত্রানকৃতশ্রমঃ। প্রতিযোদ্ধুং ন শক্নোমি নিবর্ত্তস্ব বৃহন্নলে॥

বৃহন্নলোবাচ। ভয়েন দীনরূপোঽসি দ্বিষতাং হর্ষবর্দ্ধনঃ। ন চ তাবৎ কৃতং কর্ম্ম পরৈঃ কিঞ্চিদ্রণাজিরে॥ স্বয়মেব চ মামাত্থ বহ মাং কৌরবান্ প্রতি। সোঽহং ত্বাং তত্র নেষ্যামি যত্রৈতে বহুলা ধ্বজাঃ॥ মধ্যমামিষগৃদ্ধানাং [মধ্যমামিষগৃধ্রানাং] কুরূণামাততায়িনাম্। নেষ্যামি ত্বাং মহাবাহো

পৃথিব্যামপি যুধ্যতাম্॥ তথা স্ত্রীষু প্রতিশ্রুত্য পৌরুষং পুরুষেষু চ। কথ্যমানোঽভিনির্য্যায় কিমর্থং ন যুযুৎসসে॥ ন চেদ্বিজিত্য গাস্তাস্ত্বং গৃহান্ বৈ প্রতিযাস্যসি। প্রহসিষ্যন্তি বীরাস্ত্বাং নরা নার্য্যশ্চ সঙ্গতাঃ॥ অহমপ্যত্র সৈরন্ধ্র্যা খ্যাতঃ সারথ্যকর্ম্মণি। ন চ শক্ষ্যাম্যনির্জ্জিত্য গাঃ প্রযাতুং পুরং প্রতি॥ স্তোত্রেণ চৈব সৈরন্ধ্র্যাস্তব বাক্যেন তেন চ। কথং ন যুধ্যেয়-মহং কুরূন্ সর্ব্বান্ স্থিরো ভব॥

উত্তর উবাচ। কামং হরন্তু মৎস্যানাং ভূয়াংসঃ কুরবো ধনম্। প্রহসন্তু চ মাং নার্য্যো নরাশ্চাপি বৃহন্নলে॥ সংগ্রামে ন চ কার্য্যং মে গাবো গচ্ছন্তু চাপি মে। শূন্যং মে নগরঞ্চাপি পিতুশ্চৈব বিভেম্যহম্॥ নিবর্ত্তয় রথং তূর্ণং হৃদয়ং মে বিদীর্য্যতে॥

বৈশম্পায়ন উবাচ। ইত্যুক্ত্বা প্রাদ্রবদ্ভীতো রথাৎ প্রস্কন্দ্য কুণ্ডলী। ত্যক্ত্বা মানঞ্চ দর্পঞ্চ বিসৃজ্য সশরং ধনুঃ॥

বৃহন্নলোবাচ। নৈষ শূরৈঃ স্মৃতো ধর্ম্মঃ ক্ষত্রিয়স্য পলায়নম্। শ্রেয়স্তু মরণং যুদ্ধে ন ভীতস্য পলায়নম্॥

বৈশম্পায়ন উবাচ। এবমুক্ত্বা তু কৌন্তেয়ঃ সোঽবপ্লুত্য রথোত্তমাৎ। তমন্বধাবদ্ধাবন্তং রাজপুত্রং ধনঞ্জয়ঃ॥ দীর্ঘাং বেণীং বিধুন্বানঃ সাধুরক্তে চ বাসসী। বিধূয় বেণীং ধাবন্তমজানন্তোঽর্জ্জুনং তদা॥ সৈনিকাঃ প্রাহসন্ কেচিত্তথারূপমবেক্ষ্য তম্॥ সুশীঘ্রমভিধাবন্তং সংপ্রেক্ষ্য কুরবোঽব্রুবন্। ক এষ বেশসঞ্ছন্নো ভস্মনেব হুতাশনঃ। কিঞ্চিদস্য যথা পুংসঃ কিঞ্চিদস্য যথা স্ত্রিয়ঃ॥ সারূপ্যমর্জ্জুনস্যেব ক্লীবরূপং বিভর্ত্তি চ। তদেবৈতচ্ছিরোগ্রীবং তৌ বাহূ পরিঘোপমৌ॥ তদ্বদেবাস্য বিক্রান্তং নায়মন্যো ধনঞ্জয়াৎ। অমরেষ্বিব দেবেন্দ্রো মানুষেষু ধনঞ্জয়ঃ॥ একঃ কোঽস্মানুপায়ায়াদন্যো লোকে ধনঞ্জয়াৎ॥ একঃ পুত্রো বিরাটস্য শূন্যে সন্নিহিতঃ পুরে। স এষ কিল নির্য্যাতো বালভাবান্ন পৌরুষাৎ॥ সত্রেণ নূনং ছন্নং হি চরন্তং পার্থ-মর্জ্জুনম্। উত্তরঃ সারথিং কৃত্বা নির্য্যাতো নগরাদ্বহিঃ॥ স নো মন্যামহে দৃষ্টা ভীত এব পলায়তে। তং নূনমেষ ধাবন্তং জিঘৃক্ষতি ধনঞ্জয়ঃ॥

বৈশম্পায়ন উবাচ। ইতি স্ম কুরবঃ সর্ব্বে বিমৃশন্তঃ পৃথক্ পৃথক্। ন চ ব্যবসিতুং কিঞ্চিদুত্তরং শক্নুবন্তি তে॥ ছন্নং তথা তং সত্রেণ পাণ্ডবং প্রেক্ষ্য ভারত। উত্তরন্তু প্রধাবন্তমনুদ্রুত্য ধনঞ্জয়ঃ॥ গত্বা পদশতং তূর্ণং কেশপক্ষে পরামৃশৎ॥ সোঽর্জ্জুনেন পরামৃষ্টঃ পর্য্যদেবয়দার্ত্তবৎ। বহুলং

কৃপণঞ্চৈব বিরাটস্য সুতস্তদা॥ উত্তর উবাচ। শৃণুয়াস্থং হি কল্যাণি বৃহন্নলে সুমধ্যমে। নিবর্ত্তয় রথং ক্ষিপ্রং জীবন্ ভদ্রাণি পশ্যতি॥ শাতকুম্ভস্য শুদ্ধস্য শতনিষ্কান্ দদামি তে। মণীনষ্টৌ চ বৈদূর্য্যান্ হেমবদ্ধান্মহাপ্রভান্॥ হেমদণ্ডপ্রতিচ্ছন্নং রথং যুক্তঞ্চ সুব্রতৈঃ। মত্তাংশ্চ দশমাতঙ্গান্ মুঞ্চ মাং ত্বং বৃহন্নলে॥

বৈশম্পায়ন উবাচ। এবমাদীনি বাক্যানি বিলপন্তমচেতসম্। প্রহস্য পুরুষব্যাঘ্রো রথস্যান্তিকমানয়ৎ॥ অথৈনমব্রবীৎ পার্থো ভয়ার্ত্তং নষ্টচেতসম্। যদি নোৎসহসে যোদ্ধুং শত্রুভিঃ শত্রুকর্ষণ॥ এহি মে ত্বং হয়ান্ যচ্ছ যুধ্যমানস্য শত্রুভিঃ। প্রযাহ্যেতদ্রথানীকং মদ্বাহুবলমাশ্রিতঃ॥ অপ্রধৃষ্যতমং ঘোরং গুপ্তং বীরৈর্মহারথৈঃ। মা ভৈস্ত্বং রাজপুত্রাগ্র্য ক্ষত্রিয়োঽসি পরন্তপ॥ কথং পুরুষশার্দ্দূল শত্রুমধ্যে বিষীদসি। অহং বৈ কুরুভির্যোৎস্যে বিজেষ্যামি চ তে পশূন্॥ প্রবিশ্যৈতদ্রথানীকমপ্রধৃষ্যং দুরাসদম্। যন্তা ভব রথিশ্রেষ্ঠ যোৎস্যেঽহং কুরুভিঃ সহ॥ এবং ব্রুবাণো বীভৎসুর্বৈরাটিমপরাজিতঃ। সমাশ্বাস্য মুহূর্ত্তং তমুত্তরং প্রত্যপদ্যত। তত এনং বিচেষ্টন্তমকামং ভয়পীড়িতম্। রথমারোপয়ামাস পার্থঃ প্রহরতাং বরঃ॥ ১—৫১

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি উত্তরভঙ্গো নাম অষ্টাত্রিংশত্তমোঽধ্যায়ঃ।

---

## ঊনচত্বারিংশত্তমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। তং দৃষ্ট্বা ক্লীবরূপেণ চরন্তং পার্থমর্জ্জুনম্। শমীমভিমুখং যান্তং রথমারোপ্য চোত্তরম্॥ ভীষ্মদ্রোণমুখাস্তত্র কুরবো রথিসত্তমাঃ। বিত্রস্তমনসঃ সর্ব্বে ধনঞ্জয়কৃতাদ্ভয়াৎ॥ তানবেক্ষ্য হতোৎসাহানুৎপাতানপি চাদ্ভুতান্। গুরুঃ শস্ত্রভৃতাং শ্রেষ্ঠো ভারদ্বাজোঽভ্যভাষত॥ চণ্ডাশ্চ বাতাঃ সংবান্তি রূক্ষাঃ শর্করবর্ষিণঃ। ভস্মবর্ণপ্রকাশেন তমসা সংবৃতং নভঃ॥ নিঃসরন্তি চ কোষেভ্যঃ শস্ত্রাণি বিবিধানি চ। শিবাশ্চ বিনদন্ত্যেতা দীপ্তায়াং দিশি দারুণাঃ॥ হয়াশ্চাশ্রূণি মুঞ্চন্তি ধ্বজাঃ কম্পন্ত্যকম্পিতাঃ। রূক্ষবর্ণাশ্চ জলদা দৃশ্যন্তেঽদ্ভুতদর্শনাঃ॥ যত্তা ভবন্তস্তিষ্ঠন্তু সাধ্বসং সমুপস্থিতম্॥ রক্ষধ্বমপি চাত্মানং ব্যূহধ্বং বাহিনীমপি। বৈশসঞ্চ প্রতীক্ষধ্বং রক্ষধ্বঞ্চাপি গোধনম্॥ (যাদৃশান্যত্র রূপাণি দৃশ্যন্তে চ বহূন্যপি)। এষ বীরো মহেষ্বাসঃ

সর্ব্বশস্ত্রভৃতাং বরঃ। আগতঃ ক্লীবরূপেণ পার্থো নাত্যত্র সংশয়ঃ॥ নদীজ-লঙ্কেশবনারিকেতুর্নগাহ্বয়ো নাম নগারিসূনুঃ। এষোঽঙ্গনাবেশধরঃ কিরীটী, জিত্বা বয়ং নেষ্যতি চাস্ত গাবঃ॥ স এব পার্থো বিক্রান্তঃ সব্যসাচী পরন্তপঃ। নাযুদ্ধেন নিবর্ত্তেত সর্ব্বৈরপি সুরাসুরৈঃ॥ ক্লেশিতশ্চ বনে শূরো বাসবেন চ শিক্ষিতঃ। অমর্ষবশমাপন্নো বাসবপ্রতিমো যুধি॥ নেহাস্ত প্রতিযোদ্ধারমহং পশ্যামি কৌরবাঃ। মহাদেবোঽপি পার্থেন শ্রূয়তে যুধি তোষিতঃ॥ কিরাতবেশপ্রচ্ছন্নো গিরৌ হিমবতি প্রভুঃ॥

কর্ণ উবাচ। সদা ভবান্ ফাল্গুনস্ত গুণৈরস্মান্ বিকত্থতে। ন চার্জ্জুনঃ কলাপূর্ণো মম দুর্য্যোধনস্ত চ॥

দুর্য্যোধন উবাচ। যদ্যেষ পার্থো রাধেয় কৃতং কার্য্যং ভবেন্মম। জ্ঞাতাঃ পুনশ্চরিষ্যন্তি দ্বাদশাধিকবৎসরান্॥ অথৈষ কশ্চিদেবান্তঃ ক্লীববেশেন মানবঃ। শরৈরেনং সুনিশিতৈঃ পাতয়িষ্যামি ভূতলে॥

বৈশম্পায়ন উবাচ। তস্মিন্ ব্রুবতি তদ্বাক্যং ধার্ত্তরাষ্ট্রে পরন্তপ। ভীষ্মো দ্রোণঃ কৃপো দ্রৌণিঃ পৌরুষং তদপূজয়ন্॥ ১—১৭

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণ্যুত্তর-গোগ্রহে অর্জ্জুনপ্রশংসানামৈকোনচত্বারিংশত্তমোঽধ্যায়ঃ।

---

## চত্বারিংশত্তমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। তাং শমীমুপসঙ্গম্য পার্থো বৈরাটিমব্রবীৎ। সুকুমারং সমাজ্ঞায় সংগ্রামে নাতিকোবিদম্॥ সমাদিষ্টো ময়া ক্ষিপ্রং ত্বং ধনূংষ্যবতারয়। নেমানি হি ত্বদীয়ানি সোঢ়ুং শক্ষ্যন্তি মে বলম্॥ ভারং বাপি গুরুং বোঢ়ুং কুঞ্জরং বাপি মর্দ্দিতুম্। মম বা বাহুবিক্ষেপং শত্রূনিহ বিজেষ্যতঃ॥ তস্মাদ্ভূমিঞ্জয়ারোহ শমীমেতাং পলাশিনীম্। অস্যাং হি পাণ্ডুপুত্রাণাং ধনূংষি নিহিতান্যুত॥ যুধিষ্ঠিরস্য ভীমস্য বীভৎসোর্যময়োস্তথা। ধ্বজাঃ শরাশ্চ শূরাণাং দিব্যানি কবচানি চ॥ অত্র চৈতন্মহাবীর্য্যং ধনুঃ পার্থস্য গাণ্ডিবম্। একং শতসহস্রেণ সম্মিতং রাষ্ট্রবর্দ্ধনম্॥ ব্যায়ামসহমত্যর্থং তৃণরাজসমং মহৎ। সর্ব্বায়ুধমহামাত্রং শত্রুসম্বাধকারকম্॥ সুবর্ণবিকৃতং দিব্যং

রুক্মায়তমব্রণম্। অলং ভারং গুরুং বোঢ়ুং দারুণং চারুদর্শনম্॥ তাদৃশান্যেব সর্ব্বাণি বলবন্তি দৃঢ়ানি চ। যুধিষ্ঠিরস্য ভীমস্য যময়োশ্চ তথোত্তর (বীভৎসোর্যময়োস্তথা)॥ ১—৮

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণ্যুত্তরগোগ্রহে অস্ত্রদর্শনং নাম চত্বারিংশত্তমোঽধ্যায়ঃ।

---

## একচত্বারিংশত্তমোঽধ্যায়ঃ

উত্তর উবাচ। অস্মিন্ বৃক্ষে কিলোদ্বদ্ধং শরীরমিতি নঃ শ্রুতম্। তদহং রাজপুত্রঃ সন্ স্পৃশেয়ং পাণিনা কথম্॥ নৈবংবিধং ময়া যুক্তমালব্ধুং ক্ষত্রযোনিনা। মহতা রাজপুত্রেণ মন্ত্রব্রতবিদা সতা॥ স্পৃষ্টবন্তং শরীরং মাং শববাহমিবাশুচিম্। কথং বা ব্যবহার্য্যং বৈ কুর্ব্বীথাস্ত্বং বৃহন্নলে॥

বৃহন্নলোবাচ। ব্যবহার্য্যশ্চ লোকেষু শুচিশ্চৈব ভবিষ্যসি। ধনূংষ্যেতানি মা ভৈস্ত্বং শরীরং নাত্র বিদ্যতে॥ দায়াদং মৎস্যরাজস্য কুলে জাতং মনস্বিনাম্। কথং ত্বাং নিন্দিতং কর্ম্ম কারয়েয়ং নৃপাত্মজ॥

বৈশম্পায়ন উবাচ। এবমুক্তঃ স পার্থেন রথাৎ প্রস্কন্দ্য কুণ্ডলী। আরুরোহ শমীবৃক্ষং বৈরাটিরবশস্তদা॥ তমন্বশাসচ্ছত্রুঘ্নো রথে তিষ্ঠন্ ধনঞ্জয়ঃ। অবরোপয় বৃক্ষাগ্রাদ্ধনূংষ্যেতানি মা চিরম্॥ পরিবেষ্টনমেতেষাং ক্ষিপ্রঞ্চৈব ব্যপানুদ। সোঽপহৃত্য মহার্হাণি ধনূংষি পৃথুবক্ষসাম্॥ পরিবেষ্টনপত্রাণি বিমুচ্য সমুপানয়ৎ। ততঃ সন্নহনান্যেষাং পরিমুচ্য সমন্ততঃ॥ অপশ্যদ্গাণ্ডিবং তত্র চতুর্ভিরপরৈঃ সহ॥ তেষাং বিমুচ্যমানানাং ধনুষামর্কবর্চ্চসাম্। বিনিশ্চেরুঃ প্রভা দিব্যা গ্রহাণামুদয়েষ্বিব॥ স তেষাং রূপমালোক্য ভোগিনামিব জৃম্ভতাম্। হৃষ্টরোমা ভয়োদ্বিগ্নঃ ক্ষণেন সমপদ্যত॥ [তদুপস্পৃশ্য শক্রঘ্নঃ স তদার্জ্জুনমব্রবীৎ। সারথে কিমিদং শেতে নাগেন্দ্রো বাপি বা ধনম্]॥ সংস্পৃশ্য তানি চাপানি ভানুমন্তি বৃহন্তি চ। বৈরাটিরর্জ্জুনং রাজন্নিদং বচনমব্রবীৎ॥ ১—১২

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণ্যুত্তরগোগ্রহে অস্ত্রারোপণে একচত্বারিংশত্তমোঽধ্যায়ঃ।

## দ্বাচত্বারিংশত্তমোঽধ্যায়ঃ

উত্তর উবাচ। বিন্দবো জাতরূপস্য শতং যস্মিন্নিপাতিতাঃ। সহস্রকোট্যঃ সৌবর্ণাঃ কস্যৈতদ্ধনুরুত্তমম্॥ বারণা যত্র সৌবর্ণাঃ পৃষ্ঠে ভাসন্তি দংশিতাঃ। সুপার্শ্বং সুগ্রহঞ্চৈব কস্যৈতদ্ধনুরুত্তমম্॥ তপনীয়স্য শুদ্ধস্য পৃষ্ঠে যস্যেন্দ্রগোপকাঃ। পৃষ্ঠে বিভক্তাঃ শোভন্তে কস্যৈতদ্ধনুরুত্তমম্॥ সূর্য্যা যত্র চ সৌবর্ণাস্ত্রয়ো ভাসন্তি দংশিতাঃ। তেজসা প্রজ্বলন্তো বৈ কস্যৈতদ্ধনুরুত্তমম্॥ শলভা যত্র সৌবর্ণাস্তপনীয়বিভূষিতাঃ। সুবর্ণমণিচিত্রঞ্চ কস্যৈতদ্ধনুরুত্তমম্॥ ইমে চ কস্য নারাচাঃ সাহস্রা লোমবাহিনঃ। সমন্তাৎ কলধৌতাগ্রা উপাসঙ্গে হিরণ্ময়ে॥ বিপাঠাঃ পৃথবঃ কস্য গার্দ্ধপত্রাঃ শিলাশিতাঃ। হারিদ্রবর্ণাঃ শতশঃ পীতাঃ সর্ব্বায়সাঃ শরাঃ॥ কস্যায়মসিতশ্চাপঃ পঞ্চশার্দ্দূললক্ষণঃ। বরাহকর্ণব্যামিশ্রান্ শরান্ ধারয়তে দশ॥ কস্যেমে পৃথবো দীর্ঘাঃ সর্ব্বপারশবাঃ শরাঃ (চন্দ্রবিম্বার্দ্ধদর্শনাঃ)। শতানি সপ্ত তিষ্ঠন্তি নারাচা রুধিরাশনাঃ॥ কস্যেমে শুকপত্রাভৈঃ পূর্ব্বৈরর্দ্ধৈঃ সুবাসসঃ। উত্তরৈরায়সৈঃ পীতৈর্হেমপুঙ্খৈঃ শিলাশিতাঃ॥ গুরুভারসহো দিব্যঃ শাত্রবাণাং ভয়ঙ্করঃ। কস্যায়ং সায়কো দীর্ঘঃ শিলীপৃষ্ঠং শিলীমুখঃ॥ বৈয়াঘ্রকোষে নিহিতো হেমচিত্রৎসরুর্ম্মহান্। সুফলশ্চিত্রকোষশ্চ কিঙ্কিণীসায়কো মহান্॥ কস্য হেমৎসরুর্দ্দিব্যঃ খড়্গঃ পরমনির্ব্রণঃ। কস্যায়ং বিমলঃ খড়্গো গব্যে কোষে সমর্পিতঃ॥ হেমৎসরুরনাধৃষ্যো নৈষধ্যো ভারসাধনঃ। কস্য পঞ্চনখে কোষে সায়কো হেমবিগ্রহঃ॥ প্রমাণরূপসম্পন্নঃ পীতশ্চাকাশসন্নিভঃ। কস্য হেমময়ে কোষে সুতপ্তে পাবকপ্রভে॥ নিস্ত্রিংশোঽয়ং গুরুঃ পীতঃ শৈক্যঃ পরমনির্ব্রণঃ। (সায়কঃ পরনির্ব্রণঃ) কস্যায়মসিতঃ খড়্গো হেমবিন্দুভিরাবৃতঃ॥ আশীবিষসমস্পর্শঃ পরকায়প্রভেদনঃ। গুরুভারসহো দিব্যঃ সপত্নানাং ভয়প্রদঃ॥ নির্দ্দিশস্ব যথাতত্ত্বং ময়া পৃষ্টা বৃহন্নলে। বিস্ময়ো মে পরো জাতো দৃষ্ট্বা সর্ব্বমিদং মহৎ॥ ১—১৮

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণ্যুত্তরগোগ্রহে আয়ুধদর্শনে দ্বাচত্বারিংশত্তমোঽধ্যায়ঃ।

---

## ত্রিচত্বারিংশত্তমোঽধ্যায়ঃ

বৃহন্নলোবাচ। যন্মাং পূর্ব্বমিহাপৃচ্ছঃ শত্রুসেনানিবর্হণম্। গাণ্ডীবমেতৎ পার্থস্য লোকেষু বিদিতং ধনুঃ॥ সর্ব্বায়ুধমহামাত্রং শাতকুম্ভপরিষ্কৃতম্।

এতত্তদর্জ্জুনস্যাসীদ্গাণ্ডীবং পরমায়ুধম্॥ যত্তচ্ছতসহস্রেণ সম্মিতং রাষ্ট্রবর্দ্ধনম্। যেন দেবান্মনুষ্যাংশ্চ পার্থো বিজয়তে মৃধে॥ চিত্রমুচ্চাবচৈর্ব্বর্ণৈঃ শ্লক্ষ্ণমায়তম-ব্রণম্। দেবমানুষগন্ধর্ব্বৈঃ পূজিতং শাশ্বতীঃ সমাঃ॥ এতদ্বর্ষসহস্রন্তু ব্রহ্মা পূর্ব্বমধারয়ৎ। ততোঽনন্তরমেবাথ প্রজাপতিরধারয়ৎ॥ ত্রীণি পঞ্চশতঞ্চৈব শক্রোঽশীতিঞ্চ পঞ্চ বৈ। সোমঃ পঞ্চশতং রাজা তথৈব বরুণঃ শতম্॥ পার্থঃ পঞ্চ চ ষষ্টিঞ্চ বর্ষাণি শ্বেতবাহনঃ। মহাবীর্য্যং মহদ্দিব্যমেতদ্ধনুরনুত্তমম্॥ এতৎ পার্থমনুপ্রাপ্তং বরুণাচ্চারুদর্শনম্। পূজিতং সুরমর্ত্ত্যেষু বিভর্ত্তি পরমং বপুঃ॥ সুপার্শ্বং ভীমসেনস্য জাতরূপগ্রহং ধনুঃ। যেন পার্থোঽজয়ৎ কৃৎস্নাং দিশং প্রাচীং পরন্তপঃ॥ ইন্দ্রগোপকচিত্রঞ্চ যদেতচ্চারুদর্শনম্। রাজ্ঞো যুধিষ্ঠিরস্যৈতদ্বৈরাটে ধনুরুত্তমম্॥ সূর্য্যা যস্মিংস্তু সৌবর্ণাঃ প্রকাশন্তে প্রকা-শিনঃ। তেজসা প্রজ্বলন্তো বৈ নকুলস্যৈতদায়ুধম্॥ শলভা যত্র সৌবর্ণাস্ত-পনীয়বিচিত্রিতাঃ। এতন্মাদ্রীসুতস্যাপি সহদেবস্য কার্ম্মুকম্॥ যে ত্বিমে ক্ষুর সঙ্কাশাঃসহস্রং লোমবাহিনঃ। এতেঽর্জ্জুনস্য বৈরাটে শরাঃ সর্পবিষো-পমাঃ॥ এতে জ্বলন্তঃ সংগ্রামে তেজসা শীঘ্রগামিনঃ। ভবন্তি বীরস্যাক্ষয্যা ব্যূহতঃ সমরে রিপূন্॥ যে ত্বিমে পৃথবো দীর্ঘাশ্চন্দ্রবিম্বার্দ্ধদর্শনাঃ। এতে ভীমস্য নিশিতা রিপুক্ষয়করাঃ শরাঃ॥ হারিদ্রবর্ণা যে ত্বেতে হেমপুঙ্খাঃ শিতাঃ শরাঃ। নকুলস্য কলাপোঽয়ং পঞ্চশার্দ্দূললক্ষণঃ॥ যেনাসৌ ব্যজয়ৎ কৃৎস্নাং প্রতীচীং দিশমাহবে। কলাপো হ্যেষ তস্যাসীন্মাদ্রীপুত্রস্য ধীমতঃ॥ যে ত্বিমে ভাস্করাকারাঃ সর্ব্বপারসবাঃ শরাঃ। এতে চিত্রক্রিয়োপেতাঃ সহ-দেবস্য ধীমতঃ॥ যে ত্বিমে নিশিতাঃ পীতাঃ পৃথবো দীর্ঘবাসসঃ। হেম-পুঙ্খাস্ত্রিপর্ব্বাণো রাজ্ঞ এতে মহাশরাঃ॥ যস্ত্বয়ং সায়কো দীর্ঘঃ শিলীপৃষ্ঠঃ শিলী-মুখঃ। অর্জ্জুনস্যৈষ সংগ্রামে গুরুভারসহো দৃঢ়ঃ॥ বৈয়াঘ্রকোষঃ সুমহান্ ভীমসেনস্য সায়কঃ। গুরুভারসহো দিব্যঃ শাত্রবাণাং ভয়ঙ্করঃ॥ সুফল-শ্চিত্রকোষশ্চ হেমৎসরুরনুত্তমঃ। নিস্ত্রিংশঃ কৌরবস্যৈষ ধর্ম্মরাজস্য ধীমতঃ॥ যস্তু পঞ্চনখে কোষে নিহিতশ্চিত্রসীবনে। নকুলস্যৈষ নিস্ত্রিংশো গুরুভারসহো দৃঢ়ঃ॥ যস্ত্বয়ং বিপুলঃ খড়্গো গব্যে কোষে সমর্পিতঃ। সহদেবস্য বিদ্ধ্যেনং সর্ব্বভারসহং দৃঢ়ম্॥ ১—২৩

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং
বিরাটপর্ব্বণ্যুত্তরগোগ্রহে উত্তরস্যাস্ত্রদর্শনে ত্রিচত্বারিংশত্তমোঽধ্যায়ঃ।

## চতুশ্চত্বারিংশত্তমোঽধ্যায়ঃ

উত্তর উবাচ। সুবর্ণবিকৃতানীমান্যায়ুধানি মহাত্মনাম্। রুচিরাণি প্রকাশন্তে পার্থানামাশুকারিণাম্॥ ক নু স্বিদর্জ্জুনঃ পার্থঃ কৌরব্যো বা যুধিষ্ঠিরঃ। নকুলঃ সহদেবশ্চ ভীমসেনশ্চ পাণ্ডবঃ॥ সর্ব্ব এব মহাত্মানঃ সর্ব্বেঽমিত্রবিনাশিনঃ। রাজ্যমক্ষৈঃ পরাকীর্য্য শ্রূয়ন্তে ন কথঞ্চন॥ দ্রৌপদী ক চ পাঞ্চালী স্ত্রীরত্নং ভুবি বিশ্রুতা। জিতা চাক্ষৈস্তদা কৃষ্ণা তাংশ্চৈবান্বগমদ্বনম্॥

অর্জ্জুন উবাচ। অহমস্ম্যর্জ্জুনঃ পার্থঃ সভাস্তারো যুধিষ্ঠিরঃ। বল্লবো ভীমসেনশ্চ পিতুস্তে রসপাচকঃ॥ অশ্ববন্ধোঽথ নকুলঃ সহদেবশ্চ গোকুলে। সৈরন্ধ্রীং দ্রৌপদীং বিদ্ধি যস্যার্থে কীচকা হতাঃ॥

উত্তর উবাচ। দশনামানি পার্থস্য যানি পূর্ব্বং শ্রুতানি মে। প্রক্রয়াত্তানি যদি মে শ্রদ্দধ্যাং সর্ব্বমেব তে॥

অর্জ্জুন উবাচ। হন্ত তেঽহং সমাচক্ষে দশ নামানি যানি মে। একাগ্রমানসো ভূত্বা শৃণু সর্ব্বং সমাহিতঃ॥ অর্জ্জুনঃ ফাল্গুনো জিষ্ণুঃ কিরীটী শ্বেতবাহনঃ। বীভৎসুর্বিজয়ঃ কৃষ্ণঃ সব্যসাচী ধনঞ্জয়ঃ॥

উত্তর উবাচ। কেনাসি বিজয়ো নাম কেনাসি শ্বেতবাহনঃ। কিরীটী কেন নামাসি সব্যসাচী কথং ভবান্॥ অর্জ্জুনঃ ফাল্গুনো জিষ্ণুঃ কৃষ্ণো বীভৎসুরেব চ। ধনঞ্জয়শ্চ কেনাসি প্রব্রূহি মম তত্ত্বতঃ॥ শ্রুতা মে তস্য বীরস্য কেবলা নামহেতবঃ। তৎসর্ব্বং যদি মে ব্রূয়াঃ শ্রদ্দধ্যাং সর্ব্বমেব তে॥

অর্জ্জুন উবাচ। সর্ব্বান্ জনপদান্ জিত্বা বিত্তমাদায় কেবলম্। মধ্যে ধনস্য তিষ্ঠামি তেনাহুর্মাং ধনঞ্জয়ম্॥ অভিপ্রয়ামি সংগ্রামে যদহং যুদ্ধদুর্ম্মদান্। নাজিত্বা বিনিবর্ত্তামি তেন মাং বিজয়ং বিদুঃ॥ শ্বেতাঃ কাঞ্চনসন্নাহা রথে যুজ্যন্তি মে হয়াঃ। সংগ্রামে যুধ্যমানস্য তেনাহং শ্বেতবাহনঃ॥ উত্তরাভ্যাং ফল্গুনীভ্যাং নক্ষত্রাভ্যামহং দিবা। জাতো হিমবতঃ পৃষ্ঠে তেন মাং ফাল্গুনং বিদুঃ॥ পুরা শক্রেণ মে দত্তং যুধ্যতো দানবর্ষভৈঃ। কিরীটং মূর্দ্ধ্নি সূর্য্যাভং তেনাহুর্মাং কিরীটিনম্॥ ন কুর্য্যাং কর্ম্ম বীভৎসং যুধ্যমানঃ কথঞ্চন। তেন দেবমনুষ্যেষু বীভৎসুরিতি বিশ্রুতঃ॥ উভৌ মে দক্ষিণৌ পাণী গাণ্ডীবস্য বিকর্ষণে। তেন দেবমনুষ্যেষু সব্যসাচীতি মাং বিদুঃ॥ পৃথিব্যাঞ্চতুরন্তায়াং (চতুর্ণাম্নাং) বর্ণো মে দুর্ল্লভো যতঃ। করোমি কর্ম্ম শুক্লঞ্চ তেন মামর্জ্জুনং বিদুঃ॥ অহং দুরাপো দুর্দ্ধর্ষো দমনঃ পাকশাসনিঃ। তেন দেবমনুষ্যেষু

জিষ্ণুর্নাম্নাঽস্মি বিশ্রুতঃ। কৃষ্ণ ইত্যেব দশমং নাম চক্রে পিতা মম। কৃষ্ণাবদাতস্য সদা প্রিয়ত্বাদ্বালকস্য বৈ॥

বৈশম্পায়ন উবাচ। ততঃ পার্থং স বৈরাটিরভ্যবাদয়দন্তিকাৎ। অহং ভূমিঞ্জয়ো নাম নাম্নাঽহমপি চোত্তরঃ॥ দিষ্ট্যা ত্বাং পার্থ পশ্যামি স্বাগতন্তে ধনঞ্জয়। লোহিতাক্ষ মহাবাহো নাগরাজকরোপম॥ যদজ্ঞানাদবোচং ত্বাং ক্ষন্তুমর্হসি তন্মম॥ যতস্ত্বয়া কৃতং পূর্ব্বং বিচিত্রং কর্ম্ম দুষ্করম্। ততো ভয়ং ব্যতীতং মে প্রীতিশ্চ পরমা ত্বয়ি॥ ১—২৫

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণ্যুত্তরগোগ্রহে অর্জ্জুনবিজ্ঞানং নাম চতুশ্চত্বারিংশত্তমোঽধ্যায়ঃ।

---

## পঞ্চচত্বারিংশত্তমোঽধ্যায়ঃ

উত্তর উবাচ। আস্থায় বিপুলং বীর রথং সারথিনা ময়া। কতমদ্যাস্যসেঽনীকমুক্তো যাস্যাম্যহং ত্বয়া॥

অর্জ্জুন উবাচ। প্রীতোঽস্মি পুরুষব্যাঘ্র ন ভয়ং বিদ্যতে তব। সর্ব্বান্ নুদামি তে শত্রূন্ রণে রণবিশারদ॥ স্বস্থো ভব মহাযুদ্ধে পশ্য মাং শত্রুভিঃ সহ। যুধ্যমানং বিমর্দ্দেঽস্মিন্ কুর্ব্বাণং ভৈরবং মহৎ। এতান্ সর্ব্বানুপাসঙ্গান্ ক্ষিপ্রমাহর মে রথে। একং চাহর নিস্ত্রিংশং জাতরূপপরিষ্কৃতম্॥

বৈশম্পায়ন উবাচ। অর্জ্জুনস্য বচঃ শ্রুত্বা ত্বরাবানুত্তরস্তদা। অর্জ্জুনস্যায়ুধান্ গৃহ্য শীঘ্রেণাবাতরত্ততঃ॥

অর্জ্জুন উবাচ। অহং বৈ কুরুভির্যোৎস্যাম্যবজেষ্যামি তে পশূন্। সংকল্পপক্ষ-বিক্ষেপং বাহুপ্রাকারতোরণম্॥ ত্রিদণ্ডতূণসংবাধমনেকধ্বজসংকুলম্। জ্যাক্ষেপণং ক্রোধকৃতং নেমীনিনদদুন্দুভিঃ। নগরন্তে ময়া গুপ্তং রথোপস্থং ভবিষ্যতি॥ অধিষ্ঠিতো ময়া সঙ্খ্যে রথো গাণ্ডীবধন্বনা॥ অজেয়ঃ শত্রুসৈন্যানাং বৈরাটে ব্যেতু তে ভয়ম্॥

উত্তর উবাচ। বিভেমি নাহমেতেষাং জানামি ত্বাং স্থিরং যুধি। কেশবেনাপি সংগ্রামে সাক্ষাদিন্দ্রেণ বা সমম্॥ ইদন্তু চিন্তয়ন্নেবং পরিমুহ্যামি কেবলম্। নিশ্চয়ং চাপি দুর্ম্মেধা ন গচ্ছামি কথঞ্চন॥ এবং যুক্তাঙ্গরূপস্য

লক্ষণৈঃ সূচিতস্ত চ। কেন কর্ম্মবিপাকেন ক্লীবত্বমিদমাগতম্॥ মন্যে ত্বাং ক্লীববেশেন চরন্তং শূলপাণিনম্। গন্ধর্ব্বরাজপ্রতিমং দেবং বাপি শতক্রতুম্।

অর্জ্জুন উবাচ। ভ্রাতুর্নিয়োগাজ্জ্যেষ্ঠস্য সংবৎসরমিদং ব্রতম্। চরামি ব্রহ্মচর্য্যঞ্চ সত্যমেতদ্‌ব্রবীমি তে॥ নাস্মি ক্লীবো মহাবাহো পরবান্ ধর্ম্ম-সংযুতঃ। সমাপ্তব্রতমুত্তীর্ণং বিদ্ধি মাং ত্বং নৃপাত্মজ॥

উত্তর উবাচ। পরমোঽনুগ্রহো মেঽদ্য যতস্তর্কো ন মে বৃথা। ন হীদৃশাঃ ক্লীবরূপা ভবন্তি তু নরোত্তম॥ সহায়বানস্মি রণে যুধ্যেয়মমরৈরপি। সাধ্বসং হি প্রণষ্টং মে কিঙ্করোমি ব্রবীহি মে॥ অহন্তে সংগ্রহীষ্যামি হয়াংস্তব রথারুজান্। শিক্ষিতো হ্যস্মি সারথ্যং তীর্থতঃ পুরুষর্ষভ॥ দারুকো বাসুদেবস্য যথা শক্রস্য মাতলিঃ। তথা মাং বিদ্ধি সারথ্যে শিক্ষিতং নর-পুঙ্গব॥ যস্য যাতে ন পশ্যন্তি ভূমৌ ক্ষিপ্তং পদং পদম্। দক্ষিণাং যো ধুরং যুক্তঃ সুগ্রীবসদৃশো হয়ঃ॥ যোঽয়ং ধুরং ধূর্য্যবরো বামাং বহতি শোভনঃ। তং মন্যে মেঘপুষ্পস্য জবেন সদৃশং হয়ম্॥ যোঽয়ং কাঞ্চনসন্নাহঃ পার্ষ্ণিং বহতি শোভনম্। সমং শৈব্যস্য মন্যেঽহং জবেন বলবত্তরম্॥ যোঽয়ং বহতি তে পার্ষ্ণিং দক্ষিণামঞ্চিতোঽগ্রতঃ। বলাহকাদপি মতঃ স জবে বীর্য্য-বত্তরঃ। ত্বামেবায়ং রথো বোঢ়ুং সংগ্রামেষ্বতিধন্বিনম্। ত্বঞ্চেমং রথমাস্থায় যোদ্ধুমর্হো মতো মম॥

বৈশম্পায়ন উবাচ। ততো বিমুচ্য বাহুভ্যাং বলয়ানি স বীর্য্যবান্। চিত্রে দুন্দুভিসন্নাদে প্রত্যমুঞ্চত্তলে শুভে॥ কৃষ্ণান্ ভঙ্গিমতঃ কেশাংস্তত উদ্‌গ্রথ্য বাসসা। অথাসৌ প্রাঙ্‌মুখো ভূত্বা শুচিঃ প্রযতমানসঃ॥ অভি-দধ্যৌ মহাবাহুঃ সর্ব্বাস্ত্রাণি রথোত্তমে। উচুশ্চ পার্থং সর্ব্বাণি প্রাঞ্জলীনি নৃপাত্মজম্॥ ইমে স্ম পরমোদারাঃ কিঙ্করাঃ পাণ্ডুনন্দন। প্রণিপত্য ততঃ পার্থঃ সমালভ্য চ পাণিনা॥ সর্ব্বাণি মানসানীহ ভবতেত্যভ্যভাষত। প্রতিগৃহ্য ততোঽস্ত্রাণি প্রহৃষ্টবদনোঽভবৎ॥ অধিজ্যং তরসা কৃত্বা গাণ্ডীবং ব্যাক্ষিপদ্ধনুঃ॥ তস্য চাক্ষিপ্যমানস্য ধনুষোঽভূন্মহাস্বনঃ। যথা শৈলস্য মহতঃ শৈলেনৈবাভিজঘ্নুষঃ॥ সনির্ঘাতাঽভবদ্ভূমির্দ্দিক্ষু বায়ুর্ববৌ ভৃশম্। পপাত মহতী চোল্কা দিশো ন প্রচকাশিরে॥ ভ্রান্তধ্বজং খং তদাসীৎ প্রকম্পিতমহাদ্রুমম্। তং শব্দং কুরবো রাজন্ বিস্ফোটমশনেরিব॥ যদর্জ্জুনো ধনুঃশ্রেষ্ঠং বাহুভ্যামাক্ষিপদ্রথে॥

উত্তর উবাচ। একস্ত্বং পাণ্ডবশ্রেষ্ঠ বহূনেতান্ মহারথান্। কথং জেষ্যসি

সংগ্রামে সর্ব্বশস্ত্রাস্ত্রপারগান্ ॥ অসহায়োঽসি কৌন্তেয় সসহায়াশ্চ কৌরবাঃ। অতএব মহাবাহো ভীতস্তিষ্ঠামি তেঽগ্রতঃ ॥

বৈশম্পায়ন উবাচ। উবাচ পার্থো মা ভৈষীঃ প্রহস্য স্বনবত্তদা। যুধ্যমানস্য মে বীর গন্ধর্ব্বৈঃ সুমহাবলৈঃ। সহায়ো ঘোষযাত্রায়াং কস্তদাসীৎ সখা মম ॥ তথা প্রতিভয়ে তস্মিন্ দেবদানব-সংকুলে। খাণ্ডবে যুধ্যমানস্য কস্তদাসীৎ সখা মম ॥ নিবাতকবচৈঃ সার্দ্ধং পৌলোমৈশ্চ মহাবলৈঃ। যুধ্যতো দেব-রাজার্থে কঃ সহায়স্তদাভবৎ ॥ স্বয়ম্বরে তু পাঞ্চাল্যা রাজভিঃ সহ সঙ্গরে। যুধ্যতো বহুভিস্তাত কঃ সহায়স্তদাভবৎ ॥ উপজীব্য গুরুং দ্রোণং শক্রং বৈশ্রবণং যমম্। বরুণং পাবকঞ্চৈব কৃপং কৃষ্ণঞ্চ মাধবম্। পিনাকপাণি-নঞ্চৈব কথমেতান্ন যোধয়ে ॥ রথং বাহয় মে শীঘ্রং ব্যেতু তে মানসো জ্বরঃ ॥ ১—৪১

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাট-পর্ব্বণ্যুত্তরগোগ্রহে উত্তরসারথ্যং নাম পঞ্চচত্বারিংশত্তমোঽধ্যায়ঃ।

---

## ষট্‌চত্বারিংশত্তমোঽধ্যায়ঃ।

বৈশম্পায়ন উবাচ। উত্তরং সারথিং কৃত্বা শমীং কৃত্বা প্রদক্ষিণম্। আয়ুধং সর্ব্বমাদায় প্রযযৌ পাণ্ডবর্ষভঃ ॥ ধ্বজং সিংহং রথাত্তস্মাদপনীয় মহারথঃ। প্রণিধায় শমীমূলে প্রায়াদুত্তরসারথিঃ ॥ দৈবীং মায়াং রথে যুক্তাং বিহিতাং বিশ্বকর্ম্মণা। কাঞ্চনং সিংহলাঙ্গূলং ধ্বজং বানরলক্ষণম্ ॥ মনসা চিন্তয়ামাস প্রসাদং পাবকস্য চ। স চ তচ্চিন্তিতং জ্ঞাত্বা ধ্বজে ভূতান্যচোদয়ৎ ॥ সপতাকং বিচিত্রাঙ্গং সোপাসঙ্গং মহা [বলং] রবম্। খাৎ পপাত রথং তূর্ণং দিব্যরূপং মনোরমম্ ॥ রথং তমাগতং দৃষ্ট্বা দক্ষিণং প্রাকরোত্তদা। রথমাস্থায় বীভৎসুঃ কৌন্তেয়ঃ শ্বেতবাহনঃ ॥ বদ্ধগোধাঙ্গুলি-ত্রাণঃ প্রগৃহীতশরাসনঃ। ততঃ প্রায়াদুদীচীং স কপিপ্রবরকেতনঃ ॥ স্বনবন্তং মহাশঙ্খং বলবানরিমর্দ্দনঃ। প্রাধমদ্বলমাস্থায় দ্বিষতাং লোমহর্ষণম্ ॥ ততস্তে জবনা ধুর্য্যা জানুভ্যামগমন্মহীম্। উত্তরশ্চাপি সন্ত্রস্তো রথোপস্থ উপাবিশৎ ॥ সংস্থাপ্য চাশ্বান্ কৌন্তেয়ঃ সমুদ্যম্য চ রশ্মিভিঃ। উত্তরঞ্চ পরিষজ্য সমা-[প্রত্যা-] শ্বাসয়দর্জ্জুনঃ ॥

অর্জ্জুন উবাচ। মাভৈস্ত্বং রাজপুত্রাগ্র্য ক্ষত্রিয়োঽসি পরন্তপ। কথং পুরুষশার্দ্দূল শত্রুমধ্যে বিষীদসি॥ শ্রুতাস্তে শঙ্খশব্দাশ্চ ভেরীশব্দাশ্চ পুষ্কলাঃ। কুঞ্জরাণাঞ্চ নদতাং ব্যূঢ়ানীকেষু তিষ্ঠতাম্॥ স ত্বং কথমিহানেন শঙ্খশব্দেন ভীষিতঃ। বিষণ্ণ [ বর্ণ ] রূপো বিত্রস্তঃ পুরুষঃ প্রাকৃতো যথা॥

উত্তর উবাচ। শ্রুতা মে শঙ্খশব্দাশ্চ ভেরীশব্দাশ্চ পুষ্কলাঃ। কুঞ্জরাণাঞ্চ নদতাং ব্যূঢ়ানীকেষু তিষ্ঠতাম্॥ নৈবংবিধঃ শঙ্খশব্দঃ পুরা জাতু ময়া শ্রুতঃ। ধ্বজস্য চাপি রূপং মে দৃষ্টপূর্ব্বং ন হীদৃশম্॥ ধনুষশ্চাপি নির্ঘোষঃ শ্রুতপূর্ব্বো ন মে কচিৎ। অস্য শঙ্খস্য শব্দেন ধনুষো নিঃস্বনেন চ॥ অমানুষেণ শব্দেন ভূতানাং ধ্বজবাসিনাম্। রথস্য চ নিনাদেন মনো মুহ্যতি মে ভৃশম্॥ ব্যাকুলাশ্চ দিশঃ সর্ব্বা হৃদয়ং ব্যথতীব মে। ধ্বজেন পিহিতাঃ সর্ব্বা দিশো ন প্রতিভান্তি মে॥ গাণ্ডীবস্য হি শব্দেন কর্ণৌ মে বধিরীকৃতৌ। [ তমেবং প্রতিভাষন্তমুত্তরং যুদ্ধদুর্ম্মদঃ ] স মুহূর্ত্তং প্রযাতস্তু পার্থো বৈরাটিমব্রবীৎ॥

অর্জ্জুন উবাচ। একান্তে রথমাস্থায় পদ্‌ভ্যাং ত্বমবপীড়য়। দৃঢ়ঞ্চ রশ্মীন্ সংযচ্ছ শঙ্খং ধ্মাস্যাম্যহং পুনঃ॥

বৈশম্পায়ন উবাচ। ততঃ শঙ্খমুপাধ্মাসীদ্দারয়ন্নিব পর্ব্বতান্। দ্বিষতাং দুঃখজনকং সুহৃদাং হর্ষবর্দ্ধনম্। গুহা গিরীণাঞ্চ তদা দিশঃ শৈলাংস্তথৈব চ। উত্তরশ্চাপি সংলীনো রথোপস্থ উপাবিশৎ। তস্য শঙ্খস্য শব্দেন রথনেমিস্বনেন চ। গাণ্ডীবস্য চ ঘোষেণ পৃথিবী সমকম্পত॥ উত্তরন্তু রথে দৃষ্ট্বা শঙ্খশব্দেন মোহিতম্। তং সমাশ্বাসয়ামাস পুনরেব ধনঞ্জয়ঃ॥

দ্রোণ উবাচ। যথা রথস্য নির্ঘোষো যথা মেঘ উদীর্য্যতে। প্রকম্পতে যথা ভূমির্নৈবোঽন্যঃ সব্যসাচিনঃ॥ শস্ত্রাণি ন প্রকাশন্তে ন প্রহৃষ্যন্তি বাজিনঃ। অগ্নয়শ্চ ন ভাসন্তে সমিদ্ধাস্তন্ন শোভনম্॥ প্রত্যাদিত্যঞ্চ নঃ সর্ব্বে মৃগা ঘোরনিনাদিনঃ॥ ধ্বজেষু চ নিলীয়ন্তে বায়সাস্তন্ন শোভনম্॥ শকুনাশ্চাপসব্যা নো বেদয়ন্তি মহদ্ভয়ম্॥ গোমায়ুরেষ সেনায়া রুবন্মধ্যে প্রধাবতি। অনাহতশ্চ নিষ্ক্রান্তো মহদ্বেদয়তে ভয়ম্॥ ভবতাং রোমকূপানি প্রহৃষ্টান্যুপলক্ষয়ে। ধ্রুবং বিনাশো যুদ্ধেষু ক্ষত্রিয়াণাং প্রদৃশ্যতে॥ জ্যোতীংষি ন প্রকাশন্তে দারুণা মৃগপক্ষিণঃ। উৎপাতা বিবিধা ঘোরা দৃশ্যন্তে ক্ষত্রনাশনাঃ॥ বিশেষত ইহাস্মাকং নিমিত্তানি বিনাশনে। উল্কাভিশ্চ প্রদীপ্তাভির্বাধ্যতে পৃতনা তব॥ বাহনান্যপ্রহৃষ্টানি রুদন্তীব বিশাম্পতে। উপাসতে চ

সৈন্যানি গৃধ্রাস্তব সমন্ততঃ॥ তন্ন্যাসে বাহিনীং দৃষ্টা পার্থবাণপ্রপীড়িতাম্। পরাভূতা চ নঃ সেনা ন কশ্চিদ্ যোদ্ধুমিচ্ছতি॥ বিবর্ণমুখভূয়িষ্ঠাঃ সর্ব্বে যোধা বিচেতসঃ। গাঃ সংপ্রস্থাপ্য তিষ্ঠামো ব্যূঢ়ানীকাঃ প্রহারিণঃ॥ ১—৩৩

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণ্যুত্তর-গোগ্রহে উৎপাতদর্শনে ষট্চত্বারিংশত্তমোঽধ্যায়ঃ।

## সপ্তচত্বারিংশত্তমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। অথ দুর্য্যোধনো রাজা সমরে ভীষ্মমব্রবীৎ। দ্রোণঞ্চ রথশার্দ্দূলং কৃপঞ্চ সুমহাবলম্॥

দুর্য্যোধন উবাচ। উক্তোঽয়মর্থ আচার্য্যো ময়া কর্ণেন চাসকৃৎ। পুনরেব চ বক্ষ্যামি ন হি তৃপ্যামি তং ব্রুবন্॥ পরাজিতৈর্হি বস্তব্যং তৈশ্চ দ্বাদশবৎসরান্। বনে জনপদেঽজ্ঞাতৈরেবং হি স পণো হি নঃ॥ তেষাং ন তাবন্নির্বৃত্তং বর্ত্ততে চ ত্রয়োদশম্। অজ্ঞাতবাসো বীভৎসুরথাস্মাভিঃ সমাগতঃ॥ অনিবৃত্তেঽপি নির্ব্বাসে যদি বীভৎসুরাগতঃ। পুনর্দ্বাদশবর্ষাণি বনে বৎস্যন্তি পাণ্ডবাঃ॥ লোভাদ্বা তে ন জানীয়ুরস্মান্ বা মোহ আবিশৎ। হীনাতিরিক্তমেতেষাং ভীষ্মো বেদিতুমর্হতি॥ অর্থানান্তু পুনর্দ্বৈধে নিত্যং ভবতি সংশয়ঃ। অন্যথা চিন্তিতো হ্যর্থঃ পুনর্ভবতি চান্যথা॥ স্বার্থে সর্ব্বেঽপি মুহ্যন্তি যেঽপি ধর্ম্মবিদো জনাঃ। উত্তরং মার্গমাণানাং মৎস্যানাঞ্চ যুযুৎসতাম্॥ যদি বীভৎসুরায়াতস্তদা কস্যাপরাধ্নুমঃ॥ ত্রিগর্ত্তানাং বয়ং হেতোর্মৎস্যান্ যোদ্ধুমিহাগতাঃ। মৎস্যানাং বিপ্রকারাংস্তে বহূনস্মাস্বকীর্ত্তয়ন্॥ তেষাং ভয়াভিভূতানাং তদস্মাভিঃ প্রতিশ্রুতম্। প্রথমং তৈর্গ্রহীতব্যং মৎস্যানাং গোধনং মহৎ॥ সপ্তম্যামপরাহ্ণে বৈ তথা নস্তৈঃ সমাহিতম্॥ অষ্টম্যাং পুনরস্মাভিরাদিত্যস্যোদয়ং প্রতি। ইমা গাবো গ্রহীতব্যা গতে মৎস্যে গবাং পদম্॥ তে বা গাবো নয়িষ্যন্তি যদি বা তে পরাজিতাঃ॥ অস্মান্ বা হ্যপসন্ধায় কুর্য্যুর্ম্মৎস্যেন সঙ্গতম্॥ অথবা তানপাহায় মৎস্যো জনপদৈঃ সহ। সর্ব্বয়া সেনয়া সার্দ্ধং সংবৃতো ভীমরূপয়া। আয়াতা [ বা ] কেবলাং রাত্রিমস্মান্ যোদ্ধুমিহা [ মুপা ] গতঃ॥ তেষামেব মহাবীর্য্যঃ কশ্চিদেব পুরঃসরঃ। অস্মান্ জেতুমিহায়াতো মৎস্যো বাপি স্বয়ং ভবেৎ॥ যদ্যেষ রাজা মৎস্যানাং

যদি বীভৎসুরাগতঃ। সর্বৈর্যোদ্ধব্যমস্মাভিরিতি নঃ সময়ঃ কৃতঃ॥ অথ কস্মাৎ স্থিতা হ্যেতে রথে পুরুষসত্তমাঃ। ভীষ্মো দ্রোণঃ কৃপশ্চৈব বিকর্ণো দ্রৌণিরেব চ॥ সম্ভ্রান্তমনসঃ সর্বে কালে হ্যস্মিন্মহারথাঃ। নান্যত্র যুদ্ধা-চ্ছ্রেয়োঽস্তি তথাত্মা প্রণিধীয়তাম্॥ আচ্ছিন্নে গোধনেঽস্মাকমপি দেবেন বজ্রিণা। যমেন বাপি সংগ্রামে কো হাস্তিনপুরং ব্রজেৎ॥ শরৈরেভিঃ প্রণু-ন্নানাং ভগ্নানাং গহনে বনে। কো হি জীবেৎ পদাতীনাং ভবেদশ্বেষু সংশয়ঃ॥ দুর্য্যোধনবচঃ শ্রুত্বা রাধেয়স্ত্বব্রবীদ্বচঃ। আচার্য্যং পৃষ্ঠতঃ কৃত্বা তথা নীতির্বি-ধীয়তাম্॥ জানাতি হি মতং তেষামতস্ত্রাসয়তীব নঃ। অর্জ্জুনে চাস্য সম্প্রীতিমধিকামুপলক্ষয়ে॥ তথাহি দৃষ্ট্বা বীভৎসুমুপায়ান্তং প্রশংসতি। যথা সেনা ন ভজ্যেত তথা নীতির্বিধীয়তাম্॥ হ্রেষিতং হ্যপশৃণ্বানে দ্রোণে সর্বং বিঘট্টিতম্। আদেশিকা মহারণ্যে গ্রীষ্মে শত্রুবশং গতাঃ। যথা ন বিভ্রমেৎ সেনা তথা নীতির্বিধীয়তাম্॥ ইষ্টা হি পাণ্ডবা নিত্যমাচার্য্যস্য বিশেষতঃ। আসয়ন্নপরার্থাশ্চ কথ্যতে স্ম স্বয়ং তথা॥ অশ্বানাং হ্রেষিতং শ্রুত্বা কঃ প্রশংসাপরো ভবেৎ! স্থানে বাপি ব্রজন্তো বা সদা হ্রেষন্তি বাজিনঃ॥ সদা চ বায়বো বান্তি নিত্যং বর্ষতি বাসবঃ। স্তনয়িত্নোশ্চ নির্ঘোষঃ শ্রূয়তে বহুশস্তথা॥ কিমত্র কার্য্যং পার্থস্য কথং বা স প্রশস্যতে। অন্যত্র কামাদ্-দ্বেষাদ্বা রোষাদ্বাস্মাসু কেবলাৎ॥ আচার্য্যা বৈ কারুণিকাঃ প্রাজ্ঞাশ্চাপাপ-দর্শিনঃ। নৈতে মহাভয়ে প্রাপ্তে সংপ্রষ্টব্যাঃ কদাচন॥ প্রাসাদেষু বিচি-ত্রেষু গোষ্ঠীষূপবনেষু চ। কথা বিচিত্রাঃ কুর্ব্বাণাঃ পণ্ডিতাস্তত্র শোভনাঃ॥ বহূন্যাশ্চর্য্যরূপাণি কুর্ব্বন্তো জনসংসদি। ইষ্ব্যাস্ত্রে [ইষস্ত্রে] চোপসন্ধানে পণ্ডিতাস্তত্র শোভনাঃ॥ পরেষাং বিবরজ্ঞানে মনুষ্যচরিতেষু চ। হস্ত্যশ্বরথ-চর্য্যাসু খরোষ্ট্রাজাবিকর্ম্মণি॥ গোধনেষু প্রতোলীষু বরদ্বারমুখেষু চ। অন্ন-সংস্কারদোষেষু পণ্ডিতাস্তত্র শোভনাঃ॥ পণ্ডিতান্ পৃষ্ঠতঃ কৃত্বা পরেষাং গুণ-বাদিনঃ। বিধীয়তাং তথা নীতির্যথা বধ্যেত বৈ পরঃ॥ গাবশ্চৈব প্রতিষ্ঠাপ্য সেনাং ব্যূহ্য সমন্ততঃ। আরক্ষাশ্চ বিধীয়ন্তাং যত্র যোৎস্যামহে পরান্॥১—৩৪

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাট-পর্ব্বণ্যুত্তরগোগ্রহে দুর্য্যোধনবাক্যং নাম সপ্তচত্বারিংশত্তমোঽধ্যায়ঃ।

---

## অষ্টচত্বারিংশত্তমোঽধ্যায়ঃ

কর্ণ উবাচ। সর্ব্বানায়ুষ্মতো ভীতান্ সন্ত্রস্তানিব লক্ষয়ে। অযুদ্ধমনসশ্চৈব সর্ব্বাংশ্চৈবানবস্থিতান্॥ যদ্যেষ রাজা মৎস্যানাং যদি বীভৎসুরাগতঃ। অহমাবারয়িষ্যামি বেলেব মকরালয়ম্॥ মম চাপপ্রমু (মু) ক্তানাং শরাণাং নতপর্ব্বণাম্। নাবৃত্তির্গচ্ছতামস্তি সর্পাণাং সর্পতামিব॥ রুক্মপুঙ্খাঃ সুতীক্ষ্ণাগ্রা মুক্তা হস্তবতা ময়া। ছাদয়ন্তু শরাঃ পার্থং শলভা ইব পাদপম্॥ শরাণাং পুঙ্খসক্তানাং মৌর্ব্ব্যাভিহতয়া দৃঢ়ম্। শ্রূয়তাং তলয়োঃ শব্দো ভের্য্যোরাহতয়োরিব॥ সমাহিতো হি বীভৎসুর্ব্বর্ষাণ্যষ্টৌ চ পঞ্চ চ। জাতস্নেহশ্চ যুদ্ধেঽস্মিন্ ময়ি সম্প্রহরিষ্যতি॥ পাত্রীভূতশ্চ কৌন্তেয়ো ব্রাহ্মণো গুণবানিব। শরৌঘান্ প্রতিগৃহ্ণাতু ময়া মুক্তান্ সহস্রশঃ॥ এষ চৈব মহেষ্বাসস্ত্রিষু লোকেষু বিশ্রুতঃ। অহঞ্চাপি নরশ্রেষ্ঠাদর্জ্জুনান্নাবরঃ ক্বচিৎ॥ ইতশ্চেতশ্চ নির্ম্মুক্তৈঃ কাঞ্চনৈর্গার্দ্ধ্রবা [ রা ] জিতৈঃ। দৃশ্যতামদ্য বৈ ব্যোম খদ্যোতৈরিব সংবৃতম্॥ অদ্যাহমৃণমক্ষয্যং পুরা বাচা প্রতিশ্রুতম্। ধার্ত্তরাষ্ট্রায় দাস্যামি নিহত্য সমরেঽর্জ্জুনম্॥ মৎকার্ম্মুকবিমুক্তানাং শরাণাং নতপর্ব্বণাম্। কঃ সহেতাগ্রতঃ স্থাতুমপি সর্ব্বৈঃ সুরাসুরৈঃ। অন্তরাচ্ছিদ্যমানানাং পুঙ্খানাং ব্যতিশীর্য্যতাম্। শলভানামিবাকাশে প্রচারঃ সংপ্রদৃশ্যতাম্॥ ইন্দ্রাশনিসমস্পর্শং মহেন্দ্রসমতেজসম্। অর্দ্দয়িষ্যাম্যহং পার্থমুল্কাভিরিব কুঞ্জরম্॥ রথাদতিরথং শূরং সর্ব্বশস্ত্রভৃতাং বরম্। বিবশং পার্থমাদাস্যে গরুত্মানিব পন্নগম্॥ তমগ্নিমিব দুর্দ্ধর্ষমসিশক্তিশরেন্ধনম্। পাণ্ডবাগ্নিমহং দীপ্তং প্রদহন্তমিবাহতম্॥ অশ্ববেগপুরোবাতো রথৌঘ-স্তনয়িত্নুমান্। শরধারো মহামেঘঃ শময়িষ্যামি পাণ্ডবম্॥ মৎকার্ম্মুকবিনির্ম্মুক্তাঃ পার্থমাশীবিষোপমাঃ। শরাঃ সমভিসর্পন্তাং বল্মীকমিব পন্নগাঃ॥ সুতেজিতৈ রুক্মপুঙ্খৈঃ সুপীতৈর্নতপর্ব্বভিঃ। আচিতং পশ্য কৌন্তেয়ং কর্ণিকারৈরিবাচলম্॥ জামদগ্ন্যান্ময়া হ্যস্ত্রং যৎ [ সং ] প্রাপ্তমৃষিসত্তমাৎ। তদুপাশ্রিত্য বীর্য্যঞ্চ [ সমরে ] যুধ্যেয়মপি বাসবম্॥ ধ্বজাগ্রে বানরস্তিষ্ঠন্ ভল্লেন নিহতো ময়া। অদ্যৈব পততাং ভূমৌ বিনদন্ ভৈরবান্ রবান্॥ শত্রোর্ম্ময়া বিপন্নানাং ভূতানাং ধ্বজবাসিনাম্। দিশঃ প্রতিষ্ঠমানানামস্তু শব্দো দিবঙ্গমঃ॥ অদ্য দুর্য্যোধনস্যাহং শল্যং হৃদি চিরস্থিতম্। সমূলমুদ্ধরিষ্যামি বীভৎসুং পাতয়ন্ রথাৎ॥ হতাশ্বং বিরথং পার্থং পৌরুষে পর্য্যবস্থিতম্। নিঃশ্বসন্তং যথা নাগমদ্য পশ্যন্তু কৌরবাঃ॥ কামং

গচ্ছন্তু কুরবো ধনমাদায় কেবলম্। রথেষু বাপি তিষ্ঠন্তো যুদ্ধং পশ্যন্তু মামকম্॥ ১-২৩

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণ্যুত্তর-গোগ্রহে কর্ণবিকত্থনো নাম অষ্টচত্বারিংশত্তমোঽধ্যায়ঃ।

---

## একোনপঞ্চাশত্তমোঽধ্যায়ঃ

কৃপ উবাচ। সদৈব তব রাধেয় যুদ্ধে ক্রূরতরা মতিঃ। নার্থানাং প্রকৃতিং বেৎসি নানুবন্ধমবেক্ষসে॥ নয়া হি বহবঃ সন্তি শাস্ত্রমাশ্রিত্য চিন্তিতাঃ। তেষাং যুদ্ধন্তু পাপিষ্ঠং বেদয়ন্তি পুরাবিদঃ॥ দেশকালেন সংযুক্তং যুদ্ধং বিজয়দং ভবেৎ। হীনকালং তদেবেহ ফলদং ন ভবত্যুত। দেশে কালে চ বিক্রান্তং কল্যাণায় বিধীয়তে॥ আনুকূল্যেন কার্য্যাণামন্তরং সংবিধীয়তে। ভারং হি রথকারস্য ন ব্যবস্যন্তি পণ্ডিতাঃ॥ পরিচিন্ত্য তু পার্থেন সন্নিপাতো ন নঃ ক্ষমঃ। একঃ কুরূনভ্যগচ্ছ [রক্ষ] দেকশ্চাগ্নিমতর্পয়ৎ॥ একশ্চ পঞ্চবর্ষাণি ব্রহ্মচর্য্যমধারয়ৎ। একঃ সুভদ্রামারোপ্য দ্বৈরথে কৃষ্ণমাহ্বয়ৎ॥ একঃ কিরাতরূপেণ স্থিতং শর্ব্বমযোধয়ৎ। অস্মিন্নেব বনে পার্থো হৃতাং কৃষ্ণামবাজয়ৎ (কৃষ্ণো হৃতাং ভার্য্যামবাজয়ৎ)॥ একশ্চ পঞ্চবর্ষাণি শক্রাদস্ত্রাণ্যশিক্ষত। একঃ সোঽয়মরীন্ জিত্বা কুরূণামকরোদ্যশঃ॥ একো গন্ধর্ব্বরাজানং চিত্রসেনমরিন্দমম্। বিজিগ্যে তরসা সংখ্যে সেনাঞ্চাস্য সুদুর্জ্জয়াম্॥ তথা নিবাতকবচাঃ কালকঞ্জাশ্চ দানবাঃ। দৈবতৈরপ্যবধ্যাস্তে একেন যুধি পাতিতাঃ॥ একেন হি ত্বয়া কর্ণ কিন্নামেহ কৃতং পুরা। একৈকেন যথা তেন ভূমিপালা বশীকৃতাঃ॥ ইন্দ্রোঽপি ন হি পার্থেন সংযুগে যোদ্ধুমর্হতি। যস্তেনাশংসতে যুদ্ধং কর্ত্তুমুত্তমতেজসা॥ আশীবিষস্য ক্রুদ্ধস্য পাণিমুদ্যম্য দক্ষিণম্। অবমুচ্য [মৃশ্য] প্রদেশিন্যা দংষ্ট্রামাদাতুমিচ্ছসি॥ অথবা কুঞ্জরং মত্তমেক এব চরন্ বনে। অনঙ্কুশঃ সমারুহ্য নগরং গন্তুমিচ্ছসি॥ সমিদ্ধং পাবকঞ্চাপি ঘৃতমেদোবসাহুতম্। ঘৃতাক্তশ্চীরবাসাস্ত্বং মধ্যেনোৎসর্ত্তুমিচ্ছসি॥ আত্মানং কঃ সমুদ্যম্য [দ্বধ্য] কণ্ঠে বদ্ধা মহাশিলাম্। সমুদ্রং প্রতরেদ্দোর্ভ্যাং তত্র কিন্নাম পৌরুষম্॥ অকৃতাস্ত্রং কৃতাস্ত্রং বৈ বলবন্তং সুদুর্ব্বলঃ। তাদৃশং কর্ণ যঃ পার্থং যোদ্ধুমিচ্ছেৎ স দুর্ম্মতিঃ॥ অস্মাভির্হ্যেষ নিকৃতো বর্ষাণীহ ত্রয়োদশ। সিংহঃ

পাশবিনির্ম্মুক্তো ন নঃ শেষং করিষ্যতি ॥ একান্তে পার্থমাসীনং কূপেঽগ্নিমিব সংবৃতম্। অজ্ঞানাদভ্যবস্কন্দ্য প্রাপ্তাঃ স্মো ভয়মুত্তমম্ ॥ সহ যুধ্যামহে পার্থমাগতং যুদ্ধদুর্ম্মদম্। সৈন্যাস্তিষ্ঠন্তু সন্নদ্ধা ব্যূঢ়ানীকাঃ প্রহারিণঃ ॥ দ্রোণো দুর্য্যোধনো ভীষ্মো ভবান্ দ্রৌণিস্তথা বয়ম্। সর্ব্বে যুধ্যামহে পার্থং কর্ণ মা সাহসং কৃথাঃ ॥ বয়ং ব্যবসিতাঃ পার্থং বজ্রপাণিমিবোদ্যতম্। ষড়্রথাঃ প্রতিযুধ্যেম তিষ্ঠেম যদি সংহতাঃ ॥ ব্যূঢ়ানীকানি সৈন্যানি যত্তাস্তিষ্ঠন্তু ধন্বিনঃ। যুধ্যামহেঽর্জ্জুনং সঙ্খ্যে দানবা বাসবং যথা ॥ ১—২৩

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণ্যুত্তরগোগ্রহে কৃপবাক্যং নামৈকানপঞ্চাশত্তমোঽধ্যায়ঃ।

---

## পঞ্চাশত্তমোঽধ্যায়ঃ

অশ্বত্থামোবাচ। ন চ তাবজ্জিতা গাবো ন চ সীমান্তরং গতাঃ। ন হাস্তিনপুরং প্রাপ্তাস্ত্বং কর্ণ বিকত্থসে ॥ সংগ্রামান্ সুবহূন্ জিত্বা লব্ধা চ বিপুলং ধনম্। বিজিত্য চ পরাং ভূমিং [সেনাং] নাহঃ কিঞ্চন পৌরুষম্ [পুরুষাঃ] ॥ দহ [পচ] ত্যগ্নিরবাক্যস্তু তূষ্ণীং ভাতি দিবাকরঃ। তূষ্ণীং ধারয়তে লোকান্ বসুধা সচরাচরান্ ॥ চাতুর্ব্বর্ণ্যস্য কর্ম্মাণি বিহিতানি স্বয়ম্ভুবা [মনীষিভিঃ]। ধনং যৈরধিগন্তব্যং [বর্ণৈর্যদিহ কর্ত্তব্যং] যচ্চ কুর্ব্বন্ন দুষ্যতি ॥ অধীত্য ব্রাহ্মণো বেদান্ যাজয়েত যজেত বা। ক্ষত্রিয়ো ধনুরাশ্রিত্য যজেচ্চৈব ন যাজয়েৎ ॥ বৈশ্যোঽধিগম্য বিত্তানি ব্রহ্মকর্ম্মাণি কারয়েৎ। শূদ্রঃ শুশ্রূষণাং কুর্য্যাত্ত্রিষু বর্ণেষু নিত্যশঃ। বন্দনাযোগবিধিভির্ব্বৈতসীং বৃত্তিমাস্থিতঃ ॥ বর্ত্তমানা যথাশাস্ত্রং প্রাপ্য চাপি মহীমিমাম্। সৎকুর্ব্বন্তি মহাভাগা গুরূন্ সুবিগুণানপি ॥ প্রাপ্য দ্যূতেন কো রাজ্যং ক্ষত্রিয়স্তুষ্টিমর্হতি। তথা নৃশংসরূপোঽয়ং ধার্ত্তরাষ্ট্রশ্চ নির্ঘৃণঃ [রূপেণ যথান্যঃ প্রাকৃতো জনঃ] ॥ তথাভিগম্য বিত্তানি কো বিকত্থেদ্বিচক্ষণঃ। নিকৃত্যা বঞ্চনাযোগৈশ্চরন্ বৈতংসিকো যথা ॥ কতমদ্দ্বৈরথং যুদ্ধং যত্রাজৈষীর্দ্ধনঞ্জয়ম্। নকুলং সহদেবং বা ধনং যেষাং ত্বয়া হৃতম্ ॥ যুধিষ্ঠিরো জিতঃ কস্মিন্ ভীমো বা বলিনাং বরঃ। ইন্দ্রপ্রস্থং ত্বয়া কস্মিন্ সংগ্রামে বিজিতং পুরা ॥ তথৈব কতমদ্যুদ্ধং যস্মিন্ কৃষ্ণা জিতা পুরা। একবস্ত্রা সভাং নীতা দুষ্টকর্ম্মন্ রজস্বলা ॥ মূলমেষাং মহৎ কৃত্তং সারার্থী চন্দনং যথা। কর্ম্ম

কারয়থাঃ শূর [সূত] তত্র কিং বিদুরোঽব্রবীৎ॥ যথাশক্তি মনুষ্যাণাং কামমালক্ষয়ামহে। অন্যেষাঞ্চৈব সত্ত্বানামপি কীটপিপীলিকৈঃ। দ্রৌপদ্যাস্তং পরিক্লেশং ন ক্ষন্তুং পাণ্ডবোঽর্হতি॥ ক্ষয়ায় ধার্ত্তরাষ্ট্রাণাং প্রাদুর্ভূতো ধনঞ্জয়ঃ। ত্বং পুনঃ পণ্ডিতো ভূত্বা বাচং বক্তুমিহেচ্ছসি॥ বৈরান্তঃকরণো জিষ্ণুর্ন নঃ শেষং করিষ্যতি॥ নৈষ দেবান্ন গন্ধর্ব্বান্নাসুরান্ন চ রাক্ষসান্। ভয়াদিহ ন যুধ্যেত কুন্তীপুত্রো ধনঞ্জয়ঃ॥ যং যমেষোঽভিসংক্রুদ্ধঃ সংগ্রামে নিপতিষ্যতি। বৃক্ষং গরুড়বেগো বা বিনিহত্য তমেষ্যতি॥ ত্বত্তো বিশিষ্টং বীর্য্যেণ ধনুষ্যমররাট্সমম্। বাসুদেবসমং যুদ্ধে তং পার্থং কো ন পূজয়েৎ॥ দৈবেন দৈবং (দেবং দেবেন) যুধ্যেত মানুষেণ তু মানুষম্। অস্ত্রেণাস্ত্রং সমাহন্যাৎ কোঽর্জ্জুনেন সমঃ পুমান্॥ পুত্রাদনন্তরঃ শিষ্য ইতি ধর্ম্মবিদো বিদুঃ। এতেনাপি নিমিত্তেন প্রিয়ো দ্রোণস্য পাণ্ডবঃ॥ যথা ত্বমকরোর্দ্যূতমিন্দ্রপ্রস্থং যথাহরঃ। যথা-নৈষীঃ সভাং, কৃষ্ণাং তথা যুধ্যস্ব পাণ্ডবম্॥ অয়ং তে মাতুলঃ প্রাজ্ঞঃ ক্ষাত্রধর্ম্মস্য কোবিদঃ। দুর্দ্যূতদেবী গান্ধারঃ শকুনির্যুধ্যতামিহ॥ নাক্ষান্ ক্ষিপতি গাণ্ডীবং ন কৃতং দ্বাপরং ন চ। জ্বলতো নিশিতান্ বাণাংস্তাংস্তান্ ক্ষিপতি গাণ্ডীবম্॥ ন হি গাণ্ডীবনির্ম্মুক্তা গার্দ্ধপত্রাঃ সুতেজনাঃ। অন্তরেষ্ববতিষ্ঠন্তে গিরীণামপি দারণাঃ॥ অন্তকঃ পবনো মৃত্যুস্তথাগ্নির্ব্বড়বামুখঃ। কুর্য্যুরেতে ক্বচিচ্ছেষং ন তু ক্রুদ্ধো ধনঞ্জয়ঃ। যথা সভায়াং দ্যূতং ত্বং মাতুলেন সহাকরোঃ। তথা যুধ্যস্ব সংগ্রামে সৌবলেন সুরক্ষিতঃ॥ যুধ্যন্তাং কামতো যোধা নাহং যোৎস্যে ধনঞ্জয়ম্। মৎস্যো হ্যস্মাভিরাযোধ্যো যদ্যাগচ্ছেদ্গবাং পদম্॥ ১—২৮

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণ্যুত্তরগোগ্রহেঽশ্বত্থামভর্ৎসনবাক্যং নাম পঞ্চাশত্তমোঽধ্যায়ঃ।

---

## একপঞ্চাশত্তমোঽধ্যায়ঃ

ভীষ্ম উবাচ। সাধু পশ্যতি বৈ দ্রৌণিঃ কৃপশ্চ সাধু পশ্যতি। কর্ণস্তু ক্ষত্রধর্ম্মেণ যথাবদ্যোদ্ধুমিচ্ছতি॥ আচার্য্যো নাভিযো[ষ] ক্তব্যঃ পুরুষেণ বিজানতা। দেশকালৌ তু সংপ্রেক্ষ্য যোদ্ধব্যমিতি মে মতিঃ॥ যস্য সূর্য্যসমাঃ পঞ্চ সপত্নাঃ স্যুঃ প্রহারিণঃ। কথমভ্যুদয়ে তস্য ন প্রমুহ্যেত পণ্ডিতঃ॥ স্বার্থে সর্ব্বে বিমুহ্যন্তি যেঽপি ধর্ম্মবিদো জনাঃ। তস্মাদ্রাজন্ ব্রবীম্যেতদ্

বাক্যন্তে যদি রোচতে॥ কর্ণো হি যদবোচত্বাং তেজঃসঞ্জননায় তৎ। আচার্য্যপুত্রঃ ক্ষমতাং মহৎ কার্য্যমুপস্থিতম্॥ নায়ং কালো বিরোধস্য কৌন্তেয়ে সমুপস্থিতে। ক্ষন্তব্যং ভবতা সর্ব্বমাচার্য্যেণ কৃপেণ চ॥ ভবতাং হি কৃতাস্ত্রত্বাদ্ যথাদিত্যে প্রভা তথা। যথা চন্দ্রমসো লক্ষ্মীঃ সর্ব্বথা নাপকৃষ্যতে॥ এবং ভবৎসু ব্রাহ্মণ্যং ব্রহ্মাস্ত্রঞ্চ প্রতিষ্ঠিতম্। চত্বার একতো বেদাঃ ক্ষাত্রমেকত্র দৃশ্যতে॥ নৈতৎ সমস্তমুভয়ং কস্মিংশ্চিদনুশুশ্রুম। অন্যত্র ভারতাচার্য্যাৎ সপুত্রাদিতি মে মতিঃ॥ ( ব্রহ্মাস্ত্রং চৈব বেদাশ্চ নৈতদন্যত্র দৃশ্যতে। অন্যত্র ভারতাচার্য্যাদ্ দ্রোণাৎ পুরুষসত্তমাৎ )॥ বেদান্তাশ্চ পুরাণানি ইতিহাসং পুরাতনম্। জামদগ্ন্যমৃতে রাজন্ কো দ্রোণাদধিকো ভবেৎ॥ আচার্য্যপুত্রঃ ক্ষমতাং নায়ং কালঃ স্বভেদনে। সর্ব্বে সংহত্য যুধ্যামঃ পাকশাসনিমাগতম্॥ বলস্য ব্যসনানীহ যান্যুক্তানি মনীষিভিঃ। মুখ্যো ভেদো হি তেষান্তু পাপিষ্ঠো বিদুষাং মতঃ॥

অশ্বত্থামোবাচ। নৈব ন্যায্যমিদং বাচ্যমস্মাকং পুরুষর্ষভ। কিন্তু রোষপরীতেন গুরুণা ভাষিতা গুণাঃ॥ শত্রোরপি গুণা বাচ্যা দোষা বাচ্যা গুরোরপি। সর্ব্বথা সর্ব্বযত্নেন পুত্রে শিষ্যে হিতং বদেৎ॥

দুর্য্যোধন উবাচ। আচার্য্য এষ ক্ষমতাং শান্তিরত্র বিধীয়তাম্। অভিষ্যমানে ( আক্ষিপ্যমাণে ) তু গুরৌ তদ্‌বৃত্তং রোষ ( রোষ ) কারিতম্॥

বৈশম্পায়ন উবাচ। ততো দুর্য্যোধনো দ্রোণং ক্ষময়ামাস ভারত। সহ কর্ণেন ভীষ্মেণ কৃপেণ চ মহাত্মনা॥

দ্রোণ উবাচ। যদেতৎ প্রথমং বাক্যং ভীষ্মঃ শান্তনবোঽব্রবীৎ। তেনৈবাহং প্রসন্নোঽস্মি নীতিরত্র বিধীয়তাম্॥ যথা দুর্য্যোধনং পার্থো নোপসর্পতি সঙ্গরে। সাহসাদ্ যদি বা মোহাত্তথা নীতির্বিধীয়তাম্॥ বনবাসে হ্যনির্বৃত্তে দর্শয়েন্ন ধনঞ্জয়ঃ। ধনং বা লভমানোঽত্র নাদ্য নঃ ক্ষন্তুমর্হতি॥ যথা নায়ং সমাযুঞ্জ্যাদ্ধার্ত্তরাষ্ট্রান্ কথঞ্চন। ন চ সেনা [ যথা চ ন ] পরাজয়্যাত্তথা নীতির্বিধীয়তাম্॥ উক্তং দুর্য্যোধনেনাপি পুরস্তাদ্বাক্যমীদৃশম্। তদনুস্মৃত্য গাঙ্গেয় যথাবদ্বক্তুমর্হসি॥ ১-২২

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণ্যুত্তরগোগ্রহে দ্রোণবাক্যে একপঞ্চাশত্তমোঽধ্যায়ঃ।

---

## দ্বিপঞ্চাশত্তমোঽধ্যায়ঃ

ভীষ্ম উবাচ। কলাকাষ্ঠাশ্চ (কালতত্ত্বাত) যুজ্যন্তে মুহূর্ত্তাশ্চ দিনানি চ। অর্দ্ধমাসাশ্চ মাসাশ্চ নক্ষত্রাণি গ্রহাস্তথা॥ ঋতবশ্চাপি যুজ্যন্তে তথা সংবৎসরাণ্যপি। এবং কালবিভাগেন কালচক্রং প্রবর্ত্ততে॥ তেষাং কালাতিরেকেণ জ্যোতিষাঞ্চ ব্যতিক্রমাৎ। পঞ্চমে পঞ্চমে বর্ষে দ্বৌ মাসাবুপচীয়তঃ॥ তেষামপ্যধিকা মাসাঃ পঞ্চ চ দ্বাদশ ক্ষপাঃ। ত্রয়োদশানাং বর্ষাণামিতি মে বর্ত্ততে মতিঃ॥ সর্ব্বং যথাবচ্চরিতং যদ্ যদেভিঃ প্রতিশ্রুতম্। এবমেতদ্ ধ্রুবং জ্ঞাত্বা ততো বীভৎসুরাগতঃ॥ সর্ব্বে চৈব মহাত্মানঃ সর্ব্বে ধর্ম্মার্থকোবিদাঃ। যেষাং যুধিষ্ঠিরো রাজা কস্মাদ্ধর্ম্মেঽপরাধ্নুয়ুঃ॥ অক্ষুব্ধা [ অলুব্ধা ] শ্চৈব কৌন্তেয়াঃ কৃতবন্তশ্চ দুষ্করম্। ন চাপি কেবলং রাজ্যমিচ্ছেয়ুস্তেঽনুপায়তঃ॥ তদৈব তে হি বিক্রান্তমীয়ুঃ কৌরবনন্দনাঃ। ধর্ম্মপাশনিবদ্ধাস্তে ন চেলুঃ ক্ষত্রিয়ব্রতাৎ॥ তচ্চানৃতমিতি ধ্যায়াদ্ যঃ স গচ্ছেৎ পরাভবম্। বৃণুয়ুর্ম্মরণং পার্থা নানৃতত্ত্ব কথঞ্চন॥ প্রাপ্তে কালে তু প্রাপ্তব্যং নোৎসৃজেয়ুর্নরর্ষভাঃ। অপি বজ্রভৃতা গুপ্তং তথাবীর্য্যা হি পাণ্ডবাঃ॥ প্রতিযুধ্যেম সমরে সর্ব্বশস্ত্রভৃতাং বরম্। তস্মাদ্ যদত্র কল্যাণং লোকে সদ্ভিরনুষ্ঠিতম্। তথা বিধীয়তাং শীঘ্রং মা নো হ্যর্থোঽত্যগাৎ পরম্॥ ন হি পশ্যামি সংগ্রামে কদাচিদপি কৌরব। একান্তসিদ্ধিং রাজেন্দ্র সংপ্রাপ্তো হি ধনঞ্জয়ঃ॥ সংপ্রবৃত্তে তু সংগ্রামে ভাবাভাবৌ জয়াজয়ৌ। অবশ্যমেকং স্পৃশতো দৃষ্টমেতদসংশয়ম্॥ তস্মাদ্ যুদ্ধাবচরিতং কর্ম্ম বা ধর্ম্মসংহিতম্। ক্রিয়তামাশু রাজেন্দ্র সম্প্রাপ্তো হি ধনঞ্জয়ঃ॥

দুর্য্যোধন উবাচ। নাহং রাজ্যং প্রদাস্যামি পাণ্ডবানাং পিতামহ। যুদ্ধাবচরিতং যত্তু তচ্ছীঘ্রং সংবিধীয়তাম্॥

ভীষ্ম উবাচ। অত্র যা মামিকা বুদ্ধিঃ শ্রূয়তাং যদি রোচতে। সর্ব্বথা হি ময়া শ্রেয়ো বক্তব্যং কুরুনন্দন॥ ক্ষিপ্রং বল-চতুর্ভাগং গৃহ্য গচ্ছ পুরং প্রতি। ততোঽপরশ্চতুর্ভাগো গাঃ সমাদায় গচ্ছতু॥ বয়ন্ত্বর্দ্ধেন সৈন্যস্য প্রতিযোৎস্যাম পাণ্ডবম্। অহং দ্রোণশ্চ কর্ণশ্চ অশ্বত্থামা কৃপস্তথা॥ প্রতিযোৎস্যাম বীভৎসুমাগতং কৃতনিশ্চয়ম্। মৎস্যং বা পুনরায়াতমাগতং বা শতক্রতুম্। অহমাবারয়িষ্যামি বেলেব মকরালয়ম্॥

বৈশম্পায়ন উবাচ। তদ্বাক্যং রুরুচে তেষাং ভীষ্মেণোক্তং মহাত্মনা।

তথাহি কৃতবান্ রাজা কৌরবাণামনন্তরম্॥ ভীষ্মঃ প্রস্থাপ্য রাজানং গোধনং তদনন্তরম্। সেনামুখ্যান্ ব্যবস্থাপ্য ব্যূহিতুং সংপ্রচক্রমে॥

ভীষ্ম উবাচ। আচার্য্যো মধ্যতস্তিষ্ঠত্বশ্বত্থামা তু সব্যতঃ। কৃপঃ শারদ্বতো ধীমান্ পার্শ্বং রক্ষতু দক্ষিণম্॥ অগ্রতঃ সূতপুত্রস্তু কর্ণস্তিষ্ঠতু দংশিতঃ। অহং সর্ব্বস্য সৈন্যস্য পশ্চাৎ স্থাস্যামি পালয়ন্॥ ১-২৩

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাট-পর্ব্বণ্যুত্তরগোগ্রহে ভীষ্মসৈন্যব্যূহে দ্বিপঞ্চাশত্তমোঽধ্যায়ঃ।

---

## ত্রিপঞ্চাশত্তমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। তথা (এবং) ব্যূঢ়েষ্বনীকেষু কৌরবেয়ৈষু ভারত (কৌরবেয়ৈর্ম্মহারথৈঃ)। উপায়াদর্জ্জুনস্তূর্ণং রথঘোষেণ নাদয়ন্॥ দদৃশুস্তে ধ্বজাগ্রং বৈ শুশ্রুবুশ্চ রথস্বনম্। দোধূয়মানস্য ভৃশং গাণ্ডীবস্য চ নিস্বনম্॥ ততস্তৎ সর্ব্বমালোক্য দ্রোণো বচনমব্রবীৎ। মহারথমনুপ্রাপ্তং দৃষ্ট্বা গাণ্ডীব-ধন্বিনম্॥

দ্রোণ উবাচ। এতদ্ ধ্বজাগ্রং পার্থস্য দূরতঃ সম্প্রকাশতে। এষ ঘোষঃ সজলদো রোরবীতি চ বানরঃ॥ এষ তিষ্ঠন্ রথশ্রেষ্ঠে রথী রথবরপ্রণুৎ। উৎকর্ষতি ধনুঃ শ্রেষ্ঠং গাণ্ডীবমশনিস্বনম্॥ ইমৌ হি বাণৌ সহিতৌ পাদয়োর্মে ব্যবস্থিতৌ। অপরৌ চ ব্যতিক্রান্তৌ কর্ণৌ সংস্পৃশ্য মে শরৌ॥ নির্ব্বর্ত্ত্য চ বনে বাসং কৃত্বা কর্ম্মাতিমানুষম্। অভিবাদয়তে পার্থঃ শ্রোত্রে চ পরিপৃচ্ছতি॥ চিরদৃষ্টোঽয়মস্মাভিঃ প্রজ্ঞাবান্ বান্ধবপ্রিয়ঃ। অতীব জ্বলিতো লক্ষ্ম্যা পাণ্ডুপুত্রো ধনঞ্জয়ঃ॥ রথী শরী চারুতলী নিষঙ্গী, শঙ্খী পতাকী কবচী কিরীটী। খড়্গী চ ধন্বী চ বিভাতি পার্থঃ, শিখী বৃতস্রগ্‌ভিরিবাজ্যসিক্তঃ॥

বৈশম্পায়ন উবাচ। ততোঽর্জ্জুনঃ কুরূন্ দৃষ্ট্বা সংগ্রামে সমবস্থিতান্। তৎকালসদৃশং বাক্যং মৎস্যপুত্রমভাষত॥

অর্জ্জুন উবাচ। ইষুপাতে চ সেনায়াং হয়ান্ সংযচ্ছ সারথে। যাবন্নিরীক্ষে সৈন্যেঽস্মিন্ কাসৌ কুরুকুলাধমঃ॥ সর্ব্বানেতাননাদৃত্য দৃষ্ট্বা তমতিমানিনম্। তস্য মূর্দ্ধ্নি পতিষ্যামি তত এতে পরাজিতাঃ॥ এষ ব্যবস্থিতো দ্রোণো দ্রৌণিশ্চ তদনন্তরম্। ভীষ্মঃ কৃপশ্চ কর্ণশ্চ মহেষ্বাসা ব্যবস্থিতাঃ॥ রাজানং

মাত্র পশ্যামি গাঃ সমাদায় গচ্ছতি। দক্ষিণং মার্গমাস্থায় শঙ্কে জীবপরায়ণম্॥ উৎসৃজ্যৈতদ্রথানীকং গচ্ছ যত্র সুযোধনঃ। তত্রৈব যোৎস্যে বৈরাটে নাস্তি যুদ্ধং নিরামিষম্। তং হ (জি) ত্বা বিনিবর্ত্তিষ্যে গাঃ সমাদায় বৈ পুনঃ॥ (পশ্চাদেতে প্রয়াতব্যা ইতি মে বর্ত্ততে মতিঃ)॥

বৈশম্পায়ন উবাচ। এবমুক্তঃ স বৈরাটির্হয়ান্ সংযম্য যত্নতঃ। নিযম্য চ ততো রশ্মীন্ যত্র তে কুরবো গতাঃ॥ অচোদয়ত্ততো বাহান্ যতো দুর্য্যোধনো গতঃ॥ উৎসৃজ্য রথবংশন্তু প্রয়াতে শ্বেতবাহনে। অভিপ্রায়ং বিদিত্বাস্য দ্রোণো বচনমব্রবীৎ॥ নৈষোঽন্তরেণ রাজানং বীভৎসুঃ স্থাতুমিচ্ছতি। তস্য পার্ষ্ণিং গ্রহীষ্যামো জবেনাভিপ্রবাস্যতঃ॥ ন হ্যেনমতিসংক্রুদ্ধমেকো যুধ্যেত সংযুগে। অন্যো দেবাৎ সহস্রাক্ষাৎ কৃষ্ণাদ্বা দেবকীসুতাৎ। আচার্য্যাচ্চ সপুত্রাদ্বা ভারদ্বাজান্মহারথাৎ॥ কিং নো গাবঃ করিষ্যন্তি ধনং বা বিপুলং তথা। দুর্য্যোধনঃ পার্থজলে পুরা নৌরিব মজ্জতি॥ তথৈব গত্বা বীভৎসুর্নাম বিশ্রাব্য চাত্মনঃ। শলভৈরিব তাং সেনাং শরৈঃ শীঘ্রমবাকিরৎ॥ কীর্য্যমাণাঃ শরৌঘৈস্তু যোধাস্তে পার্থচোদিতৈঃ। নাপশ্যন্নাবৃতাং ভূমিমন্তরীক্ষঞ্চ পত্রিভিঃ॥ তেষামাপততাং যুদ্ধে নাপযানেঽভবন্মতিঃ। শীঘ্রত্বমেব পার্থস্য পূজয়ন্তি স্ম চেতসা (তে তদা)॥ ততঃ শঙ্খং প্রদধ্মৌ স দ্বিষতাং লোমহর্ষণম্। বিস্ফার্য্য চ ধনুঃশ্রেষ্ঠং ধ্বজে ভূতান্যচোদয়ৎ॥ তস্য শঙ্খস্য শব্দেন রথনেমিস্বনেন চ। গাণ্ডীবস্য চ শব্দেন পৃথিবী সমকম্পত॥ অমানুষাণাং সর্ব্বেষাং [শব্দেন] ভূতানাং ধ্বজবাসিনাম্। ঊর্দ্ধং পুচ্ছান্ বিধুন্বানা রেভমাণাঃ সমন্ততঃ। গাবঃ প্রতিন্যবর্ত্তন্ত দিশমাস্থায় দক্ষিণাম্॥ ১-২৫

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাট পর্ব্বণ্যুত্তরগোগ্রহে গোনিবর্ত্তনং নাম ত্রিপঞ্চাশত্তমোঽধ্যায়ঃ।

---

## চতুঃপঞ্চাশত্তমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। স শত্রুসেনাং তরসা প্রণুদ্য, গাস্তা বিজিত্যাথ ধনুর্ধরাগ্র্যঃ। দুর্য্যোধনায়াভিমুখং প্রয়াতো, মৎস্যাস্য রাজ্ঞঃ প্রিয়মাচিকীর্ষুঃ॥ গোষু প্রয়াতেষু জবেন মৎস্যান্, কিরীটিনং কার্য্যকৃতঞ্চ মত্বা। দুর্য্যোধনায়াভিমুখং প্রয়াতং, কুরুপ্রবীরাঃ সহসাঽভিপেতুঃ॥ তেষামনীকানি বহূনি গাঢ়ং, ব্যূঢ়ানি দৃষ্ট্বা বহুলধ্বজানি। মৎস্যস্য পুত্রং

দ্বিষতাং নিহত্য, বৈরাটিমামন্ত্র্য ততোঽভ্যুবাচ ॥ এতেন তূর্ণং প্রতিপাদয়ৈতান্, শ্বেতান্ হয়ান্ কাঞ্চনরশ্মিযোক্ত্রান্। জবেন সর্ব্বেণ কুরু প্রযত্নমাসাদয়ৈতং রথসিংহবৃন্দম্ ॥ গজো গজেনেব ময়া দুরাত্মা, যোদ্ধুং সমাকাঙ্ক্ষতি সূতপুত্রঃ। তমেব মাং প্রাপয় রাজপুত্র, দুর্য্যোধনাপাশ্রয়-জাতদর্পম্ ॥ ততো হয়ৈর্বাত-জবৈর্বৃহদ্ভিঃ, পুত্রো বিরাটস্য সুবর্ণকক্ষৈঃ। ব্যধ্বংসয়ত্তদ্রথিনামনীকং, ততোঽবহৎ পাণ্ডবমাজিমধ্যে ॥ তং চিত্রসেনো বিশিখৈর্বিপাঠৈঃ, সংগ্রামজিচ্ছত্রুসহো জয়শ্চ। প্রত্যুদ্যযুর্ভারতমাপতন্তং, মহারথাঃ কর্ণমভীপ্সমানাঃ ॥ ততঃ স তেষাং পুরুষপ্রবীরঃ, শরাসনার্চ্চিঃ শরবেগতাপঃ। ব্রাতং রথানামদহৎ সমন্যু-র্বনং যথাগ্নিঃ কুরুপুঙ্গবানাম্ ( বাগ্নিঃ ) ॥ তস্মিংস্তু যুদ্ধে তুমুলে প্রবৃত্তে, পার্থং বিকর্ণোঽতিরথং রথেন। বিপাঠবর্ষেণ কুরুপ্রবীরো, ভীমেন ভীমানুজমাসসাদ ॥ ততো বিকর্ণস্য ধনুর্বিকৃষ্য, জাম্বূনদাগ্র্যোপচিতং দৃঢ়জ্যম্। অপাতয়ত্তং ধ্বজ-মস্য মথ্য, ছিন্নধ্বজঃ সোঽপ্যপয়াজ্জবেন ॥ তং শাত্রবাণাং গণবাধিতারং, কর্ম্মাণি কুর্ব্বন্তমমানুষাণি। শত্রুন্তপঃ কোপমমৃষ্যমাণঃ, সমর্দ্দয়ৎ কূর্ম্মনখেন পার্থম্ ॥ স তেন রাজাতিরথেন বিদ্ধো, বিগাহমানো ধ্বজিনীং কুরূণাম্। শত্রুন্তপং পঞ্চভিরাশু বিদ্ধা, ততোঽস্য সূতং দশভির্জঘান ॥ ততঃ স বিদ্ধো ভরতর্ষভেণ, বাণেন গাত্রাবরণাতিগেন। গতাসুরাজৌ নিপপাত ভূমৌ, নগো নগাগ্রাদিব বাতরুগ্নঃ ॥ নরর্ষভাস্তে তু নরর্ষভেণ, বীরা রণে বীরতরেণ ভগ্নাঃ। চকম্পিরে বাতবশেন কালে, প্রকম্পিতানীব মহাবনানি ॥ হতাস্তু পার্থেন নরপ্রবীরা, গতাসবোর্ব্ব্যাং ( ভূমৌ যুবানঃ ) সুষুপুঃ সুবেশাঃ। বসু-প্রদা বাসবতুল্যবীর্য্যাঃ, পরাজিতা বাসবজেন সংখ্যে ॥ সুবর্ণকার্ষ্ণায়সবর্ম্মনদ্ধা, নাগা যথা হৈমবতাঃ প্রবৃদ্ধাঃ। তথা স শত্রূন্ সমরে বিনিঘ্নন্, গাণ্ডীবধন্বা পুরুষপ্রবীরঃ ॥ চচার সংখ্যে বিদিশো দিশশ্চ, দহন্নিবাগ্নির্বনমাতপান্তে। প্রকীর্ণপর্ণানি যথা বসন্তে, বিশাতয়িত্বা পবনোঽম্বুদাংশ্চ ॥ স তান্ সপত্নান্ বিকিরন্ কিরীটী, চচার সংখ্যেঽতিরথো রথেন। শোণাশ্ববাহস্য হয়ান্নিহত্য, বৈকর্ত্তনভ্রাতুরদীনসত্ত্বঃ। একেন সংগ্রামজিতঃ শরেণ, শিরো জহারাশু কিরীটমালী ॥ তস্মিন্ হতে ভ্রাতরি সূতপুত্রো, বৈকর্ত্তনো বীর্য্যমথাদদানঃ। প্রগৃহ্য দন্তাবিব নাগরাজো, নরর্ষভং ব্যাঘ্র ইবাভ্যধাবৎ ॥ স পাণ্ডবং দ্বাদশভিঃ পৃষৎকৈর্বৈকর্ত্তনঃ শীঘ্রমথাজঘান। বিব্যাধ গাত্রেষু হয়াংশ্চ সর্ব্বান্, বিরাট-পুত্রঞ্চ করে নিজঘ্নে ॥ তমাপতন্তং সহসা কিরীটী, বৈকর্ত্তনং বৈ তরসাঽভ্যু-পেত্য। প্রগৃহ্য বেগং ন্যপতজ্জবেন, নাগং গরুত্মানিব চিত্রপক্ষঃ ॥ তাবুত্তমৌ

সর্ব্বধনুর্দ্ধরাণাং, মহাবলৌ সর্ব্বসপত্নসাহৌ। কর্ণস্য পার্থস্য নিশম্য যুদ্ধং, দিদৃক্ষ-মাণাঃ কুরবোঽভিতস্থুঃ॥ স পাণ্ডবস্তূর্ণমুদীর্ণকোপঃ, কৃতাগসং কর্ণমুদীক্ষ্য হর্ষাৎ। ক্ষণেন সাশ্বং সরথং সকেতুমন্তর্দধে ঘোরশরৌঘবৃষ্ট্যা॥ ততঃ সুবিদ্ধাঃ সরথাঃ সনাগা, যোধা বিনেদুর্ভরতর্ষভাণাম্। অন্তর্হিতা ভীষ্মমুখাঃ সহাশ্বাঃ কিরীটিনা কীর্ণরথাঃ পৃষৎকৈঃ॥ স চাপি তানর্জ্জুনবাহুমুক্তাঞ্শরাঞ্শরৌঘৈঃ প্রতিহত্য কর্ণঃ। তস্থৌ মহাত্মা সধনুঃ সবাণঃ, সবিস্ফুলিঙ্গোঽগ্নিরিবাশু কর্ণঃ॥ ততস্তু জজ্ঞে তলতালশব্দঃ, সশঙ্খভেরীপণবপ্রণাদঃ। প্রক্ষ্বেড়িতজ্যাতলনিস্বনং তং বৈকর্ত্তনং পূজয়তাং কুরূণাম্॥ উদ্ধূতলাঙ্গূলমহাপতাকধ্বজোত্তমাংসাকুলভীষণান্তম্। গাণ্ডীবনির্ঘোষকৃতপ্রণাদং, কিরীটিনং বীক্ষ্য ননাদ কর্ণঃ॥ স চাপি বৈকর্ত্তনমর্দ্দয়িত্বা, সাশ্বং সসূতং সরথং পৃষৎকৈঃ। তমাববর্ষ প্রসভং কিরীটী, পিতামহং দ্রোণকৃপৌ চ দৃষ্ট্বা॥ স চাপি পার্থং বহুভিঃ পৃষৎকৈর্বৈকর্ত্তনো মেঘ ইবাভ্যবর্ষৎ। তথৈব কর্ণঞ্চ কিরীটমালী, সঞ্ছাদয়ামাস শিতৈঃ পৃষৎকৈঃ॥ তয়োঃ সুতীক্ষ্ণান্ সৃজতোঃ শরৌঘান্, মহাশরৌঘাস্ত্রবিবর্দ্ধনে রণে। রথে বিলগ্নাবিব চন্দ্রসূর্য্যৌ, ঘনান্তরেণানুদদর্শ লোকঃ॥ অথাশুকারী চতুরো হয়াংশ্চ, বিব্যাধ কর্ণো নিশিতৈঃ কিরীটিনঃ। ত্রিভিশ্চ যন্তারমমৃষ্যমাণো, বিব্যাধ তূর্ণং ত্রিভিরস্য কেতুম্॥ ততোঽভিবিদ্ধঃ সমরাবমর্দ্দী, প্রবোধিতঃ সিংহ ইব প্রসুপ্তঃ। গাণ্ডীবধন্বা প্রবরঃ কুরূণামজিহ্মগৈঃ কর্ণমিয়ায় জিষ্ণুঃ॥ শরাস্ত্রবৃষ্ট্যাভিহতো মহাত্মা, প্রাদুশ্চকারাতিমনুষ্যকর্ম্ম। প্রাচ্ছাদয়ৎ কর্ণরথং পৃষৎকৈর্লোকানিমান্ সূর্য্য ইবাংশুজালৈঃ॥ (স পাণ্ডবং দ্বাদশভিঃ পৃষৎকৈর্ব্বৈকর্ত্তনঃ শীঘ্রমুপাজঘান। বিব্যাধ গাত্রেষু হয়াংশ্চ সর্ব্বান্, বিরাটপুত্রঞ্চ করে বিজয়ে।) স হস্তিনেবাভিহতো গজেন্দ্রঃ, প্রগৃহ্য ভল্লান্নিশিতান্নিষঙ্গাৎ। আকর্ণপূর্ণঞ্চ ধনুর্ব্বিকৃষ্য বিব্যাধ গাত্রেষ [বাণৈর]থ সূতপুত্রম্॥ অথাস্য বাহূরুশিরোললাটং, গ্রীবাং রথাঙ্গানি পরাবমর্দ্দী। স্থিতস্য বাণৈর্যুধি নির্ব্বিভেদ, গাণ্ডীবমুক্তৈরশনিপ্রকাশৈঃ॥ স পার্থমুক্তৈর্ব্বিশিখৈঃ প্রণুন্নো, গজো গজেনেব জিতস্তরস্বী। বিহায় সংগ্রামশিরঃ প্রয়াতো, বৈকর্ত্তনঃ পাণ্ডববাণতপ্তঃ॥ ১-৩৬

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণ্যুত্তরগোগ্রহে কর্ণাপযানে চতুঃপঞ্চাশত্তমোঽধ্যায়ঃ।

**পঞ্চপঞ্চাশত্তমোঽধ্যায়ঃ**

বৈশম্পায়ন উবাচ। অপযাতে তু রাধেয়ে দুর্য্যোধনপুরোগমাঃ। অনীকেন যথা স্বেন শনৈরার্চ্ছ(র্দ্দ)ন্ত পাণ্ডবম্॥ বহুধা তস্য সৈন্যস্য ব্যূঢ়স্যাপততঃ শরৈঃ। অধারয়ত বেগং স বেলেব তু মহোদধেঃ॥ ততঃ প্রহস্য বীভৎসুঃ কৌন্তেয়ঃ শ্বেতবাহনঃ। দিব্যমস্ত্রং বিকুর্ব্বাণঃ প্রত্যয়াদ্রথসত্তমঃ॥ যথা রশ্মিভিরাদিত্যঃ প্রচ্ছাদয়তি মেদিনীম্। তথা গাণ্ডীবনির্ম্মুক্তৈঃ শরৈঃ পার্থো দিশো দশ॥ ন রথানাং ন চাশ্বানাং ন গজানাং ন বর্ম্মণাম্। অনির্বিদ্ধং শিতৈর্বাণৈরাসীদ্দ্ব্যঙ্গুলমন্তরম্॥ দিব্যযোগাচ্চ পার্থস্য হয়ানামুত্তরস্য চ। শিক্ষাশিল্পোপপন্নত্বাদস্ত্রাণাঞ্চ পরিক্রমাৎ॥ বীর্য্যবত্ত্বং দ্রুতঞ্চাগ্র্যং দৃষ্ট্বা জিষ্ণোরপূজয়ন্। কালাগ্নিমিব বীভৎসুং নির্দ্দহন্তমিব প্রজাঃ॥ নারয়ঃ প্রেক্ষিতুং শেকুর্জ্জ্বলন্তমিব পাবকম্॥ তানি গ্রস্তান্যনীকানি রেজুরর্জ্জুনমার্গণৈঃ। শৈলং প্রতি নবাভ্রাণি ব্যাপ্তানীবার্করশ্মিভিঃ॥ অশোকানাং বনানীব ফুল্লানি কুসুমৈঃ [ চ্ছন্নানি বহুশঃ ] শুভৈঃ। রেজুঃ পার্থশরৈস্তদ্বত্তদা সৈন্যানি ভারত॥ স্রজোঽর্জ্জুনশরৈঃ শীর্ণং শুষ্যৎপুষ্পং হিরণ্ময়ম্। ছত্রাণি চ পতাকাশ্চ খে দধার সদাগতিঃ॥ স্ববলত্রাসনাত্রস্তাঃ পরিপেতুর্দিশো দশ। রথাঙ্গদেশানাদায় পার্থচ্ছিন্নযুগা হয়াঃ॥ কর্ণকক্ষবিষাণেষু অন্তরোষ্ঠেষু চৈব হ। মর্ম্মস্বঙ্গেষু চাহত্যাপাতয়ৎ সমরে গজান্॥ কৌরবাগ্র্যগজানাস্তু শরীরৈর্গতচেতসাম্। ক্ষণেন সংবৃতা ভূমির্মেঘৈরিব নভস্তলম্॥ যুগান্তসময়ে সর্ব্বং যথা স্থাবরজঙ্গমম্। কালক্ষয়মশেষেণ দহত্যুগ্রশিখঃ শিখী॥ তদ্বৎ পার্থো মহারাজ দদাহ সমরে রিপূন্। ততঃ সর্ব্বাস্ত্রতেজোভির্ধনুষো নিঃস্বনেন চ। শব্দেনামানুষাণাঞ্চ ভূতানাং ধ্বজবাসিনাম্। ভৈরবং শব্দমত্যুগ্রং বানরস্য চ কুর্ব্বতঃ॥ দৈবারিপাচ্চ বীভৎসুস্তস্মিন্ দৌর্য্যোধনে বলে। ভয়মুৎপাদয়ামাস বলবানরিমর্দ্দনঃ॥ রথশক্তিমমিত্রাণাং প্রাগেব নিপতদ্ভুবি। সোঽপয়াৎ সহসা পশ্চাৎ সাহসাচ্চাভ্যুপেয়িবান্॥ শরব্রাতৈঃ সুতীক্ষ্ণাগ্রৈঃ সমাদিষ্টৈঃ খগৈরিব। অর্জ্জুনস্তু খমাবব্রে লোহিতপ্রাশনৈঃ খগৈঃ॥ অত্র মধ্যে যথার্কস্য রশ্ময়স্তিগ্মতেজসঃ। দিশাসু চ তথা রাজন্নসংখ্যাতাঃ শরাস্তদা॥ সকৃদেবানতং শেকু রথমভ্যাসিতুং পরে। অলভ্যঃ পুনরশ্বৈস্তু রথাৎ সোঽতিপ্রপাদয়েৎ॥ তে শরা দ্বিট্শরীরেষু যথৈব ন সসজ্জিরে। দ্বিড়নীকেষু বীভৎসোর্ন সসজ্জে রথস্তদা॥ স তদ্বিক্ষোভয়ামাস হয়াতিবলমঞ্জসা। অনন্তভোগো ভুজগঃ ক্রীড়ন্নিব মহার্ণবে॥ অস্যতো নিত্যমত্যর্থং সর্ব্বমেবাতিগন্তথা। অশ্রুতঃ

শ্রূয়তে ভূতৈর্নুর্ঘোষঃ কিরীটিনঃ॥ সন্তস্তাস্তত্র মাতঙ্গা বাণৈরল্পান্তরান্তরে। সংবৃতাস্তেন দৃশ্যন্তে মেঘা ইব গভস্তিভিঃ॥ দিশোঽনুভ্রমতঃ সর্ব্বাঃ সব্যদক্ষিণমস্যতঃ। সততং দৃশ্যতে যুদ্ধে সায়কাসনমণ্ডলম্॥ পতন্ত্যরূপেষু যথা চক্ষুংষি ন কদাচন। নালক্ষ্যেষু শরাঃ পেতুস্তথা গাণ্ডীবধন্বনঃ॥ মার্গো গজসহস্রস্য যুগপদ্ গচ্ছতো বনে। যথা ভবেৎ তথা জজ্ঞে রথমার্গঃ কিরীটিনঃ॥ নূনং পার্থজয়ৈষিত্বা চ্ছক্রঃ সর্ব্বামরৈঃ সহ। হন্ত্যস্মানিত্যমন্যন্ত পার্থেন নিহতাঃ পরে॥ ঘ্নন্তমত্যর্থমহিতান্ বিজয়ং তত্র মেনিরে। কালমর্জ্জুনরূপেণ সংহরন্তমিব প্রজাঃ॥ কুরুসেনাশরীরাণি পার্থেনৈবাহতান্যপি। সেদুঃ পার্থহতানীব পার্থকর্ম্মানুশাসনাৎ॥ ওষধীনাং শিরাংসীব বিষস্কীর্ষাণি সোঽম্বয়াৎ। অবনেশুঃ কুরূণাং হি বীর্য্যাণ্যর্জ্জুনজাদ্ ভয়াৎ॥ অর্জ্জুনানিলভিন্নানি বনান্যর্জ্জুনবিদ্বিষাম্। চক্রুর্লোহিতধারাভির্ধরণীং লোহিতান্তরাম্॥ লোহিতেন সমাযুক্তৈঃ পাংশুভিঃ পবনোদ্ধৃতৈঃ। বভূবুর্লোহিতাস্তত্র ভৃশমাদিত্যরশ্ময়ঃ॥ সার্কং খং তৎক্ষণেনাসীৎ সন্ধ্যায়ামিব লোহিতম্। অপ্যস্তং প্রাপ্য সূর্য্যোঽপি নিবর্ত্তেত ন পাণ্ডবঃ॥ তান্ সর্ব্বান্ সমরে শূরঃ পৌরুষে সমবস্থিতান্। দিব্যৈরস্ত্রৈরচিন্ত্যাত্মা সর্ব্বানার্চ্ছদ্ধনুর্ধরান্॥ স তু দ্রোণং ত্রিসপ্তত্যা ক্ষুরপ্রাণাং সমার্পয়ৎ। দুঃসহং দশভির্বাণৈর্দ্রৌণিমষ্টাভিরেব চ॥ দুঃশাসনং দ্বাদশভিঃ কৃপং শারদ্বতং ত্রিভিঃ। ভীষ্মং শান্তনবং ষষ্ট্যা রাজানঞ্চ শতেন হ। কর্ণঞ্চ কর্ণিনা কর্ণে বিব্যাধ পরবীরহা॥ তস্মিন্ বিদ্ধে মহেষ্বাসে কর্ণে সর্ব্বাস্ত্রকোবিদে। হতাশ্বভূতে বিরথে ততোঽনীকমভজ্যত॥ তৎ প্রভগ্নং বলং দৃষ্ট্বা পার্থমাজিস্থিতং পুনঃ। অভিজ্ঞানায় কৌন্তেয়ং বৈরাটিরিদমব্রবীৎ॥ আস্থায় রুচিরং জিষ্ণো রথং সারথিনা ময়া। কতমদ্ যাস্যসেঽনীকমুক্তো যাস্যাম্যহং ত্বয়া॥

অর্জ্জুন উবাচ। লোহিতাশ্বমরিষ্টং যং বৈয়াঘ্রমনুপশ্যসি। নীলাং পতাকামাশ্রিত্য রথে তিষ্ঠন্তমুত্তর॥ কৃপস্যৈতদনীকাগ্র্যং প্রাপয়স্বৈতদেব মাম্। এতস্য দর্শয়িষ্যামি শীঘ্রাস্ত্রং দৃঢ়ধন্বিনঃ॥ ধ্বজে কমণ্ডলুর্যস্য শাতকৌম্ভময়ঃ শুভঃ। আচার্য্য এষ হি দ্রোণঃ সর্ব্বশস্ত্রভৃতাং বরঃ॥ সদা মমৈষ মান্যশ্চ সর্ব্বশস্ত্রভৃতামপি। সুপ্রসন্নং মহাবীরং কুরুষ্বৈনং প্রদক্ষিণম্॥ অত্রৈব চাবরোহৈনমেষ ধর্ম্মঃ সনাতনঃ। যদি মে প্রথমং দ্রোণঃ শরীরে প্রহরিষ্যতি। ততোঽস্য প্রহরিষ্যামি নাস্য কোপো ভবেদিতি॥ অস্যাতিদূরে চ ধনুর্ধ্বজাগ্রে যস্য দৃশ্যতে। আচার্য্যস্যৈষ পুত্রো বৈ অশ্বত্থামা মহারথঃ॥ সদা

মমৈষ মাস্তশ্চ সর্ব্বশস্ত্রভৃতামপি। এতস্য ত্বং রথং প্রাপ্য নিবর্ত্তেথাঃ পুনঃ পুনঃ॥ য এষ তু রথানীকে সুবর্ণকবচাবৃতঃ। সেনাগ্র্যেণ তৃতীয়েণ ব্যবহার্য্যেণ তিষ্ঠতি॥ যস্য নাগো ধ্বজাগ্রেঽসৌ হেমকেতনসংবৃতঃ। ধৃতরাষ্ট্রাত্মজঃ শ্রীমানেষ রাজা সুযোধনঃ॥ এতস্যাভিমুখং বীর রথং পররথারুজম্। প্রাপয়স্বৈষ রাজা হি প্রমাথী যুদ্ধদুর্ম্মদঃ॥ এষ দ্রোণস্য শিষ্যাণাং শীঘ্রাস্ত্রে প্রথমো মতঃ। এতস্য দর্শয়িষ্যামি শীঘ্রাস্ত্রং প্রথমং (বিপুলং) রণে॥ নাগকক্ষা তু রুচিরা ধ্বজাগ্রে যস্য তিষ্ঠতি। এষ বৈকর্ত্তনঃ কর্ণো বিদিতঃ পূর্ব্বমেব তে॥ এতস্য রথমাস্থায় রাধেয়স্য দুরাত্মনঃ। যত্তো ভবেথাঃ সংগ্রামে স্পর্দ্ধতে হি সদা ময়া॥ যস্তু নীলানুসারেণ পঞ্চতারেণ কেতুনা। হস্তাবাপী বৃহদ্ধন্বা রথে তিষ্ঠতি বীর্য্যবান্॥ যস্য তারার্কচিত্রোঽসৌ ধ্বজো রথবরে স্থিতঃ। যস্যৈতৎ পাণ্ডুরং ছত্রং বিমলং মূর্দ্ধ্নি তিষ্ঠতি॥ মহতো রথবংশস্য নানাধ্বজপতাকিনঃ। বলাহকাগ্রে সূর্য্যো বা য এষ প্রমুখে স্থিতঃ॥ হৈমং চন্দ্রার্কসঙ্কাশং কবচং যস্য দৃশ্যতে। জাতরূপশিরস্ত্রাণং মনস্ত্রাসয়তীব মে॥ এষ শান্তনবো ভীষ্মঃ সর্ব্বেষাং নঃ পিতামহঃ। রাজশ্রিয়া প্রবৃদ্ধশ্চ দুর্য্যোধনবশানুগঃ॥ পশ্চাদেষ প্রয়াতব্যো ন মে বিঘ্নকরো ভবেৎ। এতেন যুধ্যমানস্য যত্তঃ সংযচ্ছ মে হয়ান্॥ ততোঽভ্যবহদব্যগ্রো বৈরাটিঃ সব্যসাচিনম্। যত্রাতিষ্ঠৎ কৃপো রাজন্ যোৎস্যমানো ধনঞ্জয়ম্॥১-৬০

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণ্যুত্তরগোগ্রহে অর্জ্জুনকৃপসংগ্রামে পঞ্চপঞ্চাশত্তমোঽধ্যায়ঃ।

---

## ষট্‌পঞ্চাশত্তমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। তান্যনীকান্যদৃশ্যন্ত কুরূণামুগ্রধন্বিনাম্। সংসর্পন্তো যথা মেঘা ঘর্ম্মান্তে মন্দমারুতাঃ॥ অভ্যাসে বাজিনস্তস্থুঃ সমারূঢ়াঃ প্রহারিভিঃ। ভীমরূপাশ্চ মাতঙ্গাস্তোমরাঙ্কুশনোদিতাঃ। মহামাত্রৈঃ সমারূঢ়া বিচিত্রকবচোজ্জ্বলাঃ॥ ততঃ শক্রঃ সুরগণৈঃ সমারুহ্য সুদর্শনম্। সর্ব্বান্ দেবান্ সমারোপ্য বৈদূর্য্যফলকাশ্রিতম্। সহোপায়াত্তদা রাজন্ বিশ্বাশ্বিমরুতাং গণৈঃ॥ তদ্দেবযক্ষগন্ধর্ব্বমহোরগসমাকুলম্। শুশুভেঽভ্রবিনির্ম্মুক্তং গ্রহাণামিব মণ্ডলম্॥ অস্ত্রাণাঞ্চ বলং তেষাং মনুষ্যেষু প্রযুঞ্জতাম্। তচ্চ ঘোরং মহদ্যুদ্ধং কৃপার্জ্জুনসমাগমে। দ্রষ্টুমভ্যাগতা দেবা বিমানৈঃ স্বৈঃ পৃথক্ পৃথক্॥ শতং

শতসহস্রাণাং যত্র স্থূণা হিরণ্ময়ী। মণিরত্নময়ী চাস্থা প্রসাদং তদধারয়ৎ॥ ততঃ কামগমং দিব্যং সর্ব্বরত্নবিভূষিতম্। বিমানং দেবরাজস্য শুশুভে খেচরং তদা॥ তত্র দেবাস্ত্রয়স্ত্রিংশত্তিষ্ঠন্তি সহবাসবাঃ। গন্ধর্ব্বা রাক্ষসাঃ সর্পাঃ পিতরশ্চ মহর্ষিভিঃ॥ তথা রাজা বসুমনা বলাক্ষঃ সুপ্রতর্দ্দনঃ। অষ্টকশ্চ শিবিশ্চৈব যযাতির্নহুষো গয়ঃ॥ মনুঃ পুরুরঘুর্ভানুঃ কৃশাক্ষঃ সগরো নলঃ। বিমানে দেবরাজস্য সমদৃশ্যন্ত সুপ্রভাঃ॥ অগ্নেরীশস্য সোমস্য বরুণস্য প্রজাপতেঃ। তথা ধাতুর্ব্বিধাতুশ্চ কুবেরস্য যমস্য চ॥ অলম্বুষোগ্রসেনানাং গন্ধর্ব্বস্য চ তুম্বুরোঃ। যথাস্থানং যথোদ্দেশং বিমানানি চকাশিরে॥ সর্ব্বদেবনিকায়াশ্চ সিদ্ধাশ্চ পরমর্ষয়ঃ। অর্জ্জুনস্য কুরূণাঞ্চ যুদ্ধং দ্রষ্টুমুপাগতাঃ॥ দিব্যানাং তত্র মাল্যানাং গন্ধঃ পুণ্যোঽথ সর্ব্বশঃ। প্রসসার বসন্তাদৌ বৃক্ষাণামিব ভারত (পুষ্পিণাম্)॥ আতপত্রাণি বাসাংসি স্রজশ্চ [ধ্বজাশ্চ] ব্যজনানি চ। তত্র রত্নানি দেবানাং সমদৃশ্যন্ত তিষ্ঠতাম্॥ উপাশাম্যদ্রজো ভৌমং সর্ব্বং ব্যাপ্তং মরীচিভিঃ। দিব্যান্ গন্ধানুপাদায় বায়ুর্যোধানসেবত॥ প্রভাসিতমিবাকাশং চিত্ররূপমলঙ্কৃতম্। সম্পতদ্ভিঃ স্থিতৈশ্চাপি নানারত্নাবভাসিতৈঃ॥ বিমানৈর্ব্বিবিধৈশ্চিত্রৈরুপনীতৈঃ সুরোত্তমৈঃ। বজ্রভৃচ্ছুশুভে তত্র বিমানস্থৈঃ সুরৈর্বৃতঃ॥ বিভ্রন্ মালাং মহাতেজাঃ পদ্মোৎপলসমাযুতাম্। বিপ্রেক্ষমাণো বলভৃন্নাতৃপ্যৎ সুতমাহবে॥ ১-১৯

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাট-পর্ব্বণি দেবাগমনে ষট্পঞ্চাশত্তমোঽধ্যায়ঃ।

---

## সপ্তপঞ্চাশত্তমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। দৃষ্ট্বা ব্যূঢ়ান্যনীকানি কুরূণাং পাণ্ডুনন্দনঃ। তত্র বৈরাটিমামন্ত্র্য পার্থো বচনমব্রবীৎ॥

অর্জ্জুন উবাচ। জাম্বূনদময়ী বেদী ধ্বজে যস্য প্রকাশতে। তস্য দক্ষিণতো যাহি কৃপঃ শারদ্বতো যতঃ॥

বৈশম্পায়ন উবাচ। ধনঞ্জয়বচঃ শ্রুত্বা বৈরাটিস্ত্বরিতস্তদা। হয়ান্ রজতসঙ্কাশান্ হেমভাণ্ডানচোদয়ৎ॥ আনুপূর্ব্ব্যা তু তৎসর্ব্বমাস্থায় রথমুত্তমম্। প্রাহিণোচ্চন্দ্রসঙ্কাশান্ কুপিতানিব তান্ হয়ান্॥ স গত্বা কুরুসেনায়াঃ সমীপং হয়কোবিদঃ। পুনরাবর্ত্তয়ামাস তান্ হয়ান্ বাতরংহসঃ॥ প্রদক্ষিণ-

মুপাবৃত্য মণ্ডলং সব্যমেব চ। কুর্ব্বন্ সম্মোহয়ামাস মৎস্যো যানেন তত্ত্ববিৎ॥ কৃপস্য রথমাস্থায় বৈরাটিরকুতোভয়ঃ। প্রদক্ষিণমুপাবৃত্য তস্থৌ তস্যাগ্রতো বলী॥ ততোঽর্জ্জুনঃ শঙ্খবরং দেবদত্তং মহাস্বনম্। প্রদধ্মৌ বলমাস্থায় নাম বিশ্রাব্য চাত্মনঃ॥ তস্য শব্দো মহানাসীদ্ ধ্মম্যমানস্য (ধ্মায়মানস্য) জিষ্ণুনা। তথা বীর্য্যবতা সঙ্খ্যে পর্ব্বতস্যেব দীর্য্যতঃ॥ পূজয়াঞ্চক্রিরে শঙ্খং কুরবঃ সহ-সৈনিকাঃ। অর্জ্জুনেন সমাধ্মাতঃ শতধা যন্ন দীর্য্যতে॥ দিবমাবৃত্য শব্দস্তু নিবৃত্তঃ শুশ্রুবে পুনঃ। সৃষ্টো মঘবতা বজ্রঃ প্রপতন্নিব পর্ব্বতে॥ এতস্মিন্নন্তরে বীরো বলদর্পসমন্বিতঃ। অমৃষ্যমাণস্তং শব্দং কৃপঃ শারদ্বতস্তথা॥ অর্জ্জুনং প্রতি সংরব্ধো যুদ্ধার্থী স মহাবলঃ। মহোদধিজমাদায় দধ্মৌ বেগেন বীর্য্যবান্॥ স তু শব্দেন লোকাংস্ত্রীনাবৃত্য রথিনাং বরঃ। ধনুরাদায় সুমহজ্জ্যাশব্দমকরোত্তদা॥ তৌ রথৌ সূর্য্যসঙ্কাশৌ যোৎস্যমানৌ মহাবলৌ। শারদাবিব জীমূতৌ ব্যরো-চেতাং ব্যবস্থিতৌ॥ ততঃ শারদ্বতস্তূর্ণং পার্থং দশভিরাশুগৈঃ। বিব্যাধ পরবীরঘ্নং নিশিতৈর্ম্মর্ম্মভেদিভিঃ॥ পার্থোঽপি বিশ্রুতং লোকে গাণ্ডীবং পরমায়ুধম্। বিকৃষ্য চিক্ষেপ বহূন্নারাচান্মর্ম্মভেদিনঃ॥ তানপ্রাপ্তাঞ্ছিতৈর্ব্বা-ণৈর্নারাচান্ রক্তভোজনান্। কৃপশ্চিচ্ছেদ পার্থস্য শতশোঽথ সহস্রশঃ॥ ততঃ পার্থশ্চ সংক্রুদ্ধশ্চিত্রান্ মার্গান্ প্রদর্শয়ন্। দিশঃ প্রচ্ছাদয়ামাস বাণৌঘৈঃ প্রদিশস্তথা (দিশঃ সংছাদয়ন্ বাণৈঃ প্রদিশশ্চ মহারথঃ)। একচ্ছায়মিবাকাশমকরোৎ সর্ব্বতঃ প্রভুঃ॥ প্রাচ্ছাদয়দমেয়াত্মা পার্থঃ শরশতৈঃ কৃপম্। স শরৈরর্দ্দিতঃ ক্রুদ্ধঃ শিতৈরগ্নিশিখোপমৈঃ॥ তূর্ণং শতসহস্রেণ পার্থমপ্রতিমৌজসম্। অর্দ্দয়িত্বা মহাত্মানং ননর্দ্দ সমরে কৃপঃ॥ ততঃ কনকপর্ব্বাগ্রৈর্বীরঃ সন্নতপর্ব্বভিঃ। ধনুরাদায় বিব্যাধ পার্থং দশভিরা-শুগৈঃ। ত্বরন্ গাণ্ডীবনির্ম্মুক্তৈরর্জ্জুনস্তস্য বাজিনঃ॥ চতুর্ভিশ্চতুরস্তীক্ষ্ণৈরবিধ্যৎ পরমেষুভিঃ। তে হয়া নিশিতৈর্ব্বাণৈ (বিশিখৈর্ব্বিদ্ধা) র্জ্বলদ্ভিরিব পাবকৈঃ। উৎপেতুঃ সহসা সর্ব্বে কৃপঃ স্থানাদথাচ্যবৎ॥ চ্যুতঙ্গৌতমমালোক্য স্থানাৎ কুন্তীসুতস্তদা। নাবিধ্যৎ পরবীরঘ্নো রক্ষমাণোঽস্য গৌরবম্॥ স তু লব্ধ্বা পুনঃ স্থানং গৌতমঃ সব্যসাচিনম্। বিব্যাধ দশভির্ব্বাণৈস্ত্বরিতঃ কঙ্কপত্রিভিঃ॥ ততঃ পার্থো ধনুস্তস্য ভল্লেন নিশিতেন হ। চিচ্ছেদৈকেন ভূয়স্তু হস্তাবাপ-মথাহরৎ॥ অথাস্য কবচং বাণৈর্নিশিতৈর্ম্মর্ম্মভেদিভিঃ। ব্যধমন্ন চ পার্থো-ঽস্য শরীরমবপীড়য়ৎ॥ তস্য নির্ম্মুচ্যমানস্য কবচাৎ কায়মাবভৌ। সময়ে মুচ্যমানস্য সর্পস্যেব তনুর্যথা॥ ছিন্নে ধনুষি পার্থেন সোঽন্যদাদায় কার্ম্মুকম্।

চকার গৌতমঃ সজ্যং তদদ্ভুতমিবাভবৎ ॥ স তদপ্যস্য কৌন্তেয়শ্চিচ্ছেদানতপর্ব্বণা। এবমন্যানি চাপানি বহূনি কৃতহস্তবৎ। শারদ্বতস্য চিচ্ছেদ পাণ্ডবঃ পরবীরহা ॥ স চ্ছিন্নধনুরাদায় রথাচ্ছক্তিং প্রতাপবান্। প্রাহিণোৎ পাণ্ডুপুত্রায় প্রদীপ্তামশনীমিব ॥ তামর্জ্জুনস্তদায়ান্তীং শক্তিং হেমবিভূষিতাম্। বিয়দ্গতাং মহোল্কাভাং চিচ্ছেদ দশভিঃ শরৈঃ ॥ সাপতদ্দশধা ছিন্না ভূমৌ পার্থেন ধীমতা ॥ যুগপচ্চৈব ভল্লৈস্তু ততঃ সজ্যধনুঃ কৃপঃ। তমাশু নিশিতৈঃ পার্থং বিভেদ দশভিঃ শরৈঃ ॥ ততঃ পার্থো মহাতেজা বিশিখানগ্নিতেজসঃ। চিক্ষেপ সমরে ক্রুদ্ধস্ত্রয়োদশ শিলাশিতান্ ॥ অথাস্য যুগমেকেন চতুর্ভিশ্চতুরো হয়ান্। ষষ্ঠেন চ শিরঃ কায়াচ্ছরেণ রথসারথেঃ ॥ ত্রিভিস্ত্রিবেণুং সমরে দ্বাভ্যামক্ষং মহারথঃ। দ্বাদশেন চ ভল্লেন চকর্ত্তাস্য ধ্বজোত্তমম্ ॥ ততো বজ্রনিকাশেন ফাল্গুনঃ প্রহসন্নিব। ত্রয়োদশেনেন্দ্রসমঃ কৃপং বক্ষস্যবিধ্যত ॥ স ছিন্নধন্বা বিরথো হতাশ্বো হতসারথিঃ। গদাপাণিরবপ্লুত্য তূর্ণং চিক্ষেপ তাং গদাম্ ॥ সা চ মুক্তা গদা গুর্ব্বী কৃপেণ সুপরিষ্কৃতা। অর্জ্জুনেন শরৈর্ন্নুন্না প্রতিমার্গমথাগমৎ ॥ ততো যোধাঃ পরীপ্সন্তঃ শারদ্বতমমর্ষণম্। সর্ব্বতঃ সমরে পার্থং শরবর্ষৈরবাকিরন্ ॥ ততো বিরাটস্য সুতঃ সব্যমাবৃত্য বাজিনঃ। যমকং মণ্ডলং কৃত্বা তান্ যোধান্ প্রত্যবারয়ৎ ॥ ততঃ কৃপমুপাদায় বিরথং তে নরর্ষভাঃ। অপজহ্রুর্মহাবেগাঃ কুন্তীপুত্রাদ্ধনঞ্জয়াৎ ॥ ১-৪৩

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি কৃপাপযানে সপ্তপঞ্চাশত্তমোঽধ্যায়ঃ।

---

## অষ্টপঞ্চাশত্তমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। কৃপেঽপনীতে দ্রোণস্তু প্রগৃহ্য সশরং ধনুঃ। অভ্যধাবদথাধৃষ্যঃ [ ধাবদনাধৃষ্যঃ ] শোণাশ্বঃ শ্বেতবাহনম্ ॥ স তু রুক্মরথং দৃষ্ট্বা গুরুমায়ান্তমন্তিকাৎ। অর্জ্জুনো জয়তাং শ্রেষ্ঠ উত্তরং বাক্যমব্রবীৎ ॥

অর্জ্জুন উবাচ। যত্রৈষা কাঞ্চনী বেদী ধ্বজে যস্য প্রকাশতে। উচ্ছ্রিতা প্রবরে দণ্ডে পতাকাভিরলঙ্কৃতা। তত্র মাং বহ ভদ্রং তে দ্রোণানীকায় সারথে ॥ অশ্বাঃ শোণাঃ প্রকাশন্তে বৃহন্তশ্চারুবাহিনঃ। স্নিগ্ধবিদ্রুমসঙ্কাশাস্তাম্রাস্যাঃ প্রিয়দর্শনাঃ। যুক্তা রথবরে যস্য সর্ব্বশিক্ষাবিশারদাঃ ॥ দীর্ঘবাহুর্মহাতেজা বলরূপসমন্বিতঃ। সর্ব্বলোকেষু বিক্রান্তো ভারদ্বাজঃ প্রতাপবান্ ॥ বুদ্ধ্যা তুল্যো

হ্যুশনসা বৃহস্পতিসমো নয়ে। বেদাস্তথৈব চত্বারো ব্রহ্মচর্য্যং তথৈব চ॥ সসংহারাণি সর্ব্বাণি দিব্যান্যস্ত্রাণি মারিষ। ধনুর্ব্বেদশ্চ কাৎস্ন্যেন যস্মিন্নিত্যং প্রতিষ্ঠিতঃ॥ ক্ষমা দমশ্চ সত্যঞ্চ আনৃশংস্যমথার্জ্জবম্। এতে চান্যে চ বহবো যস্মিন্নিত্যং দ্বিজে গুণাঃ॥ তেনাহং যোদ্ধুমিচ্ছামি মহাভাগেন সংযুগে। তস্মাত্ত্বং প্রাপয়াচার্য্যং ক্ষিপ্রমুত্তর বাহয়॥

বৈশম্পায়ন উবাচ। অর্জ্জুনেনৈবমুক্তস্তু বৈরাটির্হেমভূষণান্। চোদয়ামাস তানশ্বান্ ভারদ্বাজরথং প্রতি॥ তমাপতন্তং বেগেন পাণ্ডবং রথিনাং বরম্। দ্রোণঃ প্রত্যুদ্যযৌ পার্থং মত্তো মত্তমিব দ্বিপম্॥ ততঃ প্রাধ্মাপয়চ্ছঙ্খং ভেরী-শতনিনাদিতম্। প্রচুক্ষুভে বলং সর্ব্বমুদ্ধূত ইব সাগরঃ॥ অথ শোণান্ সদশ্বাংস্তান্ হংসবর্ণৈর্ম্মনোজবৈঃ। মিশ্রিতান্ সমরে দৃষ্ট্বা ব্যস্ময়ন্ত রণে নরাঃ॥ তৌ রথৌ বীর্য্যসম্পন্নৌ দৃষ্ট্বা সংগ্রামমূর্দ্ধনি। আচার্য্যশিষ্যাবজিতৌ কৃতবিদ্যৌ মনস্বিনৌ॥ সমাশ্লিষ্টৌ তদান্যোন্যং দ্রোণপার্থৌ মহাবলৌ। দৃষ্ট্বা প্রাকম্পত মুহূর্ত্তং ভরতানাং মহদ্বলম্॥ হর্ষযুক্তস্ততঃ পার্থঃ প্রহসন্নিব বীর্য্যবান্। রথং রথেন দ্রোণস্য সমাসাদ্য মহারথঃ॥ অভিবাদ্য মহাবাহুঃ সামপূর্ব্বমিদং বচঃ। উবাচ শ্লক্ষ্ণয়া বাচা কৌন্তেয়ঃ পরবীরহা॥ উষিতাঃ স্ম বনে বাসং প্রতিকর্ম্ম চিকীর্ষবঃ। কোপং নার্হসি নঃ কর্ত্তুং সদা সমরদুর্জ্জয়॥ অহন্তু প্রহৃতে পূর্ব্বং প্রহরিষ্যামি তেঽনঘ। ইতি মে বর্ত্ততে বুদ্ধিস্তদ্ভবান্ কর্ত্তুমর্হতি॥ ততোঽস্মৈ প্রাহিণোদ্ দ্রোণঃ শরানধিকবিংশতিম্। অপ্রাপ্তাংশ্চৈব তান্ পার্থশ্চিচ্ছেদ কৃতহস্তবৎ॥ ততঃ শরসহস্রেণ রথং পার্থস্য বীর্য্যবান্। অবাকিরত্ততো দ্রোণঃ শীঘ্রমস্ত্রং নিদর্শয়ন্॥ হয়াংশ্চ রজতপ্রখ্যান্ কঙ্কপত্রৈরজিহ্মগৈঃ। অবাকিরদমেয়াত্মা পার্থং সংকোপয়ন্নিব॥ এবং প্রববৃতে যুদ্ধং ভারদ্বাজকিরীটিনোঃ। সমং বিমুঞ্চতোঃ সংখ্যে বিশিখান্ দীপ্ততেজসঃ॥ তাবুভৌ খ্যাতকর্ম্মাণাবুভৌ বায়ুসমৌ জবে। উভৌ দিব্যাস্ত্রবিদ্বাংসাবুভাবুত্তমতেজসৌ। ক্ষিপন্তৌ শরজালানি মোহয়ামাসতুর্নৃপান্॥ ব্যস্ময়ন্ত ততো যোধা যে তত্রাসন্ সমাগতাঃ। শরান্ বিসৃজতোস্তূর্ণং সাধু সাধ্বিত্যপূজয়ন্॥ দ্রোণং হি সমরে কোঽন্যো যোদ্ধুমর্হতি ফাল্গুনাৎ। রৌদ্রঃ ক্ষত্রিয়ধর্ম্মোঽয়ং গুরুণা যদযুধ্যত॥ ইত্যব্রুবন্ জনাস্তত্র সংগ্রামশিরসি স্থিতাঃ। বীরৌ তাবভিসংরব্ধৌ সন্নিকৃষ্টৌ মহাভুজৌ। ছাদয়েতাং শরব্রাতৈরন্যোঽন্যমপরাজিতৌ॥ বিস্ফার্য্য সুমহচ্চাপং হেমপৃষ্ঠং দুরাসদম্। ভারদ্বাজোঽথ সংক্রুদ্ধঃ ফাল্গুনং প্রত্যবিধ্যত॥ স সায়কময়ৈর্জালৈরর্জ্জুনস্য রথং প্রতি। ভানুমদ্ভিঃ শিলাধৌতৈর্ভানোঃ প্রাচ্ছাদয়ৎ প্রভাম্॥ পার্থঞ্চ

সুমহাবাহুর্মহাবেগৈর্মহারথঃ। বিব্যাধ নিশিতৈর্বাণৈর্মেঘো বৃষ্ট্যেব পর্ব্বতম্॥ তথৈব দিব্যং গাণ্ডীবং ধনুরাদায় পাণ্ডবঃ। শত্রুঘ্নং বেগবান্ কৃষ্ণো ভারসাধনমুত্তমম্॥ বিসসর্জ্জ শরাংশ্চিত্রান্ সুবর্ণবিকৃতান্ বহূন্। শময়ন্ শরবর্ষাণি ভারদ্বাজস্য বীর্য্যবান্। তূর্ণঞ্চাপবিমুক্তানি তদদ্ভুতমিবাভবৎ॥ স রথেন চরন্ পার্থঃ প্রেক্ষণীয়ো ধনঞ্জয়ঃ। যুগপদ্দিক্ষু সর্ব্বাসু সর্ব্বশস্ত্রাণ্যদর্শয়ৎ॥ একচ্ছায়মিবাকাশং বাণৈশ্চক্রে সমন্ততঃ। নাদৃশ্যত তদা দ্রোণো নীহারেণেব সংবৃতঃ॥ তস্যাভবত্তদা রূপং সংবৃতস্য শরোত্তমৈঃ। জাজ্বল্যমানস্য তদা পর্ব্বতস্যেব সর্ব্বতঃ॥ দৃষ্ট্বা তু পার্থস্য রণে শরৈঃ স্বরথমাবৃতম্। স বিস্ফার্য্য ধনুঃ শ্রেষ্ঠং মেঘস্তনিতনিস্বনম্॥ অগ্নিবর্ণময়ং ঘোরং ব্যকর্ষৎ পরমায়ুধম্। ব্যপাতয়চ্ছরাংস্তীক্ষ্ণান্ দ্রোণঃ সমিতিশোভনঃ॥ মহানভূত্ততঃ শব্দো বংশানামিব দহ্যতাম্। জাম্বূনদময়ৈঃ পুঙ্খৈশ্চিত্রচাপবিনির্গতৈঃ। প্রাচ্ছাদয়দমেয়াত্মা দিশঃ সূর্য্যস্য চ প্রভাম্॥ ততঃ কনকপুঙ্খানাং শরাণাং নতপর্ব্বণাম্। বিয়চ্চরাণাং বিয়তি দৃশ্যন্তে বহবো ব্রজাঃ॥ দ্রোণস্য পুঙ্খসক্তাশ্চ প্রপতন্তঃ শরাসনাৎ। একো দীর্ঘ ইবাদৃশ্যদাকাশে সংহতঃ শরঃ॥ এবন্তৌ স্বর্ণবিকৃতান্ বিমুঞ্চন্তৌ মহাশরান্। আকাশং সংবৃতং বীরাবুল্কাভিরিব চক্রতুঃ॥ শরাস্তয়োস্তু বিবভুঃ কঙ্কবর্হিণবাসসঃ। পঙ্‌ক্তিঃ শরদি খস্থানাং হংসানাঞ্চরতামিব॥ যুদ্ধং সমভবত্তত্র সুসংরব্ধং মহাত্মনোঃ। দ্রোণপাণ্ডবয়োর্ঘোরং বৃত্রবাসবয়োরিব॥ তৌ গজাবিব সংক্রুদ্ধৌ বিষাণাগ্রৈঃ পরস্পরম্। শরৈঃ পূর্ণায়তোৎসৃষ্টৈরন্যোঽন্যমভিজঘ্নতুঃ॥ তৌ ব্যবাহরতাং যুদ্ধে সংরব্ধৌ রণশোভিনৌ। উদীরয়ন্তৌ সমরে দিব্যান্যস্ত্রাণি ভাগশঃ॥ অথ ত্বাচার্য্যমুখ্যেন শরান্ ক্ষিপ্তান্ শিলাশিতান্। ন্যবারয়চ্ছিতৈর্বাণৈরর্জ্জুনো জয়তাং বরঃ॥ দর্শয়ন্ বীক্ষমাণানামস্ত্রমুগ্রপরাক্রমম্। ইষুভিস্তূর্ণমাকাশং বহুভিশ্চ সমাবৃণোৎ॥ জিঘাংসন্তং নরব্যাঘ্রমর্জ্জুনং তিগ্মতেজসম্। আচার্য্যমুখ্যঃ সমরে দ্রোণঃ শস্ত্রভৃতাং বরঃ। অর্জ্জুনেন সহাক্রীড়চ্ছরৈঃ সন্নতপর্ব্বভিঃ॥ দিব্যান্যস্ত্রাণি মুঞ্চন্তং ভারদ্বাজো মহারণে। অস্ত্রৈরস্ত্রাণি সংবার্য্য ফাল্গুনং সমযোধয়ৎ॥ তয়োরাসীৎ সংপ্রহারঃ ক্রুদ্ধয়োর্নরসিংহয়োঃ। অমর্ষিণোস্তদান্যোঽন্যং দেবদানবয়োরিব॥ ঐন্দ্রং বায়ব্যমাগ্নেয়মস্ত্রমস্ত্রেণ পাণ্ডবঃ। দ্রোণেন মুক্তমাত্রন্তু গ্রসতি স্ম পুনঃ পুনঃ॥ এবং শূরৌ মহেষ্বাসৌ বিসৃজন্তৌ শিতাঞ্ছরান্। একচ্ছায়ং চক্রতুস্তাবাকাশং শরবৃষ্টিভিঃ॥ তত্রার্জ্জুনেন মুক্তানাং পততাং বৈ শরীরিষু। পর্ব্বতেষ্বিব বজ্রাণাং শরাণাং শ্রূয়তে স্বনঃ॥ ততো নাগা রথাশ্চৈব বাজিনশ্চ বিশাম্পতে। শোণিতাক্তা ব্যদৃশ্যন্ত পুষ্পিতা ইব

কিংশুকাঃ ॥ ( অশোকানাং বনানীব চ্ছন্নানি কুসুমৈনবৈঃ। রেজুঃ পার্থশরৈ-স্তদা সৈন্যানি ভারত। ) বাহুভিশ্চ সকেয়ূরৈর্ব্বিচিত্রৈশ্চ মহারথৈঃ। সুবর্ণ-কবচৈশ্চিত্রৈর্গজৈশ্চ বিনিপাতিতৈঃ ॥ যোধৈশ্চ নিহতৈস্তত্র পার্থবাণপ্রপীড়িতৈঃ। বলমাসীৎ সমুদ্ভ্রান্তং দ্রোণার্জ্জুনসমাগমে ॥ বিধুন্বানৌ তু তৌ তত্র ধনুষী ভার-সাধনে। আচ্ছাদয়েতামন্যোঽন্যং ততক্ষতুরথেষুভিঃ [ সংতক্ষন্তৌ মহেষুভিঃ ] ॥ তয়োঃ সমভবদ্ যুদ্ধং তুমুলং ভরতর্ষভ। দ্রোণকৌন্তেয়য়োস্তত্র বলিবাসবয়োরিব ॥ অথ পূর্ণায়তোৎসৃষ্টৈঃ শরৈঃ সন্নতপর্ব্বভিঃ। ব্যদারয়েতামন্যোঽন্যং প্রাণদ্যূতে প্রবর্ত্তিতে ॥ অথান্তরীক্ষে নাদোঽভূদ্ দ্রোণং তত্র প্রশংসতাম্। দুষ্করং কৃতবান্ দ্রোণো যদর্জ্জুনমযোধয়ৎ ॥ প্রমাথিনং মহাবীর্য্যং দৃঢ়মুষ্টিং দুরাসদম্। জেতারং দেবদৈত্যানাং সর্ব্বেষাঞ্চ মহারথম্ ॥ অবিভ্রমঞ্চ শিক্ষাঞ্চ লাঘবং দূরপাতিতাম্। পার্থস্য সমরে দৃষ্ট্বা দ্রোণস্যাভূচ্চ বিস্ময়ঃ ॥ অথ গাণ্ডীবমুদ্যম্য দিব্যং ধনুরমর্ষণঃ। বিচকর্ষ রণে পার্থো বাহুভ্যাং ভরতর্ষভ ॥ ততো বাণময়ং বর্ষং শলভানামিবায়তিম্। দৃষ্ট্বা তে বিস্মিতাঃ সর্ব্বে সাধু সাধ্বিত্যপূজয়ন্ ॥ ন চ বাণান্তরেঽপ্যস্য বায়ুঃ শক্নোতি সর্পিতুম্। অনিশং সন্দধানস্য শরানুৎসৃজতস্তথা ॥ দদর্শ নান্তরং কশ্চিৎ পার্থস্যাদদতোঽপি চ ॥ তথাস্ত্রযুদ্ধে ঘোরে তু বর্ত্তমানে সুদারুণে। শীঘ্রাচ্ছীঘ্রতরঃ পার্থঃ শরানন্যানুদৈরয়ৎ ॥ ততঃ শতসহস্রাণি শরাণাং নতপর্ব্ব-ণাম্। যুগপৎ প্রাপতংস্তত্র দ্রোণস্য রথমন্তিকাৎ ॥ আকীর্য্যমাণে দ্রোণে তু শরৈর্গাণ্ডীবধন্বনা। হাহাকারো মহানাসীৎ সৈন্যানাং ভরতর্ষভ ॥ পাণ্ডবস্য তু শীঘ্রাস্ত্রং মঘবা প্রত্যপূজয়ৎ। গন্ধর্ব্বাপ্সরসশ্চৈব যে চ তত্র সমাগতাঃ ॥ ততো বৃন্দেন মহতা রথানাং রথযূথপঃ। আচার্য্যপুত্রঃ সহসা পাণ্ডবং প্রত্য-বারয়ৎ ॥ অশ্বত্থামা তু তৎকর্ম্ম হৃদয়েন মহাত্মনঃ। পূজয়ামাস পার্থস্য কোপ-ঞ্চাস্যাকরোদ্ ভৃশম্ ॥ স মন্যুবশমাপন্নঃ পার্থমভ্যদ্রবদ্রণে। কিরন্ শরসহস্রাণি পর্জ্জন্য ইব বৃষ্টিমান্ ॥ আবৃত্য তু মহাবাহুর্যতো দ্রৌণিস্ততো হয়ান্। অন্তরং প্রদদৌ পার্থো দ্রোণস্য ব্যপসর্পিতুম্ ॥ স তু লব্ধ্বান্তরং তূর্ণং ব্যপায়াজ্জবনৈর্হয়ৈঃ। ছিন্নবর্ম্মধ্বজঃ শূরো নিকৃত্তঃ পরমেষুভিঃ ॥ ১-৭৬

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাট-পর্ব্বণ্যুত্তরগোগ্রহে দ্রোণাপযানে অষ্টপঞ্চাশত্তমোঽধ্যায়ঃ।

---

## ঊনষষ্টিতমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। ততো দ্রৌণির্মহাবীর্য্যঃ (মহারাজ) প্রযযাবর্জ্জুনং রণে। তং পার্থঃ প্রতিজগ্রাহ তার্ক্ষ্যো নাগমিবোদ্ধতম্। শরজালেন মহতা বর্ষমাণ ইবাম্বুদঃ॥ তয়োর্দেবাসুরসমঃ সন্নিপাতো মহানভূৎ। কিরতোঃ শরজালানি বৃত্রবাসবয়োরিব॥ ন স্ম সূর্য্যস্তদা ভাতি ন চ বাতি সমীরণঃ। শরজালাবৃতে ব্যোম্নি চ্ছায়াভূতে সমন্ততঃ॥ মহান্ চটচটাশব্দো যোধয়োর্হন্যমানয়োঃ। দহ্যতামিব বেণূনামাসীৎ পরপুরঞ্জয়॥ হয়ানস্যার্জ্জুনঃ সর্ব্বান্ কৃতবানল্পজীবিতান্। তে রাজন্ন প্রজানন্ত দিশং কাঞ্চন মোহিতাঃ॥ ততো দ্রৌণির্মহাবীর্য্যঃ পার্থস্য বিচরিষ্যতঃ। বিবরং সূক্ষ্মমালোক্য জ্যাং চিচ্ছেদ ক্ষুরেণ হ। তদস্যাপূজয়ন্ দেবাঃ কর্ম্ম দৃষ্ট্বাতিমানুষম্॥ দ্রোণো ভীষ্মশ্চ কর্ণশ্চ কৃপশ্চৈব মহারথঃ। সাধু সাধ্বিতি ভাষন্তোঽপূজয়ন্ কর্ম্ম তস্য তৎ॥ ততো দ্রৌণির্ধনুষ্পাণিরাক্রম্য (ধনুঃশ্রেষ্ঠৌ বিভ্রম্য) ভরতর্ষভম্। পুনরেবাহনৎ পার্থং হৃদয়ে কঙ্কপত্রিভিঃ॥ ততঃ পার্থো মহাবাহুঃ প্রহস্য স্বনবত্তদা। যোজয়ামাস নবয়া মৌর্ব্যা গাণ্ডীবমোজসা॥ ততোঽর্দ্ধচন্দ্রমাবৃত্য তেন পার্থঃ সমাগমৎ। বারণেনেব মত্তেন মত্তো বারণযূথপঃ॥ ততঃ প্রববৃতে যুদ্ধং পৃথিব্যামেকবীরয়োঃ। রণমধ্যে দ্বয়োরেবং সুমহল্লোমহর্ষণম্॥ তৌ বীরৌ দদৃশুঃ সর্ব্বে কুরবো বিস্ময়ান্বিতাঃ। যুধ্যমানৌ মহাবীর্য্যৌ যূথপাবিব সঙ্গতৌ॥ তৌ সমাজঘ্নতুর্বীরাবন্যোঽন্যং পুরুষর্ষভৌ। শরৈরাশীবিষাকারৈর্জ্জ্বলদ্ভিরিব পাবকৈঃ॥ অক্ষয্যাবিষুধী দিব্যৌ পাণ্ডবস্য মহাত্মনঃ। তেন পার্থো রণে শূরস্তস্থৌ গিরিরিবাচলঃ॥ অশ্বত্থাম্নঃ পুনর্ব্বাণাঃ ক্ষিপ্রমভ্যস্যতো রণে। জগ্মুঃ পরিক্ষয়ং শীঘ্রমভূত্তেনাধিকোঽর্জ্জুনঃ॥ ততঃ কর্ণো মহাচাপং বিকৃষ্যাভ্যধিকং রুষা। অবাক্ষিপত্ততঃ শব্দো হাহাকারো মহানভূৎ॥ ততশ্চক্ষুর্দ্দধে পার্থো যত্র বিস্ফার্য্যতে ধনুঃ। দদর্শ তত্র রাধেয়ং তস্য কোপো ব্যবর্দ্ধত॥ স রোষবশমাস্থায় কর্ণমেব জিঘাংসয়া। সংপ্রৈক্ষত বিবৃত্তাভ্যাং নেত্রাভ্যাং কুরুপুঙ্গব॥ তথা তু বিমুখে পার্থে দ্রোণপুত্রস্য সায়কান্। ত্বরিতাঃ পুরুষা রাজন্ প্রজহ্রুঃ সহস্রশঃ॥ উৎসৃজ্য চ মহাবাহুর্দ্রোণপুত্রং ধনঞ্জয়ঃ। অভিদুদ্রাব সহসা কর্ণমেব সপত্নজিৎ॥ তমভিদ্রুত্য কৌন্তেয়ঃ ক্রোধসংরক্তলোচনঃ। কাময়ন্ দ্বৈরথং তেন যুদ্ধং বচনমব্রবীৎ॥ ১-২১

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণ্যুত্তরগোগ্রহে অর্জ্জুনাশ্বত্থামযুদ্ধং নাম একোনষষ্টিতমোঽধ্যায়ঃ।

## ষষ্টিতমোঽধ্যায়ঃ

অর্জ্জুন উবাচ। কর্ণ যত্তে সভামধ্যে বহু বাচা বিকত্থিতম্। ন মে যুধি সমোঽস্তীতি তদিদং সমুপস্থিতম্॥ সোঽস্ত কর্ণ ময়া সার্দ্ধং ব্যবহৃত্য মহামৃধে। জ্ঞাস্যসে বলমাত্মীয়ং ন চান্যানবমংস্যসে॥ অবোচঃ পরুষা বাচো ধর্ম্মমুৎসৃজ্য কেবলম্। ইদন্তু দুষ্করং মন্যে যদিদন্তে চিকীর্ষিতম্॥ যত্ত্বয়া কথিতং পূর্ব্বং মামনাসাদ্য কিঞ্চন। তদদ্য কুরু রাধেয় কুরুমধ্যে ময়া সহ॥ যৎ সভায়াঞ্চ পাঞ্চালীং ক্লিশ্যমানাং দুরাত্মভিঃ। দৃষ্টবানসি তস্যাদ্য ফলমাপ্নুহি কেবলম্॥ ধর্ম্মপাশনিবদ্ধেন যন্ময়া মর্ষিতং পুরা। তস্য রাধেয় কোপস্য বিজয়ং পশ্য মে মৃধে॥ বনে দ্বাদশবর্ষাণি যানি সোঢ়ানি দুর্ম্মতে। তস্যাদ্য প্রতিকোপস্য ফলং প্রাপ্নুহি কেবলম্॥ এহি কর্ণ ময়া সার্দ্ধং প্রতিপদ্যস্ব সঙ্গরম্। প্রেক্ষকাঃ কুরবঃ সর্ব্বে ভবন্তু তব সৈনিকাঃ॥

কর্ণ উবাচ। ব্রবীষি বাচা যৎ পার্থ কর্ম্মণা তৎ সমাচর। অতিশেতে হি তে বাক্যং কর্ম্মৈতৎ প্রথিতং ভুবি॥ যত্ত্বয়া মর্ষিতং পূর্ব্বং তদশক্তেন মর্ষিতম্। ইতো গৃহ্ণীমহে পার্থ তব দৃষ্ট্বা পরাক্রমম্॥ ধর্ম্মপাশনিবদ্ধেন যত্ত্বয়া মর্ষিতং পুরা। তথৈব বদ্ধমাত্মানমবদ্ধমিব মন্যসে॥ যদি তাবদ্বনে বাসো যথোক্তশ্চরিতস্ত্বয়া। তত্ত্বং ধর্ম্মার্থবিৎ ক্লিষ্টঃ স ময়া যোদ্ধুমিচ্ছসি॥ যদি শক্রঃ স্বয়ং পার্থ যুধ্যতে তব কারণাৎ। তথাপি ন ব্যথা কাচিন্মম স্যাদ্বিক্রমিষ্যতঃ॥ অয়ং কৌন্তেয় কামস্তে ন চিরাৎ সমুপস্থিতঃ। যোৎস্যসে হি ময়া সার্দ্ধমদ্য দ্রক্ষ্যসি মে বলম্॥

অর্জ্জুন উবাচ। (প্রাকৃতান্ পুরুষান্ জিত্বা বৃথা তে কর্ণ গর্জ্জিতম্)। ইদানীমেব তাবত্ত্বমপযাতো রণান্মম। তেন জীবসি রাধেয় নিহতস্ত্বনুজস্তব॥ ভ্রাতরং ঘাতয়িত্বা কস্ত্যক্ত্বা রণশিরশ্চ কঃ। ত্বদন্যঃ পুরুষঃ সৎসু ব্রূয়াদেবং ব্যবস্থিতঃ॥

বৈশম্পায়ন উবাচ। ইতি কর্ণং বদন্নেব বীভৎসুরপরাজিতঃ। অভ্যয়াদ্বিসৃজন্ বাণান্ কায়াবরণভেদিনঃ॥ প্রতিজগ্রাহ তান্ কর্ণঃ শরানগ্নিশিখোপমান্। মহতা শরবর্ষেণ বর্ষমাণ ইবাম্বুদঃ॥ উৎপেতুঃ শরজালানি ঘোররূপাণি সর্ব্বশঃ। অবিধ্যদশ্বান্ বাহ্বোশ্চ হস্তাবাপং পৃথক্ পৃথক্॥ সোঽমৃষ্যমাণঃ কর্ণস্য নিষঙ্গস্যাবলম্বনম্। চিচ্ছেদ নিশিতাগ্রেণ শরেণানতপর্ব্বণা॥ উপাসঙ্গাদুপাদায় কর্ণো বাণমথাপরম্। বিব্যাধ পাণ্ডবং হস্তে তস্য মুষ্টিরশীর্য্যত॥ ততঃ পার্থো মহাবাহুঃ কর্ণস্য ধনুরচ্ছিনৎ। স শক্তিং প্রাহিণোত্তস্মৈ তাং পার্থো ব্যধমচ্ছরৈঃ॥

ততো নিপেতুর্ব্বহবো রাধেয়স্য পদানুগাঃ। তান্ গাণ্ডীববিনির্ম্মুক্তৈঃ প্রাহিণোদ্ যমসাদনম্॥ ততোঽস্যাশ্বান্ শরৈস্তীক্ষ্ণৈর্বীভৎসুর্ভারসাধনৈঃ। আকর্ণমুক্তৈরহনৎ তে হতাঃ প্রাপতন্ ভুবি॥ অথাপরেণ বাণেন জ্বলিতেন মহৌজসা। বিব্যাধ কর্ণং কৌন্তেয়স্তীক্ষ্ণেনোরসি বীর্য্যবান্॥ তস্য ভিত্ত্বা তনুত্রাণং কায়মভ্যাগমচ্ছরঃ। ততঃ স তমসাবিষ্টো ন স্ম কিঞ্চিৎ প্রজজ্ঞিবান্॥ স গাঢ়বেদনো হিত্বা রণং প্রায়াদুদঙ্মুখঃ। ততোঽর্জ্জুন উদক্রোশদুত্তরশ্চ মহারথঃ॥ ১-২৭

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণ্যুত্তরগোগ্রহে কর্ণপরাজয়ো নাম ষষ্টিতমোঽধ্যায়ঃ।

---

## একষষ্টিতমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। ততো বৈকর্ত্তনং জিত্বা পার্থো বৈরাটিমব্রবীৎ। এতন্মাং প্রাপয়ানীকং যত্র তালো হিরণ্ময়ঃ॥ অত্র শান্তনবো ভীষ্মো রথেঽস্মাকং পিতামহঃ। কাঙ্ক্ষমাণো ময়া যুদ্ধং তিষ্ঠত্যমরদর্শনঃ॥ অথ সৈন্যং মহদ্দৃষ্ট্বা রথনাগহয়াকুলম্। অব্রবীদুত্তরঃ পার্থমপবিদ্ধঃ শরৈর্ভৃশম্॥ নাহং শক্যামি (শক্ষ্যামি) বীরেহ নিয়ন্তুং তে হয়োত্তমান্। বিষীদন্তি মম প্রাণা মনো বিহ্বলতীব মে॥ অস্ত্রাণামিহ দিব্যানাং প্রভাবাৎ সংপ্রযুজ্যতাম্। ত্বয়া চ কুরুভিশ্চৈব দ্রবন্তীব দিশো দশ॥ গন্ধেন মূর্চ্ছিতশ্চাহং বসারুধিরমেদসাম্। দ্বৈধীভূতং মনো মেঽস্য ত্রাসশ্চৈব প্রপশ্যতঃ॥ অদৃষ্টপূর্ব্বঃ শূরাণাং ময়া সংখ্যে সমাগমঃ। গোধাঘাতেন মহতা শঙ্খানাং নিস্বনেন চ॥ সিংহনাদৈশ্চ শূরাণাং গজানাং বৃংহিতৈস্তথা। গাণ্ডীবশব্দেন ভৃশমশনিপ্রতিমেন চ। শ্রুতিঃ স্মৃতিশ্চ মে বীর প্রণষ্টা মূঢ়চেতসঃ॥ অলাতচক্রপ্রতিমং মণ্ডলং সততং ত্বয়া। ব্যাক্ষিপ্যমাণং সমরে গাণ্ডীবঞ্চ প্রপশ্যতঃ। দৃষ্টির্বিচলিতা বীর হৃদয়ং দীর্য্যতীব মে॥ বপুশ্চোগ্রং তব রণে ক্রুদ্ধস্যেব পিনাকিনঃ। ব্যায়চ্ছতঃ শরান্ ঘোরান্ দৃষ্ট্বা ভীর্মে ভবত্যপি॥ নাদদানং ন সন্ধানং ন মুঞ্চন্তং শরোত্তমান্। ত্বামহং সংপ্রপশ্যামি পশ্যন্নপি বিচেতনঃ॥ অবসীদন্তি মে প্রাণা ভূরিয়ং চলতীব চ। ন প্রতোদং ন চাভীষূন্ সংযন্তুং শক্তিরস্তি মে॥

অর্জ্জুন উবাচ। মা ভৈষীঃ স্তম্ভয়াত্মানং ত্বমাপি নরপুঙ্গব। অত্যদ্ভুতানি কর্ম্মাণি কৃতানি রণমূর্দ্ধনি॥ রাজপুত্রোঽসি ভদ্রস্তে কুলে মৎস্যস্য বিশ্রুতে।

জাতস্ত্বং শত্রুদমনে ন বিষীদিতুমর্হসি॥ ধৃতিং কৃত্বা সুবিপুলাং রাজপুত্র রথে (মম) পুনঃ। যুধ্যমানস্য সমরে হয়ান্ সংযচ্ছ শত্রুহন্॥

বৈশম্পায়ন উবাচ। এবমুক্ত্বা মহাবাহুর্বৈরাটিং নরসত্তমঃ। অর্জ্জুনো রথিনাং শ্রেষ্ঠঃ পুনরেবেদমব্রবীৎ॥ সেনাগ্রমাশু ভীষ্মস্য প্রাপয়ৈতদেব মাম্। আচ্ছেৎস্যাম্যহমেতস্য ধনুর্জ্যামপি চাহবে॥ অস্যন্তং দিব্যমস্ত্রং মাং চিত্রমদ্য নিশাময়। শতহ্রদামিবায়ান্তীং স্তনয়িত্নোরিবাম্বরে॥ সুবর্ণপৃষ্ঠং গাণ্ডীবং দ্রক্ষ্যন্তি কুরবো মম। দক্ষিণেনাথ বামেন কতরেণ স্বিদস্যতি॥ ইতি মাং সঙ্গতাঃ সর্ব্বে তর্কয়িষ্যন্তি শত্রবঃ। শোণিতোদাং রথাবর্ত্তাং নাগনক্রাং দুরত্যয়াম্। নদীং প্রস্কন্দয়িষ্যামি পরলোকপ্রবাহিণীম্॥ পাণিপাদশিরঃ-পৃষ্ঠবাহুশাখানিরন্তরম্। বনং কুরূণাং ছেৎস্যামি শরৈঃ সন্নতপর্ব্বভিঃ॥ জয়তঃ কৌরবীং সেনামেকস্য মম ধন্বিনঃ। শতং মার্গা ভবিষ্যন্তি পাবকস্যেব কাননে॥ ময়া চক্রমিবাবিদ্ধং সৈন্যং দ্রক্ষ্যসি কেবলম্। ইষ্বস্ত্রে শিক্ষিতং চিত্রমহং দর্শয়িতাস্মি তে॥ অসংভ্রান্তো রথে তিষ্ঠ সমেষু বিষমেষু চ। দিবমাবৃত্য তিষ্ঠন্তং গিরিং ভিন্দ্যাং স্বপত্রিভিঃ॥ অহমিন্দ্রস্য বচনাৎ সংগ্রামেঽভ্যহনং পুরা। পৌলোমান্ কালকঞ্জাংশ্চ সহস্রাণি শতানি চ॥ অহমিন্দ্রাদ্ দৃঢ়াং মুষ্টিং ব্রহ্মণঃ কৃতহস্ততাম্। প্রগাঢ়ং তুমুলং চিত্রমদ্য শিক্ষাং (চিত্রমিতি বিদ্ধি) প্রজাপতেঃ॥ অহং পারে সমুদ্রস্য হিরণ্যপুরবাসিনাম্। জিত্বা ষষ্টিসহস্রাণি রথিনামুগ্রতেজসাম্॥ শীর্য্যমাণানি তূলানি প্রবৃদ্ধেনেব বায়ুনা। ময়া কুরূণাং বৃন্দানি পাত্যমানানি পশ্য বৈ॥ ধ্বজবৃক্ষং পত্তিশাখং রথসিংহগণায়ুতম্। বনমাদীপয়িষ্যামি কুরূণামস্ত্রতেজসা॥ তানহং রথনীড়েভ্যঃ শরৈঃ সন্নতপর্ব্বভিঃ। পত্তীন্ সর্ব্বানতিবলান্ যোৎস্যমানানবস্থিতান্। একঃ সংকালয়িষ্যামি বজ্রপাণিরিবাসুরান্॥ রৌদ্রং রুদ্রাদহং হ্যস্ত্রং বারুণং বরুণাদপি। অস্ত্রমাগ্নেয়মগ্নেশ্চ বায়ব্যং মাতরিশ্বনঃ। বজ্রাদীনি তথাস্ত্রাণি শক্রাদহমবাপ্তবান্॥ ধার্ত্তরাষ্ট্র-বলং ঘোরং নরসিংহাভিরক্ষিতম্। অহমুৎসাদয়িষ্যামি বৈরাটে ব্যেতু তে ভয়ম্॥

বৈশম্পায়ন উবাচ। এবমাশ্বাসিতস্তেন বৈরাটিঃ সব্যসাচিনা। ব্যগাহত-দ্রথানীকং ভীমং ভীষ্মাভিরক্ষিতম্॥ তমায়ান্তং মহাবাহুং জিগীষন্তং রণে কুরূন্। অভ্যবারয়দব্যগ্রশ্চারুকর্ম্মা নদীসুতঃ॥ তস্য জিষ্ণুরুপাবৃত্য ধ্বজং মূলাদপাতয়ৎ। বিকৃষ্য কলধৌতাগ্রমিষস্ত্রং প্রাপয়দ্রথম্ (স বিদ্ধঃ প্রাপতদ্-ভুবি)॥ তচ্চিত্রমাল্যাভরণাঃ কৃতবিদ্যা মনস্বিনঃ। আগচ্ছন্ ভীমধন্বানং চত্বারঃ সুমহাবলাঃ॥ দুঃশাসনো বিকর্ণশ্চ দুঃসহোঽথ বিবিংশতিঃ। আগত্য

ভীমধন্বানং বীভৎসুং প্রত্যবারয়ন্॥ দুঃশাসনস্তু ভল্লেন বিদ্ধা বৈরাটিমুত্তরম্। দ্বিতীয়েনার্জ্জুনং বীরং প্রত্যবিধ্যৎ স্তনান্তরে॥ তস্য জিষ্ণুরুপাবৃত্য শিতধারেণ কার্ম্মুকম্। চকর্ত্ত গার্দ্ধ্রপত্রেণ জাতরূপপরিষ্কৃতম্॥ অথৈনং পঞ্চভিঃ পশ্চাৎ প্রত্যবিধ্যৎ স্তনান্তরে। সোঽপযাতো রণং হিত্বা পার্থবাণপ্রপীড়িতঃ॥ তং বিকর্ণঃ শরৈস্তীক্ষ্ণৈর্গার্দ্ধ্রপত্রৈরজিহ্মগৈঃ। বিব্যাধ পরবীরঘ্নমর্জ্জুনং ধৃতরাষ্ট্রজঃ॥ ততস্তমপি কৌন্তেয়ঃ শরেণানতপর্ব্বণা। ললাটেঽভ্যহনত্তূর্ণং স বিদ্ধঃ প্রাপতদ্রথাৎ॥ ততঃ পার্থমভিদ্রুত্য দুঃসহঃ সবিবিংশতিঃ। অবাকিরচ্ছরৈস্তীক্ষ্ণৈঃ পরীপ্সন্ ভ্রাতরং রণে॥ তাবুভৌ গার্দ্ধ্রপত্রাভ্যাং নিশিতাভ্যাং ধনঞ্জয়ঃ। বিদ্ধা যুগপদব্যগ্রস্তয়ো বাহানসূদয়ৎ॥ তৌ হতাশ্বৌ বিবিদ্ধাঙ্গৌ ধৃতরাষ্ট্রাত্মজাবুভৌ। অভিপ্লুত্য রথৈরন্যৈরপনীতৌ পদানুগৈঃ॥ সর্ব্বা দিশশ্চাভ্যপতদ্বীভৎসুরপরাজিতঃ। কিরীটমালী কৌন্তেয়ো লব্ধলক্ষ্যো মহাবলঃ॥১-৪৬

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণ্যুত্তরগোগ্রহে অর্জ্জুনদুঃশাসনাদিযুদ্ধো নাম একষষ্টিতমোঽধ্যায়ঃ।

---

## দ্বিষষ্টিতমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। অথ সঙ্গম্য সর্ব্বে তে কৌরবাণাং মহারথাঃ। অর্জ্জুনং সহিতা যত্তাঃ প্রত্যযুধ্যন্ত ভারত॥ স সায়কময়ৈর্জালৈঃ সর্ব্বতস্তান্মহারথান্। প্রাচ্ছাদয়দমেয়াত্মা নীহারেণেব পর্ব্বতান্॥ নদদ্ভিশ্চ মহানাগৈর্হ্রেষমাণৈশ্চ বাজিভিঃ। ভেরীশঙ্খনিনাদৈশ্চ স শব্দস্তুমুলোঽভবৎ॥ নাগাশ্বকায়ান্নির্ভিদ্য লৌহানি কবচানি চ। পার্থস্য শরজালানি বিনিষ্পেতুঃ সহস্রশঃ॥ ত্বরমাণঃ শরানস্যন্ পাণ্ডবঃ প্রবভৌ রণে। মধ্যন্দিনগতোঽর্চ্চিমান্ শরদীব দিবাকরঃ॥ উপপ্লবন্তি বিত্রস্তা রথেভ্যো রথিনস্তথা। সাদিনশ্চাশ্বপৃষ্ঠেভ্যো ভূমৌ চাপি পদাতয়ঃ॥ শরৈঃ সন্তাড্যমানানাং কবচানাং মহাত্মনাম্। তাম্ররাজতলৌহানাং প্রাদুরাসীন্মহাস্বনঃ॥ ছন্নমায়োধনং সর্ব্বং শরীরৈর্গতচেতসাম্। গজাশ্বসাদিভিস্তত্র শিতবাণাত্তজীবিতৈঃ (পার্থবাণপ্রপীড়িতৈঃ)॥ রথোপস্থাভিপতিতৈরাস্তৃতা মানবৈর্মহী। প্রনৃত্যতীব (অনৃত্যদিব) সংগ্রামে চাপহস্তো ধনঞ্জয়ঃ॥ শ্রুত্বা গাণ্ডীবনির্ঘোষং বিস্ফূর্জ্জিতমিবাশনেঃ। ত্রস্তানি সর্ব্বভূতানি ব্যপাগচ্ছন্মহাহবাৎ॥ কুণ্ডলোষ্ণীষধারীণি জাতরূপস্রজানি চ।

পতিতানি চ দৃশ্যন্তে শিরাংসি রণমূর্দ্ধনি॥ বিশিখোন্মথিতৈর্গাত্রৈর্বাহুভিশ্চ সকার্ম্মুকৈঃ। সহস্তাভরণৈশ্চান্যৈঃ প্রচ্ছন্না ভাতি মেদিনী॥ শিরসাং পাত্যমানানামন্তরাণি শিতৈঃ শরৈঃ। অশ্মবৃষ্টিরিবাকাশাদভবত্তরতর্ষভ॥ দর্শয়িত্বা তথাত্মানং রৌদ্রং রুদ্রপরাক্রমঃ। অথ রুদ্ধোঽচরৎ (রৌদ্রঞ্চরন্) পার্থো বর্ষাণি ত্রি-দশানি চ। ক্রোধাগ্নিমুৎসৃজন্ তীব্রং ধার্ত্তরাষ্ট্রেষু পাণ্ডবঃ॥ তস্য তদ্দহতঃ সৈন্যং দৃষ্ট্বা চৈব পরাক্রমম্। সর্ব্বে শান্তিপরা ভূত্বা ধার্ত্তরাষ্ট্রস্য পশ্যতঃ॥ বিত্রাসয়িত্বা তৎসৈন্যং দ্রাবয়িত্বা মহারথান্। অর্জ্জুনো জয়তাং শ্রেষ্ঠঃ পর্য্যবর্ত্তত ভারত॥ প্রাবর্ত্তয়ন্নদীং ঘোরাং শোণিতোদাং তরঙ্গিণীম্। কেশশৈবালসম্বাধাং যুগান্তে কালনির্ম্মিতাম্॥ শরচাপপ্লবাং ঘোরাং মাংসশোণিতকর্দ্দমাম্। তনুত্রোষ্ণীষসম্বাধাং নাগকূর্ম্মাং রথোড়ুপাম্॥ মেদোবসাসৃক্প্রবহাং মহাভয়বিবর্দ্ধিনীম্। রৌদ্ররূপাং মহাভীমাং শ্বাপদৈর-ভিনাদিতাম্॥ তীক্ষ্ণশস্ত্রমহাগ্রাহাং ক্রব্যাদগণসেবিতাম্। মুক্তাহারোর্ম্মি-কলিলাং চিত্রালঙ্কারভূষিতাম্॥ শিরঃসঙ্ঘমহাবর্ত্তাং নাগনক্রাং দুরত্যয়াম্। মহারথমহাদ্বীপাং শঙ্খদুন্দুভিনিস্বনাম্। চকার চ তদা পার্থো নদীমুত্তরশোণি-তাম্॥ আদদানস্য হি শরান্ সন্ধায় চ বিমুঞ্চতঃ। বিকর্ষতশ্চ গাণ্ডীবং ন কিঞ্চিদ্দদৃশেঽন্তরম্ (জনঃ)॥ ১-২২

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাট-পর্ব্বণ্যুত্তরগোগ্রহে অর্জ্জুনসঙ্কুলযুদ্ধো নাম দ্বিষষ্টিতমোঽধ্যায়ঃ।

---

## ত্রিষষ্টিতমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। ততো দুর্য্যোধনঃ কর্ণো দুঃশাসনবিবিংশতী। দ্রোণশ্চ সহ পুত্রেণ কৃপশ্চাপি মহারথঃ॥ পুনর্যযুশ্চ সংরব্ধা ধনঞ্জয়জিঘাংসবঃ। বিস্ফারয়ন্তশ্চাপানি বলবন্তি দৃঢ়ানি চ॥ তান্ বিকীর্ণপতাকেন রথেনাদিত্য-বর্চ্চসা। প্রত্যুদ্যযৌ মহারাজ সমন্তাদ্বানরধ্বজঃ॥ ততঃ কৃপশ্চ কর্ণশ্চ দ্রোণশ্চ রথিনাং বরঃ। তং মহাস্ত্রৈর্ম্মহাবীর্য্যাঃ পরিবার্য্য ধনঞ্জয়ম্॥ শরৌ-ঘান্ সম্যগস্যন্তো জীমূতা ইব বার্ষিকাঃ। ববর্ষুঃ শরবর্ষাণি পাতয়ন্তঃ কিরীটি-নম্॥ ইষুভির্ব্বহুভিস্তূর্ণং সমরে ব্যোমবাহিভিঃ। অদূরাৎ পর্য্যবস্থায় পূরয়ামা-সুরাদৃতাঃ॥ তথা তৈরবকীর্ণস্য দিব্যৈরস্ত্রৈঃ সমন্ততঃ। ন তস্য দ্ব্যঙ্গুলমপি

বিবৃত্তং সম্প্রদৃশ্যতে॥ ততঃ প্রহস্য বীভৎসুর্দিব্যমৈন্দ্রং মহারথঃ। অস্ত্রমাদিত্য-সঙ্কাশং গাণ্ডীবে সমযোজয়ৎ॥ শররশ্মিরিবাদিত্যঃ প্রতপ্তে সমরে বলী। কিরীটমালী কৌন্তেয়ঃ সর্ব্বান্ প্রাচ্ছাদয়ৎ কুরূন্॥ যথা বলাহকে বিদ্যুৎ পাবকো বা শিলোচ্চয়ে। তথা গাণ্ডীবমভবদিন্দ্রায়ুধমিবাততম্॥ যথা বর্ষতি পর্জ্জন্যে বিদ্যুদ্বিভ্রাজতে দিবি। দ্যোতয়ন্তী দিশঃ সর্ব্বাঃ পৃথিবীঞ্চ সমন্ততঃ॥ তথা দশ দিশঃ সর্ব্বাঃ পতদ্গাণ্ডীবমাবৃণোৎ। নাগাশ্বরথিনঃ সর্ব্বে মুমুহুস্তত্র ভারত॥ সর্ব্বে শান্তিপরা যোধাঃ স্বচিত্তানি ন লেভিরে। সংগ্রামে বিমুখাঃ সর্ব্বে যোধাস্তে হতচেতসঃ॥ এবং সর্ব্বাণি সৈন্যানি ভগ্নানি ভরতর্ষভ। ব্যদ্রবন্ত দিশঃ সর্ব্বা নিরাশানি স্ব(স্ব)জীবিতে॥ ১-১৪

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাট-পর্ব্বণ্যুত্তরগোগ্রহে অর্জ্জুনসঙ্কুলযুদ্ধো নাম ত্রিষষ্টিতমোঽধ্যায়ঃ।

---

## চতুঃষষ্টিতমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। ততঃ শান্তনবো ভীষ্মঃ সুদুর্দ্ধর্ষঃ প্রতাপবান্। বধ্যমানেষু যোধেষু ধনঞ্জয়মুপাদ্রবৎ॥ প্রগৃহ্য কার্ম্মুকশ্রেষ্ঠং জাতরূপপরিষ্কৃতম্। শরানাদায় তীক্ষ্ণাগ্রান্মর্ম্মভেদান্ প্রমাথিনঃ। পাণ্ডুরেণাতপত্রেণ ধ্রিয়মাণেন মূর্দ্ধনি। শুশুভে স নরব্যাঘ্রো গিরিঃ সূর্য্যোদয়ে যথা॥ প্রধ্মাপ্য শঙ্খং গাঙ্গেয়ো ধার্ত্ত-রাষ্ট্রান্ প্রহর্ষয়ন্। প্রদক্ষিণমুপাবৃত্য বীভৎসুং সমবারয়ৎ॥ তমুদ্বীক্ষ্য সমায়ান্তং কৌন্তেয়ঃ পরবীরহা। প্রত্যগৃহ্লাৎ প্রহৃষ্টাত্মা ধারাধরমিবাচলঃ॥ ততো ভীষ্মঃ শরানষ্টৌ ধ্বজে পার্থস্য বীর্য্যবান্। সমর্পয়ন্মহাবেগান্ শ্বসমানা-নিবোরগান্॥ তে ধ্বজং পাণ্ডুপুত্রস্য সমাসাদ্য পতত্রিণঃ। জ্বলন্তং কপি-মাজঘ্নুর্ধ্বজাগ্রনিলয়াংশ্চ তান্ (নিলয়ান্ জনান্)॥ ততো ভল্লেন মহতা পৃথুধারেণ পাণ্ডবঃ। ছত্রং চিচ্ছেদ ভীষ্মস্য তূর্ণং তদপতদ্ভুবি॥ ধ্বজং চৈবাস্য কৌন্তেয়ঃ শরৈরভ্যহনদ্দৃশম্। শীঘ্রকৃদ্রথবাহাংশ্চ তথোভৌ পার্ষ্ণি-সারথী॥ অমৃষ্যমাণস্তদ্ভীষ্মো জানন্নপি স পাণ্ডবম্। দিব্যেনাস্ত্রেণ মহতা ধনঞ্জয়মবাকিরৎ॥ তথৈব পাণ্ডবো ভীষ্মং দিব্যমস্ত্রমুদীরয়ন্। প্রত্যগৃহ্লাদমে-য়াত্মা মহামেঘমিবাচলঃ॥ তয়োস্তদভবদ্ যুদ্ধং তুমুলং লোমহর্ষণম্। ভীষ্মেণ সহ পার্থেন বলিবাসবয়োরিব॥ প্রেক্ষন্তঃ কুরবঃ সর্ব্বে যোধাশ্চ সহসৈনিকাঃ। ভল্লৈর্ভল্লাঃ সমাগম্য ভীষ্মপাণ্ডবয়োর্যুধি। অন্তরীক্ষে ব্যরাজন্ত খদ্যোতাঃ

প্রাবৃষীব হি ॥ অগ্নিচক্রমিবাবিদ্ধং সব্যদক্ষিণমস্ততঃ। গাণ্ডীবমভবদ্রাজন্ পার্থস্ত সৃজতঃ শরান্॥ ততঃ সংছাদয়ামাস ভীষ্মং শরশতৈঃ শিতৈঃ। পর্ব্বতং বারিধারাভিশ্ছাদয়ন্নিব তোয়দঃ॥ তাং স বেলামিবোদ্ধূতাং শরবৃষ্টিং সমুত্থিতাম্। ব্যধমৎ সায়কৈর্ভীষ্মঃ পাণ্ডবং সমবারয়ৎ॥ ততস্তানি নিকৃত্তানি শরজালানি ভাগশঃ। সমরে চ ব্যশীর্য্যন্ত ফাল্গুনস্ত রথং প্রতি॥ ততঃ কনকপুঙ্খানাং শরবৃষ্টিং সমুত্থিতাম্। পাণ্ডবস্ত রথাত্তূর্ণং শলভানামিবায়তিম্॥ ব্যধমত্তাং পুনস্তস্ত ভীষ্মঃ শরশতৈঃ শিতৈঃ॥ ততস্তে কুরবঃ সর্ব্বে সাধু সাধ্বিতি চাব্রুবন্। দুষ্করং কৃতবান্ ভীষ্মো যদর্জ্জুনমযোধয়ৎ॥ বলবাংস্তরুণো দক্ষঃ ক্ষিপ্রকারী ধনঞ্জয়ঃ। কোঽন্যঃ সমর্থঃ পার্থস্ত বেগং ধারয়িতুং রণে॥ ঋতে শান্তনবাদ্ ভীষ্মাৎ কৃষ্ণাদ্বা দেবকীসুতাৎ। আচার্য্যপ্রবরাদ্বাপি ভারদ্বাজান্মহাবলাৎ॥ অস্ত্রৈরস্ত্রাণি সংবার্য্য ক্রীড়ন্তৌ ভরতর্ষভৌ। চক্ষুংষি সর্ব্বভূতানাং মোহয়ন্তৌ মহাবলৌ॥ প্রাজাপত্যং তথৈবৈন্দ্রমাগ্নেয়ঞ্চ সুদারুণম্। কৌবেরং বারুণঞ্চৈব যাম্যং বায়ব্যমেব চ॥ প্রযুঞ্জানৌ মহাত্মানৌ সমরে তৌ বিচেরতুঃ॥ বিস্মিতান্তথ ভূতানি তৌ দৃষ্ট্বা সংযুগে তদা। সাধু পার্থ মহাবাহো সাধু ভীষ্মেতি চাব্রুবন্॥ নায়ং যুক্তো মনুষ্যেষু যোঽয়ং সংদৃশ্যতে মহান্॥ মহাস্ত্রাণাং সম্প্রয়োগঃ সমরে ভীষ্মপার্থয়োঃ॥

বৈশম্পায়ন উবাচ। এবং সর্ব্বাস্ত্রবিদুষোরস্ত্রযুদ্ধমবর্ত্তত। অস্ত্রযুদ্ধে তু নির্ব্বৃত্তে শরযুদ্ধমবর্ত্তত॥ অথ জিষ্ণুরুপাবৃত্য ক্ষুরধারেণ কার্ম্মুকম্। চকর্ত্ত ভীষ্মস্ত তদা জাতরূপপরিষ্কৃতম্॥ নিমেষান্তরমাত্রেণ ভীষ্মোঽন্যৎ কার্ম্মুকং রণে। সমাদায় মহাবাহুঃ সজ্যং চক্রে মহারথঃ॥ শরাংশ্চ সুবহূন্ ক্রুদ্ধো মুমোচাশু ধনঞ্জয়ে। অর্জ্জুনোঽপি শরাংস্তীক্ষ্ণান্ ভীষ্মায় নিশিতান্ বহূন্। চিক্ষেপ সুমহাতেজাস্তথা ভীষ্মশ্চ পাণ্ডবে॥ তয়োর্দ্দিব্যাস্ত্রবিদুষোরস্যতোর্নিশিতাঞ্ছরান্। ন বিশেষস্তদা রাজন্ লক্ষ্যতে স্ম মহাত্মনোঃ॥ অথাবৃণোদ্দশদিশঃ শরৈরতিরথস্তদা। কিরীটমালী কৌন্তেয়ঃ শূরঃ শান্তনবস্তথা॥ অতীব পাণ্ডবো ভীষ্মং ভীষ্মশ্চাতীব পাণ্ডবম্। বভূব তস্মিন্ সংগ্রামে রাজন্ লোকে তদদ্ভুতম্॥ পাণ্ডবেন হতাঃ শূরা ভীষ্মস্য রথরক্ষিণঃ। শেরতে স্ম তদা রাজন্ কৌন্তেয়স্যাভিতো রথম্॥ ততো গাণ্ডীবনির্ম্মুক্তা নিরমিত্রং চিকীর্ষবঃ। অগচ্ছন্ পুঙ্খসংশ্লিষ্টাঃ শ্বেতবাহনপত্রিণঃ॥ নিষ্পতন্তো রথাত্তস্য ধৌতা হৈরণ্যবাসসঃ। আকাশে সমদৃশ্যন্ত হংসানামিব পঙ্‌ক্তয়ঃ॥ তস্ত তদ্দিব্যমস্ত্রং হি বিগাঢ়ং চিত্রমস্যতঃ। প্রেক্ষন্তে স্মান্তরীক্ষস্থাঃ সর্ব্বে দেবাঃ সবাসবাঃ॥

তদ্ দৃষ্ট্বা পরমপ্রীতো গন্ধর্ব্বশ্চিত্রমদ্ভুতম্। শশংস দেবরাজায় চিত্রসেনঃ প্রতাপবান্॥ পশ্যেমান্ পার্থনির্ম্মুক্তান্ সংসক্তানিব গচ্ছতঃ। চিত্ররূপমিদঞ্জিষ্ণোর্দিব্যমস্ত্রমুদীর্য্যতঃ॥ নেদং মনুষ্যাঃ শ্রদ্দধ্যুর্ন হীদং তেষু বিদ্যতে। পৌরাণানাং মহাস্ত্রাণাং বিচিত্রোঽয়ং সমাগমঃ॥ আদদানস্য হি শরান্ সন্ধায় চ বিমুঞ্চতঃ॥ বিকর্ষতশ্চ গাণ্ডীবং নান্তরং সম্প্রদৃশ্যত (সমদৃশ্যত)॥ মধ্যন্দিনগতং সূর্য্যং প্রতপন্তমিবাম্বরে॥ ন শক্নুবন্তি (নাশক্নুবন্ত) সৈন্যানি পাণ্ডবং প্রসমীক্ষিতুম্॥ তথৈব ভীষ্মং গাঙ্গেয়ং দ্রষ্টুং নোৎসহতে জনঃ॥ উভৌ বিশ্রুতকর্ম্মাণাবুভৌ তীব্রপরাক্রমৌ। উভৌ সদৃশকর্ম্মাণাবুভৌ যুধি সুদুর্জ্জয়ৌ॥ ইত্যুক্তো দেবরাজস্তু পার্থভীষ্মসমাগমম্। পূজয়ামাস দিব্যেন পুষ্পবর্ষেণ ভারত॥ ততঃ শান্তনবো ভীষ্মো বামং পার্শ্বমতাড়য়ৎ। পশ্যতঃ প্রতিসন্ধায় বিধ্যতঃ সব্যসাচিনঃ॥ ততঃ প্রহস্য বীভৎসুঃ পৃথুধারেণ কার্ম্মুকম্। চিচ্ছেদ গার্দ্ধ্রপত্রেণ ভীষ্মস্যামিততেজসঃ॥ অথৈনং দশভির্ব্বাণৈঃ প্রত্যবিধ্যৎ স্তনান্তরে। যতমানং পরাক্রান্তং কুন্তীপুত্রো ধনঞ্জয়ঃ॥ স পীড়িতো মহাবাহুর্গৃহীত্বা রথকূবরম্। গাঙ্গেয়ো যুদ্ধদুর্দ্ধর্ষস্তস্থৌ দীর্ঘমিবাতুরঃ॥ তং বিসংজ্ঞমপোবাহ সংযন্তা রথবাজিনাম্। উপদেশমনুস্মৃত্য রক্ষমাণো মহারথম্॥ ১-৪১

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণ্যুত্তরগোগ্রহে ভীষ্মাপযানো নাম চতুঃষষ্টিতমোঽধ্যায়ঃ।

---

## পঞ্চষষ্টিতমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। ভীষ্মে তু সংগ্রামশিরো বিহায়, পলায়মানে ধৃতরাষ্ট্রপুত্রঃ। উৎসৃজ্য কেতুং বিনদন্মহাত্মা, ধনুর্ব্বিগৃহ্যার্জ্জুনমাসসাদ॥ স ভীমধন্বানমুদগ্রবীর্য্যং, ধনঞ্জয়ং শত্রুগণে চরন্তম্। আকর্ণপূর্ণায়তচোদিতেন, ভল্লেন বিব্যাধ ললাটমধ্যে॥ স তেন বাণেন সমর্পিতেন, জাম্বূনদাগ্রেণ সুসংহিতেন। ররাজ রাজন্ মহনীয়কর্ম্মা, যথৈকপর্ব্বা রুচিরৈকশৃঙ্গঃ॥ অথাস্য বাণেন বিদারিতস্য, প্রাদুর্ব্বভূবাসৃগজস্রমুষ্ণম্। স তস্য জাম্বূনদপুঙ্খচিত্রো, ভিত্ত্বা ললাটং সুবিরাজতে স্ম॥ স তেন বাণাভিহতস্তরস্বী, দুর্য্যোধনেনোদ্ধতমন্যুবেগঃ। শরানুপাদায় বিষাগ্নিকল্পান্, বিব্যাধ রাজানমদীনসত্ত্বঃ॥ দুর্য্যোধনশ্চাপি তমুগ্রতেজাঃ, পার্থশ্চ দুর্য্যোধনমেকবীরঃ। অন্যোঽন্যমাজৌ পুরুষপ্রবীরৌ, সমৌ সমাজঘ্নতুরাজমীঢৌ॥ ততঃ প্রভিন্নেন মহাগজেন, মহীধরাভেণ

পুনর্ব্বিকর্ণঃ। রথৈশ্চতুর্ভির্গজপাদরক্ষৈঃ, কুন্তীসুতং জিষ্ণুমথাভ্যধাবৎ॥ তমাপতন্তং ত্বরিতং গজেন্দ্রং, ধনঞ্জয়ঃ কুম্ভবিভাগমধ্যে। আকর্ণপূর্ণেন মহায়সেন, বাণেন বিব্যাধ মহাজবেন॥ পার্থেন সৃষ্টঃ স তু গার্দ্ধ্রপত্র, আপুঙ্খদেশাৎ প্রবিবেশ নাগম্। বিদার্য্য শৈলপ্রবরপ্রকাশং, যথাশনিঃ পর্ব্বতমিন্দ্রসৃষ্টঃ॥ শরপ্রতপ্তঃ স তু নাগরাজঃ, প্রবেপিতাঙ্গো ব্যথিতান্তরাত্মা। সংসীদমানো নিপপাত মহ্যাং, বজ্রাহতং শৃঙ্গমিবাচলস্য॥ নিপাতিতে দন্তিবরে পৃথিব্যাং, ত্রাসাদ্বিকর্ণঃ সহসাবতীর্য্য। তূর্ণং পদান্যষ্টশতানি গত্বা, বিবিংশতেঃ স্যন্দনমারুরোহ॥ নিহত্য নাগন্তু শরেণ তেন, বজ্রোপমেনাদ্রিমিবাম্বুদাভম্। তথাবিধেনৈব শরেণ পার্থো, দুর্য্যোধনং বক্ষসি নির্ব্বিভেদ॥ হতে গজে রাজনি চৈব ভিন্নে, ভগ্নে বিকর্ণে চ সপাদরক্ষে। গাণ্ডীবমুক্তৈর্ব্বিশিখৈঃ প্রণুন্নাস্তে যোধমুখ্যাঃ সহসাপজগ্মুঃ॥ দৃষ্ট্বৈব পার্থেন হতঞ্চ নাগং, যোধাংশ্চ সর্ব্বান্ দ্রবতো নিশম্য। রথং সমাবৃত্য কুরুপ্রবীরো, রণাৎ প্রদুদ্রাব যতো ন পার্থঃ॥ তং ভীমরূপং ত্বরিতং দ্রবন্তং, দুর্য্যোধনং শত্রুসহোঽভিষঙ্গাৎ। প্রাস্ফোটয়দ্ (প্রাক্ষ্বেড়য়ৎ) যোদ্ধুমনাঃ কিরীটী, বাণেন বিদ্ধং রুধিরং বমন্তম্॥

অর্জ্জুন উবাচ। বিহায় কীর্ত্তিং বিপুলং যশশ্চ, যুদ্ধাৎ পরাবৃত্য পলায়সে কিম্। ন তেঽদ্য তূর্য্যাণি সমাহতানি, তথৈব রাজ্যাদবরোপিতস্য॥ যুধিষ্ঠিরস্যাস্মি নিদেশকারী, পার্থস্তৃতীয়ো যুধি সংস্থিতোঽস্মি। তদর্থমাবৃত্য মুখং প্রযচ্ছ, নরেন্দ্র বৃত্তং স্মর ধার্ত্তরাষ্ট্র॥ মোঘং তবেদং ভুবি নামধেয়ং, দুর্য্যোধনেতীহ কৃতং পুরস্তাৎ। নহীহ দুর্য্যোধনতা তবাস্তি, পলায়মানস্য রণং বিহায়॥ ন তে পুরস্তাদথ পৃষ্ঠতো বা, পশ্যামি দুর্য্যোধন রক্ষিতারম্। অপেহি যুদ্ধাৎ পুরুষপ্রবীর, প্রাণান্ প্রিয়ান্ পাণ্ডবতোঽদ্য রক্ষ॥ ১-১৮

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণ্যুত্তরগোগ্রহে দুর্য্যোধনপলায়নো নাম পঞ্চষষ্টিতমোঽধ্যায়ঃ।

---

## ষট্‌ষষ্টিতমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। আহূয়মানশ্চ স তেন সংখ্যে, মহাত্মনা বৈ ধৃতরাষ্ট্রপুত্রঃ। নিবর্ত্তিতস্তস্য গিরাঙ্কুশেন, মহাগজো মত্ত ইবাঙ্কুশেন॥ সোঽমৃষ্যমাণো বচসাভিমৃষ্টো, মহারথেনাতিরথস্তরস্বী। পর্য্যাববর্ত্তাথ রথেন বীরো, ভোগী যথা পাদতলাভিমৃষ্টঃ॥ তং প্রেক্ষ্য কর্ণঃ পরিবৃত্তমানং, নিবর্ত্ত্য সংস্তভ্য চ

বিদ্ধগাত্রম্। দুর্য্যোধনস্তোত্তরতোঽভ্যগচ্ছৎ, পার্থং নূবীরো যুধি হেমমালী॥ ভীষ্মস্ততঃ শান্তনবো বিবৃত্য, হিরণ্যকক্ষস্বরয়াঽভিসৰ্পী। দুর্য্যোধনং পশ্চিমতোঽভ্যরক্ষৎ, পার্থান্মহাবাহুরধিজ্যধন্বা॥ দ্রোণঃ কৃপশ্চৈব বিবিংশতিশ্চ, দুঃশাসনশ্চৈব বিবৃত্য শীঘ্রম্। সর্ব্বে পুরস্তাদ্বিততোরুচাপা, দুর্য্যোধনার্থং ত্বরিতাভ্যুপেয়ুঃ॥ স তান্যনীকানি নিবর্ত্তমানান্যালোক্য পূর্ণৌঘনিভানি পার্থঃ। হংসো যথা মেঘমিবাপতন্তং, ধনঞ্জয়ঃ প্রত্যপতত্তরস্বী॥ তে সর্ব্বতঃ সংপরিবার্য্য পার্থমস্ত্রাণি সর্ব্বাণি (দিব্যানি) সমাদদানাঃ। ববর্ষুরভ্যেত্য শরৈঃ সমন্তান্মেঘা যথা ভূধরমম্বুজালৈঃ॥ ততোঽস্ত্রমস্ত্রেণ বিদার্য্য তেষাং, গাণ্ডীবধন্বা কুরুপুঙ্গবানাম্। সম্মোহনং শক্রসহোঽন্যদস্ত্রং, প্রাদুশ্চকারৈন্দ্রমবারণীয়ম্॥ ততো দিশশ্চানুদিশো বিবৃত্য, শরৈঃ সুধারৈর্নিশিতৈঃ সুপুঙ্খৈঃ। গাণ্ডীবঘোষেণ মনাংসি তেষাং, মহাবলঃ প্রব্যথয়াঞ্চকার॥ ততঃ পুনর্ভীমরবং প্রগৃহ্য, দোর্ভ্যাং মহাশঙ্খমুদারঘোষম্। ব্যনাদয়ৎ স প্রদিশো দিশঃ খং, ভুবঞ্চ পার্থো দ্বিষতাং নিহন্তা॥ তে শঙ্খনাদেন কুরুপ্রবীরাঃ, সম্মোহিতাঃ পার্থসমীরিতেন। উৎসৃজ্য চাপানি দুরাসদানি, সর্ব্বে তদা শান্তিপরা বভূবুঃ॥ তথা বিসংজ্ঞেষু পরেষু পার্থঃ, স্মৃত্বা চ বাক্যানি তথোত্তরায়াঃ। নির্যাহি মধ্যাদিতি মৎস্যপুত্রমুবাচ যাবৎ কুরবো বিসংজ্ঞাঃ॥ আচার্য্যশারদ্বতয়োস্তু শুক্লে, কর্ণস্য পীতং রুচিরঞ্চ বস্ত্রম্। দ্রোণস্য রাজ্ঞশ্চ তথৈব নীলে, বস্ত্রে সমাদৎস্ব নরপ্রবীর॥ ভীষ্মস্য সংজ্ঞাস্তু তথৈব মন্যে, জানাতি সোঽস্ত্রপ্রতিঘাতমেষঃ। এতস্য বাহান্ কুরু সব্যতস্ত্বমেবং হি যাতব্যমগূঢ়সংজ্ঞৈঃ॥ রশ্মীন্ সমুৎসৃজ্য ততো মহাত্মা, রথাদবপ্লুত্য বিরাটপুত্রঃ। আকৃষ্য বাসাংসি (বস্ত্রাণ্যুপাদায়) মহারথানাং, তূর্ণং পুনস্তদ্রথমারুরোহ॥ ততোঽন্বশাসচ্চতুরঃ সদশ্বান্, পুত্রো বিরাটস্য হিরণ্যকক্ষান্। তে তদ্ব্যতীয়ুর্ধ্বজিনামনীকং, শ্বেতা বহন্তোঽর্জ্জুনমাজিমধ্যাৎ॥ তথানুযান্তং পুরুষপ্রবীরং, ভীষ্মঃ শরৈরভ্যহনত্তরস্বী। স চাপি ভীষ্মস্য হয়ান্নিহত্য, বিব্যাধ পার্থো দশভিঃ পৃষৎকৈঃ॥ ততোঽর্জ্জুনো ভীষ্মমপাস্য যুদ্ধে, বিদ্ধাস্য যন্তারমধিজ্যধন্বা। তস্থৌ বিমুক্তো রথবৃন্দমধ্যান্মেঘং বিদার্য্যেব সহস্ররশ্মিঃ॥ লব্ধ্বা তু সংজ্ঞাং স কুরুপ্রবীরঃ, পার্থং সমীক্ষ্যাথ সুরেন্দ্রকল্পম্। রণাদ্বিমুক্তং স্থিতমেকমাজৌ, তং ধার্ত্তরাষ্ট্রস্ত্বরিতং বভাষে॥ অয়ং কথং স্বিত্তবতা বিমুক্তস্তথা প্রমথ্নীহি (ত) যথা ন মুচ্যেৎ। তমব্রবীচ্ছান্তনবঃ প্রহস্য, ক তে গতা বুদ্ধিরভূৎ ক বীর্য্যম্॥ শান্তিং পরাং প্রাপ্য যদাস্থিতোঽভূরুৎসৃজ্য বাণাংশ্চ ধনুর্বিচিত্রম্। ন হ্যেষ বীভৎসুরলং নৃশংসং, কর্ত্তুং ন পাপেঽস্য মনো

বিশিষ্টম্॥ ত্রৈলোক্যহেতোর্ন জহেৎ স্বধর্ম্মং, তস্মান্ন সর্ব্বে নিহতা রণেঽস্মিন্। ক্ষিপ্রং কুরূন্ যাহি কুরুপ্রবীর, বিজিত্য গাঃ সংপ্রতিযাতু পার্থঃ। মা তেঽস্য কার্য্যং নিপতেচ্চ মোহাত্তৎ সংবিধাতব্যমরিষ্টবন্ধম্॥

বৈশম্পায়ন উবাচ। দুর্য্যোধনস্তস্য তু তন্নিশম্য, পিতামহস্যাত্মহিতং বচোঽথ। অতীতকামো যুধি সোঽভ্যমর্ষী, রাজা বিনিশ্বস্য বভূব তূষ্ণীম্॥ তদ্ভীষ্মবাক্যং হিতমীক্ষ্য সর্ব্বে, ধনঞ্জয়াগ্নিঞ্চ বিবর্দ্ধমানম্। নিবর্ত্তনায়ৈব মতিং নিদধ্যুর্দুর্য্যোধনং তে পরিরক্ষমাণাঃ॥ তান্ প্রস্থিতান্ প্রীতমনাঃ স পার্থো, ধনঞ্জয়ঃ প্রেক্ষ্য কুরুপ্রবীরান্। আভাষমাণোঽনুযযৌ মুহূর্ত্তং, বচোঽব্রবীৎ সংপরিহৃত্য ভূয়ঃ (সম্পূজয়ংস্তত্র কুরূন্মহাত্মা)॥ পিতামহং শান্তনবঞ্চ বৃদ্ধং, দ্রোণং গুরুঞ্চ প্রতিপূজ্য মূর্দ্ধ্না। দ্রৌণিং কৃপঞ্চৈব কুরূংশ্চ মান্যান্, শরৈর্ব্বিচিত্রৈরভিবাদ্য চৈব॥ দুর্য্যোধনস্যোত্তমরত্নচিত্রং, চিচ্ছেদ পার্থো মুকুটং শরেণ। আমন্ত্র্য বীরাংশ্চ তথৈব মান্যান্, গাণ্ডীবঘোষেণ বিনোদ্য লোকান্॥ স দেবদত্তং সহসা বিনাদ্য, বিদার্য্য বীরো দ্বিষতাং মনাংসি। ধ্বজেন সর্ব্বান্ পবিভূয় শত্রূন্, স হেমমালেন বিরাজমানঃ॥ দৃষ্ট্বা প্রয়াতাংশ্চ কুরূন্ কিরীটী, হৃষ্টোঽব্রবীত্তত্র স মৎস্যপুত্রম্। আবর্ত্তয়াশ্বান্ পশবো জিতাস্তে, যাতাঃ পরে যাহি পুরং প্রহৃষ্টঃ॥ দেবাস্তু দৃষ্ট্বা মহদদ্ভুতন্তদ্, যুদ্ধং কুরূণাং সহ ফাল্গুনেন। জগ্মুর্যথা স্বং ভবনং প্রতীতাঃ, পার্থস্য কর্ম্মাণি বিচিন্তয়ন্তঃ॥ ১-৩০

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণ্যুত্তরগোগ্রহে সমস্তকৌরবপলায়নো নাম ষট্‌ষষ্টিতমোঽধ্যায়ঃ।

---

## সপ্তষষ্টিতমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। নির্জ্জিত্য চৈব সংগ্রামে কুরূন্ গোবৃষভেক্ষণঃ। সমানয়ামাস তদা বিরাটস্য ধনং মহৎ॥ গতেষু চ প্রভগ্নেষু ধার্ত্তরাষ্ট্রেষু সর্ব্বশঃ। বনান্নিষ্ক্রম্য গহনাদ্বহবঃ কুরুসৈনিকাঃ॥ ভয়াৎ সন্ত্রস্তমনসঃ সমাজগ্মুস্ততস্ততঃ। মুক্তকেশাস্ত্বদৃশ্যন্ত স্থিতাঃ প্রাঞ্জলয়স্তথা॥ ক্ষুৎপিপাসাপরিশ্রান্তা বিদেশস্থা বিচেতসঃ। ঊচুঃ প্রণম্য সংভ্রান্তাঃ পার্থ কিং করবামহে॥

অর্জ্জুন উবাচ। স্বস্তি ব্রজত ভদ্রং বো ন ভেতব্যং কথঞ্চন। নাহমার্ত্তান্ জিঘাংসামি ভৃশমাশ্বাসয়ামি বঃ॥

বৈশম্পায়ন উবাচ। তস্য তামভয়াং বাচং শ্রুত্বা যোধাঃ সমাগতাঃ।

আয়ুঃকীর্ত্তিযশোদাভিস্তমাশীভিরনন্দয়ন্ ॥ ততোঽর্জ্জুনং নাগমিব প্রভিন্নমুৎস্বজ্য শত্রূন্ বিনিবর্ত্তমানম্। বিরাটরাষ্ট্রাভিমুখং প্রয়াস্তং, নাশক্নু বংস্তে কুরবোঽভিযাতুম্॥ ততো মহাবাত ইবাব্‌ভ্রবৃন্দং, বিদ্রাব্য পার্থঃ কুরুসৈন্যবৃন্দম্। মৎস্যস্য পুত্রং দ্বিষতাং নিহন্তা, বচোঽব্রবীৎ সংপরিগৃহ্য ভূয়ঃ ॥ পিতুঃ সকাশে তব তাত সর্ব্বে, বসন্তি পার্থা বিদিতাস্তবৈব। তান্মা প্রশংসের্নগরং প্রবিশ্য, ভীতঃ প্রণশ্যেদ্ধি স মৎস্যরাজঃ ॥ ময়া জিতা সা ধ্বজিনী কুরূণাং, ময়া চ গাবো বিজিতা দ্বিষদ্ভ্যঃ। প্রীতস্ত কামং নগরং প্রবিশ্য, ত্বমাত্মনঃ কর্ম্ম কৃতং ব্রবীহি ॥

উত্তর উবাচ। যত্তে কৃতং কর্ম্ম ন পারণীয়ং, তৎ কর্ম্ম কর্ত্তুং মম নাস্তি শক্তিঃ। ন ত্বাং প্রবক্ষ্যামি পিতুঃ সকাশে, যাবন্ন মাং বক্ষ্যসি সব্যসাচিন্ ॥

বৈশম্পায়ন উবাচ। স শত্রুসেনামবজিত্য জিষ্ণুরাচ্ছিদ্য সর্ব্বঞ্চ ধনং কুরুভ্যঃ। শ্মশানমাগত্য পুনঃ শমীস্তামভ্যেত্য তস্থৌ শরবিক্ষতাঙ্গঃ ॥ ততঃ স বহ্নিপ্রতিমো মহাকপিঃ, সহৈব ভূতৈর্দিবমুৎপপাত। তথৈব মায়ান্তরিতা বভূব, ধ্বজঞ্চ সৈংহং যুযুজে রথে পুনঃ ॥ নিধায় তচ্চায়ুধমাজিবর্দ্ধনং, কুরূত্তমানামিষুধীঃ শরাংস্তথা। প্রায়াৎ স মৎস্যো নগরং প্রহৃষ্টঃ, কিরীটিনা সারথিনা মহাত্মনা ॥ পার্থশ্চ কৃত্বা পরমার্য্যকর্ম্ম, নিহত্য শত্রূন্ দ্বিষতাং নিহন্তা। চকার বেণীঞ্চ তথৈব ভূয়ো, জগ্রাহ রশ্মীন্ পুনরুত্তরস্য। বিবেশ হৃষ্টো নগরং মহাত্মা, বৃহন্নলারূপমুপেত্য সারথিঃ ॥

বৈশম্পায়ন উবাচ। ততো নিবৃত্তাঃ কুরবঃ প্রভগ্না বশমাস্থিতাঃ। হস্তিনাপুরমুদ্দিশ্য সর্ব্বে দীনা যযুস্তদা ॥ পন্থানমুপসংগম্য ফাল্গুনো বাক্যমব্রবীৎ। রাজপুত্র প্রত্যবেক্ষ্ব সমানীতানি সর্ব্বশঃ। গোকুলানি মহাবাহো বীর গোপালকৈঃ সহ ॥ ততোঽপরাহ্নে যাস্যামো বিরাটনগরং প্রতি। গাশ্চাপি পায়য়িত্বাপঃ পরিপ্লাব্য চ বাজিনঃ ॥ গচ্ছন্তু ত্বরিতাশ্চৈব গোপালাঃ প্রেষিতাস্ত্বয়া। নগরে প্রিয়মাখ্যাতুং ঘোষয়ন্তু চ তে জয়ম্ ॥

বৈশম্পায়ন উবাচ। অথোত্তরস্তরমাণঃ স দূতানাজ্ঞাপয়দ্বচনাদর্জ্জুনস্য। আচক্ষধ্বং বিজয়ং পার্থিবস্য, ভগ্নাঃ পরে বিজিতাশ্চাপি গাবঃ ॥ ইত্যেবং তৌ ভারতমৎস্যবীরৌ, সংমন্ত্র্য সঙ্গম্য পুনঃ শমীং তাম্। অভ্যেত্য ভূয়ো বিজয়েন তৃপ্তাবুৎসৃষ্টমারোপয়তাঞ্চ ভাণ্ডম্॥ স শত্রুসেনামভিভূয় সর্ব্বামাচ্ছিদ্য সর্ব্বঞ্চ ধনং কুরুভ্যঃ। বৈরাটিরায়ান্নগরং প্রতীতো, বৃহন্নলাসারথিরেকবীরঃ ॥ ১-২৩

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি বৃহন্নলানগরপ্রবেশো নাম সপ্তষষ্টিতমোঽধ্যায়ঃ।

## অষ্টষষ্টিতমোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। (প্রহৃষ্টাস্তেঽথ গোপালাঃ প্রবিশ্য নগরং ততঃ। উচুর্জয়ং বিরাটস্য দৃষ্টা গোধনমাহৃতম্॥ ) ধনঞ্জয়াপি বিজিত্যাজৌ বিরাটো বাহিনীপতিঃ। প্রাবিশন্নগরং হৃষ্টশ্চতুর্ভিঃ সহ পাণ্ডবৈঃ॥ জিত্বা ত্রিগর্ত্তান্ সংগ্রামে গাশ্চৈবাদায় সর্ব্বশঃ। অশোভত মহারাজ সহ পার্থৈঃ শ্রিয়াবৃতঃ॥ তমাসনগতং বীরং সুহৃদাং প্রীতিবর্দ্ধনম্। উপাসাঞ্চক্রিরে সর্ব্বে সহ পার্থৈঃ পরন্তপাঃ॥ উপতস্থুঃ প্রকৃতয়ঃ সমগ্রা ব্রাহ্মণৈঃ সহ। সভাজিতঃ সসৈন্যস্তু প্রতিনন্দ্যাথ মৎস্যরাট্॥ বিসর্জ্জয়ামাস তদা দ্বিজাংশ্চ প্রকৃতীস্তথা॥ ততঃ স রাজা মৎস্যানাং বিরাটো বাহিনীপতিঃ। উত্তরং পরিপপ্রচ্ছ ক্ব যাত ইতি চাব্রবীৎ। আচখ্যুস্তস্য সংহৃষ্টাঃ স্ত্রিয়ঃ কন্যাশ্চ বেশ্মনি॥ অন্তঃপুরচরাশ্চৈব কুরুভির্গোধনং হৃতম্। বিজেতুমভিসংরব্ধ এক এবাতিসাহসাৎ॥ বৃহন্নলা-সহায়শ্চ নির্যাতঃ পৃথিবীঞ্জয়॥ উপায়াতানতিরথান্ দ্রোণং শান্তনবং কৃপম্।. কর্ণং দুর্য্যোধনঞ্চৈব দ্রোণপুত্রঞ্চ ষড়্ রথান্॥

বৈশম্পায়ন উবাচ। রাজা বিরাটোঽথ ভৃশাভিতপ্তঃ, শ্রুত্বা সুতং হ্যেক-রথেন যাতম্। বৃহন্নলাসারথিমাজিবর্দ্ধনং, প্রোবাচ সর্ব্বানথ মন্ত্রিমুখ্যান্॥ সর্ব্বথা কুরবস্তে হি যে চান্যে বসুধাধিপাঃ। ত্রিগর্ত্তান্নির্জ্জিতান্ শ্রুত্বা ন স্থাস্যন্তি কদাচন॥ তস্মাদ্গচ্ছন্তু মে যোধা বলেন মহতা বৃতাঃ। উত্তরস্য পরীপ্সার্থং যে ত্রিগর্ত্তৈরবিক্ষতাঃ॥ হয়াংশ্চ নাগাংশ্চ রথাংশ্চ শীঘ্রং, পদাতিসঙ্ঘান্ পুরুষ-প্রবীরান্। প্রস্থাপয়ামাস সুতস্য হেতোর্বিচিত্রশস্ত্রাভরণোপপন্নান্॥

বৈশম্পায়ন উবাচ। এবং স রাজা মৎস্যানাং বিরাটো বাহিনীপতিঃ ব্যাদিদেশাথ তাং ক্ষিপ্রং বাহিনীং চতুরঙ্গিণীম্॥ কুমারমাশু জানীত যদি জীবতি বা ন বা। যস্য যন্তা গতঃ ষণ্ঢো মন্যেঽহং ন স জীবতি॥

বৈশম্পায়ন উবাচ। তমব্রবীদ্ধর্ম্মরাজো বিহস্য, বিরাটরাজন্তু ভৃশাভিতপ্তম্। বৃহন্নলা সারথিশ্চেন্নরেন্দ্র, পরে ন নেষ্যন্তি তবাদ্য গাস্তাঃ॥ সর্ব্বান্ মহীপান্ সহিতান্ কুরূংশ্চ, তথৈব দেবাসুরযক্ষনাগান্। অলং বিজেতুং সমরে সুতস্তে, স্বনুষ্ঠিতঃ সারথিনা হি তেন॥

বৈশম্পায়ন উবাচ। অথোত্তরেণ দূতাস্তে প্রেষিতাঃ শীঘ্রগামিনঃ। বিরাট-নগরং প্রাপ্য জয়মাবেদয়ংস্ততঃ (বিজয়ং সমবেদয়ন্)॥ রাজ্ঞস্তৎসর্ব্বমাচখ্যৌ মন্ত্রী বিজয়মুত্তমম্। পরাজয়ং কুরূণাঞ্চাপ্যুপায়াত্তং (স্তং) তথোত্তরম্॥ সর্ব্বা বিনির্জ্জিতা গাবঃ কুরবশ্চ বিনির্জ্জিতাঃ। উত্তরঃ সহ সূতেন কুশলী চ পরন্তপঃ॥

কঙ্ক উবাচ। দিষ্ট্যা বিনির্জ্জিতা গাবঃ কুরবশ্চ পলায়িতাঃ। দিষ্ট্যা তে জীবিতঃ পুত্রঃ শ্রূয়তে পার্থিবর্ষভ॥ নাদ্ভুতং ত্বেব মন্যেঽহং যত্তে পুত্রোঽজয়ৎ কুরূন্। ধ্রুব এব জয়স্তস্য যস্য যন্তা বৃহন্নলা॥

বৈশম্পায়ন উবাচ। ততো বিরাটো নৃপতিঃ সংপ্রহৃষ্টতনূরুহঃ॥ শ্রুত্বা তু বিজয়ন্তস্য কুমারস্যামিতৌজসঃ॥ আচ্ছাদয়িত্বা দূতাংস্তান্মন্ত্রিণঃ সোঽভ্যচোদয়ৎ। রাজমার্গাঃ ক্রিয়ন্তাং মে পতাকাভিরলঙ্কৃতাঃ। পুষ্পোপহারৈরর্চ্চ্যন্তাং দেবতাশ্চাপি সর্ব্বশঃ॥ কুমারা যোধমুখ্যাশ্চ গণিকাশ্চ স্বলঙ্কৃতাঃ। বাদিত্রাণি চ সর্ব্বাণি প্রত্যুদ্যান্তু সুতং মম॥ ঘণ্টাবান্মানবঃ শীঘ্রং মত্তমারুহ্য বারণম্। শৃঙ্গাটকেষু সর্ব্বেষু আখ্যায়ন্তু জয়ং মম॥ উত্তরা চ কুমারীভির্বহ্বীভিরভিসংবৃতা। শৃঙ্গারবেশাভরণা প্রত্যুদ্যাতু সুতং মম॥

বৈশম্পায়ন উবাচ। শ্রুত্বা তদেতদ্বচনং নৃপস্য, সর্ব্বং পুরং স্বস্তিকপাণিভূতম্। ভের্য্যশ্চ তূর্য্যাণি চ বারিজাশ্চ, বেশৈঃ পরার্দ্ধৈঃ প্রমদাঃ শুভাশ্চ॥ তথৈব সূতৈঃ সহ মাগধৈশ্চ, নান্দীবাদ্যাঃ পণবাস্তূর্য্যবাদ্যাঃ (কন্যাবিঘোষৈরথতূর্য্যবাদ্যৈঃ)। পুরাৎ বিরাটস্য মহাবলস্য, প্রত্যুদ্যযুঃ পুত্রমনন্তবীর্য্যম্॥

বৈশম্পায়ন উবাচ। প্রস্থাপ্য সেনাং কন্যাশ্চ গণিকাশ্চ স্বলঙ্কৃতাঃ। মৎস্যরাজো মহাপ্রাজ্ঞঃ প্রহৃষ্ট ইদমব্রবীৎ॥ অক্ষানাহর সৈরন্ধ্রি কঙ্ক দ্যূতং প্রবর্ত্ততাম্। তং তথাবাদিনং দৃষ্টা (হৃষ্টং) পাণ্ডবঃ প্রত্যভাষত॥ ন দেবিতব্যং হৃষ্টেন কিতবেনেতি নঃ শ্রুতম্॥ স ত্বমদ্য মুদা যুক্তো নাহং দেবিতুমুৎসহে। প্রিয়ন্তু তে চিকীর্ষামি বর্ত্ততাং (বর্ণ্যতাং) যদি মন্যসে॥

বিরাট উবাচ। স্ত্রিয়ো গাবো হিরণ্যঞ্চ যচ্চান্যদ্বসু কিঞ্চন। ন মে কিঞ্চিত্ত্বয়া রক্ষ্যমন্তরেণাপি দেবিতুম্॥

কঙ্ক উবাচ। কিন্তে দ্যূতেন রাজেন্দ্র বহুদোষেণ মানদ। দেবনে বহবো দোষাস্তস্মাত্তৎ পরিবর্জ্জয়েৎ॥ শ্রুতন্তে যদি বা দৃষ্টঃ পাণ্ডবেয়ো যুধিষ্ঠিরঃ। সরাষ্ট্রং সুমহৎ স্ফীতং ভ্রাতৄংশ্চ ত্রিদশোপমান্॥ দ্যূতে (রাজ্যং) হারিতবান্ সর্ব্বং তস্মাদ্ দ্যূতং ন রোচয়ে। অথবা মন্যসে রাজন্ দীব্যাবো যদি রোচতে॥

বৈশম্পায়ন উবাচ। প্রবর্ত্তমানে দ্যূতে তু মৎস্যঃ পাণ্ডবমব্রবীৎ। পশ্য পুত্রেণ মে যুদ্ধে তাদৃশাঃ কুরবো জিতাঃ॥ ততোঽব্রবীন্মৎস্যরাজং ধর্ম্মপুত্রো যুধিষ্ঠিরঃ॥ বৃহন্নলা যস্য যন্তা কথং স ন বিজেষ্যতি॥ ইত্যুক্তঃ কুপিতো রাজা মৎস্যঃ পাণ্ডবমব্রবীৎ। সমং পুত্রেণ মে ষণ্ডং ব্রহ্মবন্ধো প্রশংসসি॥ বাচ্যাবাচ্যং ন জানীষে নূনং মামবমন্যসে। ভীষ্মদ্রোণমুখান্ সর্ব্বান্ কস্মান্ন স বিজেষ্যতি॥

বয়স্যত্বাত্তু তে ব্রহ্মন্নপরাধমিমং ক্ষমে। নেদৃশস্তু পুনর্বাচ্যং যদি জীবিতু-মিচ্ছসি ॥

যুধিষ্ঠির উবাচ। যত্র দ্রোণস্তথা ভীষ্মো দ্রৌণির্বৈকর্ত্তনঃ কৃপঃ। দুর্য্যোধনশ্চ রাজেন্দ্রস্তথৈবান্যে মহারথাঃ ॥ মরুদ্গণৈঃ পরিবৃতঃ সাক্ষাদপি শতক্রতুঃ। কোঽন্যো বৃহন্নলায়াস্তান্ প্রতিযুধ্যেত সঙ্গতান্ ॥ যস্য বাহুবলে তুল্যো ন ভূতো ন ভবিষ্যতি। অতীব সমরং দৃষ্ট্বা হর্ষো যস্যোপজায়তে ॥ যোঽজয়ৎ সহিতান্ সর্ব্বান্ সুরাসুরমহোরগান্। তাদৃশেন সহায়েন কস্মান্ন স বিজেষ্যতি ॥

বিরাট উবাচ। বহুশঃ প্রতিষিদ্ধোঽসি ন চ বাচং নিযচ্ছসি। নিয়ন্তা চেন্ন বিদ্যেত ন কশ্চিদ্ধর্ম্মমাচরেৎ ॥

বৈশম্পায়ন উবাচ। ততঃ প্রকুপিতো রাজা তমক্ষেণাহনদ্ ভৃশম্। মুখে যুধিষ্ঠিরং কোপান্নৈবমিত্যেব ভর্ৎসয়ন্ ॥ বলবৎ প্রতিবিদ্ধস্য নস্তঃ শোণিত-মাবহৎ। তদপ্রাপ্তং মহীং পার্থঃ পাণিভ্যামগ্রহীত্তদা। অবৈক্ষত স ধর্ম্মাত্মা দ্রৌপদীং পার্শ্বতঃ স্থিতাম্। সা জ্ঞাত্বা তমভিপ্রায়ং ভর্ত্তুশ্চিত্তবশানুগা ॥ পাত্রং গৃহীত্বা সৌবর্ণং জলপূর্ণমনিন্দিতা। তচ্ছোণিতং প্রত্যগৃহ্লাদ্ যৎ প্রসুস্রাব নস্ততঃ ॥ ( বিরাটোঽথাব্রবীত্তত্র কিমেতৎ ক্রিয়তামিতি। সৈরন্ধ্রি ব্রূহি তত্ত্বেন মম প্রশ্নমশেষতঃ ॥

সৈরন্ধ্রী উবাচ। যদীদং শোণিতং রাজন্ কঙ্কস্য পতিতং ক্ষিতৌ। ইদং রাষ্ট্রঞ্চ তে ক্ষিপ্রং বিনশ্যেত ন সংশয়ঃ ॥ ন চ দ্বাদশবর্ষাণি বর্ষয়েত্ত পুরন্দরঃ। ঈতয়শ্চ প্রবর্ত্তন্তে ন শস্যং জায়তে ক্বচিৎ ॥ অশুভং স্যাচ্চ রাজেন্দ্র নৃপস্য চ পুরস্য চ ॥ )

বৈশম্পায়ন উবাচ। অথোত্তরঃ শুভৈর্গন্ধৈর্মাল্যৈশ্চ বিবিধৈস্তথা। আকীর্য্যমাণঃ সংহৃষ্টো নগরং স্বৈরমাগতঃ ॥ সভাজ্যমানঃ পৌরৈশ্চ স্ত্রীভি-র্জানপদৈস্তথা। আসাদ্য ভবনদ্বারং পিত্রে সংপ্রত্যবেদয়ৎ ॥ ততো দ্বাস্থঃ প্রবিশ্যৈব বিরাটমিদমব্রবীৎ। বৃহন্নলাসহায়স্তে পুত্রো দ্বার্য্যুত্তরঃ স্থিতঃ ॥ ততো হৃষ্টো মৎস্যরাজঃ ক্ষত্তারমিদমব্রবীৎ। প্রবেশ্যেতামুভৌ তূর্ণং দর্শনেপ্সু-রহং তয়োঃ ॥ ক্ষত্তারং কুরুরাজস্তু শনৈঃ কর্ণমুপাজপৎ। উত্তরঃ প্রবি-শত্বেকো ন প্রবেশ্যা বৃহন্নলা ॥ এতস্য হি মহাবাহোর্ব্রতমেতৎ সমাহিতম্। যো মমাঙ্গে ব্রণং কুর্য্যাচ্ছোণিতং বাপি দর্শয়েৎ ॥ অন্যত্র সংগ্রামগতান্ন স জীবেৎ কথঞ্চন ॥ ন মৃষ্যাদ্ভৃশসংক্রুদ্ধো মাং দৃষ্ট্বা তু সশোণিতম্। বিরাট-মিহ সামাত্যং দহেৎ সবলবাহনম্ ॥

বৈশম্পায়ন উবাচ। ততো রাজ্ঞঃ সুতো জ্যেষ্ঠঃ প্রাবিশৎ পৃথিবীঞ্জয়ঃ। সোঽভিবাদ্য পিতুঃ পাদৌ ধর্মরাজমপশ্যত॥ তথা রুধিরসংসিক্তমনেকাগ্রমনাগসম্। ভূমাবাসীনমেকান্তে সৈরন্ধ্র্যা প্রত্যুপস্থিতম্॥ ততঃ পপ্রচ্ছ পিতরং ত্বরমাণ ইবোত্তরঃ। কেনায়ন্তাড়িতো রাজন্ কেন পাপমিদং কৃতম্॥

বিরাট উবাচ। ময়ায়ন্তাড়িতো জিহ্মো ন চাপ্যেতাবদর্হতি। প্রশস্যমানে যৎ শূরে ত্বয়ি ষণ্ঢং প্রশংসতি॥

উত্তর উবাচ। অকার্য্যন্তে কৃতং রাজন্ ক্ষিপ্রমেব প্রসাদ্যতাম্। মা ত্বাং ব্রহ্মবিষং ঘোরং সমূলমপি নির্দহেৎ॥

বৈশম্পায়ন উবাচ। স পুত্রস্য বচঃ শ্রুত্বা বিরাটো রাষ্ট্রবর্দ্ধনঃ। ক্ষময়ামাস কৌরব্যং ভস্মাচ্ছন্নমিবানলম্॥ ক্ষময়ন্তন্তু রাজানং পাণ্ডবঃ প্রত্যভাষত। চিরং ক্ষান্তমিদং রাজন্ ন মন্যুর্বিদ্যতে মম॥ যদি হ্যেতৎ পতেদ্ ভূমৌ রুধিরং মম নস্ততঃ। সরাষ্ট্রস্ত্বং মহারাজ বিনশ্যেথা ন সংশয়ঃ॥ ন দূষয়ামি তে রাজন্ যশ্চ হন্যাদদূষকম্। বলবন্তং মহারাজ ক্ষিপ্রং দারুণমাপ্নুয়াৎ॥

বৈশম্পায়ন উবাচ। শোণিতে তু ব্যতিক্রান্তে প্রবিবেশ বৃহন্নলা। অভিবাদ্য বিরাটঞ্চ কঙ্কঞ্চাপ্যুপতিষ্ঠত॥ ক্ষময়িত্বা তু কৌরব্যং রণাদুত্তরমাগতম্। প্রশশংস ততো মৎস্যঃ শৃণ্বতঃ সব্যসাচিনঃ॥ ত্বয়া দায়াদবানস্মি কৈকেয়ীনন্দবর্দ্ধন। ত্বয়া মে সদৃশঃ পুত্রো ন ভূতো ন ভবিষ্যতি॥ পদং পদসহস্রেণ যশ্চরন্নাপরাধ্নুয়াৎ। তেন কর্ণেন তে তাত কথমাসীৎ সমাগমঃ॥ মনুষ্যলোকে সকলে যস্য তুল্যো ন বিদ্যতে। যঃ সমুদ্র ইবাক্ষোভ্যঃ কালাগ্নিরিব দুঃসহঃ॥ ভীষ্মেণ তেন তে তাত কথমাসীৎ সমাগমঃ॥ আচার্য্যো বৃষ্ণিবীরাণাং কৌরবাণাঞ্চ যো দ্বিজঃ। সর্ব্বক্ষত্রস্য চাচার্য্যঃ সর্ব্বশস্ত্রভৃতাং বরঃ॥ তেন দ্রোণেন তে তাত কথমাসীৎ সমাগমঃ॥ আচার্য্যপুত্রো যঃ শূরঃ সর্ব্বশস্ত্রভৃতাং বরঃ। অশ্বত্থামেতি বিখ্যাতঃ কথং তেন সমাগমঃ॥ রণে যং প্রেক্ষ্য সীদন্তি হৃতস্বা বণিজো যথা। কৃপেণ তেন তে তাত কথমাসীৎ সমাগমঃ॥ পর্ব্বতং যোঽভিবিধ্যেত রাজপুত্রো মহেষুভিঃ। দুর্য্যোধনেন তে তাত কথমাসীৎ সমাগমঃ॥ অবগাঢ়া দ্বিষন্তো মে সুখো বাতোঽভিবাতি মাম্। যস্ত্বং মে ধনমাজৈষীঃ কুরুভিগ্রস্তমাহবে॥ তেষাং ভয়াভিভূতানাং সর্ব্বেষাং বলশালিনাম্। নূনং প্রকাল্য তান্ সর্ব্বাংস্ত্বয়া যুধি নরর্ষভ॥ আচ্ছিন্নং গোধনং সর্ব্বং শার্দ্দূলানামিবামিষম্॥ ১-৭৬

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি বিরাটোত্তরসংবাদো নাম অষ্টষষ্টিতমোঽধ্যায়ঃ।

## একোনসপ্ততিতমোঽধ্যায়ঃ

উত্তর উবাচ। ন ময়া বিজিতা গাবো ন ময়া বিজিতাঃ পরে। কৃতন্তু কর্ম তৎ সর্বং দেবপুত্রেণ কেনচিৎ॥ স হি ভীতং দ্রবন্তং মাং দেবপুত্রো ন্যবারয়ৎ (ন্যবর্ত্তয়ৎ)। স চাতিষ্ঠদ্রথোপস্থে বজ্রসংহননো যুবা॥ তেন তা নির্জ্জিতা গাবস্তেন তে কুরবো জিতাঃ। তস্য তৎ কর্ম বীরস্য ন ময়া তাত তৎ কৃতম্॥ স হি শারদ্বতং দ্রোণং দ্রোণপুত্রঞ্চ বীর্য্যবান্। সূতপুত্রঞ্চ ভীষ্মঞ্চ চকার বিমুখান্ শরৈঃ॥ দুর্য্যোধনং চ সমরে (বিকর্ণঞ্চ) স নাগমিব যূথপম্। প্রভগ্নমব্রবীদ্ভীতং দেবপুত্রো মহাবলঃ॥ ন হাস্তিনপুরে ত্রাণং তব পশ্যামি কিঞ্চন। ব্যায়ামেন পরীপ্সস্ব জীবিতং কৌরবাত্মজ॥ ন মোক্ষ্যসে পলায়ংস্ত্বং রাজন্ যুদ্ধে মনঃ কুরু॥ পৃথিবীং ভোক্ষ্যসে জিত্বা হতো বা স্বর্গমাপ্স্যসি॥ স নিবৃত্তো নরব্যাঘ্রো মুঞ্চন্ বজ্রনিভাঞ্ছরান্। সচিবৈঃ সংবৃতো রাজা রথে নাগ ইব শ্বসন্॥ তত্র মে (তং দৃষ্ট্বা) রোমহর্ষোঽভূদূরুস্তম্ভ (কম্প) শ্চ জায়তে (মারিষ)। তদভ্রঘন (স তত্র সিংহ) সঙ্কাশমনীকং ব্যধমচ্ছরৈঃ॥ তৎ প্রণুদ্য রথানীকং সিংহসংহননো যুবা। কুরূংস্তান্ প্রহসন্ রাজন্ বাসাংস্যপাহরদ্বলী (সংস্থিতান্ হৃতবাসসঃ)॥ একেন তেন বীরেণ ষড়্রথাঃ পরিনির্জ্জিতাঃ। শার্দ্দূলেনেব মত্তেন মৃগাস্তৃণচরা বনে (যথা বনচরা মৃগাঃ)॥

বিরাট উবাচ। ক স বীরো মহাবাহুর্দেবপুত্রো মহাযশাঃ। যো মে গোধনমাজৈষীৎ কুরুভিগ্রস্তমাহবে॥ ইচ্ছামি তমহং দ্রষ্টুমর্চ্চিতুঞ্চ মহাবলম্। যেন মে ত্বঞ্চ গাবশ্চ রক্ষিতা দেবসূনুনা॥

উত্তর উবাচ। অন্তর্দ্ধানং গতস্তত্র দেবপুত্রো মহাবলঃ। স তু শ্বো বা পরশ্বো বা মন্যে প্রাদুর্ভবিষ্যতি॥

বৈশম্পায়ন উবাচ। এবমাখ্যায়মানন্তু ছন্নং সত্রেণ পাণ্ডবম্। বসন্তং তত্র নাজ্ঞাসীদ্বিরাটো বাহিনীপতিঃ॥ ততঃ পার্থোঽভ্যনুজ্ঞাতো বিরাটেন মহাত্মনা। প্রদদৌ তানি বাসাংসি বিরাটদুহিতুঃ স্বয়ম্॥ উত্তরা তু মহার্হাণি বিবিধানি তনূনি চ। প্রতিগৃহ্যাভবৎ প্রীতা তানি বাসাংসি ভাবিনী॥ মন্ত্রয়িত্বা তু কৌন্তেয় উত্তরেণ রহস্তদা। ইতিকর্ত্তব্যতাং সর্বাং রাজন্যথ যুধিষ্ঠিরে॥ ততস্তথা তদ্ব্যদধদ্ যথাবৎ পুরুষর্ষভ। সহ পুত্রেণ মৎস্যস্য সংপ্রহৃষ্টো নরর্ষভঃ॥ ১-১৯

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি বিরাটোত্তরসংবাদে ঊনসপ্ততিতমোঽধ্যায়ঃ।

## সপ্তত্রিংশোঽধ্যায়ঃ

বৈশম্পায়ন উবাচ। ততস্তৃতীয়ে দিবসে ভ্রাতরঃ পঞ্চ পাণ্ডবাঃ। স্নাতাঃ শুক্লাম্বরধরাঃ সময়ে চরিতব্রতাঃ॥ যুধিষ্ঠিরং পুরস্কৃত্য সর্ব্বাভরণভূষিতাঃ। প্রতিপন্না যথা নাগা ভ্রাজমানা মহারথাঃ॥ বিরাটস্য সভাং গত্বা ভূমিপালাসনেষথ। নিষেদুঃ পাবকপ্রখ্যাঃ সর্ব্বে ধিষ্ণ্যেষ্বিবাগ্নয়ঃ॥ তেষু তত্রোপবিষ্টেষু বিরাটঃ পৃথিবীপতিঃ। আজগাম সভাং কর্ত্তুং রাজকার্য্যাণি সর্ব্বশঃ॥ শ্রীমতঃ পাণ্ডবান্ দৃষ্ট্বা জ্বলতঃ পাবকানিব। (রাজবেশমুপাদায় নৃপতির্বিস্মিতোঽভবৎ॥ কিমিদং কো বিধির্হ্যেষ ভয়ার্ত্ত ইব পার্থিবঃ।) মুহূর্ত্তমিব চ ধ্যাত্বা সরোষঃ পৃথিবীপতিঃ॥ অথ মৎস্যোঽব্রবীৎ কঙ্কং দেবরূপমবস্থিতম্। মরুদ্গণৈরুপাসীনং ত্রিদশানামিবেশ্বরম্॥ স কিলাক্ষাতিবাপস্ত্বং (ক্ষব্যাপকস্ত্বং) সভাস্তারো ময়া বৃতঃ। অথ রাজাসনে কস্মাদুপবিষ্টস্ত্বলঙ্কৃতঃ॥

বৈশম্পায়ন উবাচ। পরিহাসেপ্সয়া বাক্যং বিরাটস্য নিশম্য তৎ। স্ময়মানোঽর্জ্জুনো রাজন্নিদং বচনমব্রবীৎ॥

অর্জ্জুন উবাচ। ইন্দ্রস্যাপ্যাসনং রাজন্নয়মারোঢ়ুমর্হতি। ব্রহ্মণ্যঃ শ্রুতবাংস্ত্যাগী যজ্ঞশীলো দৃঢ়ব্রতঃ॥ এষ বিগ্রহবান্ ধর্ম্ম এষ বীর্য্যবতাং বরঃ। এষ বুদ্ধ্যাধিকো লোকে তপসাঞ্চ পরায়ণঃ॥ এষোঽস্ত্রং বিবিধং বেত্তি ত্রৈলোক্যে সচরাচরে। ন চৈবান্যঃ পুমান্ বেত্তি ন বেৎস্যতি কদাচন॥ ন দেবা নাসুরাঃ কেচিন্ন মনুষ্যা ন রাক্ষসাঃ। গন্ধর্ব্বযক্ষপ্রবরাঃ সকিন্নরমহোরগাঃ॥ দীর্ঘদর্শী মহাতেজাঃ পৌরজানপদপ্রিয়ঃ। পাণ্ডবানামতিরথো যজ্বা ধর্ম্মপরো বশী॥ মহর্ষিকল্পো রাজর্ষিস্ত্রিষু লোকেষু বিশ্রুতঃ। বলবান্ ধৃতিমান্ সৌম্যঃ সত্যবাদী জিতেন্দ্রিয়ঃ। ধনৈশ্চ সঞ্চয়ৈশ্চৈব শক্রবৈশ্রবণোপমঃ॥ যথা মনুর্ম্মহাতেজা লোকানাং পরিরক্ষিতা। এবমেব মহাতেজাঃ প্রজানুগ্রহকারকঃ॥ অয়ং কুরূণামৃষভঃ কুন্তীপুত্রো যুধিষ্ঠিরঃ। অস্য লোকে স্থিরা কীর্ত্তিঃ সূর্য্যস্যেব দিবি প্রভা॥ সংসরন্তি দিশঃ সর্ব্বা যশসোঽস্য ইবাংশবঃ। উদিতস্যেব সূর্য্যস্য তেজসোঽনুগভস্তয়ঃ॥ এনং দশসহস্রাণি কুঞ্জরাণাং তরস্বিনাম্। অন্বয়ুঃ পৃষ্ঠতো রাজন্ যাবদধ্যাবসৎ কুরূন্॥ ত্রিংশদেবং সহস্রাণি রথাঃ কাঞ্চনমালিনঃ। সদশ্বৈরুপসম্পন্নাঃ পৃষ্ঠতোঽনুযযুঃ সদা॥ এনমষ্টশতাঃ সূতাঃ সুমৃষ্টমণিকুণ্ডলাঃ। অব্রুবন্ মাগধৈঃ সার্দ্ধং পুরা শক্রমিবর্ষয়ঃ॥ ইমং নিত্যমুপাসন্তঃ কুরবঃ কিঙ্করা যথা। সর্ব্বে চ রাজন্ রাজানো ধনেশ্বরমিবামরাঃ॥ এষ সর্ব্বান্ মহীপালান্ করদান্ সমকারয়ৎ।

বৈশ্যানিব মহাভাগো বিবশান্ স্ববশানপি॥ অষ্টাশীতিসহস্রাণি স্নাতকানাং মহাত্মনাম্। উপজীবন্তি রাজানমেনং সুচরিতব্রতম্॥ এষ বৃদ্ধাননাথাংশ্চ পঙ্গূনন্ধাংশ্চ মানবান্। পুত্রবৎ পালয়ামাস প্রজাধর্ম্মেণ (বীর্য্যবান্) বৈ বিভুঃ॥ এষ ধর্ম্মে দমে চৈব ক্রোধে চাপি জিতঃ সদা। মহাপ্রসাদো ব্রহ্মণ্যঃ সত্যবাদী চ পার্থিবঃ॥ শ্রীত্রং (শ্রীপ্র) তাপেন চৈতস্য তপ্যতে স সুযোধনঃ। সগণঃ সহ কর্ণেন সৌবলেনাপি বা বিভুঃ॥ ন শক্যন্তে হ্যস্য গুণাঃ সংপ্রখ্যাতুং নরেশ্বর। এষ ধর্ম্মপরো নিত্যমানৃশংস্যশ্চ পাণ্ডবঃ॥ এবমুক্তো মহারাজঃ পাণ্ডবঃ পুরুষর্ষভঃ। কথং নার্হতি রাজার্হমাসনং পৃথিবীপতে॥ ১—২৮

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাট-পর্ব্বণ্যজ্ঞাতবাসপরিত্যাগে পাণ্ডবপ্রকাশে সপ্ততিতমোঽধ্যায়ঃ।

---

## একসপ্ততিতমোঽধ্যায়ঃ

বিরাট উবাচ। যদ্যেষ রাজা কৌরব্যঃ কুন্তীপুত্রো যুধিষ্ঠিরঃ। কতমো-ঽস্যার্জ্জুনো ভ্রাতা ভীমশ্চ কতমো বলী॥ নকুলঃ সহদেবো বা দ্রৌপদী বা যশস্বিনী। যদা দ্যূতজিতাঃ পার্থা ন প্রাজ্ঞায়ন্ত তে ক্বচিৎ॥

অর্জ্জুন উবাচ। য এষ বল্লবো ব্রূতে সূদস্তব নরাধিপ। এষ ভীমো মহাবাহুর্ভীমবেগপরাক্রমঃ॥ এষ ক্রোধবশান্ হত্বা পর্ব্বতে গন্ধমাদনে। সৌগন্ধিকানি দিব্যানি কৃষ্ণার্থে সমুপাহরৎ॥ গন্ধর্ব্ব এষ বৈ হন্তা কীচকানাং দুরাত্মনাম্। ব্যাঘ্রানৃক্ষান্ বরাহাংশ্চ হতবান্ স্ত্রীপুরে তব॥ যশ্চাসীদশ্ব-রক্ষস্তে নকুলোঽয়ং পরন্তপঃ। গোসংখ্যঃ সহদেবশ্চ মাদ্রীপুত্রৌ মহারথৌ॥ শৃঙ্গারবেশাভরণৌ রূপবন্তৌ যশস্বিনৌ। মহারথসহস্রাণাং সমর্থৌ ভরত-র্ষভৌ॥ এষা পদ্মপলাশাক্ষী সুমধ্যা চারুহাসিনী। সৈরন্ধ্রী দ্রৌপদী রাজন্ যৎকৃতে কীচকা হতাঃ॥ অর্জ্জুনোঽহং মহারাজ ব্যক্তং তে শ্রোত্রমাগতঃ। ভীমাদবরজঃ পার্থো যমাভ্যাঞ্চাপি পূর্ব্বজঃ॥ উষিতাঃ স্মো মহারাজ সুখং তব নিবেশনে। অজ্ঞাতবাসনিরতা গর্ভবাস ইব প্রজাঃ॥

বৈশম্পায়ন উবাচ। যদার্জ্জুনেন তে বীরাঃ কথিতাঃ পঞ্চ পাণ্ডবাঃ। তদার্জ্জুনস্য বৈরাটিঃ কথয়ামাস বিক্রমম্॥ পুনরেব চ তান্ পার্থান্ দর্শয়ামাস চোত্তরঃ॥

উত্তর উবাচ। য এষ জাম্বূনদশুদ্ধগৌর-তনুর্ম্মহান্ সিংহ ইব প্রবৃদ্ধঃ।

প্রচণ্ডঘোণঃ পৃথুদীর্ঘনেত্রস্তাম্রায়তাস্তঃ কুরুরাজ এষঃ॥ অয়ং পুনর্মত্তগজেন্দ্রগামী, প্রতপ্তচামীকরশুদ্ধগৌরঃ। পৃথ্বায়তাংসো যুগদীর্ঘবাহুর্বৃকোদরঃ পশ্যত পশ্যতৈনম্॥ যস্ত্বেষ পার্শ্বেঽস্য মহাধনুষ্মান্, শ্যামো যুবা বারণযূথপোপমঃ। সিংহোন্নতাংসো গজরাজগামী, পদ্মায়তাক্ষোঽর্জ্জুন এষ বীরঃ॥ রাজ্ঞঃ সমীপে পুরুষোত্তমৌ যৌ, যমাবিমৌ বিষ্ণুমহেন্দ্রকল্পৌ। মনুষ্যলোকে সকলে সমোঽস্তি, যয়োর্ন রূপে ন বলে ন শীলে॥ আভ্যাস্তু পার্শ্বে কনকোত্তমাঙ্গী, যৈষা প্রভা মূর্ত্তিমতীব সৌরী। নীলোৎপলাভা সুরদেবতেব, কৃষ্ণা স্থিতা মূর্ত্তিমতীব লক্ষ্মীঃ॥

বৈশম্পায়ন উবাচ। এবং নিবেদ্য তান্ পার্থান্ পাণ্ডবান্ পঞ্চ ভূপতেঃ। ততোঽর্জ্জুনস্য বৈরাটিঃ কথয়ামাস বিক্রমম্। মহেন্দ্রকল্পস্য তদা সংপ্রহৃষ্টতনূরুহঃ॥

বৈরাটিরুবাচ। অয়ং স দ্বিষতাং হন্তা মৃগাণামিব কেশরী। ব্যচরদ্রথবৃন্দেষু নিঘ্নংস্তাংস্তান্ বরান্ রথান্॥ অনেন বিদ্ধো মাতঙ্গো মহানেকেষুণা হতঃ। হিরণ্যকক্ষঃ সংগ্রামে দন্তাভ্যামগমন্মহীম্॥ অনেন বিজিতা গাবো জিতাশ্চ কুরবো যুধি। অস্য শঙ্খপ্রণাদেন জ্যাঘাতনিনদেন চ। রথনেমিবিনির্ঘোষৈঃ কর্ণৌ মে বধিরীকৃতৌ॥

বৈশম্পায়ন উবাচ। তস্য তদ্বচনং শ্রুত্বা মৎস্যরাজঃ প্রতাপবান্। উত্তরং প্রত্যুবাচেদমভিপন্নে যুধিষ্ঠিরে॥ প্রসাদনং পাণ্ডবস্য প্রাপ্তকালং হি রোচয়ে। উত্তরাঞ্চ প্রযচ্ছামি পার্থায় যদি তে মতম্ (মন্যসে)॥

উত্তর উবাচ। আর্য্যাঃ পূজ্যাশ্চ মান্যাশ্চ প্রাপ্তকালঞ্চ মে মতম্। পূজ্যন্তাং পূজনার্হাশ্চ মহাভাগাশ্চ পাণ্ডবাঃ॥

বিরাট উবাচ। অহং খল্বপি সংগ্রামে শত্রূণাং বশমাগতঃ। রক্ষিতো ভীমসেনেন গাবশ্চাপি জিতাস্তথা॥ এতেষাং বাহুবীর্য্যেণ যদস্মাকং জয়ো মৃধে। বয়ং সর্ব্বে সহামাত্যাঃ কুন্তীপুত্রং যুধিষ্ঠিরম্। প্রসাদয়ামো ভদ্রন্তে সানুজং পাণ্ডবর্ষভম্॥ যদস্মাভিরজানদ্ভিঃ কিঞ্চিদুক্তো নরাধিপ। ক্ষন্তুমর্হতি তৎ সর্ব্বং ধর্ম্মাত্মা হ্যেষ পাণ্ডবঃ॥

বৈশম্পায়ন উবাচ। ততো বিরাটঃ প্রথমং প্রহৃষ্টঃ, সমেত্য রাজা সময়ঞ্চকার। রাজ্যঞ্চ সর্ব্বং বিসসর্জ্জ তস্মৈ, সদণ্ডকোষং সপুরং মহাত্মা॥ পাণ্ডবাংশ্চ ততঃ সর্ব্বান্মৎস্যরাজঃ প্রতাপবান্। ধনঞ্জয়ং পুরস্কৃত্য দিষ্ট্যা দিষ্ট্যেতি চাব্রবীৎ॥ সমুপাঘ্রায় মূর্দ্ধানং সংশ্লিষ্য চ পুনঃ পুনঃ। যুধিষ্ঠিরঞ্চ ভীমঞ্চ মাদ্রীপুত্রৌ

মহাবলৌ॥ নাতৃপ্যদ্দর্শনে তেষাং বিরাটো বাহিনীপতিঃ। স প্রীয়মাণো রাজানং যুধিষ্ঠিরমথাব্রবীৎ॥ দিষ্ট্যা ভবন্তঃ সংপ্রাপ্তাঃ সর্ব্বে কুশলিনো বনাৎ। দিষ্ট্যা সম্পালিতং কৃচ্ছ্রমজ্ঞাতং বৈ দুরাত্মভিঃ॥ ইদং রাজ্যঞ্চ বঃ পার্থা যচ্চান্যদপি কিঞ্চন। যচ্চ বক্ষ্যামি তৎ কার্য্যমর্জ্জুনেনাবিশঙ্কয়া॥ উত্তরাং প্রতিগৃহ্ণাতু সব্যসাচী ধনঞ্জয়ঃ। অয়ং হ্যৌপয়িকো ভর্ত্তা তস্যাঃ পুরুষসত্তমঃ॥ এবমুক্তো ধর্ম্মরাজঃ পার্থমৈক্ষদ্ধনঞ্জয়ম্। ঈক্ষিতশ্চার্জ্জুনো ভ্রাত্রা মৎস্যং বচনমব্রবীৎ॥ প্রতিগৃহ্ণাম্যহং হ্যেতাং স্নুষাং দুহিতরং তব। যুক্ত (এবাবয়োরেব সম্বন্ধঃ কুরুমৎস্যয়োঃ।) শ্চাবাং হি সম্বন্ধো মৎস্যভারতসত্তমৌ॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাট-
পর্ব্বণি উত্তরাবিবাহপ্রস্তাবে একসপ্ততিতমোঽধ্যায়ঃ।

---

## দ্বিসপ্ততিতমোঽধ্যায়ঃ

বিরাট উবাচ। কিমর্থং পাণ্ডবশ্রেষ্ঠ ভার্য্যাং দুহিতরং মম। প্রতিগ্রহীতুং নেমাং ত্বং ময়া দত্তামিহেচ্ছসি॥

অর্জ্জুন উবাচ। অন্তঃপুরেঽহমুষিতঃ সদা পশ্যন্ সুতাং তব। রহস্যঞ্চ প্রকাশঞ্চ বিশ্বস্তা পিতৃবন্ময়ি॥ প্রিয়ো বহুমতশ্চাসং নর্ত্তকো গীতকোবিদঃ। আচার্য্যবচ্চ মাং নিত্যং মন্যতে দুহিতা তব॥ বয়স্থয়া তয়া রাজন্ সহ সংবৎসরোষিতঃ। অতি (ভি) শঙ্কা ভবেৎ স্থানে তব লোকস্য বা বিভো॥ তস্মান্নিমন্ত্রয়েঽহন্তে দুহিতাং পৃথিবীপতে। শুদ্ধো জিতেন্দ্রিয়ো দান্তস্তস্যাঃ শুদ্ধিঃ কৃতা ময়া॥ স্নুষায়া দুহিতুর্বাপি পুত্রে চাত্মনি বা পুনঃ। অভিশঙ্কাং ন পশ্যামি তেন শুদ্ধির্ভবিষ্যতি॥ অভিশঙ্কাদহং (অভিশাপাদহং) ভীতো মিথ্যাচারাৎ পরন্তপ। স্নুষার্থমুত্তরাং রাজন্ প্রতিগৃহ্ণামি তে সুতাম্॥ স্বস্রীয়ো বাসুদেবস্য সাক্ষাদ্দেবশিশুর্যথা। দয়িতশ্চক্রহস্তস্য বাল এবাস্ত্রকোবিদঃ॥ অভিমন্যুর্মহাবাহুঃ পুত্রো মম বিশাম্পতে। জামাতা তব যুক্তোঽসৌ ভর্ত্তা তু দুহিতুস্তব॥

বিরাট উবাচ। উপপন্নং কুরুশ্রেষ্ঠে কুন্তীপুত্রে ধনঞ্জয়ে। য এব ধর্ম্মনিষ্ঠশ্চ জাতজ্ঞানশ্চ পাণ্ডবঃ॥ যৎ কৃত্যং মন্যসে পার্থ ক্রিয়তাং তদনন্তরম্। সর্ব্বে কামাঃ সমৃদ্ধাশ্চ সম্বন্ধী যস্য মেঽর্জ্জুনঃ॥

বৈশম্পায়ন উবাচ। এবং ব্রুবতি রাজেন্দ্রে কুন্তীপুত্রো যুধিষ্ঠিরঃ। অন্ব-(শাসৎ স সংযোগং) জানত সম্বন্ধং সময়ে মৎস্যপার্থয়োঃ॥ ততো মিত্রেষু

সর্ব্বেষু বাসুদেবে চ পার্থিব। প্রেষয়ামাস কৌন্তেয়ো বিরাটশ্চ মহীপতিঃ॥ ততস্ত্রয়োদশে বর্ষে নিবৃত্তে পঞ্চ পাণ্ডবাঃ। উপপ্লব্যং বিরাটস্য সমপদ্যন্ত সর্ব্বশঃ॥ অভিমন্যুঞ্চ বীভৎসুরানিনায় জনার্দ্দনম্। আনর্ত্তেভ্যোঽপি দাসার্হানানয়ামাস পাণ্ডবঃ॥ কাশীরাজশ্চ শৈব্যশ্চ প্রীয়মাণৌ যুধিষ্ঠিরে। অক্ষৌহিণীভ্যাং সহিতাবাগতৌ পৃথিবীপতে॥ অক্ষৌহিণ্যা চ তেজস্বী যাজ্ঞসেনো মহাবলঃ। দ্রৌপদ্যাশ্চ সুতা বীরাঃ শিখণ্ডী চাপরাজিতঃ॥ ধৃষ্টদ্যুম্নশ্চ দুর্দ্ধর্ষঃ সর্ব্বশস্ত্রভৃতাং বরঃ। সমস্তাক্ষৌহিণীপালা যজ্বানো ভূরিদক্ষিণাঃ॥ বেদাধ্যয়নসম্পন্নাঃ সর্ব্বে শূরাস্তনুত্যজঃ॥ তানাগতানভিপ্রেক্ষ্য মৎস্যো ধর্ম্মভৃতাং বরঃ। পূজয়ামাস বিধিবৎ সভৃত্যবলবাহনান্॥ প্রীতোঽভবদ্দুহিতরং দত্বা তামভিমন্যবে। ততঃ প্রত্যুপযাতেষু পার্থিবেষু ততস্ততঃ॥ তত্রাগমদ্বাসুদেবো বনমালী হলায়ুধঃ। কৃতবর্ম্মা চ হার্দ্দিক্যো যুযুধানশ্চ সাত্যকিঃ॥ অনাধৃষ্টিস্তথাক্রূরঃ শাম্বো নিশঠ এব চ। অভিমন্যুমুপাদায় সহ মাত্রা পরন্তপাঃ॥ ইন্দ্রসেনাদয়শ্চৈব রথৈস্তৈঃ সুসমাহিতৈঃ। আযযুঃ সহিতাঃ সর্ব্বে পরিসংবৎসরোষিতাঃ॥ দশনাগসহস্রাণি হয়ানাঞ্চ দশাযুতম্। রথানামর্ব্বুদং পূর্ণং নিখর্ব্বঞ্চ পদাতিনাম্॥ বৃষ্ণ্যন্ধকাশ্চ শতশো ভোজাশ্চ পরমৌজসঃ॥ অন্বযুর্বৃষ্ণিশার্দ্দূলং বাসুদেবং মহামতিম্॥ পারিবর্হং দদৌ কৃষ্ণঃ পাণ্ডবানাং মহাত্মনাম্। স্ত্রিয়ো রত্নানি বাসাংসি পৃথক্ পৃথগনেকশঃ। ততো বিবাহে বিবৃতে বিধিবন্মৎস্যপার্থয়োঃ॥ ততঃ শঙ্খাশ্চ ভের্য্যশ্চ পণবানকগোমুখাঃ। পার্থৈঃ সংপূজ্যমানস্য নেদুর্মৎস্যস্য বেশ্মনি॥ উচ্চাবচান্ মৃগান্ জঘ্নুর্মেধ্যাংশ্চ শতশঃ পশূন্। সুরামৈরেয়পানানি প্রভূতান্যুপহারয়ন্॥ গায়নাখ্যানশীলাশ্চ নটবৈতালিকাস্তথা। স্তুবন্তস্তানুপাতিষ্ঠন্ সূতাশ্চ সহ মাগধৈঃ॥ সুদেষ্ণাঞ্চ পুরস্কৃত্য মৎস্যানাঞ্চ বরস্ত্রিয়ঃ। আজগ্মুশ্চারুসর্ব্বাঙ্গ্যঃ সুমৃষ্টমণিকুণ্ডলাঃ॥ বর্ণোপপন্নাস্তা নার্য্যো রূপবত্যঃ স্বলঙ্কৃতাঃ। সর্ব্বাশ্চাভ্যভবন্ কৃষ্ণা রূপেণ যশসা শ্রিয়া॥ পরিবার্য্যোত্তরাং তাস্ত রাজপুত্রীমলঙ্কৃতাম্। সুতামিব মহেন্দ্রস্য পুরস্কৃত্যোপতস্থিরে॥ তাং প্রত্যগৃহ্নাৎ কৌন্তেয়ঃ সুতস্যার্থে ধনঞ্জয়ঃ। সৌভদ্রস্যানবদ্যাঙ্গীং বিরাটতনয়াং তদা॥ তত্রাতিষ্ঠন্মহারাজো রূপমিন্দ্রস্য ধারয়ন্। স্নুষাং তাং প্রতিজগ্রাহ কুন্তীপুত্রো যুধিষ্ঠিরঃ। প্রতিগৃহ্য চ তাং পার্থঃ পুরস্কৃত্য জনার্দ্দনম্। বিবাহং কারয়ামাস সৌভদ্রস্য মহাত্মনঃ॥ তস্মৈ সপ্তসহস্রাণি হয়ানাং বাতরংহসাম্। দ্বে চ নাগশতে মুখ্যে প্রাদাদ্বহুধনং তদা॥ হুত্বা সম্যক্ সমিদ্ধাগ্নিমর্চ্চয়িত্বা দ্বিজন্মনঃ। রাজ্যং বলঞ্চ

কোষঞ্চ সর্ব্বমাত্মানমেব চ ॥ স্তবেদয়ৎ পাণ্ডবেভ্যো বিরাটঃ প্রীতিমাংস্তদা ॥ কৃতে বিবাহে তু তদা ধর্ম্মপুত্রো যুধিষ্ঠিরঃ। ব্রাহ্মণেভ্যো দদৌ বিত্তং যদুপাহরদচ্যুতঃ॥ গোসহস্রাণি রত্নানি বস্ত্রাণি বিবিধানি চ। ভূষণানি চ মুখ্যানি যানানি শয়নানি চ॥ ভোজনানি চ হৃদ্যানি পানানি বিবিধানি চ॥ তন্মহোৎসবসঙ্কাশং হৃষ্টপুষ্টজনাবৃতম্। নগরং মৎস্যরাজস্য শুশুভে ভরতর্ষভ॥ ওঁ॥ ১—৪০ ॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং বিরাটপর্ব্বণি (বৈবাহিকপর্ব্বণি) উত্তরাবিবাহে দ্বিসপ্ততিতমোঽধ্যায়ঃ।

---

ওঁ তৎ সৎ।

# শ্রীশ্রীমদ্ভগবদ্গীতা

## অথ শ্রীমদভগবদ্গীতাপাঠক্রমঃ

গীতা-ঋষ্যাদি ন্যাসঃ—ওঁ অস্য শ্রীমদ্ভগবদ্গীতা-মালামন্ত্রস্য শ্রীভগবান্ বেদব্যাস-ঋষিরনুষ্টুপ্ ছন্দঃ শ্রীকৃষ্ণঃ পরমাত্মা দেবতা "অশোচ্যানন্বশোচস্ত্বং প্রজ্ঞাবাদাংশ্চ ভাষসে" ইতি বীজম্ "সর্ব্বধর্ম্মান্ পরিত্যজ্য মামেকং শরণং ব্রজ" ইতি শক্তিঃ "অহং ত্বাং সর্ব্বপাপেভ্যো মোক্ষয়িষ্যামি মা শুচঃ" ইতি কীলকম্ শ্রীকৃষ্ণপ্রীত্যর্থং শ্রীমদ্ভগবদ্গীতাপাঠে বিনিয়োগঃ।

গীতা-করাঙ্গন্যাসৌ যথা—"নৈনং ছিন্দন্তি শস্ত্রাণি নৈনং দহতি পাবকঃ" ইত্যঙ্গুষ্ঠাভ্যাং নমঃ। "ন চৈনং ক্লেদয়ন্ত্যাপো ন শোষয়তি মারুতঃ" ইতি তর্জ্জনীভ্যাং স্বাহা। "অচ্ছেদ্যোঽয়মদাহ্যোঽয়মক্লেদ্যোঽশোষ্য এব চ" ইতি মধ্যমাভ্যাং বষট্। "নিত্যঃ সর্ব্বগতঃ স্থাণুরচলোঽয়ং সনাতনঃ" ইত্যনামিকাভ্যাং হুং। "পশ্য মে পার্থ রূপাণি শতশোঽথ সহস্রশঃ" ইতি কনিষ্ঠাভ্যাং বৌষট্। "নানাবিধানি দিব্যানি নানাবর্ণাকৃতীনি চ" ইতি করতলপৃষ্ঠাভ্যামস্ত্রায় ফট্। ইতি করন্যাসঃ।

"নৈনং ছিন্দন্তি শস্ত্রাণি নৈনং দহতি পাবকঃ" ইতি হৃদয়ায় নমঃ। "ন চৈনং ক্লেদয়ন্ত্যাপো ন শোষয়তি মারুতঃ" ইতি শিরসে স্বাহা। "অচ্ছেদ্যোঽয়মদাহ্যোঽয়মক্লেদ্যোঽশোষ্য এব চ" ইতি শিখায়ৈ বষট্। "নিত্যঃ সর্ব্বগতঃ স্থাণুরচলোঽয়ং সনাতনঃ" ইতি কবচায় হুং। "পশ্য মে পার্থ রূপাণি শতশোঽথ সহস্রশঃ" ইতি নেত্রত্রয়ায় বৌষট্। "নানাবিধানি দিব্যানি নানাবর্ণাকৃতীনি চ" ইতি করতলপৃষ্ঠাভ্যামস্ত্রায় ফট্। ইতি অঙ্গন্যাসঃ।

অন্যৎ সর্ব্বং চণ্ডীপাঠাদিবৎ দ্বিতীয়খণ্ডে দ্রষ্টব্যম্।

---

### অথ গীতা-ধ্যানম্

ওঁ পার্থায় প্রতিবোধিতাং ভগবতা নারায়ণেন স্বয়ং, ব্যাসেন গ্রথিতাং পুরাণমুনিনা মধ্যেমহাভারতম্। অদ্বৈতামৃতবর্ষিণীং ভগবতীমষ্টাদশাধ্যায়িনীমম্ব ত্বামনুসন্দধামি ভগবদ্গীতে ভবদ্বেষিণীম্॥

## অথ গণেশাদি-প্রণামাঃ

ওঁ বাগীশাদ্যাঃ সুমনসঃ সর্ব্বার্থানামুপক্রমে। যং নত্বা কৃতকৃত্যাঃ স্যুস্তং নমামি গজাননম্॥ ১॥ যা কুন্দেন্দুতুষারহারধবলা যা শ্বেত-পদ্মাসনা, যা বীণাবরদণ্ডমণ্ডিতভুজা যা শুভ্রবস্ত্রাবৃতা। যা ব্রহ্মাচ্যুত-শঙ্করপ্রভৃতিভির্দেবৈঃ সদা বন্দিতা, সা মাং পাতু সরস্বতী ভগবতী নিঃশেষ-জাড্যাপহা॥২॥ নমোঽস্তু তে ব্যাস বিশালবুদ্ধে, ফুল্লারবিন্দায়ত-পত্রনেত্র। যেন ত্বয়া ভারততৈলপূর্ণঃ, প্রজ্বালিতো জ্ঞানময়ঃ প্রদীপঃ॥ ৩॥ প্রপন্নপারিজাতায় তোত্রবেত্রৈকপাণয়ে। জ্ঞানমুদ্রায় কৃষ্ণায় গীতামৃতদুহে নমঃ॥ ৪॥ সর্ব্বোপনিষদো গাবো দোগ্ধা গোপালনন্দনঃ। পার্থো বৎসঃ সুধীর্ভোক্তা দুগ্ধং গীতামৃতং মহৎ॥ ৫॥ বসুদেবসুতং দেবং কংসচাণূরমর্দ্দনম্। দেবকীপরমানন্দং কৃষ্ণং বন্দে জগদ্গুরুম্॥ ৬॥ ভীষ্মদ্রোণতটা জয়দ্রথজলা গান্ধারনীলোৎপলা, শল্যগ্রাহবতী কৃপেণ বহনী কর্ণেন বেলাকুলা। অশ্বত্থাম-বিকর্ণঘোরমকরা দুর্য্যোধনাবর্ত্তিনী, সোত্তীর্ণা খলু পাণ্ডবৈ রণনদী কৈবর্ত্তকঃ কেশবঃ॥ ৭॥ পারাশর্য্যবচঃ সরোজমমলং গীতার্থগন্ধোৎকটং, নানাখ্যানক-কেশরং হরিকথাসম্বোধনাবোধিতম্। লোকে সজ্জনষট্পদৈরহরহঃ পেপীয়মানং মুদা, ভূয়াদ্ ভারতপঙ্কজং কলিমলপ্রধ্বংসি নঃ শ্রেয়সে॥ ৮॥ মূকং করোতি বাচালং পঙ্গুং লঙ্ঘয়তে গিরিম্। যৎকৃপা তমহং বন্দে পরমানন্দমাধবম্॥ ৯॥ যং ব্রহ্মা বরুণেন্দ্ররুদ্রমরুতঃ স্তুন্বন্তি দিব্যৈঃ স্তবৈর্বেদৈঃ সাঙ্গপদক্রমোপনিষদৈর্গায়ন্তি যং সামগাঃ। ধ্যানাবস্থিততদ্-গতেন মনসা পশ্যন্তি যং যোগিনো, যস্যান্তং ন বিদুঃ সুরাসুরগণা দেবায় তস্মৈ নমঃ॥ ১০॥ নমো ধর্ম্মায় মহতে নমঃ কৃষ্ণায় বেধসে। ব্রাহ্মণেভ্যো নমস্কৃত্য ধর্ম্মান্ বক্ষ্যে সনাতনান্॥ ১১॥ নারায়ণং নমস্কৃত্য নরঞ্চৈব নরোত্তমম্। দেবীং সরস্বতীঞ্চৈব ততো জয়মুদীরয়েৎ॥

---

ওঁ তৎ সৎ

## প্রথমোঽধ্যায়ঃ

ওঁ ধৃতরাষ্ট্র উবাচ। ধর্মক্ষেত্রে কুরুক্ষেত্রে সমবেতা যুযুৎসবঃ। মামকাঃ পাণ্ডবাশ্চৈব কিমকুর্ব্বত সঞ্জয় ॥ ১ ॥

সঞ্জয় উবাচ। দৃষ্ট্বা তু পাণ্ডবানীকং ব্যূঢ়ং দুর্য্যোধনস্তদা। আচার্য্যমুপসঙ্গম্য রাজা বচনমব্রবীৎ ॥ ২ ॥ পশ্যৈতাং পাণ্ডুপুত্রাণামাচার্য্য মহতীং চমূম্। ব্যূঢ়াং দ্রুপদপুত্রেণ তব শিষ্যেণ ধীমতা ॥ ৩ ॥ অত্র শূরা মহেষাসা ভীমার্জ্জুনসমা যুধি। যুযুধানো বিরাটশ্চ দ্রুপদশ্চ মহারথঃ ॥ ৪ ॥ ধৃষ্টকেতুশ্চেকিতানঃ কাশী (শি) রাজশ্চ বীর্য্যবান্। পুরুজিৎ কুন্তিভোজশ্চ শৈ (সৈ) ব্যশ্চ নরপুঙ্গবঃ ॥ ৫ ॥ যুধামন্যুশ্চ বিক্রান্ত উত্তমৌজাশ্চ বীর্য্যবান্। সৌভদ্রো দ্রৌপদেয়াশ্চ সর্ব্ব এব মহারথাঃ ॥ ৬ ॥ অস্মাকন্তু বিশিষ্টা যে তান্নিবোধ দ্বিজোত্তম। নায়কা মম সৈন্যস্য সংজ্ঞার্থং তান্ ব্রবীমি তে ॥ ৭ ॥ ভবান্ ভীষ্মশ্চ কর্ণশ্চ কৃপশ্চ সমিতিঞ্জয়ঃ। অশ্বত্থামা বিকর্ণশ্চ সৌমদত্তির্জ্জয়দ্রথঃ ॥ ৮ ॥ অন্যে চ বহবঃ শূরা মদর্থে ত্যক্তজীবিতাঃ। নানাশস্ত্রপ্রহরণাঃ সর্ব্বে যুদ্ধবিশারদাঃ ॥৯॥ অপর্য্যাপ্তং তদস্মাকং বলং ভীষ্মাভিরক্ষিতম্। পর্য্যাপ্তং ত্বিদমেতেষাং বলং ভীমাভিরক্ষিতম্ ॥ ১০ ॥ অয়নেষু চ সর্ব্বেষু যথাভাগমবস্থিতাঃ। ভীষ্মমেবাভিরক্ষন্তু ভবন্তঃ সর্ব্ব এব হি ॥ ১১ ॥ তস্য সংজনয়ন্ হর্ষং কুরুবৃদ্ধঃ পিতামহঃ। সিংহনাদং বিনদ্যোচ্চৈঃ শঙ্খং দধ্মৌ প্রতাপবান্ ॥ ১২ ॥ ততঃ শঙ্খাশ্চ ভের্য্যশ্চ পণবানকগোমুখাঃ। সহসৈবাভ্যহন্যন্ত স শব্দস্তুমুলোঽভবৎ ॥ ১৩ ॥ ততঃ শ্বেতৈর্হয়ৈর্যুক্তে মহতি স্যন্দনে স্থিতৌ। মাধবঃ পাণ্ডবশ্চৈব দিব্যৌ শঙ্খৌ প্রদধ্মতুঃ ॥ ১৪ ॥ পাঞ্চজন্যং হৃষীকেশো দেবদত্তং ধনঞ্জয়ঃ। পৌণ্ড্রং দধ্মৌ মহাশঙ্খং ভীমকর্ম্মা বৃকোদরঃ ॥ ১৫ ॥ অনন্তবিজয়ং রাজা কুন্তীপুত্রো যুধিষ্ঠিরঃ। নকুলঃ সহদেবশ্চ সুঘোষমণিপুষ্পকৌ ॥ ১৬ ॥ কাশ্যশ্চ পরমেষ্বাসঃ শিখণ্ডী চ মহারথঃ। ধৃষ্টদ্যুম্নো বিরাটশ্চ সাত্যকিশ্চাপরাজিতঃ ॥ ১৭ ॥ দ্রুপদো দ্রৌপদেয়াশ্চ সর্ব্বশঃ পৃথিবীপতে। সৌভদ্রশ্চ মহাবাহুঃ শঙ্খান্ দধ্মুঃ পৃথক্ পৃথক্ ॥ ১৮ ॥ স ঘোষো ধার্ত্তরাষ্ট্রাণাং হৃদয়ানি ব্যদারয়ৎ। নভশ্চ পৃথিবীঞ্চৈব তুমুলোঽভ্যনুনাদয়ন্ ॥১৯॥ অথ ব্যবস্থিতান্ দৃষ্ট্বা ধার্ত্তরাষ্ট্রান্ কপিধ্বজঃ। প্রবৃত্তে শস্ত্রসম্পাতে ধনুরুদ্যম্য পাণ্ডবঃ। হৃষীকেশং তদা বাক্যমিদমাহ মহীপতে ॥২০॥ সেনয়োরুভয়োর্মধ্যে রথং স্থাপয় মেঽচ্যুত ॥ ২১ ॥ যাবদেতান্নিরীক্ষেঽহং যোদ্ধুকামানবস্থিতান্! কৈর্ম্ময়া সহ যোদ্ধব্যমস্মিন্

রণসমুদ্যমে ॥ ২২ ॥ যোৎস্যমানানবেক্ষেঽহং য এতেঽত্র সমাগতাঃ। ধার্ত্তরাষ্ট্রস্য দুর্ব্বুদ্ধের্যুদ্ধে প্রিয়চিকীর্ষবঃ ॥ ২৩ ॥

সঞ্জয় উবাচ। এবমুক্তো হৃষীকেশো গুড়াকেশেন ভারত। সেনয়োরু-ভয়োর্মধ্যে স্থাপয়িত্বা রথোত্তমম্ ॥২৪॥ ভীষ্মদ্রোণপ্রমুখতঃ সর্ব্বেষাঞ্চ মহীক্ষিতাম্॥ উবাচ পার্থ পশ্যৈতান্ সমবেতান্ কুরূনিতি ॥২৫॥ তত্রাপশ্যৎ স্থিতান্ পার্থঃ পিতৃনথ পিতামহান্। আচার্য্যান্মাতুলান্ ভ্রাতৃন্ পুত্রান্ পৌত্রান্ সখীংস্তথা ॥২৬॥ শ্বশুরান্ সুহৃদশ্চৈব সেনয়োরুভয়োরপি। তান্ সমীক্ষ্য স কৌন্তেয়ঃ সর্ব্বান্ বন্ধূনবস্থিতান্। কৃপয়া পরয়াবিষ্টো বিষীদন্নিদমব্রবীৎ ॥২৭॥

অর্জ্জুন উবাচ। দৃষ্টেমান্ স্বজনান্ কৃষ্ণ যুযুৎসূন্ সমবস্থিতান্। সীদন্তি মম গাত্রাণি মুখঞ্চ পরিশুষ্যতি ॥২৮॥ বেপথুশ্চ শরীরে মে রোমহর্ষশ্চ জায়তে। গাণ্ডীবং স্রংসতে হস্তাৎ ত্বক্ চৈব পরিদহ্যতে ॥ ২৯॥ ন চ শক্নোম্যবস্থাতুং ভ্রমতীব চ মে মনঃ। নিমিত্তানি চ পশ্যামি বিপরীতানি কেশব ॥৩০॥ ন চ শ্রেয়োঽনুপশ্যামি হত্বা স্বজনমাহবে। ন কাঙ্ক্ষে বিজয়ং কৃষ্ণ ন চ রাজ্যং সুখানি চ ॥৩১॥ কিং নো রাজ্যেন গোবিন্দ কিং ভোগৈর্জীবিতেন বা। যেষামর্থে কাঙ্ক্ষিতং নো রাজ্যং ভোগাঃ সুখানি চ ॥৩২॥ ত ইমেঽবস্থিতা যুদ্ধে প্রাণাংস্ত্যক্ত্বা ধনানি চ। আচার্য্যাঃ পিতরঃ পুত্রাস্তথৈব চ পিতা-মহাঃ ॥৩৩॥ মাতুলাঃ শ্বশুরাঃ পৌত্রাঃ শ্যালাঃ সম্বন্ধিনস্তথা। এতান্ ন হন্তুমিচ্ছামি ঘ্নতোঽপি মধুসূদন ॥৩৪॥ অপি ত্রৈলোক্যরাজ্যস্য হেতোঃ কিন্নু মহীকৃতে। নিহত্য ধার্ত্তরাষ্ট্রান্ নঃ কা প্রীতিঃ স্যাজ্জনার্দ্দন ॥ ৩৫॥ পাপমেবা-শ্রয়েদস্মান্ হত্বৈতানাততায়িনঃ। তস্মান্নার্হা বয়ং হন্তুং ধার্ত্তরাষ্ট্রান্ সবান্ধ-বান্। স্বজনং হি কথং হত্বা সুখিনঃ স্যাম মাধব ॥ ৩৬॥ যদ্যপ্যেতে ন পশ্যন্তি লোভোপহতচেতসঃ। কুলক্ষয়কৃতং দোষং মিত্রদ্রোহে চ পাতকম্ ॥ ৩৭ ॥ কথং ন জ্ঞেয়মস্মাভিঃ পাপাদস্মান্নিবর্ত্তিতুম্। কুলক্ষয়কৃতং দোষং প্রপশ্যদ্ভি-র্জ্জনার্দ্দন ॥ ৩৮॥ কুলক্ষয়ে প্রণশ্যন্তি কুলধর্ম্মাঃ সনাতনাঃ। ধর্ম্মে নষ্টে কুলং কৃৎস্নমধর্ম্মোঽভিভবত্যুত ॥ ৩৯ ॥ অধর্ম্মাভিভবাৎ কৃষ্ণ প্রদুষ্যন্তি কুলস্ত্রিয়ঃ। স্ত্রীষু দুষ্টাসু বার্ষ্ণেয় জায়তে বর্ণসঙ্করঃ ॥ ৪০ ॥ সঙ্করো নরকায়ৈব কুলঘ্নানাং কুলস্য চ। পতন্তি পিতরো হ্যেষাং লুপ্তপিণ্ডোদকক্রিয়াঃ ॥ ৪১॥ দোষৈরেতৈঃ কুলঘ্নানাং বর্ণসঙ্করকারকৈঃ। উৎসাদ্যন্তে জাতিধর্ম্মাঃ কুলধর্ম্মাশ্চ শাশ্বতাঃ ॥৪২॥ উৎসন্নকুলধর্ম্মাণাং মনুষ্যাণাং জনার্দ্দন। নরকে নিয়তং বাসো ভবতীত্যনু-শুশ্রুম ॥৪৩॥ অহো বত মহৎ পাপং কর্ত্তুং ব্যবসিতা বয়ম্। যদ্রাজ্যসুখলোভেন

হন্তং স্বজনমুদ্যতাঃ ॥৪৪॥ যদি মামপ্রতীকারমশস্ত্রং শস্ত্রপাণয়ঃ। ধার্ত্তরাষ্ট্রা রণে হন্যুস্তন্মে ক্ষেমতরং ভবেৎ ॥ ৪৫ ॥

সঞ্জয় উবাচ। এবমুক্ত্বার্জ্জুনঃ সংখ্যে রথোপস্থ উপাবিশৎ। বিসৃজ্য সশরং চাপং শোকসংবিগ্নমানসঃ ॥ ৪৬ ॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং ভীষ্মপর্ব্বণি শ্রীমদ্ভগবদ্গীতাসূপনিষৎসু ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুন-সংবাদে অর্জ্জুনবিষাদযোগো নাম প্রথমোঽধ্যায়ঃ।

---

## দ্বিতীয়োঽধ্যায়ঃ

সঞ্জয় উবাচ। তং তথা কৃপয়াবিষ্টমশ্রুপূর্ণাকুলেক্ষণম্। বিষীদন্তমিদং বাক্যমুবাচ মধুসূদনঃ ॥ ১ ॥

শ্রীভগবানুবাচ। কুতস্ত্বা কশ্মলমিদং বিষমে সমুপস্থিতম্। অনার্য্যজুষ্ট-মস্বর্গ্যমকীর্ত্তিকরমর্জ্জুন ॥ ২॥ ক্লৈব্যং মা স্ম গমঃ পার্থ নৈতত্ত্বয্যুপপদ্যতে। ক্ষুদ্রং হৃদয়দৌর্ব্বল্যং ত্যক্ত্বোত্তিষ্ঠ পরন্তপ ॥ ৩ ॥

অর্জ্জুন উবাচ। কথং ভীষ্মমহং সংখ্যে দ্রোণঞ্চ মধুসূদন। ইষুভিঃ প্রতি-যোৎস্যামি পূজার্হাবরিসূদন ॥৪॥ গুরূনহত্বা হি মহানুভাবান্, শ্রেয়ো ভোক্তুং ভৈক্ষ্যমপীহ লোকে। হত্বার্থকামাংস্তু গুরূনিহৈব, ভুঞ্জীয় ভোগান্ রুধির প্রদিগ্ধান্ ॥ ৫ ॥ ন চৈতদ্বিদ্মঃ কতরন্নো গরীয়ো, যদ্বা জয়েম যদি বা নো জয়েয়ুঃ। যানেব হত্বা ন জিজীবিষামস্তেঽবস্থিতাঃ প্রমুখে ধার্ত্তরাষ্ট্রাঃ ॥ ৬ ॥ কার্পণ্যদোষোপহতস্বভাবঃ, পৃচ্ছামি ত্বাং ধর্ম্মসংমূঢ়চেতাঃ। যচ্ছ্রেয়ঃ স্যান্নিশ্চিতং ব্রূহি তন্মে, শিষ্যস্তেঽহং শাধি মাং ত্বাং প্রপন্নম্ ॥ ৭॥ ন হি প্রপশ্যামি মমাপনুদ্যাদ্, যচ্ছোকমুচ্ছোষণমিন্দ্রিয়াণাম্। অবাপ্য ভূমাবস-পত্নমৃদ্ধং, রাজ্যং সুরাণামপি চাধিপত্যম্ ॥ ৮ ॥

সঞ্জয় উবাচ। এবমুক্ত্বা হৃষীকেশং গুড়াকেশঃ পরন্তপঃ। ন যোৎস্য-ইতি গোবিন্দমুক্ত্বা তুষ্ণীং বভূব হ ॥ ৯॥ তমুবাচ হৃষীকেশঃ প্রহসন্নিব ভারত। সেনয়োরুভয়োর্ম্মধ্যে বিষীদন্তমিদং বচঃ ॥ ১০ ॥

শ্রীভগবানুবাচ। অশোচ্যানন্বশোচস্ত্বং প্রজ্ঞাবাদাংশ্চ ভাষসে। গতাসূন-গতাসূংশ্চ নানুশোচন্তি পণ্ডিতাঃ ॥ ১১॥ ন ত্বেবাহং জাতু নাসং ন ত্বং নেমে জনাধিপাঃ। ন চৈব ন ভবিষ্যামঃ সর্ব্বে বয়মতঃপরম্ ॥১২॥ দেহিনোঽস্মিন্ যথা দেহে কৌমারং যৌবনং জরা। তথা দেহান্তরপ্রাপ্তির্ধীরস্তত্র ন মুহ্যতি ॥১৩॥

মাত্রাস্পর্শাস্তু কৌন্তেয় শীতোষ্ণসুখদুঃখদাঃ। আগমাপায়িনোঽনিত্যাস্তাং-
স্তিতিক্ষস্ব ভারত ॥ ১৪ ॥ যং হি ন ব্যথয়ন্ত্যেতে পুরুষং পুরুষর্ষভ।
সমদুঃখসুখং ধীরং সোঽমৃতত্বায় কল্পতে ॥১৫॥ নাসতো বিদ্যতে ভাবো নাভাবো
বিদ্যতে সতঃ। উভয়োরপি দৃষ্টোঽন্তস্ত্বনয়োস্তত্ত্বদর্শিভিঃ ॥ ১৬॥ অবিনাশি তু
তদ্বিদ্ধি যেন সর্ব্বমিদং ততম্। বিনাশমব্যয়স্যাস্য ন কশ্চিৎ কর্ত্তুমর্হতি ॥ ১৭॥
অন্তবন্ত ইমে দেহা নিত্যস্যোক্তাঃ শরীরিণঃ। অনাশিনোঽপ্রমেয়স্য তস্মাদ্-
যুধ্যস্ব ভারত ॥ ১৮॥ য এনং বেত্তি হন্তারং যশ্চৈনং মন্যতে হতম্। উভৌ তৌ
ন বিজানীতো নায়ং হন্তি ন হন্যতে ॥ ১৯॥ ন জায়তে ম্রিয়তে বা কদাচিন্নায়ং
ভূত্বা ভবিতা বা ন ভূয়ঃ। অজো নিত্যঃ শাশ্বতোঽয়ং পুরাণো, ন হন্যতে
হন্যমানে শরীরে ॥ ২০॥ বেদাবিনাশিনং নিত্যং য এনমজমব্যয়ম্। কথং স
পুরুষঃ পার্থ কং ঘাতয়তি হন্তি কম্ ॥২১॥ বাসাংসি জীর্ণানি যথা বিহায়, নবানি
গৃহ্ণাতি নরোঽপরাণি। তথা শরীরাণি বিহায় জীর্ণান্যন্যানি সংযাতি নবানি
দেহী ॥ ২২ ॥ নৈনং ছিন্দন্তি শস্ত্রাণি নৈনং দহতি পাবকঃ। ন চৈনং
ক্লেদয়ন্ত্যাপো ন শোষয়তি মারুতঃ ॥ ২৩ ॥ অচ্ছেদ্যোঽয়মদাহ্যোঽয়মক্লেদ্যো-
ঽশোষ্য এব চ। নিত্যঃ সর্ব্বগতঃ স্থাণুরচলোঽয়ং সনাতনঃ ॥ ২৪॥ অব্যক্তো-
ঽয়মচিন্ত্যোঽয়মবিকার্য্যোঽয়মুচ্যতে। তস্মাদেবং বিদিত্বৈনং নানুশোচিতু-
মর্হসি ॥ ২৫॥ অথ চৈনং নিত্যজাতং নিত্যং বা মন্যসে মৃতম্। তথাপি ত্বং
মহাবাহো নৈনং শোচিতুমর্হসি ॥ ২৬ ॥ জাতস্য হি ধ্রুবো মৃত্যুর্ধ্রুবং জন্ম
মৃতস্য চ। তস্মাদপরিহার্য্যেঽর্থে ন ত্বং শোচিতুমর্হসি ॥ ২৭॥ অব্যক্তাদীনি
ভূতানি ব্যক্তমধ্যানি ভারত। অব্যক্তনিধনান্যেব তত্র কা পরিদেবনা ॥ ২৮॥
আশ্চর্য্যবৎ পশ্যতি কশ্চিদেনমাশ্চর্য্যবদ্ বদতি তথৈব চান্যঃ। আশ্চর্য্যবচ্চৈন-
মন্যঃ শৃণোতি, শ্রুত্বাপ্যেনং বেদ ন চৈব কশ্চিৎ ॥ ২৯ ॥ দেহী নিত্যমবধ্যোঽয়ং
দেহে সর্ব্বস্য ভারত। তস্মাৎ সর্ব্বাণি ভূতানি ন ত্বং শোচিতুমর্হসি ॥ ৩০ ॥
স্বধর্ম্মমপি চাবেক্ষ্য ন বিকম্পিতুমর্হসি। ধর্ম্ম্যাদ্ধি যুদ্ধাচ্ছ্রেয়োঽন্যৎ ক্ষত্রিয়স্য
ন বিদ্যতে ॥ ৩১ ॥ যদৃচ্ছয়া চোপপন্নং স্বর্গদ্বারমপাবৃতম্। সুখিনঃ ক্ষত্রিয়াঃ
পার্থ লভন্তে যুদ্ধমীদৃশম্ ॥ ৩২ ॥ অথ চেত্ত্বমিমং ধর্ম্ম্যং সংগ্রামং ন করিষ্যসি।
ততঃ স্বধর্ম্মং কীর্ত্তিঞ্চ হিত্বা পাপমবাপ্স্যসি ॥ ৩৩ ॥ অকীর্ত্তিঞ্চাপি ভূতানি
কথয়িষ্যন্তি তেঽব্যয়াম্। সম্ভাবিতস্য চাকীর্ত্তির্ম্মরণাদতিরিচ্যতে ॥ ৩৪ ॥
ভয়াদ্রণাদুপরতং মংস্যন্তে ত্বাং মহারথাঃ। যেষাঞ্চ ত্বং বহুমতো ভূত্বা যাস্যসি
লাঘবম্ ॥ ৩৫ ॥ অবাচ্যবাদাংশ্চ বহূন্ বদিষ্যন্তি তবাহিতাঃ। নিন্দন্তস্তব সামর্থ্যং

ততো দুঃখতরং নু কিম্ ॥ ৩৬ ॥ হতো বা প্রাপ্স্যসি স্বর্গং জিত্বা বা ভোক্ষ্যসে মহীম্। তস্মাদুত্তিষ্ঠ কৌন্তেয় যুদ্ধায় কৃতনিশ্চয়ঃ ॥ ৩৭ ॥ সুখদুঃখে সমে কৃত্বা লাভালাভৌ জয়াজয়ৌ। ততো যুদ্ধায় যুজ্যস্ব নৈবং পাপমবাপ্স্যসি ॥ ৩৮ ॥ এষা তেঽভিহিতা সাংখ্যে বুদ্ধির্যোগে ত্বিমাং শৃণু। বুদ্ধ্যা যুক্তো যয়া পার্থ কর্ম্মবন্ধং প্রহাস্যসি ॥ ৩৯ ॥ নেহাভিক্রমনাশোঽস্তি প্রত্যবায়ো ন বিদ্যতে। স্বল্পমপ্যস্য ধর্ম্মস্য ত্রায়তে মহতো ভয়াৎ ॥ ৪০ ॥ ব্যবসায়াত্মিকা বুদ্ধিরেকেহ কুরুনন্দন। বহুশাখা হ্যনন্তাশ্চ বুদ্ধয়োঽব্যবসায়িনাম্ ॥ ৪১ ॥ যামিমাং পুষ্পিতাং বাচং প্রবদন্ত্যবিপশ্চিতঃ। বেদবাদরতাঃ পার্থ নান্যদস্তীতিবাদিনঃ ॥৪২॥ কামাত্মানঃ স্বর্গপরা জন্মকর্ম্মফলপ্রদাম্। ক্রিয়াবিশেষবহুলাং ভোগৈশ্বর্য্যগতিং প্রতি ॥ ৪৩ ॥ ভোগৈশ্বর্য্যপ্রসক্তানাং তয়াপহৃতচেতসাম্। ব্যবসায়াত্মিকা বুদ্ধিঃ সমাধৌ ন বিধীয়তে ॥ ৪৪ ॥ ত্রৈগুণ্যবিষয়া বেদা নিস্ত্রৈগুণ্যো ভবার্জ্জুন। নির্দ্বন্দ্বো নিত্যসত্ত্বস্থো নির্যোগক্ষেম আত্মবান্ ॥ ৪৫ ॥ যাবানর্থ উদপানে সর্ব্বতঃ সংপ্লুতোদকে। তাবান্ সর্ব্বেষু বেদেষু ব্রাহ্মণস্য বিজানতঃ ॥ ৪৬ ॥ কর্ম্মণ্যেবাধিকারস্তে মা ফলেষু কদাচন। মা কর্ম্মফলহেতুর্ভূর্মা তে সঙ্গোঽস্ত্বকর্ম্মণি ॥ ৪৭ ॥ যোগস্থঃ কুরু কর্ম্মাণি সঙ্গং ত্যক্ত্বা ধনঞ্জয়। সিদ্ধ্যসিদ্ধ্যোঃ সমো ভূত্বা সমত্বং যোগ উচ্যতে ॥ ৪৮ ॥ দূরেণ হ্যবরং কর্ম্ম বুদ্ধিযোগাদ্ধনঞ্জয়। বুদ্ধৌ শরণমন্বিচ্ছ কৃপণাঃ ফলহেতবঃ ॥ ৪৯ ॥ বুদ্ধিযুক্তো জহাতীহ উভে সুকৃত-দুষ্কৃতে। তস্মাদ্ যোগায় যুজ্যস্ব যোগঃ কর্ম্মসু কৌশলম্ ॥ ৫০ ॥ কর্ম্মজং বুদ্ধিযুক্তা হি ফলং ত্যক্ত্বা মনীষিণঃ। জন্মবন্ধবিনির্ম্মুক্তাঃ পদং গচ্ছন্ত্যনাময়ম্ ॥ ৫১ ॥ যদা তে মোহকলিলং বুদ্ধির্ব্যতিতরিষ্যতি। তদা গন্তাসি নির্ব্বেদং শ্রোতব্যস্য শ্রুতস্য চ ॥ ৫২ ॥ শ্রুতিবিপ্রতিপন্না তে যদা স্থাস্যতি নিশ্চলা। সমাধাবচলা বুদ্ধিস্তদা যোগমবাপ্স্যসি ॥ ৫৩ ॥

অর্জ্জুন উবাচ। স্থিতপ্রজ্ঞস্য কা ভাষা সমাধিস্থস্য কেশব। স্থিতধীঃ কিং প্রভাষেত কিমাসীত ব্রজেত কিম্ ॥ ৫৪

শ্রীভগবানুবাচ। প্রজহাতি যদা কামান্ সর্ব্বান্ পার্থ মনোগতান্। আত্মন্যেবাত্মনা তুষ্টঃ স্থিতপ্রজ্ঞস্তদোচ্যতে ॥ ৫৫॥ দুঃখেষ্বনুদ্বিগ্নমনাঃ সুখেষু বিগতস্পৃহঃ। বীতরাগভয়ক্রোধঃ স্থিতধীর্মুনিরুচ্যতে ॥ ৫৬॥ যঃ সর্ব্বত্রানভিস্নেহস্তত্তৎ প্রাপ্য শুভাশুভম্। নাভিনন্দতি ন দ্বেষ্টি তস্য প্রজ্ঞা প্রতিষ্ঠিতা ॥ ৫৭॥ যদা সংহরতে চায়ং কূর্ম্মোঽঙ্গানীব সর্ব্বশঃ। ইন্দ্রিয়াণীন্দ্রিয়ার্থেভ্যস্তস্য প্রজ্ঞা প্রতিষ্ঠিতা ॥ ৫৮॥ বিষয়া বিনিবর্ত্তন্তে নিরাহারস্য দেহিনঃ। রসবর্জ্জং রসোঽপ্যস্য

পরং দৃষ্ট্বা নিবর্ত্ততে ॥ ৫৯ ॥ যততো হ্যপি কৌন্তেয় পুরুষস্য বিপশ্চিতঃ। ইন্দ্রিয়াণি প্রমাথীনি হরন্তি প্রসভং মনঃ ॥ ৬০॥ তানি সর্ব্বাণি সংযম্য যুক্ত আসীত মৎপরঃ। বশে হি যস্যেন্দ্রিয়াণি তস্য প্রজ্ঞা প্রতিষ্ঠিতা ॥ ৬১॥ ধ্যায়তো বিষয়ান্ পুংসঃ সঙ্গস্তেষূপজায়তে। সঙ্গাৎ সংজায়তে কামঃ কামাৎ ক্রোধোঽভিজায়তে ॥ ৬২ ॥ ক্রোধাদ্ভবতি সম্মোহঃ সম্মোহাৎ স্মৃতিবিভ্রমঃ। স্মৃতিভ্রংশাদ্ বুদ্ধিনাশো বুদ্ধিনাশাৎ প্রণশ্যতি ॥ ৬৩॥ রাগদ্বেষবিমুক্তৈস্তু বিষয়ানিন্দ্রিয়ৈশ্চরন্। আত্মবশ্যৈর্বিধেয়াত্মা প্রসাদমধিগচ্ছতি ॥ ৬৪॥ প্রসাদে সর্ব্বদুঃখানাং হানিরস্যোপজায়তে। প্রসন্নচেতসো হ্যাশু বুদ্ধিঃ পর্য্যবতিষ্ঠতে ॥ ৬৫॥ নাস্তি বুদ্ধিরযুক্তস্য ন চাযুক্তস্য ভাবনা। ন চাভাবয়তঃ শান্তিরশান্তস্য কুতঃ সুখম্ ॥ ৬৬॥ ইন্দ্রিয়াণাং হি চরতাং যন্মনোঽনুবিধীয়তে। তদস্য হরতি প্রজ্ঞাং বায়ুর্নাবমিবাম্ভসি ॥ ৬৭॥ তস্মাদ্ যস্য মহাবাহো নিগৃহীতানি সর্ব্বশঃ। ইন্দ্রিয়াণীন্দ্রিয়ার্থেভ্যস্তস্য প্রজ্ঞা প্রতিষ্ঠিতা ॥ ৬৮॥ যা নিশা সর্ব্বভূতানাং তস্যাং জাগর্ত্তি সংযমী। যস্যাং জাগ্রতি ভূতানি সা নিশা পশ্যতো মুনেঃ ॥ ৬৯॥ আপূর্য্যমাণমচলপ্রতিষ্ঠং, সমুদ্রমাপঃ প্রবিশন্তি যদ্বৎ। তদ্বৎ কামা যং প্রবিশন্তি সর্ব্বে, স শান্তিমাপ্নোতি ন কামকামী ॥ ৭০॥ বিহায় কামান্ যঃ সর্ব্বান্ পুমাংশ্চরতি নিঃস্পৃহঃ ॥ নির্ম্মমো নিরহঙ্কারঃ স শান্তিমধিগচ্ছতি ॥ ৭১॥ এষা ব্রাহ্মী স্থিতিঃ পার্থ নৈনাং প্রাপ্য বিমুহ্যতি। স্থিত্বাস্যামন্তকালেঽপি ব্রহ্মনির্ব্বাণমৃচ্ছতি ॥ ৭২ ॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং শ্রীমদ্‌ভগবদ্গীতাসূপনিষৎসু ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুন-সংবাদে সাংখ্যযোগো নাম দ্বিতীয়োঽধ্যায়ঃ।

---

## তৃতীয়োঽধ্যায়ঃ

অর্জ্জুন উবাচ। জ্যায়সী চেৎ কর্ম্মণস্তে মতা বুদ্ধির্জ্জনার্দ্দন। তৎ কিং কর্ম্মণি ঘোরে মাং নিয়োজয়সি কেশব ॥ ১॥ ব্যামিশ্রেণেব বাক্যেন বুদ্ধিং মোহয়সীব মে। তদেকং বদ নিশ্চিত্য যেন শ্রেয়োঽহমাপ্নুয়াম্ ॥ ২॥

শ্রীভগবানুবাচ। লোকেঽস্মিন্ দ্বিবিধা নিষ্ঠা পুরা প্রোক্তা ময়ানঘ। জ্ঞানযোগেন সাংখ্যানাং কর্ম্মযোগেন যোগিনাম্ ॥ ৩॥ ন কর্ম্মণামনারম্ভান্নৈষ্কর্ম্ম্যং

পুরুষোঽশ্নুতে। ন চ সন্ন্যসনাদেব সিদ্ধিং সমধিগচ্ছতি॥ ৪॥ ন হি কশ্চিৎ ক্ষণমপি জাতু তিষ্ঠত্যকর্ম্মকৃৎ। কার্য্যতে হ্যবশঃ কর্ম্ম সর্ব্বঃ প্রকৃতিজৈর্গুণৈঃ॥৫॥ কর্ম্মেন্দ্রিয়াণি সংযম্য য আস্তে মনসা স্মরন্। ইন্দ্রিয়ার্থান্ বিমূঢ়াত্মা মিথ্যাচারঃ স উচ্যতে॥ ৬॥ যস্ত্বিন্দ্রিয়াণি মনসা নিয়ম্যারভতেঽর্জ্জুন। কর্ম্মেন্দ্রিয়ৈঃ কর্ম্মযোগমসক্তঃ স বিশিষ্যতে॥ ৭॥ নিয়তং কুরু কর্ম্ম ত্বং কর্ম্ম জ্যায়ো হ্যকর্ম্মণঃ। শরীরযাত্রাপি চ তে ন প্রসিধ্যেদকর্ম্মণঃ॥ ৮॥ যজ্ঞার্থাৎ কর্ম্মণোঽন্যত্র লোকোঽয়ং কর্ম্মবন্ধনঃ। তদর্থং কর্ম্ম কৌন্তেয় মুক্তসঙ্গঃ সমাচর॥ ৯॥ সহযজ্ঞাঃ প্রজাঃ সৃষ্ট্বা পুরোবাচ প্রজাপতিঃ। অনেন প্রসবিষ্যধ্বমেষ বোঽস্ত্বিষ্টকামধুক্॥ ১০॥ দেবান্ ভাবয়তানেন তে দেবা ভাবয়ন্তু বঃ। পরস্পরং ভাবয়ন্তঃ শ্রেয়ঃ পরমবাপ্স্যথ॥ ১১॥ ইষ্টান্ ভোগান্ হি বো দেবা দাস্যন্তে যজ্ঞভাবিতাঃ। তৈর্দ্দত্তানপ্রদায়ৈভ্যো যো ভুঙ্‌ক্তে স্তেন এব সঃ॥ ১২॥ যজ্ঞশিষ্টাশিনঃ সন্তো মুচ্যন্তে সর্ব্বকিল্বিষৈঃ। ভুঞ্জতে তে ত্বঘং পাপা যে পচন্ত্যাত্মকারণাৎ॥১৩॥ অন্নাদ্ভবন্তি ভূতানি পর্জ্জন্যাদন্নসম্ভবঃ। যজ্ঞাদ্ভবতি পর্জ্জন্যো যজ্ঞঃ কর্ম্মসমুদ্ভবঃ॥ ১৪॥ কর্ম্ম ব্রহ্মোদ্ভবং বিদ্ধি ব্রহ্মাক্ষরসমুদ্ভবম্। তস্মাৎ সর্ব্বগতং ব্রহ্ম নিত্যং যজ্ঞে প্রতিষ্ঠিতম্॥ ১৫॥ এবং প্রবর্ত্তিতং চক্রং নানুবর্ত্তয়তীহ যঃ। অঘায়ুরিন্দ্রিয়ারামো মোঘং পার্থ স জীবতি॥ ১৬॥ যস্ত্বাত্মরতিরেব স্যাদাত্মতৃপ্তশ্চ মানবঃ। আত্মন্যেব চ সন্তুষ্টস্তস্য কার্য্যং ন বিদ্যতে॥ ১৭॥ নৈব তস্য কৃতেনার্থো নাকৃতেনেহ কশ্চন। ন চাস্য সর্ব্বভূতেষু কশ্চিদর্থব্যপাশ্রয়ঃ॥ ১৮॥ তস্মাদসক্তঃ সততং কার্য্যং কর্ম্ম সমাচর। অসক্তো হ্যাচরন্ কর্ম্ম পরমাপ্নোতি পূরুষঃ॥ ১৯॥ কর্ম্মণৈব হি সংসিদ্ধিমাস্থিতা জনকাদয়ঃ। লোকসংগ্রহমেবাপি সম্পশ্যন্ কর্ত্তুমর্হসি॥ ২০॥ যদ্যদাচরতি শ্রেষ্ঠস্তত্তদেবেতরো জনঃ। স যৎ প্রমাণং কুরুতে লোকস্তদনুবর্ত্ততে॥২১॥ ন মে পার্থাস্তি কর্ত্তব্যং ত্রিষু লোকেষু কিঞ্চন। নানবাপ্তমবাপ্তব্যং বর্ত্ত এব চ কর্ম্মণি॥ ২২॥ যদি হ্যহং ন বর্ত্তেয়ং জাতু কর্ম্মণ্যতন্দ্রিতঃ। মম বর্ত্মানুবর্ত্তন্তে মনুষ্যাঃ পার্থ সর্ব্বশঃ॥ ২৩॥ উৎসীদেয়ুরিমে লোকা ন কুর্য্যাং কর্ম্ম চেদহম্। সঙ্করস্য চ কর্ত্তা স্যামুপহন্যামিমাঃ প্রজাঃ॥ ২৪॥ সক্তাঃ কর্ম্মণ্যবিদ্বাংসো যথা কুর্ব্বন্তি ভারত। কুর্য্যাদ্বিদ্বাংস্তথাসক্তশ্চিকীর্ষুর্লোকসংগ্রহম্॥ ২৫॥ ন বুদ্ধিভেদং জনয়েদজ্ঞানাং কর্ম্মসঙ্গিনাম্। জোষয়েৎ সর্ব্বকর্ম্মাণি বিদ্বান্ যুক্তঃ সমাচরন্॥২৬॥ প্রকৃতেঃ ক্রিয়মাণানি গুণৈঃ কর্ম্মাণি সর্ব্বশঃ। অহঙ্কারবিমূঢ়াত্মা কর্ত্তাহমিতি মন্যতে॥২৭॥ তত্ত্ববিত্তু মহাবাহো গুণকর্ম্মবিভাগয়োঃ।

গুণা গুণেষু বর্ত্তন্ত ইতি মত্বা ন সজ্জতে ॥২৮॥ প্রকৃতেগু'ণসংমূঢ়াঃ সজ্জন্তে গুণকর্ম্মসু। তানকৃৎস্নবিদো মন্দান্ কৃৎস্নবিন্ন বিচালয়েৎ ॥ ২৯॥ ময়ি সর্ব্বাণি কর্ম্মাণি সন্ন্যস্যাধ্যাত্মচেতসা। নিরাশীর্নির্ম্মমো ভূত্বা যুধ্যস্ব বিগতজ্বরঃ ॥ ৩০॥ যে মে মতমিদং নিত্যমনুতিষ্ঠন্তি মানবাঃ। শ্রদ্ধাবন্তোঽনসূয়ন্তো মুচ্যন্তে তেঽপি কর্ম্মভিঃ ॥৩১॥ যে ত্বেতদভ্যসূয়ন্তো নানুতিষ্ঠন্তি মে মতম্। সর্ব্ব-জ্ঞানবিমূঢ়াংস্তান্ বিদ্ধি নষ্টানচেতসঃ ॥ ৩২॥ সদৃশং চেষ্টতে স্বস্যাঃ প্রকৃতের্জ্ঞান-বানপি। প্রকৃতিং যান্তি ভূতানি নিগ্রহঃ কিং করিষ্যতি ॥ ৩৩॥ ইন্দ্রিয়-স্যেন্দ্রিয়স্যার্থে রাগদ্বেষৌ ব্যবস্থিতৌ। তয়োর্ন বশমাগচ্ছেত্তৌ হ্যস্য পরি-পন্থিনৌ ॥ ৩৪॥ শ্রেয়ান্ স্বধর্ম্মো বিগুণঃ পরধর্ম্মাৎ স্বনুষ্ঠিতাৎ। স্বধর্ম্মে নিধনং শ্রেয়ঃ পরধর্ম্মো ভয়াবহঃ ॥ ৩৫॥

অর্জ্জুন উবাচ। অথ কেন প্রযুক্তোঽয়ং পাপঞ্চরতি পূরুষঃ। অনিচ্ছন্নপি বার্ষ্ণেয় বলাদিব নিয়োজিতঃ ॥ ৩৬

শ্রীভগবানুবাচ। কাম এষ ক্রোধ এষ রজোগুণসমুদ্ভবঃ। মহাশনো মহাপাপ্মা বিদ্ধ্যেনমিহ বৈরিণম্ ॥ ৩৭ ॥ ধূমেনাব্রিয়তে বহ্নির্যথাদর্শো মলেন চ। যথোল্বেনাবৃতো গর্ভস্তথা তেনেদমাবৃতম্ ॥ ৩৮ ॥ আবৃতং জ্ঞানমেতেন জ্ঞানিনো নিত্যবৈরিণা। কামরূপেণ কৌন্তেয় দুষ্পূরেণানলেন চ ॥ ৩৯ ॥ ইন্দ্রিয়াণি মনোবুদ্ধিরস্যাধিষ্ঠানমুচ্যতে। এতৈর্বিমোহয়ত্যেষ জ্ঞানমাবৃত্য দেহিনম্ ॥ ৪০ ॥ তস্মাত্ত্বমিন্দ্রিয়াণ্যাদৌ নিয়ম্য ভরতর্ষভ। পাপ্মানং প্রজহি হ্যেনং জ্ঞানবিজ্ঞাননাশনম্ ॥ ৪১ ॥ ইন্দ্রিয়াণি পরাণ্যাহুরিন্দ্রিয়েভ্যঃ পরং মনঃ। মনসস্তু পরা বুদ্ধির্যো বুদ্ধেঃ পরতস্তু সঃ ॥ ৪২ ॥ এবং বুদ্ধেঃ পরং বুদ্ধ্বা সংস্তভ্যাত্মানমাত্মনা। জহি শত্রুং মহাবাহো কামরূপং দুরাসদম্ ॥ ৪৩ ॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং ভীষ্মপর্ব্বণি শ্রীমদ্ভগবদ্গীতাসূপনিষৎসু ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুন-সংবাদে কর্ম্মযোগো নাম তৃতীয়োঽধ্যায়ঃ।

---

## চতুর্থোঽধ্যায়ঃ

শ্রীভগবানুবাচ। ইমং বিবস্বতে যোগং প্রোক্তবানহমব্যয়ম্। বিবস্বান্ মনবে প্রাহ মনুরিক্ষ্বাকবেঽব্রবীৎ ॥ ১ এবং পরম্পরাপ্রাপ্তমিমং রাজর্ষয়ো

বিদুঃ। স কালেনেহ মহতা যোগো নষ্টঃ পরন্তপ ॥২॥ স এবায়ং ময়া তেঽদ্য যোগঃ প্রোক্তঃ পুরাতনঃ। ভক্তোঽসি মে সখা চেতি রহস্যং হ্যেতদুত্তমম্ ॥৩॥

অর্জ্জুন উবাচ। অপরং ভবতো জন্ম পরং জন্ম বিবস্বতঃ। কথমেতদ্বিজানীয়াং ত্বমাদৌ প্রোক্তবানিতি ॥ ৪ ॥

শ্রীভগবানুবাচ। বহূনি মে ব্যতীতানি জন্মানি তব চার্জ্জুন। তান্যহং বেদ সর্ব্বাণি ন ত্বং বেত্থ পরন্তপ ॥ ৫ ॥ অজোঽপি সন্নব্যয়াত্মা ভূতানামীশ্বরোঽপি সন্। প্রকৃতিং স্বামধিষ্ঠায় সম্ভবাম্যাত্মমায়য়া ॥ ৬ ॥ যদা যদা হি ধর্ম্মস্য গ্লানির্ভবতি ভারত। অভ্যুত্থানমধর্ম্মস্য তদাত্মানং সৃজাম্যহম্ ॥ ৭ ॥ পরিত্রাণায় সাধূনাং বিনাশায় চ দুষ্কৃতাম্। ধর্ম্মসংস্থাপনার্থায় সম্ভবামি যুগে যুগে ॥ ৮ ॥ জন্ম কর্ম্ম চ মে দিব্যমেবং যো বেত্তি তত্ত্বতঃ। ত্যক্ত্বা দেহং পুনর্জন্ম নৈতি মামেতি সোঽর্জ্জুন ॥ ৯ ॥ বীতরাগভয়ক্রোধা মন্ময়া মামুপাশ্রিতাঃ। বহবো জ্ঞানতপসা পূতা মদ্ভাবমাগতাঃ ॥ ১০ ॥ যে যথা মাং প্রপদ্যন্তে তাংস্তথৈব ভজাম্যহম্। মম বর্ত্মানুবর্ত্তন্তে মনুষ্যাঃ পার্থ সর্ব্বশঃ ॥ ১১॥ কাঙ্ক্ষন্তঃ কর্ম্মণাং সিদ্ধিং যজন্ত ইহ দেবতাঃ। ক্ষিপ্রং হি মানুষে লোকে সিদ্ধির্ভবতি কর্ম্মজা ॥ ১২ ॥ চাতুর্ব্বর্ণ্যং ময়া সৃষ্টং গুণকর্ম্মবিভাগশঃ। তস্য কর্ত্তারমপি মাং বিদ্ধ্যকর্ত্তারমব্যয়ম্ ॥ ১৩ ॥ ন মাং কর্ম্মাণি লিম্পন্তি ন মে কর্ম্মফলে স্পৃহা। ইতি মাং যোঽভিজানাতি কর্ম্মভির্ন স বধ্যতে ॥ ১৪ ॥ এবং জ্ঞাত্বা কৃতং কর্ম্ম পূর্ব্বৈরপি মুমুক্ষুভিঃ। কুরু কর্ম্মৈব তস্মাত্ত্বং পূর্ব্বৈঃ পূর্ব্বতরং কৃতম্ ॥ ১৫ ॥ কিং কর্ম্ম কিমকর্ম্মেতি কবয়োঽপ্যত্র মোহিতাঃ। তত্তে কর্ম্ম প্রবক্ষ্যামি যজ্জ্ঞাত্বা মোক্ষ্যসেঽশুভাৎ ॥ ১৬ ॥ কর্ম্মণো হ্যপি বোদ্ধব্যং বোদ্ধব্যঞ্চ বিকর্ম্মণঃ। অকর্ম্মণশ্চ বোদ্ধব্যং গহনা কর্ম্মণো গতিঃ ॥ ১৭ ॥ কর্ম্মণ্যকর্ম্ম যঃ পশ্যেদকর্ম্মণি চ কর্ম্ম যঃ। স বুদ্ধিমান্ মনুষ্যেষু স যুক্তঃ কৃৎস্নকর্ম্মকৃৎ ॥ ১৮ ॥ যস্য সর্ব্বে সমারম্ভাঃ কামসঙ্কল্পবর্জ্জিতাঃ। জ্ঞানাগ্নিদগ্ধকর্ম্মাণং তমাহুঃ পণ্ডিতং বুধাঃ ॥ ১৯ ॥ ত্যক্ত্বা কর্ম্মফলাসঙ্গং নিত্যতৃপ্তো নিরাশ্রয়ঃ। কর্ম্মণ্যভিপ্রবৃত্তোঽপি নৈব কিঞ্চিৎ করোতি সঃ ॥ ২০ ॥ নিরাশীর্যতচিত্তাত্মা ত্যক্তসর্ব্বপরিগ্রহঃ। শারীরং কেবলং কর্ম্ম কুর্ব্বন্নাপ্নোতি কিল্বিষম্ ॥ ২১ ॥ যদৃচ্ছালাভসন্তুষ্টো দ্বন্দ্বাতীতো বিমৎসরঃ। সমঃ সিদ্ধাবসিদ্ধৌ চ কৃত্বাপি ন নিবধ্যতে ॥ ২২ ॥ গতসঙ্গস্য মুক্তস্য জ্ঞানাবস্থিতচেতসঃ। যজ্ঞায়াচরতঃ কর্ম্ম সমগ্রং প্রবিলীয়তে ॥ ২৩ ॥ ব্রহ্মার্পণং ব্রহ্ম হবির্ব্রহ্মাগ্নৌ ব্রহ্মণা হুতম্। ব্রহ্মৈব তেন গন্তব্যং ব্রহ্মকর্ম্মসমাধিনা ॥ ২৪ ॥ দৈবমেবাপরে যজ্ঞং

যোগিনঃ পর্য্যুপাসতে। ব্রহ্মাগ্নাবপরে যজ্ঞং যজ্ঞেনৈবোপজুহ্বতি ॥ ২৫ ॥ শ্রোত্রাদীনীন্দ্রিয়াণ্যন্যে সংযমাগ্নিষু জুহ্বতি। শব্দাদীন্ বিষয়ানন্য ইন্দ্রিয়াগ্নিষু জুহ্বতি ॥২৬॥ সর্ব্বাণীন্দ্রিয়কর্ম্মাণি প্রাণকর্ম্মাণি চাপরে। আত্মসংযম-যোগাগ্নৌ জুহ্বতি জ্ঞানদীপিতে ॥ ২৭ ॥ দ্রব্যযজ্ঞাস্তপোযজ্ঞা যোগযজ্ঞাস্তথাপরে। স্বাধ্যায়জ্ঞানযজ্ঞাশ্চ যতয়ঃ সংশিতব্রতাঃ ॥ ২৮ ॥ অপানে জুহ্বতি প্রাণং প্রাণেঽপানং তথাপরে। প্রাণাপানগতী রুদ্ধ্বা প্রাণায়ামপরায়ণাঃ। অপরে নিয়তাহারাঃ প্রাণান্ প্রাণেষু জুহ্বতি ॥ ২৯ ॥ সর্ব্বেঽপ্যেতে যজ্ঞবিদো যজ্ঞ-ক্ষয়িতকল্মষাঃ। যজ্ঞশিষ্টামৃতভুজো যান্তি ব্রহ্ম সনাতনম্ ॥ ৩০ ॥ নায়ং লোকো-ঽস্ত্যযজ্ঞস্য কুতোঽন্যঃ কুরুসত্তম ॥ ৩১ ॥ এবং বহুবিধা যজ্ঞা বিততা ব্রহ্মণো মুখে। কর্ম্মজান্ বিদ্ধি তান্ সর্ব্বানেবং জ্ঞাত্বা বিমোক্ষ্যসে ॥ ৩২ ॥ শ্রেয়ান্ দ্রব্যময়াদ্ যজ্ঞাজ্ জ্ঞানযজ্ঞঃ পরন্তপ। সর্ব্বং কর্ম্মাখিলং পার্থ জ্ঞানে পরি-সমাপ্যতে ॥ ৩৩ ॥ তদ্বিদ্ধি প্রণিপাতেন পরিপ্রশ্নেন সেবয়া। উপদেক্ষ্যন্তি তে জ্ঞানং জ্ঞানিনস্তত্ত্বদর্শিনঃ ॥ ৩৪ ॥ যজ্ জ্ঞাত্বা ন পুনর্ম্মোহমেবং যাস্যসি পাণ্ডব। যেন ভূতান্যশেষেণ দ্রক্ষ্যস্যাত্মন্যথো ময়ি ॥ ৩৫ ॥ অপি চেদসি পাপেভ্যঃ সর্ব্বেভ্যঃ পাপকৃত্তমঃ। সর্ব্বং জ্ঞানপ্লবেনৈব বৃজিনং সন্তরিষ্যসি ॥ ৩৬ ॥ যথৈধাংসি সমিদ্ধোঽগ্নির্ভস্মসাৎ কুরুতেঽর্জ্জুন। জ্ঞানাগ্নিঃ সর্ব্বকর্ম্মাণি ভস্মসাৎ কুরুতে তথা ॥ ৩৭ ॥ ন হি জ্ঞানেন সদৃশং পবিত্রমিহ বিদ্যতে। তৎ স্বয়ং যোগসংসিদ্ধঃ কালেনাত্মনি বিন্দতি ॥ ৩৮ ॥ শ্রদ্ধাবান্ লভতে জ্ঞানং তৎপরঃ সংযতেন্দ্রিয়ঃ। জ্ঞানং লব্ধ্বা পরাং শান্তিমচিরেণাধিগচ্ছতি ॥ ৩৯ ॥ অজ্ঞশ্চা-শ্রদ্দধানশ্চ সংশয়াত্মা বিনশ্যতি। নায়ং লোকোঽস্তি ন পরো ন সুখং সংশয়াত্মনঃ ॥ ৪০ ॥ যোগসন্ন্যস্তকর্ম্মাণং জ্ঞানসঞ্ছিন্নসংশয়ম্। আত্মবন্তং ন কর্ম্মাণি নিবধ্নন্তি ধনঞ্জয় ॥ ৪১ ॥ তস্মাদজ্ঞানসম্ভূতং হৃৎস্থং জ্ঞানাসিনাত্মনঃ। ছিত্ত্বৈনং সংশয়ং যোগমাতিষ্ঠোত্তিষ্ঠ ভারত ॥ ৪২ ॥

ইতি মহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং ভীষ্মপর্ব্বণি শ্রীমদ্ভগবদ্গীতাসূপনিষৎসু ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুন-সংবাদে জ্ঞানবিভাগযোগো নাম চতুর্থোঽধ্যায়ঃ ॥ ৪ ।

## পঞ্চমোঽধ্যায়ঃ

অর্জ্জুন উবাচ। সন্ন্যাসং কর্ম্মণাং কৃষ্ণ পুনর্যোগঞ্চ শংসসি। যচ্ছ্রেয় এতয়োরেকং তন্মে ব্রূহি সুনিশ্চিতম্ ॥ ১॥

শ্রীভগবানুবাচ। সন্ন্যাসঃ কর্ম্মযোগশ্চ নিঃশ্রেয়সকরাবুভৌ। তয়োস্তু কর্ম্মসন্ন্যাসাৎ কর্ম্মযোগো বিশিষ্যতে ॥ ২ ॥ জ্ঞেয়ঃ স নিত্যসন্ন্যাসী যো ন দ্বেষ্টি ন কাঙ্ক্ষতি। নির্দ্বন্দ্বো হি মহাবাহো সুখং বন্ধাৎ প্রমুচ্যতে ॥ ৩ ॥ সাঙ্খ্যযোগৌ পৃথগ্বালাঃ প্রবদন্তি ন পণ্ডিতাঃ। একমপ্যাস্থিতঃ সম্যগু-ভয়োর্বিন্দতে ফলম্ ॥ ৪ ॥ যৎ সাঙ্খ্যৈঃ প্রাপ্যতে স্থানং তদ্ যোগৈরপি গম্যতে। একং সাঙ্খ্যঞ্চ যোগঞ্চ যঃ পশ্যতি স পশ্যতি ॥ ৫ ॥ সন্ন্যাসস্তু মহা-বাহো দুঃখমাপ্তুমযোগতঃ। যোগযুক্তো মুনির্ব্রহ্ম ন চিরেণাধিগচ্ছতি ॥ ৬ ॥ যোগযুক্তো বিশুদ্ধাত্মা বিজিতাত্মা জিতেন্দ্রিয়ঃ। সর্ব্বভূতাত্ম-ভূতাত্মা কুর্ব্বন্নপি ন লিপ্যতে ॥ ৭॥ নৈব কিঞ্চিৎ করোমীতি যুক্তো মন্যেত তত্ত্ববিৎ। পশ্যন্ শৃণ্বন্ স্পৃশন্ জিঘ্রন্নশ্নন্ গচ্ছন্ স্বপন্ শ্বসন্ ॥৮॥ প্রলপন্ বিসৃজন্ গৃহ্নন্নুন্মিষন্নিমিষন্নপি। ইন্দ্রিয়াণীন্দ্রিয়ার্থেষু বর্ত্তন্ত ইতি ধারয়ন্ ॥ ৯ ॥ ব্রহ্মণ্যাধায় কর্ম্মাণি সঙ্গং ত্যক্ত্বা করোতি যঃ। লিপ্যতে ন স পাপেন পদ্মপত্রমিবাম্ভসা ॥১০॥ কায়েন মনসা বুদ্ধ্যা কেবলৈরিন্দ্রিয়ৈরপি। যোগিনঃ কর্ম্ম কুর্ব্বন্তি সঙ্গং ত্যক্ত্বাত্মশুদ্ধয়ে ॥১১॥ যুক্তঃ কর্ম্মফলং ত্যক্ত্বা শান্তিমাপ্নোতি নৈষ্ঠিকীম্। অযুক্তঃ কামকারেণ ফলে সক্তো নিবধ্যতে ॥ ১২ ॥ সর্ব্বকর্ম্মাণি মনসা সন্ন্যস্যাস্তে সুখং বশী। নবদ্বারে পুরে দেহী নৈব কুর্ব্বন্ন কারয়ন্ ॥ ১৩ ॥ ন কর্ত্তৃত্বং ন কর্ম্মাণি লোকস্য সৃজতি প্রভুঃ। ন কর্ম্মফলসংযোগং স্বভাবস্তু প্রবর্ত্ততে ॥ ১৪ ॥ নাদত্তে কস্যচিৎ পাপং ন চৈব সুকৃতং বিভুঃ। অজ্ঞানেনাবৃতং জ্ঞানং তেন মুহ্যন্তি জন্তবঃ ॥ ১৫ ॥ জ্ঞানেন তু তদজ্ঞানং যেষাং নাশিতমাত্মনঃ। তেষা-মাদিত্যবজ্ জ্ঞানং প্রকাশয়তি তৎ পরম্ ॥ ১৬ ॥ তদ্বুদ্ধয়স্তদাত্মানস্তন্নিষ্ঠাস্তৎ-পরায়ণাঃ। গচ্ছন্ত্যপুনরাবৃত্তিং জ্ঞাননির্ধূতকল্মষাঃ ॥ ১৭ ॥ বিদ্যাবিনয়সম্পন্নে ব্রাহ্মণে গবি হস্তিনি। শুনি চৈব শ্বপাকে চ পণ্ডিতাঃ সমদর্শিনঃ ॥ ১৮ ॥ ইহৈব তৈর্জ্জিতঃ সর্গো যেষাং সাম্যে স্থিতং মনঃ। নির্দ্দোষং হি সমং ব্রহ্ম তস্মাদ্ ব্রহ্মণি তে স্থিতাঃ ॥ ১৯ ॥ ন প্রহৃষ্যেৎ প্রিয়ং প্রাপ্য নোদ্বিজেৎ প্রাপ্য চাপ্রিয়ম্। স্থিরবুদ্ধিরসংমূঢ়ো ব্রহ্মবিদ্ ব্রহ্মণি স্থিতঃ ॥ ২০ ॥ বাহ্যস্পর্শেষ্বসক্তাত্মা বিন্দত্যাত্মনি যৎ সুখম্। স ব্রহ্মযোগযুক্তাত্মা সুখমক্ষয়মশ্নুতে ॥ ২১ ॥ যে হি সংস্পর্শজা ভোগা দুঃখযোনয় এব তে। আদ্যন্তবন্তঃ কৌন্তেয় ন তেষু রমতে

বুধঃ ॥ ২২ ॥ শক্নোতীহৈব যঃ সোঢ়ুং প্রাক্ শরীরবিমোক্ষণাৎ। কামক্রোধোদ্ভবং বেগং স যুক্তঃ স সুখী নরঃ ॥২৩॥ যোঽন্তঃসুখোঽন্তরারামস্তথান্তর্জ্যোতিরেব যঃ। স যোগী ব্রহ্মনির্ব্বাণং ব্রহ্মভূতোঽধিগচ্ছতি ॥ ২৪ ॥ লভন্তে ব্রহ্মনির্ব্বাণমৃষয়ঃ ক্ষীণকল্মষাঃ। ছিন্নদ্বৈধা যতাত্মানঃ সর্ব্বভূতহিতে রতাঃ ॥২৫॥ কামক্রোধবিযুক্তানাং যতীনাং যতচেতসাম্। অভিতো ব্রহ্মনির্ব্বাণং বর্ত্ততে বিদিতাত্মনাম্ ॥ ২৬ ॥ স্পর্শান্ কৃত্বা বহির্ব্বাহ্যাংশ্চক্ষুশ্চৈবান্তরে ভ্রুবোঃ। প্রাণাপানৌ সমৌ কৃত্বা নাসাভ্যন্তরচারিণৌ ॥ ২৭ ॥ যতেন্দ্রিয়মনোবুদ্ধির্মুনির্মোক্ষপরায়ণঃ। বিগতেচ্ছাভয়ক্রোধো যঃ সদা মুক্ত এব সঃ ॥ ২৮ ॥ ভোক্তারং যজ্ঞতপসাং সর্ব্বলোকমহেশ্বরম্। সুহৃদং সর্ব্বভূতানাং জ্ঞাত্বা মাং শান্তিমৃচ্ছতি ॥ ২৯ ॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং ভীষ্মপর্ব্বণি শ্রীমদ্ভগবদ্গীতাসূপনিষৎসু ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুনসংবাদে কর্ম্মসন্ন্যাসযোগো নাম পঞ্চমোঽধ্যায়ঃ।

---

## ষষ্ঠোঽধ্যায়ঃ

শ্রীভগবানুবাচ। অনাশ্রিতঃ কর্ম্মফলং কার্য্যং কর্ম্ম করোতি যঃ। স সন্ন্যাসী চ যোগী চ ন নিরগ্নির্ন চাক্রিয়ঃ ॥ ১ ॥ যং সন্ন্যাসমিতি প্রাহুর্যোগং তং বিদ্ধি পাণ্ডব। ন হ্যসন্ন্যস্তসঙ্কল্পো যোগী ভবতি কশ্চন ॥ ২ ॥ আরুরুক্ষোর্মুনের্যোগং কর্ম্ম কারণমুচ্যতে। যোগারূঢ়স্য তস্যৈব শমঃ কারণমুচ্যতে ॥ ৩ ॥ যদা হি নেন্দ্রিয়ার্থেষু ন কর্ম্মস্বনুষজ্জতে। সর্ব্বসঙ্কল্পসন্ন্যাসী যোগারূঢ়স্তদোচ্যতে ॥ ৪ ॥ উদ্ধরেদাত্মনাত্মানং নাত্মানমবসাদয়েৎ। আত্মৈব হ্যাত্মনো বন্ধুরাত্মৈব রিপুরাত্মনঃ ॥ ৫ ॥ বন্ধুরাত্মাত্মনস্তস্য যেনাত্মৈবাত্মনা জিতঃ। অনাত্মনস্তু শত্রুত্বে বর্ত্তেতাত্মৈব শত্রুবৎ ॥ ৬ ॥ জিতাত্মনঃ প্রশান্তস্য পরমাত্মা সমাহিতঃ। শীতোষ্ণসুখদুঃখেষু তথা মানাপমানয়োঃ ॥ ৭ ॥ জ্ঞানবিজ্ঞানতৃপ্তাত্মা কূটস্থো বিজিতেন্দ্রিয়ঃ। যুক্ত ইত্যুচ্যতে যোগী সমলোষ্ট্রাশ্মকাঞ্চনঃ ॥ ৮ ॥ সুহৃন্মিত্রার্য্যুদাসীনমধ্যস্থদ্বেষ্যবন্ধুষু। সাধুষ্বপি চ পাপেষু সমবুদ্ধির্ব্বিশিষ্যতে ॥ ৯ ॥ যোগী যুঞ্জীত সততমাত্মানং রহসি স্থিতঃ। একাকী যতচিত্তাত্মা নিরাশীরপরিগ্রহঃ ॥ ১০ ॥ শুচৌ দেশে প্রতিষ্ঠাপ্য স্থিরমাসনমাত্মনঃ। নাত্যুচ্ছ্রিতং নাতিনীচং চেলাজিনকুশোত্তরম্ ॥ ১১ ॥ তত্রৈকাগ্রং

মনঃ কৃত্বা যতচিত্তেন্দ্রিয়ক্রিয়ঃ। উপবিশ্যাসনে যুঞ্জ্যাদ্ যোগমাত্মবিশুদ্ধয়ে ॥ ১২ ॥ সমং কায়শিরোগ্রীবং ধারয়ন্নচলং স্থিরঃ। সম্প্রেক্ষ্য নাসিকাগ্রং স্বং দিশশ্চানবলোকয়ন্ ॥ ১৩ ॥ প্রশান্তাত্মা বিগতভীর্ব্রহ্মচারিব্রতে স্থিতঃ। মনঃ সংযম্য মচ্চিত্তো যুক্ত আসীত মৎপরঃ ॥ ১৪ ॥ যুঞ্জন্নেবং সদাত্মানং যোগী নিয়তমানসঃ। শান্তিং নির্ব্বাণপরমাং মৎসংস্থামধিগচ্ছতি ॥ ১৫ ॥ নাত্যশ্নতস্তু যোগোঽস্তি ন চৈকান্তমনশ্নতঃ। ন চাতিস্বপ্নশীলস্য জাগ্রতো নৈব চার্জ্জুন ॥ ১৬ ॥ যুক্তাহারবিহারস্য যুক্তচেষ্টস্য কর্ম্মসু। যুক্তস্বপ্নাববোধস্য যোগো ভবতি দুঃখহা ॥ ১৭ ॥ যদা বিনিয়তং চিত্তমাত্মন্যেবাবতিষ্ঠতে। নিস্পৃহঃ সর্ব্বকামেভ্যো যুক্ত ইত্যুচ্যতে তদা ॥ ১৮ ॥ যথা দীপো নিবাতস্থো নেঙ্গতে সোপমা স্মৃতা। যোগিনো যতচিত্তস্য যুঞ্জতো যোগমাত্মনঃ ॥ ১৯ ॥ যত্রোপরমতে চিত্তং নিরুদ্ধং যোগসেবয়া। যত্র চৈবাত্মনাত্মানং পশ্যন্নাত্মনি তুষ্যতি ॥ ২০ ॥ সুখমাত্যন্তিকং যত্তদ্ বুদ্ধিগ্রাহ্যমতীন্দ্রিয়ম্। বেত্তি যত্র ন চৈবায়ং স্থিতশ্চলতি তত্ত্বতঃ ॥ ২১ ॥ যং লব্ধ্বা চাপরং লাভং মন্যতে নাধিকং ততঃ। যস্মিন্ স্থিতো ন দুঃখেন গুরুণাপি বিচাল্যতে ॥ ২২ ॥ তং বিদ্যাদ্ দুঃখসংযোগবিয়োগং যোগসংজ্ঞিতম্। স নিশ্চয়েন যোক্তব্যো যোগোঽনির্ব্বিণ্নচেতসা ॥ ২৩ ॥ সংকল্পপ্রভবান্ কামাংস্ত্যক্ত্বা সর্ব্বানশেষতঃ। মনসৈবেন্দ্রিয়গ্রামং বিনিয়ম্য সমন্ততঃ ॥ ২৪ ॥ শনৈঃ শনৈরুপরমেদ্ বুদ্ধ্যা ধৃতিগৃহীতয়া। আত্মসংস্থং মনঃ কৃত্বা ন কিঞ্চিদপি চিন্তয়েৎ ॥ ২৫ ॥ যতো যতো নিশ্চলতি মনশ্চঞ্চলমস্থিরম্। ততস্ততো নিয়ম্যৈতদাত্মন্যেব বশং নয়েৎ ॥ ২৬ ॥ প্রশান্তমনসং হ্যেনং যোগিনং সুখমুত্তমম্। উপৈতি শান্তরজসং ব্রহ্মভূতমকল্মষম্ ॥ ২৭ ॥ যুঞ্জন্নেবং সদাত্মানং যোগী বিগতকল্মষঃ। সুখেন ব্রহ্মসংস্পর্শমত্যন্তং সুখমশ্নুতে ॥ ২৮ ॥ সর্ব্বভূতস্থমাত্মানং সর্ব্বভূতানি চাত্মনি। ঈক্ষতে যোগযুক্তাত্মা সর্ব্বত্র সমদর্শনঃ ॥ ২৯ ॥ যো মাং পশ্যতি সর্ব্বত্র সর্ব্বঞ্চ ময়ি পশ্যতি। তস্যাহং ন প্রণশ্যামি স চ মে ন প্রণশ্যতি ॥ ৩০ ॥ সর্ব্বভূতস্থিতং যো মাং ভজত্যেকত্বমাস্থিতঃ। সর্ব্বথা বর্ত্তমানোঽপি স যোগী ময়ি বর্ত্ততে ॥ ৩১ ॥ আত্মৌপম্যেন সর্ব্বত্র সমং পশ্যতি যোঽর্জ্জুন। সুখং বা যদি বা দুঃখং স যোগী পরমো মতঃ ॥ ৩২ ॥

অর্জ্জুন উবাচ। যোঽয়ং যোগস্ত্বয়া প্রোক্তঃ সাম্যেন মধুসূদন। এতস্যাহং ন পশ্যামি চঞ্চলত্বাৎ স্থিতিং স্থিরাম্ ॥ ৩৩ ॥ চঞ্চলং হি মনঃ কৃষ্ণ প্রমাথি বলবদ্ দৃঢ়ম্। তস্যাহং নিগ্রহং মন্যে বায়োরিব সুদুষ্করম্ ॥ ৩৪ ॥

শ্রীভগবানুবাচ। অসংশয়ং মহাবাহো মনো দুর্নিগ্রহং চলম্। অভ্যাসেন তু কৌন্তেয় বৈরাগ্যেণ চ গৃহ্যতে॥ ৩৫॥ অসংযতাত্মনা যোগো দুষ্প্রাপ ইতি মে মতিঃ। বশ্যাত্মনা তু যততা শক্যোঽবাপ্তুমুপায়তঃ॥ ৩৬॥

অর্জ্জুন উবাচ। অযতিঃ শ্রদ্ধয়োপেতো যোগাচ্চলিতমানসঃ। অপ্রাপ্য যোগসংসিদ্ধিং কাং গতিং কৃষ্ণ গচ্ছতি॥ ৩৭॥ কচ্চিন্নোভয়বিভ্রষ্টশ্ছিন্নাভ্রমিব নশ্যতি। অপ্রতিষ্ঠো মহাবাহো বিমূঢ়ো ব্রহ্মণঃ পথি॥ ৩৮॥ এতন্মে সংশয়ং কৃষ্ণ ছেত্তুমর্হস্যশেষতঃ। ত্বদন্যঃ সংশয়স্যাস্য ছেত্তা ন হ্যুপপদ্যতে॥ ৩৯॥

শ্রীভগবানুবাচ। পার্থ নৈবেহ নামুত্র বিনাশস্তস্য বিদ্যতে। ন হি কল্যাণকৃৎ কশ্চিদ্দুর্গতিং তাত গচ্ছতি॥ ৪০॥ প্রাপ্য পুণ্যকৃতাং লোকানুষিত্বা শাশ্বতীঃ সমাঃ। শুচীনাং শ্রীমতাং গেহে যোগভ্রষ্টোঽভিজায়তে॥ ৪১॥ অথবা যোগিনামেব কুলে ভবতি ধীমতাম্। এতদ্ধি দুর্লভতরং লোকে জন্ম যদীদৃশম্॥ ৪২॥ তত্র তং বুদ্ধিসংযোগং লভতে পৌর্ব্বদেহিকম্। যততে চ ততো ভূয়ঃ সংসিদ্ধৌ কুরুনন্দন॥ ৪৩॥ পূর্ব্বাভ্যাসেন তেনৈব হ্রিয়তে হ্যবশোঽপি সঃ। জিজ্ঞাসুরপি যোগস্য শব্দব্রহ্মাতিবর্ত্ততে॥ ৪৪॥ প্রযত্নাদ্ যতমানস্তু যোগী সংশুদ্ধকিল্বিষঃ। অনেকজন্মসংসিদ্ধস্ততো যাতি পরাং গতিম্॥ ৪৫॥ তপস্বিভ্যোঽধিকো যোগী জ্ঞানিভ্যোঽপি মতোঽধিকঃ। কর্ম্মিভ্যশ্চাধিকো যোগী তস্মাদ্ যোগী ভবার্জ্জুন॥ ৪৬॥ যোগিনামপি সর্ব্বেষাং মদ্গতেনান্তরাত্মনা। শ্রদ্ধাবান্ ভজতে যো মাং স মে যুক্ততমো মতঃ॥ ৪৭॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং ভীষ্মপর্ব্বণি শ্রীমদ্ভগবদ্গীতাসূপনিষৎসু ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুন-সংবাদে অধ্যাত্মযোগো নাম ষষ্ঠোঽধ্যায়ঃ।

---

## সপ্তমোঽধ্যায়ঃ

শ্রীভগবানুবাচ। ময্যাসক্তমনাঃ পার্থ যোগং যুঞ্জন্মদাশ্রয়ঃ। অসংশয়ং সমগ্রং মাং যথা জ্ঞাস্যসি তচ্ছৃণু॥ ১॥ জ্ঞানং তেঽহং সবিজ্ঞানমিদং বক্ষ্যাম্যশেষতঃ। যজ্জ্ঞাত্বা নেহ ভূয়োঽন্যজ্জ্ঞাতব্যমবশিষ্যতে॥ ২॥ মনুষ্যাণাং সহস্রেষু কশ্চিদ্ যততি সিদ্ধয়ে। যততামপি সিদ্ধানাং কশ্চিন্মাং বেত্তি তত্ত্বতঃ॥ ৩॥ ভূমিরাপোঽনলো বায়ুঃ খং মনো বুদ্ধিরেব চ। অহঙ্কার ইতীয়ং মে ভিন্না প্রকৃতিরষ্টধা॥ ৪॥ অপরেয়মিতস্ত্বন্যাং প্রকৃতিং বিদ্ধি মে

পরাম্। জীবভূতাং মহাবাহো যয়েদং ধার্য্যতে জগৎ॥ ৫॥ এতদ্‌যোনীনি ভূতানি সর্ব্বাণীত্যুপধারয়। অহং কৃৎস্নস্য জগতঃ প্রভবঃ প্রলয়স্তথা॥ ৬॥ মত্তঃ পরতরং নান্যৎ কিঞ্চিদস্তি ধনঞ্জয়। ময়ি সর্ব্বমিদং প্রোতং সূত্রে মণিগণা ইব॥ ৭॥ রসোঽহমপ্সু কৌন্তেয় প্রভাস্মি শশিসূর্য্যয়োঃ। প্রণবঃ সর্ব্ববেদেষু শব্দঃ খে পৌরুষং নৃষু॥ ৮॥ পুণ্যো গন্ধঃ পৃথিব্যাঞ্চ তেজশ্চাস্মি বিভাবসৌ। জীবনং সর্ব্বভূতেষু তপশ্চাস্মি তপস্বিষু॥ ৯॥ বীজং মাং সর্ব্বভূতানাং বিদ্ধি পার্থ সনাতনম্। বুদ্ধির্বুদ্ধিমতামস্মি তেজস্তেজস্বিনামহম্॥ ১০॥ বলং বলবতামস্মি কামরাগবিবর্জ্জিতম্। ধর্ম্মাবিরুদ্ধো ভূতেষু কামোঽস্মি ভরতর্ষভ॥ ১১॥ যে চৈব সাত্ত্বিকা ভাবা রাজসাস্তামসাশ্চ যে। মত্ত এবেতি তান্ বিদ্ধি ন ত্বহং তেষু তে ময়ি॥ ১২॥ ত্রিভির্গুণময়ৈর্ভাবৈরেভিঃ সর্ব্বমিদং জগৎ। মোহিতং নাভিজানাতি মামেভ্যঃ পরমব্যয়ম্॥ ১৩॥ দৈবী হ্যেষা গুণময়ী মম মায়া দুরত্যয়া। মামেব যে প্রপদ্যন্তে মায়ামেতাং তরন্তি তে॥ ১৪॥ ন মাং দুষ্কৃতিনো মূঢ়াঃ প্রপদ্যন্তে নরাধমাঃ। মায়য়াপহৃতজ্ঞানা আসুরং ভাবমাশ্রিতাঃ॥ ১৫॥ চতুর্ব্বিধা ভজন্তে মাং জনাঃ সুকৃতিনোঽর্জ্জুন। আর্ত্তো জিজ্ঞাসুরর্থার্থী জ্ঞানী চ ভরতর্ষভ॥১৬॥ তেষাং জ্ঞানী নিত্যযুক্ত একভক্তির্বিশিষ্যতে। প্রিয়ো হি জ্ঞানিনোঽত্যর্থমহং স চ মম প্রিয়ঃ॥ ১৭॥ উদারাঃ সর্ব্ব এবৈতে জ্ঞানী ত্বাত্মৈব মে মতম্। আস্থিতঃ স হি যুক্তাত্মা মামেবানুত্তমাং গতিম্॥ ১৮॥ বহূনাং জন্মনামন্তে জ্ঞানবান্ মাং প্রপদ্যতে। বাসুদেবঃ সর্ব্বমিতি স মহাত্মা সুদুর্ল্লভঃ॥ ১৯॥ কামৈস্তৈস্তৈর্হৃতজ্ঞানাঃ প্রপদ্যন্তেঽন্যদেবতাঃ। তং তং নিয়মমাস্থায় প্রকৃত্যা নিয়তাঃ স্বয়া॥ ২০॥ যো যো যাং যাং তনুং ভক্তঃ শ্রদ্ধয়ার্চ্চিতুমিচ্ছতি। তস্য তস্যাচলাং শ্রদ্ধাং তামেব বিদধাম্যহম্॥ ২১॥ স তয়া শ্রদ্ধয়া যুক্তস্তস্যারাধনমীহতে। লভতে চ ততঃ কামান্মদৈব বিহিতান্ হি তান্॥ ২২॥ অন্তবত্তু ফলং তেষাং তদ্ভবত্যল্পমেধসাম্। দেবান্ দেবযজো যান্তি মদ্ভক্তা যান্তি মামপি॥ ২৩॥ অব্যক্তং ব্যক্তিমাপন্নং মন্যন্তে মামবুদ্ধয়ঃ। পরং ভাবমজানন্তো মমাব্যয়মনুত্তমম্॥ ২৪॥ নাহং প্রকাশঃ সর্ব্বস্য যোগমায়াসমাবৃতঃ। মূঢ়োঽয়ং নাভিজানাতি লোকো মামজমব্যয়ম্॥ ২৫॥ বেদাহং সমতীতানি বর্ত্তমানানি চার্জ্জুন। ভবিষ্যাণি চ ভূতানি মান্তু বেদ ন কশ্চন॥ ২৬॥ ইচ্ছাদ্বেষসমুত্থেন দ্বন্দ্বমোহেন ভারত। সর্ব্বভূতানি সম্মোহং সর্গে যান্তি পরন্তপ॥ ২৭॥ যেষাং ত্বন্তগতং পাপং জনানাং

পুণ্যকর্ম্মণাম্। তে দ্বন্দ্বমোহনির্ম্মুক্তা ভজন্তে মাং দৃঢ়ব্রতাঃ॥ ২৮॥ জরা-মরণমোক্ষায় মামাশ্রিত্য যতন্তি যে। তে ব্রহ্ম তদ্বিদুঃ কৃৎস্নমধ্যাত্মং কর্ম্ম চাখিলম্॥ ২৯॥ সাধিভূতাধিদৈবং মাং সাধিযজ্ঞঞ্চ যে বিদুঃ। প্রয়াণ-কালেঽপি চ মাং তে বিদুর্যুক্তচেতসঃ॥ ৩০॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং ভীষ্মপর্ব্বণি শ্রীমদ্ভগবদ্গীতাসূপনিষৎসু ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুন-সংবাদে জ্ঞানযোগো নাম সপ্তমোঽধ্যায়ঃ।

---

## অষ্টমোঽধ্যায়ঃ

অর্জ্জুন উবাচ। কিন্তদ্ ব্রহ্ম কিমধ্যাত্মং কিং কর্ম্ম পুরুষোত্তম। অধি-ভূতঞ্চ কিং প্রোক্তমধিদৈবং কিমুচ্যতে॥ ১॥ অধিযজ্ঞঃ কথং কোঽত্র দেহেঽস্মিন্মধুসূদন। প্রয়াণকালে চ কথং জ্ঞেয়োঽসি নিয়তাত্মভিঃ॥ ২॥

ভগবানুবাচ। অক্ষরং পরমং ব্রহ্ম স্বভাবোঽধ্যাত্মমুচ্যতে। ভূত-ভাবোদ্ভবকরো বিসর্গঃ কর্ম্মসংজ্ঞিতঃ॥ ৩॥ অধিভূতং ক্ষরো ভাবঃ পুরু-ষশ্চাধিদৈবতম্। অধিযজ্ঞোঽহমেবাত্র দেহে দেহভৃতাংবর॥ ৪॥ অন্ত-কালে চ মামেব স্মরন্ মুক্ত্বা কলেবরম্। যঃ প্রয়াতি স মদ্ভাবং যাতি নাস্ত্যত্র সংশয়ঃ॥ ৫॥ যং যং বাপি স্মরন্ ভাবং ত্যজত্যন্তে কলেবরম্। তং তমেবৈতি কৌন্তেয় সদা তদ্ভাবভাবিতঃ॥ ৬॥ তস্মাৎ সর্ব্বেষু কালেষু মামনুস্মর যুধ্য চ। ময্যর্পিতমনোবুদ্ধির্মামেবৈষ্যস্যসংশয়ঃ॥ ৭॥ অভ্যাস-যোগযুক্তেন চেতসা নান্যগামিনা। পরমং পুরুষং দিব্যং যাতি পার্থানু-চিন্তয়ন্॥ ৮॥ কবিং পুরাণমনুশাসিতারমণোরণীয়াংসমনুস্মরেদ্যঃ॥ সর্ব্বস্য ধাতারমচিন্ত্যরূপমাদিত্যবর্ণং তমসঃ পরস্তাৎ॥ ৯॥ প্রয়াণকালে মনসা-ঽচলেন, ভক্ত্যা যুক্তো যোগবলেন চৈব। ভ্রুবোর্ম্মধ্যে প্রাণমাবেশ্য সম্যক্, স তং পরং পুরুষমুপৈতি দিব্যম্॥ ১০॥ যদক্ষরং বেদবিদো বদন্তি, বিশন্তি যদ্ যতয়ো বীতরাগাঃ। যদিচ্ছন্তো ব্রহ্মচর্য্যং চরন্তি, তত্তে পদং সংগ্রহেণ প্রবক্ষ্যে॥ ১১॥ সর্ব্বদ্বারাণি সংযম্য মনো হৃদি নিরুধ্য চ। মূর্দ্ধ্ন্যাধায়াত্মনঃ প্রাণমাস্থিতো যোগধারণাম্॥ ১২॥ ওমিত্যেকাক্ষরং ব্রহ্ম ব্যাহরন্মামনু-স্মরন্। যঃ প্রয়াতি ত্যজন্ দেহং স যাতি পরমাং গতিম্॥ ১৩॥ অনন্য-চেতাঃ সততং যো মাং স্মরতি নিত্যশঃ। তস্যাহং সুলভঃ পার্থ নিত্যযুক্তস্য

যোগিনঃ ॥ ১৪ ॥ মামুপেত্য পুনর্জ্জন্ম দুঃখালয়মশাশ্বতম্। নাপ্নুবন্তি মহাত্মানঃ সংসিদ্ধিং পরমাং গতাঃ ॥ ১৫ ॥ আব্রহ্মভুবনাল্লোঁকাঃ পুনরাবর্ত্তিনোঽর্জ্জুন। মামুপেত্য তু কৌন্তেয় পুনর্জ্জন্ম ন বিদ্যতে ॥ ১৬ ॥ সহস্রযুগপর্য্যন্তমহর্যদ্ ব্রহ্মণো বিদুঃ। রাত্রিং যুগসহস্রান্তাং তেঽহোরাত্রবিদো জনাঃ ॥ ১৭ ॥ অব্যক্তাদ্ব্যক্তয়ঃ সর্ব্বাঃ প্রভবন্ত্যহরাগমে। রাত্র্যাগমে প্রলীয়ন্তে তত্রৈবাব্যক্তসংজ্ঞকে ॥ ১৮ ॥ ভূতগ্রামঃ স এবায়ং ভূত্বা ভূত্বা প্রলীয়তে। রাত্র্যাগমেঽবশঃ পার্থ প্রভবত্যহরাগমে ॥ ১৯ ॥ পরস্তস্মাত্তু ভাবোঽন্যোঽব্যক্তোঽব্যক্তাৎ সনাতনঃ। যঃ স সর্ব্বেষু ভূতেষু নশ্যৎসু ন বিনশ্যতি ॥ ২০ ॥ অব্যক্তোঽক্ষর ইত্যুক্তস্তমাহুঃ পরমাং গতিম্। যং প্রাপ্য ন নিবর্ত্তন্তে তদ্ধাম পরমং মম ॥ ২১ ॥ পুরুষঃ স পরঃ পার্থ ভক্ত্যা লভ্যস্ত্বনন্যয়া। যস্যান্তঃস্থানি ভূতানি যেন সর্ব্বমিদং ততম্ ॥ ২২ ॥ যত্র কালে ত্বনাবৃত্তিমাবৃত্তিঞ্চৈব যোগিনঃ। প্রয়াতা যান্তি তং কালং বক্ষ্যামি ভরতর্ষভ ॥২৩॥ অগ্নির্জ্জ্যোতিরহঃ শুক্লঃ ষণ্মাসা উত্তরায়ণম্। তত্র প্রয়াতা গচ্ছন্তি ব্রহ্ম ব্রহ্মবিদো জনাঃ ॥ ২৪ ॥ ধূমো রাত্রিস্তথা কৃষ্ণঃ ষণ্মাসা দক্ষিণায়নম্। তত্র চান্দ্রমসং জ্যোতির্যোগী প্রাপ্য নিবর্ত্ততে ॥ ২৫ ॥ শুক্লকৃষ্ণে গতী হ্যেতে জগতঃ শাশ্বতে মতে। একয়া যাত্যনাবৃত্তিমন্যয়াবর্ত্ততে পুনঃ ॥ ২৬ ॥ নৈতে সৃতী পার্থ জানন্ যোগী মুহ্যতি কশ্চন। তস্মাৎ সর্ব্বেষু কালেষু যোগযুক্তো ভবার্জ্জুন ॥ ২৭ ॥ বেদেষু যজ্ঞেষু তপঃসু চৈব, দানেষু যৎ পুণ্যফলং প্রদিষ্টম্। অত্যেতি তৎ সর্ব্বমিদং বিদিত্বা, যোগী পরং স্থানমুপৈতি চাদ্যম্ ॥ ২৮ ॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং ভীষ্মপর্ব্বণি শ্রীমদ্‌ভগবদ্গীতাসূপনিষৎসু ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুন-সংবাদে ব্রহ্মযোগো নাম অষ্টমোঽধ্যায়ঃ।

---

## নবমোঽধ্যায়ঃ

শ্রীভগবানুবাচ। ইদন্তু তে গুহ্যতমং প্রবক্ষ্যাম্যনসূয়বে। জ্ঞানং বিজ্ঞানসহিতং যজ্জ্ঞাত্বা মোক্ষ্যসেঽশুভাৎ ॥ ১ ॥ রাজবিদ্যা রাজগুহ্যং পবিত্রমিদমুত্তমম্। প্রত্যক্ষাবগমং ধর্ম্ম্যং সুসুখং কর্ত্তুমব্যয়ম্ ॥২ ॥ অশ্রদ্দধানাঃ পুরুষা ধর্ম্মস্যাস্য পরন্তপ। অপ্রাপ্য মাং নিবর্ত্তন্তে মৃত্যুসংসারবর্ত্মনি ॥৩ ॥ ময়া ততমিদং সর্ব্বং জগদব্যক্তমূর্ত্তিনা। মৎস্থানি সর্ব্বভূতানি ন চাহং

তেষবস্থিতঃ ॥ ৪ ॥ ন চ মৎস্থানি ভূতানি পশ্য মে যোগমৈশ্বরম্। ভূতভৃন্ন চ ভূতস্থো মমাত্মা ভূতভাবনঃ ॥ ৫ ॥ যথাকাশস্থিতো নিত্যং বায়ুঃ সর্ব্বত্রগো মহান্। তথা সর্ব্বাণি ভূতানি মৎস্থানীত্যুপধারয় ॥ ৬ ॥ সর্ব্বভূতানি কৌন্তেয় প্রকৃতিং যান্তি মামিকাম্। কল্পক্ষয়ে পুনস্তানি কল্পাদৌ বিসৃজাম্যহম্ ॥ ৭ ॥ প্রকৃতিং স্বামবষ্টভ্য বিসৃজামি পুনঃ পুনঃ। ভূতগ্রামমিমং কৃৎস্নমবশং প্রকৃতের্ব্বশাৎ ॥ ৮ ॥ ন চ মাং তানি কর্ম্মাণি নিবধ্নন্তি ধনঞ্জয়। উদাসীনবদাসীনমসক্তং তেষু কর্ম্মসু ॥ ৯ ॥ ময়াধ্যক্ষেণ প্রকৃতিঃ সূয়তে সচরাচরম্। হেতুনানেন কৌন্তেয় জগদ্বিপরিবর্ত্ততে ॥ ১০ ॥ অবজানন্তি মাং মূঢ়া মানুষীং তনুমাশ্রিতম্। পরং ভাবমজানন্তো মম ভূতমহেশ্বরম্ ॥ ১১ ॥ মোঘাশা মোঘকর্ম্মাণো মোঘজ্ঞানা বিচেতসঃ। রাক্ষসীমাসুরীঞ্চৈব প্রকৃতিং মোহিনীং শ্রিতাঃ ॥ ১২ ॥ মহাত্মানস্তু মাং পার্থ দৈবীং প্রকৃতিমাশ্রিতাঃ। ভজন্ত্যনন্যমনসো জ্ঞাত্বা ভূতাদিমব্যয়ম্ ॥ ১৩ ॥ সততং কীর্ত্তয়ন্তো মাং যতন্তশ্চ দৃঢ়ব্রতাঃ। নমস্যন্তশ্চ মাং ভক্ত্যা নিত্যযুক্তা উপাসতে ॥ ১৪ ॥ জ্ঞানযজ্ঞেন চাপ্যন্যে যজন্তো মামুপাসতে। একত্বেন পৃথক্ত্বেন বহুধা বিশ্বতোমুখম্ ॥ ১৫ ॥ অহং ক্রতুরহং যজ্ঞঃ স্বধাঽহমহমৌষধম্। মন্ত্রোঽহমহমেবাজ্যমহমগ্নিরহং হুতম্ ॥ ১৬ ॥ পিতাঽহমস্য জগতো মাতা ধাতা পিতামহঃ। বেদ্যং পবিত্রমোঙ্কার ঋক্ সাম যজুরেব চ ॥ ১৭ ॥ গতির্ভর্ত্তা প্রভুঃ সাক্ষী নিবাসঃ শরণং সুহৃৎ। প্রভবঃ প্রলয়ঃ স্থানং নিধানং বীজমব্যয়ম্ ॥ ১৮ ॥ তপাম্যহমহং বর্ষং নিগৃহ্লাম্যুৎসৃজামি চ। অমৃতঞ্চৈব মৃত্যুশ্চ সদসচ্চাহমর্জ্জুন ॥ ১৯ ॥ ত্রৈবিদ্যা মাং সোমপাঃ পূতপাপা, যজ্ঞৈরিষ্ট্বা স্বর্গতিং প্রার্থয়ন্তে। তে পুণ্যমাসাদ্য সুরেন্দ্রলোকমশ্নন্তি দিব্যান্ দিবি দেবভোগান্ ॥ ২০ ॥ তে তং ভুক্ত্বা স্বর্গলোকং বিশালং, ক্ষীণে পুণ্যে মর্ত্ত্যলোকং বিশন্তি। এবং ত্রয়ীধর্ম্মমনুপ্রপন্না, গতাগতং কামকামা লভন্তে ॥ ২১ ॥ অনন্যাশ্চিন্তয়ন্তো মাং যে জনাঃ পর্য্যুপাসতে। তেষাং নিত্যাভিযুক্তানাং যোগক্ষেমং বহাম্যহম্ ॥ ২২ ॥ যেঽপ্যন্যদেবতাভক্তা যজন্তে শ্রদ্ধয়ান্বিতাঃ। তেঽপি মামেব কৌন্তেয় যজন্ত্যবিধিপূর্ব্বকম্ ॥ ২৩ ॥ অহং হি সর্ব্বযজ্ঞানাং ভোক্তা চ প্রভুরেব চ। ন তু মামভিজানন্তি তত্ত্বেনাতশ্চ্যবন্তি তে ॥ ২৪ ॥ যান্তি দেবব্রতা দেবান্ পিতৃন্ যান্তি পিতৃব্রতাঃ। ভূতানি যান্তি ভূতেজ্যা যান্তি মদ্যাজিনোঽপি মাম্ ॥ ২৫ ॥ পত্রং পুষ্পং ফলং তোয়ং যো মে ভক্ত্যা প্রযচ্ছতি। তদহং ভক্ত্যুপহৃতমশ্নামি

প্রযতাত্মনঃ ॥ ২৬ ॥ যৎ করোষি যদশ্নাসি যজ্জুহোষি দদাসি যৎ। যত্তপস্যসি কৌন্তেয় তৎ কুরুষ মদর্পণম্ ॥ ২৭ ॥ শুভাশুভফলৈরেবং মোক্ষ্যসে কর্ম্মবন্ধনৈঃ। সন্ন্যাসযোগযুক্তাত্মা বিমুক্তো মামুপৈষ্যসি॥ ২৮ ॥ সমোঽহং সর্ব্বভূতেষু ন মে দ্বেষ্যোঽস্তি ন প্রিয়ঃ। যে ভজন্তি তু মাং ভক্ত্যা ময়ি তে তেষু চাপ্যহম্॥ ২৯ ॥ অপি চেৎ সুদুরাচারো ভজতে মামনন্যভাক্। সাধুরেব স মন্তব্যঃ সম্যগ্ব্যবসিতো হি সঃ॥ ৩০ ॥ ক্ষিপ্রং ভবতি ধর্ম্মাত্মা শশ্বচ্ছান্তিং নিগচ্ছতি। কৌন্তেয় প্রতিজানীহি ন মে ভক্তঃ প্রণশ্যতি ॥ ৩১ ॥ মাং হি পার্থ ব্যপাশ্রিত্য যেঽপি স্যুঃ পাপযোনয়ঃ। স্ত্রিয়ো বৈশ্যাস্তথা শূদ্রাস্তেঽপি যান্তি পরাং গতিম্॥ ৩২ ॥ কিং পুনর্ব্রাহ্মণাঃ পুণ্যা ভক্তা রাজর্ষয়স্তথা। অনিত্যমসুখং লোকমিমং প্রাপ্য ভজস্ব মাম্॥ ৩৩ ॥ মন্মনা ভব মদ্ভক্তো মদ্‌যাজী মাং নমস্কুরু। মামেবৈষ্যসি যুক্ত্বৈবমাত্মানং মৎপরায়ণঃ ॥ ৩৪ ॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং ভীষ্মপর্ব্বণি শ্রীমদ্‌ভগবদ্গীতাসূপনিষৎসু ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুন-সংবাদে রাজবিদ্যারাজগুহ্যযোগো নাম নবমোঽধ্যায়ঃ।

---

## দশমোঽধ্যায়ঃ

শ্রীভগবানুবাচ। ভূয় এব মহাবাহো শৃণু মে পরমং বচঃ। যত্তেঽহং প্রীয়মাণায় বক্ষ্যামি হিতকাম্যয়া ॥ ১ ॥ ন মে বিদুঃ সুরগণাঃ প্রভবং ন মহর্ষয়ঃ। অহমাদির্হি দেবানাং মহর্ষীণাঞ্চ সর্ব্বশঃ॥ ২ ॥ যো মামজমনাদিঞ্চ বেত্তি লোকমহেশ্বরম্। অসম্মূঢ়ঃ স মর্ত্ত্যেষু সর্ব্বপাপৈঃ প্রমুচ্যতে ॥ ৩ ॥ বুদ্ধির্জ্ঞান-মসম্মোহঃ ক্ষমা সত্যং দমঃ শমঃ। সুখং দুঃখং ভবোঽভাবো ভয়ঞ্চাভয়-মেব চ ॥ ৪ ॥ অহিংসা সমতা তুষ্টিস্তপো দানং যশোঽযশঃ। ভবন্তি ভাবা ভূতানাং মত্ত এব পৃথগ্বিধাঃ ॥ ৫ ॥ মহর্ষয়ঃ সপ্ত পূর্ব্বে চত্বারো মনবস্তথা। মদ্ভাবা মানসা জাতা যেষাং লোক ইমাঃ প্রজাঃ ॥ ৬ ॥ এতাং বিভূতিং যোগঞ্চ মম যো বেত্তি তত্ত্বতঃ। সোঽবিকম্পেন যোগেন যুজ্যতে নাত্র সংশয়ঃ ॥ ৭ ॥ অহং সর্ব্বস্য প্রভবো মত্তঃ সর্ব্বং প্রবর্ত্ততে। ইতি মত্বা ভজন্তে মাং বুধা ভাবসমন্বিতাঃ ॥ ৮ ॥ মচ্চিত্তা মদ্গতপ্রাণা বোধয়ন্তঃ পরস্পরম্। কথয়ন্তশ্চ মাং নিত্যং তুষ্যন্তি চ রমন্তি চ ॥ ৯ ॥ তেষাং সততযুক্তানাং ভজতাং

প্রীতিপূর্ব্বকম্। দদামি বুদ্ধিযোগং তং যেন মামুপযান্তি তে॥১০॥ তেষামেবানুকম্পার্থমহমজ্ঞানজং তমঃ। নাশয়াম্যাত্মভাবস্থো জ্ঞানদীপেন ভাস্বতা॥ ১১॥

অর্জ্জুন উবাচ। পরং ব্রহ্ম পরং ধাম পবিত্রং পরমং ভবান্। পুরুষং শাশ্বতং দিব্যমাদিদেবমজং বিভুম্॥ ১২॥ আহুস্ত্বামৃষয়ঃ সর্ব্বে দেবর্ষির্নারদস্তথা। অসিতো দেবলো ব্যাসঃ স্বয়ঞ্চৈব ব্রবীষি মে॥ ১৩॥ সর্ব্বমেতদৃতং মন্যে যন্মাং বদসি কেশব। ন হি তে ভগবন্ ব্যক্তিং বিদুর্দ্দেবা ন দানবাঃ॥ ১৪॥ স্বয়মেবাত্মনাত্মানং বেত্থ ত্বং পুরুষোত্তম। ভূতভাবন ভূতেশ দেবদেব জগৎপতে॥ ১৫॥ বক্তুমর্হস্যশেষেণ দিব্যা হ্যাত্মবিভূতয়ঃ। যাভির্বিভূতিভির্লোকানিমাংস্ত্বং ব্যাপ্য তিষ্ঠসি॥ ১৬॥ কথং বিদ্যামহং যোগিংস্ত্বাং সদা পরিচিন্তয়ন্। কেষু কেষু চ ভাবেষু চিন্ত্যোঽসি ভগবন্ময়া॥ ১৭॥ বিস্তরেণাত্মনো যোগং বিভূতিঞ্চ জনার্দ্দন। ভূয়ঃ কথয় তৃপ্তির্হি শৃণ্বতো নাস্তি মেঽমৃতম্॥ ১৮॥

শ্রীভগবানুবাচ। হন্ত তে কথয়িষ্যামি দিব্যা হ্যাত্মবিভূতয়ঃ। প্রাধান্যতঃ কুরুশ্রেষ্ঠ নাস্ত্যন্তো বিস্তরস্য মে॥ ১৯॥ অহমাত্মা গুড়াকেশ সর্ব্বভূতাশয়স্থিতঃ। অহমাদিশ্চ মধ্যঞ্চ ভূতানামন্ত এব চ॥ ২০॥ আদিত্যানামহং বিষ্ণুর্জ্যোতিষাং রবিরংশুমান্। মরীচির্ম্মরুতামস্মি নক্ষত্রাণামহং শশী॥ ২১॥ বেদানাং সামবেদোঽস্মি দেবানামস্মি বাসবঃ। ইন্দ্রিয়াণাং মনশ্চাস্মি ভূতানামস্মি চেতনা॥ ২২॥ রুদ্রাণাং শঙ্করশ্চাস্মি বিত্তেশো যক্ষরক্ষসাম্। বসূনাং পাবকশ্চাস্মি মেরুঃ শিখরিণামহম্॥ ২৩॥ পুরোধসাঞ্চ মুখ্যং মাং বিদ্ধি পার্থ বৃহস্পতিম্। সেনানীনামহং স্কন্দঃ সরসামস্মি সাগরঃ॥ ২৪॥ মহর্ষীণাং ভৃগুরহং গিরামস্ম্যেকমক্ষরম্। যজ্ঞানাং জপযজ্ঞোঽস্মি স্থাবরাণাং হিমালয়ঃ॥ ২৫॥ অশ্বত্থঃ সর্ব্ববৃক্ষাণাং দেবর্ষীণাঞ্চ নারদঃ। গন্ধর্ব্বাণাং চিত্ররথঃ সিদ্ধানাং কপিলো মুনিঃ॥ ২৬॥ উচ্চৈঃশ্রবসমশ্বানাং বিদ্ধি মামমৃতোদ্ভবম্। ঐরাবতং গজেন্দ্রাণাং নরাণাঞ্চ নরাধিপম্॥ ২৭॥ আয়ুধানামহং বজ্রং ধেনূনামস্মি কামধুক্। প্রজনশ্চাস্মি কন্দর্পঃ সর্পাণামস্মি বাসুকিঃ॥ ২৮॥ অনন্তশ্চাস্মি নাগানাং বরুণো যাদসামহম্। পিতৃণামর্য্যমা চাস্মি যমঃ সংযমতামহম্॥ ২৯॥ প্রহ্লাদশ্চাস্মি দৈত্যানাং কালঃ কলয়তামহম্। মৃগাণাঞ্চ মৃগেন্দ্রোঽহং বৈনতেয়শ্চ পক্ষিণাম্॥ ৩০॥ পবনঃ পবতামস্মি রামঃ শস্ত্রভৃতামহম্। ঝষাণাং মকরশ্চাস্মি স্রোতসামস্মি জাহ্নবী॥ ৩১॥ সর্গাণামাদিরন্তশ্চ মধ্যং চৈবাহমর্জ্জুন।

অধ্যাত্মবিদ্যা বিদ্যানাং বাদঃ প্রবদতামহম্ ॥ ৩২ ॥ অক্ষরাণামকারোঽস্মি দ্বন্দ্বঃ সামাসিকস্য চ। অহমেবাক্ষয়ঃ কালো ধাতাঽহং বিশ্বতোমুখঃ ॥ ৩৩ ॥ মৃত্যুঃ সর্ব্বহরশ্চাহমুদ্ভবশ্চ ভবিষ্যতাম্। কীর্ত্তিঃ শ্রীর্ব্বাক্ চ নারীণাং স্মৃতির্ম্মেধা ধৃতিঃ ক্ষমা ॥ ৩৪ ॥ বৃহৎ সাম তথা সাম্নাং গায়ত্রীচ্ছন্দসামহম্। মাসানাং মার্গশীর্ষোঽহমৃতূনাং কুসুমাকরঃ ॥ ৩৫ ॥ দ্যূতং ছলয়তামস্মি তেজস্তেজস্বিনামহম্। জয়োঽস্মি ব্যবসায়োঽস্মি সত্ত্বং সত্ত্ববতামহম্ ॥ ৩৬ ॥ বৃষ্ণীনাং বাসুদেবোঽস্মি পাণ্ডবানাং ধনঞ্জয়ঃ। মুনীনামপ্যহং ব্যাসঃ কবীনামুশনা কবিঃ ॥৩৭॥ দণ্ডো দময়তামস্মি নীতিরস্মি জিগীষতাম্। মৌনং চৈবাস্মি গুহ্যানাং জ্ঞানং জ্ঞানবতামহম্ ॥ ৩৮ ॥ যচ্চাপি সর্ব্বভূতানাং বীজং তদহমর্জ্জুন। ন তদস্তি বিনা যৎ স্যান্ময়া ভূতং চরাচরম্ ॥ ৩৯ ॥ নান্তোঽস্তি মম দিব্যানাং বিভূতীনাং পরন্তপ। এষ তূদ্দেশতঃ প্রোক্তো বিভূতের্ব্বিস্তরো ময়া ॥ ৪০ ॥ যদ্যদ্বিভূতিমৎ সত্ত্বং শ্রীমদূর্জ্জিতমেব বা। তত্তদেবাবগচ্ছ ত্বং মম তেজোঽংশসম্ভবম্ ॥ ৪১ ॥ অথবা বহুনৈতেন কিং জ্ঞাতেন তবার্জ্জুন। বিষ্টভ্যাহমিদং কৃৎস্নমেকাংশেন স্থিতো জগৎ ॥ ৪২ ॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং ভীষ্মপর্ব্বণি শ্রীমদ্‌ভগবদ্‌গীতাসূপনিষৎসু ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুনসংবাদে বিভূতিযোগো নাম দশমোঽধ্যায়ঃ।

---

## একাদশোঽধ্যায়ঃ

অর্জ্জুন উবাচ। মদনুগ্রহায় পরমং গুহ্যমধ্যাত্মসংজ্ঞিতম্। যত্ত্বয়োক্তং বচস্তেন মোহোঽয়ং বিগতো মম ॥ ১ ॥ ভবাপ্যয়ৌ হি ভূতানাং শ্রুতৌ বিস্তরশো ময়া। ত্বত্তঃ কমলপত্রাক্ষ মাহাত্ম্যমপি চাব্যয়ম্ ॥২ ॥ এবমেতদ্‌যথাত্থ ত্বমাত্মানং পরমেশ্বর। দ্রষ্টুমিচ্ছামি তে রূপমৈশ্বরং পুরুষোত্তম ॥ ৩॥ মন্যসে যদি তচ্ছক্যং ময়া দ্রষ্টুমিতি প্রভো। যোগেশ্বর ততো মে ত্বং দর্শয়াত্মানমব্যয়ম্ ॥ ৪ ॥

শ্রীভগবানুবাচ। পশ্য মে পার্থ রূপাণি শতশোঽথ সহস্রশঃ। নানাবিধানি দিব্যানি নানাবর্ণাকৃতীনি চ ॥ ৫ ॥ পশ্যাদিত্যান্ বসূন্ রুদ্রানশ্বিনৌ মরুতস্তথা। বহূন্যদৃষ্টপূর্ব্বাণি পশ্যাশ্চর্য্যাণি ভারত ॥ ৬ ॥ ইহৈকস্থং জগৎ কৃৎস্নং পশ্যাদ্য সচরাচরম্। মম দেহে গুড়াকেশ যচ্চান্যদ্‌দ্রষ্টুমিচ্ছসি ॥ ৭ ॥

ন তু মাং শক্যসে দ্রষ্টুমনেনৈব স্বচক্ষুষা। দিব্যং দদামি তে চক্ষুঃ পশ্য মে যোগমৈশ্বরম্ ॥ ৮ ॥

সঞ্জয় উবাচ। এবমুক্ত্বা ততো রাজন্ মহাযোগেশ্বরো হরিঃ। দর্শয়ামাস পার্থায় পরমং রূপমৈশ্বরম্ ॥ ৯ ॥ অনেকবক্ত্রনয়নমনেকাদ্ভুতদর্শনম্। অনেকদিব্যাভরণং দিব্যানেকোদ্যতায়ুধম্ ॥ ১০ ॥ দিব্যমাল্যাম্বরধরং দিব্যগন্ধানুলেপনম্। সর্ব্বাশ্চর্য্যময়ং দেবমনন্তং বিশ্বতোমুখম্ ॥ ১১ ॥ দিবি সূর্য্যসহস্রস্য ভবেদ্ যুগপদুত্থিতা। যদি ভাঃ সদৃশী সা স্যাদ্ভাসস্তস্য মহাত্মনঃ ॥ ১২ ॥ তত্রৈকস্থং জগৎ কৃৎস্নং প্রবিভক্তমনেকধা। অপশ্যদ্দেবদেবস্য শরীরে পাণ্ডবস্তদা ॥ ১৩ ॥ ততঃ স বিস্ময়াবিষ্টো হৃষ্টরোমা ধনঞ্জয়ঃ। প্রণম্য শিরসা দেবং কৃতাঞ্জলিরভাষত ॥ ১৪ ॥

অর্জ্জুন উবাচ। পশ্যামি দেবাংস্তব দেব দেহে, সর্ব্বাংস্তথা ভূতবিশেষসঙ্ঘান্। ব্রহ্মাণমীশং কমলাসনস্থমৃষীংশ্চ সর্ব্বানুরগাংশ্চ দিব্যান্ ॥ ১৫ ॥ অনেকবাহূদরবক্ত্রনেত্রং, পশ্যামি ত্বাং সর্ব্বতোঽনন্তরূপম্। নান্তং ন মধ্যং ন পুনস্তবাদিং, পশ্যামি বিশ্বেশ্বর বিশ্বরূপ ॥ ১৬ ॥ কিরীটিনং গদিনং চক্রিণঞ্চ, তেজোরাশিং সর্ব্বতো দীপ্তিমন্তম্। পশ্যামি ত্বাং দুর্নিরীক্ষ্যং সমন্তাদ্দীপ্তানলার্কদ্যুতিমপ্রমেয়ম্ ॥১৭॥ ত্বমক্ষরং পরমং বেদিতব্যং, ত্বমস্য বিশ্বস্য পরং নিধানম্। ত্বমব্যয়ঃ শাশ্বতধর্ম্মগোপ্তা, সনাতনস্ত্বং পুরুষো মতো মে ॥১৮॥ অনাদিমধ্যান্তমনন্তবীর্য্যমনন্তবাহুং শশিসূর্য্যনেত্রম্। পশ্যামি ত্বাং দীপ্তহুতাশবক্ত্রং,স্বতেজসা বিশ্বমিদং তপন্তম্ ॥১৯॥ দ্যাবাপৃথিব্যোরিদমন্তরং হি, ব্যাপ্তং ত্বয়ৈকেন দিশশ্চ সর্ব্বাঃ। দৃষ্ট্বাদ্ভুতং রূপমুগ্রং তবেদং, লোকত্রয়ং প্রব্যথিতং মহাত্মন্ ॥২০॥ অমী হি ত্বাং সুরসঙ্ঘা বিশন্তি, কেচিদ্ভীতাঃ প্রাঞ্জলয়ো গৃণন্তি। স্বস্তীত্যুক্ত্বা মহর্ষিসিদ্ধসঙ্ঘাঃ, স্তুবন্তি ত্বাং স্তুতিভিঃ পুষ্কলাভিঃ ॥ ২১ ॥ রুদ্রাদিত্যা বসবো যে চ সাধ্যা, বিশ্বেঽশ্বিনৌ মরুতশ্চোষ্মপাশ্চ। গন্ধর্ব্বযক্ষাসুরসিদ্ধসঙ্ঘা, বীক্ষন্তে ত্বাং বিস্মিতাশ্চৈব সর্ব্বে ॥ ২২ ॥ রূপং মহত্তে বহুবক্ত্রনেত্রং, মহাবাহো বহুবাহূরুপাদম্। বহূদরং বহুদংষ্ট্রাকরালং, দৃষ্ট্বা লোকাঃ প্রব্যথিতাস্তথাহম্ ॥ ২৩ ॥ নভঃস্পৃশং দীপ্তমনেকবর্ণং, ব্যাত্তাননং দীপ্তবিশালনেত্রম্। দৃষ্ট্বা হি ত্বাং প্রব্যথিতান্তরাত্মা, ধৃতিং ন বিন্দামি শমঞ্চ বিষ্ণো ॥ ২৪ ॥ দংষ্ট্রাকরালানি চ তে মুখানি, দৃষ্ট্বৈব কালানলসন্নিভানি। দিশো ন জানে ন লভে চ শর্ম্ম, প্রসীদ দেবেশ জগন্নিবাস ॥ ২৫ ॥ অমী চ ত্বাং ধৃতরাষ্ট্রস্য পুত্রাঃ, সর্ব্বে সহৈবাবনিপালসঙ্ঘৈঃ। ভীষ্মো দ্রোণঃ সূতপুত্রস্তথাসৌ,

সহাস্মদীয়ৈরপি যোধমুখ্যৈঃ ॥ ২৬ ॥ বক্ত্রাণি তে ত্বরমাণা বিশন্তি, দংষ্ট্রা-
করালানি ভয়ানকানি। কেচিদ্বিলগ্না দশনান্তরেষু, সংদৃশ্যন্তে চূর্ণিতৈরুত্ত-
মাঙ্গৈঃ ॥ ২৭ ॥ যথা নদীনাং বহবোঽম্বুবেগাঃ, সমুদ্রমেবাভিমুখা দ্রবন্তি।
তথা তবামী নরলোকবীরা, বিশন্তি বক্ত্রাণ্যভিতো জ্বলন্তি ॥ ২৮ ॥ যথা
প্রদীপ্তং জ্বলনং পতঙ্গা, বিশন্তি নাশায় সমৃদ্ধবেগাঃ। তথৈব নাশায় বিশন্তি
লোকাস্তবাপি বক্ত্রাণি সমৃদ্ধবেগাঃ ॥২৯॥ লেলিহ্যসে গ্রসমানঃ সমন্তা-
ল্লোকান্ সমগ্রান্ বদনৈর্জ্বলদ্ভিঃ। তেজোভিরাপূর্য্য জগৎ সমগ্রং, ভাসস্ত-
বোগ্রাঃ প্রতপন্তি বিষ্ণো ॥ ৩০ ॥ আখ্যাহি মে কো ভবানুগ্ররূপো, নমোঽস্তু
তে দেববর প্রসীদ। বিজ্ঞাতুমিচ্ছামি ভবন্তমাদ্যং, ন হি প্রজানামি তব
প্রবৃত্তিম্ ॥ ৩১ ॥

শ্রীভগবানুবাচ। কালোঽস্মি লোকক্ষয়কৃৎ প্রবৃদ্ধো, লোকান্ সমাহর্ত্তুমিহ
প্রবৃত্তঃ। ঋতেঽপি ত্বাং ন ভবিষ্যন্তি সর্ব্বে, যেঽবস্থিতাঃ প্রত্যনীকেষু
যোধাঃ ॥ ৩২ ॥ তস্মাত্ত্বমুত্তিষ্ঠ যশো লভস্ব, জিত্বা শত্রূন্ ভুঙ্ক্ষ্ব রাজ্যং সমৃ-
দ্ধম্। ময়ৈবৈতে নিহতাঃ পূর্ব্বমেব, নিমিত্তমাত্রং ভব সব্যসাচিন্ ॥ ৩৩ ॥
দ্রোণঞ্চ ভীষ্মঞ্চ জয়দ্রথঞ্চ, কর্ণং তথান্যানপি যোধবীরান্। ময়া হতাংস্ত্বং
জহি মা ব্যথিষ্ঠা, যুধ্যস্ব জেতাসি রণে সপত্নান্ ॥ ৩৪ ॥

সঞ্জয় উবাচ। এতচ্ছ্রুত্বা বচনং কেশবস্য, কৃতাঞ্জলির্বেপমানঃ কিরীটী।
নমস্কৃত্য ভূয় এবাহ কৃষ্ণং, সগদ্গদং ভীতভীতঃ প্রণম্য ॥ ৩৫ ॥

অর্জ্জুন উবাচ। স্থানে হৃষীকেশ তব প্রকীর্ত্ত্যা, জগৎ প্রহৃষ্যত্যনুরজ্যতে চ।
রক্ষাংসি ভীতানি দিশো দ্রবন্তি, সর্ব্বে নমস্যন্তি চ সিদ্ধসঙ্ঘাঃ ॥ ৩৬ ॥ কস্মাচ্চ
তে ন নমেরন্মহাত্মন্, গরীয়সে ব্রহ্মণোঽপ্যাদিকর্ত্রে। অনন্ত দেবেশ জগন্নি-
বাস, ত্বমক্ষরং সদসত্তৎপরং যৎ ॥ ৩৭ ॥ ত্বমাদিদেবঃ পুরুষঃ পুরাণস্ত্বমস্য
বিশ্বস্য পরং নিধানম্। বেত্তাসি বেদ্যঞ্চ পরঞ্চ ধাম, ত্বয়া ততং বিশ্বমনন্ত-
রূপ ॥ ৩৮ ॥ বায়ুর্যমোঽগ্নির্ব্বরুণঃ শশাঙ্কঃ, প্রজাপতিস্ত্বং প্রপিতামহশ্চ।
নমো নমস্তেঽস্তু সহস্রকৃত্বঃ, পুনশ্চ ভূয়োঽপি নমো নমস্তে ॥৩৯॥ নমঃ পুরস্তা-
দথ পৃষ্ঠতস্তে, নমোঽস্তু তে সর্ব্বত এব সর্ব্ব। অনন্তবীর্য্যামিতবিক্রমস্ত্বং, সর্ব্বং
সমাপ্নোষি ততোঽসি সর্ব্বঃ ॥৪০॥ সখেতি মত্বা প্রসভং যদুক্তং, হে কৃষ্ণ হে
যাদব হে সখেতি। অজানতা মহিমানং তবেদং, ময়া প্রমাদাৎ প্রণয়েন
বাপি ॥ ৪১ ॥ যচ্চাবহাসার্থমসৎকৃতোঽসি, বিহারশয্যাসনভোজনেষু।
একোঽথবাপ্যচ্যুত তৎ সমক্ষং, তৎ ক্ষাময়ে ত্বামহমপ্রমেয়ম্ ॥ ৪২ ॥ পিতাসি

লোকস্য চরাচরস্য, ত্বমস্য পূজ্যশ্চ গুরুর্গরীয়ান্। ন ত্বৎসমোঽস্ত্যভ্যধিকঃ কুতোঽন্যো, লোকত্রয়েঽপ্যপ্রতিমপ্রভাবঃ॥ ৪৩॥ তস্মাৎ প্রণম্য প্রণিধায় কায়ং, প্রসাদয়ে ত্বামহমীশমীড্যম্। পিতেব পুত্রস্য সখেব সখ্যুঃ, প্রিয়ঃ প্রিয়ায়ার্হসি দেব সোঢুম্॥ ৪৪॥ অদৃষ্টপূর্ব্বং হৃষিতোঽস্মি দৃষ্ট্বা, ভয়েন চ প্রব্যথিতং মনো মে। তদেব মে দর্শয় দেব রূপং, প্রসীদ দেবেশ জগন্নিবাস॥ ৪৫॥ কিরীটিনং গদিনং চক্রহস্তমিচ্ছামি ত্বাং দ্রষ্টুমহং তথৈব। তেনৈব রূপেণ চতুর্ভুজেন, সহস্রবাহো ভব বিশ্বমূর্ত্তে॥ ৪৬॥

শ্রীভগবানুবাচ। ময়া প্রসন্নেন তবার্জ্জুনেদং, রূপং পরং দর্শিতমাত্মযোগাৎ। তেজোময়ং বিশ্বমনন্তমাদ্যং, যন্মে ত্বদন্যেন ন দৃষ্টপূর্ব্বম্॥ ৪৭॥ ন বেদযজ্ঞাধ্যয়নৈর্ন দানৈর্ন চ ক্রিয়াভির্ন তপোভিরুগ্রৈঃ। এবংরূপঃ শক্য অহং নৃলোকে, দ্রষ্টুং ত্বদন্যেন কুরুপ্রবীর॥ ৪৮॥ মা তে ব্যথা মা চ বিমূঢ়ভাবো, দৃষ্ট্বা রূপং ঘোরমীদৃঙ্‌মমেদম্। ব্যপেতভীঃ প্রীতমনাঃ পুনস্ত্বং, তদেব মে রূপমিদং প্রপশ্য॥ ৪৯॥

সঞ্জয় উবাচ। ইত্যর্জ্জুনং বাসুদেবস্তথোক্ত্বা, স্বকং রূপং দর্শয়ামাস ভূয়ঃ। আশ্বাসয়ামাস চ ভীতমেনং, ভূত্বা পুনঃ সৌম্যবপুর্মহাত্মা॥ ৫০॥

অর্জ্জুন উবাচ। দৃষ্ট্বেদং মানুষং রূপং তব সৌম্যং জনার্দ্দন। ইদানীমস্মি সংবৃত্তঃ সচেতাঃ প্রকৃতিং গতঃ॥ ৫১॥

শ্রীভগবানুবাচ। সুদুর্দ্দর্শমিদং রূপং দৃষ্টবানসি যন্মম। দেবা অপ্যস্য রূপস্য নিত্যং দর্শনকাঙ্ক্ষিণঃ॥ ৫২॥ নাহং বেদৈর্ন তপসা ন দানেন ন চেজ্যয়া। শক্য এবম্বিধো দ্রষ্টুং দৃষ্টবানসি মাং যথা॥ ৫৩॥ ভক্ত্যা ত্বনন্যয়া শক্য অহমেবম্বিধোঽর্জ্জুন। জ্ঞাতুং দ্রষ্টুঞ্চ তত্ত্বেন প্রবেষ্টুঞ্চ পরন্তপ॥ ৫৪॥ মৎকর্ম্মকৃন্মৎপরমো মদ্ভক্তঃ সঙ্গবর্জ্জিতঃ। নির্বৈরঃ সর্ব্বভূতেষু যঃ স মামেতি পাণ্ডব॥ ৫৫॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং ভীষ্মপর্ব্বণি শ্রীকৃষ্ণার্জ্জুনসংবাদে বিশ্বরূপদর্শনং নাম একাদশোঽধ্যায়ঃ।

---

## দ্বাদশোঽধ্যায়ঃ

অর্জ্জুন উবাচ। এবং সততযুক্তা যে ভক্তাস্ত্বাং পর্য্যুপাসতে। যে চাপ্যক্ষরমব্যক্তং তেষাং কে যোগবিত্তমাঃ॥ ১॥

শ্রীভগবানুবাচ। ময্যাবেশ্য মনো যে মাং নিত্যযুক্তা উপাসতে। শ্রদ্ধয়া পরয়োপেতাস্তে মে যুক্ততমা মতাঃ॥ ২॥ যে ত্বক্ষরমনির্দ্দেশ্যমব্যক্তং পর্য্যুপাসতে। সর্ব্বত্রগমচিন্ত্যঞ্চ কূটস্থমচলং ধ্রুবম্॥ ৩॥ সংনিয়ম্যেন্দ্রিয়গ্রামং সর্ব্বত্র সমবুদ্ধয়ঃ। তে প্রাপ্নুবন্তি মামেব সর্ব্বভূতহিতে রতাঃ॥ ৪॥ ক্লেশোঽধিকতরস্তেষামব্যক্তাসক্তচেতসাম্। অব্যক্তা হি গতির্দুঃখং দেহবদ্ভিরবাপ্যতে॥ ৫॥ যে তু সর্ব্বাণি কর্ম্মাণি ময়ি সন্ন্যস্য মৎপরাঃ। অনন্যেনৈব যোগেন মাং ধ্যায়ন্ত উপাসতে॥ ৬॥ তেষামহং সমুদ্ধর্ত্তা মৃত্যুসংসারসাগরাৎ। ভবামি ন চিরাৎ পার্থ ময্যাবেশিতচেতসাম্॥৭॥ ময্যেব মন আধৎস্ব ময়ি বুদ্ধিং নিবেশয়। নিবসিষ্যসি ময্যেব অত ঊর্দ্ধং ন সংশয়ঃ॥ ৮। অথ চিত্তং সমাধাতুং ন শক্নোষি ময়ি স্থিরম্। অভ্যাসযোগেন ততো মামিচ্ছাপ্তুং ধনঞ্জয়॥ ৯॥ অভ্যাসেঽপ্যসমর্থোঽসি মৎকর্ম্মপরমো ভব। মদর্থমপি কর্ম্মাণি কুর্ব্বন্ সিদ্ধিমবাপ্স্যসি॥ ১০॥ অথৈতদপ্যশক্তোঽসি কর্ত্তুং মদ্‌যোগমাশ্রিতঃ। সর্ব্বকর্ম্মফলত্যাগং ততঃ কুরু যতাত্মবান্॥ ১১॥ শ্রেয়ো হি জ্ঞানমভ্যাসাজ্‌জ্ঞানাদ্ধ্যানং বিশিষ্যতে। ধ্যানাৎ কর্ম্মফলত্যাগস্ত্যাগাচ্ছান্তিরনন্তরম্॥ ১২॥ অদ্বেষ্টা সর্ব্বভূতানাং মৈত্রঃ করুণ এব চ। নির্ম্মমো নিরহঙ্কারঃ সমদুঃখসুখঃ ক্ষমী॥ ১৩॥ সন্তুষ্টঃ সততং যোগী যতাত্মা দৃঢ়নিশ্চয়ঃ। ময্যর্পিতমনোবুদ্ধির্যো মদ্‌ভক্তঃ স মে প্রিয়ঃ॥ ১৪॥ যস্মান্নোদ্বিজতে লোকো লোকান্নোদ্বিজতে চ যঃ। হর্ষামর্ষভয়োদ্বেগৈর্ম্মুক্তো যঃ স চ মে প্রিয়ঃ॥ ১৫॥ অনপেক্ষঃ শুচির্দ্দক্ষ উদাসীনো গতব্যথঃ। সর্ব্বারম্ভপরিত্যাগী যো মদ্ভক্তঃ স মে প্রিয়ঃ॥ ১৬॥ যো ন হৃষ্যতি ন দ্বেষ্টি ন শোচতি ন কাঙ্ক্ষতি। শুভাশুভপরিত্যাগী ভক্তিমান্ যঃ স মে প্রিয়ঃ॥ ১৭॥ সমঃ শত্রৌ চ মিত্রে চ তথা মানাপমানয়োঃ। শীতোষ্ণসুখদুঃখেষু সমঃ সঙ্গবিবর্জ্জিতঃ॥ ১৮॥ তুল্যনিন্দাস্তুতির্মৌনী সন্তুষ্টো যেন কেনচিৎ। অনিকেতঃ স্থিরমতির্ভক্তিমান্মে প্রিয়ো নরঃ॥ ১৯॥ যে তু ধর্ম্মামৃতমিদং যথোক্তং পর্য্যুপাসতে। শ্রদ্দধানা মৎপরমা ভক্তাস্তেঽতীব মে প্রিয়াঃ॥ ২০॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং ভীষ্মপর্ব্বণি শ্রীমদ্‌ভগবদ্‌গীতাসূপনিষৎসু ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুনসংবাদে ভক্তিযোগো নাম দ্বাদশোঽধ্যায়ঃ।

## ত্রয়োদশোঽধ্যায়ঃ

( অর্জ্জুন উবাচ। প্রকৃতিং পুরুষঞ্চৈব ক্ষেত্রং ক্ষেত্রজ্ঞমেব চ। এতদ্-বেদিতুমিচ্ছামি জ্ঞানং জ্ঞেয়ঞ্চ কেশব )॥ ১ ॥

শ্রীভগবানুবাচ। ইদং শরীরং কৌন্তেয় ক্ষেত্রমিত্যভিধীয়তে। এতদ্ যো বেত্তি তং প্রাহুঃ ক্ষেত্রজ্ঞ ইতি তদ্বিদঃ ॥ ২ ॥ ক্ষেত্রজ্ঞঞ্চাপি মাং বিদ্ধি সর্ব্ব-ক্ষেত্রেষু ভারত। ক্ষেত্রক্ষেত্রজ্ঞয়োর্জ্ঞানং যত্তজ্ জ্ঞানং মতং মম ॥ ৩ ॥ তৎ ক্ষেত্রং যচ্চ যাদৃক্ চ যদ্‌বিকারি যতশ্চ যৎ। স চ যো যৎপ্রভাবশ্চ তৎ সমাসেন মে শৃণু ॥ ৪ ॥ ঋষিভির্বহুধা গীতং ছন্দোভির্বিবিধৈঃ পৃথক্। ব্রহ্মসূত্রপদৈশ্চৈব হেতুমদ্ভির্বিনিশ্চিতৈঃ ॥ ৫ ॥ মহাভূতান্যহঙ্কারো বুদ্ধিরব্যক্তমেব চ। ইন্দ্রিয়াণি দশৈকঞ্চ পঞ্চ চেন্দ্রিয়গোচরাঃ ॥ ৬ ॥ ইচ্ছা দ্বেষঃ সুখং দুঃখং সঙ্ঘাতশ্চেতনা ধৃতিঃ। এতৎ ক্ষেত্রং সমাসেন সবিকারমুদাহৃতম্ ॥ ৭ ॥ অমানিত্বমদম্ভিত্ব-মহিংসা ক্ষান্তিরার্জবম্। আচার্য্যোপাসনং শৌচং স্থৈর্য্যমাত্মবিনিগ্রহঃ ॥ ৮ ॥ ইন্দ্রিয়ার্থেষু বৈরাগ্যমনহঙ্কার এব চ। জন্মমৃত্যুজরাব্যাধিদুঃখদোষানুদর্শনম্ ॥ ৯ ॥ অসক্তিরনভিষঙ্গঃ পুত্রদারগৃহাদিষু। নিত্যঞ্চ সমচিত্তত্বমিষ্টানিষ্টোপপত্তিষু ॥১০॥ ময়ি চানন্যযোগেন ভক্তিরব্যভিচারিণী। বিবিক্তদেশসেবিত্বমরতির্জ্জনসংসদি ॥১১॥ অধ্যাত্মজ্ঞাননিত্যত্বং তত্ত্বজ্ঞানার্থদর্শনম্। এতজ্ জ্ঞানমিতি প্রোক্তমজ্ঞানং যদতোঽন্যথা ॥ ১২ ॥ জ্ঞেয়ং যত্তৎ প্রবক্ষ্যামি যজ্ জ্ঞাত্বামৃতমশ্নুতে। অনাদিমৎ পরং ব্রহ্ম ন সত্তন্নাসদুচ্যতে ॥ ১৩ ॥ সর্ব্বতঃ পাণিপাদং তৎ সর্ব্বতোঽক্ষিশিরো-মুখম্। সর্ব্বতঃ শ্রুতিমল্লোকে সর্ব্বমাবৃত্য তিষ্ঠতি ॥ ১৪ ॥ সর্ব্বেন্দ্রিয়গুণাভাসং সর্ব্বেন্দ্রিয়বিবর্জ্জিতম্। অসক্তং সর্ব্বভৃচ্চৈব নির্গুণং গুণভোক্তৃ চ ॥ ১৫ ॥ বহিরন্তশ্চ ভূতানামচরং চরমেব চ॥ সূক্ষ্মত্বাত্তদবিজ্ঞেয়ং দূরস্থং চান্তিকে চ তৎ ॥ ১৬ ॥ অবিভক্তঞ্চ ভূতেষু বিভক্তমিব চ স্থিতম্। ভূতভর্তৃ চ তজ্ জ্ঞেয়ং গ্রসিষ্ণু প্রভবিষ্ণু চ ॥ ১৭ ॥ জ্যোতিষামপি তজ্জ্যোতিস্তমসঃ পরমুচ্যতে। জ্ঞানং জ্ঞেয়ং জ্ঞানগম্যং হৃদি সর্ব্বস্য ধিষ্ঠিতম্ (বিষ্ঠিতম্)॥ ১৮ ॥ ইতি ক্ষেত্রং তথা জ্ঞানং জ্ঞেয়ঞ্চোক্তং সমাসতঃ। মদ্ভক্ত এতদ্বিজ্ঞায় মদ্ভাবায়োপপদ্যতে ॥ ১৯ ॥ প্রকৃতিং পুরুষঞ্চৈব বিদ্ধ্যনাদী উভাবপি। বিকারাংশ্চ গুণাংশ্চৈব বিদ্ধি প্রকৃতিসম্ভ-বান্ ॥ ২০ ॥ কার্য্যকারণকর্ত্তৃত্বে হেতুঃ প্রকৃতিরুচ্যতে। পুরুষঃ সুখদুঃখানাং ভোক্তৃত্বে হেতুরুচ্যতে ॥ ২১ ॥ পুরুষঃ প্রকৃতিস্থো হি ভুঙ্‌ক্তে প্রকৃতিজান্ গুণান্। কারণং গুণসঙ্গোঽস্য সদসদ্‌যোনিজন্মসু ॥ ২২ ॥ উপদ্রষ্টানুমন্তা চ ভর্ত্তা ভোক্তা মহেশ্বরঃ। পরমাত্মেতি চাপ্যুক্তো দেহেঽস্মিন্ পুরুষঃ পরঃ ॥ ২৩ ॥

য এবং বেত্তি পুরুষং প্রকৃতিঞ্চ গুণৈঃ সহ। সর্ব্বথা বর্ত্তমানোঽপি ন স ভূয়োঽভিজায়তে ॥ ২৪ ॥ ধ্যানেনাত্মনি পশ্যন্তি কেচিদাত্মানমাত্মনা। অন্যে সাঙ্খ্যেন যোগেন কর্ম্মযোগেন চাপরে ॥ ২৫ ॥ অন্যে ত্বেবমজানন্তঃ শ্রুত্বান্যেভ্য উপাসতে। তেঽপি চাতিতরন্ত্যেব মৃত্যুং শ্রুতিপরায়ণাঃ ॥ ২৬ ॥ যাবৎ সঞ্জায়তে কিঞ্চিৎ সত্ত্বং স্থাবরজঙ্গমম্। ক্ষেত্রক্ষেত্রজ্ঞসংযোগাত্তদ্বিদ্ধি ভরতর্ষভ ॥ ২৭ ॥ সমং সর্ব্বেষু ভূতেষু তিষ্ঠন্তং পরমেশ্বরম্। বিনশ্যৎস্ববিনশ্যন্তং যঃ পশ্যতি স পশ্যতি ॥ ২৮ ॥ সমং পশ্যন্ হি সর্ব্বত্র সমবস্থিতমীশ্বরম্। ন হিনস্ত্যাত্মনাত্মানং ততো যাতি পরাং গতিম্ ॥ ২৯ ॥ প্রকৃত্যৈব চ কর্ম্মাণি ক্রিয়মাণানি সর্ব্বশঃ। যঃ পশ্যতি তথাত্মানমকর্ত্তারং স পশ্যতি ॥ ৩০ ॥ যদা ভূতপৃথগ্ভাবমেকস্থমনুপশ্যতি। তত এব চ বিস্তারং ব্রহ্ম সম্পদ্যতে তদা ॥ ৩১ ॥ অনাদিত্বান্নির্গুণত্বাৎ পরমাত্মায়মব্যয়ঃ। শরীরস্থোঽপি কৌন্তেয় ন করোতি ন লিপ্যতে ॥ ৩২ ॥ যথা সর্ব্বগতং সৌক্ষ্ম্যাদাকাশং নোপলিপ্যতে। সর্ব্বত্রাবস্থিতো দেহে তথাত্মা নোপলিপ্যতে ॥ ৩৩ ॥ যথা প্রকাশয়ত্যেকঃ কৃৎস্নং লোকমিমং রবিঃ। ক্ষেত্রং ক্ষেত্রী তথা কৃৎস্নং প্রকাশয়তি ভারত ॥ ৩৪ ॥ ক্ষেত্রক্ষেত্রজ্ঞয়োরেবমন্তরং জ্ঞানচক্ষুষা। ভূতপ্রকৃতিমোক্ষঞ্চ যে বিদুর্যান্তি তে পরম্ ॥ ৩৫ ॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং ভীষ্মপর্ব্বণি শ্রীমদ্ভগবদ্গীতাসূপনিষৎসু ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুনসংবাদে ক্ষেত্রক্ষেত্রজ্ঞবিভাগযোগো নাম ত্রয়োদশোঽধ্যায়ঃ।

---

## চতুর্দ্দশোঽধ্যায়ঃ

শ্রীভগবানুবাচ। পরং ভূয়ঃ প্রবক্ষ্যামি জ্ঞানানাং জ্ঞানমুত্তমম্। যজ্জ্ঞাত্বা মুনয়ঃ সর্ব্বে পরাং সিদ্ধিমিতো গতাঃ ॥ ১ ॥ ইদং জ্ঞানমুপাশ্রিত্য মম সাধর্ম্ম্যমাগতাঃ। সর্গেঽপি নোপজায়ন্তে প্রলয়ে ন ব্যথন্তি চ ॥ ২ ॥ মম যোনির্মহদ্ব্রহ্ম তস্মিন্ গর্ভং দধাম্যহম্। সম্ভবঃ সর্ব্বভূতানাং ততো ভবতি ভারত ॥ ৩ ॥ সর্ব্বযোনিষু কৌন্তেয় মূর্ত্তয়ঃ সম্ভবন্তি যাঃ। তাসাং ব্রহ্ম মহদ্যোনিরহং বীজপ্রদঃ পিতা ॥ ৪ ॥ সত্ত্বং রজস্তম ইতি গুণাঃ প্রকৃতিসম্ভবাঃ। নিবধ্নন্তি মহাবাহো দেহে দেহিনমব্যয়ম্ ॥ ৫ ॥ তত্র সত্ত্বং নির্ম্মলত্বাৎ প্রকাশকমনাময়ম্। সুখসঙ্গেন বধ্নাতি জ্ঞানসঙ্গেন চানঘ ॥ ৬ ॥ রজো রাগাত্মকং বিদ্ধি তৃষ্ণাসঙ্গসমুদ্ভবম্।

তন্নিবধ্নাতি কৌন্তেয় কর্ম্মসঙ্গেন দেহিনম্॥ ৭॥ তমস্ত্বজ্ঞানজং বিদ্ধি মোহনং সর্ব্বদেহিনাম্। প্রমাদালস্যনিদ্রাভিস্তন্নিবধ্নাতি ভারত॥ ৮॥ সত্ত্বং সুখে সঞ্জয়তি রজঃ কর্ম্মণি ভারত। জ্ঞানমাবৃত্য তু তমঃ প্রমাদে সঞ্জয়ত্যুত॥ ৯॥ রজস্তমশ্চাভিভূয় সত্ত্বং ভবতি ভারত। রজঃ সত্ত্বং তমশ্চৈব তমঃ সত্ত্বং রজস্তথা॥ ১০॥ সর্ব্বদ্বারেষু দেহেঽস্মিন্ প্রকাশ উপজায়তে। জ্ঞানং যদা তদা বিদ্যাদ্বিবৃদ্ধং সত্ত্বমিত্যুত॥ ১১॥ লোভঃ প্রবৃত্তিরারম্ভঃ কর্ম্মণামশমঃ স্পৃহা। রজস্যেতানি জায়ন্তে বিবৃদ্ধে ভরতর্ষভ॥ ১২॥ অপ্রকাশোঽপ্রবৃত্তিশ্চ প্রমাদো মোহ এব চ। তমস্যেতানি জায়ন্তে বিবৃদ্ধে কুরুনন্দন॥ ১৩॥ যদা সত্ত্বে প্রবৃদ্ধে তু প্রলয়ং যাতি দেহভৃৎ। তদোত্তমবিদাং লোকানমলান্ প্রতিপদ্যতে॥ ১৪॥ রজসি প্রলয়ং গত্বা কর্ম্মসঙ্গিষু জায়তে। তথা প্রলীনস্তমসি মূঢ়যোনিষু জায়তে॥ ১৫॥ কর্ম্মণঃ সুকৃতস্যাহুঃ সাত্ত্বিকং নির্ম্মলং ফলম্। রজসস্তু ফলং দুঃখমজ্ঞানং তমসঃ ফলম্॥ ১৬॥ সত্ত্বাৎ সঞ্জায়তে জ্ঞানং রজসো লোভ এব চ। প্রমাদমোহৌ তমসো ভবতোঽজ্ঞানমেব চ॥ ১৭॥ ঊর্দ্ধং গচ্ছন্তি সত্ত্বস্থা মধ্যে তিষ্ঠন্তি রাজসাঃ। জঘন্যগুণবৃত্তিস্থা (বৃত্তস্থা) অধোগচ্ছন্তি তামসাঃ॥ ১৮॥ নান্যং গুণেভ্যঃ কর্ত্তারং যদা দ্রষ্টানুপশ্যতি। গুণেভ্যশ্চ পরং বেত্তি মদ্ভাবং সোঽধিগচ্ছতি॥ ১৯॥ গুণানেতানতীত্য ত্রীন্ দেহী দেহসমুদ্ভবান্। জন্মমৃত্যুজরাদুঃখৈর্বিমুক্তোঽমৃতমশ্নুতে॥ ২০॥

অর্জ্জুন উবাচ। কৈর্লিঙ্গৈস্ত্রীন্ গুণানেতানতীতো ভবতি প্রভো। কিমাচারঃ কথঞ্চৈতাংস্ত্রীন্ গুণানতিবর্ত্ততে॥ ২১॥

শ্রীভগবানুবাচ। প্রকাশঞ্চ প্রবৃত্তিঞ্চ মোহমেব চ পাণ্ডব। ন দ্বেষ্টি সম্প্রবৃত্তানি ন নিবৃত্তানি কাঙ্ক্ষতি॥ ২২॥ উদাসীনবদাসীনো গুণৈর্যো ন বিচাল্যতে। গুণা বর্ত্তন্ত ইত্যেবং যোঽবতিষ্ঠতি নেঙ্গতে॥ ২৩॥ সমদুঃখসুখঃ স্বস্থঃ সমলোষ্ট্রাশ্মকাঞ্চনঃ। তুল্যপ্রিয়াপ্রিয়ো ধীরস্তুল্যনিন্দাত্মসংস্তুতিঃ॥ ২৪॥ মানাপমানয়োস্তুল্যস্তুল্যো মিত্রারিপক্ষয়োঃ। সর্ব্বারম্ভপরিত্যাগী গুণাতীতঃ স উচ্যতে॥ ২৫॥ মাঞ্চ যোঽব্যভিচারেণ ভক্তিযোগেন সেবতে। স গুণান্ সমতীত্যৈতান্ ব্রহ্মভূয়ায় কল্পতে॥ ২৬॥ ব্রহ্মণো হি প্রতিষ্ঠাহমমৃতস্যাব্যয়স্য চ। শাশ্বতস্য চ ধর্ম্মস্য সুখস্যৈকান্তিকস্য চ॥ ২৭॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং ভীষ্মপর্ব্বণি শ্রীমদ্ভগবদ্গীতাসূপনিষৎসু ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুনসংবাদে গুণত্রয়বিভাগযোগো নাম চতুর্দ্দশোঽধ্যায়ঃ।

## পঞ্চদশোঽধ্যায়ঃ

শ্রীভগবানুবাচ। ঊর্দ্ধমূলমধঃশাখমশ্বত্থং প্রাহুরব্যয়ম্। ছন্দাংসি যস্য পর্ণানি যস্তং বেদ স বেদবিৎ ॥ ১ ॥ অধশ্চোর্দ্ধং প্রসৃতাস্তস্য শাখা, গুণপ্রবৃদ্ধা বিষয়প্রবালাঃ। অধশ্চ মূলান্যনুসন্ততানি, কর্ম্মানুবন্ধীনি মনুষ্যলোকে ॥ ২ ॥ ন রূপমস্যেহ তথোপলভ্যতে, নান্তো ন চাদির্ন চ সম্প্রতিষ্ঠা। অশ্বত্থমেনং সুবিরূঢ়মূলমসঙ্গশস্ত্রেণ দৃঢ়েন ছিত্ত্বা ॥ ৩ ॥ ততঃ পদং তৎ পরিমার্গিতব্যং, যস্মিন্ গতা ন নিবর্ত্তন্তি ভূয়ঃ। তমেব চাদ্যং পুরুষং প্রপদ্যে, যতঃ প্রবৃত্তিঃ প্রসৃতা পুরাণী ॥৪॥ নির্ম্মানমোহা জিতসঙ্গদোষা, অধ্যাত্মনিত্যা বিনিবৃত্তকামাঃ। দ্বন্দ্বৈর্বিমুক্তাঃ সুখদুঃখসংজ্ঞৈর্গচ্ছন্ত্যমূঢ়াঃ পদমব্যয়ং তৎ ॥৫॥ ন তদ্ভাসয়তে সূর্য্যো ন শশাঙ্কো ন পাবকঃ। যদ্ গত্বা ন নিবর্ত্তন্তে তদ্ধাম পরমং মম ॥৬॥ মমৈবাংশো জীবলোকে জীবভূতঃ সনাতনঃ। মনঃষষ্ঠানীন্দ্রিয়াণি প্রকৃতিস্থানি কর্ষতি ॥৭॥ শরীরং যদবাপ্নোতি যচ্চাপ্যুৎক্রামতীশ্বরঃ। গৃহীত্বৈতানি সংযাতি বায়ুর্গন্ধানিবাশয়াৎ ॥৮॥ শ্রোত্রং চক্ষুঃ স্পর্শনঞ্চ রসনং ঘ্রাণমেব চ। অধিষ্ঠায় মনশ্চায়ং বিষয়ানুপসেবতে ॥৯॥ উৎক্রামন্তং স্থিতং বাপি ভুঞ্জানং বা গুণান্বিতম্। বিমূঢ়া নানুপশ্যন্তি পশ্যন্তি জ্ঞানচক্ষুষঃ ॥১০॥ যতন্তো যোগিনশ্চৈনং পশ্যন্ত্যাত্মন্যবস্থিতম্। যতন্তোঽপ্যকৃতাত্মানো নৈনং পশ্যন্ত্যচেতসঃ ॥১১॥ যদাদিত্যগতং তেজো জগদ্ভাসয়তেঽখিলম্। যচ্চন্দ্রমসি যচ্চাগ্নৌ তত্তেজো বিদ্ধি মামকম্ ॥১২॥ গামাবিশ্য চ ভূতানি ধারয়াম্যহমোজসা। পুষ্ণামি চৌষধীঃ সর্ব্বাঃ সোমো ভূত্বা রসাত্মকঃ ॥১৩॥ অহং বৈশ্বানরো ভূত্বা প্রাণিনাং দেহমাশ্রিতঃ। প্রাণাপানসমাযুক্তঃ পচাম্যন্নং চতুর্ব্বিধম্ ॥১৪॥ সর্ব্বস্য চাহং হৃদি সন্নিবিষ্টো, মত্তঃ স্মৃতির্জ্ঞানমপোহনঞ্চ। বেদৈশ্চ সর্ব্বৈরহমেব বেদ্যো, বেদান্তকৃদ্বেদবিদেব চাহম্ ॥১৫॥ দ্বাবিমৌ পুরুষৌ লোকে ক্ষরশ্চাক্ষর এব চ। ক্ষরঃ সর্ব্বাণি ভূতানি কূটস্থোঽক্ষর উচ্যতে ॥১৬॥ উত্তমঃ পুরুষস্ত্বন্যঃ পরমাত্মেত্যুদাহৃতঃ। যো লোকত্রয়মাবিশ্য বিভর্ত্ত্যব্যয় ঈশ্বরঃ ॥১৭॥ যস্মাৎ ক্ষরমতীতোঽহমক্ষরাদপি চোত্তমঃ। অতোঽস্মি লোকে বেদে চ প্রথিতঃ পুরুষোত্তমঃ ॥১৮॥ যো মামেবমসংমূঢ়ো জানাতি পুরুষোত্তমম্। স সর্ব্ববিদ্ভজতি মাং সর্ব্বভাবেন ভারত ॥১৯॥ ইতি গুহ্যতমং শাস্ত্রমিদমুক্তং ময়ানঘ। এতদ্ বুদ্ধ্বা বুদ্ধিমান্ স্যাৎ কৃতকৃত্যশ্চ ভারত ॥ ২০ ॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং ভীষ্মপর্ব্বণি শ্রীমদ্ভগবদ্গীতাসূপনিষৎসু ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুনসংবাদে পুরুষোত্তমযোগো নাম পঞ্চদশোঽধ্যায়ঃ।

## ষোড়শোঽধ্যায়ঃ

শ্রীভগবানুবাচ। অভয়ং সত্ত্বসংশুদ্ধির্জ্ঞানযোগব্যবস্থিতিঃ। দানং দমশ্চ যজ্ঞশ্চ স্বাধ্যায়স্তপ আর্জ্জবম্ ॥১॥ অহিংসা সত্যমক্রোধস্ত্যাগঃ শান্তিরপৈশুনম্। দয়া ভূতেষ্বলোলুপ্ত্বং মার্দ্দবং হ্রীরচাপলম্ ॥২॥ তেজঃ ক্ষমা ধৃতিঃ শৌচমদ্রোহো নাতিমানিতা। ভবন্তি সম্পদং দৈবীমভিজাতস্য ভারত ॥৩॥ দম্ভো দর্পোঽভিমানশ্চ ক্রোধঃ পারুষ্যমেব চ। অজ্ঞানং চাভিজাতস্য পার্থ সম্পদমাসুরীম্ ॥৪॥ দৈবী সম্পদ্বিমোক্ষায় নিবন্ধায়াসুরী মতা। মা শুচঃ সম্পদং দৈবীমভিজাতোঽসি পাণ্ডব ॥৫॥ দ্বৌ ভূতসর্গৌ লোকেঽস্মিন্ দৈব আসুর এব চ। দৈবো বিস্তরশঃ প্রোক্ত আসুরং পার্থ মে শৃণু ॥৬॥ প্রবৃত্তিঞ্চ নিবৃত্তিঞ্চ জনা ন বিদুরাসুরাঃ। ন শৌচং নাপি চাচারো ন সত্যং তেষু বিদ্যতে ॥৭॥ অসত্যমপ্রতিষ্ঠং তে জগদাহুরনীশ্বরম্। অপরস্পরসম্ভূতং কিমন্যৎ কামহৈতুকম্ ॥৮॥ এতাং দৃষ্টিমবষ্টভ্য নষ্টাত্মানোঽল্পবুদ্ধয়ঃ। প্রভবন্ত্যুগ্রকর্ম্মাণঃ ক্ষয়ায় জগতোঽহিতাঃ ॥৯॥ কামমাশ্রিত্য দুষ্পূরং দম্ভমানমদান্বিতাঃ। মোহাদ্ গৃহীত্বাঽসদ্গ্রাহান্ প্রবর্ত্তন্তেঽশুচিব্রতাঃ ॥১০॥ চিন্তামপরিমেয়াঞ্চ প্রলয়ান্তামুপাশ্রিতাঃ। কামোপভোগপরমা এতাবদিতি নিশ্চিতাঃ ॥১১॥ আশাপাশশতৈর্ব্বদ্ধাঃ কামক্রোধপরায়ণাঃ। ঈহন্তে কামভোগার্থমন্যায়েনার্থসঞ্চয়ান্ ॥১২॥ ইদমদ্য ময়া লব্ধমিদং প্রাপ্স্যে মনোরথম্। ইদমস্তীদমপি মে ভবিষ্যতি পুনর্ধনম্ ॥১৩॥ অসৌ ময়া হতঃ শত্রুর্হনিষ্যে চাপরানপি। ঈশ্বরোঽহমহং ভোগী সিদ্ধোঽহং বলবান্ সুখী ॥১৪॥ আঢ্যোঽভিজনবানস্মি কোঽন্যোঽস্তি সদৃশো ময়া। যক্ষ্যে দাস্যামি মোদিষ্য ইত্যজ্ঞানবিমোহিতাঃ ॥১৫॥ অনেকচিত্তবিভ্রান্তা মোহজালসমাবৃতাঃ। প্রসক্তাঃ কামভোগেষু পতন্তি নরকেঽশুচৌ ॥১৬॥ আত্মসম্ভাবিতাঃ স্তব্ধা ধনমানমদান্বিতাঃ। যজন্তে নামযজ্ঞৈস্তে দম্ভেনাবিধিপূর্ব্বকম্ ॥১৭॥ অহঙ্কারং বলং দর্পং কামং ক্রোধঞ্চ সংশ্রিতাঃ। মামাত্মপরদেহেষু প্রদ্বিষন্তোঽভ্যসূয়কাঃ ॥১৮॥ তানহং দ্বিষতঃ ক্রূরান্ সংসারেষু নরাধমান্। ক্ষিপাম্যজস্রমশুভানাসুরীষ্বেব যোনিষু ॥১৯॥ আসুরীং যোনিমাপন্না মূঢ়া জন্মনি জন্মনি। মামপ্রাপ্যৈব কৌন্তেয় ততো যান্ত্যধমাং গতিম্ ॥২০॥ ত্রিবিধং নরকস্যেদং দ্বারং নাশনমাত্মনঃ। কামঃ ক্রোধস্তথা লোভস্তস্মাদেতত্ত্রয়ং ত্যজেৎ ॥২১॥ এতৈর্বিমুক্তঃ কৌন্তেয় তমোদ্বারৈস্ত্রিভির্নরঃ। আচরত্যাত্মনঃ শ্রেয়স্ততো যাতি পরাং গতিম্ ॥২২॥ যঃ শাস্ত্রবিধিমুৎসৃজ্য বর্ত্ততে কামচারতঃ। ন সংসিদ্ধিমবাপ্নোতি

ন সুখং ন পরাং গতিম্ ॥২৩॥ তস্মাচ্ছাস্ত্রং প্রমাণন্তে কার্য্যাকার্য্যব্যবস্থিতৌ। জ্ঞাত্বা শাস্ত্রবিধানোক্তং কর্ম্ম কর্ত্তুমিহার্হসি ॥২৪॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং ভীষ্মপর্ব্বণি শ্রীমদ্ভগবদ্গীতাসূপনিষৎসু ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুন-সংবাদে দৈবাসুরসম্পদ্বিভাগযোগো নাম ষোড়শোঽধ্যায়ঃ।

---

## সপ্তদশোঽধ্যায়ঃ

অর্জ্জুন উবাচ। যে শাস্ত্রবিধিমুৎসৃজ্য যজন্তে শ্রদ্ধয়ান্বিতাঃ। তেষাং নিষ্ঠা তু কা কৃষ্ণ সত্ত্বমাহো রজস্তমঃ ॥১॥

শ্রীভগবানুবাচ। ত্রিবিধা ভবতি শ্রদ্ধা দেহিনাং সা স্বভাবজা। সাত্ত্বিকী রাজসী চৈব তামসী চেতি তাং শৃণু ॥২॥ সত্ত্বানুরূপা সর্ব্বস্য শ্রদ্ধা ভবতি ভারত। শ্রদ্ধাময়োঽয়ং পুরুষো যো যচ্ছ্রদ্ধঃ স এব সঃ ॥৩॥ যজন্তে সাত্ত্বিকা দেবান্ যক্ষরক্ষাংসি রাজসাঃ। প্রেতান্ ভূতগণাংশ্চান্যে যজন্তে তামসা জনাঃ ॥৪॥ অশাস্ত্রবিহিতং ঘোরং তপ্যন্তে যে তপো জনাঃ। দম্ভাহঙ্কার-সংযুক্তাঃ কামরাগবলান্বিতাঃ ॥৫॥ কর্শয়ন্তঃ শরীরস্থং ভূতগ্রামমচেতসঃ। মাঞ্চৈবান্তঃশরীরস্থং তান্ বিদ্ধ্যাসুরনিশ্চয়ান্ ॥৬॥ আহারস্ত্বপি সর্ব্বস্য ত্রিবিধো ভবতি প্রিয়ঃ। যজ্ঞস্তপস্তথা দানং তেষাং ভেদমিমং শৃণু ॥৭॥ আয়ুঃসত্ত্ববলা-রোগ্যসুখপ্রীতিবিবর্দ্ধনাঃ। রস্যাঃ স্নিগ্ধাঃ স্থিরা হৃদ্যা আহারাঃ সাত্ত্বিক-প্রিয়াঃ ॥৮॥ কট্বম্ললবণাত্যুষ্ণতীক্ষ্ণরূক্ষবিদাহিনঃ। আহারা রাজসস্যেষ্টা দুঃখশোকাময়প্রদাঃ ॥৯॥ যাতযামং গতরসং পূতি পর্য্যুষিতঞ্চ যৎ। উচ্ছিষ্ট-মপি চামেধ্যং ভোজনং তামসপ্রিয়ম্ ॥১০॥ অফলাকাঙ্ক্ষিভির্যজ্ঞো বিধি-দিষ্টো য ইজ্যতে। যষ্টব্যমেবেতি মনঃ সমাধায় স সাত্ত্বিকঃ ॥১১॥ অভি-সন্ধায় তু ফলং দম্ভার্থমপি চৈব যৎ। ইজ্যতে ভরতশ্রেষ্ঠ তং যজ্ঞং বিদ্ধি রাজ-সম্ ॥১২॥ বিধিহীনমসৃষ্টান্নং মন্ত্রহীনমদক্ষিণম্। শ্রদ্ধাবিরহিতং যজ্ঞং তামসং পরিচক্ষতে ॥১৩॥ দেবদ্বিজগুরুপ্রাজ্ঞপূজনং শৌচমার্জ্জবম্। ব্রহ্মচর্য্যমহিংসা চ শারীরং তপ উচ্যতে ॥১৪॥ অনুদ্বেগকরং বাক্যং সত্যং প্রিয়হিতঞ্চ যৎ। স্বাধ্যায়াভ্যসনঞ্চৈব বাঙ্ময়ং তপ উচ্যতে ॥ ১৫ ॥ মনঃপ্রসাদঃ সৌম্যত্বং মৌনমাত্মবিনিগ্রহঃ। ভাবসংশুদ্ধিরিত্যেতত্তপো মানসমুচ্যতে ॥১৬॥

শ্রদ্ধয়া পরয়া তপ্তং তপস্তৎ ত্রিবিধং নরৈঃ। অফলাকাঙ্ক্ষিভির্যুক্তৈঃ সাত্ত্বিকং পরিচক্ষতে ॥ ১৭ ॥ সৎকারমানপূজার্থং তপো দম্ভেন চৈব যৎ। ক্রিয়তে তদিহ প্রোক্তং রাজসং চলমধ্রুবম্ ॥১৮॥ মূঢ়গ্রাহেণাত্মনো যৎ পীড়য়া ক্রিয়তে তপঃ। পরস্যোৎসাদনার্থং বা তত্তামসমুদাহৃতম্ ॥১৯॥ দাতব্যমিতি যদ্দানং দীয়তেঽনুপকারিণে। দেশে কালে চ পাত্রে চ তদ্দানং সাত্ত্বিকং স্মৃতম্ ॥২০॥ যত্তু প্রত্যুপকারার্থং ফলমুদ্দিশ্য বা পুনঃ। দীয়তে চ পরিক্লিষ্টং তদ্দানং রাজসং স্মৃতম্ ॥২১॥ অদেশকালে যদ্দানমপাত্রেভ্যশ্চ দীয়তে। অসৎকৃতমবজ্ঞাতং তত্তামসমুদাহৃতম্ ॥ ২২ ॥ ওঁ তৎসদিতি নির্দ্দেশো ব্রহ্মণস্ত্রিবিধঃ স্মৃতঃ। ব্রাহ্মণাস্তেন বেদাশ্চ যজ্ঞাশ্চ বিহিতাঃ পুরা ॥২৩॥ তস্মাদোমিত্যুদাহৃত্য যজ্ঞদানতপঃক্রিয়াঃ। প্রবর্ত্তন্তে বিধানোক্তাঃ সততং ব্রহ্মবাদিনাম্ ॥ ২৪ ॥ তদিত্যনভিসন্ধায় ফলং যজ্ঞতপঃক্রিয়াঃ। দানক্রিয়াশ্চ বিবিধাঃ ক্রিয়ন্তে মোক্ষকাঙ্ক্ষিভিঃ ॥২৫॥ সদ্ভাবে সাধুভাবে চ সদিত্যেতৎ প্রযুজ্যতে। প্রশস্তে কর্ম্মণি তথা সচ্ছব্দঃ পার্থ যুজ্যতে ॥ ২৬ ॥ যজ্ঞে তপসি দানে চ স্থিতিঃ সদিতি চোচ্যতে। কর্ম্ম চৈব তদর্থীয়ং সদিত্যেবাভিধীয়তে ॥২৭॥ অশ্রদ্ধয়া হুতং দত্তং তপস্তপ্তং কৃতঞ্চ যৎ। অসদিত্যুচ্যতে পার্থ ন চ তৎ প্রেত্য নো ইহ ॥২৮॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং ভীষ্মপর্ব্বণি
শ্রীমদ্‌ভগবদ্‌গীতাসূপনিষৎসু ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুন-
সংবাদে শ্রদ্ধাত্রয়বিভাগযোগো নাম সপ্তদশোঽধ্যায়ঃ।

---

## অষ্টাদশোঽধ্যায়ঃ

অর্জ্জুন উবাচ। সন্ন্যাসস্য মহাবাহো তত্ত্বমিচ্ছামি বেদিতুম্। ত্যাগস্য চ হৃষীকেশ পৃথক্ কেশিনিসূদন ॥ ১ ॥

শ্রীভগবানুবাচ। কাম্যানাং কর্ম্মণাং ন্যাসং সন্ন্যাসং কবয়ো বিদুঃ। সর্ব্বকর্ম্মফলত্যাগং প্রাহুস্ত্যাগং বিচক্ষণাঃ ॥ ২ ॥ ত্যাজ্যং দোষবদিত্যেকে কর্ম্ম প্রাহুর্ম্মনীষিণঃ। যজ্ঞদানতপঃ কর্ম্ম ন ত্যাজ্যমিতি চাপরে ॥ ৩ ॥ নিশ্চয়ং শৃণু মে তত্র ত্যাগে ভরতসত্তম। ত্যাগো হি পুরুষব্যাঘ্র ত্রিবিধঃ সম্প্রকীর্ত্তিতঃ ॥ ৪ ॥ যজ্ঞদানতপঃকর্ম্ম ন ত্যাজ্যং কার্য্যমেব তৎ। যজ্ঞো দানং

তপশ্চৈব পাবনানি মনীষিণাম্॥ ৫॥ এতান্যপি তু কর্ম্মাণি সঙ্গং ত্যক্ত্বা ফলানি চ। কর্ত্তব্যানীতি মে পার্থ নিশ্চিতং মতমুত্তমম্॥ ৬॥ নিয়তস্য তু সন্ন্যাসঃ কর্ম্মণো নোপপদ্যতে। মোহাত্তস্য পরিত্যাগস্তামসঃ পরিকীর্ত্তিতঃ॥ ৭॥ দুঃখমিত্যেব যৎ কর্ম্ম কায়ক্লেশভয়াত্ত্যজেৎ। স কৃত্বা রাজসং ত্যাগং নৈব ত্যাগফলং লভেৎ॥ ৮॥ কার্য্যমিত্যেব যৎ কর্ম্ম নিয়তং ক্রিয়তেঽর্জ্জুন। সঙ্গং ত্যক্ত্বা ফলঞ্চৈব স ত্যাগঃ সাত্ত্বিকো মতঃ॥ ৯॥ ন দ্বেষ্ট্যকুশলং কর্ম্ম কুশলে নানুষজ্জতে। ত্যাগী সত্ত্বসমাবিষ্টো মেধাবী ছিন্নসংশয়ঃ॥ ১০॥ ন হি দেহভৃতা শক্যং ত্যক্তুং কর্ম্মাণ্যশেষতঃ। যস্তু কর্ম্মফলত্যাগী স ত্যাগীত্যভিধীয়তে॥ ১১॥ অনিষ্টমিষ্টং মিশ্রঞ্চ ত্রিবিধং কর্ম্মণঃ ফলম্। ভবত্যত্যাগিনাং প্রেত্য ন তু সন্ন্যাসিনাং কচিৎ॥ ১২॥ পঞ্চৈমানি মহাবাহো কারণানি নিবোধ মে। সাংখ্যে কৃতান্তে প্রোক্তানি সিদ্ধয়ে সর্ব্বকর্ম্মণাম্॥ ১৩॥ অধিষ্ঠানং তথা কর্ত্তা করণঞ্চ পৃথগ্বিধম্। বিবিধাশ্চ পৃথক্ চেষ্টা দৈবঞ্চৈবাত্র পঞ্চমম্॥ ১৪॥ শরীর-বাঙ্মনোভির্যৎ কর্ম্ম প্রারভতে নরঃ। ন্যায্যং বা বিপরীতং বা পঞ্চৈতে তস্য হেতবঃ॥ ১৫॥ তত্রৈবং সতি কর্ত্তারমাত্মানং কেবলন্তু যঃ। পশ্যত্যকৃত-বুদ্ধিত্বান্ন স পশ্যতি দুর্ম্মতিঃ॥ ১৬॥ যস্য নাহঙ্কৃতো ভাবো বুদ্ধির্যস্য ন লিপ্যতে। হত্বাপি স ইমাঁল্লোকান্ন হন্তি ন নিবধ্যতে॥ ১৭॥ জ্ঞানং জ্ঞেয়ং পরিজ্ঞাতা ত্রিবিধা কর্ম্মচোদনা। করণং কর্ম্ম কর্ত্তেতি ত্রিবিধঃ কর্ম্মসংগ্রহঃ॥১৮॥ জ্ঞানং কর্ম্ম চ কর্ত্তা চ ত্রিধৈব গুণভেদতঃ। প্রোচ্যতে গুণসংখ্যানে যথাবচ্ছৃণু তান্যপি॥ ১৯॥ সর্ব্বভূতেষু যেনৈকং ভাবমব্যয়মীক্ষতে। অবিভক্তং বিভক্তেষু তজ্জ্ঞানং বিদ্ধি সাত্ত্বিকম্॥ ২০॥ পৃথক্ত্বেন তু যজ্জ্ঞানং নানা-ভাবান্ পৃথগ্বিধান্। বেত্তি সর্ব্বেষু ভূতেষু তজ্জ্ঞানং বিদ্ধি রাজসম্॥ ২১॥ যত্তু কৃৎস্নবদেকস্মিন্ কার্য্যে সক্তমহৈতুকম্। অতত্ত্বার্থবদল্পঞ্চ তত্তামসমুদা-হৃতম্॥ ২২॥ নিয়তং সঙ্গরহিতমরাগদ্বেষতঃ কৃতম্। অফলপ্রেপ্সুনা কর্ম্ম যত্তৎ সাত্ত্বিকমুচ্যতে॥ ২৩॥ যত্তু কামেপ্সুনা কর্ম্ম সাহঙ্কারেণ বা পুনঃ। ক্রিয়তে বহুলায়াসং তদ্রাজসমুদাহৃতম্॥ ২৪॥ অনুবন্ধং ক্ষয়ং হিংসামনপেক্ষ্য চ পৌরুষম্। মোহাদারভ্যতে কর্ম্ম যত্তত্তামসমুচ্যতে॥ ২৫॥ মুক্তসঙ্গো-ঽনহংবাদী ধৃত্যুৎসাহসমন্বিতঃ। সিদ্ধ্যসিদ্ধ্যোর্নির্ব্বিকারঃ কর্ত্তা সাত্ত্বিক উচ্যতে॥ ২৬॥ রাগী কর্ম্মফলপ্রেপ্সুর্লুব্ধো হিংসাত্মকোঽশুচিঃ। হর্ষশোকা-ন্বিতঃ কর্ত্তা রাজসঃ পরিকীর্ত্তিতঃ॥ ২৭॥ অযুক্তঃ প্রাকৃতঃ স্তব্ধঃ শঠো নৈকৃতি-কোঽলসঃ। বিষাদী দীর্ঘসূত্রী চ কর্ত্তা তামস উচ্যতে॥ ২৮॥ বুদ্ধের্ভেদং

ধৃতেশ্চৈব গুণতস্ত্রিবিধং শৃণু। প্রোচ্যমানমশেষেণ পৃথক্ত্বেন ধনঞ্জয় ॥ ২৯ ॥ প্রবৃত্তিঞ্চ নিবৃত্তিঞ্চ কার্য্যাকার্য্যে ভয়াভয়ে। বন্ধং মোক্ষঞ্চ যা বেত্তি বুদ্ধিঃ সা পার্থ সাত্ত্বিকী ॥ ৩০ ॥ যয়া ধর্ম্মমধর্ম্মঞ্চ কার্য্যঞ্চাকার্য্যমেব চ। অযথাবৎ প্রজানাতি বুদ্ধিঃ সা পার্থ রাজসী ॥ ৩১ ॥ অধর্ম্মং ধর্ম্মমিতি যা মন্যতে তমসা-বৃতা। সর্ব্বার্থান্ বিপরীতাংশ্চ বুদ্ধিঃ সা পার্থ তামসী ॥ ৩২ ॥ ধৃত্যা যয়া ধারয়তে মনঃপ্রাণেন্দ্রিয়ক্রিয়াঃ। যোগেনাব্যভিচারিণ্যা ধৃতিঃ সা পার্থ সাত্ত্বিকী ॥ ৩৩ ॥ যয়া তু ধর্ম্মকামার্থান্ ধৃত্যা ধারয়তেঽর্জ্জুন। প্রসঙ্গেন ফলাকাঙ্ক্ষী ধৃতিঃ সা পার্থ রাজসী ॥ ৩৪ ॥ যয়া স্বপ্নং ভয়ং শোকং বিষাদং মদমেব চ। ন বিমুঞ্চতি দুর্ম্মেধা ধৃতিঃ সা পার্থ তামসী ॥ ৩৫ ॥ সুখন্ত্বিদানীং ত্রিবিধং শৃণু মে ভরতর্ষভ। অভ্যাসাদ্রমতে যত্র দুঃখান্তঞ্চ নিগচ্ছতি ॥ ৩৬ ॥ যত্তদগ্রে বিষমিব পরিণামেঽমৃতোপমম্। তৎ সুখং সাত্ত্বিকং প্রোক্তমাত্ম-বুদ্ধিপ্রসাদজম্ ॥ ৩৭ ॥ বিষয়েন্দ্রিয়সংযোগাদ্ যত্তদগ্রেঽমৃতোপমম্। পরিণামে বিষমিব তৎ সুখং রাজসং স্মৃতম্ ॥ ৩৮ ॥ যদগ্রে চানুবন্ধে চ সুখং মোহন-মাত্মনঃ। নিদ্রালস্যপ্রমাদোত্থং তত্তামসমুদাহৃতম্ ॥ ৩৯ ॥ ন তদস্তি পৃথিব্যাং বা দিবি দেবেষু বা পুনঃ। সত্ত্বং প্রকৃতিজৈর্মুক্তং যদেভিঃ স্যাত্ত্রিভির্গুণৈঃ ॥৪০॥ ব্রাহ্মণক্ষত্রিয়বিশাং শূদ্রাণাঞ্চ পরন্তপ। কর্ম্মাণি প্রবিভক্তানি স্বভাবপ্রভবৈ-র্গুণৈঃ ॥ ৪১ ॥ শমো দমস্তপঃ শৌচং ক্ষান্তিরার্জ্জবমেব চ। জ্ঞানং বিজ্ঞান-মাস্তিক্যং ব্রহ্মকর্ম্ম স্বভাবজম্ ॥ ৪২ ॥ শৌর্য্যং তেজো ধৃতির্দাক্ষ্যং যুদ্ধে চাপ্য-পলায়নম্। দানমীশ্বরভাবশ্চ ক্ষাত্রং কর্ম্ম স্বভাবজম্ ॥ ৪৩ ॥ কৃষিগোরক্ষ্য-বাণিজ্যং বৈশ্যকর্ম্ম স্বভাবজম্। পরিচর্য্যাত্মকং কর্ম্ম শূদ্রস্যাপি স্বভাবজম্ ॥ ৪৪ ॥ স্বে স্বে কর্ম্মণ্যভিরতঃ সংসিদ্ধিং লভতে নরঃ। স্বকর্ম্মনিরতঃ সিদ্ধিং যথা বিন্দতি তচ্ছৃণু ॥ ৪৫ ॥ যতঃ প্রবৃত্তির্ভূতানাং যেন সর্ব্বমিদং ততম্। স্বকর্ম্মণা তমভ্যর্চ্চ্য সিদ্ধিং বিন্দতি মানবঃ ॥ ৪৬ ॥ শ্রেয়ান্ স্বধর্ম্মো বিগুণঃ পরধর্ম্মাৎ স্বনুষ্ঠিতাৎ। স্বভাবনিয়তং কর্ম্ম কুর্ব্বন্নাপ্নোতি কিল্বিষম্ ॥ ৪৭ ॥ সহজং কর্ম্ম কৌন্তেয় সদোষমপি ন ত্যজেৎ। সর্ব্বারম্ভা হি দোষেণ ধূমেনাগ্নিরিবা-বৃতাঃ ॥ ৪৮ ॥ অসক্তবুদ্ধিঃ সর্ব্বত্র জিতাত্মা বিগতস্পৃহঃ। নৈষ্কর্ম্ম্যসিদ্ধিং পরমাং সন্ন্যাসেনাধিগচ্ছতি ॥ ৪৯ ॥ সিদ্ধিং প্রাপ্তো যথা ব্রহ্ম তথাপ্নোতি নিবোধ মে। সমাসেনৈব কৌন্তেয় নিষ্ঠা জ্ঞানস্য যা পরা ॥ ৫০ ॥ বুদ্ধ্যা বিশুদ্ধয়া যুক্তো ধৃত্যাত্মানং নিয়ম্য চ। শব্দাদীন্ বিষয়াংস্ত্যক্ত্বা রাগদ্বেষৌ ব্যুদস্য চ ॥ ৫১ ॥ বিবিক্তসেবী লঘ্বাশী যতবাক্কায়মানসঃ। ধ্যানযোগপরো

নিত্যং বৈরাগ্যং সমুপাশ্রিতঃ ॥ ৫২ ॥ অহঙ্কারং বলং দর্পং কামং ক্রোধং পরিগ্রহম্। বিমুচ্য নির্ম্মমঃ শান্তো ব্রহ্মভূয়ায় কল্পতে ॥ ৫৩ ॥ ব্রহ্মভূতঃ প্রসন্নাত্মা ন শোচতি ন কাঙ্ক্ষতি। সমঃ সর্ব্বেষু ভূতেষু মদ্ভক্তিং লভতে পরাম্ ॥ ৫৪ ॥ ভক্ত্যা মামভিজানাতি যাবান্ যশ্চাস্মি তত্ত্বতঃ। ততো মাং তত্ত্বতো জ্ঞাত্বা বিশতে তদনন্তরম্ ॥ ৫৫ ॥ সর্ব্বকর্ম্মাণ্যপি সদা কুর্ব্বাণো মদ্ব্যপাশ্রয়ঃ। মৎপ্রসাদাদবাপ্নোতি শাশ্বতং পদমব্যয়ম্ ॥ ৫৬ ॥ চেতসা সর্ব্বকর্ম্মাণি ময়ি সন্ন্যস্য মৎপরঃ। বুদ্ধিযোগমুপাশ্রিত্য মচ্চিত্তঃ সততং ভব ॥ ৫৭ ॥ মচ্চিত্তঃ সর্ব্বদুর্গাণি মৎপ্রসাদাত্তরিষ্যসি। অথ চেত্ত্বমহঙ্কারান্ন শ্রোষ্যসি বিনঙ্ক্ষ্যসি ॥ ৫৮ ॥ যদহঙ্কারমাশ্রিত্য ন যোৎস্য ইতি মন্যসে। মিথ্যৈষ ব্যবসায়স্তে প্রকৃতিস্ত্বাং নিযোক্ষ্যতি ॥ ৫৯ ॥ স্বভাবজেন কৌন্তেয় নিবদ্ধঃ স্বেন কর্ম্মণা। কর্ত্তুং নেচ্ছসি যন্মোহাৎ করিষ্যস্যবশোঽপি তৎ ॥ ৬০ ॥ ঈশ্বরঃ সর্ব্বভূতানাং হৃদ্দেশেঽর্জ্জুন তিষ্ঠতি। ভ্রাময়ন্ সর্ব্বভূতানি যন্ত্রারূঢ়ানি মায়য়া ॥৬১॥ তমেব শরণং গচ্ছ সর্ব্বভাবেন ভারত। তৎপ্রসাদাৎ পরাং শান্তিং স্থানং প্রাপ্স্যসি শাশ্বতম্ ॥ ৬২ ॥ ইতি তে জ্ঞানমাখ্যাতং গুহ্যাদ্ গুহ্যতরং ময়া। বিমৃশ্যৈতদশেষেণ যথেচ্ছসি তথা কুরু ॥ ৬৩ ॥ সর্ব্বগুহ্যতমং ভূয়ঃ শৃণু মে পরমং বচঃ। ইষ্টোঽসি মে দৃঢ়মিতি ততো বক্ষ্যামি তে হিতম্ ॥ ৬৪ ॥ মন্মনা ভব মদ্ভক্তো মদ্‌যাজী মাং নমস্কুরু। মামেবৈষ্যসি সত্যং তে প্রতিজানে প্রিয়োঽসি মে ॥ ৬৫ ॥ সর্ব্বধর্ম্মান্ পরিত্যজ্য মামেকং শরণং ব্রজ। অহং ত্বাং সর্ব্বপাপেভ্যো মোক্ষয়িষ্যামি মা শুচঃ ॥ ৬৬ ॥ ইদন্তে নাতপস্কায় নাভক্তায় কদাচন। ন চাশুশ্রূষবে বাচ্যং ন চ মাং যোঽভ্যসূয়তি ॥ ৬৭ ॥ য ইদং পরমং গুহ্যং মদ্ভক্তেষ্বভিধাস্যতি। ভক্তিং ময়ি পরাং কৃত্বা মামেবৈষ্যত্যসংশয়ঃ ॥ ৬৮ ॥ ন চ তস্মান্মনুষ্যেষু কশ্চিন্মে প্রিয়কৃত্তমঃ। ভবিতা ন চ মে তস্মাদন্যঃ প্রিয়তরো ভুবি ॥ ৬৯ ॥ অধ্যেষ্যতে চ য ইমং ধর্ম্ম্যং সংবাদমাবয়োঃ। জ্ঞানযজ্ঞেন তেনাহমিষ্টঃ স্যামিতি মে মতিঃ ॥ ৭০ ॥ শ্রদ্ধাবাননসূয়শ্চ শৃণুয়াদপি যো নরঃ। সোঽপি মুক্তঃ শুভাল্লোঁকান্ প্রাপ্নুয়াৎ পুণ্যকর্ম্মণাম্ ॥ ৭১ ॥ কচ্চিদেতৎ শ্রুতং পার্থ ত্বয়ৈকাগ্রেণ চেতসা। কচ্চিদজ্ঞানসম্মোহঃ প্রণষ্টস্তে ধনঞ্জয় ॥ ৭২ ॥

অর্জ্জুন উবাচ। নষ্টো মোহঃ স্মৃতির্লব্ধা ত্বৎপ্রসাদান্ময়াচ্যুত। স্থিতোঽস্মি গতসন্দেহঃ করিষ্যে বচনং তব ॥ ৭৩ ॥

সঞ্জয় উবাচ। ইত্যহং বাসুদেবস্য পার্থস্য চ মহাত্মনঃ। সংবাদমিমমশ্রৌষমদ্ভুতং

লোমহর্ষণম্ ॥ ৭৪ ॥ ব্যাসপ্রসাদাৎ শ্রুতবানিমং গুহ্যমহং পরম্। যোগং যোগেশ্বরাৎ কৃষ্ণাৎ সাক্ষাৎ কথয়তঃ স্বয়ম্ ॥৭৫ ॥ রাজন্ সংস্মৃত্য সংস্মৃত্য সংবাদমিমমদ্ভুতম্। কেশবার্জ্জুনয়োঃ পুণ্যং হৃষ্যামি চ মুহুর্মুহুঃ ॥ ৭৬ ॥ তচ্চ সংস্মৃত্য সংস্মৃত্য রূপমত্যদ্ভুতং হরেঃ। বিস্ময়ো মে মহান্ রাজন্ হৃষ্যামি চ পুনঃ পুনঃ ॥ ৭৭ ॥ যত্র যোগেশ্বরঃ কৃষ্ণো যত্র পার্থো ধনুর্দ্ধরঃ। তত্র শ্রীর্বিজয়ো ভূতির্ধ্রুবা নীতির্মতির্মম ॥ ওঁ ॥ ৭৮ ॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং ভীষ্মপর্ব্বণি শ্রীমদ্ভগবদ্গীতাসূপনিষৎসু ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুন-সংবাদে মোক্ষযোগো নাম অষ্টাদশোঽধ্যায়ঃ।

সমাপ্তং গীতাপর্ব্ব

# গীতা-মাহাত্ম্যম্।

ঋষিরুবাচ। গীতায়াশ্চৈব মাহাত্ম্যং যথাবৎ সূত মে বদ। পুরা নারায়ণক্ষেত্রে ব্যাসেন মুনিনোদিতম্ ॥ ১ ॥

সূত উবাচ। ভদ্রং ভগবতা পৃষ্টং যদ্ধি গুপ্ততমং পরম্। শক্যতে কেন তদ্বক্তুং গীতামাহাত্ম্যমুত্তমম্ ॥ ২ ॥ কৃষ্ণো জানাতি বৈ সম্যক্ কিঞ্চিৎ কুন্তীসুতঃ ফলম্। ব্যাসো বা ব্যাসপুত্রো বা যাজ্ঞবল্ক্যোঽথ মৈথিলঃ ॥ ৩ ॥ অন্যে শ্রবণতঃ শ্রুত্বা লেশং সংকীর্ত্তয়ন্তি চ। তস্মাৎ কিঞ্চিদ্বদাম্যত্র ব্যাসস্যাস্যান্ময়া শ্রুতম্ ॥ ৪ ॥ সর্ব্বোপনিষদো গাবো দোগ্ধা গোপালনন্দনঃ। পার্থো বৎসঃ সুধীর্ভোক্তা দুগ্ধং গীতামৃতং মহৎ ॥ ৫ ॥ সারথ্যমর্জ্জুনস্যাদৌ কুর্ব্বন্ গীতামৃতং দদৌ। লোকত্রয়োপকারায় তস্মৈ কৃষ্ণাত্মনে নমঃ ॥ ৬ ॥ সংসারসাগরং ঘোরং তর্ত্তুমিচ্ছতি যো নরঃ। গীতানাবং সমাসাদ্য পারং যাতি সুখেন সঃ ॥ ৭ ॥ গীতাজ্ঞানং শ্রুতং নৈব সদৈবাভ্যাসযোগতঃ। মোক্ষমিচ্ছতি মূঢ়াত্মা যাতি বালকহাস্যতাম্ ॥ ৮ ॥ যে শৃণ্বন্তি পঠন্ত্যেব গীতাশাস্ত্রমহর্নিশম্। ন তে বৈ মানুষা জ্ঞেয়া দেবরূপা ন সংশয়ঃ ॥ ৯ ॥ গীতাজ্ঞানেন সম্বোধং কৃষ্ণঃ প্রাহার্জ্জুনায় বৈ। ভক্তিতত্ত্বং পরং তত্র সগুণং বাথ নির্গুণম্ ॥ ১০ ॥ সোপানাষ্টাদশৈরেবং ভক্তিমুক্তিসমুচ্ছ্রিতৈঃ। ক্রমশশ্চিত্তশুদ্ধিঃ স্যাৎ প্রেমভক্ত্যাদিকর্ম্মসু ॥ ১১ ॥ সাধোর্গীতাম্ভসি স্নানং সংসারমলনাশনম্। শ্রদ্ধাহীনস্য তৎ কার্য্যং হস্তিস্নানং বৃথৈব তৎ ॥ ১২ ॥ গীতায়াশ্চ ন জানাতি পঠনং নৈব পাঠনম্। স এব মানুষে লোকে মোঘকর্ম্মকরো ভবেৎ ॥ ১৩ ॥ যস্মাদ্গীতাং ন জানাতি নাধমস্তৎপরো জনঃ। ধিক্ তস্য মানুষং দেহং বিজ্ঞানং কুলশীলতাম্ ॥ ১৪ ॥ গীতার্থং ন বিজানাতি নাধমস্তৎপরো জনঃ। ধিক্ শরীরং শুভং শীলং বিভবস্তদ্গৃহাশ্রমম্ ॥ ১৫ ॥ গীতাশাস্ত্রং ন জানাতি নাধমস্তৎপরো জনঃ। ধিক্ প্রারব্ধং প্রতিষ্ঠাঞ্চ পূজাং দানং মহত্তমম্ ॥ ১৬ ॥ গীতাশাস্ত্রে মতির্নাস্তি সর্ব্বং তন্নিষ্ফলং জগুঃ। ধিক্ তস্য জ্ঞানদাতারং ব্রতং নিষ্ঠাং তপো যশঃ ॥ ১৭ ॥ গীতার্থপঠনং নাস্তি নাধমস্তৎপরো জনঃ। গীতাগীতং ন যজ্জ্ঞানং তদ্বিদ্ধ্যাসুরসম্মতম্ ॥ তন্মোঘং ধর্ম্মরহিতং বেদবেদান্তগর্হিতম্ ॥ ১৮ ॥ তস্মাদ্ধর্ম্মময়ী গীতা সর্ব্বজ্ঞানপ্রযোজিকা। সর্ব্বশাস্ত্রসারভূতা বিশুদ্ধা সা বিশিষ্যতে ॥ ১৯ ॥ যোঽধীতে বিষ্ণুপর্ব্বাহে গীতাং শ্রীহরিবাসরে। স্বপন্ জাগ্রচ্চলংস্তিষ্ঠন্ শত্রুভির্ন স হীয়তে ॥ ২০ ॥ শালগ্রামে শিলায়াং বা দেবাগারে

শিবালয়ে। তীর্থে নত্বা পঠেদ্ গীতাং সৌভাগ্যং লভতে ধ্রুবম্॥ ২১॥
দেবকীনন্দনঃ কৃষ্ণো গীতাপাঠেন তুষ্যতি। যথা ন বেদৈর্দানেন যজ্ঞতীর্থ-
ব্রতাদিভিঃ॥ ২২॥ গীতাধীতা চ যেনাপি ভক্তিভাবেন চেতসা। বেদশাস্ত্র-
পুরাণানি তেনাধীতানি সর্ব্বশঃ॥ ২৩॥ যোগস্থানে সিদ্ধপীঠে শিলাগ্রে সৎ-
সভাসু চ। যজ্ঞে চ বিষ্ণুভক্তাগ্রে পঠন্ সিদ্ধিং পরাং লভেৎ॥ ২৪॥ গীতা-
পাঠঞ্চ শ্রবণং যঃ করোতি দিনে দিনে। ক্রতবো বাজিমেধাদ্যাঃ কৃতাস্তেন
সদক্ষিণাঃ॥ ২৫॥ যঃ শৃণোতি চ গীতার্থং কীর্ত্তয়ত্যেব যঃ পরম্। শ্রাবয়েচ্চ
পরার্থং বৈ স প্রয়াতি পরং পদম্। ২৬॥ গীতায়াঃ পুস্তকং শুদ্ধং যোঽর্পয়ত্যেব
সাদরম্। বিধিনা ভক্তিভাবেন তস্য ভার্য্যা প্রিয়া ভবেৎ॥ ২৭॥ যশঃ
সৌভাগ্যমারোগ্যং লভতে নাত্র সংশয়ঃ। দয়িতানাং প্রিয়ো ভূত্বা পরমং সুখ-
মশ্নুতে॥ ২৮॥ অভিচারোদ্ভবং দুঃখং বরশাপাগতঞ্চ যৎ। নোপসর্পন্তি
তত্রৈব যত্র গীতার্চ্চনং গৃহে॥ ২৯॥ তাপত্রয়োদ্ভবা পীড়া নৈব ব্যাধির্ভবেৎ
কচিৎ। ন শাপো নৈব পাপঞ্চ দুর্গতির্নরকং ন চ॥ ৩০॥ বিস্ফোটকাদয়ো
দেহে ন বাধন্তে কদাচন। লভেৎ কৃষ্ণপদে দাস্যং ভক্তিঞ্চাব্যভিচারি-
ণীম্॥ ৩১॥ জায়তে সততং সখ্যং সর্ব্বজীবগণৈঃ সহ। প্রারব্ধং ভুঞ্জতো বাপি
গীতাভ্যাসরতস্য চ। স মুক্তঃ স সুখী লোকে কর্ম্মণা নোপলিপ্যতে॥ ৩২॥
মহাপাপাতিপাপানি গীতাধ্যায়ী করোতি চেৎ। ন কিঞ্চিৎ স্পৃশ্যতে তস্য
নলিনীদলমম্ভসা॥ ৩৩॥ অনাচারোদ্ভবং পাপমবাচ্যাদিকৃতঞ্চ যৎ। অভক্ষ্য-
ভক্ষজং দোষমস্পৃশ্যস্পর্শজং তথা॥ ৩৪॥ জ্ঞানাজ্ঞানকৃতং নিত্যমিন্দ্রিয়ৈর্জনি-
তঞ্চ যৎ। তৎসর্ব্বং নাশমায়াতি গীতাপাঠেন তৎক্ষণাৎ॥ ৩৫॥ সর্ব্বত্র প্রতি-
ভোক্তা চ প্রতিগৃহ্য চ সর্ব্বশঃ। গীতাপাঠং প্রকুর্ব্বাণো ন লিপ্যেত কদা-
চন॥ ৩৬॥ রত্নপূর্ণাং মহীং সর্ব্বাং প্রতিগৃহ্যাবিধানতঃ। গীতাপাঠেন চৈকেন
শুদ্ধস্ফটিকবৎ সদা॥ ৩৭॥ যস্যান্তঃকরণং নিত্যং গীতায়াং রমতে সদা। স
সাগ্নিকঃ সদা জাপী ক্রিয়াবান্ স চ পণ্ডিতঃ॥ ৩৮॥ দর্শনীয়ঃ স ধনবান্ স
যোগী জ্ঞানবানপি। স এব যাজ্ঞিকো যাজী সর্ব্ববেদার্থদর্শকঃ॥ ৩৯॥
গীতায়াঃ পুস্তকং যত্র নিত্যপাঠশ্চ বর্ত্ততে। তত্র সর্ব্বাণি তীর্থানি প্রয়াগাদীনি
ভূতলে॥ ৪০॥ নিবসন্তি সদা দেহে দেহশেষেঽপি সর্ব্বদা। সর্ব্বে দেবাশ্চ
ঋষয়ো যোগিনো দেহরক্ষকাঃ॥ ৪১॥ গোপালো বালকৃষ্ণোঽপি নারদধ্রুব-
পার্ষদৈঃ। সহায়ো জায়তে শীঘ্রং যত্র গীতা প্রবর্ত্ততে॥ ৪২॥ যত্র গীতাবিচারশ্চ
পঠনং পাঠনং তথা। মোদতে তত্র শ্রীকৃষ্ণো ভগবান্ রাধয়া সহ॥ ৪৩॥

শ্রীভগবানুবাচ। গীতা মে হৃদয়ং পার্থ গীতা মে সারমুত্তমম্। গীতা মে জ্ঞানমত্যুগ্রং গীতা মে জ্ঞানমব্যয়ম্॥ ৪৪॥ গীতা মে চোত্তমং স্থানং গীতা মে পরমং পদম্। গীতা মে পরমং গুহ্যং গীতা মে পরমো গুরুঃ॥ ৪৫॥ গীতাশ্রয়েঽহং তিষ্ঠামি গীতা মে পরমং গৃহম্। গীতাজ্ঞানং সমাশ্রিত্য ত্রিলোকীং পালয়াম্যহম্॥ ৪৬॥ গীতা মে পরমা বিদ্যা ব্রহ্মরূপা ন সংশয়ঃ। অর্দ্ধমাত্রাহরা নিত্যমনির্ব্বাচ্যপদাত্মিকা॥ ৪৭॥ গীতানামানি বক্ষ্যামি গুহ্যানি শৃণু পাণ্ডব। কীর্ত্তনাৎ সর্ব্বপাপানি বিলয়ং যান্তি তৎক্ষণাৎ॥ ৪৮॥ গঙ্গা গীতা চ সাবিত্রী সীতা সত্যা পতিব্রতা। ব্রহ্মাবলির্ব্রহ্মবিদ্যা ত্রিসন্ধ্যং মুক্তিগেহিনী॥ ৪৯॥ অর্দ্ধমাত্রা চিতা নন্দা ভবঘ্নী ভ্রান্তিনাশিনী। বেদত্রয়ী পরানন্দা তত্ত্বার্থজ্ঞানমঞ্জরী॥ ৫০॥ ইত্যেতানি জপেন্নিত্যং নরো নিশ্চলমানসঃ। জ্ঞানসিদ্ধিং লভেন্নিত্যং তথান্তে পরমং পদম্॥ ৫১॥ পাঠেঽসমর্থঃ সম্পূর্ণে তদর্দ্ধং পাঠমাচরেৎ। তদা গোদানজং পুণ্যং লভতে নাত্র সংশয়ঃ॥ ৫২॥ ত্রিভাগং পঠমানস্তু সোমযাগফলং লভেৎ। ষড়ংশং জপমানস্তু গঙ্গাস্নানফলং লভেৎ॥ ৫৩॥ তথাধ্যায়দ্বয়ং নিত্যং পঠমানো নিরন্তরম্। ইন্দ্রলোকমবাপ্নোতি কল্পমেকং বসেদ্ ধ্রুবম্॥ ৫৪॥ একমধ্যায়কং নিত্যং পঠতে ভক্তিসংযুতঃ। রুদ্রলোকমবাপ্নোতি গণো ভূত্বা বসেচ্চিরম্॥ ৫৫॥ অধ্যায়ার্দ্ধঞ্চ পাদং বা নিত্যং যঃ পঠতে জনঃ। প্রাপ্নোতি রবিলোকং স মন্বন্তরসমাঃ শতম্॥ ৫৬॥ গীতায়াঃ শ্লোকদশকং সপ্ত পঞ্চ চতুষ্টয়ম্। ত্রিদ্ব্যেকমেকমর্দ্ধং বা শ্লোকানাং যঃ পঠেন্নরঃ। চন্দ্রলোকমবাপ্নোতি বর্ষাণামযুতন্তথা॥ ৫৭॥ গীতার্থমেকপাদঞ্চ শ্লোকমধ্যায়মেব চ। স্মরংস্ত্যক্ত্বা জনো দেহং প্রয়াতি পরমং পদম্॥ ৫৮॥ গীতার্থমপি পাঠং বা শৃণুয়াদন্তকালতঃ। মহাপাতকযুক্তোঽপি মুক্তিভাগী ভবেজ্জনঃ॥ ৫৯॥ গীতাপুস্তকসংযুক্তঃপ্রাণাংস্ত্যক্ত্বা প্রয়াতি যঃ। স বৈকুণ্ঠমবাপ্নোতি বিষ্ণুনা সহ মোদতে॥ ৬০॥ গীতাধ্যায়সমাযুক্তো মৃতো মানুষতাং ব্রজেৎ। গীতাভ্যাসং পুনঃ কৃত্বা লভতে মুক্তিমুত্তমাম্॥ ৬১॥ গীতেত্যুচ্চারসংযুক্তো ম্রিয়মাণো গতিং লভেৎ। যদ্যৎ কর্ম্ম চ সর্ব্বত্র গীতাপাঠপ্রকীর্ত্তিমৎ। তত্তৎ কর্ম্ম চ নির্দ্দোষং ভূত্বা পূর্ণত্বমাপ্নুয়াৎ॥ ৬২॥ পিতৄনুদ্দিশ্য যঃ শ্রাদ্ধে গীতাপাঠং করোতি হি। সন্তুষ্টাঃ পিতরস্তস্য নিরয়াদ্ যান্তি স্বর্গতিম্॥ ৬৩॥ গীতাপাঠেন সন্তুষ্টাঃ পিতরঃ শ্রাদ্ধতর্পিতাঃ। পিতৃলোকং প্রয়াস্ত্যেব পুত্রাশীর্ব্বাদতৎপরাঃ॥ ৬৪॥ গীতাপুস্তকদানঞ্চ ধেনুপুচ্ছসমন্বিতম্। কৃত্বা চ তদ্দিনে সম্যক্ কৃতার্থো জায়তে

জনঃ ॥ ৬৫ ॥ পুস্তকং হেমসংযুক্তং গীতায়াঃ প্রকরোতি যঃ। দত্ত্বা বিপ্রায় বিদুষে জায়তে ন পুনর্ভবম্ ॥ ৬৬ ॥ শতপুস্তকদানঞ্চ গীতায়াঃ প্রকরোতি যঃ। স যাতি ব্রহ্মসদনং পুনরাবৃত্তিদুর্লভম্ ॥ ৬৭ ॥ গীতাদানপ্রভাবেণ সপ্তকল্প-মিতাঃ সমাঃ। বিষ্ণুলোকমবাপ্যান্তে বিষ্ণুনা সহ মোদতে ॥ ৬৮ ॥ সম্যক্ শ্রুত্বা চ গীতার্থং পুস্তকং যঃ প্রদাপয়েৎ। তস্মৈ প্রীতঃ শ্রীভগবান্ দদাতি মানসেপ্সিতম্ ॥ ৬৯ ॥ দেহং মানুষমাশ্রিত্য চাতুর্বর্ণ্যেষু ভারত। ন শৃণোতি ন পঠতি গীতামমৃতরূপিণীম্। হস্তাত্ত্যক্তামৃতং প্রাপ্তং স নরো বিষমশ্নুতে ॥ ৭০ ॥ জনঃ সংসারদুঃখার্ত্তো গীতাজ্ঞানং সমালভেৎ। পীত্বা গীতামৃতং লোকে লব্ধ্বা ভক্তিং সুখী ভবেৎ ॥ ৭১ ॥ গীতামাশ্রিত্য বহবো ভূভুজো জনকাদয়ঃ। নির্ধূতকল্মষা লোকে গতাস্তে পরমং পদম্ ॥ ৭২ ॥ গীতাসু ন বিশেষোঽস্তি জনেষূচ্চারকেষু চ। জ্ঞানেষ্বেব সমগ্রেষু সমা ব্রহ্ম-স্বরূপিণী ॥ ৭৩ ॥ যোঽভিমানেন গর্ব্বেণ গীতানিন্দাং করোতি চ। স যাতি নরকং ঘোরং যাবদাভূতসংপ্লবম্ ॥ ৭৪ ॥ অহঙ্কারেণ মূঢ়াত্মা গীতার্থং নৈব মন্যতে। কুম্ভীপাকেষু পচ্যেত যাবৎ কল্পক্ষয়ো ভবেৎ ॥ ৭৫ ॥ গীতার্থং বাচ্যমানং যো ন শৃণোতি সমীপতঃ। স শূকরভবাং যোনিমনেকামধি-গচ্ছতি ॥ ৭৬ ॥ চৌর্য্যং কৃত্বা চ গীতায়াঃ পুস্তকং যঃ সমানয়েৎ। ন তস্য সফলং কিঞ্চিৎ পঠনঞ্চ বৃথা ভবেৎ ॥ ৭৭ ॥ যঃ শ্রুত্বা নৈব গীতার্থং মোদতে পরমার্থতঃ। নৈব তস্য ফলং লোকে প্রমত্তস্য যথা শ্রমঃ ॥ ৭৮ ॥ গীতাং শ্রুত্বা হিরণ্যঞ্চ ভোজ্যং পট্টাম্বরং তথা। নিবেদয়েৎ প্রদানার্থং প্রীতয়ে পরমাত্মনঃ ॥ ৭৯ ॥ বাচকং পূজয়েদ্ভক্ত্যা দ্রব্যবস্ত্রাদ্যুপস্করৈঃ। অনেকৈর্বহুধা প্রীত্যা তুষ্যতাং ভগবান্ হরিঃ ॥ ৮০ ॥

সূত উবাচ। মাহাত্ম্যমেতদ্গীতায়াঃ কৃষ্ণপ্রোক্তং পুরাতনম্। গীতান্তে পঠতে যস্তু যথোক্তফলভাগ্ ভবেৎ ॥ ৮১ ॥ গীতায়াঃ পঠনং কৃত্বা মাহাত্ম্যং নৈব যঃ পঠেৎ। বৃথা পাঠফলন্তস্য শ্রম এব উদাহৃতঃ ॥ ৮২ ॥ এতন্মাহাত্ম্য-সংযুক্তং গীতাপাঠং করোতি যঃ। শ্রদ্ধয়া যঃ শৃণোত্যেব পরমাং গতিমাপ্নুয়াৎ ॥ ৮৩ ॥ শ্রুত্বা গীতামর্থযুক্তাং মাহাত্ম্যং যঃ শৃণোতি চ। তস্য পুণ্যফলং লোকে ভবেৎ সর্ব্বসুখাবহম্ ॥ ৮৪ ॥

ইতি শ্রীবৈষ্ণবীয়তন্ত্রসারে শ্রীমদ্ভগবদ্গীতামাহাত্ম্যং সমাপ্তম্।

ওঁ তৎসৎ ॥ শিবমস্তু ॥ ওঁ তৎসৎ ॥০॥

# শ্রীশ্রীচণ্ডী

## চণ্ডীপাঠ-সঙ্কল্পাদয়ঃ

পুণ্যাহবাচনাদি—ওঁ কর্ত্তব্যেঽস্মিন্ সকৃৎ ( ত্রিঃপঞ্চাবৃত্তি ইত্যাদি ) দেবী-মাহাত্ম্যপাঠকর্ম্মণি ওঁ পুণ্যাহং ভবন্তো ব্রুবন্তু ( বারত্রয়ং পাঠ্যম্ ) এবং স্বস্তি ভবন্তো ব্রুবন্তু, ঋদ্ধিং ভবন্তো ব্রুবন্তু। ততো যথাবেদং স্বস্তিসূক্তং সূর্য্যঃ সোম ইত্যাদি চ পঠিত্বা কুশ-তিল-পুষ্পজলপূর্ণং তাম্রপাত্রমাদায় উদঙ্মুখঃ সঙ্কল্পয়েৎ, যথা—

বিষ্ণুরোম্ তৎসৎ ওঁ অদ্য অমুকে মাসি ( অমুকরাশিস্থে ভাস্করে ) অমুকে পক্ষে অমুকতিথৌ অমুকগোত্রঃ শ্রীঅমুকদেবশর্ম্মা অমুকফলকামঃ অথবা শ্রীচণ্ডীপ্রীতিকামঃ শ্রীকৃষ্ণদ্বৈপায়নাভিধানমহর্ষি-বেদব্যাস প্রোক্ত-জয়াখ্য-মার্কণ্ডেয়-পুরাণান্তর্গত-সাবর্ণিক-মন্বন্তরীয়-ওঁ "মার্কণ্ডেয় উবাচ, সাবর্ণিঃ সূর্য্য-তনয়ো যো মনুঃ কথ্যতেঽষ্টম" ইত্যাদি "সূর্য্যাজ্জন্ম সমাসাদ্য সাবর্ণির্ভবিতা মনু"রোমিত্যন্তদেবী-মাহাত্ম্য-প্রকাশকগ্রন্থস্য একাবৃত্তি ( দ্ব্যাবৃত্তি ত্র্যাবৃত্তি পঞ্চাবৃত্তি বা দ্বিঃ ত্রিঃ পঞ্চকৃত্ব ইত্যাদি ) পাঠমহং করিষ্যে। ( পরার্থে অমুক-গোত্রস্য অমুকস্য করিষ্যামি ইতি বিশেষঃ। দক্ষিণাবাক্যঞ্চাপি অনেনৈব প্রকারেণ রচয়িতব্যম্ )।

---

## অথ চণ্ডীপাঠক্রমঃ

চণ্ডীপূজাবিধির্দ্বিতীয়খণ্ডে দ্রষ্টব্যঃ।

[ চণ্ডীপাঠনিয়মে মার্কণ্ডেয়ং প্রতি ব্রহ্মবাক্যম্ ]—

অর্গলং কীলকঞ্চাদৌ পঠিত্বা কবচং পঠেৎ। জপেৎ সপ্তশতীং পশ্চাৎ ক্রম এষ শিবোদিতঃ॥

অর্গলান্তেঽপি।—ইদং স্তোত্রং পঠিত্বা তু মহাস্তোত্রং পঠেন্নরঃ। সপ্তশতীং সমারাধ্য বরমাপ্নোতি দুর্লভম্॥

কবচমধ্যেঽপি।—জপেৎ সপ্তশতীং চণ্ডীং কৃত্বা কবচমাদিতঃ॥

মার্কণ্ডেয় উবাচ। ব্রহ্মন্ কেন প্রকারেণ দুর্গামাহাত্ম্যমুত্তমম্। শীঘ্রং সিধ্যতি তৎ সর্ব্বং কথয়স্ব মহামতে। অর্গলং কীদৃশং প্রোক্তং বিস্তরেণ বদস্ব তৎ। প্রসন্নো যদি মে ব্রহ্মন্ শ্রোতুং কৌতূহলং মহৎ॥

ব্রহ্মোবাচ। বিধায় পূজনং দেব্যা যথাশক্তি যথাবিধি। সমাহিতমনা ভূত্বা প্রপঠেদর্গলং ততঃ॥ অর্গলং পাপজাতস্য দারিদ্র্যস্য তথাপরম্। ইদমাদৌ পঠিত্বা তু পশ্চাৎ শ্রীচণ্ডিকাং জপেৎ॥ অর্গলং কীলকঞ্চাদৌ পঠিত্বা কবচং পঠেৎ। জপেৎ সপ্তশতীং পশ্চাৎ ক্রম এব শিবোদিতঃ॥

---

## অথ চণ্ডীপাঠনিয়মঃ

আধারে স্থাপয়িত্বা চ পুস্তকং বাচয়েৎ স্ফুটম্। হস্তে সংস্থাপনাদেব হরত্যর্দ্ধফলং যতঃ॥ যাবন্ন পূর্য্যতেঽধ্যায়স্তাবন্ন বিরমেৎ পঠন্। অনুক্রমং পঠেদ্দেবি শিরঃকম্পাদিকং ত্যজেৎ॥ যদি প্রমাদাদধ্যায়মধ্যে চ বিরমেৎ প্রিয়ে। পুনরধ্যায়মারভ্য পঠেৎ সর্ব্বস্তবে বিধিঃ॥ আদৌ চ প্রণবং জপ্ত্বা স্তোত্রং বা সংহিতাং পঠেৎ। অন্তে চ প্রণবং দদ্যাদিত্যুবাচাদিপূরুষঃ॥ শুদ্ধেনানন্যচিত্তেন পঠিতব্যং প্রযত্নতঃ। ন কার্য্যাসক্তমনসা কার্য্যং স্তোত্রস্য বাচনম্॥ স্বয়ঞ্চ লিখিতং যত্তু কৃতিনা লিখিতং ন যৎ। অব্রাহ্মণেন লিখিতং তচ্চাপি বিফলং ভবেৎ॥ সঙ্কল্পিতে স্তোত্রপাঠে সংখ্যাং কৃত্বা পঠেৎ সুধীঃ। ব্রাহ্মণং বাচকং বিদ্যান্নান্যবর্ণজমাদরাৎ॥ শ্রুত্বান্যবর্ণজাদ্রাজন্ বাচকান্নরকং ব্রজেৎ॥ দেব্যর্চ্চামগ্রতঃ কৃত্বা ব্রাহ্মণানাং বিশেষতঃ। গ্রন্থিঞ্চ শিথিলং কুর্য্যাদ্বাচকঃ কুরুনন্দন॥ পুনর্ব্বধ্নাতি তৎসূত্রং ন হস্ত্যা ধারয়েৎ কচিৎ। বিস্পষ্টমদ্রুতং শান্তং স্পষ্টাক্ষরপদস্তথা। কলস্বর-সমাযুক্তং রসভাবসমন্বিতম্। প্রদর্শয়ন্ রসান্ সর্ব্বান্ বাচয়েদ্ বাচকো নৃপ॥ নাতঃ পরতরং স্তোত্রং কিঞ্চিদস্তি বরাননে। । ভুক্তিমুক্তিপ্রদং পুণ্যং পাবনানাঞ্চ পাবনম্॥ অর্গলং দুরিতং হন্তি কীলকং ফলদং তথা। কবচং রক্ষতে নিত্যং চণ্ডিকা ত্রিতয়ং দিশেৎ॥ অর্গলং হৃদয়ে যস্য স চার্গলময়ঃ সদা। ভবিষ্যতীতি নিশ্চিত্য শিবেন রচিতং পুরা॥ কীলকং হৃদয়ে যস্য স কীলিতমনোরথঃ। ভবিষ্যতি ন সন্দেহো নান্যথা শিবভাষিতম্॥ কবচং হৃদয়ে যস্য স ব্রহ্মকবচঃ খলু। ব্রহ্মণা নির্ম্মিতং পূর্ব্বমিতি নিশ্চিত্য চেতসা॥ (যদ্ যৎ ফলবিশেষোদ্দেশেন যাবদাবৃত্তি পাঠ্যং তত্তৎসর্ব্বং দ্বিতীয়খণ্ডে দ্রষ্টব্যম্॥)

## চণ্ডীধ্যানম্

বিদ্যুদ্দামসমপ্রভাং মৃগপতিস্কন্ধস্থিতাং ভীষণাং, কন্যাভিঃ করবালখেটবিলসদ্ধস্তাভিরাসেবিতাম্। হস্তৈশ্চক্রবরাসিখেটবিশিখাংশ্চাপং গুণং তর্জ্জনীং, বিভ্রাণামনলাত্মিকাং শশিধরাং দুর্গাং ত্রিনেত্রাং ভজে ॥

অথবা—বন্ধূককুসুমাভাসাং পঞ্চমুণ্ডাধিবাসিনীম্। স্ফুরচ্চন্দ্রকলারত্নমুকুটাং মুণ্ডমালিনীম্। ত্রিনেত্রাং রক্তবসনাং পীনোন্নতঘটস্তনীম্। পুস্তকং চাক্ষমালাঞ্চ বরদঞ্চাভয়ং ক্রমাৎ। দধতীং সংস্মরেন্নিত্যমুত্তরাম্নায়মানিতাম্ ॥

অথবা—যা চণ্ডী মধুকৈটভাদিদৈত্যদলনী যা মাহিষোন্মূলনী, যা ধূম্রেক্ষণচণ্ডমুণ্ডমথনী যা রক্তবীজাশনী। শক্তিঃ শুম্ভনিশুম্ভদৈত্যদলনী যা সিদ্ধিলক্ষ্মীঃ পরা ( লক্ষ্মীশ্বরা ), সা দেবী নবকোটিমূর্ত্তিসহিতা মাম্পাতু বিশ্বেশ্বরী ॥

অথবা—মধ্যে সুধাব্ধি-মণিমণ্ডপ-রত্নবেদী-সিংহাসনোপরিগতাং পরিপীতবর্ণাম্। পীতাম্বরাং কনকভূষণমাল্যশোভাং,দেবীং ভজামি ধৃতমুদ্গরবৈরিজিহ্বাম্ ॥

অথবা—সিংহস্থা শশিশেখরা মরকতপ্রখ্যা চতুর্ভিভুর্জৈঃ, শঙ্খং চক্র-ধনুঃশরাংশ্চ দধতী নেত্রৈস্ত্রিভিঃ শোভিতা। আমুক্তাঙ্গদহার-কঙ্কণ-রণৎকাঞ্চীক্বণন্নূপুরা, দুর্গা দুর্গতিহারিণী ভবতু নো রত্নোল্লসৎকুণ্ডলা ॥

---

## শ্রীঅর্গলাস্তোত্র

অস্য শ্রীঅর্গলাস্তোত্র-মন্ত্রস্য বিষ্ণুর্ঋষিরনুষ্টুপ্ ছন্দঃ শ্রীমহালক্ষ্মীর্দেবতা, নবার্ণো মন্ত্রঃ শক্তির্মন্ত্রোদিতা দেব্যো বীজং সপ্তশতীমন্ত্রস্তত্ত্বং শ্রীজগদম্বাপ্রীতয়ে সপ্তশতীপাঠাঙ্গজপে বিনিয়োগঃ।

ওঁ নমশ্চণ্ডিকায়ৈ—[ ওঁ নারদ উবাচ। যা কাচিৎ ত্রিবিধা খ্যাতা সপ্তধা চৈব কীর্ত্তিতা। তস্যা ভেদা হ্যনন্তাশ্চ তন্মাহাত্ম্যং শুভং বদ ॥ ১ ॥

ব্রহ্মোবাচ। যা দেবী স্তূয়তে নিত্যং বিবিধৈর্ব্বেদপারগৈঃ। সা মে ভবতু জিহ্বাগ্রে ব্রহ্মরূপা সরস্বতী ॥ ২ ॥

মার্কণ্ডেয় উবাচ। ] জয় ত্বং দেবি চামুণ্ডে জয় ভূতাপহারিণি। জয় সর্ব্বগতে দেবি কালরাত্রি নমোঽস্তু তে ॥৩॥ জয়ন্তী মঙ্গলা কালী ভদ্রকালী কপালিনী। দুর্গা শিবা ক্ষমা ধাত্রী স্বাহা স্বধা নমোঽস্তু তে ॥৪॥ মধুকৈটভবিধ্বংসি বিধাতৃবরদে নমঃ। রূপং দেহি জয়ং দেহি যশো দেহি দ্বিষো জহি ॥ ৫ ॥ মহিষাসুরনির্নাশি ভক্তানাং সুখদে নমঃ। রূপং দেহি জয়ং দেহি যশো দেহি দ্বিষো জহি ॥৬॥ ধূম্রনেত্রবধে দেবি ধর্ম্মকামার্থদায়িনি। রূপং দেহি জয়ং দেহি যশো

দেহি দ্বিষো জহি ॥ ৭ ॥ রক্তবীজবধে দেবি চণ্ড-মুণ্ড-বিনাশিনি। রূপং দেহি জয়ং দেহি যশো দেহি দ্বিষো জহি ॥ ৮ ॥ নিশুম্ভ-শুম্ভ-নির্নাশি ত্রৈলোক্য-শুভদে নমঃ। রূপং দেহি জয়ং দেহি যশো দেহি দ্বিষো জহি ॥৯॥ বন্দিতাঙ্ঘ্রি-যুগে দেবি সর্ব্বসৌভাগ্যদায়িনি। রূপং দেহি জয়ং দেহি যশো দেহি দ্বিষো জহি ॥ ১০ ॥ অচিন্ত্যরূপচরিতে সর্ব্বশত্রুবিনাশিনি। রূপং দেহি জয়ং দেহি যশো দেহি দ্বিষো জহি ॥ ১১ ॥ নতেভ্যঃ সর্ব্বদা ভক্ত্যা চাপর্ণে দুরিতাপহে। রূপং দেহি জয়ং দেহি যশো দেহি দ্বিষো জহি ॥১২॥ স্তুবদ্ভ্যো ভক্তিপূর্ব্বং ত্বাং চণ্ডিকে ব্যাধিনাশিনি। রূপং দেহি জয়ং দেহি যশো দেহি দ্বিষো জহি ॥ ১৩ ॥ চণ্ডিকে সততং যে ত্বামর্চ্চয়স্তীহ ভক্তিতঃ। রূপং দেহি জয়ং দেহি যশো দেহি দ্বিষো জহি ॥১৪॥ দেহি সৌভাগ্যমারোগ্যং দেহি দেবি পরং সুখম্। রূপং দেহি জয়ং দেহি যশো দেহি দ্বিষো জহি ॥১৫॥ বিধেহি দেবি কল্যাণং বিধেহি বিপুলাং শ্রিয়ম্। রূপং দেহি জয়ং দেহি যশো দেহি দ্বিষো জহি ॥ ১৬ ॥ বিধেহি দ্বিষতাং নাশং বিধেহি বলমুচ্চকৈঃ। রূপং দেহি জয়ং দেহি যশো দেহি দ্বিষো জহি ॥ ১৭ ॥ সুরাসুরশিরোরত্ন-নিঘৃষ্টচরণাম্বুজে। রূপং দেহি জয়ং দেহি যশো দেহি দ্বিষো জহি ॥ ১৮ ॥ বিদ্যাবন্তং যশস্বন্তং লক্ষ্মীবন্তঞ্চ মাং কুরু। রূপং দেহি জয়ং দেহি যশো দেহি দ্বিষো জহি ॥ ১৯ ॥ দেবি প্রচণ্ডদোর্দ্দণ্ড-দৈত্যদর্পনিসূদিনি। রূপং দেহি জয়ং দেহি যশো দেহি দ্বিষো জহি ॥ ২০ ॥ প্রচণ্ডে দৈত্যদর্পঘ্নে চণ্ডিকে প্রণতায় মে। রূপং দেহি জয়ং দেহি যশো দেহি দ্বিষো জহি ॥ ২১ ॥ চতুর্ভুজে চতুর্বক্ত্র-সংস্তুতে পরমেশ্বরি। রূপং দেহি জয়ং দেহি যশো দেহি দ্বিষো জহি ॥ ২২ ॥ কৃষ্ণেন সংস্তুতে দেবি শশ্বদ্ভক্ত্যা সদাম্বিকে। রূপং দেহি জয়ং দেহি যশো দেহি দ্বিষো জহি ॥ ২৩ ॥ হিমাচল-সুতানাথ-সংস্তুতে পরমেশ্বরি। রূপং দেহি জয়ং দেহি যশো দেহি দ্বিষো জহি ॥ ২৪ ॥ ইন্দ্রাণীপতি-সদ্ভাব-পূজিতে পরমেশ্বরি। রূপং দেহি জয়ং দেহি যশো দেহি দ্বিষো জহি ॥ ২৫ ॥ দেবি ভক্তজনোদ্দাম-দত্তানন্দোদয়েঽম্বিকে। রূপং দেহি জয়ং দেহি যশো দেহি দ্বিষো জহি ॥২৬॥ ভার্য্যাং মনোরমাং দেহি মনোবৃত্ত্যনুসারিণীম্। রূপং দেহি জয়ং দেহি যশো দেহি দ্বিষো জহি ॥ ২৭ ॥ তারিণি দুর্গসংসার-সাগরস্যাচলোদ্ভবে। রূপং দেহি জয়ং দেহি যশো দেহি দ্বিষো জহি ॥ ২৮ ॥ ইদং স্তোত্রং পঠিত্বা তু মহাস্তোত্রং পঠেন্নরঃ। সপ্তশতীং সমারাধ্য বরমাপ্নোতি দুর্লভম্ ॥ ২৯ ॥

ইত্যর্গলাস্তবঃ।

## অথ কীলকম্

অস্য শ্রীকীলকমন্ত্রস্য শিব-ঋষিরনুষ্টুপ্ছন্দঃ শ্রীমহাসরস্বতী দেবতা শ্রীজগদম্বা-প্রীত্যর্থং সপ্তশতীপাঠাঙ্গজপে বিনিয়োগঃ।

ওঁ নমশ্চণ্ডিকায়ৈ। মার্কণ্ডেয় উবাচ। বিশুদ্ধজ্ঞানদেহায় ত্রিবেদীদিব্য-চক্ষুষে। শ্রেয়ঃপ্রাপ্তিনিমিত্তায় নমঃ সোমার্দ্ধধারিণে ॥ ১॥ সর্ব্বমেতদ্-বিজানীয়ান্মন্ত্রাণামপি কীলকম্। সোঽপি ক্ষেমমবাপ্নোতি সততং জপ্যতৎ-পরঃ ॥ ২ ॥ সিধ্যন্ত্যুচ্চাটনাদীনি কর্ম্মাণি সকলান্যপি। এতেন স্তুবতাং দেবি স্তোত্রমাত্রেণ সিধ্যতি ॥ ৩ ॥ ন মন্ত্রো নৌষধং তস্য ন কিঞ্চিদপি বিদ্যতে। বিনা জপ্যেন সিধ্যেত সর্ব্বমুচ্চাটনাদিকম্ ॥ ৪ ॥ সমগ্রাণ্যপি সেৎস্যন্তি লোকে শঙ্কামিমাং হরঃ। কৃত্বা নিমন্ত্রয়ামাস সর্ব্বমেবমিদং শুভম্ ॥ ৫ ॥ স্তোত্রং বৈ চণ্ডিকায়াস্তু তচ্চ গুহ্যং চকার সঃ। সমাপ্নোতি স্বপুণ্যেন তাং যথাবন্নি-মন্ত্রিণাম্ ॥ ৬ ॥ সোঽপি ক্ষেমমবাপ্নোতি সর্ব্বমেব ন সংশয়ঃ। কৃষ্ণায়াং বা চতুর্দ্দশ্যামষ্টম্যাং বা সমাহিতঃ ॥ ৭ ॥ দদাতি প্রতিগৃহ্লাতি নান্যথৈষা প্রসীদতি। ইত্থং রূপেণ কীলেন মহাদেবেন কীলিতম্ ॥ ৮ ॥ যো নিষ্কীলাং বিধায়ৈনাং চণ্ডীং জপতি নিত্যশঃ। স সিদ্ধঃ স গণঃ সোঽথ গন্ধর্ব্বো জায়তে ধ্রুবম্ ॥ ৯ ॥ ন চৈবাপাটবং তস্য ভয়ং ক্বাপি ন জায়তে। নাপমৃত্যুবশং যাতি মৃতে চ মোক্ষমাপ্নুয়াৎ ॥ ১০ ॥ জ্ঞাত্বা প্রারভ্য কুর্ব্বীত ন কুর্ব্বাণো বিনশ্যতি। ততো জ্ঞাত্বৈব সম্পূর্ণমিদং প্রারভ্যতে বুধৈঃ ॥ ১১ ॥ সৌভাগ্যাদি চ যৎ কিঞ্চিদ্-দৃশ্যতে ন মহাজনৈঃ। তৎ সর্ব্বং তৎপ্রসাদেন তেন জপ্যমিদং সদা ॥ ১২ ॥ শনৈস্তু জপ্যমানেঽস্মিন্ স্তোত্রে সম্পত্তিরুচ্চকৈঃ। ভবত্যেব সমগ্রাপি ততঃ প্রারভ্যমেব তৎ ॥ ১৩ ॥ ঐশ্বর্য্যং তৎপ্রসাদেন সৌভাগ্যারোগ্যমেব চ ॥ শত্রু-হানিঃ পরো মোক্ষঃ স্তূয়তে সা ন কিং জনৈঃ ॥ ১৪ ॥ চণ্ডিকাং হৃদয়েনাপি যঃ স্মরেৎ সততং নরঃ। হৃদ্যং কামমবাপ্নোতি হৃদি দেবী সদা বসেৎ ॥ ১৫ ॥ অগ্রতোঽমুং মহাদেবকৃতং কীলকবারণম্। নিষ্কীলঞ্চ তদা কৃত্বা পঠিতব্যং সমাহিতৈঃ ॥ ১৬ ॥

ইতি কীলকস্তবঃ।

---

## অথ চণ্ডীকবচম্

অস্য শ্রীদেবীকবচস্য ব্রহ্মা ঋষিরনুষ্টুপ্ ছন্দো মহিষমর্দ্দিন্যাদয়ো দেবতা অঙ্গন্যাসোক্তমাতরো বীজং দিগ্‌বন্ধদেবতাস্তত্ত্বং শ্রীদেবীপ্রীত্যর্থং সপ্তশতীপাঠাঙ্গজপে বিনিয়োগঃ।

ওঁ নমশ্চণ্ডিকায়ৈ। মার্কণ্ডেয় উবাচ। যদ্ গুহ্যং পরমং লোকে সর্ব্বরক্ষাকরং নৃণাম্। যন্ন কস্যচিদাখ্যাতং তন্মে ব্রূহি পিতামহ ॥ ১ ॥

ব্রহ্মোবাচ। অস্তি গুহ্যতমং বিপ্র। সর্ব্বভূতোপকারকম্। দেব্যাস্তু কবচং পুণ্যং তচ্ছৃণুষ মহামুনে ॥ ২ ॥ প্রথমং শৈলপুত্রীতি দ্বিতীয়ং ব্রহ্মচারিণী। তৃতীয়ং চণ্ডঘণ্টেতি (চন্দ্রঘণ্টেতি) কুষ্মাণ্ডেতি চতুর্থকম্ ॥ ৩ ॥ পঞ্চমং-স্কন্দমাতেতি ষষ্ঠং কাত্যায়নী তথা। সপ্তমং কালরাত্রীতি মহাগৌরীতি চাষ্টমম্ ॥ ৪ ॥ নবমং সিদ্ধিদাত্রীতি নবদুর্গাঃ প্রকীর্ত্তিতাঃ। উক্তান্যেতানি নামানি ব্রহ্মণৈব মহাত্মনা ॥ ৫ ॥ অগ্নিনা দহ্যমানাস্তু শত্রুমধ্যগতা রণে। বিষমে দুর্গমে চৈব ভয়ার্ত্তাঃ শরণং গতাঃ ॥ ৬ ॥ ন তেষাং জায়তে কিঞ্চিদশুভং রণসঙ্কটে। নাপদং তস্য পশ্যামি শোকদুঃখভয়ং ন হি ॥ ৭ ॥ যৈস্তু ভক্ত্যা স্মৃতা নিত্যং তেষামৃদ্ধিঃ প্রজায়তে। ॥৮॥ প্রেতসংস্থা চ চামুণ্ডা বারাহী মহিষাসনা। ঐন্দ্রী গজসমারূঢ়া বৈষ্ণবী গরুড়াসনা ॥ ৯ ॥ নারসিংহী মহাবীর্য্যা শিবদূতী মহাবলা। মাহেশ্বরী বৃষারূঢ়া কৌমারী শিখিবাহনা ॥ ১০ ॥ ব্রাহ্মী হংসসমারূঢ়া সর্ব্বাভরণভূষিতা। লক্ষ্মীঃ পদ্মাসনা দেবী পদ্মহস্তা হরিপ্রিয়া। শ্বেতরূপধরা দেবী ঈশ্বরী বৃষবাহনা ॥ ১১ ॥ ইত্যেতা মাতরঃ সর্ব্বাঃ সর্ব্বযোগসমন্বিতাঃ ॥ ১২ ॥ নানাভরণশোভাঢ্যা নানারত্নোপশোভিতাঃ। শ্রেষ্ঠৈশ্চ মৌক্তিকৈঃ সর্ব্বা দিব্যহারপ্রলম্বিভিঃ ॥ ১৩ ॥ ইন্দ্রনীলৈর্ম্মহানীলৈঃ পদ্মরাগৈঃ সুশোভনৈঃ। দৃশ্যন্তে রথমারূঢ়া দেব্যঃ ক্রোধসমাকুলাঃ ॥ ১৪ ॥ শঙ্খং চক্রং গদাং শক্তিং হলঞ্চ মুসলায়ুধম্। খেটকং তোমরঞ্চৈব পরশুং পাশমেব চ ॥১৫॥ কুন্তায়ুধং ত্রিশূলঞ্চ শার্ঙ্গমায়ুধমুত্তমম্। দৈত্যানাং দেহনাশায় ভক্তানামভয়ায় চ ॥ ১৬ ॥ ধারয়ন্ত্যায়ুধানীত্থং দেবানাঞ্চ হিতায় বৈ। নমস্তেঽস্তু মহারৌদ্রে মহাঘোরপরাক্রমে ॥ ১৭ ॥ মহাবলে মহোৎসাহে মহাভয়বিনাশিনি। ত্রাহি মাং দেবি দুষ্প্রেক্ষ্যে শত্রূণাং ভয়বর্দ্ধিনি ॥ ১৮ ॥ প্রাচ্যাং রক্ষতু মামৈন্দ্রী আগ্নেয্যামগ্নিদেবতা। দক্ষিণেঽবতু বারাহী নৈর্ঋত্যাং খড়্গধারিণী ॥ ১৯ ॥ প্রতীচ্যাং বারুণী রক্ষেদ্ বায়ব্যাং বায়ুদেবতা। উদীচ্যাং পাতু কৌবেরী

ঐশান্যাং শূলধারিণী ॥ ২০ ॥ ঊর্দ্ধং ব্রহ্মাণী মে রক্ষেদধস্তাদ্ বৈষ্ণবী তথা। এবং দশ দিশো রক্ষেচ্চামুণ্ডা শববাহনা ॥ ২১ ॥ জয়া মে চাগ্রতঃ পাতু বিজয়া পাতু পৃষ্ঠতঃ। অজিতা বামপার্শ্বে তু দক্ষিণে চাপরাজিতা ॥ ২২ ॥ শিখাং মে দ্যোতিনী রক্ষেদুমা মূর্দ্ধ্নি ব্যবস্থিতা। মালাধরী ললাটে চ ভ্রুবৌ রক্ষেদ্ যশস্বিনী ॥ ২৩ ॥ নেত্রয়োশ্চিত্রনেত্রা চ যমঘণ্টা চ পার্শ্বকে। ত্রিনেত্রা চ ত্রিশূলেন ভ্রুবোর্ম্মধ্যে চ চণ্ডিকা ॥ ২৪ ॥ শঙ্খিনী চক্ষুষোর্ম্মধ্যে শ্রোত্রয়োর্দ্বার-বাসিনী ॥ কপোলৌ কালিকা রক্ষেৎ কর্ণমূলে তু শাঙ্করী ॥ ২৫ ॥ নাসিকায়াং সুগন্ধা চ উত্তরোষ্ঠে চ চর্চ্চিকা। অধরে চামৃতা বালা জিহ্বায়াঞ্চ সরস্বতী ॥২৬॥ দন্তান্ রক্ষতু কৌমারী কণ্ঠদেশে তু চণ্ডিকা। ঘণ্টিকাং চিত্রঘণ্টা চ মহামায়া চ তালুকে ॥ ২৭ ॥ কামাখ্যা চিবুকং রক্ষেদ্ বাচং মে সর্ব্বমঙ্গলা। গ্রীবায়াং ভদ্রকালী চ পৃষ্ঠবংশে ধনুর্দ্ধরী ॥ ২৮ ॥ নীলগ্রীবা বহিঃকণ্ঠে নলিকাং নল-কূবরী। খড়্গধারিণ্যুভৌ স্কন্ধৌ বাহূ মে বজ্রধারিণী ॥ ২৯ ॥ হস্তয়োর্দণ্ডিনী রক্ষেদম্বিকা চাঙ্গুলীষু চ। নখান্ সুরেশ্বরী রক্ষেৎ কুক্ষৌ রক্ষেন্নরেশ্বরী ॥৩০॥ স্তনৌ রক্ষেন্মহাদেবী মনঃ শোকবিনাশিনী। হৃদয়ে ললিতা দেবী উদরে শূলধারিণী ॥ ৩১ ॥ নাভৌ চ কামিনী রক্ষেদ্ গুহ্যং গুহ্যেশ্বরী তথা। মেঢ্রং রক্ষতু দুর্গন্ধা পায়ুং মে গুহ্যবাসিনী ॥ ৩২ ॥ কট্যাং ভগবতী রক্ষেদূরূ মে মেঘবাহনা। জঙ্ঘে মহাবলা রক্ষেজ্জানূ মাধবনায়িকা ॥ ৩৩ ॥ গুল্ফয়োর্নারসিংহী চ পাদপৃষ্ঠে তু কৌশিকী। পাদাঙ্গুলীষু শ্রী রক্ষেত্তলং পাতাল-বাসিনী ॥ ৩৪ ॥ নখান্ দংষ্ট্রাকরালী চ কেশাংশ্চৈবোর্দ্ধকেশিনী। রোম-কূপেষু কৌমারী ত্বচং যোগেশ্বরী তথা ॥ ৩৫ ॥ রক্তমজ্জাবসামাংসাস্থি-মেদাংসি পার্ব্বতী। অন্ত্রাণি কালরাত্রী চ পিত্তঞ্চ মুকুটেশ্বরী ॥ ৩৬ ॥ পদ্মাবতী পদ্মকোষে কক্ষে চূড়ামণিস্তথা। জ্বালামুখী নখজ্বালামভেদ্যা সর্ব্বসন্ধিষু ॥৩৭॥ শুক্রং ব্রহ্মাণী মে রক্ষেচ্ছায়াং ছত্রেশ্বরী তথা। অহঙ্কারং মনোবুদ্ধিং রক্ষেন্মে ধর্ম্মধারিণী ॥ ৩৮ ॥ প্রাণাপানৌ তথা ব্যানমুদানঞ্চ সমানকম্। বজ্রহস্তা চ মে রক্ষেৎ প্রাণান্ কল্যাণশোভনা ॥ ৩৯ ॥ রসে রূপে চ গন্ধে চ শব্দ-স্পর্শে চ যোগিনী। সত্ত্বং রজস্তমশ্চৈব রক্ষেন্নারায়ণী সদা ॥ ৪০ ॥ আয়ু রক্ষতু বারাহী ধর্ম্মং রক্ষতু পার্ব্বতী। যশঃ কীর্ত্তিঞ্চ লক্ষ্মীঞ্চ সদা রক্ষতু বৈষ্ণবী ॥ ৪১ ॥ গোত্রমিন্দ্রাণী মে রক্ষেৎ পশূন্ রক্ষেচ্চ চণ্ডিকা। পুত্রান্ রক্ষেন্মহালক্ষ্মীর্ভার্য্যাং রক্ষতু ভৈরবী ॥৪২॥ ধনেশ্বরী ধনং রক্ষেৎ কৌমারী কন্যকাং তথা। পন্থানং সুপথা রক্ষেন্মার্গং ক্ষেমকরী তথা ॥ ৪৩ ॥ রাজদ্বারে মহালক্ষ্মীর্ব্বিজয়া সর্ব্বতঃ স্থিতা।

রক্ষাহীনন্তু যৎ স্থানং বর্জ্জিতং কবচেন তু ॥ ৪৪ ॥ তৎ সর্ব্বং রক্ষ মে দেবি জয়ন্তী পাপনাশিনী। সর্ব্বরক্ষাকরং পুণ্যং কবচং সর্ব্বদা জপেৎ ॥ ৪৫ ॥ ইদং রহস্যং বিপ্রর্ষে ভক্ত্যা তব ময়োদিতম্। পাদমেকং ন গচ্ছেত্তু যদীচ্ছেচ্ছুভমাত্মনঃ ॥ ৪৬ ॥ কবচেনাবৃতো নিত্যং যত্র যত্রৈব গচ্ছতি। তত্র তত্রার্থলাভশ্চ বিজয়ঃ সার্ব্বকালিকঃ ॥ ৪৭ ॥ যং যং চিন্তয়তে কামং তং তং প্রাপ্নোতি নিশ্চিতম্। পরমৈশ্বর্য্যমতুলং প্রাপ্স্যতে ভূতলে পুমান্ ॥ ৪৮ ॥ নির্ভয়ো জায়তে মর্ত্ত্যঃ সংগ্রামেষ্বপরাজিতঃ। ত্রৈলোক্যে তু ভবেৎ পূজ্যঃ কবচেনাবৃতঃ পুমান্ ॥ ৪৯ ॥ ইদন্তু দেব্যাঃ কবচং দেবানামপি দুর্লভম্। যঃ পঠেৎ প্রয়তো নিত্যং ত্রিসন্ধ্যং শ্রদ্ধয়ান্বিতঃ ॥ ৫০ ॥ দেবী বশ্যা ভবেত্তস্য ত্রৈলোক্যে চাপরাজিতঃ। জীবেদ্ বর্ষশতং সাগ্রমপমৃত্যুবিবর্জ্জিতঃ ॥ ৫১ ॥ নশ্যন্তি ব্যাধয়ঃ সর্ব্বে লূতাবিস্ফোটকাদয়ঃ। স্থাবরং জঙ্গমং বাপি কৃত্রিমং বাপি যদ্ বিষম্ ॥ ৫২ ॥ আভিচারাণি সর্ব্বাণি মন্ত্রযন্ত্রাণি ভূতলে। ভূচরাঃ খেচরাশ্চৈব কুলজাশ্চোপদেশজাঃ ॥ ৫৩ ॥ সহজাঃ কুলিকা নাগা ডাকিনী শাকিনী তথা। অন্তরীক্ষচরা ঘোরা ডাকিন্যশ্চ মহারবাঃ ॥ ৫৪ ॥ গ্রহভূতপিশাচাশ্চ যক্ষগন্ধর্ব্বরাক্ষসাঃ। ব্রহ্মরাক্ষসবেতালাঃ কুষ্মাণ্ডা ভৈরবাদয়ঃ ॥ ৫৫ ॥ নশ্যন্তি দর্শনাত্তস্য কবচেনাবৃতো হি যঃ। মানোন্নতির্ভবেদ্রাজ্ঞাং তেজোবৃদ্ধিঃ পরা ভবেৎ ॥ ৫৬ ॥ যশোবৃদ্ধির্ভবেৎ পুংসাং কীর্ত্তিবৃদ্ধিশ্চ জায়তে। তস্মাজ্জপেৎ সদা ভক্তঃ কবচং কামদং মুনে ॥ ৫৭ ॥ জপেৎ সপ্তশতীং চণ্ডীং কৃত্বা তু কবচং পুরা। নির্বিঘ্নেন ভবেৎ সিদ্ধিশ্চণ্ডীজপসমুদ্ভবা ॥ ৫৮ ॥ যাবদ্‌ভূমণ্ডলং ধত্তে সশৈলবনকাননম্। তাবত্তিষ্ঠতি মেদিন্যাং সন্ততিঃ পুত্রপৌত্রিকী ॥ ৫৯ ॥ দেহান্তে পরমং স্থানং সুরৈরপি সুদুর্লভম্। প্রাপ্নোতি পুরুষো নিত্যং মহামায়াপ্রসাদতঃ ॥ ৬০ ॥ তত্র গচ্ছতি গত্বাসৌ পুনশ্চাগমনং ন হি। লভতে পরমং স্থানং শিবেন সমতাং ব্রজেৎ ॥ ৬১ ॥

ইতি শ্রীমার্কণ্ডেয়পুরাণে হরিহরব্রহ্মবিরচিতং দেব্যাঃ কবচং সমাপ্তম্।

ওঁ তৎ সৎ।

---

## অথ দেবীসূক্তপাঠঃ

ওঁ নমশ্চণ্ডিকায়ৈ। ওঁ মধ্যে সুধাব্ধি-মণিমণ্ডপ-রত্নবেদী-সিংহাসনোপরিগতাং পরিপীতবর্ণাম্। পীতাম্বরাং কনকভূষণমাল্যশোভাং, দেবীং ভজামি ধৃতমুদ্গরবৈরিজিহ্বাম্ ॥

অহং রুদ্রেভিরিত্যস্য ব্রহ্মাদ্যা ঋষয়ো গায়ত্র্যাদানি ছন্দাংসি আত্মাদেবী দেবতা দেবীসূক্তজপে বিনিয়োগঃ।

---

## অথ দেবীসুক্তম্

ওঁ অহং রুদ্রেভির্ব্বসুভিশ্চরাম্যহমাদিত্যৈরুত বিশ্বদেবৈঃ। অহং মিত্রাবরুণোভা বিভর্ম্যহমিন্দ্রাগ্নী অহমশ্বিনোভা॥ ১॥ অহং সোমমাহনসং বিভর্ম্যহং, ত্বষ্টারমুত পূষণং ভগম্। অহং দধামি দ্রবিণং হবিষ্মতে, সুপ্রাব্যে যজমানায় সুন্বতে॥ ২॥ অহং রাষ্ট্রী সঙ্গমনী বসূনাং, চিকিতুষী প্রথমা যজ্ঞিয়ানাম্। তাং মাং দেবা ব্যদধুঃ পুরুত্রা, ভূরিস্থাত্রাং ভূর্য্যাবেশয়ন্তীম্॥ ৩॥ ময়া সো অন্নমত্তি যো বিপশ্যতি, যঃ প্রাণিতি য ঈং শৃণোত্যুক্তম্। অমন্তবো মাং ত উপক্ষিয়ন্তি, শ্রুধি শ্রুত শ্রদ্ধিবন্তে বদামি॥৪॥ অহমেব স্বয়মিদং বদামি জুষ্টং, দেবেভিরুত মানুষেভিঃ। যং যং কাময়ে তং তমুগ্রং কৃণোমি, তং ব্রহ্মাণং তমৃষিং তং সুমেধাম্॥ ৫॥ অহং রুদ্রায় ধনুরাতনোমি, ব্রহ্মদ্বিষে শরবে হন্তবা উ। অহং জনায় সমদং কৃণোম্যহং, দ্যাবাপৃথিবী আবিবেশ হ॥ ৬॥ অহং সুবে পিতরমস্য মূর্দ্ধন্ মম যোনিরপ্স্বন্তঃ সমুদ্রে। ততো বিতিষ্ঠে ভুবনানুবিশ্বা উতামূন্দ্যাং বর্ষ্মণোপস্পৃশামি॥ ৭॥ অহমেব বাত ইব প্রবাম্যারভমাণা ভুবনানি বিশ্বা। পরো দিবা পর এনা পৃথিব্যৈ—তাবতী মহিনা সংবভূব ওঁ॥ ৮॥

ইতি দেবীসূক্তম্।

---

## ত্রিচরিত্যা ঋষিচ্ছন্দোদৈবতানি

প্রথমচরিতস্য ব্রহ্মঋষির্মহাকালী দেবতা গায়ত্রী ছন্দো নন্দা শক্তী রক্তদন্তিকা বীজমগ্নিস্তত্ত্বং (ঋগ্‌বেদস্বরূপ) মহাকালীপ্রীত্যর্থং জপে বিনিয়োগঃ। ওঁ খড়্গং চক্রগদেষু-চাপপরিঘান্ শূলং ভুশুণ্ডীং শিরঃ, শঙ্খং সন্দধতীং করৈস্ত্রিনয়নাং সর্ব্বাঙ্গভূষাবৃতাম্। যামস্তৌৎ স্বপিতে হরৌ কমলজো হন্তুং মধুং কৈটভং, নীলাশ্মদ্যুতিমাস্যপাদদশকাং সেবে মহাকালিকাম্॥ (ধ্যানান্তরং দ্বিতীয়খণ্ডে দ্রষ্টব্যম্।)

মধ্যমচরিতস্য বিষ্ণুঋষির্মহালক্ষ্মীর্দ্দেবতা উষ্ণিক্ ছন্দঃ শাকম্ভরী শক্তিদূর্গা

বীজং বায়ুস্তত্ত্বং (যজুর্বেদস্বরূপ) মহালক্ষ্মীপ্রীত্যর্থং জপে বিনিয়োগঃ। ওঁ অক্ষস্রক্-পরশুং গদেষু-কুলিশং পদ্মং ধনুঃ কুণ্ডিকাং, দণ্ডং শক্তিমসিঞ্চ চর্ম জলজং ঘণ্টাং সুরাভাজনম্। শূলং পাশসুদর্শনঞ্চ দধতীং হস্তৈঃ প্রবালপ্রভাং, সেবে সৈরিভ-মর্দ্দিনীমিহ মহালক্ষ্মীং সরোজস্থিতাম্॥ (ধ্যানান্তরং দ্বিতীয়খণ্ডে অনুসন্ধেয়ম্।)

উত্তরচরিতস্য রুদ্রঋষির্মহাসরস্বতী দেবতা অনুষ্টুপ্ ছন্দো ভীমা শক্তির্ভ্রামরী বীজং সূর্য্যস্তত্ত্বং (সামবেদস্বরূপ) মহাসরস্বতীপ্রীত্যর্থং জপে বিনিয়োগঃ। ওঁ সিংহস্থা শশিশেখরা মরকতপ্রখ্যা চতুর্ভির্ভুজৈঃ, শঙ্খং চক্রধনুঃশরাংশ্চ দধতী নেত্রৈস্ত্রিভিঃ শোভিতা। আমুক্তাঙ্গদ-হার-কঙ্কণ-রণৎ-কাঞ্চীক্বণন্নূপুরা, দুর্গা দুর্গতিহারিণী ভবতু নো রত্নোল্লসৎকুণ্ডলা॥ (ধ্যানান্তরং দ্বিতীয়খণ্ডে দ্রষ্টব্যম্।) ততো যথাবিধি মায়াবীজেন প্রাণায়ামং কৃত্বা করাঙ্গন্যাসৌ বিধায়—

ওঁ নারায়ণং নমস্কৃত্য নরঞ্চৈব নরোত্তমম্।
দেবীং সরস্বতীঞ্চৈব ততো জয়মুদীরয়েৎ॥

ওঁ নারায়ণায় নমঃ। ওঁ নরায় নমঃ। ওঁ নরোত্তমায় নমঃ। ওঁ দেব্যৈ সরস্বত্যৈ নমঃ। ওঁ বেদব্যাসায় নমঃ। ওঁ ব্রহ্মণে নমঃ। ওঁ ব্রাহ্মণেভ্যো নমঃ। ওঁ তৎসৎ। ইতি নত্বা পঠেৎ।

দেবীমাহাত্ম্যাপরনামা

# শ্রীশ্রীচণ্ডী

---

## প্রথম-চরিতম্

ওঁ নমশ্চণ্ডিকায়ৈ নমঃ। ওঁ মার্কণ্ডেয় উবাচ ॥ ১ ॥ সাবর্ণিঃ সূর্য্যতনয়ো যো মনুঃ কথ্যতেঽষ্টমঃ। নিশাময় তদুৎপত্তিং বিস্তরাদ্গদতো মম ॥ ২ ॥ মহামায়ানুভাবেন যথা মন্বন্তরাধিপঃ। স বভূব মহাভাগঃ সাবর্ণিস্তনয়ো রবেঃ ॥ ৩ ॥ স্বারোচিষেঽন্তরে পূর্ব্বং চৈত্রবংশসমুদ্ভবঃ। সুরথো নাম রাজাঽভূৎ সমস্তে ক্ষিতিমণ্ডলে ॥ ৪ ॥ তস্য পালয়তঃ সম্যক্ প্রজাঃ পুত্রানিবৌরসান্। বভূবুঃ শত্রবো ভূপাঃ কোলাবিধ্বংসিনস্তথা ॥ ৫ ॥ তস্য তৈরভবদ্ যুদ্ধমতি-প্রবলদণ্ডিনঃ। ন্যূনৈরপি স তৈর্যুদ্ধে কোলাবিধ্বংসিভির্জ্জিতঃ ॥ ৬ ॥ ততঃ স্বপুরমায়াতো নিজদেশাধিপোঽভবৎ। আক্রান্তঃ স মহাভাগস্তৈস্তদা প্রবলারিভিঃ ॥ ৭ ॥ অমাত্যৈর্ব্বলিভির্দুষ্টৈর্দুর্ব্বলস্য দুরাত্মভিঃ। কোষো বলঞ্চাপহৃতং তত্রাপি স্বপুরে ততঃ ॥ ৮ ॥ ততো মৃগয়াব্যাজেন হৃতস্বাম্যঃ স ভূপতিঃ। একাকী হয়মারুহ্য জগাম গহনং বনম্ ॥ ৯ ॥ স তত্রাশ্রমমদ্রাক্ষীদ্ দ্বিজবর্য্যস্য মেধসঃ। প্রশান্তশ্বাপদাকীর্ণং মুনিশিষ্যোপশোভিতম্ ॥ ১০ ॥ তস্থৌ কঞ্চিৎ স কালঞ্চ মুনিনা তেন সৎকৃতঃ। ইতশ্চেতশ্চ বিচরংস্তস্মিন্ মুনিবরাশ্রমে ॥ ১১ ॥ সোঽচিন্তয়ত্তদা তত্র মমত্বাকৃষ্টচেতনঃ। মৎপূর্ব্বৈঃ পালিতং পূর্ব্বং ময়া হীনং পুরং হি তৎ ॥ ১২ ॥ মদ্ভৃত্যৈস্তৈরসদ্বৃত্তৈর্ধর্ম্মতঃ পাল্যতে ন বা। ন জানে স প্রধানো মে শূরহস্তী সদামদঃ ॥ ১৩ ॥ মম বৈরিবশং যাতঃ কান্ ভোগানুপলপ্স্যতে। যে মমানুগতা নিত্যং প্রসাদধনভোজনৈঃ ॥ ১৪ ॥ অনুবৃত্তিং ধ্রুবং তেঽদ্য কুর্ব্বন্ত্যন্যমহীভৃতাম্। অসম্যগ্ব্যয়শীলৈস্তৈঃ কুর্ব্বদ্ভিঃ সততং ব্যয়ম্ ॥ ১৫ ॥ সঞ্চিতঃ সোঽতিদুঃখেন ক্ষয়ং কোষো গমিষ্যতি। এতচ্চান্যচ্চ সততং চিন্তয়ামাস পার্থিবঃ ॥ ১৬ ॥ তত্র বিপ্রাশ্রমাভ্যাসে বৈশ্যমেকং দদর্শ সঃ। স পৃষ্টস্তেন কস্ত্বং ভো হেতুশ্চাগমনেঽত্র কঃ ॥ ১৭ ॥ সশোক ইব কস্মাত্ত্বং দুর্ম্মনা ইব লক্ষ্যসে।

ইত্যাকর্ণ্য বচস্তস্য ভূপতেঃ প্রণয়োদিতম্॥ ১৮॥ প্রত্যুবাচ স তং বৈশ্যঃ প্রশ্রয়াবনতো নৃপম্॥ ১৯॥

বৈশ্য উবাচ॥ ২০॥ সমাধির্নাম বৈশ্যোঽহমুৎপন্নো ধনিনাং কুলে॥ ২১॥ পুত্রদারৈর্নিরস্তশ্চ ধনলোভাদসাধুভিঃ। বিহীনশ্চ ধনৈর্দারৈঃ পুত্রৈরাদায় মে ধনম্॥ ২২॥ বনমভ্যাগতো দুঃখী নিরস্তশ্চাপ্তবন্ধুভিঃ। সোঽহং ন বেদ্মি পুত্রাণাং কুশলাকুশলাত্মিকাম্॥ ২৩॥ প্রবৃত্তিং স্বজনানাঞ্চ দারাণাঞ্চাত্র সংস্থিতঃ। কিন্নু তেষাং গৃহে ক্ষেমমক্ষেমং কিন্নু সাম্প্রতম্॥ ২৪॥ কথন্তে কিন্নু সদ্বৃত্তা দুর্ব্বৃত্তাঃ কিন্নু মে সুতাঃ॥ ২৫॥

রাজোবাচ॥ ২৬॥ যৈর্নিরস্তো ভবাঁল্লুব্ধৈঃ পুত্রদারাদিভির্ধনৈঃ॥ ২৭॥ তেষু কিং ভবতঃ স্নেহমনুবধ্নাতি মানসম্॥ ২৮॥

বৈশ্য উবাচ॥ ২৯॥ এবমেতদ্ যথা প্রাহ ভবানস্মদ্‌গতং বচঃ॥ ৩০॥ কিং করোমি ন বধ্নাতি মম নিষ্ঠুরতাং মনঃ। যৈঃ সন্ত্যজ্য পিতৃস্নেহং ধনলুব্ধৈর্নিরাকৃতঃ॥ ৩১॥ পতিস্বজনহার্দ্দঞ্চ হার্দ্দি তেষ্বেব মে মনঃ। কিমেতন্নাভিজানামি জানন্নপি মহামতে॥ ৩২॥ যৎ প্রেমপ্রবণং চিত্তং বিগুণেষ্বপি বন্ধুষু। তেষাং কৃতে মে নিঃশ্বাসো দৌর্ম্মনস্যঞ্চ জায়তে॥ ৩৩॥ করোমি কিং যন্ন মনস্তেষ্বপ্রীতিষু নিষ্ঠুরম্॥ ৩৪॥

মার্কণ্ডেয় উবাচ॥৩৫॥ ততস্তৌ সহিতৌ বিপ্র তং মুনিং সমুপস্থিতৌ॥ ৩৬॥ সমাধির্নাম বৈশ্যোঽসৌ স চ পার্থিবসত্তমঃ। কৃত্বা তু তৌ যথান্যায়ং যথার্হং তেন সংবিদম্॥ ৩৭॥ উপবিষ্টৌ কথাঃ কাশ্চিচ্চক্রতুর্বৈশ্যপার্থিবৌ॥ ৩৮॥

রাজোবাচ॥ ৩৯॥ ভগবংস্ত্বামহং প্রষ্টুমিচ্ছাম্যেকং বদস্ব তৎ॥ ৪০॥ দুঃখায় যন্মে মনসঃ স্বচিত্তায়ত্ততাং বিনা। মমত্বং মম রাজ্যস্য রাজ্যাঙ্গেষ্বখিলেষ্বপি॥ ৪১॥ জানতোঽপি যথাজ্ঞস্য কিমেতন্মুনিসত্তম। অয়ঞ্চ নিকৃতঃ পুত্রৈর্দ্দারৈর্ভৃত্যৈস্তথোজ্ঝিতঃ॥ ৪২॥ স্বজনেন চ সন্ত্যক্তস্তেষু হার্দ্দী তথাপ্যতি। এবমেষ তথাহঞ্চ দ্বাবপ্যত্যন্তদুঃখিতৌ॥৪৩॥ দৃষ্টদোষেঽপি বিষয়ে মমত্বাকৃষ্টমানসৌ। তৎ কেনৈতন্মহাভাগ যন্মোহো জ্ঞানিনোরপি॥ ৪৪॥ মমাস্য চ ভবত্যেষা বিবেকান্ধস্য মূঢ়তা॥ ৪৫॥

ঋষিরুবাচ॥৪৬॥ জ্ঞানমস্তি সমস্তস্য জন্তোর্ব্বিষয়গোচরে॥ ৪৭॥ বিষয়শ্চ মহাভাগ যাতি চৈবং পৃথক্ পৃথক্। দিবান্ধাঃ প্রাণিনঃ কেচিদ্রাত্রাবন্ধাস্তথাপরে॥ ৪৮॥ কেচিদ্দিবা তথা রাত্রৌ প্রাণিনস্তুল্যদৃষ্টয়ঃ। জ্ঞানিনো মনুজাঃ সত্যং কিন্তু তে ন হি কেবলম্॥৪৯॥ যতো হি জ্ঞানিনঃ সর্ব্বে পশুপক্ষিমৃগাদয়ঃ।

জ্ঞানঞ্চ তন্মনুষ্যাণাং যত্তেষাং মৃগপক্ষিণাম্॥ ৫০॥ মনুষ্যাণাঞ্চ যত্তেষাং তুল্যমন্যত্তথোভয়োঃ। জ্ঞানেঽপি সতি পশ্যৈতান্ পতগাঞ্ছাবচঞ্চুষু॥ ৫১॥ কণমোক্ষাদৃতান্ মোহাৎ পীড্যমানানপি ক্ষুধা। মানুষা মনুজব্যাঘ্র সাভিলাষাঃ সুতান্ প্রতি॥৫২॥ লোভাৎ প্রত্যুপকারায় নন্বেতে কিং ন পশ্যসি। তথাপি মমতাবর্ত্তে মোহগর্ত্তে নিপাতিতাঃ॥ ৫৩॥ মহামায়াপ্রভাবেণ সংসারস্থিতিকারিণঃ। তন্নাত্র বিস্ময়ঃ কার্য্যো যোগনিদ্রা জগৎপতেঃ॥ ৫৪॥ মহামায়া হরেশ্চৈতত্তয়া সংমোহ্যতে জগৎ। জ্ঞানিনামপি চেতাংসি দেবী ভগবতী হি সা॥ ৫৫॥ বলাদাকৃষ্য মোহায় মহামায়া প্রযচ্ছতি। তয়া বিসৃজ্যতে বিশ্বং জগদেতচ্চরাচরম্॥৫৬॥ সৈষা প্রসন্না বরদা নৃণাং ভবতি মুক্তয়ে॥ ৫৬॥ সা বিদ্যা পরমা মুক্তের্হেতুভূতা সনাতনী॥ ৫৭॥ সংসার-বন্ধহেতুশ্চ সৈব সর্ব্বেশ্বরেশ্বরী॥ ৫৮॥

রাজোবাচ॥ ৫৯॥ ভগবন্ কা হি সা দেবী মহামায়েতি যাং ভবান্॥ ৬০॥ ব্রবীতি কথমুৎপন্না সা কর্ম্মাঽস্যাশ্চ কিং দ্বিজ। যৎস্বভাবা চ সা দেবী যৎস্বরূপা যদুদ্ভবা॥ ৬১॥ তৎ সর্ব্বং শ্রোতুমিচ্ছামি ত্বত্তো ব্রহ্মবিদাংবর॥ ৬২॥

ঋষিরুবাচ॥ ৬৩॥ নিত্যৈব সা জগন্মূর্ত্তিস্তয়া সর্ব্বমিদং ততম্॥ ৬৪॥ তথাপি তৎসমুৎপত্তির্বহুধা শ্রূয়তাং মম। দেবানাং কার্য্যসিদ্ধ্যর্থমাবির্ভবতি সা যদা॥ ৬৫॥ উৎপন্নেতি তদা লোকে সা নিত্যাপ্যভিধীয়তে। যোগনিদ্রাং যদা বিষ্ণুর্জ্জগত্যেকার্ণবীকৃতে॥ ৬৬॥ আস্তীর্য্য শেষমভজৎ কল্পান্তে ভগবান্ প্রভুঃ। তদা দ্বাবসুরৌ ঘোরৌ বিখ্যাতৌ মধুকৈটভৌ॥ ৬৭॥ বিষ্ণুকর্ণমলোদ্ভূতৌ হন্তুং ব্রহ্মাণমুদ্যতৌ। স নাভিকমলে বিষ্ণোঃ স্থিতো ব্রহ্মা প্রজাপতিঃ॥ ৬৮॥ দৃষ্ট্বা তাবসুরৌ চোগ্রৌ প্রসুপ্তঞ্চ জনার্দ্দনম্। তুষ্টাব যোগনিদ্রাং তামেকাগ্রহৃদয়স্থিতঃ॥ ৬৯॥ বিবোধনার্থায় হরের্হরিনেত্রকৃতা-লয়াম্। বিশ্বেশ্বরীং জগদ্ধাত্রীং স্থিতিসংহারকারিণীম্।॥৭০॥ নিদ্রাং ভগবতীং বিষ্ণোরতুলাং তেজসঃ প্রভুঃ॥ ৭১॥

ব্রহ্মোবাচ॥ ৭২॥ ত্বং স্বাহা ত্বং স্বধা ত্বং হি বষট্‌কারস্বরাত্মিকা॥ ৭৩॥ সুধা ত্বমক্ষরে নিত্যে ত্রিধা মাত্রাত্মিকা স্থিতা। অর্দ্ধমাত্রাস্থিতা নিত্যা যানুচ্চার্য্যা বিশেষতঃ॥ ৭৪॥ ত্বমেব সা ত্বং সাবিত্রী ত্বং দেবি জননী পরা। ত্বয়ৈব ধার্য্যতে সর্ব্বং ত্বয়ৈতৎ সৃজ্যতে জগৎ॥৭৫॥ ত্বয়ৈতৎ পাল্যতে দেবি ত্বমৎস্যন্তে চ সর্ব্বদা। বিসৃষ্টৌ সৃষ্টিরূপা ত্বং স্থিতিরূপা চ পালনে॥ ৭৬॥ তথা সংহৃতিরূপান্তে জগতোঽস্য জগন্ময়ে। মহাবিদ্যা মহামায়া মহামেধা

মহাস্মৃতিঃ ॥৭৭॥ মহামোহা চ ভবতী মহাদেবী মহাসুরী। প্রকৃতিস্ত্বঞ্চ সর্ব্বস্য গুণ-ত্রয়বিভাবিনী ॥৭৮॥ কালরাত্রির্মহারাত্রির্মোহরাত্রিশ্চ দারুণা। ত্বং শ্রীস্ত্বমীশ্বরীত্বং হ্রীস্ত্বং বুদ্ধির্বোধলক্ষণা ॥ ৭৯ ॥ লজ্জা পুষ্টিস্তথা তুষ্টিস্ত্বং শান্তিঃ ক্ষান্তিরেব চ। খড়্গিনী শূলিনী ঘোরা গদিনী চক্রিণী তথা ॥৮০॥ শঙ্খিনী চাপিনী বাণ-ভুশুণ্ডী-পরিঘায়ুধা। সৌম্যা সৌম্যতরাশেষসৌম্যেভ্যস্ত্বতিসুন্দরী ॥ ৮১ ॥ পরা পরাণাং পরমা ত্বমেব পরমেশ্বরী। যচ্চ কিঞ্চিৎ ক্বচিদ্ বস্তু সদসদ্ বাখিলাত্মিকে। ॥৮২॥ তস্য সর্ব্বস্য যা শক্তিঃ সা ত্বং কিং স্তূয়সে তদা। যয়া ত্বয়া জগৎস্রষ্টা জগৎ-পাতাত্তি যো জগৎ ॥ ৮৩ ॥ সোঽপি নিদ্রাবশং নীতঃ কস্ত্বাং স্তোতুমিহেশ্বরঃ। বিষ্ণুঃ শরীরগ্রহণমহমীশান এব চ ॥৮৪॥ কারিতাস্তে যতোঽতস্ত্বাং কঃ স্তোতুং শক্তিমান্ ভবেৎ। সা ত্বমিত্থং প্রভাবৈঃ স্বৈরুদারৈর্দ্দেবি সংস্তুতা ॥ ৮৫ ॥ মোহয়ৈতৌ দুরাধর্ষাবসুরৌ মধুকৈটভৌ। প্রবোধঞ্চ জগৎস্বামী নীয়তামচ্যুতো লঘু ॥ ৮৬ ॥ বোধশ্চ ক্রিয়তামস্য হন্তুমেতৌ মহাসুরৌ ॥ ৮৭ ॥

ঋষিরুবাচ ॥ ৮৮ ॥ এবং স্তুতা তদা দেবী তামসী তত্র বেধসা ॥ ৮৯ ॥ বিষ্ণোঃ প্রবোধনার্থায় নিহন্তুং মধুকৈটভৌ। নেত্রাস্যনাসিকাবাহু-হৃদয়েভ্যস্তথোরসঃ ॥ ৯০ ॥ নির্গম্য দর্শনে তস্থৌ ব্রহ্মণোঽব্যক্তজন্মনঃ। উত্তস্থৌ চ জগন্নাথস্তয়া মুক্তো জনার্দ্দনঃ ॥৯১॥ একার্ণবেঽহি-শয়নাত্ততঃ স দদৃশে চ তৌ। মধুকৈটভৌ দুরাত্মানাবতিবীর্য্যপরাক্রমৌ ॥৯২॥ ক্রোধরক্তেক্ষণাবত্তুং ব্রহ্মাণং জনিতোদ্যমৌ। সমুত্থায় ততস্তাভ্যাং যুযুধে ভগবান্ হরিঃ ॥ ৯৩ ॥ পঞ্চবর্ষ-সহস্রাণি বাহুপ্রহরণো বিভুঃ। তাবপ্যতিবলোন্মত্তৌ মহামায়াবিমোহিতৌ ॥৯৪॥ উক্তবন্তৌ বরোঽস্মত্তো ব্রিয়তামিতি কেশবম্ ॥ ৯৫ ॥

শ্রীভগবানুবাচ ॥ ৯৬ ॥ ভবেতামদ্য মে তুষ্টৌ মম বধ্যাবুভাবপি ॥ ৯৭ ॥ কিমন্যেন বরেণাত্র এতাবদ্ধি বৃতং মম ॥ ৯৮ ॥

ঋষিরুবাচ ॥ ৯৯ ॥ বঞ্চিতাভ্যামিতি তদা সর্ব্বমাপোময়ং জগৎ ॥ ১০০ ॥ বিলোক্য তাভ্যাং গদিতো ভগবান্ কমলেক্ষণঃ। (প্রীতৌ স্বস্তব যুদ্ধেন শ্লাঘ্যস্ত্বং মৃত্যুরাবয়োঃ।) আবাং জহি ন যত্রোর্ব্বী সলিলেন পরিপ্লুতা ॥ ১০১ ॥

ঋষিরুবাচ ॥ ১০২ ॥ তথেত্যুক্ত্বা ভগবতা শঙ্খচক্রগদাভৃতা। কৃত্বা চক্রেণ বৈ ছিন্নে জঘনে শিরসী তয়োঃ ॥ ১০৩ ॥ এবমেষা সমুৎপন্না ব্রহ্মণা সংস্তুতা স্বয়ম্। প্রভাবমস্যা দেব্যাস্তু ভূয়ঃ শৃণু বদামি তে ॥ ১০৪ ॥

ইতি শ্রীমার্কণ্ডেয়-পুরাণে সাবর্ণিকে মন্বন্তরে দেবী-মাহাত্ম্যে মধুকৈটভবধঃ। ( ১ অঃ )

## মধ্যম-চরিতম্

ঋষিরুবাচ ॥ ১ ॥ দেবাসুরমভূদ্ যুদ্ধং পূর্ণমব্দশতং পুরা। মহিষেঽসুরাণা-
মধিপে দেবানাঞ্চ পুরন্দরে ॥ ২ ॥ তত্রাসুরৈর্মহাবীর্য্যৈর্দেবসৈন্যং পরাজিতম্।
জিত্বা চ সকলান্ দেবানিন্দ্রোঽভূন্মহিষাসুরঃ ॥৩॥ ততঃ পরাজিতা দেবাঃ
পদ্মযোনিং প্রজাপতিম্। পুরস্কৃত্য গতাস্তত্র যত্রেশগরুড়ধ্বজৌ ॥৪॥ যথাবৃত্তং তয়ো-
স্তদ্বন্মহিষাসুরচেষ্টিতম্। ত্রিদশাঃ কথয়ামাসুর্দ্দেবাভিভববিস্তরম্ ॥৫॥ সূর্য্যেন্দ্রা-
গ্ন্যনিলেন্দূনাং যমস্য বরুণস্য চ। অন্যেষাঞ্চাধিকারান্ স স্বয়মেবাধিতিষ্ঠতি ॥৬॥
স্বর্গান্নিরাকৃতাঃ সর্ব্বে তেন দেবগণা ভুবি। বিচরন্তি যথা মর্ত্ত্যা মহিষেণ
দুরাত্মনা ॥ ৭ ॥ এতদ্ বঃ কথিতং সর্ব্বমমরারিবিচেষ্টিতম্। শরণঞ্চ প্রপন্নাঃ
স্মো বধস্তস্য বিচিন্ত্যতাম্ ॥ ৮ ॥ ইত্থং নিশম্য দেবানাং বচাংসি মধুসূদনঃ।
চকার কোপং শম্ভুশ্চ ভ্রুকুটী-কুটিলাননৌ ॥৯॥ ততোঽতিকোপপূর্ণস্য চক্রিণো
বদনাত্ততঃ। নিশ্চক্রাম মহত্তেজো ব্রহ্মণঃ শঙ্করস্য চ ॥১০॥ অন্যেষাঞ্চৈব
দেবানাং শক্রাদীনাং শরীরতঃ। নির্গতং সুমহত্তেজস্তচ্চৈক্যং সম-
গচ্ছত ॥১১॥ অতীব তেজসঃ কূটং জ্বলন্তমিব পর্ব্বতম্। দদৃশুস্তে সুরাস্তত্র জ্বালা-
ব্যাপ্তদিগন্তরম্ ॥১২॥ অতুলং তত্র তত্তেজঃ সর্ব্বদেবশরীরজম্। একস্থং তদভূ-
ন্নারী ব্যাপ্তলোকত্রয়ং ত্বিষা ॥১৩॥ যদভূচ্ছাম্ভবং তেজস্তেনাজায়ত তন্মুখম্।
যাম্যেন চাভবন্ কেশা বাহবো বিষ্ণুতেজসা ॥১৪॥ সৌম্যেন স্তনয়োর্যুগ্মং
মধ্যঞ্চৈন্দ্রেণ চাভবৎ। বারুণেন চ জঙ্ঘোরূ নিতম্বস্তেজসা ভুবঃ ॥১৫॥ ব্রহ্মণ-
স্তেজসা পাদৌ তদঙ্গুল্যোঽর্কতেজসা। বসূনাঞ্চ করাঙ্গুল্যঃ কৌবেরেণ চ
নাসিকা ॥১৬॥ তস্যাস্তু দন্তাঃ সম্ভূতাঃ প্রাজাপত্যেন তেজসা। নয়নত্রিতয়ং
জজ্ঞে তথা পাবকতেজসা ॥১৭॥ ভ্রুবৌ চ সন্ধ্যয়োস্তেজঃ শ্রবণাবনিলস্য চ।
অন্যেষাঞ্চৈব দেবানাং সম্ভবস্তেজসাং শিবা ॥১৮॥ ততঃ সমস্তদেবানাং তেজো-
রাশিসমুদ্ভবাম্। তাং বিলোক্য মুদং প্রাপুরমরা মহিষার্দ্দিতাঃ ॥১৯॥ শূলং শূলাদ্
বিনিষ্কৃষ্য দদৌ তস্যৈ পিনাকধৃক্। চক্রঞ্চ দত্তবান্ কৃষ্ণঃ সমুৎপাদ্য স্বচক্রতঃ ॥২০॥
শঙ্খঞ্চ বরুণঃ শক্তিং দদৌ তস্যৈ হুতাশনঃ। মারুতো দত্তবাংশ্চাপং বাণপূর্ণে
তথেষুধী ॥২১॥ বজ্রমিন্দ্রঃ সমুৎপাদ্য কুলিশাদমরাধিপঃ। দদৌ তস্যৈ সহস্রাক্ষো
ঘণ্টামৈরাবতাদ্গজাৎ ॥২২॥ কালদণ্ডাদ্ যমো দণ্ডং পাশঞ্চাম্বুপতির্দ্দদৌ।
প্রজাপতিশ্চাক্ষমালাং দদৌ ব্রহ্মা কমণ্ডলুম্ ॥২৩॥ সমস্তরোমকূপেষু নিজরশ্মীন্
দিবাকরঃ। কালশ্চ দত্তবান্ খড়্গং তস্যাশ্চর্ম্ম চ নির্ম্মলম্ ॥২৪॥ ক্ষীরোদশ্চা-
মলং হারমজরে চ তথাম্বরে। চূড়ামণিং তথা দিব্যং কুণ্ডলে কটকানি চ ॥২৫॥

অর্দ্ধচন্দ্রং তথা শুভ্রং কেয়ূরান্ সর্ব্ববাহুষু। নূপুরৌ বিমলৌ তদ্বদ্ গ্রৈবেয়কম-নুত্তমম্ ॥২৬॥ অঙ্গুলীয়করত্নানি সমস্তাস্বঙ্গুলীষু চ। বিশ্বকর্ম্মা দদৌ তস্যৈ পরশুঞ্চাতিনির্ম্মলম্ ॥২৭॥ অস্ত্রাণ্যনেকরূপাণি তথাঽভেদ্যঞ্চ দংশনম্। অম্লান-পঙ্কজাং মালাং শিরস্যুরসি চাপরাম্ ॥২৮॥ অদদজ্জলধিস্তস্যৈ পঙ্কজঞ্চাতি-শোভনম্। হিমবান্ বাহনং সিংহং রত্নানি বিবিধানি চ ॥২৯॥ দদাবশূন্যং সুরয়া পানপাত্রং ধনাধিপঃ। শেষশ্চ সর্ব্বনাগেশো মহামণিবিভূষিতম্ ॥৩০॥ নাগ-হারং দদৌ তস্যৈ ধত্তে যঃ পৃথিবীমিমাম্। অন্যৈরপি সুরৈর্দ্দেবী ভূষণৈরা-য়ুধৈস্তথা ॥৩১॥ সম্মানিতা ননাদোচ্চৈঃ সাট্টহাসং মুহুর্ম্মুহুঃ। তস্যা নাদেন ঘোরেণ কৃৎস্নমাপূরিতং নভঃ। অমায়তাতিমহতা প্রতিশব্দো মহানভূৎ ॥৩২॥ চুক্ষুভুঃ সকলা লোকাঃ সমুদ্রাশ্চ চকম্পিরে ॥৩৩॥ চচাল বসুধা চেলুঃ সকলাশ্চ মহী-ধরাঃ। জয়েতি দেবাশ্চ মুদা তামূচুঃ সিংহবাহিনীম্ ॥৩৪॥ তুষ্টুবুর্ম্মুনয়শ্চৈনাং ভক্তিনম্রাত্মমূর্ত্তয়ঃ। দৃষ্ট্বা সমস্তং সংক্ষুব্ধং ত্রৈলোক্যমমরারয়ঃ ॥৩৫॥ সন্নদ্ধা-খিলসৈন্যাস্তে সমুত্তস্থুরুদায়ুধাঃ। আঃ কিমেতদিতি ক্রোধাদাভাষ্য মহিষা-সুরঃ ॥৩৬॥ অভ্যধাবত তং শব্দমশেষৈরসুরৈর্বৃতঃ। স দদর্শ ততো দেবীং ব্যাপ্তলোকত্রয়াং ত্বিষা ॥৩৭॥ পাদাক্রান্ত্যা নতভুবং কিরীটোল্লিখিতাম্বরাম্। ক্ষোভিতাশেষপাতালাং ধনুর্জ্জ্যানিঃস্বনেন তাম্ ॥৩৮॥ দিশো ভুজসহস্রেণ সম-ন্তাদ্ ব্যাপ্য সংস্থিতাম্। ততঃ প্রববৃতে যুদ্ধং তয়া দেব্যা সুরদ্বিষাম্ ॥৩৯॥ শস্ত্রা-স্ত্রৈর্বহুধা মুক্তৈরাদীপিতদিগন্তরম্। মহিষাসুরসেনানীশ্চিক্ষুরাখ্যো মহা-সুরঃ ॥৪০॥ যুযুধে চামরশ্চান্যৈশ্চতুরঙ্গবলান্বিতঃ। রথানামযুতৈঃ ষড়্ভিরুদ-গ্রাখ্যো মহাসুরঃ ॥৪১॥ অযুধ্যতাঽযুতানাঞ্চ সহস্রেণ মহাহনুঃ। পঞ্চাশদ্ভিশ্চ নিযুতৈরসিলোমা মহাসুরঃ ॥৪২॥ অযুতানাং শতৈঃ ষড়্ভির্ব্বাস্কলো যুযুধে রণে। গজবাজিসহস্রৌঘৈরনেকৈঃ পরিবারিতঃ ॥৪৩॥ বৃতো রথানাং কোট্যা চ যুদ্ধে তস্মিন্নযুধ্যত। বিড়ালাখ্যোঽযুতানাঞ্চ পঞ্চাশদ্ভিরথাযুতৈঃ ॥৪৪॥ যুযুধে সংযুগে তত্র রথানাং পরিবারিতঃ। অন্যে চ তত্রাঽযুতশো রথনাগহয়ৈর্বৃতাঃ ॥৪৫॥ যুযুধুঃ সংযুগে দেব্যা সহ তত্র মহাসুরাঃ। কোটিকোটিসহস্রৈস্তু রথানাং দন্তিনাং তথা ॥ ৪৬ ॥ হয়ানাঞ্চ বৃতো যুদ্ধে তত্রাভূন্মহিষাসুরঃ। তোমরৈর্ভিন্দিপালৈশ্চ শক্তিভির্ম্মুষলৈস্তথা ॥ ৪৭ ॥ যুযুধুঃ সংযুগে দেব্যা খড়্গৈঃ পরশুপট্টিশৈঃ। কেচিচ্চ চিক্ষিপুঃ শক্তীঃ কেচিৎ পাশাংস্তথাপরে ॥৪৮॥ দেবীং খড়্গপ্রহারৈস্তু তে তাং হন্তুং প্রচক্রমুঃ। সাপি দেবী ততস্তানি শস্ত্রাণ্যস্ত্রাণি চণ্ডিকা ॥৪৯॥ লীলয়ৈব প্রচিচ্ছেদ

নিজশস্ত্রাস্ত্রবর্ষিণী। অনায়স্তাননা দেবী স্তূয়মানা সুরর্ষিভিঃ ॥৫০॥ মুমোচাসুরদেহেষু শস্ত্রাণ্যস্ত্রাণি চেশ্বরী। সোঽপি ক্রুদ্ধো ধুতসটো দেব্যা বাহনকেসরী ॥৫১॥ চচারাসুরসৈন্যেষু বনেষ্বিব হুতাশনঃ। নিঃশ্বাসান্ মুমুচে যাংশ্চ যুধ্যমানা রণেঽম্বিকা ॥ ৫২ ॥ ত এব সদ্যঃ সম্ভূতা গণাঃ শতসহস্রশঃ। যুযুধুস্তে পরশুভির্ভিন্দিপালাঽসিপট্টিশৈঃ ॥ ৫৩ ॥ নাশয়ন্তোঽসুরগণান্ দেবী শক্ত্যুপবৃংহিতাঃ। অবাদয়ন্ত পটহান্ গণাঃ শঙ্খাংস্তথাপরে ॥ ৫৪ ॥ মৃদঙ্গাংশ্চ তথৈবান্যে তস্মিন্ যুদ্ধমহোৎসবে। ততো দেবী ত্রিশূলেন গদয়া শক্তিবৃষ্টিভিঃ ॥ ৫৫ ॥ খড়্গাদিভিশ্চ শতশো নিজঘান মহাসুরান্। পাতয়ামাস চৈবান্যান্ ঘণ্টাস্বনবিমোহিতান্ ॥ ৫৬॥ অসুরান্ ভুবি পাশেন বদ্ধা চান্যানকর্ষত। কেচিদ্দ্বিধাকৃতাস্তীক্ষ্ণৈঃ খড়্গপাতৈস্তথাপরে ॥ ৫৭ ॥ বিপোথিতা নিপাতেন গদয়া ভুবি শেরতে। বেমুশ্চ কেচিদ্রুধিরং মুষলেন ভৃশং হতাঃ ॥ ৫৮ ॥ কেচিন্নিপাতিতা ভূমৌ ভিন্নাঃ শূলেন বক্ষসি। নিরন্তরাঃ শরৌঘেণ কৃতাঃ কেচিদ্রণাজিরে ॥ ৫৯ ॥ সেনানুকারিণঃ প্রাণান্ মুমুচুস্ত্রিদশার্দ্দনাঃ। কেষাঞ্চিদ্ বাহবশ্ছিন্নাশ্ছিন্নগ্রীবাস্তথাপরে ॥ ৬০ ॥ শিরাংসি পেতুরন্যেষামন্যে মধ্যে বিদারিতাঃ। বিচ্ছিন্নজঙ্ঘাস্বপরে পেতুরুর্ব্ব্যাং মহাসুরাঃ ॥ ৬১ ॥ একবাহ্বক্ষিচরণাঃ কেচিদ্দেব্যা দ্বিধা কৃতাঃ। ছিন্নেঽপি চান্যে শিরসি পতিতাঃ পুনরুত্থিতাঃ ॥ ৬২ ॥ কবন্ধা যুযুধুর্দ্দেব্যা গৃহীতপরমায়ুধাঃ। ননৃতুশ্চাপরে তত্র যুদ্ধে তূর্য্যলয়াশ্রিতাঃ ॥৬৩॥ কবন্ধাশ্ছিন্নশিরসঃ খড়্গশক্ত্যৃষ্টিপাণয়ঃ। তিষ্ঠ তিষ্ঠেতি ভাষন্তো দেবীমন্যে মহাসুরাঃ ॥৬৪॥ পাতিতৈ রথনাগাশ্বৈরসুরৈশ্চ বসুন্ধরা। অগম্যা সাঽভবত্তত্র যত্রাভূৎ স মহারণঃ ॥৬৫॥ শোণিতৌঘা মহানদ্যঃ সদ্যস্তত্র বিসুস্রুবুঃ। মধ্যে চাসুরসৈন্যস্য বারণাসুরবাজিনাম্ ॥ ৬৬॥ ক্ষণেন তন্মহাসৈন্যমসুরাণাং তথাম্বিকা। নিন্যে ক্ষয়ং যথা বহ্নিস্তৃণদারুমহাচয়ম্ ॥ ৬৭॥ স চ সিংহো মহানাদমুৎসৃজন্ ধুতকেসরঃ। শরীরেভ্যোঽমরারীণামসূনিব বিচিন্বতি ॥ ৬৮॥ দেব্যা গণৈশ্চ তৈস্তত্র কৃতং যুদ্ধং তথাসুরৈঃ। যথৈষাং তুতুষুর্দ্দেবাঃ পুষ্পবৃষ্টিমুচো দিবি ॥ ৬৯॥

ইতি শ্রীমার্কণ্ডেয়পুরাণে সাবর্ণিকে মন্বন্তরে দেবীমাহাত্ম্যে মহিষাসুরসৈন্যবধঃ। (২য় অঃ)

## মধ্যমচরিত্তম্—মহিষাসুরবধঃ।

ঋষিরুবাচ ॥ ১ ॥ নিহন্যমানং তৎ সৈন্যমবলোক্য মহাসুরঃ। সেনানীশ্চিক্ষুরঃ কোপাদ্ যযৌ যোদ্ধুমথাম্বিকাম্॥ ২॥ স দেবীং শরবর্ষেণ ববর্ষ সমরেঽসুরঃ। যথা মেরুগিরেঃ শৃঙ্গং তোয়বর্ষেণ তোয়দঃ॥ ৩॥ তস্য-চ্ছিত্ত্বা ততো দেবী লীলয়ৈব শরোৎকরান্। জঘান তুরগান্ বাণৈর্যন্তারঞ্চৈব বাজিনাম্॥৪॥ চিচ্ছেদ চ ধনুঃ সদ্যো ধ্বজঞ্চাতিসমুচ্ছ্রিতম্। বিব্যাধ চৈব গাত্রেষু ছিন্নধন্বানমাশুগৈঃ॥৫॥ স ছিন্নধন্বা বিরথো হতাশ্বো হতসারথিঃ। অভ্যধাবত তাং দেবীং খড়্গচর্ম্মধরোঽসুরঃ॥ ৬॥ সিংহমাহত্য খড়্গেন তীক্ষ্ণধারেণ মূর্দ্ধনি। আজঘান ভুজে সব্যে দেবীমপ্যতিবেগবান্॥ ৭॥ তস্যাঃ খড়্গো ভুজং প্রাপ্য পফাল নৃপনন্দন। ততো জগ্রাহ শূলং স কোপাদরুণ-লোচনঃ॥ ৮॥ চিক্ষেপ চ ততস্তত্তু ভদ্রকাল্যাং মহাসুরঃ। জাজ্বল্যমানং তেজোভী রবিবিম্বমিবাম্বরাৎ॥ ৯॥ দৃষ্ট্বা তদাপতচ্ছূলং দেবী শূলমমুঞ্চত। তচ্ছূলং শতধা তেন নীতং স চ মহাসুরঃ॥ ১০॥ হতে তস্মিন্ মহাবীর্য্যে মহিষস্য চমূপতৌ। আজগাম গজারূঢ়শ্চামরস্ত্রিদশার্দ্দনঃ॥ ১১॥ সোঽপি শক্তিং মুমোচাথ দেব্যাস্তামম্বিকা দ্রুতম্। হুঙ্কারাভিহতাং ভূমৌ পাতয়ামাস নিষ্প্রভাম্॥১২॥ ভগ্নাং শক্তিং নিপতিতাং দৃষ্ট্বা ক্রোধসমন্বিতঃ। চিক্ষেপ চামরঃ শূলং বাণৈস্তদপি সাচ্ছিনৎ॥ ১৩॥ ততঃ সিংহঃ সমুৎপত্য গজকুম্ভান্তরস্থিতঃ। বাহুযুদ্ধেন যুযুধে তেনোচ্চৈস্ত্রিদশারিণা॥ ১৪ ॥ যুধ্যমানৌ ততস্তৌ তু তস্মান্নাগান্মহীং গতৌ। যুযুধাতেঽতিসংরব্ধৌ প্রহারৈরতিদারুণৈঃ॥ ১৫॥ ততো বেগাৎ খমুৎপত্য নিপত্য চ মৃগারিণা। করপ্রহারেণ শিরশ্চামরস্য পৃথক্ কৃতম্॥ ১৬॥ উদগ্রশ্চ রণে দেব্যা শিলাবৃক্ষাদিভির্হতঃ। দন্তমুষ্টিতলৈশ্চৈব করালশ্চ নিপাতিতঃ॥ ১৭॥ দেবী ক্রুদ্ধা গদাপাতৈশ্চূর্ণয়ামাস চোদ্ধতম্। বাস্কলং ভিন্দিপালেন বাণৈস্তাম্রং তথান্ধকম্॥১৮॥ উগ্রাস্যমুগ্রবীর্য্যঞ্চ তথৈব চ মহাহনুম্। ত্রিনেত্রা চ ত্রিশূলেন জঘান পরমেশ্বরী॥ ১৯॥ বিড়ালস্যাসিনা কায়াৎ পাতয়ামাস বৈ শিরঃ। দুর্দ্ধরং দুর্ম্মুখঞ্চোভৌ শরৈর্নিন্যে যমক্ষয়ম্॥ ২০॥ এবং সংক্ষীয়মাণে তু স্বসৈন্যে মহিষাসুরঃ। মাহিষেণ স্বরূপেণ ত্রাসয়ামাস তান্ গণান্॥ ২১॥ কাংশ্চিত্তুণ্ডপ্রহারেণ খুরক্ষেপৈস্তথাঽপরান্। লাঙ্গূলতাড়িতাং-শ্চান্যান্ শৃঙ্গাভ্যাঞ্চ বিদারিতান্॥ ২২॥ বেগেন কাংশ্চিদপরান্ নাদেন ভ্রমণেন চ। নিঃশ্বাসপবনেনান্যান্ পাতয়ামাস ভূতলে॥ ২৩॥ নিপাত্য প্রমথানীকমভ্যধাবত সোঽসুরঃ। সিংহং হন্তুং মহাদেব্যাঃ কোপঞ্চক্রে

ততোঽম্বিকা ॥২৪॥ সোঽপি কোপান্মহাবীর্য্যঃ খুরক্ষুণ্ণ-মহীতলঃ। শৃঙ্গাভ্যাং পর্ব্বতানুচ্চাংশ্চিক্ষেপ চ ননাদ চ ॥ ২৫॥ বেগভ্রমণবিক্ষুণ্ণা মহী তস্য ব্যশীর্য্যত। লাঙ্গূলেনাহতশ্চাব্ধিঃ প্লাবয়ামাস সর্ব্বতঃ ॥ ২৬॥ ধুতশৃঙ্গবিভিন্নাশ্চ খণ্ডখণ্ডং যযুর্ঘনাঃ। শ্বাসানিলাস্তাঃ শতশো নিপেতুর্নভসোঽচলাঃ ॥২৭॥ ইতি ক্রোধসমাধ্মাতমাপতন্তং মহাসুরম্। দৃষ্ট্বা সা চণ্ডিকা কোপং তদ্বধায় তদাকরোৎ ॥২৮॥ সা ক্ষিপ্ত্বা তস্য বৈ পাশং তং ববন্ধ মহাসুরম্। তত্যাজ মাহিষং রূপং সোঽপি বদ্ধো মহামৃধে ॥ ২৯॥ ততঃ সিংহোঽভবৎ সদ্যো যাবত্তস্যাম্বিকা শিরঃ। ছিনত্তি তাবৎ পুরুষঃ খড়্গপাণিরদৃশ্যত ॥৩০॥ তত এবাশু পুরুষং দেবী চিচ্ছেদ সায়কৈঃ। তং খড়্গচর্ম্মণা সার্দ্ধং ততঃ সোঽভূন্মহাগজঃ ॥ ৩১॥ করেণ চ মহাসিংহং তঞ্চকর্ষ জগর্জ্জ চ। কর্ষতস্তু করং দেবী খড়্গেন নিরকৃন্তত ॥ ৩২॥ ততো মহাসুরো ভূয়ো মাহিষং বপুরাস্থিতঃ। তথৈব ক্ষোভয়ামাস ত্রৈলোক্যং সচরাচরম্ ॥ ৩৩॥ ততঃ ক্রুদ্ধা জগন্মাতা চণ্ডিকা পানমুত্তমম্। পপৌ পুনঃ পুনশ্চৈব জহাসারুণলোচনা ॥৩৪॥ ননর্দ্দ চাসুরঃ সোঽপি বলবীর্য্যমদোদ্ধতঃ। বিষাণাভ্যাঞ্চ চিক্ষেপ চণ্ডিকাং প্রতি ভূধরান্ ॥৩৫॥ সা চ তান্ প্রহিতাংস্তেন চূর্ণয়ন্তী শরোৎকরৈঃ। উবাচ তং মদোদ্ধূতমুখরাগাকুলাক্ষরম্ ॥ ৩৬ ॥

দেব্যুবাচ ॥ ৩৭॥ গর্জ্জ গর্জ্জ ক্ষণং মূঢ় মধু যাবৎ পিবাম্যহম্। ময়া ত্বয়ি হতেঽত্রৈব গর্জ্জিষ্যন্ত্যাশু দেবতাঃ ॥৩৮॥

ঋষিরুবাচ ॥ ৩৯॥ এবমুক্ত্বা সমুৎপত্য সারূঢ়া তং মহাসুরম্। পাদেনাক্রম্য কণ্ঠে চ শূলেনৈনমতাড়য়ৎ ॥ ৪০॥ ততঃ সোঽপি পদাক্রান্তস্তয়া নিজমুখাত্ততঃ। অর্দ্ধনিষ্ক্রান্ত এবাতি দেব্যা বীর্য্যেণ সংবৃতঃ ॥ ৪১॥ অর্দ্ধনিষ্ক্রান্ত এবাসৌ যুধ্যমানো মহাসুরঃ। তয়া মহাসিনা দেব্যা শিরশ্ছিত্ত্বা নিপাতিতঃ ॥৪২॥ ততো হাহাকৃতং সর্ব্বং দৈত্যসৈন্যং ননাশ তৎ। প্রহর্ষঞ্চ পরং জগ্মুঃ সকলা দেবতাগণাঃ ॥ ৪৩॥ তুষ্টুবুস্তাং সুরা দেবীং সহ দিব্যৈর্ম্মহর্ষিভিঃ। জগুর্গন্ধর্ব্বপতয়ো ননৃতুশ্চাপ্সরোগণাঃ ॥ ৪৪ ॥

ইতি শ্রীমার্কণ্ডেয়পুরাণে সাবর্ণিকে মন্বন্তরে দেবীমাহাত্ম্যে
মহিষাসুরবধঃ। (৩য় অঃ)

---

## মধ্যমচরিতম্—শক্রাদিস্তুতিঃ ৪

ঋষিরুবাচ ॥ ১॥ শক্রাদয়ঃ সুরগণা নিহতেঽতিবীর্য্যে, তস্মিন্ দুরাত্মনি সুরারিবলে চ দেব্যা। তাং তুষ্টুবুঃ প্রণতিনম্রশিরোধরাংসা, বাগ্‌ভিঃ

প্রহর্ষপুলকোদ্গমচারুদেহাঃ ॥ ২॥ দেব্যা যয়া ততমিদং জগদাত্মশক্ত্যা, নিঃশেষ-দেবগণ-শক্তিসমূহমূর্ত্ত্যা। তামম্বিকামখিলদেবমহর্ষিপূজ্যাং, ভক্ত্যা নতাঃ স্ম বিদধাতু শুভানি সা নঃ ॥৩॥ যস্যাঃ প্রভাবমতুলং ভগবাননন্তো, ব্রহ্মা হরশ্চ ন হি বক্তুমলং বলঞ্চ। সা চণ্ডিকাখিলজগৎ-পরিপালনায়, নাশায় চাশুভভয়স্য মতিং করোতু ॥ ৪ ॥ যা শ্রীঃ স্বয়ং সুকৃতিনাং ভবনেষলক্ষ্মীঃ, পাপাত্মনাং কৃতধিয়াং হৃদয়েষু বুদ্ধিঃ। শ্রদ্ধা সতাং কুলজনপ্রভবস্য লজ্জা, তাং ত্বাং নতাঃ স্ম পরিপালয় দেবি বিশ্বম্ ॥ ৫ ॥ কিং বর্ণয়াম তব রূপমচিন্ত্যমেতৎ, কিঞ্চাতিবীর্য্যমসুরক্ষয়কারি ভূরি। কিঞ্চাহবেষু চরিতানি তবাতি যানি, সর্ব্বেষু দেব্যসুরদেবগণাদিকেষু ॥ ৬ ॥ হেতুঃ সমস্তজগতাং ত্রিগুণাপি দোষৈ-র্ন জ্ঞায়সে হরিহরাদিভিরপ্যপারা। সর্ব্বাশ্রয়াখিলমিদং জগদংশ-ভূতমব্যাকৃতা হি পরমা প্রকৃতিস্ত্বমাদ্যা ॥ ৭॥ যস্যাঃ সমস্তসুরতা-সমুদীরণেন, তৃপ্তিং প্রয়াতি সকলেষু মখেষু দেবি। স্বাহাঽসি বৈ পিতৃগণস্য চ তৃপ্তিহেতুরুচ্চার্য্যসে ত্বমত এব জনৈঃ স্বধা চ ॥ ৮॥ যা মুক্তিহেতু-রবিচিন্ত্যমহাব্রতা চ, অভ্যস্যসে সুনিয়তেন্দ্রিয়তত্ত্বসারৈঃ। মোক্ষার্থিভি-র্মুনিভিরস্তসমস্তদোষৈ-র্বিদ্যাসি সা ভগবতী পরমা হি দেবি ॥৯॥ শব্দাত্মিকা সুবিমলর্গ্যজুষাং নিধান-মুদ্গীথরম্যপদপাঠবতাঞ্চ সাম্নাম্। দেবী ত্রয়ী ভগবতী ভবভাবনায়, বার্ত্তা চ সর্ব্বজগতাং পরমার্ত্তিহন্ত্রী ॥১০॥ মেধাসি দেবি বিদি-তাখিলশাস্ত্রসারা, দুর্গাসি দুর্গভবসাগরনৌরসঙ্গা। শ্রীঃ কৈটভারিহৃদয়ৈককৃতা-ধিবাসা, গৌরী ত্বমেব শশিমৌলিকৃতপ্রতিষ্ঠা ॥১১॥ ঈষৎসহাসমমলং পরি-পূর্ণচন্দ্র-বিম্বানুকারি কনকোত্তমকান্তি কান্তম্। অত্যদ্ভুতং প্রহৃতমাপ্তরুষা তথাপি, বক্ত্রং বিলোক্য সহসা মহিষাসুরেণ ॥১২॥ দৃষ্ট্বা তু দেবি কুপিতং ভ্রুকুটীকরাল-মুদ্যচ্ছশাঙ্কসদৃশচ্ছবি যন্ন সদ্যঃ। প্রাণান্মুমোচ মহিষস্তদতীব চিত্রং, কৈর্জ্জীব্যতে হি কুপিতান্তকদর্শনেন ॥১৩॥ দেবি প্রসীদ পরমা ভবতী ভবায়, সদ্যো বিনাশয়সি কোপবতী কুলানি। বিজ্ঞাতমেতদধুনৈব যদস্তমেত-ন্নীতং বলং সুবিপুলং মহিষাসুরস্য ॥১৪॥ তে সম্মতা জনপদেষু ধনানি তেষাং, তেষাং যশাংসি ন চ সীদতি ধর্ম্মবর্গঃ। ধন্যাস্ত এব নিভৃতাত্মজভৃত্যদারা, যেষাং সদাভ্যুদয়দা ভবতী প্রসন্না ॥১৫॥ ধর্ম্ম্যাণি দেবি সকলানি সদৈব কর্ম্মাণ্যত্যা-দৃতঃ প্রতিদিনং সুকৃতী করোতি। স্বর্গং প্রয়াতি চ ততো ভবতীপ্রসাদাল্লোক-ত্রয়েঽপি ফলদা নমু দেবি তেন ॥ ১৬॥ দুর্গে স্মৃতা হরসি ভীতিমশেষ-জন্তোঃ, স্বস্থৈঃ স্মৃতা মতিমতীব শুভাং দদাসি। দারিদ্র্যদুঃখভয়হারিণি কা

যদস্তা, সর্ব্বোপকারকরণায় সদার্দ্রচিত্তা ॥ ১৭॥ এভির্হতৈর্জগদুপৈতি সুখং তথৈতে, কুর্ব্বন্তু নাম নরকায় চিরায় পাপম্। সংগ্রামমৃত্যুমধিগম্য দিবং প্রয়ান্তু, মত্বেতি নূনমহিতান্ বিনিহংসি দেবি ॥ ১৮ ॥ দৃষ্ট্বৈব কিন্ন ভবতী প্রকরোতি ভস্ম, সর্ব্বাসুরানরিষু যৎ প্রহিণোষি শস্ত্রম্। লোকান্ প্রয়ান্তু রিপবোঽপি হি শস্ত্রপূতা, ইত্থং মতির্ভবতি তেষপি তেঽতিসাধ্বী ॥১৯॥ খড়্গপ্রভানিকরবিস্ফুরণৈস্তথোগ্রৈঃ, শূলাগ্রকান্তিনিবহেন দৃশোঽসুরাণাম্। যন্নাগতা বিলয়মংশুমদিন্দুখণ্ড-যোগ্যাননং তব বিলোকয়তাং তদেতৎ ॥ ২০॥ দুর্ব্বৃত্তবৃত্তশমনং তব দেবি শীলং, রূপং তথৈতদবিচিন্ত্যমতুল্যমন্যৈঃ। বীর্য্যঞ্চ হন্তৃ হৃতদেবপরাক্রমাণাং, বৈরিষপি প্রকটিতৈব দয়া ত্বয়েত্থম্ ॥ ২১॥ কেনোপমা ভবতু তেঽস্য পরাক্রমস্য,রূপঞ্চ শত্রুভয়কার্য্যতিহারি কুত্র। চিত্তে কৃপা সমরনিষ্ঠুরতা চ দৃষ্টা, ত্বয্যেব দেবি বরদে ভুবনত্রয়েঽপি ॥২২॥ ত্রৈলোক্যমেতদখিলং রিপুনাশনেন, ত্রাতং ত্বয়া সমরমূর্দ্ধনি তেঽপি হত্বা। নীতা দিবং রিপুগণা ভয়মপ্যপাস্ত-মস্মাকমুন্মদসুরারিভবন্নমস্তে ॥২৩॥ শূলেন পাহি নো দেবি পাহি খড়্গেন চাম্বিকে। ঘণ্টাস্বনেন নঃ পাহি চাপজ্যানিঃস্বনেন চ ॥ ২৪ ॥ প্রাচ্যাং রক্ষ প্রতীচ্যাঞ্চ চণ্ডিকে রক্ষ দক্ষিণে। ভ্রামণেনাত্মশূলস্য উত্তরস্যাং তথেশ্বরি ॥ ২৫ ॥ সৌম্যানি যানি রূপাণি ত্রৈলোক্যে বিচরন্তি তে। যানি চাত্যর্থঘোরাণি তৈরক্ষাস্মাংস্তথা ভুবম্ ॥২৬॥ খড়্গশূলগদাদীনি যানি চাস্ত্রাণি তেঽম্বিকে। করপল্লবসঙ্গীনি তৈরস্মান্ রক্ষ সর্ব্বতঃ ॥ ২৭॥

ঋষিরুবাচ ॥২৮॥ এবং স্তুতা সুরৈর্দ্দিব্যৈঃ কুসুমৈর্নন্দনোদ্ভবৈঃ। অর্চ্চিতা জগতাং ধাত্রী তথা গন্ধানুলেপনৈঃ ॥২৯॥ ভক্ত্যা সমস্তৈস্ত্রিদশৈর্দিব্যৈর্ধূপৈস্তু ধূপিতা। প্রাহ প্রসাদসুমুখী সমস্তান্ প্রণতান্ সুরান্ ॥ ৩০॥

দেব্যুবাচ ॥ ৩১॥ ব্রিয়তাং ত্রিদশাঃ সর্ব্বে যদস্মত্তোঽভিবাঞ্ছিতম্। ( দদাম্যহমতিপ্রীত্যা স্তবৈরেভিঃ সুপূজিতা ) ॥৩২॥

দেবা উচুঃ ॥৩৩॥ ভগবত্যা কৃতং সর্ব্বং ন কিঞ্চিদবশিষ্যতে ॥ ৩৪ ॥ যদয়ং নিহতঃ শত্রুরস্মাকং মহিষাসুরঃ। যদি বাপি বরো দেয়স্ত্বয়াস্মাকং মহেশ্বরি ॥৩৫॥ সংস্মৃতা সংস্মৃতা ত্বয়ো হিংসেথাঃ পরমাপদঃ। যশ্চ মর্ত্ত্যঃ স্তবৈরেভিস্ত্বাং স্তোষ্যত্যমলাননে ॥ ৩৬ ॥ তস্য বিত্তর্দ্ধিবিভবৈর্ধনদারাদিসম্পদাম্। বৃদ্ধয়েঽস্মৎপ্রসন্না ত্বং ভবেথাঃ সর্ব্বদাম্বিকে ॥ ৩৭ ॥

ঋষিরুবাচ ॥ ৩৮ ॥ ইতি প্রসাদিতা দেবৈর্জ্জগতোঽর্থে তথাত্মনঃ। তথেত্যুক্ত্বা ভদ্রকালী বভূবান্তর্হিতা নৃপ ॥ ৩৯ ॥ ইত্যেতৎ কথিতং ভূপ সম্ভূতা

সা যথা পুরা। দেবী দেবশরীরেভ্যো জগত্রয়হিতৈষিণী ॥ ৪০ ॥ পুনশ্চ গৌরীদেহা সা সমুদ্ভূতা যথাঽভবৎ। বধায় দুষ্টদৈত্যানাং তথা শুম্ভ-নিশুম্ভয়োঃ ॥ ৪১ ॥ রক্ষণায় চ লোকানাং দেবানামুপকারিণী। তচ্ছৃণুষ্ব ময়াখ্যাতং যথাবৎ কথয়ামি তে ॥ ৪২ ॥

ইতি শ্রীমার্কণ্ডেয়পুরাণে সাবর্ণিকে মন্বন্তরে দেবীমাহাত্ম্যে
মহিষাসুরবধঃ সমাপ্তঃ। (৪র্থ অঃ)

---

## উত্তরচরিতম্—দেবীদূতসংবাদঃ।

ঋষিরুবাচ ॥ ১ ॥ পুরা শুম্ভনিশুম্ভাভ্যামসুরাভ্যাং শচীপতেঃ। ত্রৈলোক্যং যজ্ঞভাগাশ্চ হৃতা মদবলাশ্রয়াৎ ॥২॥ তাবেব সূর্য্যতাং তদ্বদধিকারং তথৈন্দবম্। কৌবেরমথ যাম্যঞ্চ চক্রাতে বরুণস্য চ ॥ ৩ ॥ তাবেব পবনর্দ্ধিঞ্চ চক্রতুর্বহ্নি-কর্ম্ম চ। ততো দেবা বিনির্দ্ধূতা ভ্রষ্টরাজ্যাঃ পরাজিতাঃ ॥ ৪ ॥ হৃতাধিকারা-স্ত্রিদশাস্তাভ্যাং সর্ব্বে নিরাকৃতাঃ। মহাসুরাভ্যাং তাং দেবীং সংস্মরন্ত্য-পরাজিতাম্ ॥ ৫ ॥ তয়াস্মাকং বরো দত্তো যথাপৎসু স্মৃতাখিলাঃ। ভবতাং নাশয়িষ্যামি তৎক্ষণাৎ পরমাপদঃ ॥ ৬ ॥ ইতি কৃত্বা মতিং দেবা হিমবন্তং নগেশ্বরম্। জগ্মুস্তত্র ততো দেবীং বিষ্ণুমায়াং প্রতুষ্টুবুঃ ॥ ৭ ॥

দেবা উচুঃ ॥ ৮ ॥ নমো দেব্যৈ মহাদেব্যৈ শিবায়ৈ সততং নমঃ। নমঃ-প্রকৃত্যৈ ভদ্রায়ৈ নিয়তাঃ প্রণতাঃ স্ম তাম্ ॥ ৯ ॥ রৌদ্রায়ৈ নমো নিত্যায়ৈ গৌর্য্যৈ ধাত্র্যৈ নমো নমঃ। জ্যোৎস্নায়ৈ চেন্দুরূপিণ্যৈ সুখায়ৈ সততং নমঃ ॥ ১০ ॥ কল্যাণ্যৈ প্রণতা. বৃদ্ধ্যৈ সিদ্ধ্যৈ কুর্ম্মো নমো নমঃ। নৈঋত্যৈ ভূভৃতাং লক্ষ্ম্যৈ শর্ব্বাণ্যৈ তে নমো নমঃ ॥ ১১ ॥ দুর্গায়ৈ দুর্গপারায়ৈ সারায়ৈ সর্ব্বকারিণ্যৈ। খ্যাত্যৈ তথৈব কৃষ্ণায়ৈ ধূম্রায়ৈ সততং নমঃ ॥ ১২ ॥ অতিসৌম্যাতিরৌদ্রায়ৈ নতাস্তস্যৈ নমো নমঃ। নমো জগৎপ্রতিষ্ঠায়ৈ দেব্যৈ কৃত্যৈ নমো নমঃ ॥ ১৩ ॥ যা দেবী সর্ব্বভূতেষু বিষ্ণুমায়েতি শব্দিতা। নম-স্তস্যৈ ॥ ১৪ ॥ নমস্তস্যৈ ॥ ১৫ ॥ নমস্তস্যৈ নমো নমঃ ॥ ১৬ ॥ যা দেবী সর্ব্ব-ভূতেষু চেতনেত্যভিধীয়তে। নমস্তস্যৈ ॥১৭ ॥ নমস্তস্যৈ ॥ ১৮ ॥ নমস্তস্যৈ নমো নমঃ ॥ ১৯ ॥ যা দেবী সর্ব্বভূতেষু বুদ্ধিরূপেণ সংস্থিতা। নমস্তস্যৈ ॥ ২০ ॥

নমস্তস্যৈ ॥ ২১ ॥ নমস্তস্যৈ নমো নমঃ ॥ ২২ ॥ যা দেবী সর্ব্বভূতেষু নিদ্রারূপেণ সংস্থিতা। নমস্তস্যৈ ॥ ২৩ ॥ নমস্তস্যৈ ॥ ২৪ ॥ নমস্তস্যৈ নমো নমঃ ॥ ২৫ ॥ যা দেবী সর্ব্বভূতেষু ক্ষুধারূপেণ সংস্থিতা। নমস্তস্যৈ ॥ ২৬ ॥ নমস্তস্যৈ ॥ ২৭ ॥ নমস্তস্যৈ নমো নমঃ ॥ ২৮ ॥ যা দেবী সর্ব্বভূতেষু চ্ছায়ারূপেণ সংস্থিতা। নমস্তস্যৈ ॥ ২৯ ॥ নমস্তস্যৈ ॥ ৩০ ॥ নমস্তস্যৈ নমো নমঃ ॥ ৩১ ॥ যা দেবী সর্ব্বভূতেষু শক্তিরূপেণ সংস্থিতা। নমস্তস্যৈ ॥ ৩২ ॥ নমস্তস্যৈ ॥ ৩৩ ॥ নমস্তস্যৈ নমো নমঃ ॥ ৩৪ ॥ যা দেবী সর্ব্বভূতেষু তৃষ্ণারূপেণ সংস্থিতা। নমস্তস্যৈ ॥ ৩৫ ॥ নমস্তস্যৈ ॥ ৩৬ ॥ নমস্তস্যৈ নমো নমঃ ॥ ৩৭ ॥ যা দেবী সর্ব্বভূতেষু ক্ষান্তি-রূপেণ সংস্থিতা। নমস্তস্যৈ ॥ ৩৮ ॥ নমস্তস্যৈ ॥৩৯॥ নমস্তস্যৈ নমো নমঃ ॥৪০॥ যা দেবী সর্ব্বভূতেষু জাতিরূপেণ সংস্থিতা। নমস্তস্যৈ ॥ ৪১ ॥ নমস্তস্যৈ ॥৪২। নমস্তস্যৈ নমো নমঃ ॥ ৪৩ ॥ যা দেবী সর্ব্বভূতেষু লজ্জারূপেণ সংস্থিতা। নমস্তস্যৈ ॥ ৪৪ ॥ নমস্তস্যৈ ॥ ৪৫ ॥ নমস্তস্যৈ নমো নমঃ ॥ ৪৬ ॥ যা দেবী সর্ব্বভূতেষু শান্তিরূপেণ সংস্থিতা। নমস্তস্যৈ ॥ ৪৭ ॥ নমস্তস্যৈ ॥ ৪৮ ॥ নমস্তস্যৈ নমো নমঃ ॥ ৪৯ ॥ যা দেবী সর্ব্বভূতেষু শ্রদ্ধারূপেণ সংস্থিতা। নমস্তস্যৈ ॥ ৫০ ॥ নমস্তস্যৈ ॥ ৫১ ॥ নমস্তস্যৈ নমো নমঃ ॥ ৫২ ॥ যা দেবী সর্ব্বভূতেষু কান্তিরূপেণ সংস্থিতা। নমস্তস্যৈ ॥ ৫৩ ॥ নমস্তস্যৈ ॥৫৪॥ নমস্তস্যৈ নমো নমঃ ॥ ৫৫ ॥ যা দেবী সর্ব্বভূতেষু লক্ষ্মীরূপেণ সংস্থিতা। নমস্তস্যৈ ॥ ৫৬ ॥ নমস্তস্যৈ ॥ ৫৭ ॥ নমস্তস্যৈ নমো নমঃ ॥ ৫৮ ॥ যা দেবী সর্ব্বভূতেষু বৃত্তিরূপেণ সংস্থিতা। নমস্তস্যৈ ॥ ৫৯ ॥ নমস্তস্যৈ ॥ ৬০ ॥ নমস্তস্যৈ নমো নমঃ ॥ ৬১ ॥ যা দেবী সর্ব্বভূতেষু স্মৃতিরূপেণ সংস্থিতা। নমস্তস্যৈ ॥ ৬২ ॥ নমস্তস্যৈ ॥ ৬৩ ॥ নমস্তস্যৈ নমো নমঃ ॥ ৬৪ ॥ যা দেবী সর্ব্বভূতেষু দয়ারূপেণ সংস্থিতা। নমস্তস্যৈ ॥ ৬৫ ॥ নমস্তস্যৈ ॥ ৬৬ ॥ নমস্তস্যৈ নমো নমঃ ॥ ৬৭ ॥ যা দেবী সর্ব্বভূতেষু তুষ্টিরূপেণ সংস্থিতা। নমস্তস্যৈ ॥ ৬৮ ॥ নমস্তস্যৈ ॥ ৬৯ ॥ নমস্তস্যৈ নমো নমঃ ॥ ৭০ ॥ যা দেবী সর্ব্বভূতেষু মাতৃরূপেণ সংস্থিতা। নমস্তস্যৈ ॥ ৭১ ॥ নমস্তস্যৈ ॥ ৭২॥ নমস্তস্যৈ নমোনমঃ ॥ ৭৩ ॥ যা দেবী সর্ব্বভূতেষু ভ্রান্তিরূপেণ সংস্থিতা। নমস্তস্যৈ ॥ ৭৪ ॥ নমস্তস্যৈ ॥ ৭৫ ॥ নমস্তস্যৈ নমোনমঃ ॥ ৭৬। ইন্দ্রিয়াণামধিষ্ঠাত্রী ভূতানাঞ্চাখিলেষু যা। ভূতেষু সততং তস্যৈ ব্যাপ্তিদেব্যৈ নমো নমঃ ॥ ৭৭ ॥ চিতিরূপেণ যা কৃৎস্নমেতদ্ ব্যাপ্য স্থিতা জগৎ। নমস্তস্যৈ ॥ ৭৮ ॥ নমস্তস্যৈ ॥ ৭৯ ॥ নমস্তস্যৈ নমো নমঃ ॥ ৮০ ॥ স্তুতা

সুরৈঃ পূর্ব্বমভীষ্টসংশ্রয়াৎ, তথা সুরেন্দ্রেণ দিনেষু সেবিতা। করোতু সা নঃ শুভহেতুরীশ্বরী, শুভানি ভদ্রাণ্যভিহন্তু চাপদঃ॥ ৮১॥ যা সাম্প্রতং চোদ্ধত-দৈত্যতাপিতৈরস্মাভিরীশা চ সুরৈর্নমস্যতে। যা চ স্মৃতা তৎক্ষণমেব হন্তি নঃ, সর্ব্বাপদো ভক্তিবিনম্রমূর্ত্তিভিঃ॥ ৮২॥

ঋষিরুবাচ॥ ৮৩॥ এবং স্তবাদিযুক্তানাং দেবানাং তত্র পার্ব্বতী। স্নাতুমভ্যাযযৌ তোয়ে জাহ্নব্যা নৃপনন্দন॥ ৮৪॥ সাঽব্রবীত্তান্ সুরান্ সুভ্রূর্ভবদ্ভিঃ স্তূয়তেঽত্র কা। শরীরকোষতশ্চাস্যাঃ সমুদ্ভূতাঽব্রবীচ্ছিবা॥ ৮৫॥ স্তোত্রং মমৈতৎ ক্রিয়তে শুম্ভদৈত্যনিরাকৃতৈঃ। দেবৈঃ সমেতৈঃ সমরে নিশুম্ভেন পরাজিতৈঃ॥ ৮৬॥ শরীরকোষাদ্ যত্তস্যাঃ পার্ব্বত্যা নিঃসৃতাঽম্বিকা। কৌষিকীতি সমস্তেষু ততো লোকেষু গীয়তে॥ ৮৭॥ তস্যাং বিনির্গতায়ান্তু কৃষ্ণাভূৎ সাপি পার্ব্বতী। কালিকেতি সমাখ্যাতা হিমাচলকৃতাশ্রয়া॥ ৮৮॥ ততোঽম্বিকাং পরং রূপং বিভ্রাণাং সুমনোহরম্। দদর্শ চণ্ডো মুণ্ডশ্চ ভৃত্যৌ শুম্ভনিশুম্ভয়োঃ॥৮৯॥ তাভ্যাং শুম্ভায় চাখ্যাতা অতীবসুমনোহরা। কাপ্যাস্তে স্ত্রী মহারাজ ভাসয়ন্তী হিমাচলম্॥ ৯০॥ নৈব তাদৃক্ কচিদ্রূপং দৃষ্টং কেনচিদুত্তমম্। জ্ঞায়তাং কাপ্যসৌ দেবী গৃহ্যতাঞ্চাসুরেশ্বর॥৯১॥ স্ত্রীরত্নমতিচার্ব্বঙ্গী দ্যোতয়ন্তী দিশস্ত্বিষা। সা তু তিষ্ঠতি দৈত্যেন্দ্র তাং ভবান্ দ্রষ্টুমর্হতি॥৯২॥ যানি রত্নানি মণয়ো গজাশ্বাদীনি বৈ প্রভো। ত্রৈলোক্যে তু সমস্তানি সাম্প্রতং ভান্তি তে গৃহে॥ ৯৩॥ ঐরাবতঃ সমানীতো গজরত্নং পুরন্দরাৎ। পারিজাত-তরুশ্চায়ং তথৈবোচ্চৈঃশ্রবা হয়ঃ॥ ৯৪॥ বিমানং হংসসংযুক্তমেতত্তিষ্ঠতি তেঽঙ্গনে। রত্নভূতমিহানীতং যদাসীদ্ বেধসোঽদ্ভুতম্॥৯৫॥ নিধিরেষ মহাপদ্মঃ সমানীতো ধনেশ্বরাৎ। কিঞ্জল্কিনীং দদৌ চাব্ধির্মালামম্লানপঙ্কজাম্॥ ৯৬॥ ছত্রন্তে বারুণং গেহে কাঞ্চনস্রাবি তিষ্ঠতি। তথায়ং স্যন্দনবরো যঃ পুরাসীৎ প্রজাপতেঃ॥ ৯৭॥ মৃত্যোরুৎক্রান্তিদা নাম শক্তিরীশ ত্বয়া হৃতা। পাশঃ সলিলরাজস্য ভ্রাতুস্তব পরিগ্রহে॥ ৯৮॥ নিশুম্ভস্যাব্ধিজাতাশ্চ সমস্তা রত্নজাতয়ঃ। বহ্নিরপি দদৌ তুভ্যমগ্নিশৌচে চ বাসসী॥ ৯৯॥ এবং দৈত্যেন্দ্র রত্নানি সমস্তান্যাহৃতানি তে। স্ত্রীরত্নমেষা কল্যাণী ত্বয়া কস্মান্ন গৃহ্যতে॥ ১০০॥

ঋষিরুবাচ॥১০১॥ নিশম্যেতি বচঃ শুম্ভঃ স তদা চণ্ডমুণ্ডয়োঃ। প্রেষয়ামাস সুগ্রীবং দূতং দেব্যা মহাসুরম্॥ ১০২॥ ইতি চেতি চ বক্তব্যা সা গত্বা বচনান্মম। যথা চাভ্যেতি সংপ্রীত্যা তথা কার্য্যং ত্বয়া লঘু॥ ১০৩॥ স তত্র গত্বা

যত্রাস্তে শৈলোদ্দেশেঽতিশোভনে। সা দেবী তাং ততঃ প্রাহ শ্লক্ষ্ণং মধুরয়া গিরা॥ ১০৪॥

দূত উবাচ॥ ১০৫॥ দেবি দৈত্যেশ্বরঃ শুম্ভস্ত্রৈলোক্যে পরমেশ্বরঃ। দূতোঽহং প্রেষিতস্তেন ত্বৎসকাশমিহাগতঃ॥ ১০৬॥ অব্যাহতাজ্ঞঃ সর্ব্বাসু যঃ সদা দেবযোনিষু। নির্জ্জিতাখিলদৈত্যারিঃ স যদাহ শৃণুষ্ব তৎ॥ ১০৭॥ মম ত্রৈলোক্যমখিলং মম দেবা বশানুগাঃ। যজ্ঞভাগানহং সর্ব্বানুপাশ্নামি পৃথক্ পৃথক্॥ ১০৮॥ ত্রৈলোক্যে বররত্নানি মম বশ্যান্যশেষতঃ। তথৈব গজরত্নানি হৃত্বা দেবেন্দ্রবাহনম্॥ ১০৯॥ ক্ষীরোদমথনোদ্ভূতমশ্বরত্নং মমাঽমরৈঃ। উচ্চৈঃশ্রবসসংজ্ঞং তৎ প্রণিপত্য সমর্পিতম্॥ ১১০॥ যানি চান্যানি দেবেষু গন্ধর্ব্বেষূরগেষু চ। রত্নভূতানি ভূতানি তানি ময্যেব শোভনে॥ ১১১॥ স্ত্রীরত্নভূতাং ত্বাং দেবি লোকে মন্যামহে বয়ম্। সা ত্বমস্মানুপাগচ্ছ যতো রত্নভুজো বয়ম্॥১১২॥ মাং বা মমানুজং বাপি নিশুম্ভমুরুবিক্রমম্। ভজ ত্বং চঞ্চলাপাঙ্গি রত্নভূতাসি বৈ যতঃ॥ ১১৩॥ পরমৈশ্বর্য্যমতুলং প্রাপ্স্যসে মৎপরিগ্রহাৎ। এতদ্ বুদ্ধ্যা সমালোচ্য মৎপরিগ্রহতাং ব্রজ॥ ১১৪॥

ঋষিরুবাচ॥ ১১৫॥ ইত্যুক্তা সা তদা দেবী গম্ভীরান্তঃস্মিতা জগৌ। দুর্গা ভগবতী ভদ্রা যয়েদং ধার্য্যতে জগৎ॥ ১১৬॥

দেব্যুবাচ॥ ১১৭॥ সত্যমুক্তং ত্বয়া নাত্র মিথ্যা কিঞ্চিত্ত্বয়োদিতম্। ত্রৈলোক্যাধিপতিঃ শুম্ভো নিশুম্ভশ্চাপি তাদৃশঃ॥১১৮॥ কিন্ত্বত্র যৎ প্রতিজ্ঞাতং মিথ্যা তৎ ক্রিয়তে কথম্। শ্রূয়তামল্পবুদ্ধিত্বাৎ প্রতিজ্ঞা যা কৃতা পুরা॥ ১১৯॥ যো মাং জয়তি সংগ্রামে যো মে দর্পং ব্যপোহতি। যো মে প্রতিবলো লোকে স মে ভর্ত্তা ভবিষ্যতি॥ ১২০॥ তদাগচ্ছতু শুম্ভোঽত্র নিশুম্ভো বা মহাসুরঃ। মাং জিত্বা কিং চিরেণাত্র পাণিং গৃহ্লাতু মে লঘু॥ ১২১॥

দূত উবাচ॥ ১২২॥ অবলিপ্তাঽসি মৈবং ত্বং দেবি ব্রূহি মমাগ্রতঃ। ত্রৈলোক্যে কঃ পুমাংস্তিষ্ঠেদগ্রে শুম্ভনিশুম্ভয়োঃ॥১২৩॥ অন্যেষামপি দৈত্যানাং সর্ব্বে দেবা ন বৈ যুধি। তিষ্ঠন্তি সম্মুখে দেবি কিং পুনঃ স্ত্রী ত্বমেকিকা॥১২৪॥ ইন্দ্রাদ্যাঃ সকলা দেবাস্তস্থুর্যেষাং ন সংযুগে। শুম্ভাদীনাং কথং তেষাং স্ত্রী প্রযাস্যসি সম্মুখম্॥ ১২৫॥ সা ত্বং গচ্ছ ময়ৈবোক্তা পার্শ্বং শুম্ভনিশুম্ভয়োঃ। কেশাকর্ষণনির্ধূতগৌরবা মা গমিষ্যসি॥ ১২৬॥

দেব্যুবাচ॥ ১২৭॥ এবমেতদ্ বলী শুম্ভো নিশুম্ভশ্চাতিবীর্য্যবান্।

কিঙ্করোমি প্রতিজ্ঞা মে যদনালোচিতা পুরা ॥ ১২৮ ॥ স ত্বং গচ্ছ ময়োক্তং তে যদেতৎ সর্ব্বমাদৃতঃ। তদাচক্ষ্বাসুরেন্দ্রায় স চ যুক্তং করোতু যৎ ॥ ১২৯ ॥

ইতি শ্রীমার্কণ্ডেয়পুরাণে সাবর্ণিকে মন্বন্তরে দেবী-মাহাত্ম্যে দেব্যা দূতসংবাদঃ। (৫ম অঃ)

---

## উত্তরচরিতম্—ধূম্রলোচনবধঃ।

ঋষিরুবাচ ॥ ১ ॥ ইত্যাকর্ণ্য বচো দেব্যাঃ স দূতোঽমর্ষপূরিতঃ। সমাচষ্ট সমাগম্য দৈত্যরাজায় বিস্তরাৎ ॥ ২ ॥ তস্য দূতস্য তদ্ বাক্যমাকর্ণ্যাঽসুররাট্ ততঃ। সক্রোধঃ প্রাহ দৈত্যানামধিপং ধূম্রলোচনম্ ॥ ৩ ॥ হে ধূম্রলোচনাশু ত্বং স্বসৈন্যপরিবারিতঃ। তামানয় বলাদ্দুষ্টাং কেশাকর্ষণবিহ্বলাম্ ॥ ৪ ॥ তৎপরিত্রাণদঃ কশ্চিদ্ যদি বোত্তিষ্ঠতেঽপরঃ। স হন্তব্যোঽমরো বাপি যক্ষো গন্ধর্ব্ব এব বা ॥ ৫ ॥

ঋষিরুবাচ ॥ ৬ ॥ তেনাজ্ঞপ্তস্ততঃ শীঘ্রং স দৈত্যো ধূম্রলোচনঃ। বৃতঃ ষষ্ট্যা সহস্রাণামসুরাণাং দ্রুতং যযৌ ॥ ৭ ॥ স দৃষ্ট্বা তাং ততো দেবীং তুহিনাচলসংস্থিতাম্। জগাদোচ্চৈঃ প্রযাহীতি মূলং শুম্ভনিশুম্ভয়োঃ ॥ ৮ ॥ ন চেৎ প্রীত্যাঽদ্য ভবতী মদ্ভর্ত্তারমুপৈষ্যতি। ততো বলান্নয়াম্যেষ কেশাকর্ষণবিহ্বলাম্ ॥ ৯ ॥

দেব্যুবাচ ॥ ১০ ॥ দৈত্যেশ্বরেণ প্রহিতো বলবান্ বলসংবৃতঃ। বলান্নয়সি মামেবং ততঃ কিন্তে করোম্যহম্ ॥ ১১ ॥

ঋষিরুবাচ ॥ ১২ ॥ ইত্যুক্তঃ সোঽভ্যধাবত্তামসুরো ধূম্রলোচনঃ। হুঙ্কারেণৈব তং ভস্ম সা চকারাম্বিকা ততঃ ॥ ১৩ ॥ অথ ক্রুদ্ধং মহাসৈন্যমসুরাণাং তথাম্বিকাম্। ববর্ষ সায়কৈস্তীক্ষ্ণৈস্তথা শক্তিপরশ্বধৈঃ ॥ ১৪ ॥ ততো ধুতসটঃ কোপাৎ কৃত্বা নাদং সুভৈরবম্। পপাতাসুরসেনায়াং সিংহো দেব্যাঃ স বাহনঃ ॥ ১৫ ॥ কাংশ্চিৎ করপ্রহারেণ দৈত্যানাস্যেন চাপরান্। আক্রান্ত্যা চাধরেণান্যান্ জঘান সুমহাসুরান্ ॥ ১৬ ॥ কেষাঞ্চিৎ পাটয়ামাস নখৈঃ কোষ্ঠানি কেসরী। তথা তলপ্রহারেণ শিরাংসি কৃতবান্ পৃথক্ ॥ ১৭ ॥ বিচ্ছিন্নবাহুশিরসঃ কৃতাস্তেন তথাঽপরে। পপৌ চ রুধিরং কোষ্ঠাদন্যেষাং

ধুতকেসরঃ ॥ ১৮ ॥ ক্ষণেন তদ্ বলং সর্ব্বং ক্ষয়ং নীতং মহাত্মনা। তেন কেসরিণা দেব্যা বাহনেনাতিকোপিনা ॥ ১৯ ॥ শ্রুত্বা তমসুরং দেব্যা নিহতং ধূম্রলোচনম্। বলঞ্চ ক্ষয়িতং কৃৎস্নং দেবীকেসরিণা ততঃ ॥ ২০ ॥ চুকোপ দৈত্যাধিপতিঃ শুম্ভঃ প্রস্ফুরিতাধরঃ। আজ্ঞাপয়ামাস চ তৌ চণ্ডমুণ্ডৌ মহাসুরৌ ॥ ২১ ॥ হে চণ্ড হে মুণ্ড বলৈর্বহুলৈঃ পরিবারিতৌ। তত্র গচ্ছত গত্বা চ সা সমানীয়তাং লঘু ॥ ২২ ॥ কেশেষ্বাকৃষ্য বদ্ধা বা যদি বঃ সংশয়ো যুধি। তদাশেষাযুধৈঃ সর্ব্বৈরসুরৈর্ব্বিনিহন্যতাম্ ॥ ২৩ ॥ তস্যাং হতায়াং দুষ্টায়াং সিংহে চ বিনিপাতিতে। শীঘ্রমাগম্যতাং বদ্ধা গৃহীত্বা তামথাম্বিকাম্ ॥ ২৪ ॥

ইতি শ্রীমার্কণ্ডেয়পুরাণে সাবর্ণিকে মন্বন্তরে দেবীমাহাত্ম্যে
শুম্ভনিশুম্ভসেনানী-ধূম্রলোচনবধঃ। (৬ষ্ঠ অঃ)

---

## উত্তরচরিতম্—চণ্ডমুণ্ডবধঃ।

ঋষিরুবাচ ॥ ১ ॥ আজ্ঞপ্তাস্তে ততো দৈত্যাশ্চণ্ডমুণ্ডপুরোগমাঃ। চতুরঙ্গ-বলোপেতা যযুরভ্যুদ্যতায়ুধাঃ ॥ ২ ॥ দদৃশুস্তে ততো দেবীমীষদ্ধাসাং ব্যবস্থি-তাম্। সিংহস্যোপরি শৈলেন্দ্র-শৃঙ্গে মহতি কাঞ্চনে ॥ ৩ ॥ তে দৃষ্ট্বা তাং সমাদাতুমুদ্যমঞ্চক্রুরুদ্যতাঃ। আকৃষ্টচাপাসিধরাস্তথান্যে তৎসমীপগাঃ ॥ ৪ ॥ ততঃ কোপঞ্চকারোচ্চৈরম্বিকা তানরীন্ প্রতি। কোপেন চাস্যা বদনং মসী-বর্ণমভূত্তদা ॥ ৫ ॥ ভ্রুকুটীকুটিলাত্তস্যা ললাটফলকাদ্ দ্রুতম্। কালী করালবদনা বিনিষ্ক্রান্তাঽসিপাশিনী ॥ ৬ ॥ বিচিত্রখট্বাঙ্গধরা নরমালা-বিভূষণা। দ্বীপিচর্ম্মপরীধানা শুষ্কমাংসাঽতিভৈরবা ॥ ৭ ॥ অতিবিস্তারবদনা জিহ্বাললনভীষণা। নিমগ্নারক্তনয়না নাদাপূরিতদিঙ্মুখা ॥ ৮ ॥ সা বেগে-নাভিপতিতা ঘাতয়ন্তী মহাসুরান্। সৈন্যে তত্র সুরারীণামভক্ষয়ত তদ্ বলম্ ॥ ৯ ॥ পার্ষ্ণিগ্রাহাঙ্কুশগ্রাহি-যোধঘণ্টাসমন্বিতান্। সমাদায়ৈকহস্তেন মুখে চিক্ষেপ বারণান্ ॥ ১০ ॥ তথৈব যোধং তুরগৈ রথং সারথিনা সহ। নিক্ষিপ্য বক্ত্রে দশনৈশ্চর্ব্বয়ন্ত্যাতিভৈরবম্ ॥ ১১ ॥ একং জগ্রাহ কেশেষু গ্রীবায়ামথ চাপরম্। পাদেনাক্রম্য চৈবান্যমুরসান্যমপোথয়ৎ ॥ ১২ ॥ তৈর্মুক্তানি চ শস্ত্রাণি মহা-স্ত্রাণি তথাসুরৈঃ। মুখেন জগ্রাহ রুষা দশনৈর্ম্মথিতান্যপি ॥ ১৩ ॥ বলিনাং

তদ্বলং সর্ব্বমসুরাণাম্মহাত্মনাম্। মমর্দ্দাভক্ষয়চ্চান্যানন্যাংশ্চাতাড়য়ত্তথা ॥১৪॥ অসিনা নিহতাঃ কেচিৎ কেচিৎ খট্বাঙ্গতাড়িতাঃ। জগ্মুর্বিনাশমসুরা দন্তাগ্রাঽভিহতাস্তথা ॥ ১৫ ॥ ক্ষণেন তদ্বলং সর্ব্বমসুরাণান্নিপাতিতম্। দৃষ্ট্বা চণ্ডোঽভিদুদ্রাব তাং কালীমতিভীষণাম্ ॥ ১৬ ॥ শরবর্ষৈর্ম্মহাভীমৈ-র্ভীমাক্ষীং তাং মহাসুরঃ। ছাদয়ামাস চক্রৈশ্চ মুণ্ডঃ ক্ষিপ্তৈঃ সহস্রশঃ ॥ ১৭ ॥ তানি চক্রাণ্যনেকানি বিশমানানি তন্মুখম্। বভুর্যথার্কবিম্বানি সুবহূনি ঘনোদরম্ ॥ ১৮ ॥ ততো জহাসাঽতিরুষা ভীমং ভৈরবনাদিনী। কালী করালবক্ত্রান্তর্দ্দুর্দ্দর্শদশনোজ্জ্বলা ॥ ১৯ ॥ উত্থায় চ মহাসিং হং দেবী চণ্ডমধাবত। গৃহীত্বা চাস্য কেশেষু শিরস্তেনাসিনাচ্ছিনৎ ॥ ২০ ॥ অথ মুণ্ডোঽপ্যধাবত্তাং দৃষ্ট্বা চণ্ডং নিপাতিতম্। তমপ্যপাতয়দ্ভূমৌ সা খড়্গাভিহতং রুষা ॥ ২১ ॥ হতশেষং ততঃ সৈন্যং দৃষ্ট্বা চণ্ডং নিপাতিতম্। মুণ্ডঞ্চ সুমহাবীর্য্যং দিশো ভেজে ভয়াতুরম্ ॥ ২২ ॥ শিরশ্চণ্ডস্য কালী চ গৃহীত্বা মুণ্ডমেব চ। প্রাহ প্রচণ্ডাট্টহাসমিশ্রমভ্যেত্য চণ্ডিকাম্ ॥ ২৩ ॥ ময়া তবাত্রোপহৃতৌ চণ্ডমুণ্ডৌ মহাপশূ। যুদ্ধযজ্ঞে স্বয়ং শুম্ভং নিশুম্ভঞ্চ হনিষ্যসি ॥ ২৪ ॥

ঋষিরুবাচ ॥ ২৫॥ তাবানীতৌ ততো দৃষ্ট্বা চণ্ডমুণ্ডৌ মহাসুরৌ। উবাচ কালীং কল্যাণী ললিতং চণ্ডিকা বচঃ ॥ ২৬ ॥ যস্মাচ্চণ্ডঞ্চ মুণ্ডঞ্চ গৃহীত্বা ত্বমুপাগতা। চামুণ্ডেতি ততো লোকে খ্যাতা দেবি ভবিষ্যসি ॥২৭॥

ইতি শ্রীমার্কণ্ডেয়পুরাণে সাবর্ণিকে মন্বন্তরে
দেবীমাহাত্ম্যে চণ্ডমুণ্ডবধঃ। (৭ম অঃ)

---

## উত্তরচরিতম্—রক্তবীজবধঃ।

ঋষিরুবাচ ॥ ১ ॥ চণ্ডে চ নিহতে দৈত্যে মুণ্ডে চ বিনিপাতিতে। বহুলেষু চ সৈন্যেষু ক্ষয়িতেষ্বসুরেশ্বরঃ ॥ ২ ॥ ততঃ কোপপরাধীন-চেতাঃ শুম্ভঃ প্রতাপবান্। উদ্যোগং সর্ব্বসৈন্যানাং দৈত্যানামাদিদেশ হ ॥ ৩ ॥ অদ্য সর্ব্ববলৈর্দ্দৈত্যাঃ ষড়শীতিরুদায়ুধাঃ। কম্বূনাং চতুরশীতির্নির্যান্তু স্ববলৈর্ব্বৃতাঃ ॥৪॥ কোটিবীর্য্যাণি পঞ্চাশদসুরাণাং কুলানি বৈ। শতং কুলানি ধৌম্রাণাং নির্গচ্ছন্তু মমাজ্ঞয়া ॥ ৫ ॥ কালকা দৌর্হৃদা মৌর্য্যাঃ কালকেয়াস্তথাসুরাঃ। যুদ্ধায়

সজ্জা নির্যান্তু আজ্ঞয়া ত্বরিতা মম ॥ ৬ ॥ ইত্যাজ্ঞাপ্যাসুরপতিঃ শুম্ভো-ভৈরবশাসনঃ। নির্জগাম মহাসৈন্যসহস্রৈর্বহুভির্বৃতঃ ॥ ৭ ॥ আয়াতং চণ্ডিকা দৃষ্ট্বা তৎসৈন্যমতিভীষণম্। জ্যাস্বনৈঃ পূরয়ামাস ধরণীগগনান্তরম্ ॥ ৮॥ ততঃ সিংহো মহানাদমতীব কৃতবান্ নৃপ। ঘণ্টাস্বনেন তান্ নাদানম্বিকা চোপবৃংহয়ৎ ॥ ৯ ॥ ধনুর্জ্যাসিংহঘণ্টানাং শব্দাপূরিত-দিঙ্মুখা। নিনাদৈ-র্ভীষণৈঃ কালী জিগ্যে বিস্তারিতাননা ॥ ১০ ॥ তন্নিনাদমুপশ্রুত্য দৈত্যসৈন্যৈ-শ্চতুর্দ্দিশম্। দেবী সিংহস্তথা কালী সরোষৈঃ পরিবারিতাঃ ॥ ১১ ॥ এতস্মিন্ন-ন্তরে ভূপ বিনাশায় সুরদ্বিষাম্। ভবায়ামরসিংহানামতিবীর্য্যবলা-ন্বিতাঃ ॥ ১২ ॥ ব্রহ্মেশগুহবিষ্ণূনাং তথেন্দ্রস্য চ শক্তয়ঃ। শরীরেভ্যো বিনি-ষ্ক্রম্য তদ্রূপৈশ্চণ্ডিকাং যযুঃ ॥ ১৩ ॥ যস্য দেবস্য যদ্রূপং যথা ভূষণবাহনম্। তদ্বদেব হি তচ্ছক্তিরসুরান্ যোদ্ধুমাযযৌ ॥ ১৪ ॥ হংসযুক্তবিমানাগ্রে সাক্ষসূত্রকমণ্ডলুঃ। আয়াতা ব্রহ্মণঃ শক্তির্ব্রহ্মাণী সাভিধীয়তে ॥ ১৫ ॥ মাহে-শ্বরী বৃষারূঢ়া ত্রিশূলবরধারিণী। মহাহিবলয়া প্রাপ্তা চন্দ্ররেখাবিভূষণা ১৬ ॥ কৌমারী শক্তিহস্তা চ ময়ূরবরবাহনা। যোদ্ধুমভ্যাযযৌ দৈত্যানম্বিকা গুহ-রূপিণী ॥ ১৭ ॥ তথৈব বৈষ্ণবী শক্তির্গরুড়োপরি সংস্থিতা। শঙ্খচক্রগদাশার্ঙ্গ-খড়্গহস্তাহভ্যুপাযযৌ ॥ ১৮ ॥ যজ্ঞবারাহমতুলং রূপং যা বিভ্রতো হরেঃ। শক্তিঃ সাপ্যাযযৌ তত্র বারাহীং বিভ্রতী তনুম্ ॥ ১৯ ॥ নারসিংহী নৃসিংহস্য বিভ্রতী সদৃশং বপুঃ। প্রাপ্তা তত্র সটাক্ষেপ-ক্ষিপ্তনক্ষত্রসংহতিঃ ॥ ২০ ॥ বজ্র-হস্তা তথৈবৈন্দ্রী গজরাজোপরিস্থিতা। প্রাপ্তা সহস্রনয়না যথা শক্রস্তথৈব সা ॥ ২১ ॥ ততঃ পরিবৃতস্তাভিরীশানো দেবশক্তিভিঃ। হন্যন্তামসুরাঃ শীঘ্রং মম প্রীত্যাহ চণ্ডিকাম্ ॥ ২২ ॥ ততো দেবীশরীরাত্তু বিনিষ্ক্রান্তাতি-ভীষণা। চণ্ডিকাশক্তিরত্যুগ্রা শিবাশতনিনাদিনী ॥ ২৩ ॥ সা চাহ ধূম্র-জটিলমীশানমপরাজিতা। দূতত্বং গচ্ছ ভগবন্ পার্শ্বং শুম্ভনিশুম্ভয়োঃ ॥২৪ ॥ ব্রূহি শুম্ভং নিশুম্ভঞ্চ দানবাবতিগর্ব্বিতৌ। যে চান্যে দানবাস্তত্র যুদ্ধায় সমুপস্থিতাঃ ॥ ২৫ ॥ ত্রৈলোক্যমিন্দ্রো লভতাং দেবাঃ সন্তু হবির্ভুজঃ। যূয়ং প্রয়াত পাতালং যদি জীবিতুমিচ্ছথ ॥ ২৬ ॥ বলাহবলেপাদথ চেদ্ ভবন্তো-যুদ্ধকাঙ্ক্ষিণঃ। তদাগচ্ছত তৃপ্যন্তু মচ্ছিবাঃ পিশিতেন বঃ ॥ ২৭ ॥ যতো নিযুক্তো দৌত্যেন তয়া দেব্যা শিবঃ স্বয়ম্। শিবদূতীতি লোকেহস্মিংস্ততঃ সা খ্যাতিমাগতা ॥ ২৮ ॥ তেহপি শ্রুত্বা বচো দেব্যাঃ শর্ব্বাখ্যাতং মহাসুরাঃ। অমর্ষাপূরিতা জগ্মুর্যতঃ কাত্যায়নী স্থিতা ॥ ২৯ ॥ ততঃ প্রথমমেবাগ্রে

শরশক্ত্যৃষ্টিবৃষ্টিভিঃ। ববর্ষুরুদ্ধতামর্ষাস্তাং দেবীমমরারয়ঃ ॥ ৩০ ॥ সা চ তান্ প্রহিতান্ বাণাঞ্শূলচক্রপরশ্বধান্। চিচ্ছেদ লীলয়াধ্মাতধনুর্মুক্তৈর্মহেষুভিঃ ॥ ৩১ ॥ তস্যাগ্রতস্তথা কালী শূলপাতবিদারিতান্। খট্বাঙ্গপোথিতাংশ্চারীন্ কুর্ব্বতী ব্যচরত্তদা ॥ ৩২ ॥ কমণ্ডলুজলাক্ষেপ-হতবীর্য্যান্ হতৌজসঃ। ব্রহ্মাণী চাকরোচ্ছত্রূন্ যেন যেন স্ম ধাবতি ॥ ৩৩ ॥ মাহেশ্বরী ত্রিশূলেন তথা চক্রেণ বৈষ্ণবী। দৈত্যান্ জঘান কৌমারী তথা শক্ত্যাতিকোপনা ॥ ৩৪ ॥ ঐন্দ্রী কুলিশপাতেন শতশো দৈত্যদানবাঃ। পেতুর্ব্বিদারিতাঃ পৃথ্ব্যাং রুধিরৌঘপ্রবর্ষিণঃ ॥ ৩৫ ॥ তুণ্ডপ্রহারবিধ্বস্তা দংষ্ট্রাগ্রক্ষতবক্ষসঃ। বরাহমূর্ত্ত্যা ন্যপতংশ্চক্রেণ চ বিদারিতাঃ ॥ ৩৬ ॥ নখৈর্ব্বিদারিতাংশ্চান্যান্ ভক্ষয়ন্তী মহাসুরান্। নারসিংহী চচারাজৌ নাদাপূর্ণদিগম্বরা ॥ ৩৭ ॥ চণ্ডাট্টহাসৈরসুরাঃ শিবদূত্যভিদূষিতাঃ। পেতুঃ পৃথিব্যাং পতিতাংস্তাংশ্চখাদাথ সা তদা ॥ ৩৮ ॥ ইতি মাতৃগণং ক্রুদ্ধং মর্দ্দয়ন্তং মহাসুরান্। দৃষ্ট্বাঽভ্যুপায়ৈর্ব্বিবিধৈর্নেশুর্দেবারিসৈনিকাঃ ॥ ৩৯ ॥ পলায়নপরান্ দৃষ্ট্বা দৈত্যান্ মাতৃগণার্দ্দিতান্। যোদ্ধুমভ্যাযযৌ ক্রুদ্ধো রক্তবীজো মহাসুরঃ ॥ ৪০ ॥ রক্তবিন্দুর্যদা ভূমৌ পতত্যস্য শরীরতঃ। সমুৎপততি মেদিন্যাস্তৎপ্রমাণস্তদাসুরঃ ॥ ৪১ ॥ যুযুধে স গদাপাণিরিন্দ্রশক্ত্যা মহাসুরঃ। ততশ্চৈন্দ্রী স্ববজ্রেণ রক্তবীজমতাড়য়ৎ ॥ ৪২ ॥ কুলিশেনাহতস্যাশু তস্য সুস্রাব শোণিতম্। সমুত্তস্থুস্ততো যোধাস্তদ্রূপাস্তৎপরাক্রমাঃ ॥ ৪৩ ॥ যাবন্তঃ পতিতাস্তস্য শরীরাদ্ রক্তবিন্দবঃ। তাবন্তঃ পুরুষা জাতাস্তদ্বীর্য্যবলবিক্রমাঃ ॥ ৪৪ ॥ তে চাপি যুযুধুস্তত্র পুরুষা রক্তসম্ভবাঃ। সমং মাতৃভিরত্যুগ্র-শস্ত্রপাতাতিভীষণম্ ॥ ৪৫ ॥ পুনশ্চ বজ্রপাতেন ক্ষতমস্য শিরো যদা। ববাহ রক্তং পুরুষাস্ততো জাতাঃ সহস্রশঃ ॥ ৪৬ ॥ বৈষ্ণবী সমরে চৈনং চক্রেণাঽভিজঘান হ। গদয়া তাড়য়ামাস ঐন্দ্রী তমসুরেশ্বরম্ ॥ ৪৭ ॥ বৈষ্ণবী-চক্রভিন্নস্য রুধিরস্রাবসম্ভবৈঃ। সহস্রশো জগদ্ ব্যাপ্তং তৎপ্রমাণৈর্ম্মহাসুরৈঃ ॥ ৪৮ ॥ শক্ত্যা জঘান কৌমারী বারাহী চ তথাঽসিনা। মাহেশ্বরী ত্রিশূলেন রক্তবীজং মহাসুরম্ ॥ ৪৯ ॥ স চাপি গদয়া দৈত্যঃ সর্ব্বা এবাঽহনৎ পৃথক্। মাতৄঃ কোপসমাবিষ্টো রক্তবীজো মহাসুরঃ ॥ ৫০ ॥ তস্যাহতস্য বহুধা শক্তিশূলাদিভির্ভুবি। পপাত যো বৈ রক্তৌঘস্তেনাসঞ্ছতশোঽসুরাঃ ॥ ৫১ ॥ তৈশ্চাসুরাসৃক্-সম্ভূতৈরসুরৈঃ সকলং জগৎ। ব্যাপ্তমাসীত্ততো দেবা ভয়মাজগ্মুরুত্তমম্ ॥ ৫২ ॥ তান্ বিষণ্ণান্ সুরান্ দৃষ্ট্বা চণ্ডিকা প্রাহসত্বরা। উবাচ কালীং চামুণ্ডে বিস্তরং বদনং

কুরু ॥ ৫৩ ॥ মচ্ছস্ত্রপাতসম্ভূতান্ রক্তবিন্দূন্ মহাসুরান্। রক্তবিন্দোঃ প্রতীচ্ছ ত্বং বক্ত্রেণানেন বেগিতা ॥ ৫৪ ॥ ভক্ষয়ন্তী চর রণে তদুৎপন্নান্মহাসুরান্। এবমেষ ক্ষয়ং দৈত্যঃ ক্ষীণরক্তো গমিষ্যতি ॥ ৫৫ ॥ ভক্ষ্যমাণাস্ত্বয়া চোগ্রা ন চোৎপৎস্যন্তি চাপরে। ইত্যুক্ত্বা তাং ততো দেবী শূলেনাভিজঘান তম্ ॥ ৫৬॥ মুখেন কালী জগৃহে রক্তবীজস্য শোণিতম্। ততোঽসাবাজঘানাথ গদয়া তত্র চণ্ডিকাম্ ॥ ৫৭ ॥ ন চাস্যা বেদনাঞ্চক্রে গদাপাতোঽল্পিকামপি। তস্যাহতস্য দেহাত্তু বহু সুস্রাব শোণিতম্ ॥ ৫৮ ॥ যতস্ততস্তদ্বক্ত্রেণ চামুণ্ডা সম্প্রতীচ্ছতি। মুখে সমুদ্গতা যেঽস্যা রক্তপাতান্মহাসুরাঃ ॥ ৫৯ ॥ তাংশ্চখাদাথ চামুণ্ডা পপৌ তস্য চ শোণিতম্। দেবী শূলেন বজ্রেণ বাণৈরসিভিঋষ্টিভিঃ ॥৬০॥ জঘান রক্তবীজস্তং চামুণ্ডা-পীতশোণিতম্। স পপাত মহীপৃষ্ঠে শস্ত্রসঙ্ঘসমাহতঃ ॥ ৬১ ॥ নীরক্তশ্চ মহীপাল রক্তবীজো মহাসুরঃ ॥ ৬২ ॥ ততস্তে হর্ষমতুলমবাপুস্ত্রিদশা নৃপ। তেষাং মাতৃগণো জাতো ননর্ত্তাসৃঙ্মদোদ্ধতঃ ॥ ৬৩ ॥

ইতি শ্রীমার্কণ্ডেয়পুরাণে সাবর্ণিকে মন্বন্তরে
দেবীমাহাত্ম্যে রক্তবীজবধঃ।

---

## উত্তরচরিতম্—নিশুম্ভবধঃ।

রাজোবাচ ॥ ১ ॥ বিচিত্রমিদমাখ্যাতং ভগবন্ ভবতা মম। দেব্যাশ্চরিতমাহাত্ম্যং রক্তবীজবধাশ্রিতম্ ॥ ২ ॥ ভূয়শ্চেচ্ছাম্যহং শ্রোতুং রক্তবীজে নিপাতিতে। চকার শুম্ভো যৎ কর্ম্ম নিশুম্ভশ্চাতিকোপনঃ ॥ ৩ ॥

ঋষিরুবাচ ॥ ৪ ॥ চকার কোপমতুলং রক্তবীজে নিপাতিতে। শুম্ভাসুরো নিশুম্ভশ্চ হতেষ্বন্যেষু চাহবে ॥ ৫ ॥ হন্যমানং মহাসৈন্যং বিলোক্যামর্ষমুদ্বহন্। অভ্যধাবন্নিশুম্ভোঽথ মুখ্যয়াৎসুরসেনয়া ॥ ৬ ॥ তস্যাগ্রতস্তথা পৃষ্ঠে পার্শ্বয়োশ্চ মহাসুরাঃ। সন্দষ্টৌষ্ঠপুটাঃ ক্রুদ্ধা হন্তুং দেবীমুপাযযুঃ ॥ ৭ ॥ আজগাম মহাবীর্য্যঃ শুম্ভোঽপি স্ববলৈর্বৃতঃ। নিহন্তুং চণ্ডিকাং কোপাৎ কৃত্বা যুদ্ধন্তু মাতৃভিঃ ॥ ৮ ॥ ততো যুদ্ধমতীবাসীদ্ দেব্যা শুম্ভনিশুম্ভয়োঃ। শরবর্ষমতীবোগ্রং মেঘয়োরিব বর্ষতোঃ ॥ ৯ ॥ চিচ্ছেদাস্তাঞ্ছরাংস্তাভ্যাং

চণ্ডিকাশু শরোৎকরৈঃ। তাড়য়ামাস চাঙ্গেষু শস্ত্রৌঘৈরসুরেশ্বরৌ ॥ ১০ ॥ নিশুম্ভো নিশিতং খড়্গং চর্ম্ম চাদায় সুপ্রভম্। অতাড়য়ন্মূর্দ্ধ্নি সিংহং দেব্যা বাহনমুত্তমম্ ॥ ১১ ॥ তাড়িতে বাহনে দেবী ক্ষুরপ্রেণাসিমুত্তমম্। নিশুম্ভস্যাশু চিচ্ছেদ চর্ম্ম চাপ্যষ্টচন্দ্রকম্ ॥ ১২ ॥ ছিন্নে চর্ম্মণি খড়্গে চ শক্তিং চিক্ষেপ সোঽসুরঃ। তামপ্যস্য দ্বিধা চক্রে চক্রেণাভিমুখাগতাম্ ॥১৩ ॥ কোপাধ্মাতো নিশুম্ভোঽথ শূলং জগ্রাহ দানবঃ। আয়াতং মুষ্টিপাতেন দেবী তচ্চাপ্যচূর্ণয়ৎ ॥১৪॥ আবিধ্যাথ গদাং সোঽপি চিক্ষেপ চণ্ডিকাং প্রতি। সাপি দেব্যা ত্রিশূলেন ভিন্না ভস্মত্বমাগতা ॥১৫॥ ততঃ পরশুহস্তন্তমায়ান্তং দৈত্যপুঙ্গবম্। আহত্য দেবী বাণৌঘৈরপাতয়ত ভূতলে ॥ ১৬ ॥ তস্মিন্নিপতিতে ভূমৌ নিশুম্ভে ভীমবিক্রমে। ভ্রাতর্য্যতীব সংক্রুদ্ধঃ প্রযযৌ হন্তুমম্বিকাম্ ॥ ১৭ ॥ স রথস্থস্তথাত্যুচ্চৈর্গৃহীতপরমায়ুধৈঃ। ভুজৈরষ্টাভিরতুলৈর্ব্যাপ্যাশেষং বভৌ নভঃ ॥ ১৮ ॥ তমায়ান্তং সমালোক্য দেবী শঙ্খমবাদয়ৎ। জ্যাশব্দঞ্চাপি ধনুষশ্চকারাতীবদুঃসহম্ ॥ ১৯ ॥ পূরয়ামাস ককুভো নিজঘণ্টাস্বনেন চ। সমস্তদৈত্যসৈন্যানাং তেজোবধবিধায়িনা ॥ ২০ ॥ ততঃ সিংহো মহানাদৈস্ত্যাজিতেভমহামদৈঃ। পূরয়ামাস গগনং গাং তথোপদিশো দশ ॥ ২১ ॥ ততঃ কালী সমুৎপত্য গগনং ক্ষ্মামতাড়য়ৎ। করাভ্যাং তন্নিনাদেন প্রাক্স্বনাস্তে তিরোহিতাঃ ॥ ২২ ॥ অট্টাট্টহাসমশিবং শিবদূতী চকার হ। তৈঃ শব্দৈরসুরাস্ত্রেসুঃ শুম্ভঃ কোপং পরং যযৌ ॥ ২৩ ॥ দুরাত্মংস্তিষ্ঠ তিষ্ঠেতি ব্যাজহারাম্বিকা যদা। তদা জয়েত্যভিহিতং দেবৈরাকাশসংস্থিতৈঃ। ২৪ ॥ শুম্ভেনাগত্য যা শক্তির্মুক্তা জ্বালাতিভীষণা। আয়ান্তী বহ্নিকূটাভা সা নিরস্তা মহোল্কয়া ॥ ২৫ ॥ সিংহনাদেন শুম্ভস্য ব্যাপ্তং লোকত্রয়ান্তরম্। নির্ঘাতনিঃস্বনো ঘোরো জিতবানবনীপতে ॥ ২৬ ॥ শুম্ভমুক্তাঞ্ছরান্ দেবী শুম্ভস্তৎপ্রহিতাঞ্ছরান্। চিচ্ছেদ স্বশরৈরুগ্রৈঃ শতশোঽথ সহস্রশঃ ॥ ২৭ ॥ ততঃ সা চণ্ডিকা ক্রুদ্ধা শূলেনাভিজঘান তম্। স তদাভিহতো ভূমৌ মূর্চ্ছিতো নিপপাত হ ॥ ২৮ ॥ ততো নিশুম্ভঃ সংপ্রাপ্য চেতনামাত্তকার্ম্মুকঃ। আজঘান শরৈর্দ্দেবীং কালীং কেসরিণং তথা ॥ ২৯ ॥ পুনশ্চ কৃত্বা বাহূনাময়ুতং দনুজেশ্বরঃ। চক্রায়ুধেন দিতিজশ্ছাদয়ামাস চণ্ডিকাম্ ॥৩০॥ ততো ভগবতী ক্রুদ্ধা দুর্গা দুর্গার্তিনাশিনী। চিচ্ছেদ তানি চক্রাণি স্বশরৈঃ সায়কাংশ্চ তান্ ॥ ৩১ ॥ ততো নিশুম্ভো বেগেন গদামাদায় চণ্ডিকাম্। অভ্যধাবত বৈ হন্তুং দৈত্যসেনাসমাবৃতঃ ॥ ৩২ ॥ তস্যাপতত এবাশু গদাং চিচ্ছেদ চণ্ডিকা। খড়্গেন শিতধারেণ স চ শূলং সমাদদে ॥ ৩৩ ॥ শূলহস্তং

সমায়ান্তং নিশুম্ভমমরার্দ্দনম্। হৃদি বিব্যাধ শূলেন বেগাবিদ্ধেন চণ্ডিকা॥ ৩৪॥ ভিন্নস্য তস্য শূলেন হৃদয়ান্নিঃসৃতোঽপরঃ। মহাবলো মহাবীর্য্যস্তিষ্ঠেতি পুরুষো বদন্॥৩৫॥ তস্য নিষ্ক্রামতো দেবী প্রহস্য স্বনবত্ততঃ। শিরশ্চিচ্ছেদ খড়্গেন ততোঽসাবপতদ্ভুবি॥৩৬॥ ততঃ সিংহশ্চখাদোগ্র-দংষ্ট্রাক্ষুণ্ণশিরোধরান্। অসুরাংস্তাংস্তথা কালী শিবদূতী তথাপরান্॥ ৩৭॥ কৌমারীশক্তিনির্ভিন্নাঃ কেচিন্নেশুর্ম্মহাসুরাঃ। ব্রহ্মাণীমন্ত্রপূতেন তোয়েনান্যে নিরাকৃতাঃ॥ ৩৮॥ মাহেশ্বরীত্রিশূলেন ভিন্নাঃ পেতুস্তথাঽপরে। বারাহীতুণ্ডঘাতেন কেচিচ্চূর্ণীকৃতা ভুবি॥৩৯॥ খণ্ডখণ্ডঞ্চ চক্রেণ বৈষ্ণব্যা দানবাঃ কৃতাঃ। বজ্রেণ চৈন্দ্রীহস্তাগ্র-বিমুক্তেন তথাঽপরে॥ ৪০॥ কেচিদ্ বিনেশুরসুরাঃ কেচিন্নষ্টা মহাহবাৎ। ভক্ষিতাশ্চাপরে কালীশিবদূতীমৃগাধিপৈঃ॥৪১॥

ইতি শ্রীমার্কণ্ডেয়পুরাণে সাবর্ণিকে মন্বন্তরে দেবীমাহাত্ম্যে নিশুম্ভবধঃ।

---

## দশমোঽধ্যায়ঃ।

### উত্তরচরিতম্—শুম্ভবধঃ।

ঋষিরুবাচ॥ ১॥ নিশুম্ভং নিহতং দৃষ্ট্বা ভ্রাতরং প্রাণসম্মিতম্। হন্যমানং বলঞ্চৈব শুম্ভঃ ক্রুদ্ধোঽব্রবীদ্বচঃ॥ ২॥ বলাবলেপদুষ্টে ত্বং মা দুর্গে গর্ব্বমাবহ। অন্যাসাং বলমাশ্রিত্য যুধ্যসে যাঽতিমানিনী॥ ৩॥

দেব্যুবাচ॥ ৪॥ একৈবাহং জগত্যত্র দ্বিতীয়া কা মমাপরা। পশ্যৈতা দুষ্ট ময্যেব বিশন্ত্যো মদ্বিভূতয়ঃ॥ ৫॥ (ঋষিরুবাচ) ততঃ সমস্তাস্তা দেব্যো ব্রহ্মাণীপ্রমুখা লয়ম্। তস্যা দেব্যাস্তনৌ জগ্মুরেকৈবাসীত্তদাম্বিকা॥ ৬॥

দেব্যুবাচ॥ ৭॥ অহং বিভূত্যা বহুভিরিহ রূপৈর্যদাস্থিতা। তৎ সংহৃতং ময়ৈকৈব তিষ্ঠাম্যাজৌ স্থিরো ভব॥ ৮॥

ঋষিরুবাচ॥ ৯॥ ততঃ প্রববৃতে যুদ্ধং দেব্যাঃ শুম্ভস্য চোভয়োঃ। পশ্যতাং সর্ব্বদেবানামসুরাণাঞ্চ দারুণম্॥ ১০॥ শরবর্ষৈঃ শিতৈঃ শস্ত্রৈস্তথাস্ত্রৈশ্চৈব দারুণৈঃ। তয়োর্যুদ্ধমভূদ্ ভূয়ঃ সর্ব্বলোকভয়ঙ্করম্॥ ১১॥ দিব্যান্যস্ত্রাণি শতশো মুমুচে যান্যথাম্বিকা। বভঞ্জ তানি দৈত্যেন্দ্রস্তৎ-প্রতীঘাতকর্ত্তৃভিঃ॥ ১২॥ মুক্তানি তেন চাস্ত্রাণি দিব্যানি পরমেশ্বরী। বভঞ্জ লীলয়ৈবোগ্র-হুঙ্কারোচ্চারণাদিভিঃ॥১৩॥ ততঃ শরশতৈর্দ্দেবীমাচ্ছাদয়ত সোঽসুরঃ। সাপি তৎ কুপিতা দেবী ধনুশ্চিচ্ছেদ চেষুভিঃ॥ ১৪॥ ছিন্নে

ধনূংষি দৈত্যেন্দ্রস্তথা শক্তিমথাংদদে। চিচ্ছেদ দেবী চক্রেণ তামপ্যস্ত করস্থিতাম্॥ ১৫॥ ততঃ খড়্গমুপাদায় শতচন্দ্রঞ্চ ভানুমৎ। অভ্যধাবত্তদা দেবীং দৈত্যানামধিপেশ্বরঃ॥ ১৬॥ তস্যাপতত এবাশু খড়্গং চিচ্ছেদ চণ্ডিকা। ধনুর্মুক্তৈঃ শিতৈর্বাণৈশ্চর্ম্ম চার্ককরামলম্॥ ১৭॥ [অশ্বাংশ্চ পাতয়ামাস রথং সারথিনা সহ।] হতাশ্বঃ স তদা দৈত্যশ্ছিন্নধন্বা বিসারথিঃ। জগ্রাহ মুদ্গরং ঘোরমম্বিকানিধনোদ্যতঃ॥ ১৮॥ চিচ্ছেদাপততস্তস্য মুদ্গরং নিশিতৈঃ শরৈঃ। তথাপি সোহভ্যধাবত্তাং মুষ্টিমুদ্যম্য বেগবান্॥ ১৯॥ স মুষ্টিং পাতয়ামাস হৃদয়ে দৈত্যপুঙ্গবঃ। দেব্যাস্তঞ্চাপি সা দেবী তলেনোরস্যতাড়য়ৎ॥ ২০॥ তলপ্রহারাভিহতো নিপপাত মহীতলে। স দৈত্যরাজঃ সহসা পুনরেব তথোত্থিতঃ॥ ২১॥ উৎপত্য চ প্রগৃহ্যোচ্চৈর্দ্দেবীং গগনমাস্থিতঃ। তত্রাপি সা নিরাধারা যুযুধে তেন চণ্ডিকা॥ ২২॥ নিযুদ্ধং খে তদা দৈত্যশ্চণ্ডিকা চ পরস্পরম্। চক্রতুঃ প্রথমং সিদ্ধমুনিবিস্ময়কারকম্॥ ২৩॥ ততো নিযুদ্ধং সুচিরং কৃত্বা তেনাম্বিকা সহ। উৎপাত্য ভ্রাময়ামাস চিক্ষেপ ধরণীতলে॥ ২৪॥ স ক্ষিপ্তো ধরণীং প্রাপ্য মুষ্টিমুদ্যম্য বেগিতঃ। অভ্যধাবত দুষ্টাত্মা চণ্ডিকানিধনেচ্ছয়া॥ ২৫॥ তমায়ান্তং ততো দেবী সর্ব্বদৈত্যজনেশ্বরম্। জগত্যাং পাতয়ামাস ভিত্ত্বা শূলেন বক্ষসি॥ ২৬॥ স গতাসুঃ পপাতোর্ব্ব্যাং দেবীশূলাগ্রবিক্ষতঃ। চালয়ন্ সকলাং পৃথ্বীং সাব্ধিদ্বীপাং সপর্ব্বতাম্॥ ২৭॥ ততঃ প্রসন্নমখিলং হতে তস্মিন্ দুরাত্মনি। জগৎ স্বাস্থ্যমতীবাপ নির্ম্মলঞ্চাভবন্নভঃ॥২৮॥ উৎপাতমেঘাঃ সোল্কা যে প্রাগাসংস্তে শমং যযুঃ। সরিতো মার্গবাহিন্যস্তথাসংস্তত্র পাতিতে॥ ২৯॥ ততো দেবগণাঃ সর্ব্বে হর্ষনির্ভরমানসাঃ। বভূবুর্নিহতে তস্মিন্ গন্ধর্ব্বা ললিতং জগুঃ॥ ৩০॥ অবাদয়ংস্তথৈবান্যে ননৃতুশ্চাপ্সরোগণাঃ। ববুঃ পুণ্যাস্তথা বাতাঃ সুপ্রভোহভূদ্দিবাকরঃ॥ ৩১॥ জজ্বলুশ্চাগ্নয়ঃ শান্তাঃ শান্তদিগ্‌জনিতস্বনাঃ॥ ৩২॥

ইতি শ্রীমার্কণ্ডেয়পুরাণে সাবর্ণিকে মন্বন্তরে দেবীমাহাত্ম্যে শুম্ভবধঃ।

---

## একাদশোঽধ্যায়ঃ।

### উত্তরচরিতম্—দেব্যাঃ স্তুতিঃ।

ঋষিরুবাচ॥ ১॥ দেব্যা হতে তত্র মহাসুরেন্দ্রে, সেন্দ্রাঃ সুরা বহ্নিপুরোগমাস্তাম্। কাত্যায়নীং তুষ্টুবুরিষ্টলম্ভাদ্, বিকাসিবক্ত্রাব্জ বিকাসিতাশাঃ॥২॥

দেবি প্রপন্নার্ত্তিহরে প্রসীদ, প্রসীদ মাতর্জগতোঽখিলস্য। প্রসীদ বিশ্বেশ্বরি পাহি বিশ্বং, ত্বমীশ্বরী দেবি চরাচরস্য॥ ৩॥ আধারভূতা জগতস্ত্বমেকা, মহীস্বরূপেণ যতঃ স্থিতাঽসি। অপাংস্বরূপস্থিতয়া ত্বয়ৈতদাপ্যায্যতে কৃৎস্ন-মলঙ্ঘ্যবীর্য্যে ॥৪॥ ত্বং বৈষ্ণবী শক্তিরনন্তবীর্য্যা, বিশ্বস্য বীজং পরমাঽসি মায়া। সম্মোহিতং দেবি সমস্তমেতৎ, ত্বং বৈ প্রসন্না ভুবি মুক্তিহেতুঃ॥ ৫॥ বিদ্যাঃ সমস্তাস্তব দেবি ভেদাঃ, স্ত্রিয়ঃ সমস্তাঃ সকলা জগৎসু। ত্বয়ৈকয়া পূরিত-মম্বয়ৈতৎ, কা তে স্তুতিঃ স্তব্যপরা পরোক্তিঃ॥ ৬॥ সর্ব্বভূতা যদা দেবী স্বর্গমুক্তিপ্রদায়িনী। ত্বং স্তুতা স্তুতয়ে কা বা ভবন্তু পরমোক্তয়ঃ॥ ৭॥ সর্ব্বস্য বুদ্ধিরূপেণ জনস্য হৃদি সংস্থিতে। স্বর্গাঽপবর্গদে দেবি নারায়ণি নমোঽস্তু তে ॥৮॥ কলাকাষ্ঠাদিরূপেণ পরিণামপ্রদায়িনি। বিশ্বস্যোপরতৌ শক্তে নারায়ণি নমোঽস্তু তে॥ ৯॥ সর্ব্বমঙ্গলমঙ্গল্যে শিবে সর্ব্বার্থসাধিকে। শরণ্যে ত্র্যম্বকে গৌরি নারায়ণি নমোঽস্তু তে॥ ১০॥ সৃষ্টিস্থিতিবিনাশানাং শক্তিভূতে সনাতনি। গুণাশ্রয়ে গুণময়ে নারায়ণি নমোঽস্তু তে॥ ১১॥ শরণাগতদীনার্ত্ত-পরিত্রাণপরায়ণে। সর্ব্বস্যার্ত্তিহরে দেবি নারায়ণি নমোঽস্তু তে॥ ১২॥ হংসযুক্তবিমানস্থে ব্রহ্মাণীরূপধারিণি। কৌশাম্ভঃক্ষরিকে দেবি নারায়ণি নমোঽস্তু তে॥ ১৩॥ ত্রিশূলচন্দ্রাহিধরে মহাবৃষভবাহিনি। মাহেশ্বরীস্বরূ-পেণ নারায়ণি নমোঽস্তু তে॥ ১৪॥ ময়ূরকুক্কুটবৃতে মহাশক্তিধরেঽনঘে। কৌমারীরূপসংস্থানে নারায়ণি নমোঽস্তু তে॥ ১৫॥ শঙ্খচক্রগদাশার্ঙ্গ-গৃহীত-পরমায়ুধে। প্রসীদ বৈষ্ণবীরূপে নারায়ণি নমোঽস্তু তে॥ ১৬॥ গৃহী-তোগ্রমহাচক্রে দংষ্ট্রোদ্ধৃতবসুন্ধরে। বরাহরূপিণি শিবে নারায়ণি নমোঽস্তু তে ॥১৭॥ নৃসিংহরূপেণোগ্রেণ হন্তুং দৈত্যান্ কৃতোদ্যমে। ত্রৈলোক্য-ত্রাণসহিতে নারায়ণি নমোঽস্তু তে॥ ১৮॥ কিরীটিনি মহাবজ্রে সহস্র-নয়নোজ্জ্বলে। বৃত্রপ্রাণহরে চৈন্দ্রি নারায়ণি নমোঽস্তু তে॥ ১৯॥ শিব-দূতীস্বরূপেণ হতদৈত্যমহাবলে। ঘোররূপে মহারাবে নারায়ণি নমোঽস্তু তে॥ ২০॥ দংষ্ট্রাকরালবদনে শিরোমালাবিভূষণে। চামুণ্ডে মুণ্ডমথনে নারায়ণি নমোঽস্তু তে॥ ২১॥ লক্ষ্মি লজ্জে মহাবিদ্যে শ্রদ্ধে পুষ্টি স্বধে ধ্রুবে। মহারাত্রি মহাবিদ্যে নারায়ণি নমোঽস্তু তে॥ ২২॥ মেধে সরস্বতি বরে ভূতি বাভ্রবি তামসি। নিয়তে ত্বং প্রসীদেশে নারায়ণি নমোঽস্তু তে॥ ২৩॥ সর্ব্বস্বরূপে সর্ব্বেশে সর্ব্বশক্তিসমন্বিতে। ভয়েভ্য-স্ত্রাহি নো দেবি দুর্গে দেবি নমোঽস্তু তে॥ ২৪॥ এতত্তে বদনং সৌম্যং

লোচনত্রয়ভূষিতম্। পাতু নঃ সর্ব্বভূতেভ্যঃ কাত্যায়নি নমোঽস্তু তে॥২৫॥ জ্বালাকরালমত্যুগ্রমশেষাঽসুরসূদনম্। ত্রিশূলং পাতু নো ভীতের্ভদ্রকালি নমোঽস্তু তে॥ ২৬॥ হিনস্তি দৈত্যতেজাংসি স্বনেনাপূর্য্য যা জগৎ। সা ঘণ্টা পাতু নো দেবি পাপেভ্যোঽনঃ সুতানিব॥ ২৭॥ অসুরাঽসৃগ্-বসাপঙ্ক-চর্চ্চিতস্তে করোজ্জ্বলঃ। শুভায় খড়্গো ভবতু চণ্ডিকে ত্বাং নতা বয়ম্॥ ২৮॥ রোগানশেষানপহংসি তুষ্টা, রুষ্টা তু কামান্ সকলানভীষ্টান্। ত্বামাশ্রিতানাং ন বিপন্নরাণাং, ত্বামাশ্রিতা হ্যাশ্রয়তাং প্রয়ান্তি॥ ২৯॥ এতৎ কৃতং যৎ কদনং ত্বয়াঽদ্য, ধর্ম্মদ্বিষাং দেবি মহাসুরাণাম্। রূপৈরনেকৈর্ব্বহু-ধাত্মমূর্ত্তিং, কৃত্বাঽম্বিকে তৎ প্রকরোতি কান্যা॥ ৩০॥ বিদ্যাসু শাস্ত্রেষু বিবেকদীপেষ্বাদ্যেষু বাক্যেষু চ কা ত্বদন্যা। মমত্বগর্ত্তেঽতিমহান্ধকারে, বিভ্রাময়ত্যেতদতীব বিশ্বম্॥ ৩১॥ রক্ষাংসি যত্রোগ্রবিষাশ্চ নাগা, যত্রাঽরয়ো দস্যুবলানি যত্র। দাবানলো যত্র তথাঽব্ধিমধ্যে, তত্র স্থিতা ত্বং পরিপাসি বিশ্বম্॥ ৩২॥ বিশ্বেশ্বরী ত্বং পরিপাসি বিশ্বং, বিশ্বাত্মিকা ধারয়সীতি বিশ্বম্। বিশ্বেশবন্দ্যা ভবতী ভবন্তি, বিশ্বাশ্রয়া যে ত্বয়ি ভক্তিনম্রাঃ॥ ৩৩॥ দেবি প্রসীদ পরিপালয় নোঽরিভীতে-র্নিত্যং যথাঽসুরবধাদধুনৈব সদ্যঃ। পাপানি সর্ব্বজগতাঞ্চ শমং নয়াশু, উৎপাতপাকজনিতাংশ্চ মহোপসর্গান্॥ ৩৪॥ প্রণতানাং প্রসীদ ত্বং দেবি বিশ্বার্ত্তিহারিণি। ত্রৈলোক্যবাসিনামীড্যে লোকানাং বরদা ভব॥ ৩৫॥

দেব্যুবাচ॥ ৩৬॥ বরদাঽহং সুরগণা বরং যং মনসেচ্ছত। তং বৃণুধ্বং প্রযচ্ছামি জগতামুপকারকম্॥ ৩৭॥

দেবা উচুঃ॥ ৩৮॥ সর্ব্বাবাধাপ্রশমনং ত্রৈলোক্যস্যাঽখিলেশ্বরি। এবমেব ত্বয়া কার্য্যমস্মদ্-বৈরিবিনাশনম্॥ ৩৯॥

দেব্যুবাচ॥ ৪০॥ বৈবস্বতেঽন্তরে প্রাপ্তে অষ্টাবিংশতিমে যুগে। শুম্ভো নিশুম্ভশ্চৈবান্যাবুৎপৎস্যেতে মহাসুরৌ॥ ৪১॥ নন্দগোপগৃহে জাতা যশোদাগর্ভসম্ভবা। ততস্তৌ নাশয়িষ্যামি বিন্ধ্যাচলনিবাসিনী॥ ৪২॥ পুনরপ্যতিরৌদ্রেণ রূপেণ পৃথিবীতলে। অবতীর্য্য হনিষ্যামি বৈপ্রচিত্তাংস্তু দানবান্। ৪৩॥ ভক্ষয়ন্ত্যাশ্চ তানুগ্রান্ বৈপ্রচিত্তান্মহাসুরান্। রক্তা দন্তা ভবিষ্যন্তি দাড়িমীকুসুমোপমাঃ॥ ৪৪॥ ততো মাং দেবতাঃ স্বর্গে মর্ত্ত্যলোকে চ মানবাঃ। স্তুবন্তো ব্যাহরিষ্যন্তি সততং রক্তদন্তিকাম্॥ ৪৫॥ ভূয়শ্চ শত-বার্ষিক্যামনাবৃষ্ট্যামনম্ভসি। মুনিভিঃ সংস্তুতা ভূমৌ সম্ভবিষ্যাম্যযোনিজা॥৪৬॥

ততঃ শতেন নেত্রাণাং নিরীক্ষিষ্যামি যন্মুনীন্। কীর্ত্তয়িষ্যন্তি মনুজাঃ শতাক্ষীমিতি মাং ততঃ ॥ ৪৭ ॥ ততোঽহমখিলং লোকমাত্মদেহসমুদ্ভবৈঃ। ভরিষ্যামি সুরাঃ শাকৈরাবৃষ্টেঃ প্রাণধারকৈঃ ॥ ৪৮ ॥ শাকম্ভরীতি বিখ্যাতিং তদা যাস্যাম্যহং ভুবি। তত্রৈব চ বধিষ্যামি দুর্গমাখ্যং মহাঽসুরম্ ॥ ৪৯ ॥ [ দুর্গাদেবীতি বিখ্যাতং তন্মে নাম ভবিষ্যতি ]। পুনশ্চাহং যদা ভীমং রূপং কৃত্বা হিমাচলে ॥ ৫০ ॥ রক্ষাংসি ক্ষয়য়িষ্যামি মুনীনাং ত্রাণকারণাৎ। তদা মাং মুনয়ঃ সর্ব্বে স্তোষ্যন্ত্যানম্রমূর্ত্তয়ঃ ॥ ৫১ ॥ ভীমাদেবীতি বিখ্যাতং তন্মে নাম ভবিষ্যতি। যদাঽরুণাখ্যস্ত্রৈলোক্যে মহাবাধাং করিষ্যতি ॥ ৫২ ॥ তদাহং ভ্রামরং রূপং কৃত্বাঽসংখ্যেয়ষট্পদম্। ত্রৈলোক্যস্য হিতার্থায় বধিষ্যামি মহাসুরম্ ॥ ৫৩ ॥ ভ্রামরীতি চ মাং লোকাস্তদা স্তোষ্যন্তি সর্ব্বতঃ। ইত্থং যদা যদা বাধা দানবোত্থা ভবিষ্যতি ॥ ৫৪ ॥ তদা তদাবতীর্য্যাহং করিষ্যাম্যরিসংক্ষয়ম্ ॥ ৫৫ ॥

ইতি শ্রীমার্কণ্ডেয়পুরাণে সাবর্ণিকে মন্বন্তরে দেবীমাহাত্ম্যে দেব্যাঃ স্তুতিঃ ॥

---

## দ্বাদশোঽধ্যায়ঃ

### উত্তরচরিতম্—শুম্ভনিশুম্ভবধসমাপ্তিঃ

দেব্যুবাচ ॥ ১ ॥ এভিঃ স্তবৈশ্চ মাং নিত্যং স্তোষ্যতে যঃ সমাহিতঃ। তস্যাহং সকলাং বাধাং শময়িষ্যাম্যসংশয়ম্ ॥ ২ ॥ মধুকৈটভনাশঞ্চ মহিষাসুরঘাতনম্। কীর্ত্তয়িষ্যন্তি যে তদ্বদ্ বধং শুম্ভনিশুম্ভয়োঃ ॥ ৩ ॥ অষ্টম্যাঞ্চ চতুর্দ্দশ্যাং নবম্যাঞ্চৈকচেতসঃ। শ্রোষ্যন্তি চৈব যে ভক্ত্যা মম মাহাত্ম্যমুত্তমম্ ॥ ৪ ॥ ন তেষাং দুষ্কৃতং কিঞ্চিদ্ দুষ্কৃতোত্থা ন চাপদঃ। ভবিষ্যতি ন দারিদ্র্যং ন চৈবেষ্টবিয়োজনম্ ॥ ৫ ॥ শত্রুতো ন ভয়ং তস্য দস্যুতো বা ন রাজতঃ। ন শস্ত্রানলতোয়ৌঘাৎ কদাচিৎ সম্ভবিষ্যতি ॥৬॥ তস্মান্মমৈতন্মাহাত্ম্যং পঠিতব্যং সমাহিতৈঃ। শ্রোতব্যঞ্চ সদা ভক্ত্যা পরং স্বস্ত্যয়নং হি তৎ ॥ ৭ ॥ উপসর্গানশেষাংস্তু মহামারীসমুদ্ভবান্। তথা ত্রিবিধমুৎপাতং মাহাত্ম্যং শময়েন্মম ॥ ৮ ॥ যত্রৈতৎ পঠ্যতে সম্যঙ্ নিত্যমায়তনে মম। সদা ন তদ্ বিমোক্ষ্যামি সান্নিধ্যং তত্র মে স্থিতম্ ॥ ৯ ॥ বলিপ্রদানে পূজায়ামগ্নিকার্য্যে মহোৎসবে। সর্ব্বং মমৈতচ্চরিতমুচ্চার্য্যং শ্রাব্যমেব চ ॥ ১০ ॥ জানতাঽজানতা বাপি বলিপূজাং তথা কৃতাম্। প্রতীচ্ছিষ্যাম্যহং প্রীত্যা বহ্নিহোমং তথাকৃতম্ ॥ ১১ ॥ শরৎকালে

মহাপূজা ক্রিয়তে যা চ বার্ষিকী। তস্যাং মমৈতন্মাহাত্ম্যং শ্রুত্বা ভক্তি-সমন্বিতঃ ॥ ১২ ॥ সর্ব্বাবাধাবিনির্ম্মুক্তো ধনধান্যসুতান্বিতঃ। মনুষ্যো মৎপ্রসাদেন ভবিষ্যতি ন সংশয়ঃ ॥ ১৩ ॥ শ্রুত্বা মমৈতন্মাহাত্ম্যং তথা চোৎপত্তয়ঃ শুভাঃ। পরাক্রমঞ্চ যুদ্ধেষু জায়তে নির্ভয়ঃ পুমান্ ॥ ১৪ ॥ রিপবঃ সংক্ষয়ং যান্তি কল্যাণঞ্চোপপদ্যতে। নন্দতে চ কুলং পুংসাং মাহাত্ম্যং মম শৃণ্বতাম্ ॥ ১৫ ॥ শান্তিকর্ম্মণি সর্ব্বত্র তথা দুঃস্বপ্নদর্শনে। গ্রহপীড়াসু চোগ্রাসু মাহাত্ম্যং শৃণুয়ান্মম ॥ ১৬ ॥ উপসর্গাঃ শমং যান্তি গ্রহপীড়াশ্চ দারুণাঃ। দুঃস্বপ্নঞ্চ নৃভির্দ্দৃষ্টং সুস্বপ্নমুপজায়তে ॥ ১৭ ॥ বালগ্রহাভিভূতানাং বালানাং শান্তিকারকম্। সংঘাতভেদে চ নৃণাং মৈত্রীকরণমুত্তমম্ ॥ ১৮ ॥ দুর্ব্বৃত্তানামশেষাণাং বলহানিকরং পরম্। রক্ষোভূতপিশাচানাং পঠনাদেব নাশনম্ ॥ ১৯ ॥ সর্ব্বং মমৈতন্মাহাত্ম্যং মম সন্নিধিকারকম্। পশুপুষ্পার্ঘ্য-ধূপৈশ্চ গন্ধদীপৈস্তথোত্তমৈঃ ॥ ২০ ॥ বিপ্রাণাং ভোজনৈর্হোমৈঃ প্রোক্ষণীয়ৈরহর্নিশম্। অন্যৈশ্চ বিবিধৈর্ভোগৈঃ প্রদানৈর্ব্বৎসরেণ যা ॥ ২১ ॥ প্রীতির্মে ক্রিয়তে সাঽস্মিন্ সকৃৎ সুচরিতে শ্রুতে। শ্রুতং হরতি পাপানি তথারোগ্যং প্রযচ্ছতি ॥ ২২ ॥ রক্ষাং করোতি ভূতেভ্যো জন্মনাং কীর্ত্তনং মম। যুদ্ধেষু চরিতং যন্মে দুষ্টদৈত্যনিবর্হণম্ ॥ ২৩ ॥ তস্মিন্ শ্রুতে বৈরিকৃতং ভয়ং পুংসাং ন জায়তে। যুষ্মাভিঃ স্তুতয়ো যাশ্চ যাশ্চ ব্রহ্মর্ষিভিঃ কৃতাঃ ॥ ২৪ ॥ ব্রহ্মণা চ কৃতাস্তাস্তু প্রযচ্ছন্তি শুভাং মতিম্। অরণ্যে প্রান্তরে বাঽপি দাবাগ্নি-পরিবারিতঃ ॥ ২৫ ॥ দস্যুভির্ব্বা বৃতঃ শূন্যে গৃহীতো বাঽপি শত্রুভিঃ। সিংহ-ব্যাঘ্রানুযাতো বা বনে বা বনহস্তিভিঃ ॥ ২৬ ॥ রাজ্ঞা ক্রুদ্ধেন বাজ্ঞপ্তো বধ্যো বন্ধগতোঽপি বা। আঘূর্ণিতো বা বাতেন স্থিতঃ পোতে মহার্ণবে ॥ ২৭ ॥ পতৎসু বাঽপি শস্ত্রেষু সংগ্রামে ভৃশদারুণে। সর্ব্বাবাধাসু ঘোরাসু বেদনাভ্যর্দ্দিতোঽপি বা ॥ ২৮ ॥ স্মরন্মমৈতচ্চরিতং নরো মুচ্যেত সঙ্কটাৎ। মম প্রভাবাৎ সিংহাদ্যা দস্যবো বৈরিণস্তথা ॥ ২৯ ॥ দূরাদেব পলায়ন্তে স্মরতশ্চরিতং মম ॥ ৩০ ॥

ঋষিরুবাচ ॥ ৩১ ॥ ইত্যুক্ত্বা সা ভগবতী চণ্ডিকা চণ্ডবিক্রমা। পশ্যতামেব দেবানাং তত্রৈবান্তরধীয়ত ॥ ৩২ ॥ তেঽপি দেবা নিরাতঙ্কাঃ স্বাধিকারান্ যথা পুরা। যজ্ঞভাগভুজঃ সর্ব্বে চক্রুর্বিনিহতারয়ঃ ॥ ৩৩ ॥ দৈত্যাশ্চ দেব্যা নিহতে শুম্ভে দেবরিপৌ যুধি। জগদ্বিধ্বংসিনি তস্মিন্মহোগ্রেঽতুলবিক্রমে ॥ ৩৪ ॥ নিশুম্ভে চ মহাবীর্য্যে শেষাঃ পাতালমাযযুঃ। এবং ভগবতী দেবী সা নিত্যাঽপি

পুনঃ পুনঃ ॥ ৩৫ ॥ সম্ভূয় কুরুতে ভূপ জগতঃ পরিপালনম্। তয়ৈতন্মোহ্যতে বিশ্বং সৈব বিশ্বং প্রসূয়তে ॥ ৩৬ ॥ সা যাচিতা চ বিজ্ঞানং তুষ্টা ঋদ্ধিং প্রযচ্ছতি। ব্যাপ্তং তয়ৈতৎ সকলং ব্রহ্মাণ্ডং মনুজেশ্বর ॥ ৩৭ ॥ মহাকাল্যা মহাকালে মহামারীস্বরূপয়া। সৈব কালে মহামারী সৈব সৃষ্টির্ভবত্যজা ॥৩৮॥ স্থিতিং করোতি ভূতানাং সৈব কালে সনাতনী। ভবকালে নৃণাং সৈব লক্ষ্মীর্বৃদ্ধিপ্রদা গৃহে ॥ ৩৯ ॥ সৈবাহভাবে তথাহলক্ষ্মীর্বিনাশায়োপজায়তে। স্তুতা সম্পূজিতা পুষ্পৈর্ধূপগন্ধাদিভিস্তথা ॥ ৪০ ॥ দদাতি বিত্তং পুত্রাংশ্চ মতিং ধর্ম্মে তথা শুভাম্ ॥ ৪১ ॥

ইতি শ্রীমার্কণ্ডেয়পুরাণে সাবর্ণিকে মন্বন্তরে দেবীমাহাত্ম্যে শুম্ভনিশুম্ভ-বধঃ সমাপ্তঃ।

---

## ত্রয়োদশোহধ্যায়ঃ

### উত্তরচরিতম্—দেব্যা বরপ্রদানম্।

ঋষিরুবাচ ॥ ১ ॥ এতত্তে কথিতং ভূপ দেবীমাহাত্ম্যমুত্তমম্। এবম্প্রভাবা সা দেবী যয়েদং ধার্য্যতে জগৎ ॥ ২ ॥ বিদ্যা তথৈব ক্রিয়তে ভগবদ্-বিষ্ণুমায়য়া। তয়া ত্বমেষ বৈশ্যশ্চ তথৈবান্যে বিবেকিনঃ ॥ ৩ ॥ মোহ্যন্তে মোহিতাশ্চৈব মোহমেষ্যন্তি চাপরে। তামুপৈহি মহারাজ শরণং পরমেশ্বরীম্ ॥ ৪ ॥ আরাধিতা সৈব নৃণাং ভোগস্বর্গাপবর্গদা ॥ ৫ ॥

মার্কণ্ডেয় উবাচ ॥ ৬ ॥ ইতি তস্য বচঃ শ্রুত্বা সুরথঃ স নরাধিপঃ ॥ ৭ ॥ প্রণিপত্য মহাভাগং তমৃষিং শংসিতব্রতম্। নির্ব্বিণ্নোহতিমমত্বেন রাজ্যাহপহরণেন চ ॥ ৮ ॥ জগাম সদ্যস্তপসে স চ বৈশ্যো মহামুনে। সন্দর্শনার্থমম্বায়া নদীপুলিনসংস্থিতঃ ॥ ৯ ॥ স চ বৈশ্যস্তপস্তেপে দেবীসূক্তং পরং জপন্। তৌ তস্মিন্ পুলিনে দেব্যাঃ কৃত্বা মূর্ত্তিং মহীময়ীম্ ॥১০॥ অর্হণাঞ্চ-ক্রতুস্তস্যাঃ পুষ্পধূপাহগ্নিতর্পণৈঃ। নিরাহারৌ যতাহারৌ তন্মনস্কৌ সমাহিতৌ ॥ ১১ ॥ দদতুস্তৌ বলিঞ্চৈব নিজগাত্রাহসৃগুক্ষিতম্। এবং সমারা-ধয়তোস্ত্রিভির্ব্বর্ষৈর্যতাত্মনোঃ ॥ ১২ ॥ পরিতুষ্টা জগদ্ধাত্রী প্রত্যক্ষং প্রাহ চণ্ডিকা ॥ ১৩ ॥

দেব্যুবাচ ॥ ১৪ ॥ যৎ প্রার্থ্যতে ত্বয়া ভূপ ত্বয়া চ কুলনন্দন ॥ ১৫ ॥ মত্তস্তৎ প্রাপ্যতাং সর্ব্বং পরিতুষ্টা দদামি তৎ ॥ ১৬ ॥

মার্কণ্ডেয় উবাচ ॥ ১৭ ॥ ততো বব্রে নৃপো রাজ্যমবিভ্রংশ্যন্যজন্মনি ॥ ১৮ ॥ অত্র চৈব নিজং রাজ্যং হতশত্রুবলং বলাৎ। সোঽপি বৈশ্যস্ততো জ্ঞানং বব্রে নির্ব্বিণ্ণমানসঃ ॥ ১৯ ॥ মমেত্যহমিতি প্রাজ্ঞঃ সঙ্গবিচ্যুতিকারকম্ ॥ ২০ ॥

দেব্যুবাচ ॥ ২১ ॥ স্বল্পৈরহোভির্নৃপতে স্বরাজ্যং প্রাপ্স্যতে ভবান্ ॥২২॥ হত্বা রিপূনস্খলিতং তব তত্র ভবিষ্যতি। মৃতশ্চ ভূয়ঃ সংপ্রাপ্য জন্ম দেবাদ্ বিবস্বতঃ ॥ ২৩ ॥ সাবর্ণিকো নাম মনুর্ভবান্ ভুবি ভবিষ্যতি। বৈশ্যবর্য্য ত্বয়া যশ্চ বরোঽস্মত্তোঽভিবাঞ্ছিতঃ ॥ ২৪ ॥ তং প্রযচ্ছামি সংসিদ্ধ্যৈ তব জ্ঞানং ভবিষ্যতি ॥ ২৫ ॥

মার্কণ্ডেয় উবাচ ॥ ২৬ ॥ ইতি দত্ত্বা তয়োর্দ্দেবী যথাভিলষিতং বরম্ ॥ ২৭ ॥ বভূবান্তর্হিতা সদ্যো ভক্ত্যা তাভ্যামভিষ্টুতা। এবং দেব্যা বরং লব্ধ্বা সুরথঃ ক্ষত্রিয়র্ষভঃ ॥ ২৮ ॥ সূর্য্যাজ্জন্ম সমাসাদ্য সাবর্ণির্ভবিতা মনুঃ ॥ ২৯ ॥ ওঁ।

ইতি শ্রীমার্কণ্ডেয়পুরাণে সাবর্ণিকে মন্বন্তরে দেবীমাহাত্ম্যং সমাপ্তম্। (১৩শ অঃ)

ওঁ তৎসৎ।

---

## চণ্ডী-পাঠাপরাধক্ষমাপন-শ্লোকাঃ

ওঁ যদক্ষরং পরিভ্রষ্টং মাত্রাহীনঞ্চ যদ্ভবেৎ। পূর্ণং ভবতু তৎসর্ব্বং ত্বৎপ্রসাদান্মহেশ্বরি ॥ যদত্র পাঠে জগদম্বিকে ময়া, বিসর্গবিন্দ্বক্ষরহীনমীরিতম্। তদস্তু সম্পূর্ণতমং প্রসাদতঃ, সঙ্কল্পসিদ্ধিস্তু সদৈব জায়তাম্ ॥ যন্মাত্রাবিন্দুবিন্দুদ্বিতয়পদপদদ্বন্দ্ববর্ণাদিহীনং, ভক্ত্যা ভক্ত্যানুপূর্ব্বং প্রসভকৃতিবশাদ্ ব্যক্তমব্যক্তমম্ব। মোহাদজ্ঞানতো বা পঠিতমপঠিতং সাম্প্রতন্তে স্তবেঽস্মিং-স্তৎ সর্ব্বং সাঙ্গমাস্তাং ভগবতি বরদে ত্বৎপ্রসাদাৎ প্রসীদ ॥ প্রসীদ ভগবত্যম্ব প্রসীদ ভক্তবৎসলে। প্রসাদং কুরু মে দেবি দুর্গে দেবি নমোঽস্তু তে ॥ যস্যার্থে পঠিতং স্তোত্রং তবেদং শঙ্করপ্রিয়ে। তস্য দেহস্য গেহস্য শান্তির্ভবতু সর্ব্বদা ॥

---

## অথ সপ্তশতীরহস্যত্রয়ম্

### প্রাধানিকং রহস্যম্।

অস্য শ্রীসপ্তশতীরহস্যত্রয়স্য নারায়ণ-ঋষিরনুষ্টুপ্ ছন্দো মহাকালীমহালক্ষ্মীসরস্বত্যো দেবতা যথোক্তফলাবাপ্ত্যর্থং সপ্তশতীপাঠান্তে জপে বিনিয়োগঃ।

রাজোবাচ। ভগবন্নবতারা যে চণ্ডিকায়াস্ত্বয়োদিতাঃ। এতেষাং প্রকৃতিং ব্রহ্মন্ প্রধানং বক্তুমর্হসি॥ ১॥ আরাধ্যং যন্ময়া দেব্যাঃ স্বরূপং যেন তদ্দ্বিজ। বিধিনা ব্রূহি সকলং যথাবৎ প্রণতস্য মে॥ ২॥

ঋষিরুবাচ। ইদং রহস্যং পরমমনাখ্যেয়ং প্রচক্ষ্যতে। ভক্তোঽসীতি ন মে কিঞ্চিৎ তবাবাচ্যং নরাধিপ॥ ৩॥ সর্ব্বস্যাদ্যা মহালক্ষ্মীস্ত্রিগুণা পরমেশ্বরী। লক্ষ্যাঽলক্ষ্যস্বরূপা সা ব্যাপ্য কৃৎস্নং ব্যবস্থিতা॥ ৪॥ মাতুলিঙ্গং গদাং খেটং পানপাত্রঞ্চ বিভ্রতী। নাগং লিঙ্গঞ্চ যোনিঞ্চ বিভ্রতী নৃপ মূৰ্দ্ধনি॥ ৫॥ তপ্তকাঞ্চনবর্ণাভা তপ্তকাঞ্চনভূষণা। শূন্যং তদখিলং যেন পূরয়ামাস তেজসা॥ ৬॥ শূন্যং তদখিলং লোকং বিলোক্য পরমেশ্বরী। বভার রূপমপরং তমসা কেবলেন হি॥ ৭॥ সা ভিন্নাঞ্জনসঙ্কাশা দংষ্ট্রাঙ্কিতবরাননা। বিশাললোচনা নারী বভূব তনুমধ্যমা॥ ৮॥ খড়্গপাত্রশিরঃখেটৈরলঙ্কৃতচতুর্ভুজা। কবন্ধহারং শিরসা বিভ্রাণাঽহিশিরঃস্রজম্॥ ৯॥ সা প্রোবাচ মহালক্ষ্মীং তামসী প্রমদোত্তমা। নাম কর্ম্ম চ মে মাতর্দ্দেহি তুভ্যং নমো নমঃ॥ ১০॥ তাং প্রোবাচ মহালক্ষ্মীস্তামসীং প্রমদোত্তমাম্। দদামি তব নামানি যানি কর্ম্মাণি তানি চ॥ ১১॥ মহামায়া মহাকালী মহামারী ক্ষুধা তৃষা। নিদ্রা তৃষ্ণা চৈকবীরা কালরাত্রির্দুরত্যয়া॥ ১২॥ ইমানি তব নামানি প্রতিপাদ্যানি কর্ম্মভিঃ। এভিঃ কর্ম্মাণি তে জ্ঞাত্বা যোঽধীতে সোঽশ্নুতে সুখম্॥ ১৩॥ তামিত্যুক্ত্বা মহালক্ষ্মীঃ স্বরূপমপরং নৃপ। সত্ত্বাখ্যেনাতিশুদ্ধেন গুণেনেন্দুপ্রভং দধৌ॥ ১৪॥ অক্ষমালাঙ্কুশধরা বীণাপুস্তকধারিণী। সা বভূব বরা নারী নামান্যস্যৈ চ সা দদৌ॥ ১৫॥ মহাবিদ্যা মহাবাণী ভারতী বাক্ সরস্বতী। আর্য্যা ব্রাহ্মী কামধেনুর্ব্বেদগর্ভা চ ধীশ্বরী॥ ১৬॥ অথোবাচ মহালক্ষ্মীর্মহাকালীং সরস্বতীম্। যুবাং জনয়তাং দেব্যৌ মিথুনে স্বানুরূপতঃ॥ ১৭॥ ইত্যুক্ত্বা তে মহালক্ষ্মীঃ সসর্জ্জ মিথুনং স্বয়ম্। হিরণ্যগর্ভৌ রুচিরৌ স্ত্রী-পুংসৌ কমলাসনৌ॥ ১৮॥ ব্রহ্মন্ বিধে বিরিঞ্চেতি ধাতরিত্যাহ তং নরম্। শ্রীঃ পদ্মে কমলে লক্ষ্মীত্যাহ মাতা স্ত্রিয়ঞ্চ তাম্॥ ১৯॥ মহাকালী ভারতী চ মিথুনে সৃজতঃ স্ম হ। এতয়োরপি রূপাণি নামানি চ বদামি তে॥ ২০॥ নীলকণ্ঠং রক্তবাহুং শ্বেতাঙ্গং চন্দ্রশেখরম্। জনয়ামাস পুরুষং মহাকালী সিতাং স্ত্রিয়ম্॥ ২১॥ স রুদ্রঃ শঙ্করঃ স্থাণুঃ কপর্দ্দী চ ত্রিলোচনঃ। ত্রয়ী বিদ্যা কামধেনুঃ সা স্ত্রী ভাষাক্ষরা স্বরা॥ ২২॥ সরস্বতী স্ত্রিয়ং গৌরীং কৃষ্ণঞ্চ পুরুষং নৃপ। জনয়ামাস

নামানি তয়োরপি বদামি তে ॥ ২৩ ॥ বিষ্ণুঃ কৃষ্ণো হৃষীকেশো বাসুদেবো জনার্দ্দনঃ। উমা গৌরী সতী চণ্ডী সুন্দরী সুভগা শুভা ॥ ২৪ ॥ এবং যুবতয়ঃ সদ্যঃ পুরুষত্বং প্রপেদিরে। চক্ষুষ্মন্তোঽনুপশ্যন্তি নেতরেঽতদ্‌বিদো জনাঃ ॥২৫॥ ব্রহ্মণে প্রদদৌ পত্নীং মহালক্ষ্মীর্নৃপ ত্রয়ীম্। রুদ্রায় গৌরীং বরদাং বাসুদেবায় চ শ্রিয়ম্ ॥ ২৬ ॥ স্বরয়া সহ সম্ভূয় বিরিঞ্চোঽণ্ডমজীজনৎ। বিভেদ ভগবান্ রুদ্রস্তদ্গৌর্য্যা সহ বীর্য্যবান্ ॥ ২৭ ॥ অণ্ডমধ্যে প্রধানাদি কার্য্যজাতমভূন্নৃপ। মহাভূতাত্মকং সর্ব্বং জগৎ স্থাবর-জঙ্গমম্ ॥ ২৮ ॥ পুপোষ পালয়ামাস তল্লক্ষ্ম্যা সহ কেশবঃ। সংজহার জগৎ সর্ব্বং সহ গৌর্য্যা মহেশ্বরঃ ॥ ২৯ ॥ মহালক্ষ্মীর্মহারাজ সর্ব্বসত্ত্বময়ীশ্বরী। নিরাকারা চ সাকারা সৈব নানাঽভিধানভৃৎ ॥ ৩০ ॥ নামান্তরৈর্নিরূপ্যৈষা নাম্না নান্যেন কেনচিৎ ॥ ৩১ ॥

ইতি মার্কণ্ডেয়পুরাণে প্রাধানিকং রহস্যম্।

---

## বৈকৃতিকং রহস্যম্

ঋষিরুবাচ। ত্রিগুণা তামসী দেবী সাত্ত্বিকী যা ত্বয়োদিতা। সা শর্ব্বা চণ্ডিকা দুর্গা ভদ্রা ভগবতীর্য্যতে ॥ ১ ॥ যোগনিদ্রা হরেরুক্তা মহাকালী তমোগুণা। মধুকৈটভনাশার্থং যাং তুষ্টাবাম্বুজাসনঃ ॥ ২ ॥ দশবক্ত্রা দশভুজা দশপাদাঞ্জনপ্রভা। বিশালয়া রাজমানা ত্রিংশল্লোচনমালয়া ॥ ৩ ॥ স্ফুরদ্দশনদংষ্ট্রা সা ভীমরূপাঽপি ভূমিপ। রূপসৌভাগ্যকান্তীনাং সা প্রতিষ্ঠা মহাশ্রিয়াম্ ॥ ৪ ॥ খড়্গবাণগদাশূল-শঙ্খচক্রভুশুণ্ডিভৃৎ। পরিঘং কার্ম্মুকং শীর্ষং নিশ্চ্যোতদ্রুধিরং দধৌ ॥ ৫ ॥ এষা সা বৈষ্ণবী মায়া মহাকালী দুরত্যয়া। আরাধিতা বশীকুর্য্যাৎ পূজাকর্ত্তুশ্চরাচরম্ ॥ ৬ ॥ সর্ব্বদেব-শরীরেভ্যো যাবির্ভূতাঽমিতপ্রভা। ত্রিগুণা সা মহালক্ষ্মীঃ সাক্ষান্মহিষ-মর্দ্দিনী ॥ ৭ ॥ শ্বেতাননা নীলভুজা সুশ্বেতস্তনমণ্ডলা। রক্তমধ্যা রক্তপাদা নীলজঙ্ঘোরুরুন্মদা ॥ ৮ ॥ সুচিত্রজঘনা চিত্রমাল্যাম্বরবিভূষণা। চিত্রানু-লেপনা কান্তিরূপসৌভাগ্যশালিনী ॥ ৯ ॥ অষ্টাদশভুজা পূজ্যা সা সহস্রভুজা সতী। আয়ুধান্যত্র বক্ষ্যন্তে দক্ষিণাধঃ করক্রমাৎ ॥ ১০ ॥ অক্ষমালা চ কমলং বাণোঽসিঃ কুলিশং গদা। চক্রং ত্রিশূলং পরশুঃ শঙ্খো ঘণ্টা চ পাশকঃ ॥ ১১ ॥ শক্তির্দণ্ডশ্চর্ম্ম চাপং পানপাত্রং কমণ্ডলুঃ। অলঙ্কৃতভুজামেভিরায়ুধৈঃ

কমলাসনাম্ ॥ ১২ ॥ সর্ব্বদেবময়ীমীশাং মহালক্ষ্মীমিমাং নৃপ। পূজয়ন্ সর্ব্ব-লোকানাং স দেবানাং প্রভুর্ভবেৎ ॥ ১৩ ॥ গৌরীদেহাৎ সমুদ্ভূতা যা সত্ত্বৈকগুণাশ্রয়া। সাক্ষাৎ সরস্বতী প্রোক্তা শুম্ভাসুরনিবর্হিণী ॥ ১৪ ॥ দধৌ চাষ্টভুজা বাণান্ মুষলং শূলচক্রভৃৎ। শঙ্খং ঘণ্টাং লাঙ্গলঞ্চ কার্ম্মুকং বসুধা-ধিপ ॥ ১৫ ॥ এষা সম্পূজিতা ভক্ত্যা সর্ব্বজ্ঞত্বং প্রযচ্ছতি। নিশুম্ভমথিনী দেবী শুম্ভাসুরনিবর্হিণী ॥ ১৬ ॥ ইত্যুক্তানি স্বরূপাণি মূর্ত্তীনাং তব পার্থিব। উপাসনাং জগন্মাতুঃ পৃথগাসাং নিশাময় ॥ ১৭ ॥ মহালক্ষ্মী-র্যদা পূজ্যা মহাকালী সরস্বতী। দক্ষিণোত্তরয়োঃ পূজ্যে পৃষ্ঠতো মিথুন-ত্রয়ম্ ॥ ১৮ ॥ বিরঞ্চিঃ স্বরয়া মধ্যে রুদ্রো গৌর্য্যা চ দক্ষিণে। বামে লক্ষ্ম্যা হৃষীকেশঃ পুরতো দেবতাত্রয়ম্ ॥ ১৯ ॥ অষ্টাদশভুজা মধ্যে বামে চাস্যা দশাননা। দক্ষিণেঽষ্টভুজা লক্ষ্মীর্মহতীতি সমর্চ্চয়েৎ ॥ ২০ ॥ পূর্ব্বাদি-দলতঃ পূজ্যা অসিতাঙ্গাদিভৈরবাঃ। অষ্টাদশভুজা সৈষা যদা পূজ্যা নরাধিপ ॥ ২১ ॥ দশাননা চাষ্টভুজা দক্ষিণোত্তরয়োস্তদা। কালমৃত্যু চ সম্পূজ্যৌ সর্ব্বারিষ্টপ্রশান্তয়ে ॥ ২২ ॥ যদা চাষ্টভুজা পূজ্যা শুম্ভাসুরনিবর্হিণী। নবাস্যাঃ শক্তয়ঃ পূজ্যাস্তদা রুদ্রবিনায়কৌ ॥ ২৩ ॥ নমো দেব্যা ইতি স্তোত্রৈর্মহালক্ষ্মীং সমর্চ্চয়েৎ। অবতারত্রয়ার্চ্চায়াং স্তোত্রমন্ত্রাস্তদাশ্রয়াঃ ॥২৪॥ অষ্টাদশভুজা চৈষা পূজ্যা মহিষমর্দ্দিনী। মহালক্ষ্মীর্মহাকালী সৈব প্রোক্তা সরস্বতী ॥ ২৫ ॥ ঈশ্বরী পুণ্যপাপানাং সর্ব্বলোকমহেশ্বরী। মহিষান্তকরী যেন পূজিতা স জগৎপ্রভুঃ ॥ ২৬ ॥ পূজয়েজ্জগতাং ধাত্রীং চণ্ডিকাং ভক্ত-বৎসলাম্। অর্ঘ্যাদিভিরলঙ্কারৈর্গন্ধপুষ্পৈস্তথোত্তমৈঃ ॥ ২৭ ॥ ধূপৈর্দীপৈশ্চ নৈবেদ্যৈর্নানাভক্ষ্যসমন্বিতৈঃ। রুধিরাক্তেন বলিনা মাংসেন সুরয়া নৃপ ॥২৮॥ [বলিমাংসাদিপূজেয়ং বিপ্রবর্জ্যাময়েরিতা।] [তেষাং কিল সুরা-মাংসৈর্নোক্তা পূজা নৃপ কচিৎ] ॥ ২৯ ॥ প্রণামাচমনীয়েশ্চ চন্দনেন সুগন্ধিনা। সকর্পূরৈশ্চ তাম্বূলৈর্ভক্তিভাবসমন্বিতৈঃ ॥ ৩০ ॥ বামভাগেঽগ্রতো দেব্যা-শ্ছিন্নশীর্ষং মহাসুরম্। পূজিতো মহিষো যেন প্রাপ্তং সাযুজ্যমীশয়া ॥ ৩১ ॥ দক্ষিণে পুরতঃ সিংহং সমগ্রং ধর্ম্মমীশ্বরম্। বাহনং পূজয়েদ্দেব্যা ধৃতং যেন চরাচরম্ ॥ ৩২ ॥ যঃ কুর্য্যাৎ প্রযতো ধীমাংস্তস্যা একাগ্রমানসঃ। ততঃ কৃতাঞ্জলির্ভূত্বা স্তুবীত চরিতৈরিমৈঃ ॥ ৩৩ ॥ একেন বা মধ্যমেন নৈকেনে-তরয়োরিহ। চরিতার্দ্ধন্তু ন জপেৎ জপংশ্ছিদ্রমবাপ্নুয়াৎ ॥ ৩৪ ॥ স্তোত্রমন্ত্রৈঃ স্তুবীতেমাং যদি বা জগদম্বিকাম্। প্রদক্ষিণনমস্কারান্ কৃত্বা মূর্দ্ধ্নি

কৃতাঞ্জলিঃ ॥ ৩৫ ॥ ক্ষমাপয়েজ্জগদ্ধাত্রীং মুহুর্মুহুরতন্দ্রিতঃ। প্রতিশ্লোকঞ্চ জুহুয়াৎ পায়সং তিলসর্পিষা ॥ ৩৬ ॥ জুহুয়াৎ স্তোত্রমন্ত্রৈর্ব্বা চণ্ডিকায়ৈ শুভং হবিঃ। ভূয়ো নামপদৈর্দ্দেবীং পূজয়েৎ সুসমাহিতঃ ॥ ৩৭ ॥ প্রযতঃ প্রাঞ্জলিঃ প্রহ্বঃ প্রাণানারোপ্য চাত্মনি। সুচিরং ভাবয়েদ্দেবীং চণ্ডিকাং তন্ময়ো-ভবেৎ ॥ ৩৮ ॥ এবং যঃ পূজয়েদ্ভক্ত্যা প্রত্যহং পরমেশ্বরীম্। ভুক্ত্বা ভোগান্ যথাকামং দেবীসাযুজ্যমাপ্নুয়াৎ ॥ ৩৯ ॥ যো ন পূজয়তে নিত্যং চণ্ডিকাং ভক্তবৎসলাম্। ভস্মীকৃত্যাস্য পুণ্যানি নির্দ্দহেৎ পরমেশ্বরী ॥ ৪০ ॥ তস্মাৎ পূজয় ভূপাল সর্ব্বলোকমহেশ্বরীম্। যথোক্তেন বিধানেন চণ্ডিকাং সুখ-মাপ্স্যসি ॥ ৪১।

ইতি মার্কণ্ডেয়পুরাণে বৈকৃতিকং রহস্যম্।

---

## মূর্ত্তিরহস্যম্

ঋষিরুবাচ। নন্দা ভগবতী নাম যা ভবিষ্যতি নন্দজা। স্তুতা সম্পূজিতা ভক্ত্যা বশীকুর্য্যাজ্জগত্ত্রয়ম্ ॥ ১ ॥ কনকোত্তমকান্তিঃ সা সুকান্তিকনকাম্বরা। দেবী কনকবর্ণাভা কনকোত্তমভূষণা ॥২॥ কমলাঙ্কুশপাশাব্জৈরলঙ্কৃতচতুর্ভুজা। ইন্দিরা কমলা লক্ষ্মীঃ সা শ্রীরুক্মাম্বুজাসনা ॥ ৩ ॥ যা রক্তদন্তিকা নাম দেবী প্রোক্তা ময়াঽনঘ। তস্যাঃ স্বরূপং বক্ষ্যামি শৃণু সর্ব্বভয়াপহম্ ॥ ৪ ॥ যচ্ছ্রুত্বা সর্ব্বপাপেভ্যো মুচ্যতে নাত্র সংশয়ঃ। রক্তাম্বরা রক্তবর্ণা রক্ত-সর্ব্বাঙ্গভূষণা ॥ ৫ ॥ রক্তায়ুধা রক্তনেত্রা রক্তকেশাঽতিভীষণা। রক্ততীক্ষ্ণ-নখা রক্তরসজ্ঞা রক্তদন্তিকা ॥ ৬ ॥ পতিং নারীবাঽনুরক্তা দেবী ভক্তং ভজেজ্জনম্। বসুধেব বিশালা সা সুমেরুযুগলস্তনী ॥ ৭ ॥ দীর্ঘৌ লম্বাবতি-স্থূলৌ তাবতীব মনোহরৌ। কর্কশাবতিকান্তৌ তৌ সর্ব্বানন্দপয়োনিধী ॥৮॥ ভক্তান্ সংপায়য়েদ্দেবী সর্ব্বকামদুঘৌ স্তনৌ। খড়্গপাত্রশিরঃখেটৈরলঙ্কৃত চতুর্ভুজা ॥ ৯ ॥ আখ্যাতা রক্তচামুণ্ডা দেবী যোগেশ্বরীতি চ। অনয়া ব্যাপ্তমখিলং জগৎ স্থাবরজঙ্গমম্ ॥ ১০ ॥ ইমাং যঃ পূজয়েদ্ ভক্ত্যা স ব্যাপ্নোতি চরাচরম্। ভুক্ত্বা ভোগান্ যথাকামং দেবীসাযুজ্যমাপ্নুয়াৎ ॥ ১১ ॥ অধীতে য ইমং নিত্যং রক্তদন্তা-বপুঃস্তবম্। তং সা পরিচরেদ্দেবী পতিং প্রিয়মিবাঙ্গনা ॥ ১২ ॥ শাকম্ভরী নীলবর্ণা নীলোৎপলবিলোচনা। গম্ভীরনাভিস্ত্রিবলীবিভূষিততনূদরী ॥ ১৩ ॥ সুকর্কশসমোত্তুঙ্গবৃত্তপীনঘনস্তনী

মুষ্টিং শিলীমুখাপূর্ণং কমলং কমলালয়া ॥ ১৪ ॥ পুষ্পপল্লবমূলাদি-ফলাঢ্যং শাকসঞ্চয়ম্। কাম্যানন্তরসৈর্যুক্তং ক্ষুত্তৃণ্মৃত্যুজ্বরাপহম্ ॥ ১৫ ॥ কার্ম্মুকঞ্চ স্ফুরৎকান্তি বিভর্ত্তি পরমেশ্বরী। শাকম্ভরী শতাক্ষী সা সৈব দুর্গা প্রকীর্ত্তিতা ॥ ১৬ ॥ উমা গৌরী সতী চণ্ডী কালিকা সা চ পার্ব্বতী। শাকম্ভরীং স্তুবন্ ধ্যায়ন্ জপন্ সংপূজয়ন্ নমন্ ॥ ১৭ ॥ অক্ষয্যমশ্নুতে শীঘ্রমন্নপানাঽমৃতং জলম্। ভীমাপি নীলবর্ণা সা দংষ্ট্রাদশনভাসুরা ॥ ১৮ ॥ বিশাললোচনা নারী বৃত্তপীনপয়োধরা। চন্দ্রহাসঞ্চ ডমরুং শিরঃ পাত্রঞ্চ বিভ্রতী ॥ ১৯ ॥ একবীরা কালরাত্রিঃ সৈবোক্তা কামদা স্তুতা। তেজোমণ্ডলদুর্দ্ধর্ষা ভ্রামরী চিত্রকান্তিভৃৎ ॥ ২০ ॥ চিত্রভ্রমরসঙ্কাশা মহামারীতি গীয়তে। ইত্যেতা মূর্ত্তয়ো দেব্যা ব্যাখ্যাতা বসুধাধিপ ॥ ২১ ॥ জগন্মাতুশ্চণ্ডিকায়াঃ কীর্ত্তিতাঃ কামধেনবঃ। ইদং রহস্যং পরমং ন বাচ্যং কস্যচিত্ত্বয়া ॥ ২২ ॥ আখ্যানং দিব্যমূর্ত্তীনামধীষ্বাবহিতঃ স্বয়ম্। এতস্যাস্তং প্রসাদেন সর্ব্বমান্যো ভবিষ্যসি ॥ ২৩ ॥ সর্ব্বরূপময়ী দেবী সর্ব্বং দেবীময়ং জগৎ। ততোঽহং বিশ্বরূপাং তাং নমামি পরমেশ্বরীম্ ॥ ২৪ ॥ (তস্মাৎ সর্ব্বপ্রযত্নেন দেবীং জপ নিরন্তরম্। সপ্তজন্মার্জ্জিতৈর্ঘোরৈর্ব্রহ্মহত্যাদিকৈরপি ॥ পাঠমাত্রেণ মন্ত্রাণাং মুচ্যতে সর্ব্বকিল্বিষৈঃ। দেব্যা ধ্যানং তবাখ্যাতং গুহ্যাদ্গুহ্যতরং মহৎ। তস্মাৎ সর্ব্বপ্রযত্নেন সর্ব্বকামফলপ্রদম্) ॥

ইতি মূর্ত্তিরহস্যম্।

---

## চণ্ডীপাঠ—ফলম্

সংবৎসরপ্রদীপে—মাহাত্ম্যং ভগবত্যাস্তু পুরাণাদিষু কীর্ত্তিতম্। পঠেদ্বা শৃণুয়াদ্বাপি সর্ব্বকামসমৃদ্ধয়ে ॥

বারাহীতন্ত্রে চ—বাচকঃ পূজিতো যেন প্রসন্নাস্তস্য দেবতাঃ। জ্ঞাত্বা সর্ব্বসমাপ্তিঞ্চ পূজয়েদ্ বাচকং বুধঃ। আত্মানমপি বিক্রীয় য ইচ্ছেৎ সফলং ক্রতুম্ ॥

---

## অথ একাবৃত্ত্যাদি-পাঠ-ফলম্

চণ্ডীপাঠফলং দেবি শৃণুষ গদতো মম। সঙ্কল্প্য পূর্ব্বং সংপূজ্য স্তম্ভাদেষু মনূন্ সকৃৎ। পাঠাদ্ বলিপ্রদানাদ্ধি সিদ্ধিমাপ্নোতি মানবঃ ॥

উপসর্গোপশান্ত্যর্থং ত্রিরাবৃত্তং পঠেন্নরঃ। গ্রহোপশান্ত্যৈ কর্ত্তব্যং পঞ্চাবৃত্তং বরাননে॥ মহাভয়ে সমুৎপন্নে সপ্তাবৃত্তমুদীরয়েৎ। নবাবৃত্ত্যা ভবেচ্ছান্তি-র্ব্বাজপেয়ফলং লভেৎ॥ রাজবশ্যায় ভূত্যৈ চ রুদ্রাবৃত্তমুদীরয়েৎ! অর্কাবৃত্ত্যা কাম্যসিদ্ধির্ব্বৈরিহানিশ্চ জায়তে। মন্বাবৃত্ত্যা রিপুর্ব্বশ্যস্তথা স্ত্রী বশ্যতামিয়াৎ। সখ্যং পঞ্চদশাবৃত্ত্যা শ্রিয়মাপ্নোতি মানবঃ॥ কলাবৃত্তাৎ পুত্রপৌত্রধনধান্যাগমং বিদুঃ। রাজ্ঞো ভীতিবিমোক্ষায় বৈরস্যোচ্চাটনায় চ॥ কুর্য্যাৎ সপ্তদশাবৃত্তং তথাষ্টাদশকং প্রিয়ে। মহাব্রণবিমোক্ষায় বিংশাবৃত্তং পঠেন্নরঃ॥ পঞ্চবিংশাবর্ত্তনাচ্চ ভবেদ্বন্ধবিমোক্ষণম্। সঙ্কটে সমনুপ্রাপ্তে দুশ্চিকিৎস্যাময়ে তথা॥ জাতিধ্বংসে কুলোচ্ছেদে আয়ুষো নাশ আগতে। বৈরিবৃদ্ধৌ ব্যাধিবৃদ্ধৌ ধননাশে তথাক্ষয়ে॥ তথৈব ত্রিবিধোৎপাতে তথা চৈবাতিপাতকে। কুর্য্যাদ্ যত্নাৎ শতাবৃত্তং ততঃ সম্পদ্যতে শুভম্॥ নশ্যন্তি বিপদস্তস্য অন্তে যাতি পরাং গতিম্। শ্রিয়োবৃদ্ধিঃ শতাবৃত্ত্যা রূপবৃদ্ধিস্তথাপরে॥ মনসা চিন্তিতং দেবি সিধ্যেদষ্টোত্তরাচ্ছতাৎ। শতাশ্বমেধযজ্ঞানাং ফলমাপ্নোতি সুব্রতে॥ সহস্রাবর্ত্তনাল্লক্ষ্মীরাবৃণোতি স্বয়ং স্থিরা। ভুক্ত্বা মনোরথান্ কামান্ নরো মোক্ষমবাপ্নুয়াৎ॥ যথাশ্বমেধঃ ক্রতুরাট্ দেবানাঞ্চ যথা হরিঃ। স্তবানামপি সর্ব্বেষাং তথা সপ্তশতীস্তবঃ॥ অথবা বহুনোক্তেন কিমেতেন বরাননে। চণ্ড্যাঃ শতাবৃত্তিপাঠাৎ সর্ব্বাঃ সিধ্যন্তি সিদ্ধয়ঃ॥

ইতি চণ্ডীপাঠফলম্।

## দেবীসূক্তম্ (প্রকারান্তরম্)

ওঁ নমো বিমলবদনায়ৈ ভূর্ভুবঃ-স্বঃপরমহঃ-কলায়ৈ কেবল-পরমানন্দ-সন্দোহরূপায়ৈ॥ ১॥ লোকত্রয়মীরিতমিবাপসারকপরমজ্যোতীরূপায়ৈ। অসদভিলাষ-তিক্তরসদূষিত-রসনাদোষাপসারণ-পরমামৃতরূপায়ৈ॥ ২॥ মূর্ত্তিমন্তে কোটিচন্দ্রবদনায়ৈ তে দুর্গে দেবি সর্ব্ববেদোদ্ভবে। নারায়ণি তৈজস-শরীরে পরমাত্মন্ প্রসীদ তে নমো নমঃ॥ ৩॥ হুঙ্কাররূপে প্রণবস্বরূপে হ্রীং-স্বরূপিণি। অম্বিকে ভগবত্যম্ব ত্রিগুণপ্রসূস্তে নমো নমঃ॥ ৪॥ ইতি সিদ্ধিকরে স্ফেঁ ক্ষৌঁ হ্রৌঁ হ্রীঁ স্বাহারূপিণি। বিমলমুখি চন্দ্রমুখি কোলাহলমুখি খর্ব্বে প্রসীদ॥ ৫॥ জানে দেবীমীদৃশং ভবং মাহেশীং ক্রীড়াস্থানে

স্বাগতং ভুবনেঽস্মিন্। শক্রস্থং মিত্ররূপা চ দুর্গা দুর্গম্যা ত্বং যোগিনামন্তরেঽপি ॥ ৬ ॥ একাঽনেকা সূক্ষ্মরূপাঽবিকারা ব্রহ্মাণ্ডানাং কোটি-কোটীঃ প্রসূষে। কোঽহং বিষ্ণুঃ কোঽপরো বা শিবাখ্যো দেবাশ্চান্যে স্তোতুমীশা ভবেমঃ ॥ ৭ ॥ ত্বং স্বাহা ত্বং স্বধা ত্বঞ্চ বৌষট্ ত্বঞ্চোঙ্কারস্ত্বঞ্চ লজ্জাদিবীজং ত্বঞ্চ স্ত্রী ত্বং পুমান্ সর্ব্বরূপা ত্বাং সংনত্বা বোধয়ে নঃ প্রসীদ ॥ ৮ ॥ ত্বং দেবর্ষির্দেবতা কালরূপা ত্বং বৈ মাসস্ত্বমৃতুশ্চায়নে দ্বে। কব্যং ভুঙ্ক্তে ত্বং যথা বৈ স্বধাখ্যা তদ্বৎ স্বাহা হব্যভোক্ত্রী স্বয়ং দেবি ॥ ৯ ॥ ত্বং বৈ দেবাঃ শুক্লপক্ষে প্রপূজ্যাস্ত্বং পিত্রাদ্যাঃ কৃষ্ণপক্ষে প্রপূজ্যাঃ। ত্বং বৈ সত্যং নিষ্প্রপঞ্চস্বরূপং ত্বাং সংনত্বা বোধয়ে নঃ প্রসীদ ॥ ১০ ॥ ত্বাং বেলার্কেণায়নে ত্বাদ্যকে তাং মুক্তিং যাতি ত্বৎপদধ্যানযোগাৎ। চন্দ্রেণ ত্বা বেলায়নে তু দ্বিতীয়ে ত্বাং বৈ মুক্তিং যাত্যমাং দেবি সূক্ষ্মম্ ॥ ১১ ॥ উচ্চৈর্নীচং নীচমুচ্চৈশ্চ কর্তুং চন্দ্রঞ্চার্কং ত্বং বিধাতুং সমর্থা। তত্রাকালে শক্তিরূপাঽভবস্ত্বং ত্বাং সংনত্বা বোধয়ে নঃ প্রসীদ ॥ ১২ ॥ ত্বং বৈ শক্তী রাবণে রাঘবে বা রুদ্রাদৌ বা যদ্যপীহাস্তি যা চ। সা ত্বং শুদ্ধং রামমেকং প্রবর্দ্ধ ত্বাং সংনত্বা বোধয়ে নঃ প্রসীদ ॥ ১৩ ॥

---

## চণ্ড্যাঃ ষট্সংবাদঃ।

মেধাশ্চ কথয়ামাস সুরথায় সমাধয়ে। সা কথা কথিতা পশ্চান্ মার্কণ্ডেয়েন ভাগুরৌ ॥ তামেব কথয়ামাসুঃ পক্ষিণো জৈমিনিং প্রতি। অনেনৈব বিধানেন কথাঃ ষড়্বিধিকা মতাঃ ॥

---

# শ্রীশ্রীরুদ্রচণ্ডী

## রুদ্রচণ্ডী-সঙ্কল্পাদিঃ

অদ্যেত্যাদি অমুকরাশিস্থে ভাস্করে অমুকে পক্ষে অমুকতিথৌ অমুকগোত্রঃ শ্রীঅমুকঃ শ্রীচণ্ডিকাপ্রীতিকাম আগমসন্দর্ভান্তর্গত-রুদ্রযামলোক্ত-ওঁ শ্রীপার্ব্বত্যুবাচ ভগবন্ ভূতভব্যেশ ইত্যাদি উক্তং ফলমবাপ্নুয়াদিত্যন্তরুদ্রচণ্ডীগ্রন্থস্য ইয়ৎসংখ্যকপাঠকর্ম্মাহহং করিষ্যে। ততঃ সূক্তপাঠান্তে যথাবিধি সামান্যার্ঘ্যাসনশুদ্ধ্যাদিকং বিধায় প্রাণায়াম-ষড়ঙ্গন্যাসান্ কৃত্বা ধ্যায়েৎ। যথা—ওঁ রক্তবর্ণাং মহাদেবীং লসচ্চন্দ্রবিভূষিতাম্। পট্টবস্ত্রপরীধানাং সর্ব্বালঙ্কারভূষিতাম্। বরাভয়করাং দেবীং মুণ্ডমালা-বিভূষিতাম্। কোটিচন্দ্রসমাভাসাং বদনৈঃ শোভিতাং পরাম্। করালবদনাং দেবীং কিঞ্চিজ্জিহ্বাগ্রলোহিতাম্। স্বর্ণবর্ণ-মহাদেব-হৃদয়োপরি সংস্থিতাম্। অক্ষমালা-ধরাং দেবীং জপকর্ম্মসমাহিতাম্। এবং ধ্যাত্বা জপেন্মন্ত্রী রুদ্রচণ্ডীং বরপ্রদাম্॥ ওঁ ঐঁ ঐঁ হ্রীঁ হ্রীঁ চামুণ্ডে স্বাহা এতৎ পাদ্যং ওঁ নমশ্চণ্ডিকায়ৈ নমঃ। ইতি মন্ত্রেণ তন্ত্রোক্তবিধিনা উপচারান্ দদ্যাৎ। ইতি।

---

## রুদ্রচণ্ড্যাঃ শাপবিমোচনম্।

ওঁ রং ক্রীঁ ক্রীঁ ক্রূঁ শং ষং বং বাং সাং হং হ্রুং ওঁ ওঁ প্রজাপতির্ঋষি-র্ব্রহ্মবিষ্ণু দেবতে রুদ্রচণ্ডীশাপবিমোচনে বিনিয়োগঃ। ঠং ঠং ঠং কং কং কং খং খং খং প্রজাপতির্ঋষির্বায়ুর্দেবতা প্রচণ্ডচণ্ডীশাপবিমোচনে বিনিয়োগঃ। প্রজাপতির্ঋষির্গায়ত্রীচ্ছন্দো রুদ্রো দেবতা হীং সীং শূং শুং হূং ফট্ স্বাহা রুদ্রচণ্ডীগুহ্যশাপবিমোচনে বিনিয়োগঃ। প্রজাপতির্ঋষির্গায়ত্রীচ্ছন্দো-বিরাট্প্রকৃতিকর্ম্মাণো দেবতা রুদ্রচণ্ডীশাপবিমোচনে বিনিয়োগঃ। প্রজাপতির্ঋষির্গায়ত্রীচ্ছন্দঃ সূর্য্যো দেবতা প্রচণ্ডচণ্ডীশাপবিমোচনে বিনিয়োগঃ। প্রজাপতির্ঋষির্গায়ত্রীচ্ছন্দঃ কামাখ্যা দেবতা রুদ্রচণ্ডীশাপ-বিমোচনে বিনিয়োগঃ। কৃষ্ণশাপবিমোচনমন্ত্রস্য নারদঋষিঃ শ্রীকৃষ্ণো দেবতা

শ্রীকৃষ্ণশাপবিমোচনে বিনিয়োগঃ। ওঁ হ্রীঁ হূঁ হূঁ ঘোরচণ্ডী মহাচণ্ডী সাক্ষাদ্ ব্রহ্মস্বরূপিণী। দূষিতা কৃষ্ণশাপেন মুক্তা ত্বং ভব সুব্রতে॥ লোকানাঞ্চ হিতার্থায় শম্ভুনা গদিতা পুরা। কৃষ্ণশাপবিমুক্তা হি যথোক্তফলদা ভব॥ ব্রহ্মশাপবিমোচনমন্ত্রস্য ব্রহ্মঋষির্ব্রহ্মা দেবতা ব্রহ্মশাপবিমোচনে বিনিয়োগঃ। ওঁ—ব্রহ্মণা শাপিতা ব্যস্তা ন সম্যক্ ফল-দায়িনী। শাপমুক্তা হি দেবি ত্বং যথোক্তফলদা ভব॥ হ্রৌঁ হ্রূঁ হ্রূঁ হ্রীঁ শ্রীঁ শ্রীঁ ব্রীঁ ক্রূঁ ঐঁ হ্রীঁ ক্রীঁ হূঁ গ্লৌঁ ঐঁ ক্লীঁ ক্রীঁ হ্রাঁ হ্রীঁ হ্রূঁ হ্রূঁ হ্সৌঃ ক্রীঁ বাঁ শ্রীঁ স্ত্রীঁ হ্রীঁ হ্রীঁ ঐঁ ক্লীঁ সৌঃ ক্লীঁ হ্রীঁ ক্লীঁ ক্লীঁ ওঁ ওঁ স্বাহা। রীঁ রামঃ ওঁ ক্রূঁ ক্লীঁ হং সঃ ফট্ বৌষট্ স্বাহা ওঁ ওঁ ওঁ হৌঁ হৌঁ হ্রৌঁ হ্রৌঁ হ্রৌঁ হূঁ হূঁ হূঁ স্বাহা। হ্ঁ হ্রীঁ হ্রীঁ হ্রৌঁ ওঁ ক্লঃ স্বাহা। ওঁ হ্রীঁ হূঁ স্বাহা। ওঁ হ্রৌঁ নমঃ শিবায় স্বাহা। ইতি শাপোদ্ধারঃ॥ ওঁ হূঁ চণ্ডিকায়ৈ হূঁ স্বাহা। ইতি ত্রিবারং জপ্ত্বা প্রার্থয়েৎ। ওঁ রুদ্রচণ্ডি নমস্তুভ্যং চণ্ডবৈরিবিনাশিনি। সর্ব্বপাপহরে দেবি সর্ব্বদা বরদা ভব॥ ততো গায়ত্রীং পঠেৎ। যথা—ওঁ রুদ্রচণ্ডিকায়ৈ বিদ্মহে পূর্ণফলপ্রদায়িন্যৈ ধীমহি তন্নো দেবি প্রচোদয়াৎ॥

---

## রুদ্রচণ্ডী-কবচম্।

ওঁ যা চণ্ডী মধুকৈটভাদিদৈত্যদলনী যা মাহিষোন্মূলনী, যা ধূম্রেক্ষণ-চণ্ডমুণ্ডমথনী যা রক্তবীজাশনী। শক্তিঃ শুম্ভ-নিশুম্ভ-দৈত্যদলনী যা সিদ্ধিলক্ষ্মীশ্বরা, সা দেবী নবকোটি-মূর্ত্তি-সহিতা মাম্পাতু বিশ্বেশ্বরী॥ অস্য শ্রীরুদ্রচণ্ডিকাকবচস্য ভৈরবঋষিরনুষ্টুপ্ ছন্দঃ শ্রীচণ্ডিকা দেবতা চতুর্ব্বর্গফল-প্রাপ্ত্যর্থং জপে বিনিয়োগঃ।

শ্রীকার্ত্তিকেয় উবাচ। কবচং চণ্ডিকাদেব্যাঃ শ্রোতুমিচ্ছামি তে শিব। যদি তেঽস্তি কৃপা নাথ কথয়স্ব জগৎপ্রভো॥

শ্রীশিব উবাচ। শৃণু বৎস প্রবক্ষ্যামি চণ্ডিকাকবচং শুভম্। ভুক্তি-মুক্তি-প্রদাতারমায়ুষ্যং সর্ব্বকামদম্॥ দুর্লভং সর্ব্বদেবানাং সর্ব্বপাপনিবারণম্। মন্ত্রসিদ্ধিকরং পুংসাং জ্ঞানসিদ্ধিকরং পরম্॥ চণ্ডিকাকবচস্যাস্য ঋষির্দেবোঽথ ভৈরবঃ। চণ্ডিকা দেবতা প্রোক্তা ছন্দোঽনুষ্টুপ্ প্রকীর্ত্তিতম্। চতুর্ব্বর্গফলপ্রাপ্তৌ বিনিয়োগঃ প্রকীর্ত্তিতঃ। চণ্ডিকা মেঽগ্রতঃ পাতু

আগ্নেয্যাং ভুবসুন্দরী। যাম্যাং পাতু মহাদেবী নৈর্ঋত্যাং পাতু পার্ব্বতী। বারুণে চণ্ডিকা পাতু চামুণ্ডা পাতু বায়বে। উত্তরে ভৈরবী পাতু ঊর্দ্ধে পাতু মহেশ্বরী। অধঃ পাতু সদানন্দা মূলাধারনিবাসিনী। মূর্দ্ধ্নি পাতু মহাদেবী ললাটে চ মহেশ্বরী। কণ্ঠে কণ্ঠেশ্বরী পাতু হৃদয়ে নলকূবরী। নাভৌ কটিপ্রদেশে চ পায়াল্লম্বোদরী সদা। ঊর্বোর্জান্বোঃ সদা পায়াত্ত্বচম্মে মদলালসা। ঊর্দ্ধে পার্শ্বে সদা পাতু ভবানী ভক্তবৎসলা। পাদয়োঃ পাতু মামীশা সর্ব্বাঙ্গে বিজয়প্রদা॥ রক্তমাংসে মহামায়া ত্বচি মাং পাতু লালসা॥ শুক্র-মজ্জাস্থিসন্ধেষু গুহ্যং মে ভুবনেশ্বরী। ঊর্দ্ধকেশী সদা পায়ান্ নাভৌ সর্ব্বাঙ্গসন্ধিষু। ওঁ ঐঁ ঐঁ হ্রীঁ হ্রীঁ চামুণ্ডে স্বাহা মন্ত্র-স্বরূপিণী। আত্মানং মে সদা পায়াৎ সিদ্ধবিদ্যা দশাক্ষরী। ইত্যেতৎ কবচং দেব্যাশ্চণ্ডিকায়াঃ শুভাবহম্। গোপনীয়ং প্রযত্নেন কবচং সর্ব্ব-সিদ্ধিদম্॥ সর্ব্বরক্ষাকরং পুণ্যং ন দেয়ং যস্য কস্যচিৎ। অজ্ঞাত্বা কবচং দেব্যা যঃ পঠেৎ স্তবমুত্তমম্। ন তস্য জায়তে সিদ্ধির্বহুধা পঠনেন চ। ধৃত্বৈতৎ কবচং দেব্যা দিব্যদেহধরো ভবেৎ। অধিকারী ভবেদ্ বৎস চণ্ডী-পাঠেষু সাধকঃ॥ ওঁ

ইতি রুদ্রযামলে রুদ্রচণ্ডিকাকবচং সমাপ্তম্। ওঁ তৎসৎ। ওঁ গণেশায় নমঃ। ওঁ বাণ্যৈ নমঃ। ওঁ ব্রহ্মণে নমঃ। ওঁ বিষ্ণবে নমঃ। ওঁ শিবায় নমঃ। ওঁ চণ্ডিকায়ৈ নমঃ॥

---

## রুদ্রচণ্ডী।

ওঁ নারায়ণং নমস্কৃত্য নরঞ্চৈব নরোত্তমম্। দেবীং সরস্বতীঞ্চৈব ততো জয়মুদীরয়েৎ॥ ওঁ নমো রুদ্রচণ্ডিকায়ৈ।

ওঁ শ্রীপার্ব্বত্যুবাচ। ভগবন্ ভূতভব্যেশ ত্রৈলোক্যাধিপতে হর। যদুপাখ্যানমাশ্চর্য্যং সৌরথেয়ং বদস্ব মে॥

রুদ্র উবাচ। পূর্ব্বং যৎ সূচিতং কান্তে ন শ্রুতং কাপি তদ্ যথা। শ্রূয়তাং শ্রূয়তাং রম্যে দেবি প্রৌঢ়ে বরাঙ্গনে॥ ইত্যুক্ত্বা সব্যহস্তেন চিবুকং গৃহ্য চুম্বিতম্। বক্ত্রারবিন্দং সুন্দর্য্যাঃ কৃত্বা প্রোবাচ শঙ্করঃ। অধুনৈবাগত-স্তত্র গণেশস্তন্ত্রবিদ্ গুরুঃ॥ প্রণম্য সাম্বিকং রুদ্রমুষিতো ভৈরবৈঃ সহ। নায়িকা যোগিনীভিঃ সা সাবধানেন শঙ্করী। কৈলাসে যোগসংস্থানে মহদ্ গুহ্যঞ্চ

শ্রূয়তে॥ অস্য শ্রীরুদ্রচণ্ডীমহামন্ত্রস্য মহারুদ্রঋষিরনুষ্টুপ্ ছন্দশ্চণ্ডিকা দেবতা চতুর্ব্বর্গসাধনে শ্রীরুদ্রচণ্ডিকাজপে বিনিয়োগঃ। (ওঁ) সাবর্ণিরিতি বিখ্যাতো মনুরাসীন্ মহেশ্বরি। বক্ষ্যে ত্বয়ি তদুৎপত্তিং শৃণুষ ত্বং সমাহিতা॥ মহামায়ানুভাবেন যোঽষ্টমঃ সূর্য্যসম্ভবঃ। চৈত্রাণামধিপো রাজা স নাম্না সুরথঃ সুধীঃ। পূর্ব্বং স্বারোচিষে জাতঃ সকলেঽবনিমণ্ডলে। জিতঃ কালে নৃপৈরন্যৈঃ সোঽভূৎ কোলাখ্যকৈর্নৃপঃ॥ তথামাত্যৈরেব স তৈর্বনং যাতো নৃপাগ্রণীঃ। বিবেকেনৈব যত্রাস্তে বর্য্যো মেধোমহামুনিঃ॥ তত্রাতিষ্ঠৎ কিয়ৎকালং বিচরন্ স তদাশ্রমে॥ দৃষ্টবান্ জনমেকঞ্চ বৈশ্যং বিরহিণিং বনে॥ তমপৃচ্ছন্ মহারাজঃ কস্মান্ম্লানো ভবাংস্ততঃ। রাজ্ঞা পৃষ্টঃ স উবাচ দুঃখিতোঽহং ভবান্ যথা॥ বিবেকিনৌ তৌ মিলিতৌ প্রাপ্তাবেবান্তিকং মুনেঃ। পৃষ্টো নৃপেণ বিপ্রেন্দ্রোঽপ্যয়ং পুত্রৈর্নিরাকৃতঃ॥ অহং মমত্বমাপন্নো রাজ্যে রাজাঙ্গকেষপি। তথাপ্যেবাবয়োঃ কস্মাদ্-হার্দ্দী ভবতি তেষু চ॥ মেধসোক্তং বলবতী মহামায়া গদাভৃতঃ। তয়া সম্মোহ্যতে বিশ্বং সৃজত্যবতি হন্তি চ॥ চেতঃসু জ্ঞানিনাং দেবী নিত্যা ভগবতী হি সা। বরদা মুক্তয়ে লোকে যোগনিদ্রাঽভিধীয়তে॥ জগন্মূর্ত্তির্জগাধারা সাঽদ্বিতীয়াধীরীশ্বরী। উৎপন্না পরমোৎপন্না বিষ্ণুনিদ্রা মৃষার্দ্দিনী॥ নন্দজা বিন্ধ্যসংস্থানা হৈমী হরিহরপ্রিয়া। স্তুতিঃ প্রীতিঃ সুতপ্রীতা কৃতিঃ প্রীতিপুরাবহা। যোগনিদ্রাসমাপন্নো যদা বিষ্ণুর্জগদ্গুরুঃ। তদা দ্বাবসুরৌ ঘোরৌ মধুকৈটভসংজ্ঞকৌ॥ হরিকর্ণমলোদ্ভূতৌ ব্রহ্মাণং হন্তুমুদ্যতৌ। ভয়াদ্-বাগ্ভিস্ততো ব্রহ্মা তামসীং স্তৌতি তাদৃশীম্। অতুলাং যোগনিদ্রাখ্যাং ভক্তাভীষ্টাং সুরাত্মিকাম্॥ স্বাহা-স্বধা-বষড়্রূপাং শুভাং পীযূষবাদিনীম্। অক্ষরাং বীজরূপাঞ্চ পালয়িত্রীং বিনাশিনীম্। ত্রিধামাত্রাত্মিকাস্থাঞ্চ অনুচ্চার্য্যাং মহেশ্বরীম্॥ মাহেশ্বরীং মহামায়াং মাতরং সর্ব্বমাতরম্॥ অর্দ্ধমাত্রাঞ্চ সাবিত্রীং মহাবিদ্যাং বিনোদিনীম্। ইত্থং স্তুতা ত্যক্তবতী যড়ঙ্গং মধুবৈরিণঃ॥ স চোত্তস্থৌ জগদ্বন্ধুর্যুযুধে বাহুযুদ্ধতঃ। বর্ষপঞ্চসহস্রাণি ততস্তৌ দানবৌ মৃতৌ॥ ততো দেবাসুরং যুদ্ধং শতবর্ষমভূৎ পুরা। পরাজিতোঽভূদ্দেবেন্দ্র ইন্দ্রোঽভূন্মহিষাসুরঃ॥ ততঃ সা তামসী দেবী দেবতেজঃসমুদ্ভবা। জঘান সপ্তসেনাগ্রচিক্ষুরাখ্যমুখাংস্তথা॥ উগ্রবীর্য্যাদিকানাঞ্চ সেনাশ্চ চতুরঙ্গিণীঃ। খুরক্ষেপাদ্দিকোন্মত্তং মায়িনং মহিষং রণে॥ মাহিষং সৈংহিকং রূপং পৌরুষং হাস্তিকং তদা। বৈরূপ্যঞ্চ যথা কৃত্বা জঘান বরবর্ণিনী। হিমালয়ে স্থিতৈর্দেবৈঃ

স্তুতা দৈত্যনিপীড়িতৈঃ ॥ কালিকা শিবদূতী চ কৌমারীমূর্ত্তিধা পরা। সুগ্রীবস্য বচঃ শ্রুত্বা ধূম্রনেত্রং নিপাতিতম্ ॥ চণ্ডং মুণ্ডং রক্তবীজং রক্তবিন্দুসমুদ্ভবম্। কাম্বকঞ্চ কোটিবীর্য্যং কালকেয়ঞ্চ কালকম্ ॥ ধৌম্রং মৌর্য্যং দৌহৃর্দঞ্চ ষড়শীতিসহস্রকম্। কালকেয়াদিসৈন্যঞ্চ সর্ব্বং নায়কভূষিতম্ ॥ পুনঃ শুম্ভং নিশুম্ভঞ্চ দৈত্যরাজং জঘান সা। দেবানাং স্থানমাদত্তং শেষং পাতালসংস্থিতম্। কৃত্বা রমতি কল্যাণী রণস্থল্যাং রণপ্রিয়া। তদা বৃহস্পতিমুখা মহর্ষিসুরসিদ্ধকাঃ। স্তোত্রৈর্নানাবিধৈরন্যৈঃ স্তুতিঞ্চক্রুরনুত্তমাম্ ॥ কাত্যায়নী মাতৃকাখ্যা অপাংরূপা বিশোকিনী ॥ বৈষ্ণবী নারসিংহী চ বারাহী চ মহেশ্বরী। কৌমারী চ তথৈন্দ্রাণী ব্রহ্মাণী চাগ্নিরূপিণী। মহাকালী মহালক্ষ্মীর্মহাকল্পা সরস্বতী ॥ একবীরা ভ্রামরী চ তথৈবাষ্টভুজা শিবা। দশহস্তা সহস্রভুজা সর্ব্বশক্তিস্বরূপিণী ॥ মুনেস্তস্যোপদেশেন মৃন্ময়ীং মধুমাসতঃ। মূর্ত্তিং নির্ম্মায় তৌ পূজাঞ্চক্রতুর্বৎসরত্রয়ম্ ॥ তত আগত্য সা দেবী তাভ্যামিষ্টং বরং দদৌ। দুর্গাবরং সমালভ্য সূর্য্যবীর্য্যসমুদ্ভবঃ। মন্বন্তরাধিপঃ শ্রীমান্ সুরথঃ সম্ভবিষ্যতি ॥ সমাধির্জ্ঞানমাসাদ্য মুক্তোঽভূত্তৎপ্রসাদতঃ। ইত্থং চণ্ডীং পঠেদ্ যস্তু দ্বিজো বা প্রতিবাসরম্ ॥ কুজে বা শনিবারে বা পঠন্ সর্ব্বফলং লভেৎ। একাবৃত্ত্যা ভবেৎ সৌখ্যং ত্রিরাবৃত্ত্যোপসর্গতঃ। স্যান্মুক্তো গ্রহদোষাচ্চ পঞ্চাবৃত্তং পঠেদ্‌যদি ॥ সপ্তাবৃত্তং মহাভীতৌ নবাবৃত্তঞ্চ শান্তিতঃ ॥ বাজপেয়ফলঞ্চাপি রুদ্রাবৃত্ত্যাশ্বমেধিকম্ ॥ গোমেধ-নরমেধস্য শত্রুনাশং তথার্কতঃ। মন্বাবৃত্ত্যা সুখী ভূয়াৎ কলাবৃত্ত্যা ভবেদ্ধনী ॥ যথাকামং সপ্তদশে তথা চাষ্টাদশে শুভম্। নারীপ্রিয়তমো ভূয়াদ্ বিংশাবৃত্ত্যা ঋণং হরেৎ। পঞ্চবিংশাদ্ ভবেৎ স্বর্গী শতাবৃত্ত্যা তব প্রিয়ঃ ॥ অষ্টোত্তরশতাবৃত্ত্যা রাজসূয়ফলং লভেৎ ॥ অগ্নিহোত্রী নিত্যপাঠাত্ত্যজেদ্দেহং হরের্দ্ধ্রুবে ॥ সহস্রাবৃত্তিপাঠস্য ফলং কিং স্যাদ্ বরাননে। তদ্বক্তুং ন হি শক্নোমি সত্যং বর্ষাযুতৈরপি ॥ ইত্যুক্তং মম সর্ব্বেশি অরিসজ্ঘবিঘাতকম্। সর্ব্বেষাঞ্চৈব বর্ণানাং বিষ্ণানাঞ্চ যশস্বিনী। ইয়ং যোনিঃ সমাখ্যাতা সর্ব্বতন্ত্রেষু সর্ব্বদা ॥৪৩॥

ইতি শ্রীমদাগমসন্দর্ভে শ্রীরুদ্রযামলে রুদ্রচণ্ডিকায়াং হরগৌরীসংবাদে চণ্ডীরহস্যং নাম প্রথমাবচ্ছেদঃ।

রুদ্র উবাচ। রহস্যং চণ্ডিকাদেব্যা বিদিতং ভুবনত্রয়ে। কায়বাকৃচিত্তশুদ্ধঃ সন্ পঠন্ প্রিয়তমো ভবেৎ॥ রুদ্রচণ্ডী মহাপুণ্যা ত্রিগুণাখ্যা বিধাতৃকা। তারিণী তরুণী তন্বী তন্ত্রিকা বিশ্বরূপিকা॥ বিরোধিনী বিপ্রচিত্তা বাণী বর্ণাববোধিকা। বাসিনী বনিতা বিত্তা বরারোহা বিমোহিনী। বগলা শঙ্করী শান্তিঃ শুভা ক্ষেমঙ্করী দয়া॥ মোহাত্মিকা মনোরূপা মিতা মায়া মলাপহা। মাতা ভগবতী শক্তিঃ শিবা সাধ্যা সুরেশ্বরী। শর্ব্বাণী সিংহসংবাহা শম্ভুবক্ষঃস্থলস্থিতা॥ একাবৃত্তিং সংশৃণোতি নন্দিকেশো মহামনাঃ। বিনায়কস্ত্রিরাবৃত্তিং গ্রহাঃ পঞ্চ চ ভৈরবাঃ॥ শৃণ্বন্তি কামদাঃ সপ্ত মনবো নবধাবৃতিম্। রুদ্রাবৃত্তিং রুদ্রগণাঃ সাদরাঃ সুমনাস্তথা। অর্কাবৃত্তিঞ্চ দেবেন্দ্রো দেবৈঃ সিদ্ধাদিভিস্তথা। মন্বাবৃত্তিং যক্ষরাজঃ কলাবৃত্তিং তথা শচী। সমুদ্রজা সপ্তদশ ঋষিদারা দশাষ্টধা॥ বিংশাবৃত্তিঞ্চ শমনঃ পঞ্চবিংশং গদাধরঃ। শতাবৃত্তিং যোগিনীনাং ব্রহ্মা সাষ্টশতং সুরৈঃ॥ সহস্রার্দ্ধং নায়িকানাং তদূর্দ্ধং শক্তিভিঃ সহ। শতাবৃত্তং নবাবৃত্তমষ্টাবৃত্তং মহেশ্বরি। শ্রুত্বাভীষ্টং ফলং দত্তাদন্থা সুতঘাতিনী। মহামায়াবরং লব্ধা সাবর্ণিরষ্টমো মনুঃ। অভবৎ পরমেশানি দুর্গাপাঠমিদং মহৎ॥ হরিকর্ণমলোদ্ভূতৌ মহাবীর্য্যমদোদ্ধতৌ। উভয়াসুরসংহন্ত্রী হরিণা পরমেশ্বরী॥ জঘান মহিষং সঙ্খ্যে পঞ্চবিংশতি কোটিভিঃ। সেনাভিঃ পরমেশানি ত্বাং নতোঽস্মি নতোঽস্মি তাম্॥ নিযুতৈরষ্টভিঃ সংখ্যে নিশুম্ভশুম্ভনাশিনী। বিন্দূদ্ভবৈর্দ্দশভিস্তথাক্ষৌহিণীভিঃ শুভে॥ জঘান দিতিজং সংখ্যে শতসপ্ততিকোটিভিঃ। বিষ্ণুপ্রীতা ব্যাসরতা গণমাতা সরস্বতী। পর্ব্বস্তুতাষ্টমীরতা ষট্‌প্রণামস্বরূপিণী। নারায়ণশ্লোকরূপা চণ্ডিকাহ্লাদরূপিণী॥ তৎকুক্ষিপ্রভবা দেবী তদ্‌গুহ্যপরিবাদিনী। তদাকারা তদাধারা শতসপ্তপরায়ণা॥ মুক্তিরূপা নিয়োগাখ্যা ন্যাসরূপাধিদেবতা। ত্রিধামূর্ত্তিঃ শক্তিসারা ত্রিচরিত্রার্গলাধুনা॥ কীলকাসূক্তসংভাবা কবচাহ্লাদিনী মহা। উল্লাসিনী ষড়্‌গুণাখ্যা ত্রিদশাধ্যায়রূপিণী। মাহাত্ম্যবাচিনী বালা সুরথরাজ্যসাধিকা॥ পুনঃ কৃতং শারদীয়ে শারদীয়ামিষৈরসে। অরণ্যে রঘুনাথোঽপি মহাপূজাং করিষ্যতি॥ কাত্যায়নি বুদ্ধিরূপে অপবর্গপ্রদায়িনি। নিমেষাদিস্বরূপেণ নারায়ণি নমোঽস্তু তে॥ শরণ্যে নায়িকে ঘোরে শক্তিসিংহসমন্বিতে। রুদ্রে রৌরবরুদ্ধে চ নারায়ণি নমোঽস্তু তে॥ স্ত্রীসমস্তে সর্ব্ববিত্তে সর্ব্বভূতাশয়স্থিতে। কাত্যায়নি বিপ্রভাপে নারায়ণি নমোঽস্তু তে॥ চিক্ষুরাখ্যশ্চামরোদগ্রগণোগ্রাস্তরাক্ষসাঃ। তথোগ্রবীর্য্যভাস্রাখ্যাঃ সুরদুর্দ্ধরদুর্ম্মুখাঃ॥ মহাহনুদ্ধতাখ্যাশ্চ নাশিতাশ্চণ্ডিকে

ত্বয়া। তস্মাৎ শর্ব্বাণি সর্ব্বেশি নারায়ণি নমোঽস্তু তে॥ জয়ন্তী মঙ্গলা কালী ভদ্রকালী কপালিনী। দুর্গা শিবা ক্ষমা ধাত্রী স্বাহা স্বধা নমোঽস্তু তে॥ শিবে দুর্গে মহামায়ে ভীমে ভয়বিনাশিনি। চণ্ডিকে চণ্ডদৈত্যঘ্নি সুরাধ্যক্ষে পরে শিবে॥ নারায়ণি নারসিংহি বারাহি বরদে বরে। শরণ্যে সর্ব্বদে দেবি দুর্গে* দুর্গবিনাশিনি॥ কৃতার্থোঽস্মি কৃতার্থোঽস্মি কৃতার্থোঽস্মীতি ভাগ্যবান্। নমস্তুভ্যং নমস্তুভ্যং প্রসীদ পরমেশ্বরি॥ ভবানি পরমারাধ্যে কৌমারি নিগমাবহে। নিত্যস্মেরে নিধে দুর্গে সর্ব্বাশুভবিনাশিনি॥ ভবানীসন্নিধৌ যস্তু চণ্ডীমেতামুদীরয়েৎ। দরিদ্রোঽপি ধনী ভূত্বা শিবলোকং ব্রজেৎ কিল॥ শনি-ভৌমদিনে দেবি যদি চেন্দুক্ষয়ো ভবেৎ। তদা দেবমুনীন্দ্রাণাং শরণ্যঃ প্রপঠন্ ভবেৎ॥ ভৌমবারে কৃষ্ণপক্ষে যদি স্যাদষ্টমীতিথিঃ। বিল্বপত্রসহস্রৈশ্চ সম্পূজ্য তত্র পার্ব্বতীম্॥ বলিং দত্ত্বা বিধানেন জপেদাগমচণ্ডিকাম্। যদ্যদিষ্টতমং লোকে তত্তদাপ্নোতি নিশ্চিতম্॥ কৃষ্ণাষ্টমীসমাযুক্তা বিশাখা বা শনৌ ভবেৎ। তত্র জপ্ত্বেদৃশীং কৃত্বা সাধকঃ সাধয়েৎ শিবাম্॥ অপরাজিতাশতৈঃ পুষ্পৈঃ সম্পূজ্য পরমেশ্বরীম্। অষ্টম্যাঞ্চ চতুর্দ্দশ্যাং নবম্যাং বাপি পার্ব্বতীম্॥ পূজয়িত্বাঽগ্র্যমনসা দুর্গাপাঠমিদং জপন্। লভতে বাঞ্ছিতং সর্ব্বমিহ লোকে পরত্র চ॥৩৮॥

ইতি শ্রীমদাগমসন্দর্ভে শ্রীরুদ্রযামলে রুদ্রচণ্ডিকায়াং শিবদুর্গাসংবাদে সাধনরহস্যং নাম মধ্যমাবচ্ছেদঃ।

---

রুদ্র উবাচ। চণ্ডিকাং হৃদয়ে ন্যস্য স্মরণং যঃ করোত্যপি। অনন্তফলমাপ্নোতি দেবি চণ্ডীপ্রসাদতঃ॥ রবিবারে যদা চণ্ডীং পঠেদাগমসম্মতাম্। নবাবৃত্তিফলন্তস্য জায়তে নাত্র সংশয়ঃ॥ সোমবারে যদা চণ্ডীং পঠেদ্ যস্তু সমাহিতঃ। সহস্রাবৃত্তিপাঠস্য ফলং জানীহি সুব্রতে॥ কুজবারে জগদ্ধাত্রি পঠেদ্যামলসম্মতাম্। শতাবৃত্তিফলন্তস্য বুধে লক্ষফলং ভবেৎ॥ গুরৌ যদি মহামায়ে লক্ষযুগ্মফলং ধ্রুবম্। শুক্রে দেবি জগদ্ধাত্রি চণ্ডীপাঠেন শঙ্করি। জ্ঞেয়ং তুল্যফলং দুর্গে পঠেদ্ যদি সমাহিতঃ॥ শনিবারে জগদ্ধাত্রি কোট্যাবৃত্তিফলং ধ্রুবম্। অতএব জগদ্ধাত্রি যশ্চ চণ্ডীং সমভ্যসেৎ। স ধন্যশ্চ কৃতার্থশ্চ রাজরাজাধিপো ভবেৎ॥ আরোগ্যং বিজয়ং সৌখ্যং বস্ত্র-রত্নপ্রবালকম্। পঠনাৎ শ্রবণাচ্চৈব জায়তে নাত্র সংশয়ঃ॥ ধনং ধান্যং প্রবালঞ্চ বস্ত্ররত্নবিভূষিতম্। চণ্ডীশ্রবণমাত্রেণ কুর্য্যাৎ সর্ব্বং মহেশ্বরী॥ ঘোরচণ্ডী

মহাচণ্ডী চণ্ডমুণ্ডবিখণ্ডিনী। চতুর্ব্বক্ত্রা মহামায়া মহাদেববিভূষিতা॥ রক্তদন্তা বরারোহা মহিষাসুরমর্দ্দিনী। তারিণী জননী দুর্গা চণ্ডিকা চণ্ডবিক্রমা॥ গুহ্যকালী জগদ্ধাত্রী চণ্ডিকা যামলোদ্ভবা। শ্মশানবাসিনী দেবী ঘোরচণ্ডী ভয়ানকা॥ শিবা ঘোরা রুদ্রচণ্ডী মহেশগণভূষিতা। জাহ্নবী পরমা কৃষ্ণা মহাত্রিপুরসুন্দরী॥ বিদ্যা শ্রীপরমাবিদ্যা চণ্ডী বৈরিবিমর্দ্দিনী। দুর্গা শিবা মহাঘোরা চণ্ডহন্ত্রী প্রচণ্ডিকা॥ মহেশী বগলাদেবী ভৈরবী চণ্ডবিক্রমা। প্রমথৈর্ভূষিতা কৃষ্ণা চামুণ্ডা মুণ্ডমর্দ্দিনী। রণচণ্ডা চণ্ডঘণ্টা রণরামা রণপ্রিয়া॥ ভবানী ভদ্রকালী চ শিবা ঘোরা ভয়ানকা। বিষ্ণুপ্রিয়া মহামায়া নন্দগোপগৃহোদ্ভবা॥ মঙ্গলা জননী চণ্ডী মহাক্রুদ্ধা ভয়ঙ্করী। বিমলা ভৈরবী নিদ্রা মায়া বুদ্ধিঃ স্মৃতিঃ ক্ষমা॥ তৃষ্ণা ক্ষুধা তথাচ্ছায়া শক্তির্মায়া মনোহরা। তস্যৈ দেব্যৈ নমস্তস্যৈ সর্ব্বরূপেণ সংস্থিতা॥ প্রাণপ্রিয়া জাতিমায়া নিদ্রারূপা মহেশ্বরী। যা দেবী সর্ব্বভূতেষু সর্ব্বরূপেণ সংস্থিতা। নমস্তস্যৈ নমস্তস্যৈ নমস্তস্যৈ নমো নমঃ। এতাং চণ্ডীং জগদ্ধাত্রি ব্রাহ্মণস্তু সদা পঠেৎ॥ নাস্তস্তু পাঠকো দেবি পঠনে ব্রহ্মহা ভবেৎ। নারদঃ পাঠকশ্চৈব কৈলাসে রত্নভূষিতে॥ বৈকুণ্ঠে ব্রহ্মলোকে চ দেবরাজপুরে শিবে। যঃ শৃণোতি ধরায়াঞ্চ মুচ্যতে সর্ব্বপাতকৈঃ॥ ব্রহ্মহত্যা চ গোহত্যা স্ত্রীবধোদ্ভবপাতকম্। তৎসর্ব্বং পাতকং দুর্গে মাতৃগমনপাতকম্॥ শ্বশ্রূগমনপাপঞ্চ কন্যাগমনপাতকম্। সুতস্ত্রীগমনঞ্চৈব যদ্যৎ পাপং প্রজায়তে॥ পরদারকৃতং পাপং তৎক্ষণাদেব নশ্যতি। জন্মজন্মান্তরাৎ পাপাদ্ গুরুহত্যাদিপাতকাৎ॥ মুচ্যতে মুচ্যতে দেবি গুরুপত্নীষু সঙ্গমাৎ। মনসা বচসা পাপং যৎ পাপং ব্রহ্মহিংসনে॥ মিথ্যায়াঞ্চৈব যৎ পাপং তৎ পাপং নশ্যতি ক্ষণাৎ। শ্রবণং পঠনঞ্চৈব যঃ করোতি ধরাতলে॥ স ধন্যশ্চ কৃতার্থশ্চ রাজরাজাধিপো ভবেৎ। যঃ করিষ্যত্যবজ্ঞাং বৈ রুদ্রযামলচণ্ডিকাম্॥ পাপৈরেতৈঃ সমাযুক্তো রৌরবং নরকং ব্রজেৎ॥ অশ্রদ্ধাং যে প্রকুর্ব্বন্তি তে চ পাতকিনো নরাঃ। রৌরবং রক্তকুণ্ডঞ্চ কৃমিকুণ্ডং মলস্য বৈ॥ শুক্রস্য কুণ্ডং স্ত্রীরক্তং যান্তি তেঽপ্যচিরেণ বৈ। ততঃ পিতৃগণৈঃ সার্দ্ধং বিষ্ঠায়াং জায়তে কৃমিঃ॥ শৃণু দেবি মহাভাগে চণ্ডীপাঠফলং শিবে। গয়ায়াঞ্চৈব যৎ পুণ্যং কাশ্যাং বিশ্বেশ্বরাগ্রতঃ। প্রয়াগে মুণ্ডনঞ্চৈব হরিদ্বারে হরের্গৃহে॥ তুল্যপুণ্যং ভবেদ্দেবি সত্যং দুর্গে শিবে রমে। ত্রিগয়ায়াং ত্রিকাশ্যাং বৈ যচ্চ পুণ্যং সমুত্থিতম্॥ তচ্চ পুণ্যং তচ্চ পুণ্যং তচ্চ পুণ্যং ন সংশয়ঃ॥ ভবানী চ ভবানী চ ভবানীত্যুচ্যতে বুধৈঃ। ভকারশ্চ ভকারশ্চ ভকারঃ কেবলঃ

শিবঃ ॥ বানী চৈব জগদ্ধাত্রী বরারোহে ভকারকঃ। প্রেতবদ্ দেবি বিশ্বেশি ভকারঃ প্রেতবৎ সদা ॥ আরোগ্যঞ্চ জয়ং দুঃখনাশনং সুখবর্দ্ধনম্। ধনং পুত্রং জয়ারোগ্যং কুষ্ঠং গলিতনাশকম্ ॥ অর্দ্ধাঙ্গরোগান্মুচ্যেত দক্রুরোগাচ্চ পার্ব্বতি। সত্যং সত্যং জগদ্ধাত্রি মহামায়ে শিবে রমে ॥ চণ্ডে চণ্ডে মহাঘোরে চণ্ডিকে ব্যাধিনাশিনি। মন্দে দিনে মহেশানি বিশেষফলদায়িনী ॥ সর্ব্বদুঃখাৎ প্রমুচ্যেত ভক্ত্যা চণ্ডীং শৃণোতি যঃ। ব্রাহ্মণো হিতকারী চ পঠেন্নিয়তমানসঃ ॥ মঙ্গলং মঙ্গলং শ্রেয়ং মঙ্গলং জয়মঙ্গলম্। ভবেদ্ধি পুত্রপৌত্রৈশ্চ কন্যাদাসাদিভির্যুতঃ ॥ তত্ত্বজ্ঞানঞ্চ নিধনে কালে নির্ব্বাণমাপ্নুয়াৎ। মহাদানোদ্ভবং পুণ্যং তুলাহিরণ্যকে যথা। চণ্ডীশ্রবণমাত্রেণ পঠনাদ্ ব্রাহ্মণোঽপি সঃ ॥ নির্ব্বাণমেতি দেবেশি মহাস্বস্ত্যয়নং হি তৎ ॥ সর্ব্বত্র বিজয়ং যাতি শ্রবণাদ্-গ্রহদোষতঃ। মুচ্যতে চ জগদ্ধাত্রি রাজরাজাধিপো ভবেৎ ॥ মহাচণ্ডী শিবা ঘোরা ভয়ানকবরপ্রদা। কালী চ কমলা বিদ্যা মহারোগবিমর্দ্দিনী ॥ শুভ-চণ্ডী ঘোরচণ্ডী চণ্ডী ত্রৈলোক্যদুর্লভা। দেবানাং দুর্লভা চণ্ডী রুদ্রযামল-সম্মতা ॥ অপ্রকাশ্যা মহাদেবপ্রিয়া রাবণমর্দ্দিনী। মৎস্যপ্রিয়া মাংসরতা মৎস্যমাংস-বলিপ্রিয়া ॥ মধুমত্তা মহানৃত্যা ভূতপ্রমথসঙ্গতা। মহাভাগা মহারামা ধান্যদা ধনদায়িনী ॥ বস্ত্রদা মণিরাজ্যাদি-প্রদা বিষয়বর্দ্ধিকা ॥ মুক্তিদা সর্ব্বদা চণ্ডী মহাবিপদনাশিনী। ইমাঞ্চ চণ্ডীং পঠতে মনুষ্যঃ, শৃণোতি ভক্ত্যা পরমাং শিবস্য। চণ্ডীং ধরণ্যামতিপুণ্যযুক্তঃ, পঠেচ্চ গচ্ছেদ্ধরমন্দিরং শুভম্ ॥ যো যন্মনোরথং দুর্গে করোতি ধরণীতলে। রুদ্রচণ্ডীপ্রসাদেন কিং ন সিধ্যতি ভূতলে ॥ রুদ্রধ্যেয়া রুদ্ররূপা রুদ্রাণী রুদ্রবল্লভা। রুদ্রভক্তা রুদ্রপূজ্যা রুদ্রভূষাসমন্বিতা ॥ শিবচণ্ডী মহাচণ্ডী শিবপ্রীতিগণান্বিতা। ভৈরবী পরমা বিদ্যা মহাবিদ্যা চ ষোড়শী ॥ সুন্দরী পরমা পূজ্যা মহাত্রিপুরসুন্দরী। গুহ্যকালী ভদ্রকালী মহাকালবিমর্দ্দিনী ॥ কৃষ্ণা কৃষ্ণস্বরূপা সা জনসম্মোহ-কারিণী। অতিতন্দ্রা মহালজ্জা সর্ব্বমঙ্গলদায়িকা ॥ ঘোরবর্ণা ভীমরূপা ভীমা-দেবী মনোহরা। ধূমাবতী চ বগলা সিদ্ধিদা সর্ব্বদা শিবা ॥ স্মৃতিরূপা কীর্ত্তি-রূপা বুদ্ধিরূপা মনোহরা। বিষ্ণুপ্রিয়া শক্রপূজ্যা যোগীন্দ্রৈরপি সেবিতা ॥ মহাভয়ানকা দেবী ভবদুঃখবিনাশিনী। চণ্ডিকা শক্তিহস্তা চ কৌমারী সর্ব্ব-কামদা ॥ বারাহী চ বরাহস্য ইন্দ্রাণী শক্রপূজিতা। মাহেশ্বরী মহেশস্য মহেশগণ-ভূষিতা ॥ চামুণ্ডা নারসিংহী চ নৃসিংহশত্রুনাশিনী। সর্ব্বশত্রুপ্রশমনী সর্ব্বারোগ্য-প্রদায়িনী ॥ নৈব দুঃখভয়ং কিঞ্চিৎ পঠনাৎ শ্রবণাদ্যতঃ। (গুহ্যমেকং

প্রবক্ষ্যামি নৈব জানন্তি কেচন ॥ স্মৃতিভ্রংশাদ্ বরারোহে ত্বয়ৈবাপি ন জায়তে।) ইতি সত্যং মহেশানি সত্যং সত্যং বদাম্যহম্॥ নৈব দুঃখং নৈব শোকং নৈব রোগভয়ন্তথা। আরোগ্যং বিজয়ং নিত্যং করোতি শুভমঙ্গলম্॥ মহেশানি বরারোহে ব্রবীমি সত্যমুত্তমম্। অভক্তায় ন দাতব্যং মম প্রাণাধিকং শুভম্॥ মম ভক্তায় শান্তায় শিব-বিষ্ণুপ্রিয়ায় চ। দত্তাৎ কদাচিদ্দেবেশি সত্যং সত্যং মহেশ্বরি। অনন্তফলমাপ্নোতি শিবচণ্ডীপ্রসাদতঃ। অশ্বমেধ বাজপেয়-রাজসূয়শতেন বৈ॥ তুষ্টাশ্চ পিতরো দেবাস্তথা চ সর্ব্বদেবতাঃ। দুর্গায়াং মৃন্ময়ীজ্ঞানং রুদ্রযামলপুস্তকম্। মন্ত্রে চাক্ষরসংজ্ঞানং করোতি হি নরাধমঃ॥ অতএব মহামায়ে কিং বক্ষ্যে তব সন্নিধৌ। লম্বোদরাধিকশ্চণ্ডীপঠনাৎ শ্রবণাজ্জনঃ॥ তত্ত্বমসীতি-বাক্যেন মুক্তিমাপ্নোতি দুর্লভাম্। তথাস্যাঃ পঠনাদ্দেবি সংস্থিতিঃ স্যাৎ সুদুর্লভা॥ সত্যং সত্যং মহেশানি পুনঃ সত্যং ময়োদিতম্। কপিলাশতদানায় ফলং যৎ প্রতিবাসরম্। তৎ ফলং লভতে নিত্যং রুদ্রচণ্ডীপ্রসাদতঃ॥ ওঁ

ইতি শ্রীমদাগম-সন্দর্ভে শ্রীরুদ্রযামলে হরগৌরীসংবাদে
ফলরহস্যং নামোত্তমাবচ্ছেদঃ।

---

রুদ্র উবাচ। পুরাসীদ্ দেবি দুর্দ্ধর্ষো প্রলম্বো নামতোঽসুরঃ। ইন্দ্রং নির্জ্জিত্য শক্রত্বং নীতবান্ নিজতেজসা॥ ময়া দত্তবরোন্মত্তঃ কালকঙ্কালপ্রোম্বলান্। সুকালং বিকালং কালং নিষ্কালং কালসঞ্জয়ম্॥ প্রতিকালং কার্য্যকালং হর্ষকালং হলাহলম্। সৎকালং কালকুলকং কালহাট্যং হটাহটম্॥ হটৎকালং বৃহৎকালং কালচক্রং কলাকলম্। মহাকালং কালরূপং সৈন্যৈর্হি কোটিসংজ্ঞকম্॥ অমারয়ৎ সুরপ্রীত্যৈ বিড়ৌজঃপ্রমুখৈঃ স্তুতা। দুন্দুভীর্বাদয়িত্বা চ ঘণ্টাদ্যৈর্ঘোররাবণৈঃ॥ বিড়ৌজাস্তদ্ভয়াৎ শীঘ্রং ব্রহ্মাদ্যৈরগমত্ততঃ। কারণাখ্যজলানাং বৈ উপর্য্যাং পরমেশ্বরী॥ যত্রাস্তে সখীভিস্তাভির্নায়িকাদিভিরেব সা। স্তুত্বা বহুবিধৈর্বাগ্ভিরপৃচ্ছন্ মৃদুবাক্যতঃ॥ প্রলম্বং নাশয় শুভে নান্যথা মৃত্যুমেষ্যতি। ইতি শ্রুত্বা শিবাদেব্যাঃ কথিতং মাতুরগ্রতঃ॥ ভবং প্রাহ শিবে গচ্ছ প্রলম্বনাশনায় চ। আজ্ঞাং লব্ধ্বা চ সা দেবী গন্ধামরপুরে বরে॥ শতৈশ্চ যোগিনী-সৈন্যৈর্যুধে প্রহরদ্বয়ম্। মহিষপ্রতিমং তঞ্চ জঘান পরমেশ্বরী॥

ততস্তাভিঃ স্তুতা তত্র চণ্ডিকা বিশ্বরূপিণী। বরারোহা ভগবতী স্বাশ্রমাসুখিনী শুভা॥ মধুপা সাধনী মাত্রা মিত্রা মুদ্রা মনস্বিনী। মনোভবা মধুমত্তা মহিষঘ্নী সুমন্ত্রিণী॥ ইমাঞ্চ চণ্ডিকাং নিত্যং যঃ পঠেৎ পাঠয়েন্নরঃ। সর্ব্বতীর্থাবগাহস্য ফলমাপ্নোতি নিশ্চিতম্॥ যঃ পঠেৎ প্রযতো নিত্যং রুদ্রচণ্ডীমিমাং সুধীঃ। গাত্রোত্থানে গুরোরগ্রে গুহায়াং গিরিভূমিতঃ॥ গোষ্ঠে গৌড়ে গোস্থলে বা গোবিন্দাগ্রে গয়োপরি। গঙ্গায়াং গিরিজাযজ্ঞে গিরিজাপ্রতিপূজনে॥ গ্রহণে গো-কোটিদানে যদ্ যত্তীর্থং মহীতলে। তস্মাৎ কোটিগুণং পুণ্যং জায়তে শ্রূয়তে যদি। চণ্ডিকাং রুদ্রবক্ত্রারবিন্দবাক্যবিনির্গতাম্। সত্যং সত্যং পুনঃ সত্যং সত্যমেতন্ময়োদিতম্॥ রুদ্রচণ্ডীসমং পুণ্যং কিঞ্চিন্নাস্তি ক্ষিতেস্তলে। নিত্যং যস্তাং স্তবৈরেতৈঃ স্তূয়তে চ সমাহিতঃ॥ বাধাজালঞ্চ তস্যাং বা সমস্তাচারএব হি। মধুকৈটভনৈপাত্যং মহিষাসুরসংহরম্। পঠন্তি পাঠয়ন্ত্যেব বধং শুম্ভনিশুম্ভয়োঃ। শ্রোষ্যন্তি নিত্যং যে ভক্ত্যা মাহাত্ম্যং তব চণ্ডিকে। নবম্যাং কৃষ্ণপক্ষে বা চতুর্দ্দশ্যাং তথৈব চ॥ শুক্লাষ্টম্যাং পর্ব্বতো বা ভক্তাশ্চৈবৈকচেতসঃ। ন চৈষাং দুষ্কৃতং কিঞ্চিন্ন দারিদ্র্যং ন চাপদঃ। ন চ শত্রুভয়ং কিঞ্চিন্ন চৈবেষ্টবিয়োজনম্॥ দস্যুতো রাজতো নৈব ন শস্ত্রানলয়োরপি। ন জলে নোপসর্গে চ মহামারীভয়ং ন চ॥ যত্রৈতৎ পঠ্যতে ভক্ত্যা নিত্যমায়তনে মম। তৎ স্থানং ন বিমোক্ষ্যামি সান্নিধ্যং মম সর্ব্বদা॥ মহাস্বস্ত্যয়নং পুণ্যং পাপজালবিনাশনম্। চতুর্ব্বর্গপ্রদং সত্যং তথাক্ষয়-দিবিপ্রদম্॥ বহ্নিকর্ম্মণি পূজায়াং বলিদানে তথোৎসবে। মমৈতাং চণ্ডিকাং শ্রুত্বা তৎ সর্ব্বমক্ষয়ং লভেৎ॥ যুদ্ধে বীরবরো ভূয়ান্নির্ভয়ো রিপুসঙ্কুলে। কল্যাণং লভতে নিত্যং লভতে কুলবর্দ্ধনম্॥ শান্তিকর্ম্মণি দুঃস্বপ্নে প্রপঠেন্মিত্রকর্ম্মণি। সঙ্ঘাতভেদনে চৈব রক্ষোভয়বিনাশনে॥ আরোগ্যে শত্রুসংহারে রণে যানে বনাগ্নিতঃ। শূন্যে সিংহাদিজন্তূনাং ভয়ে সর্ব্বভয়েঽপি চ॥ স্মরন্নেতৎ পরং গুহ্যং সঙ্কটান্মুচ্যতে নরঃ। একধা দশধা চৈব শতধা চ সহস্রধা॥ অযুতং লক্ষনিযুতং কোট্যর্ব্বুদ-মহার্ব্বুদম্। পদ্মঞ্চাপি মহাপদ্মং খর্ব্বঞ্চ লঘু খর্ব্বকম্॥ হংসঞ্চৈব মহাহংসং মহাশঙ্খঞ্চ ধূলকম্। মহাধূলমক্ষৌহিণী মহাক্ষৌহিণিকা ক্রমাৎ॥ যথাশক্তি যথাবৃত্তি যাবজ্জীবং ভবার্ণবে। তাবদ্বা জন্মনি দিনে কিয়ৎকালং কলৌ যুগে॥ ভবানীত্যুচ্চরন্ জন্তুর্ভবান্মুচ্যেত নান্যথা। ভবানীত্যুচ্চরন্ ব্যাজান্ন যোনৌ জায়তে জনঃ॥ অথানুক্রমিকাং

বক্ষ্যে শৃণু দেবি শুচিস্মিতে। ন্যাসং বিধানং পূজাঞ্চ নত্বা সর্ব্বমুদীরয়েৎ॥ আদৌ দ্বি-তূর্য্য-পঞ্চাশৎ চত্বারিংশদ্বিতীয়কে। অষ্টোত্তরশতং তিস্রোঽপ্যষ্টোত্তরশতত্রয়ম্॥ সংখ্যাতমেব শ্লোকানাং ময়োক্তং খলু পার্ব্বতি। গৃহেঽপি লিখিতং তিষ্ঠন্নুক্তং ফলমবাপ্নুয়াৎ॥৩৫॥ ওঁ।

ইত্যাগমসন্দর্ভে রুদ্রযামলে পুষ্পিকাকল্পে তূর্য্যখণ্ডে দুর্গাপ্রীতিবচনে রুদ্রোক্তা চণ্ডী॥ ওঁ তৎ সৎ।

ইতি রুদ্রচণ্ডী।

---

## কাণ্বশাখীয়-রুদ্রাধ্যায়ঃ।

ওঁ আপাতালনভস্তলান্তভুবনব্রহ্মাণ্ডমাবিঃস্ফুরৎ-জ্যোতিঃ-স্ফাটিকলিঙ্গ-মৌলিবিলসৎ-পূর্ণেন্দুবান্তামৃতৈঃ। যঃ স্তোকাপ্লুতমেকমীশমনিশং রুদ্রানুবাকান্ জপন্, ধ্যায়েদীপ্সিতসিদ্ধয়ে ধ্রুতপদং বিপ্রোঽভিষিঞ্চেচ্ছিবম্॥ অস্য রুদ্রপ্রশ্নস্য অঘোরঋষিঃ সঙ্কর্ষণমূর্ত্তিস্বরূপো যোঽসাবাদিত্যঃ পরমপুরুষঃ স এব রুদ্রো দেবতা অনুষ্টুপ্ ছন্দোঽগ্নিচিত্যচরমায়ামিষ্টকায়াং শতরুদ্রীয়জপে বিনিয়োগঃ। সকলস্য রুদ্রাধ্যায়স্য শ্রীরুদ্রো দেবতা পরমেষ্ঠী ঋষিরেকা গায়ত্রীছন্দস্তিস্রস্ত্রিষ্টুভস্তিস্রঃ পঙ্‌ক্তয়ঃ সপ্তানুষ্টুভো দ্বে জগত্যৌ শ্রীসদাশিবপ্রীত্যর্থং জপে বিনিয়োগঃ। ওঁ নমস্তে রুদ্রমন্যব উতো ত ইষবে নমঃ। নমস্তে অস্তু ধন্বনে বাহুভ্যামুত তে নমঃ॥১॥ যা ত ইষুঃ শিবতমা শিবং বভূব তে ধনুঃ। শিবা শরব্যা যা তব তয়া নো রুদ্র মৃড়য়॥২। যা তে রুদ্র শিবা তনূরঘোরাঽপাপকাশিনী। তয়া নস্তনুবা শন্তময়া গিরিশন্তাভি চাকশীহি॥৩॥ যামিষুং গিরিশন্ত হস্তে বিভর্ষ্যস্তবে। শিবাং গিরিত্র তাং কুরু মা হিংসীঃ পুরুষং জগৎ॥৪॥ শিবেন বচসা ত্বা গিরিশাচ্ছা বদামসি। যথা নঃ সর্ব্বমিজ্জগদযক্ষ্মং সুমনা অসৎ॥৫। অধ্যবোচদধিবক্তা প্রথমো দৈব্যো ভিষক্। অহীংশ্চ সর্ব্বান্ জম্ভয়ন্ সর্ব্বাশ্চ যাতুধান্যঃ॥৬॥ অসৌ যস্তাম্রো অরুণ উত বভ্রুঃ সুমঙ্গলঃ। যে চেমং রুদ্রা অভিতো দিক্ষু শ্রিতাঃ সহস্রশো বৈষাং হেড় ঈমহে॥৭॥ অসৌ যোঽবসর্পতি নীলগ্রীবো বিলোহিতঃ। উতৈনং গোপা অদৃশ্রন্নদৃশ্রন্নুদহার্য্যঃ॥ উতৈনং বিশ্বা ভূতানি স দৃষ্টো মৃড়য়াতি নঃ॥৮॥ নমোঽস্তু নীলগ্রীবায় সহস্রাক্ষায় মীঢ়ুষে। অথো যে অস্য সত্বানোঽহন্তেভ্যোঽকরন্নমঃ॥৯॥

প্রমুঞ্চ ধন্বনস্ত্বমুভয়োরার্ত্নিয়োর্জ্যাম্। যাশ্চ তে হস্ত ইষবঃ পরা তা ভগবো বপ ॥ ১০ ॥ অবতত্য ধনুস্তং সহস্রাক্ষ শতেষুধে। নিশীর্য্য শল্যানাং মুখা শিবো নঃ সুমনা ভব ॥ ১১ ॥ বিজ্যং ধনুঃ কপর্দ্দিনো বিশল্যো বাণবাঁ উত। অনেশন্নস্য যা ইষব আভুরস্য নিষঙ্গধিঃ ॥ ১২ ॥ যা তে হেতি র্মীঢ়ুষ্টম হস্তে বভূব তে ধনুঃ। তয়াস্মান্ বিশ্বতস্ত্বমযক্ষ্ময়া পরিভুজ ॥ ১৩ ॥ নমস্তে অস্ত্বায়ুধায়নাততায় ধৃষ্ণবে। উভাভ্যামুত তে নমো বাহুভ্যাং তব ধন্বনে ॥ ১৪ ॥ পরি তে ধন্বনো হেতিরস্মান্ বৃণক্তু বিশ্বতঃ। অথো য ইষুধিস্তবারে অস্মন্নিধেহি তম্ ॥১৫॥ নমস্তে অস্তু ভগবন্ বিশ্বেশ্বরায় মহাদেবায় ত্র্যম্বকায় ত্রিপুরান্তকায় ত্রিকালাগ্নিকালায় কালাগ্নিরুদ্রায় নীলকণ্ঠায় সর্ব্বেশ্বরায় সদাশিবায় শ্রীমহাদেবায় চ নমঃ ॥ ওঁ

ইতি প্রথমোঽনুবাকঃ।

---

ওঁ নমো হিরণ্যবাহবে সেনান্যে দিশাঞ্চ পতয়ে নমঃ ॥১॥ নমো বৃক্ষেভ্যো-হরিকেশেভ্যঃ পশূনাং পতয়ে নমঃ ॥২॥ নমঃ শস্পিঞ্জরায় ত্বিষীমতে পথীনাং পতয়ে নমঃ। ৩। নমো বভ্লুশায় বিব্যাধিনেঽন্নানাং পতয়ে নমঃ ॥৪॥ নমো হরিকেশায়োপবীতিনে পুষ্টানাং পতয়ে নমঃ। ৫। নমো ভবস্য হেত্যৈ জগতাং পতয়ে নমঃ ॥ ৬ ॥ নমো রুদ্রায়াততায়িনে ক্ষেত্রাণাং পতয়ে নমঃ ॥ ৭ ॥ নমঃ সূতায়াহন্ত্যৈ বনানাং পতয়ে নমঃ ॥ ৮ ॥ নমো রোহিতায় স্থপতয়ে বৃক্ষাণাং পতয়ে নমঃ ॥ ৯ ॥ নমো মন্ত্রিণে বাণিজায় কক্ষাণাং পতয়ে নমঃ ॥১০॥ নমো ভুবন্তয়ে বারিবস্কৃতায়ৌষধীণাং পতয়ে নমঃ। ১১। নম উচ্চৈর্ঘোষায়াক্রন্দয়তে পত্তীনাং পতয়ে নমঃ ॥ ১২ ॥ নমঃ কৃৎস্নায়তয়া ধাবতে সত্বনাং পতয়ে নমঃ ॥ ১৩ ॥ ওঁ

ইতি দ্বিতীয়োঽনুবাকঃ।

---

ওঁ নমঃ সহমানায় নিব্যাধিন আব্যাধিনীনাং পতয়ে নমঃ। ১। নমঃ ককুভায় নিষঙ্গিণে স্তেনানাং পতয়ে নমঃ। ২। নমো নিষঙ্গিণ ইষুধিমতে তস্করাণাং পতয়ে নমঃ। ৩। নমো বঞ্চতে পরিবঞ্চতে স্তায়ূনাং পতয়ে নমঃ। ৪। নমো নিচেরবে পরিচরায়ারণ্যানাং পতয়ে নমঃ। ৫। নমঃ সৃকায়িভ্যো

ভিবাশুংসদ্ভ্যো মুষ্ণতাং পতয়ে নমঃ। ৬। নমোঽসিমদ্ভ্যো নক্তঞ্চরদ্ভ্যঃ প্রকৃন্তানাং পতয়ে নমঃ। ৭। নম উষ্ণীষিণে গিরিচরায় কুলুঞ্চানাং পতয়ে নমঃ। ৮। নম ইষুমদ্ভ্যো ধন্বায়িভ্যশ্চ বো নমঃ। ৯। নম আতন্বানেভ্যঃ প্রতিদধানেভ্যশ্চ বো নমঃ। ১০। নম আযচ্ছদ্ভ্যো বিসৃজদ্ভ্যশ্চ বো নমঃ। ১১। নমো অস্যদ্ভ্যো বিধ্যদ্ভ্যশ্চ বো নমঃ। ১২। নম আসীনেভ্যঃ শয়ানেভ্যশ্চ বো নমঃ। ১৩। নমঃ স্বপদ্ভ্যো জাগ্রদ্ভ্যশ্চ বো নমঃ। ১৪। নমস্তিষ্ঠদ্ভ্যো ধাবদ্ভ্যশ্চ বো নমঃ। ১৫। নমঃ সভাভ্যঃ সভাপতিভ্যশ্চ বো নমঃ। ১৬। নমোঽশ্বেভ্যোঽশ্বপতিভ্যশ্চ বো নমঃ। ১৭। ওঁ

ইতি তৃতীয়োঽনুবাকঃ।

---

ওঁ নম আব্যাধিনীভ্যো বিবিধ্যন্তীভ্যশ্চ বো নমঃ। ১। নম উগণাভ্যস্তৃংহতীভ্যশ্চ বো নমঃ। ২। নমো গৃৎসেভ্যো গৃৎসপতিভ্যশ্চ বো নমঃ। ৩। নমো ব্রাতেভ্যো ব্রাতপতিভ্যশ্চ বো নমঃ। ৪। নমো গণেভ্যো গণপতিভ্যশ্চ বো নমঃ। ৫। নমো বিরূপেভ্যো বিশ্বরূপেভ্যশ্চ বো নমঃ। ৬। নমো মহদ্ভ্যঃ ক্ষুল্লকেভ্যশ্চ বো নমঃ। ৭। নমো রথিভ্যো অরথেভ্যশ্চ বো নমঃ। ৮। নমো রথেভ্যো রথপতিভ্যশ্চ বো নমঃ। ৯। নমঃ সেনাভ্যঃ সেনানীভ্যশ্চ বো নমঃ। ১০। নমঃ ক্ষত্তৃভ্যঃ সংগ্রহীতৃভ্যশ্চ বো নমঃ। ১১। নমস্তক্ষভ্যো রথকারেভ্যশ্চ বো নমঃ। ১২। নমঃ কুলালেভ্যঃ কর্ম্মারেভ্যশ্চ বো নমঃ। ১৩। নমঃ পুঞ্জিষ্ঠেভ্যো নিষাদেভ্যশ্চ বো নমঃ। ১৪। নম ইষুকৃদ্ভ্যো ধন্বকৃদ্ভ্যশ্চ বো নমঃ। ১৫। নমো মৃগয়ুভ্যঃ শ্বনিভ্যশ্চ বো নমঃ। ১৬। নমঃ শ্বভ্যঃ শ্বপতিভ্যশ্চ বো নমঃ। ১৭। ওঁ

ইতি চতুর্থোঽনুবাকঃ।

---

ওঁ নমো ভবায় চ রুদ্রায় চ। ১। নমঃ শর্ব্বায় চ পশুপতয়ে চ। ২। নমো নীলগ্রীবায় চ শিতিকণ্ঠায় চ। ৩। নমঃ কপর্দ্দিনে চ ব্যুপ্তকেশায় চ। ৪। নমঃ সহস্রাক্ষায় চ শতধন্বনে চ। ৫। নমো গিরিশয়ায় চ শিপিবিষ্টায় চ। ৬। নমো মীঢ়ুষ্টমায় চেষুমতে চ। ৭। নমো হ্রস্বায় চ বামনায় চ। ৮। নমো বৃহতে চ বর্ষীয়সে চ। ৯। নমো বৃদ্ধায় চ সম্বৃধ্বনে চ। ১০। নমো অগ্রিমায় চ

প্রথমায় চ। ১১। নম আশবে চাজিরায় চ। ১২। নমঃ শীঘ্রিয়ায় চ শীভ্যায় চ। ১৩। নম উর্ম্যায় চাবস্বন্যায় চ। ১৪। নমঃ স্রোতস্যায় চ দ্বীপ্যায় চ।১৫। ওঁ

ইতি পঞ্চমোঽনুবাকঃ।

---

ওঁ নমো জ্যেষ্ঠায় চ কনিষ্ঠায় চ। ১। নমঃ পূর্ব্বজায় চাপরজায় চ। ২। নমো মধ্যমায় চাপগল্‌ভায় চ। ৩। নমো জঘন্যায় চ বুধ্নিয়ায় চ। ৪। নমঃ সোভ্যায় চ প্রতিসর্য্যায় চ। ৫। নমো যাম্যায় চ ক্ষেম্যায় চ। ৬। নম উর্ব্বর্য্যায় চ খল্যায় চ। ৭। নমঃ শ্লোক্যায় চাবসান্যায় চ। ৮। নমো বন্যায় চ কক্ষ্যায় চ। ৯। নমঃ শ্রবায় চ প্রতিশ্রবায় চ। ১০। নম আশুষেনায় চাশুরথায় চ। ১১। নমঃ শূরায় চাবভিন্দতে চ। ১২। নমো বর্ম্মিণে চ বরূথিনে চ। ১৩। নমো বিল্মিনে চ কবচিনে চ। ১৪। নমঃ শ্রুতায় চ শ্রুতসেনায় চ।১৫। ওঁ

ইতি ষষ্ঠোঽনুবাকঃ।

---

ওঁ নমো দুন্দুভ্যায় চাহনন্যায় চ। ১। নমো ধৃষ্ণবে চ প্রমৃশায় চ। ২। নমো দূতায় চ প্রহিতায় চ। ৩। নমো নিষঙ্গিণে চেষুধিমতে চ। ৪। নমস্তীক্ষ্ণেষবে চায়ুধিনে চ। ৫। নমঃ স্বায়ুধায় চ সুধন্বনে চ। ৬। নমঃ স্রুত্যায় চ পথ্যায় চ। ৭। নমঃ কাট্যায় চ নীপ্যায় চ। ৮। নমঃ সূদ্যায় চ সরস্যায় চ। ৯। নমো নাদ্যায় চ বৈশন্তায় চ। ১০। নমঃ কূপ্যায় চাবট্যায় চ।১১। নমো বর্ষ্যায় চাবর্ষ্যায় চ। ১২। নমো মেঘ্যায় চ বিদ্যুত্যায় চ। ১৩। নম বীধ্রিয়ায় চাতপ্যায় চ। ১৪। নমো বাত্যায় চ রেষ্মিয়ায় চ। ১৫। নমো বাস্তব্যায় চ বাস্তুপায় চ। ১৬। ওঁ।

ইতি সপ্তমোঽনুবাকঃ।

---

ওঁ নমঃ সোমায় চ রুদ্রায় চ। ১। নমস্তাম্রায় চারুণায় চ। ২। নমঃ শঙ্গবে চ পশুপতয়ে চ। ৩। নম উগ্রায় চ ভীমায় চ। ৪। নমোঽগ্রেবধায় চ দূরেবধায় চ। ৫। নমো হন্ত্রে চ হনীয়সে চ। ৬। নমো বৃক্ষেভ্যো হরিকেশেভ্যঃ। নমস্তারায়। ৭। নমঃ শম্ভবে চ ময়োভবে

চ। ৮। নমঃ শঙ্করায় চ ময়স্করায় চ। ৯। নমঃ শিবায় চ শিবতরায় চ।১০। নমস্তীর্থ্যায় চ কূল্যায় চ। ১১। নমঃ পার্য্যায় চাবার্য্যায় চ। ১২। নমঃ প্রতরণায় চোত্তরণায় চ। ১৩। নম আতর্য্যায় চালাদ্যায় চ। ১৪। নমঃ শষ্প্যায় চ ফেন্যায় চ। ১৫। নমঃ সিকত্যায় চ প্রবাহ্যায় চ। ১৬। ওঁ।

ইত্যষ্টমোঽনুবাকঃ।

---

নম ঈরিণ্যায় চ প্রপথ্যায় চ। ১। নমঃ কিগুংশিলায় চ ক্ষয়ণায় চ। ২। নমঃ কপর্দ্দিনে চ পুলস্তয়ে চ। ৩। নমো গোষ্ঠ্যায় চ গৃহ্যায় চ। ৪। নমস্তল্প্যায় চ গেহ্যায় চ। ৫। নমঃ কাট্যায় চ গহ্বরেষ্ঠায় চ। ৬। নমো হ্রদ-য্যায় চ নিবেষ্প্যায় চ। ৭। নমঃ পাগুংসব্যায় চ রজস্যায় চ। ৮। নমঃ শুষ্ক্যায় চ হরিত্যায় চ। ৯। নমো লোপ্যায় চোলপ্যায় চ। ১০। নম উর্ব্ব্যায় চ সূর্ম্ম্যায় চ। ১১। নমঃ পর্ণায় চ পর্ণশদায় চ। ১২। নমোঽব-গুরমানায় চাভিঘ্নতে চ। ১৩। নম আখিদতে চ প্রখিদতে চ। ১৪। নমো বঃ কিরিকেভ্যো দেবানাগুং হৃদয়েভ্যঃ। ১৫। নমো বিক্ষীণৎকেভ্যো দেবানাগুং হৃদয়েভ্যঃ। ১৬। নমো বিচিন্বৎকেভ্যো দেবানাগুং হৃদয়েভ্যঃ। ১৭। নম আনির্হতেভ্যো দেবানাগুং হৃদয়েভ্যঃ। ১৮। নম আমীবৎকেভ্যো দেবানাগুং হৃদয়েভ্যঃ। ১৯। ওঁ।

ইতি নবমোঽনুবাকঃ।

---

ওঁ। দ্রাপে অন্ধসস্পতে দরিদ্র নীললোহিত। এষাং পুরুষাণামেষাম্ পশূনাং মাভের্মা রোঙ্মো চ এষাং কিঞ্চনামমৎ।১। যাতে রুদ্র শিবা তনূঃ শিবা বিশ্বাহা ভেষজী। শিবা রুতস্য ভেষজী তয়া নো মৃড় জীবসে। ২। ইমাগুং রুদ্রায় তবসে কপর্দ্দিনে ক্ষয়দ্বীরায় প্রভরামহে মতিম্। যথা নঃ শমসদ্দ্বিপদে চতুষ্পদে বিশ্বং পুষ্টং গ্রামে অস্মিন্ননাতুরম্॥ ৩॥ মৃড়া নো রুদ্রোত নো ময়স্কৃধি ক্ষয়দ্বীরায় নমসা বিধেম তে যচ্ছঞ্চ যো শমনুরায়জে পিতা তদশ্যাম তব রুদ্র প্রণীতৌ॥৪॥ মা নো মহান্তমুত মা নো অর্ভকং মা ন উক্ষন্তমুত মা ন উক্ষিতম্। মা নো বধীঃ পিতরং মোত মাতরং প্রিয়া মা নস্তনুবো রুদ্র রীরিষঃ॥ ৫॥ মানস্তোকে তনয়ে মা ন আয়ুষি মা নো গোষু মা নো অশ্বেষু রীরিষঃ। বীরান্ মা নো রুদ্র ভামিনো

বধীর্হবিষ্মন্তো মনসা বিধেম তে ॥ ৬ ॥ আরোত্তে গোঘ্ন উৎপুরুষঘ্নে ক্ষয়দ্বীরায় সুম্নমস্মে তে অস্তু রক্ষা চ নো অধি চ দেব ব্রুহ্যথা চ নঃ শর্ম্ম যচ্ছদ্বিবর্হাঃ ।৭। স্তুহি শ্রুতং গর্ত্তসদং যুবানং মৃগং ন ভীমমুপহন্তুমুগ্রম্। মৃড়া জরিত্রে রুদ্রস্তবা নো অন্যন্তে অস্মন্নিবপন্তু সেনাঃ ॥ ৮ ॥ পরি ণো রুদ্রস্য হেতির্বৃণক্তু পরি ত্বেষস্য দুর্ম্মতিরঘায়োঃ অবস্থিরা মঘবদ্ভ্যস্তনুষ্ব মীঢ়্বস্তোকায় তনয়ায় মৃড় ॥ ৯ ॥ মীঢ়ুষ্টম শিবতম শিবো নঃ সুমনা ভব পরমে বৃক্ষ আয়ুধং নিধায় কৃত্তিং বসান আচর পিনাকং বিভ্রদাগহি ॥ ১০ ॥ বিকিরিদ্র বিলোহিত নমস্তে অস্তু ভগবঃ। যাস্তে সহস্রগুং হেতয়োঽন্যমস্মন্নিবপন্তু সেনাঃ ॥ ১১ ॥ সহস্রাণি সহস্রধা বাহুবোস্তব হেতয়ঃ। তাসামীশানো ভগবঃ পরাচীনা মুখা কৃধি ॥ ১২ ॥ ওঁ।

ইতি দশমোঽনুবাকঃ।

ওঁ সহস্রাণি সহস্রশো যে রুদ্রা অধিভূম্যাম্। তেষাগুং সহস্রযোজনেঽব ধন্বানি তন্মসি। ১। অস্মিন্ মহত্যর্ণবে অন্তরিক্ষে ভবা অধি। তেষাগুং সহস্রযোজনে ঽব ধন্বানি তন্মসি ॥ ২ ॥ নীলগ্রীবাঃ শিতিকণ্ঠা শর্ব্বা অধঃক্ষমা-চরাঃ। তেষাগুং সহস্রযোজনে ঽব ধন্বানি তন্মসি ॥ ৩ ॥ নীলগ্রীবাঃ শিতি-কণ্ঠা দিবগুং রুদ্রা উপশ্রিতাঃ। তেষাগুং সহস্রযোজনে ঽব ধন্বানি তন্মসি ।৪। যে বৃক্ষেষু শস্পিঞ্জরা নীলগ্রীবা বিলোহিতাঃ। তেষাগুং সহস্রযোজনে ঽব ধন্বানি তন্মসি। ৫। যে ভূতানামধিপতয়ো বিশিখাসঃ কপর্দ্দিনঃ। তেষাগুং সহস্র-যোজনেঽব ধন্বানি তন্মসি। ৬। যেঽন্নেষু বিবিধ্যন্তি পাত্রেষু পিবতো জনান্। তেষাগুং সহস্রযোজনঽবধন্বানি তন্মসি। ৭। যে পথাং পথিরক্ষয় ঐলবৃদা আয়ুর্যুধঃ। তেষাগুং সহস্রযোজনেঽবধন্বানি তন্মসি। ৮। যে তীর্থানি প্রচরন্তি সৃকাবন্তো নিষঙ্গিণঃ। তেষাগুং সহস্রযোজনঽবধন্বানি তন্মসি। ৯। য এতাবন্তশ্চ ভূয়াগুংসশ্চ দিশো রুদ্রা বিতস্থিরে। তেষাগুং সহস্রযোজনেঽব-ধন্বানি তন্মসি ॥ ১০ ॥ নমো রুদ্রেভ্যো যে পৃথিব্যাং যেষামন্নমিষবস্তেভ্যো দশ প্রাচীর্দশ দক্ষিণা দশ প্রতীচীর্দশোদীচীর্দশোর্দ্ধাস্তেভ্যো নমস্তে নো মৃড়য়ন্তু তে যং দ্বি ষ্মো যশ্চ নো দ্বেষ্টি তং বো জম্ভে দদামি। ১১। নমো রুদ্রেভ্যো যে অন্ত-রিক্ষে যেষাং বাত ইষবস্তেভ্যো দশ প্রাচীর্দশ দক্ষিণা দশ প্রতীচীর্দশোদীচী-র্দশোর্দ্ধাস্তেভ্যো নমস্তে নো মৃড়য়ন্তু তে যং দ্বিষ্মো যশ্চ নো দ্বেষ্টি তং বো জম্ভে দধামি। ১২। নমো রুদ্রেভ্যো যে দিবি যেষাং বর্ষমিষবস্তেভ্যো দশ প্রাচীর্দশ দক্ষিণা দশ প্রতীচীর্দশোদীচীর্দশোর্দ্ধাস্তেভ্যো নমস্তে নো মৃড়য়ন্তু তে যং দ্বিষ্মো যশ্চ নো দ্বেষ্টি তং বো জম্ভেদধামি। ১৩। ওঁ। ইত্যেকাদশোঽনুবাকঃ।

## অথ নারায়ণ-সূক্তম্

ওঁ পূর্ণমদঃ পূর্ণমিদং পূর্ণাৎ পূর্ণমুদচ্যতে। পূর্ণস্য পূর্ণমাদায় পূর্ণমেবাবশিষ্যতে॥ ওঁ শান্তিঃ ওঁ শান্তিঃ ওঁ শান্তিঃ॥

ওঁ পুরুষো হ বৈ নারায়ণো অকাময়ত প্রজাঃ সৃজেয়মিতি নারায়ণাদ্ব্রহ্মা জায়তে, নারায়ণাদিন্দ্রো জায়তে, নারায়ণাদ্ দ্বাদশাদিত্যা বসবো রুদ্রাশ্চ, সর্ব্বা দেবতাঃ, সর্ব্বে ঋষয়ঃ সর্ব্বাণি চ ভূতানি নারায়ণাদেব সমুৎপদ্যন্তে, নারায়ণে প্রবর্ত্তন্তে নারায়ণে প্রলীয়ন্তে। অথ নিত্যো দেবঃ, একো নারায়ণো ব্রহ্মা চ নারায়ণঃ শক্রশ্চ নারায়ণো রুদ্রশ্চ নারায়ণো দ্বাদশাদিত্যাশ্চ নারায়ণো বসবোঽশ্বিনৌ চ নারায়ণঃ সর্ব্বে ঋষয়শ্চ নারায়ণঃ কালশ্চ নারায়ণো দিশশ্চ নারায়ণো বিদিশশ্চ নারায়ণোঽধশ্চ নারায়ণ ঊর্দ্ধঞ্চ নারায়ণো মূর্ত্তামূর্ত্তঞ্চ নারায়ণো অন্তর্বহিশ্চ নারায়ণো নারায়ণ এবেদং সর্ব্বং যদ্ভূতং যচ্চ ভাব্যম্। অথ নিত্যো নিষ্কলো নিরাখ্যাতো নির্ব্বিকল্পো নিরঞ্জনঃ শুদ্ধো দেব একো নারায়ণো ন দ্বিতীয়োঽস্তি কশ্চিৎ। য এবং বেদ বোধঞ্চ সারথিং কৃত্বা মনঃ-প্রগ্রহবান্ পুমান্ প্রয়াতি পরমং পাবনং বিষ্ণ্বাখ্যং পদমব্যয়ম্। এতদ্বৈ নারায়ণস্যোপনিষৎ। যো বৈ নারায়ণোপনিষদমধ্যেতি স সর্ব্বেভ্যো ঘোরেভ্যো বিমুক্তো ভবতি স সর্ব্বান্ কামানবাপ্নোতি, ব্রহ্মত্বঞ্চ গত্বা অমৃতত্বঞ্চ গচ্ছতি। ওমিত্যগ্রে ব্যাহরন্নম ইতি পশ্চান্নারায়ণায়েত্যুচ্চার্য্য উপতিষ্ঠেৎ। ওমিত্যেকাক্ষরং নম ইতি দ্ব্যক্ষরে নারাণায়েতি পঞ্চাক্ষরাণ্যেতদ্বৈ নারায়ণস্যাষ্টাক্ষরং পদং যো বৈ নারায়ণস্যাষ্টাক্ষরং পদমধ্যেতি, সোঽনুপপ্লবঃ সর্ব্বমায়ুরেতি রায়স্পোষং গোঽপত্যং বিন্দতে প্রাজাপত্যং ততোঽমৃতত্বমশ্নুতে ইতি শ্রুতিঃ। প্রত্যগানন্দং ব্রহ্ম প্রণবস্বরূপম্। ওঁ—অকার উকার মকার ইত্যনেকধা সমভবৎ। তদেবং শ্রুত্বায়ং তদ্ দৃষ্ট্বা মুচ্যতে যোগী জন্মসংসারবন্ধনাৎ। ওঁ নমো নারায়ণায়েতি শঙ্খ-চক্র গদা-পদ্মধরং তস্মান্মন্ত্রোপাসনাদ্ বৈকুণ্ঠভুবনলোকং গচ্ছতি। ইদং পুণ্ডরীকং বিজ্ঞানঘনং তস্মাত্তড়িদাভমাত্রং দিবমুৎপ্রকাশম্ ব্রহ্মণ্যো দেবকীপুত্রো ব্রহ্মণ্যো মধুসূদনঃ। সর্ব্বভূতস্থমেবং নারায়ণরূপমকারণম্। পরংব্রহ্মস্বরূপ মমৃতত্বম ভবদমৃতস্য স্বমভবৎ। এতদর্থ এবাঙ্গিরসং হ্যথবাঙ্গিরসং যোঽধীতে প্রাতরধীয়ানো রাত্রিকৃতং পাপং নাশয়তি সায়মধীয়ানো দিবসকৃতং পাপং নাশয়তি। মাধ্যন্দিনমাদিত্যাভিমুখোঽধীয়ানঃ পঞ্চপাতকোপপাতকান্ নাশয়তি স সর্ব্ববেদপারায়ণং লভতে নারায়ণাৎ সাযুজ্যমাপ্নোতি নারায়ণাৎ সাযুজ্যমাপ্নোতি। ওঁ।

THE ASIATIC SOCIETY
CALCUTTA-700016
No